सांस्कृतं कुराणम्

डा. सत्यदेव वर्मा

CC-0. In Public Domain. Digitized by eGangotri

Rs. 375

CC-0. In Public Domain. Digitized by eGangotri

Recd by Regd. Post.
19-9-94

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

सांस्कृतं कुराणम्

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

सांस्कृतं कराणम्

सत्यदेव वर्मा

इण्डियन बुक गेलरी

CC-0. In Public Domain. Digitized by eGangotri

प्रकाशक

इण्डियन बुक गेलरी
(लक्ष्मी पब्लिकेशन्ज़ का प्रतिष्ठान)
2691, बारादरी, बल्लीमारान्,
दिल्ली-110006.

दूरभाष : 26 58 85
27 53 28

शाखाएं

7/21, अंसारी रोड, दरियागंज, नई दिल्ली ।
37-A, मोतीलाल स्ट्रीट, टी० नगर, मद्रास ।
अड्डा टांडा, जालन्धर शहर ।

2040 वि० (1984 ई०)

मुद्रक

नितिन प्रिंटिंग प्रेस,
मोजपुर, दिल्ली-110053.

CC-0. In Public Domain. Digitized by eGangotri

समर्पणम्

ये हि भूमण्डलान्तर्गतदेशप्रदेशस्था विचारकाः
वसुधैव कुटुम्बकमितित्येवं मन्यन्ते,
सर्वजनहिताय सततं चेष्टन्ते,
भौतिकाध्यात्मिकस्थित्यै लोकस्य सयुजा धिया प्रवर्त्तन्ते,
तेभ्यो विज्ञातेभ्योऽविज्ञातेभ्यश्चासंख्येभ्य
इदम्मेऽनाहतेन नादेन सस्नेहं समर्पणम् ।

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

प्राक्कथनम्

विदितचरमेवैतत् सर्वभूमिविदुषां यन्मुस्लिमलोकस्य मान्यतानामाधारभूतं कुराणं साम्प्रतिके युगे महच्छास्त्ररूपेण विद्योतते । तदेतद् इदानीन्तनजनसांख्यिक्यानुसारं संसारे ईशानुयायिनोऽनन्तरं द्वितीयस्य महासंख्यस्य मुस्लिमवर्गस्य नैकविधानां भावनानां मूलभूतो महाग्रन्थस्सन् विश्ववेद्यां विराराजते ।

अयं ग्रन्थो मूलतोऽर्वभाषायाम् । तेनार्वभूमिवासिन एवेममनधिकेन बुद्धिश्रमेण बोद्धुमलम् । परमर्वभूमेस्सीमा अतिक्रम्यापि यत्र तत्र बहुत्रास्य प्रसारस्स्यादिति कृत्वाऽद्यावधि नैकासु भाषासु अस्य रूपान्तरं जातमस्ति । मुस्लिमविदुषामिदमभिमतञ्चापि यदस्य अधिकाधिकानि विविधभाषारूपान्तराणि लोकहिताय भवेयुः । उत्तरप्रदेशस्थाद् रामपुरात् प्रकाशितस्य १६७१ वर्षीयसंस्करणस्य कुराणहिन्दीरूपान्तरस्य नवमे पृष्ठे प्राक्कथने मौलानः श्रेयोदः (सय्यद) अबुल आला मौदूदी कुराणस्य अनेकभाषारूपान्तरणस्य अवश्यकतां प्रस्तुवन् एवं लिखतिः—

"यतो हि अनेके मुस्लिमातिरिक्ता जनाः कुराणस्य मूलभाषाया अनभिज्ञा अतो मुस्लिमलोकस्येदं धार्मिकं नैतिकञ्च कर्त्तव्यं यत्ते कुराणसन्दिष्टं अन्यास्वपि भाषासु विदध्युस्तथा कुराणप्रज्ञाया मार्गं मुस्लिमातिरिक्तजनेभ्योऽपि प्रशस्तं कुर्युः ।"

तथाविधस्य महासंख्यावतो मुस्लिमसमाजस्य मान्यतानामाधारभूतोऽयं ग्रन्थो भारतवर्षस्य धार्मिकसाहित्यपरम्परानुसारं संस्कृते तत्रापि छन्दसा च कथन्न स्यादितीदं मनसि कृत्वाऽथ च मुस्लिमविद्वद्वर्याणां अबुलआला सदृक्षाणां विचारकाणां लेखात् प्रेरणां लब्ध्वा इत्थंभूतस्यास्य शास्त्रस्य मया छन्दोराजेनानुष्टुभा संस्कृते आविर्भावः कृतः ।

कुरआनशब्दस्यार्थः

कुरआनशब्दस्य कोऽर्थ इति विचारोऽप्यपेक्षितः । कुरआनेत्यस्य शब्दस्य 'पठनं, वाचनम्' इत्यर्थोऽवगम्यते । संस्कृतेन रूपान्तरितस्य कुराणशब्दस्य निर्वचनपूर्वकमयमर्थो बुद्धौ संगच्छते—कौ पृथ्व्यां, राणो घोष इति । यत् पठनेन वाचनेन वा रण्यते घोष्यते तद् हि कुराणम् । धार्मिकपुस्तकानां व्यक्तिशस्समवेत्य वा पठनं च वाचनं च भूलोके प्रायेण प्रथितम् ।

कुराणस्याविर्भावः

ईसवीयसप्तमशताब्द्यां अर्वदेशीये मुहम्मदसाभकालिके मनुष्यसमाजे मूर्त्तिपूजाऽनेकदेववादाभिचारादिप्रदर्शनक्रमो लब्धप्रसर आसीत् । तस्मादभिशापरूपाज् जनजीवनस्य स्वतन्त्रोन्नतिबाधकाद् दुष्क्रमात् समाजजीवनं समुद्धर्त्तुं परिष्कर्त्तुञ्च या वीरमतिर्मुहम्मदसाभस्यान्तरात्मनि उदिता तयाऽनारतं लब्धप्रेरणस्स महाभागः कांश्चित् स्वसहायांश्चित्वा पाषण्डोन्मूलनाय बद्धपरिकरोऽभवत् । इस्लामसाम्प्रदायिकेष्विदं विश्रुतं यत् सहजरताय (हज़रत) मुहम्मदाय अल्लाहो यदा नवीत्वं प्रादात् तत्कालादारभ्य लोककल्याणाय क्रियमाणकार्येषु पथप्रदर्शनाय असत्योन्मूलनाय च ये आदेशा अपेक्षिता अभवंस्तेषां मुहम्मदसाभान्तरात्मनि समयात्समयं अपेक्षानुबन्धी समवतरणारम्भस्समजायत । तच्चादेशसमवतरणं त्रयोविंशतिषु समासु विभिन्नावसरेषु अपेक्षानुसारतः शनैश्शनैः कृत्वा यथोचितं तथा समपद्यतेति । ते चादेशास्ताश्च शिक्षा लघुलघुवचनेष्वपि आविरभूवन् । ते हि अल्लाहादायाता इति

CC-0. In Public Domain. Digitized by eGangotri

कारणात् आयत (संस्कृते आयातः) इति प्रख्यां जग्मुः । एवंविधस्य कुराणेत्यभिधां गच्छतः सूक्तानां (सूरा) येन क्रमेण अवतरणं जातं तेनैव क्रमेण तेषां संकलनं नाक्रियत । अल्लाहादेशात् मुहम्मदसाभेन तेषां संकलनं ग्रन्थौचित्य-दिशैव कृतम् । अवतीर्णस्य आयातसूक्तादिकस्य तेन अग्रतः पश्चान्मध्यतो वा अपेक्षाऽनुसारं यथायोगं स्थाननि-र्धारणं कृतम् । इत्थमन्तिमे पूर्णावतारदिवसे सर्वमशेषतो निर्वृत्तमिति प्रथितम् ।

कुराणस्य लिपिबद्धता सुरक्षाप्रयत्नाश्च

अनुश्रूयते यत् पुरा कुराणं खर्जूरपत्रेषु, अस्थिषु, झिल्लीखण्डेषु च लिपिबद्धमक्रियत । अत्यन्तं श्रद्धालुभि-र्धर्मयुद्धसंरतैरपि परया श्रद्धया कण्ठस्थीकरणेनास्य हृत्सु प्रतिष्ठा कृता । मुहम्मदसाभस्य मृत्योरूर्ध्वं एकदा जायमाने जन्येऽनेके तेऽपि आजिसाज्जाता येषां हृत्सु कुराणं प्रतिष्ठमास्त । सहजरतैः अबूवक्रादिभिस्तदा चिन्तितं यत् कुराणमेकस्मिन् एव आवन्धे कृतं स्यात् सुरक्षार्थम् । सहजरतेन उमरेणापीदं समर्थितम् । मुहम्मदसाभस्य लिपिकः सहजरतो जैध-बिन-सावित-अंसारी अस्मिन् कर्मणि नियोजितोऽभवत् । तेनेदं कार्यं प्रमुखैः मुहम्मदसहायकैः-स्समं समारब्धम् । इत्थं प्रमाणितां कुराणप्रतिलिपिं सज्जीकृत्य तां सहजरतस्य अबूवक्रस्य सन्निधौ न्यदधन् यतस्स एव तदानीं इस्लामराज्यस्य प्रमुखं पदमलंकरोतिस्म । तत ऊर्ध्वं सा प्रतिस्तदार्याति सहजरतमुमरं तत्पश्चाच्च तद्दुहितरं सहजरतां हफसामियायेति विश्रुतम् । परस्तात् प्रवर्धमाने इस्लामराज्यविस्तरे कुराणस्य शिक्षण-वाचनादौ समताबुद्ध्या प्रेरितेन सहजरतेन उस्मानेन तस्यानेकाः प्रतिलिपयस्सज्जिताः कारिताः, ताश्च प्रत्येकं मिश्रवसरायमनश्यामबहरीनादिप्रदेशानां राज्यपालानां सन्निधौ प्रेषिताः, ते च प्रेरिता यत् सर्वत्र कुराणस्य शिक्षणं वाचनञ्च तदनुसृत्यैव भवेत् । महाकाले, मदहीने, दमिश्के, मराकशे च तास्ताः प्रतिलिपयोऽद्यापि प्रतिष्ठिता दरीदृश्यन्ते । यदिदमाधुनिकं कुराणं तत् तासामेव शुद्धप्रतिलिपिरूपेण तिष्ठति ।

कुराणस्य स्वरूपम्

कुराणं हि आयातानामायतनम् । ते ह्यायाताः संख्यायां अष्टचत्वारिंशदुत्तरद्विशताधिकषट्सहस्रम् अल्पाधिकभेदेन सूक्तेषु विभक्ताः । सूक्तानां तु संख्या चतुर्दशोत्तरैकशतम् । कतिपयसूक्तानि निरंशानि सांशानि वाप्यादाय एकैकस्य पारायणस्य (सुपारा) विभागादत्र त्रिंशत्पारायणात्मकं कुराणं सम्पन्नम् । पाठात् प्रतिदिनं एकैकं पारायणं निर्वर्त्य त्रिंशच्चान्द्रमसदिनेषु त्रिंशत् पारायणानां पाठेन समग्रस्यापि कुराणस्य वाचनमभिप्रेतम् । पारायणानां योऽयं विभागस्तत्र कस्तर्कों मूले इति त्वगम्यं बुद्धेः । अस्मिंस्तु सांस्कृते कुराणे श्लोकानां संख्या चतुस्त्रिंशदुत्तरपंचशतोर्ध्वनवसहस्रम् (९५३४) अस्ति ।

परस्परैकात्म्यसिद्धौ कतिपयनिदर्शनानि

कुराणस्यास्य आविर्भावात् प्राक् अर्वभूमिष्ठे बृहज्जनसमुदाये योऽप्याचारविचारप्रपंचो युगाद् युगं प्रतिष्ठितोऽतिष्ठत् तमधिकृत्य विधिनिषेधपरतामयं वाङ्मयं अत्र स्थानात् स्थानं प्रकटीभवति । सर्वजगतां प्रभोरल्लाहस्य सर्वगुणसम्पन्नता, एकेश्वरवादः, पुनर्जन्म, श्रद्धातत्त्वप्रतिष्ठादिकं अत्र नैकेषु प्रसंगेषु तथा प्रतिपादितं यथेतो बहुकालपूर्वेषु शास्त्रेषु । तद् यथा—

१. अल्लाहस्य सर्वगुणसम्पन्नता एकेश्वरवादश्च

कुराणम् २ सूक्तम्, १०७ आयातः

वित्थ किन्नैव राज्यानां व्योम्नामुर्व्यास्तथैव च ।
स हि सर्वेशिताऽल्लाह इत्यादिः ।

२.२५५

ईड्योऽल्लाहं विना नान्यस्सजीवश्शाश्वतोऽप्यसौ ।
न तन्द्रा न पुनर्निद्रा बाधते तं कदाचन ॥

यजुर्वेदः, २३.१

हिरण्यगर्भस्समवर्त्तताग्रे,
भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमाम्,
कस्मै देवाय हविषा विधेम ॥

CC-0. In Public Domain. Digitized by eGangotri

२६.६१
अनुयुंक्ष्व त्वमेतान् को धरित्रीं वियतस्तथा।
सृष्टवान्, कर्मयुक्तौ कस्सोमसूर्यौ तथाऽकरोत् ।।
तेऽनिवार्यं प्रवक्ष्यन्ति ह्यल्लाहस्सृष्टवानिमान् ।

ऋग्वेदः, १०, १२, १६०
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ।

११.१२३
परोक्षं यद् धरित्र्याञ्च यद् वियत्सु च तिष्ठति।
अल्लाहस्यैव तत् सर्वम् ।

२८.८८
नाल्लाहेन समं त्वन्यं प्रतीष्टं त्वञ्च गायतात् ।
प्रतीष्टो नेतरस्तस्मात् इत्यादिः ।

यजुर्वेदः, ३२.३
न तस्य प्रतिमाऽस्ति यस्य नाम महद्यशः ।

४२.२८
कीर्णां स्वां दयां कुरुते इत्यादिः ।

ऋग्वेदः, १.१५.१००
मरुत्वान्नो भवत्विन्द्र ऊती: ।

६५.८
किमल्लाहो न निर्णेता निर्णेतृनतियाय वै ।

११४.१.३
कथ्यतां शरणं यामि लोकभर्त्तुस्तथैव च,
महाराजस्य लोकानामीड्यस्यैषां पुनस्तथा ।

यजुर्वेदः, २३.३
यः प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव इत्यादिः ।

२०.१३२
त्वान्न याचामहे वयम्, कामपि सम्पदां तावत्,
प्रदद्मो वयमेव तु, सम्पदो युष्मदर्थे वै ।

ऋग्वेदः, १, २२, १६४
द्वा सुपर्णा सयुजा सखायस्समानं वृक्षं परिषष्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्योऽभिचाकशीति ।

२४.३०.३१
श्रद्धरान् ब्रूहि तिष्ठन्तु ह्यधोदृष्टय एव ते ।
गुह्यांगानि पुनस्स्वानि रक्षन्तु सततं किल ।।
शृंगारं स्वं न चैवैता दर्शयेयुर्विहाय तत्,
प्रोद्भिन्नं यद् भवेत्तासाम् इत्यादिः ।

धर्मशास्त्रम्
श्रवणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्
संकल्पोऽध्यवसायश्च कार्यनिष्पत्तिरेव च ।
अधः पश्यस्व मोपरि अन्तरा पादकौ हर,
मा ते कश्मलकौ दृश्यन् स्त्री हि ब्रह्मा बभूविथ।

३२.६
व्यधात्तं साकृतिं पश्चात् स्वीयमात्मानमप्यथ ।
तस्मिन् न्यवेशयच्चैव ।

उपनिषद्,
यदिदं किं च प्राण एजति निश्रितम् ।

३५, ४३
अल्लाहस्य विधिं यूयं परिवृत्तिं गतं क्वचित्,
व्याक्षिप्तं न तथैवामुमीक्षिष्यध्वे कदाचन ।

ऋग्वेदः, १, ६, २५
अदब्धानि वरुणस्य व्रतानि ।

ऋग्वेदः, १०.१.१०
नकिरस्य प्रमिनन्ति व्रतानि ।

CC-0. In Public Domain. Digitized by eGangotri

३६, ३
यैश्चान्यैर्मित्राणि रक्षकाणि हि,
निर्मितानि ततस्तावद् व्यतिरिक्तानि ते जनाः ।

ऋग्वेदः, ६.४५.१६
य एक इत तमुष्टुहि इत्यादिः ।

(आहुरित्थम्)
निर्णयं सत्यमल्लाहस्तेषु तावदवाप्स्यति,
यत्र भेदमतिस्तेषाम् ।

ऋग्वेदः, ८.१.१
माचिदन्यद् विशंसत, सखायो मा रिषण्यत ।

५१, ५७
वृत्तेस्तेभ्यो न मेऽपेक्षा, न मेऽपेक्षा च तिष्ठति,
भोजयेयुर्हि यत्ते माम् ।

ऋग्वेदः, १, २२, १६
अनश्नन्नन्योऽभिचाकशीति ।

५७, ३
स एवादिस्स एवान्तो मध्योऽसौ स बहिः पुनः ।
सर्वविद् वर्त्तते चासौ ।

विचैति चान्ते विश्वमादौ ।

२. अधर्मनाशो धर्माभिवृद्धिः

४, ७५
युध्येरंस्ते यदल्लाहाद् दर्शितेऽध्वनि सर्वदा ।

अथर्ववेदः, १.१६.४
यदि नो गां हंसि यद्यश्वं यदि पूरुषम्, तन्त्वा सीसेन
विध्यामो यथा नोऽसोऽवीरहा ।

६, ७३.७४
युध्यस्व त्वं हि वाग्घर !
श्रद्विहीनैश्च पाषण्डैर्निष्ठुरस्तैस्समं भव ।

यजुर्वेदः, १८, ७०
वि न इन्द्र मृधो जहि, नीचायच्च पृतन्यतः ।
योऽस्मानभिधा सत्यधरं गमयातमः ।

४, ८४
त्वञ्चैवाल्लाहवर्त्मनि युध्यस्व, तेन—।
प्रोत्साह्यास्तेऽपि युद्धाय इत्यादिः ।

यजुर्वेदः, १८, ७१
मृगो न भीमः कुचरो गिरिष्ठाः,
वि शत्रूंस्ताढ़ि विमृधो नुदस्व ।

४, ९१
तांस्ततो; निगृहीतान् विधायोर्ध्वं समुज्जासय
(भोः ! ध्रुवम्) ।

३. छलकपट-दण्डनीतिः

८, ५५.५८
साम्मुख्यं ते व्रजन्ति चेत्, त्वया युद्धे समं तैस्तत्
चरितव्यं तथा यथा । तेषां पार्ष्णेस्समुत्पन्नो दरो
हृत्सूपजायते ।

अथर्ववेदः, ७.३४, १
अधस्पदं कृणुष्व ये पृतन्यतः

६, १३
योत्स्यसे त्वन्न किं लोकैर्भांक्षुर्ये तु सम्विदः ?

श्रीमद्भागवतम्, ३.२६, १३
द्विषतः परकाये माम् मानिनो भिन्नदर्शिनः ।
भूतेषु बद्धवैरस्य न मनश्शान्तिमृच्छति ।

CC-0. In Public Domain. Digitized by eGangotri

४. श्रद्धातत्वस्य प्रतिष्ठा

३, १३९
प्रभुत्वं स्याद्धि युष्माकं यूयं श्रद्धाधरा यदि।
३, १४९
श्रद्धावन्तो जना यूयं तान् यद्यनुसरिष्यथ।
श्रद्धावन्तो न ये सन्ति परावृत्तान् हि वस्तु ते।
विधास्यन्ति, ततो यूयं परां हानिं गमिष्यथ।
३, १५२
अल्लाहोऽनुग्रहागारश्श्रद्धराणां कृते महान्।
६, ११९
बिभीत यूयमल्लाहात् श्रद्धरास्संगतं तथा। सत्य-वादिजनैस्साधं कुरुध्वं (गतसंशयाः)।
१६, ९७
पुमान् वा स्यादथो स्त्री वा योऽपि भद्रे त्ववर्त्तत।
श्रद्दधानो यदि स्यात् स वयं तस्मै न संशयः,
शुभां वृत्तिं प्रदास्यामः।
६१.१४
श्रद्धरेभ्यस्त्वयच्छाम वयं साह्यमुपस्थिते,
विरोधे तद् द्विषां येन गौरवात् प्राभवन् हि ते।
६४, ८
तदल्लाहे तथा चास्य वाग्धरे द्योत एव च,
वतारिते किलास्माभिर्जायध्वं श्रद्धराः पराः।

ऋग्वेदः, १०, १२, १५१
श्रद्धां देवा यजमाना वायुगोपा उपासते। श्रद्धां हृदय्याकूत्या श्रद्धया विन्दते वसु।

ऋग्वेदः
श्रद्धां प्रातर्हवामहे श्रद्धां मध्यन्दिनं परि।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः।

यजुर्वेदः, १९, ७७
अश्रद्धामनृतेऽदधात्, श्रद्धां सत्ये प्रजापतिः।

५. पुनर्जन्म-मान्यता

७, २९
यद्वत् पुरा ह्यसौ युष्मानजीजनत्
तद् वत् पुनर्यूयं भविष्यथ।

७, ५७
वयञ्चापीत्थमेव तु, प्रापयिष्याम उद्बोधं समुद्धृत्य मृतान् जनान्।

१०, ४
असन्देहमिमं सर्गं कुरुतेऽसौ पुनस्ततः।
सर्जनं कुरुते……।

१०, ३४
अल्लाहस्तु सृजत्यत्र स एवाऽनुसृजत्यपि।

११, ७
मरणाद् यूयमुत्तरम्, नेष्यथोद्बोधनं सत्यम्।

यजुर्वेदः, ४०, ३
असुर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्यापि गच्छन्ति इत्यादिः।

ऋग्वेदः, १०.४.५९
पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्।
पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां या स्वस्तिः।

यजुर्वेदः, ४, १५
पुनर्मनः पुनरायुर्म आगन् पुनः प्राणः पुनरात्मेत्यादिः।

अथर्ववेदः, ७, ६, ९, ६७
पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं चेत्यादिः।

तैत्तिरीयोपनिषत् पंचमोऽनुवाकः
"भूर्भुवस्सुवः" अनेन त्रिलोकवर्णनम्।

CC-0. In Public Domain. Digitized by eGangotri

१६, ६५

गतप्राणां धरां पश्चात् प्राणैस्तावदयोजयत् ।

बृहदारण्यकोपनिषद् षष्ठे चतुर्थं ब्राह्मणम् २५

भूस्ते दधामि, भुवस्ते दधामि, स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ।

१६, ६७

स्मृतिं याति न किं नरः, सृष्टोऽसौ प्राक् किलास्माभिर्यदाऽऽसीन्न स किंचन ?

भगवद्गीता, २, २२

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।

२१, १०४

यद् वत् कृतस्समारम्भस्सर्गस्य प्रथमस्य तु ।
पुनरावर्त्तनं तावद् विधास्यामो ह्यमुष्य तत् ।।

भगवद्गीता, ८, ६

यं यं वाऽपि स्मरन् भावं
त्यजत्यन्ते कलेवरम्
तं तमेवैति कौन्तेय,
सदा तद्भावभावितः ।।

२२, ५, ७

तत्पश्चाच्छिन्नगुरूगान् वयं खलु, जनयामः पुनर्युष्मान् । संशयो नात्र चाल्लाहस्तान् सर्वानुद्धरिष्यति, कवरेषु शयाना ये ।

८६, ५, ८

नरस्तद् बुध्यतां केन वस्तुनाऽसावसृज्यत, सामर्थ्यं स विभर्त्ति हि प्रत्यावर्त्तयितुं तन्तु ।

६. कुराणे प्राग्भवशास्त्रास्तित्वस्वीकार आदरबुद्धिप्रदर्शनञ्च

२, ४१

श्रद्धत्त मे प्रकाशं वः प्राक्पार्श्वस्थानुमोदकम् ।

२, ५७

अदुष्टाः पूर्वजेषु स्मः कृतदोषास्स्वयं हि ते ।

३, ३-४

प्रकाशं गमितं पुरा, समर्थयन्त्स तत् सर्वं तौरेतेञ्जीलके यथा ।
इतः पूर्वं हि लोकेभ्यो मार्गसन्दर्शनाय च ।
निकषत्वेन चैवैभ्योऽगमयत् स प्रकाशताम् ।

५, ४८

यत् किंचिच्चापि वै शास्त्रं पुराऽतिष्ठदितस्तथा ।
पोषकं तस्य तत्येदं सुसंरक्षकमप्यथ ।

६, ९३

पुस्तकञ्चेदमस्ति तत्, प्रकाशं यत् समानीतं किलास्माभिस्तथैव यत् । सौभाग्यस्य करन्तावत् पोषणं यदितः पुरा (प्रकाशं तेन चानीतम्) ।

१०, ३७

वर्त्तते हि समर्थकम्, परं पौरस्त्यवृत्तस्य विस्तरञ्चैव वर्त्तते ।

CC-0. In Public Domain. Digitized by eGangotri

२०, १३३

प्रमाणं नोपयातं किं तानमुष्याखिलस्य तु ।
प्राचीनेषु हि शास्त्रेषु यदन्तर्विश्य वर्त्तते ।।

२८, ५२

अयच्छाम वयं येभ्यो लोकेभ्यः प्राग्घि पुस्तकम् ।
विश्वसन्ति हि ते त्वस्मिन् ।

४६, १२

पुस्तकं वर्त्तते चेदमर्वाणां भाषया पुनः ।
अनुमोदनकं तावत् ।

तदित्थं कतिपयैस्तुलनात्मकैरेवंविधैरुपन्यासैः, परिशिष्टभागप्रदर्शितविविधसंस्कृतार्ववाक्प्रमुखकतिपयशब्दार्थसामान्यताभिश्च इदमस्माकं निश्चप्रचं यत् कुराणं बहुकिंचित् प्राक्तनं समर्थयति जनजीवनप्रणाल्याश्च प्राग्भवैस्तदुत्तरवर्त्तिभिरपि साम्प्रतिकैर्वैदिकसभ्यतानुयायिभिश्च सममैकात्म्यं नैकेषु क्षेत्रेषु समुद्भावयति ।

महर्षिणा स्वामिना कर्मैकव्रतिना स्वामिदयानन्दमहाभागेन निजजन्मन उत्तरवर्त्तिकाले आमृत्युं वेदप्रतिकूलतावशात् यदहिंसात्मकं मृत्पाषाणकाष्ठधात्वादिकृतभगवन्मूर्त्तिपूजाविरोधान्दोलनं भारतवर्षे प्रवर्त्तितम्, विविधाभिचाराणां यः प्रखरो विरोधो लेखव्याख्यानशास्त्रार्थादिभिस्सततं विहितस्तन्निभ एव मूर्त्तिपूजाऽनेकदेवतावादाभिचारादीनां विरोधस्तत् कारणाच्च निरन्तरं सशस्त्रसंघर्षोऽप्यर्वभूमौ महोत्साहवता मुहम्मदमहाभागेनाऽपि निजजीवनकाले भृशं विहित इति कस्य न ऐतिह्यज्ञस्य विदितचरम् ।

इतिहासस्साक्षी यत् प्राक्कालेऽर्वभूमिरपि वैदिकाचारविचारसम्पत्तेस्सुदोलेवाऽतिष्ठत् । तदानीन्तनाल्लभ्यमानादर्वभूमेस्साहित्यादिदं सुस्पष्टं जायते । मान्यान्मुहम्मदात् त्रिशतोत्तरद्विसहस्रवर्षाणिप्राक् लबी-किने-अरब-तनविने-तुर्फा इत्याख्यः कश्चिदर्वकविर्वेदज्ञानं भारतवर्षञ्च प्रशंसन् कविताशाखामारुह्य कोकिलवत् तदानीन्तनार्वभाषया यच्छन्दसा कूजति तत् कस्य न सहृदयस्य हृतन्त्रीकम्पकं स्यात् :—

अया मुबारे कल अरज पुशैय नोहा मिनल हिन्दे ।
व अरादकल्लाहः मन्यो नज्जेल जिकर तुन ।।१।।
बहल तज्जलोयतुन एनाने सहबी अरब अतुन जिकरा ।
बहा जेही यो नज्जेलुर्रसूल मिनल हिन्दुन ।।२।।
यकूलुनल्लाहः या अहलल अरज आजमीन कुल्लहुम ।
फतवेउ जिकर तुल वेद हुक्कुन मालम योनज्जेल तुन ।।३।।
वहो ना आलमुस्साम वल युजर निनल्लाहे तन ज़ीलन ।
फए नम्मां यो अरबीयो मुत वेअन यो वशेरीयो न जातुन ।।४।।
वइसनैन हुया रीक अतर नासेहीन क अ खुबतुन ।
व असनात आला ऊदन वहो वाम शए रतुन ।।५।।

(सेअरुल आकुल, पृष्ठ २५७)

—हे पुण्यभूमे हिन्दुभूमे ! त्वं धन्यासि यत् ईश्वरस्स्वज्ञानप्रकाशाय त्वामाचिनोत् ।।१।।

स हीश्वरस्य ज्ञानप्रकाशः चतुःप्रकाशस्तम्भमयस्सममपि जगत् प्रकाशयति हिन्दुभूमौ च महर्षीणां माध्यमात् चतुर्भिः प्रकारैराविरभूत् ।।२।।

CC-0. In Public Domain. Digitized by eGangotri

अथ चाऽल्लाहस्सर्वजगतां मनुष्यानादिशति यन्मम ज्ञानं यद् वेदस्तदनुसारमेव यूयं जीवनं यापयत ।।३।।

ते हि सामयजुषी ज्ञानस्यागारे य अल्लाहेन प्रदत्ते । अतो हे मम बान्धवाः ! यूयमेते स्वीकुरुत यद् एनेऽस्मान् मोक्षस्यायनं प्रदिशतः ।।४।।

अथ च द्वावन्यौ ऋक् च अतर च भवतो यावस्मान् भ्रातृत्वविधिं शिक्षयतः । यो ह्येनयोः प्रकाशस्य परिधिं प्रविष्टस्स कदापि तमसाऽऽलिप्तो न भवति ।।५।।

एवंविधाभिर्वाग्भिरपीदं सर्वतोभावेन पुष्टं जायते यत् पुरा वैदिकजनास्सार्वभौमतया अनेकत्वे एकत्व-दर्शनरूपया विश्वसंस्कृत्या सर्वत्र परस्परं सम्बद्धा अतिष्ठन् । गच्छता तु कालेन बत ! तत्पारस्परिकं सम्पर्कसूत्रं यतः कुतश्चित् शिथिलं च छिन्नं चापि वा जातम् । तदपि तत्प्रमाणानि नैकशोऽद्यापि यत्र तत्रोपस्थितानि दृश्यन्ते । पारस्परिकसम्पर्केण तेषां सम्पर्कसूत्राणां पुनरपि प्रतिष्ठा, वैचारिकव्यावहारिकसन्निधिश्चापि अत्यन्तमपेक्षिता-ऽद्यापीति को न विचारशीलो विश्वबन्धुताप्रियो मानवस्समर्थयिष्यति । अतः पुनरपि सम्पर्कप्रतिष्ठादिशायां नैके भागीरथाः प्रयत्ना इतोऽपि ततोऽपि सर्वतोऽपि अकालक्षेपं अपेक्षितास्सन्ति । ममेदं सांस्कृतं कुराणं विघटितं मनुष्य-समाजं पुनरपि संघटयितुं क्षमं निमित्तं भूयादिति मे भूयोभूयो मनःकामना ।

ममास्य छन्दोबन्धप्रयासस्याधारो मारमाड्यूक पिक्थालस्यांगलभाषाकुराणं अथ च मुहम्मदफारूख-खानस्य मकतबा-अल-हसनात-रामपुर-उत्तरप्रदेशात् १९७१ तमे वर्षे प्रकाशितं हिन्दीकुराणम् । अहमेनयोरूपान्त-रयो र्द्वारेण मूलस्यार्थबोधाय प्रतिक्षणं सक्षणोऽतिष्ठम् ।

अत्र येऽपि शब्दा मूलार्थानुगा न सन्ति ते छन्दःकारणात् अपेक्षिता अतश्च कोष्ठान्तर्हितास्तिष्ठन्ति ।

इदं महत्कार्यं सम्पादयता मयाऽनेकेऽरबीभाषाशब्दा दृष्टा ये ध्वन्यात्मकतया संस्कृतेनातिसाम्यमावहन्ति । भाषाशास्त्रानुमोदितातिसहजप्राकृतिकभाषिकपरिवर्त्तनैस्ते संस्कृतेऽपि तानेव तुल्यरूपान् समुचितार्थानुद्गिरन्ति । तादृशाः कतिपये शब्दा मया संस्कृते तत्तन्निरुक्तिभिस्समं परिशिष्टे संकलिताः ।

निष्पक्षपाता विपश्चित एव जानन्तु यदयम्मे प्रयासः कियान् सगुणः । यद्यत्र विद्वांसः कान्यपि स्खलितानि पश्यन्तु तद् विषये मां सावबोधं कुर्वन्तु येनाग्रिमे प्रकाशने तद् विषयेऽप्रमत्तस्तिष्ठेयम् ।

कृतज्ञता-प्रकाशनम्

अस्य महतः कार्यस्य मुद्रणप्रकाशनयोस्सूत्रधारः डा० परमानन्दगुप्तः कुरुक्षेत्रविश्वविद्यालये साम्प्रतं संस्कृतविभागे रीडरपदे विराजते । अस्य ग्रन्थस्य मुद्रणं प्रकाशनञ्च तत्प्रयत्नाभावे कदाऽपि नासेत्स्यत् । अयमेव प्रियो महानुभावोऽत्र दिग्दर्शकोऽस्माकम् । अस्य प्रियमित्रस्य प्रयत्नास्सर्वतोभावेन हृद्याः प्रशस्याश्चास्मिन् कर्मणि । तदनन्तरं लक्ष्मीप्रकाशनस्य श्री राजेन्द्रगुप्तोऽत्र वर्णनार्हः । अयं महानुभावस्सिंहवद् विशालहृदयस्सन् अस्य ग्रन्थस्य सर्वमपि भारं स्वसमर्थस्कन्धयोरुदवहत् । प्रारम्भिकप्रूफवाचनशोधनादि-कार्येऽनन्यमनसा रममाणोऽयं ग्रन्थमिमं प्रकाशनयोग्यं कृत्वा प्रकाशतामानयत् इति मे शतशो धन्यवादानर्हति । प्रो० विमलादेवी, संस्कृतप्राध्यापिका, फगवाड़ा (पंजाब) अस्यानुलेखने प्राक् पुष्कलां सहायतामकरोत् इत्यहं तामपि हृदयेनाभिनन्दामि । अहं श्रीमुहम्मदफारूखखानस्य हिन्दीकुराणस्य (मकतबा-अल-हसनात, रामपुर, उत्तरप्रदेश) अथ च मारमाड्यूक पिक्थालस्य आंगलभाषाकुराणस्याग्रे निजामाधमर्ण्यतां प्रकाशयामि यतस्तद्द्वारेण मया कुराणस्यान्तारूपमीक्षितम् ।

अन्ततोऽहं निवेदयामि यदिदं सर्वं मया स्वान्तस्सुखाय चेष्टितम् । अहमिमं ग्रन्थं सातिशयेन प्रसादेन संसारस्य संस्कृतज्ञानां समक्षं सद्गन्धमुद्गिरन्तीं केतकस्रजमिव सविनयं समर्पयामि । अतिसामान्यसंस्कृतज्ञोऽपि जन

CC-0. In Public Domain. Digitized by eGangotri

इमं सुखेन रसयितुमलं स्यात् । अस्यच्छन्दोबद्धतया कतिपयैः पारायणैरेव जिह्वाग्रेऽस्य बहुकिंचिदुपस्थितिः स्याच्च ।

अस्त्विदानीमहमिदमेव विनिवेद्य विरमामि—

स्वान्तस्सुखाप्तये कृत्वा कुराणं सांस्कृतं त्विदम् ।
भूत्यै सर्वस्य लोकस्य प्रस्तौम्येनदहं मुदा ।।

विश्वस्य विदुषो नत्वाऽसकृदेतद् वदाम्यहम् ।
मदीया एव दोषास्तु गुणास्त्वत्र विपश्चिताम् ।।

मकरसंक्रान्तिः २०४० वि०
यमुनानगरम्
(हरियाणा)

साधुविदुषामनुचरः
सत्यदेवो वर्मा

CC-0. In Public Domain. Digitized by eGangotri

विषय-सूची

प्राक्कथनम्

1. सूक्तम्—उपोद्घातः (अल-फातिहा) 1
2. सूक्तम्—गौः (अल-बकरा) 2
3. सूक्तम्—इमरान कुलम् (आले-इमरान) 19
4. सूक्तम्—निशा (अन-निसा) 30
5. सूक्तम्—आहारपीठिका (अल-माइदा) 42
6. सूक्तम्—पशवः (अल-अन-आम) 51
7. सूक्तम्—आरोहः (अल-आराफ़) 61
8. सूक्तम्—युद्धसंत्याजितानि (अल-अनफ़ाल) 73
9. सूक्तम्—प्रायश्चित्तम् (अत-तौबा) 78
10. सूक्तम्—यवनाशः (यूनुस) 87
11. सूक्तम्—सूदः (हूद) 94
12. सूक्तम्—यूषपः (यूसुफ) 101
13. सूक्तम्—ह्लादः (अर-रअ्द) 108
14. सूक्तम्—अब्रह्मः (इब्राहीम) 111
15. सूक्तम्—हिज्त्रः (अल-हिज्र) 114
16. सूक्तम्—मधुमक्षिका (अन-नह्ल) 117
17 सूक्तम्—बनीश्वरालीनाः (बनी इस्रायील) 124
18. सूक्तम्—गह्वरम् (अल-कह्फ) 130
19. सूक्तम्—मर्यमा (मरियम) 136
20. सूक्तम्—ता० हा० (ता० हा०) 140
21. सूक्तम्—देवाः (अल-अम्बिया) 145
22. सूक्तम्—तीर्थयात्रा (अलहज्ज) 150
23. सूक्तम्—श्रद्धराः (मन्मनसः) (अल-मोमिनून) 155
24. सूक्तम्—अनूरुः (अरुणः) (अन-नूर) 159
25. सूक्तम्—बिवेकः (अल-फुरकान) 164
26. सूक्तम्—शुक्राः (अश-शु-अरा) 168

CC-0. In Public Domain. Digitized by eGangotri

27. सूक्तम्—पिपीलिकाः (अन-नम्ल) 173
28. सूक्तम्—कथ्यम् (अल-कसस) 178
29. सूक्तम्—अणकलूता (अल-अनकबूत) 183
30. सूक्तम्— रौमाः (अर-रूम) 187
31. सूक्तम्—लुक्मानः (लुकमानः) 190
32. सूक्तम्—प्रणिपातः (अस-सजदा) 192
33. सूक्तम्— गणाः (अल-अहज़ाब) 194
34. सूक्तम्—सबः (सबा) 199
35. सूक्तम्—कर्त्ता (फातिर) 202
36. सूक्तम् – हयासीन (या सीन) 205
37. सूक्तम्—पंक्तिगाः (अस-साफ़्फ़ात) 208
38. सूक्तम्—सॉद 212
39. सूक्तम्—व्यूहाः (सरणशीलाः व्यूहा) (अज़-ज़ुमर) 215
40. सूक्तम् – मन्मनाः, क्षन्ता (अलमोमिन, ग़ाफिर) 219
41. सूक्तम्—संस्तुतिः, विशदीकृतम् (हा० मीम० अस-सजदा, फ़ुस्सिलत) 224
42. सूक्तम्—मन्त्रणा (अश-शूरा) 227
43. सूक्तम्—रुक्मरंजनम् (अज़-ज़ुखरुफ़) 230
44. सूक्तम्—दुन्वानः (अद्-दुखान) 233
45. सूक्तम्—जान्वासनाः (अल-जासिया) 235
46. सूक्तम्—वहवक्रवालुकावप्रम् (अल-अहक़ाफ) 237
47. सूक्तम्—मुहम्मदः 240
48. सूक्तम्—विजयः (अल-फ़त्ह) 243
49. सूक्तम्—रहो वेश्मानि (अल-हुजूरात) 246
50. सूक्तम्—क़ाफ़ 248
51. सूक्तम्—जारवाताः (अज़-ज़ारियात) 250
52. सूक्तम्—पर्वतः (अत-तूर) 252
53. सूक्तम्—न्यग्भम् (अन-नज्म) 254
54. सूक्तम्—कम्रः (अल-कमर) 256
55. सूक्तम्—दयावान् (अर-रहमान) 258
56. सूक्तम्—आपतयालुः (अल-वाकिआ) 260
57. सूक्तम्—लोहः (अल-हदीद) 262
58. सूक्तम् - विवादिनी (अल-मुजादला) 265
59. सूक्तम्—निर्वासनम् (अल-हश्र) 267

CC-0. In Public Domain. Digitized by eGangotri

60. सूक्तम् परीक्षणीया (अल-मुम्तहना) 269
61. सूक्तम् – बद्धपंक्तयः (अस-सफ्फ) 271
62. सूक्तम्—समूहः (अल-जुमुआ) 272
63. सूक्तम्—पाषण्डिनः (अल-मिनाफिकून) 273
64. सूक्तम्—भ्रमोऽपास्तः परस्परम् (अत-तगाबुन) 274
65. सूक्तम्—त्यागः (अत-तलाक़) 276
66. सूक्तम्—परीहाणम् (अत-तहरीम) 278
67. सूक्तम्—सर्वेणत्वम् (अल-मुल्क) 280
68. सूक्तम्—लेखनी (अल-क़लम) 282
69. सूक्तम्—यथार्थता (अल-हाक्का) 284
70. सूक्तम्—उदङ् यास्यत् हि सोपानम् (अल-मआरिज) 286
71. सूक्तम्—नहुषः (नूह) 288
72. सूक्तम्—जिन्न (अल-जिन्न) 289
73. सूक्तम्—परिधानोपसंवीत (अल-मुज्ज़ाम्मिल) 291
74. सूक्तम्—प्रावारावृत (अल-मुद्दस्सिर) 292
75. सूक्तम्—मृताभ्युत्थानम् (अल-क़ियामा) 294
76. सूक्तम्—कालो वा मानवो वा (अद-दह्र) 295
77. सूक्तम्—प्रणिधयः (अल-मुरसलात) 297
78. सूक्तम्—उदन्तः (अन-नबा) 299
79. सूक्तम्—नाशयितारः (अन-नाज़िआत) 300
80. सूक्तम्—भृकुटीं सोऽकरोत् (अबस) 301
81. सूक्तम्—विपर्यासः (अत-तकवीर) 302
82. सूक्तम्—विभेदनम् (अल-इनफितार) 303
83. सूक्तम् – प्रतारणा (अत-ततफ़ीफ़) 304
84. सूक्तम्—स्फोटनम् (अल-इनशिक़ाक़) 305
85. सूक्तम्—हर्म्य (अल-बुरुज) 306
86. सूक्तम्—तारकम् (अत-तारिक) 307
87. सूक्तम्—प्रोद्गतः (अल-आला) 308
88. सूक्तम्—पर्यापतिष्णुः (अल-गाशिया) 309
89. सूक्तम्—प्रभातम् (अल-फज्र) 310
90. सूक्तम्—बलधः (अल-बलद) 311
91. सूक्तम्—हंसः (सूर्यः) (अश-शम्स) 312
92. सूक्तम्—लीलः (लीलो रात्रिकालः) (अल-लैल) 313

CC-0. In Public Domain. Digitized by eGangotri

93.	सूक्तम्—ज्योषा (मात्रुषा=मातृ+उषा) (अज़-जुहा)	314
94.	सूक्तम्—उरस्स्फालनम् (अल-इनशिराह)	315
95.	सूक्तम्—अंजीरम् (अत-तीन)	316
96.	सूक्तम्—कललम् (अल-अलक)	317
97.	सूक्तम्—भव्या निशा (अल-कद्र)	318
98.	सूक्तम्—बाह्यचिन्हम् (अल-वय्यिना)	319
99.	सूक्तम्—ज्याचालः (अज़-ज़िल ज़ाल)	320
100.	सूक्तम्—आजानेयाः (अल-आदियात)	321
101.	सूक्तम्—कालिका (अल-कारिआ)	322
102.	सूक्तम्—असुरतंकः (अत-तकासुर)	323
103.	सूक्तम्—अस्तमयदहर् (अल-अस्र)	324
104.	सूक्तम्—अयशोलुब्धः (अल-हुमज़ा)	325
105.	सूक्तम्—पीलुः (अल-फील)	326
106.	सूक्तम्—कुरैशः (कुरैश)	327
107.	सूक्तम्—सामान्यमौदार्यम् (अल-माऊन)	328
108.	सूक्तम्—वैपुल्यम् (अल-कौसर)	329
109.	सूक्तम्—श्रद्विहीनाः (अल-काफिरून)	330
110.	सूक्तम्—साह्यसंभारः (अन-नस्र)	331
111.	सूक्तम्—अभ्र लुब्ध (अल-लहब)	332
112.	सूक्तम्—एकोऽप्रतिमः (अल-इखलास)	333
113.	सूक्तम्—उषाकालः (अल-फलक)	334
114.	सूक्तम्—शरणम् (अन-नास)	335
	अथ कुराणस्य पारायणान्ता प्रार्थना	336
	परिशिष्टम्—निरुक्ताः कतिपयशब्दाः	337
	विभिन्नसूक्तावतारस्थानानि	343
	लेखक-परिचयः	344

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

१

सूक्तम्–उपोद्घातः

(अल-फातिहा)

(महाकालेऽवतीर्णाः सप्तायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]प्रभुः सर्वस्य विश्वस्य योऽल्लाहो वर्त्तते (ध्रुवम्) । शंमनं सर्वमप्यस्ति तदर्थम्; [२]यः पुनर्दयी ॥ १ ॥
अत्यर्थञ्च कृपाशीलः; [३]निर्णयाहस्य यः प्रभुः । [४]नमामः केवलं ते वै, त्वदेव केवलादथो ॥ २ ॥
साह्यापेक्षा भवामश्च; [५]दर्शयास्मान् ऋजुं पथम् । [६]तेषां येषु दया जाता त्वदीया; [७]न परं पुनः ॥ ३ ॥
तेषां ये कोपपात्राणि त्वदीयान्यभवन् अथो । नापि तेषां पथभ्रष्टा अभूवन् ये तु (मानवाः) ॥ ४ ॥

योगः—४

CC-0. In Public Domain. Digitized by eGangotri

२

सूक्तम्–गौः

(अल-बकरा)

(मदहीनाऽवतीर्णाः षडशीत्यधिकं द्विशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ० लाम० मीमेति; [२]शास्त्रमेतदसंशयम् । अध्वनोदर्शनन्तेभ्यस्त्वल्लाहाद् ये हि बिभ्यति ॥ १ ॥
[३]अदृष्ट्वा श्रद्विधातृभ्यो नमोधेभ्यश्च शाश्वतम् । व्ययिभ्यः सम्पदामस्मद् दत्तानामेव सर्वदा ॥ २ ॥
[४]श्रद्धातृभ्यस्तथा ज्ञाने पूर्वेभ्यस्तुभ्यमर्पिते । सर्वेषु श्रद्धरा एतेऽथान्त्याहेऽप्येत एव तु ॥ ३ ॥
[५]ईशर्जुमार्गगा एते सफला एत एव च । [६]उक्ताश्चाप्यथवाऽनुक्ता नाश्रद्धाः मन्वते क्वचित् ॥ ४ ॥
[७]अल्लाहः स्तम्भयत्येषां कर्णौ श्रोत्रे तथाऽक्षिणी । यातना भीषणाश्चैतान् प्रतीक्षन्ते दिवाऽनिशम् ॥ ५ ॥
[८]ईदृशाश्चापिलोकानां उन्मुखा येऽभिमन्वते । चरमाहे च तथाऽल्लाहे दध्मः श्रत् न च ते तथा ॥ ६ ॥
[९]श्रद्दधानान् तथाऽल्लाहं वञ्चयन्तः स्ववंचकाः । भवन्ति न विदन्त्येतत् परं सत्यं स्वया धिया ॥ ७ ॥
[१०]तद् हृदिस्थोऽभवद्दोषस्तमल्लाहो व्यवर्धयत् । मिथ्यावाक्त्वात् प्रतीक्षन्ते यातनास्तानरुन्तुदाः ॥ ८ ॥
[११]यदोक्तास्तु भवन्त्येते—"लोकोऽयं मा विकार्यताम्" । "एते सुधारयामो वै", तान् प्रति प्रवदन्ति तु ॥ ९ ॥
[१२]ज्ञायतां तत्वतोह्येते जना हि विकरिष्णवः । अबोधोपहतत्वाच्च नात्मानं प्रविदन्ति तु ॥१०॥
[१३]"दध्यात श्रद्यथैवान्ये" प्रेरिताः कथयन्ति च— । "मूढवत् श्रत् किमस्माभिश्चापि धत्ता भवेत् पुनः ॥११॥
मूढाः स्वयं परं सत्यं नेदमेते विदन्ति हा । [१४]श्रद्धालून् संगतास्तावत् "वयं श्रद्धालवः पराः ॥१२॥
जुगुप्सितांश्च "युष्माकं वान्धवाः परमा वयम् । परीहासो हि नोऽसौ" तु भजन्ते रञ्जिता गिरः ॥१३॥
[१५]अल्लाहोऽपहसत्येतान् चेष्टितुं प्र ददाति च । स्वकीयेऽविनये चक्षुर्निमील्यैव पुनः पुनः ॥१४॥
[१६]भ्रंशो रुच्यः पथोह्येषां पण्यो नो मार्गदर्शनम् । वणिज्या लाभकृन्नैषां ऋजुं मार्गं न यन्ति च ॥१५॥
[१७]वह्निसंधुक्षकैरेतेनृभिःसंयान्ति तुल्यताम् । यत् कृताग्नि प्रकाशं चेदल्लाहोऽपनयत्यतः ॥१६॥
अन्धकारे निमग्नास्ते समर्था नेक्षितुं मनाक् । [१८]मूकान्धवधिराश्चैते नैवोन्मार्गान्निवर्त्तकाः ॥१७॥
[१९]किं वैतैः सुमहावृष्टावन्धकारेऽतिगर्जिते । वैद्युते च चमत्कारे भीतैरंगुलिभिः स्वयम् ॥१८॥
निर्घोषान्मरणोपान्तैः कर्णच्छिद्राः सुसंवृताः । श्रद्धाहीनान् परीवेषेऽल्लाहो धर्षति सर्वकान् ॥१९॥
[२०]विद्युत् किं वा हरेदेषां प्रकाशं द्राग् हि चक्षुषाम् । यदा यदा चमत्कारः तमिस्रं वा यदा यदा ॥२०॥
चलनं प्रतिवन्धश्च गतेरेषां तदा तदा । हरेदल्लाह एतेषां सतीष्टे कर्णचक्षुषी ॥२१॥
असन्दिग्धं हि सोऽल्लाहः सर्वसामर्थ्यभृन्मतः । [२१]वन्दनीयो ह्यसावीशो रक्षार्थं जनकस्तु यः ॥२२॥
युष्माकं च पुनस्तेषां लोकानां पूर्ववर्त्तिनाम् । [२२]स एवाऽसौ धरित्रीं यः प्रच्छदं गगनं तथा ॥२३॥
चकार च्छदिरूपेण खाज्जलं चावतारयत् । तेन चाभ्यवहाराय समेभ्योऽन्नानि चाकरोत् ॥२४॥
विदित्वेदं न कुर्वीध्वं प्रतिम्नस्तस्य तु क्वचित् । [२३]संशयो यदि युष्माकं प्रकाशं गमिते मया ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

मद्व्यक्ति —— द्वारतस्तद्भोस्तद्रूपंसूक्तमेककम् । आहृत्याह्वयताप्येकं युष्मत् साह्यं च सन्मुखम् ॥२६॥
विनाऽल्लाहं तु वो मित्रं सत्यसन्धाः स्थ चेद् ध्रुवम् । [24]शक्ता नेदन्तु चेत् कर्त्तुं "न यूयं चात्र शक्ष्यथ" ॥२७॥
विभीताऽग्नेरमुष्माद् यः समति नृंस्तथोपलान् । जनितो यो विशेषेण जनाय श्रद्विशंसिने ॥२८॥
[25]श्रद्दधानान् प्रति कृत्यान्यनुकूलानि कुर्वतः । घोषणीयं शुभं वृत्तं "रम्यारामानवाप्स्यथ ॥२९॥
नद्यः प्रान्तवहा यत्र वृक्षा नाना फलोद्गमाः" । फलान्यत्तु च लब्ध्वैते वदिष्यन्ति प्रसादतः ॥३०॥
"प्रागमीमानि लब्धानि तान्येवैतानि हन्त भोः" । सदृशान्यथ दास्यन्ते ह्यन्योन्येन फलानि च ॥३१॥
शश्वत्तत्र स्थिराऽऽवासास्ते भविष्यन्ति, तत्र वै । विन्दिष्यन्ति तथा सार्थान् पूर्णशुद्धानसंशयम् ॥३२॥
[26]मशकस्य ततो हीनस्यौपम्येऽपि न लज्जते । अल्लाहः, श्रद्धरा एतां सत्यां वै प्रविदन्ति च ॥३३॥
प्रभोरेताञ्च संभूतामश्रद्धास्त्वन्यथा विदुः । "अभिप्रैति किमल्लाहस्त्वेवंरूपोपमादिभिः" ॥३४॥
पथो भ्रंशयते कांश्चित् दिशोऽन्यान् दर्शयत्यतः । विदधात्यध्वसंभ्रष्टान् अविनीतानयं ततः ॥३५॥
[27]पूर्वं समर्थितं चापि त्वल्लाहेन समं हृदा । स्वीकृतेः पत्रमेते हा ! पश्चाद् भञ्जन्त्यपत्रपाः ॥३६॥
युक्तैतानिति चाल्लाहदिष्टान् कृन्तन्ति सर्वदा । विकृतेर्जनका भूमौ हानिलब्धार एव हि ॥३७॥
[28]श्रद्धाहीनाः किमल्लाहे प्रवर्त्तध्वे स एव यः । मृतानजीवयद् युष्मान् मारयिष्यत्यतः पुनः ॥३८॥
जीवयिष्यति तत् पश्चाद् यमेव पुनरेष्यथ । [29]स एव योहि युष्मभ्यं, भूस्थं सर्वं ससर्ज वै ॥३९॥
दृशा संभावयन् व्योम सप्तधैतत् ततोऽकरोत् । सर्ववित् स हि सर्वज्ञः सर्ववेत्तेति नन्द्यते ॥४०॥
[30]यदा युष्मत् प्रभुर्देवान् संबोध्योवाच —"पश्यत- । प्रतिनिधिं धरायां भोः ! कुर्वे" तत्ते समब्रुवन्— ॥४१॥
"हानेर्जनयिता किंवा रक्तसंप्लावकस्तथा । प्रेष्यते किल भूलोके वयं यावत् तव स्तुमः ॥४२॥
पावनत्वं समज्ञाञ्च" तदस्मिन् अवदत्त्वसौ— । "असंशयं ह्यहं वेद तं यं यूयं न वित्थ भोः !" ॥४३॥
[31]आदिमं सर्वनामानि तदेशः समवोधयत् । अभिदेवं च तानाह समुपस्थापयन् पुनः— ॥४४॥
"ब्रूतामीषां तु नामानि यूयं सत्ये रता यदि" । [32]आहुरेते—"महांस्त्वं भोः ! ज्ञानवान् त्वं हि तत्ववित् ॥४५॥
तावदेव तु नो ज्ञानं यावद् दत्तं त्वया विभो !" । [33]"आदिम !" प्रभुराहै "तान् तेषां नामानि बोधय" ॥४६॥
तेनोक्ते स ततश्चाह—"उक्तवान् नास्मि किं पुरा— । व्योम्नां चैव धरित्र्याश्च रहस्यं वेद्मि सर्वकम् ॥४७॥
युष्माकं व्यक्तव्यक्तं वेद्मि तत् तत्तथैव च । [34]स्मर्यतां देवता उक्ता प्रणन्तुञ्चादिमं यदा ॥४८॥
इबलीशादृते सर्वे प्रणेमुः दर्पदूषितात् । अश्रद्धालुषु चैवायमभवद् गणितस्ततः ॥४९॥
[35]उक्तवान् "आदिम ! उद्याने जम्पती वसतां तथा । इच्छथश्च यतो यच्च मनोहृत्यात्तमेव तत् ॥५०॥
नोपगम्यस्त्वयं वृक्षः विगीतौ स्यातमन्यथा" । [36]शातनोऽसारयत् तस्मात् स्थानात् शान्त्याःसुखाच्च तौ ॥५१॥
प्रावासयदवोचाम—"यातं नीचैरुभावपि । अन्योन्यं शात्रवं सिद्धं युवयोश्च भविष्यति ॥५२॥
कालावधिः पुनर्वासो धरित्र्यां चेष्टनं तथा" । [37]आदिमः स्व प्रभोः कांश्चित् शब्दान् जग्राह तत् पुनः ॥५३॥
जहौ कार्कश्यमीशोऽपि गतेर्ष्यः सदयश्च सः । [38]अवोचाम—"समे यूयं प्रयाताऽधःस्थलादितः ॥५४॥
दर्शनञ्च पथो मत्तो युष्मभ्यं स्याद्ध्रुवं किल । ये च तस्यानुसर्त्तारो दुःखं तेषां न वा भयम् ॥५५॥
[39]ये पुनः श्रद्धयाहीनाः मिथ्यापयितुमुत्सुकाः । अस्मदीयं प्रकाशं तेऽनलभाजोऽनलौकसः ॥५६॥
[40]इस्रायीलस्य हे वत्साः ! मया युष्मासु यः कृतः । उपकारगणश्चिन्त्यः, पाल्यं च स्वीकृतं मिथः ॥५७॥
मया चाप्यथ तत् पाल्यं विभीत मत्त एव च । [41]श्रद्धत्त मे प्रकाशं वः प्राक् पार्श्वस्थानुमोदकम् ॥५८॥
श्रद्धाहीनेषु प्राथम्यं युष्माकं ह्येव मा स्म भूत् । विक्रीणीत न तुच्छार्घे प्रकाशं मे क्वचित् तथा ॥५९॥
युष्माकं यच्च कर्त्तव्यं रक्ष्यं तच्चापि मां प्रति । [42]सत्यं ज्ञात्वा न संवर्त्या नाकुलीक्रियतां पुनः ॥६०॥
सत्यवाक् खल्वसत्येन सत्यज्ञैर्भूयते यतः । [43]पूजा संस्थाप्यतां, देयं दरिद्रेभ्यो धनं पुनः ॥६१॥
ये नमन्त्यथ तैःसार्धं युष्माभिश्चापि नम्यताम् । [44]कर्त्तव्यं चापि भक्तिं च यूयं शिष्ट परान् जनान् ॥६२॥
स्वयं विस्मृतिमन्तश्चाधीयन्तश्चापि पुस्तकम् । बुद्ध्या किं न प्रवर्तध्वे ? किमपास्ताखिलाऽपिधीः ? ॥६३॥
[45]धैर्याच्चैव नमस्यायाः साहाय्यं विन्दतेह भोः । कठिनं तप एतत्तु, न तेषां ये हृदाऽऽनताः ॥६४॥
[46]ये विजानन्ति योक्तव्यं प्रभुणा स्वेन वर्त्तते । प्रायो निर्वर्त्तितुं सज्जास्ते च तिष्ठन्ति सर्वदा ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

[४७]इस्रायीलस्य हे वत्साः ! मया युष्मासु यः कृतः । उपकारगणश्चिन्त्यः, चिन्त्यमेतच्च सर्वदा ॥६६॥
माहात्म्यं स्वीकृतं यद् वः सर्वं प्राणिष्वलौकिकम् । [४८]दिनात् तस्माच् च भेतव्यं यदा लोकाः परस्परम् ॥६७॥
उपकृतिं न यास्यन्ति, सदाशंसा न मंस्यते । प्रतिदानं न मान्यं स्यात्, साह्यं नैव कृतं भवेत् ॥६८॥
[४९]स्मरणीयः फराहेभ्यो युष्मन्मोक्षो मया तदा । युष्मांस्तेऽपीडयन् कष्टैः यूनो व्यापादयन् द्विषा ॥६९॥
वैधव्ययातनाः सोढुं स्त्रीस्तु नाऽघ्नन् विशेषतः । तदा युष्मत् प्रभुर्युष्मान् परीक्षाग्नौ समाऽजुहोत् ॥७०॥
[५०]उदन्वतश्च मार्गेण यूयं नीताश्च रक्षिताः । फराहवासिनश्चापि युष्मदग्रेऽप्सुमज्जिताः ॥७१॥
[५१]चत्वारिंशद् यदा रात्रीः किञ्च मूषः पुरा वयम् । अवासयाम युष्माभिर्वत्सो देवश्चितोऽभवत् ॥७२॥
तस्य निर्गमनाद् यूयमजायध्वं सदूषणाः । [५२]अक्षमामहि तेनाऽपि, कार्तज्ञ्यं येन यात मे ॥७३॥
[५३]आर्पयाम यदा किञ्च मूषाय मार्गदर्शनम् । शास्त्रञ्च निकषञ्चापि मार्ग हेतोरिवाग्रणीः ॥७४॥
[५४]स्वाञ्जनांश्च यदाकिञ्च मूष एवं जगाद ह—। "मज्जनाः ! कृतदोषाः स्थ, वत्सं पूज्यं विधाय वै ॥७५॥
पश्चात्तापमनुसृत्य निवर्त्तध्वं स्वसर्जकम् । दोषदुष्टा जनाश्चापि हन्यन्तां स्वयमेव हि ॥७६॥
सर्जकः खलु युष्मत्तो भद्रमेतद्ध्यपेक्षते । पश्चात्तापिप्रियस्त्वीशः, गतेर्ष्यः सदयश्च सः" ॥७७॥
[५५]ऊद यूयं यदा किञ्च—"श्रद्दध्मो मूष ! नैव ते । यावन्निरूपयामो वै नाल्लाहं स्पष्टतो वयम्" ॥७८॥
पश्यतामेव युष्माकं तदैवाशनिरापतत् । [५६]अजीवयाम तत्पश्चात् अवसन्नान् वयं किल ॥७९॥
उपकारः खलु युष्मासु कार्तज्ञं येन यात मे । [५७]वारिदानां कृताछाया, सल्वामन्नौ न्यगायितौ ॥८०॥
विशुद्धं भोज्यमस्माभि र्यद्दत्तं भुज्यतां ततः । अदुष्टाः पूर्वजेषु स्मः, कृतदोषाः स्वयं हि ते ॥८१॥
[५८]ऊदिमाथ यदा किञ्च वसतिं विशतेह वै । यथेच्छं सर्वतो भुक्त, यात द्वारं शिरोनताः ॥८२॥
ब्रूत चैवं "क्षमन्तां नो" दोषान् क्षंस्यामहे तु वः । आदेशवर्त्तिनस्तूर्ध्वं भरिष्यामोऽधिकैः फलैः ॥८३॥
[५९]स्थानापन्नां पृथग्वाचं दुष्टा अस्मद्गिरो व्यधुः । वियतो यातनास्तेन दुष्टेष्वस्माभिरीरिताः ॥८४॥
अवज्ञाकारितायां वै; [६०]मूषः किंच यदार्थयत्— । जलं ज्ञातीयवर्गाय, प्रादिशाम वयं ततः— ॥८५॥
"शिलादण्डेन संताड्या" सुस्रवुर्यदनन्तरम् । द्वादशभ्यः समुद्गेभ्यो जलधाराः पृथक् पृथक् ॥८६॥
जज्ञिरे च गणाः सर्वे नैजं पानस्थलं पृथक् । पीयतां भुज्यतामन्नादल्लाहेनोपकल्पितात् ॥८७॥
भुव्युपद्रववृद्ध्यर्थं निजंपोषं नहीच्छथ । [६१]ऊच यूयं यदा किञ्च—मूष ! सन्तुष्टिरस्ति नो ॥८८॥
एकरूपे सदा भोज्ये, प्रार्थ्यतां नः स्वकः प्रभुः । भूमेरुत्पादयेत् तावत् अस्मदर्थे रसोनकम् ॥८९॥
पलाण्डुं कर्कटीं शाकान् मसूरान् भावयेत्तथा । प्रत्यवादीदसौ – किं भोः ! सूत्तमानां प्रहाणतः ॥९०॥
क्षुद्राणां खलु वस्तूनामादानं कर्त्तुमिच्छथ । यात संवसथं किञ्चित् निजाभीष्टं तथाऽप्स्यत ॥९१॥
अनुत्साहोऽवमानश्च वैवर्ण्यं तेष्वमुद्र्यत । अल्लाहस्य प्रकोपस्य भाजनान्यभवन् पुनः ॥९२॥
हेतुरत्र यदल्लाहवचनेऽश्रद्धरा हि ते । देवदूताननौचित्यादघ्नन् स्पष्टन्तु कारणम् ॥९३॥
अनाज्ञाकारिता तेषां सीमोल्लंघनमेव च । [६२]श्रद्धरा ये यहूदाश्च, नसारा, साबिई जनाः ॥९४॥
अल्लाहे चरमाहे च श्रद्धराश्च सुकर्मिणः । धरत्येभ्यः पुरस्कारान् प्रभु, रेते च सर्वदा ॥९५॥
निर्भया विचरिष्यन्ति, नार्त्तिमेष्यन्ति कर्हिचित् । [६३]मिथः स्वीकरणं किं चाप्यावयोः, पर्वतस्य च ॥९६॥
मूर्धसूच्छ्रयणं युष्मत्, प्रतिज्ञा चापि कारिता । सुदृढं धरत द्रव्यं प्रदत्तं स्मरताऽपि च ॥९७॥
तत्स्थं, येनातिपात्यो वै प्रकोपो भवतात् सदा । [६४]तथाभूतेऽपि युष्माभिर्भक्त्यपाकर्षणं कृतम् ॥९८॥
दया नैवाभविष्यत् चेत् कृपाल्लाहस्य नापि वा । अगमिष्यत काष्ठां तद्, यूयं हानेरसंशयम् ॥९९॥
[६५]मर्यादाघ्नां स्वकीयानां वितथ वृत्तं पुनर्नराम् । सब्तस्य विषये तेषां, वाचमस्मच्च तान् प्रति ॥१००॥
"वानरा ननु भूयास्त धिक्कृता घृणितास्तथा" । [६६]निदर्शनं त्वकुर्मेदं तज्ज्ञातीनां कृते तथा ॥१०१॥
सन्ततिभ्यो भविष्येऽपि जायमानाभ्य एव च । ये भजन्ते प्रभुं तेभ्यः समादेशोऽप्यजायत ॥१०२॥
[६७]किञ्च मूषो यदोवाद स्वजनान् हन्यतां हि गौः । अल्लाहस्यायमादेशः ते पुनस्तं समब्रुवन्— ॥१०३॥
"केन भोः क्रियतेऽस्माकमुपहासः", सचाब्रवीत् – । "मूढवंश्यं हि सोल्लाहो मां निजं शरणं नयेत्" ॥१०४॥
[६८]अपृच्छन्—स्वं प्रभुं ब्रूहि, विशदं कथयेत् स नः । कीदृशी सा भवेदघ्न्या ? सोऽनूवाद च तद् वचः ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

शैशवे नाऽपि वार्धक्ये मध्यमायुर्भवेद्धिसा । क्रियतां यत् समादिष्टम्; [६९]प्रत्यवोचंस्ततश्च ते— ॥१०६॥
अथेदं स्वं प्रभुं ब्रूहि—किं वर्णा सा भवेत् पुनऽ । अनूवाद—भवेत्सा तु सौवर्णी भास्वरा तथा ॥१०७॥
दर्शनीयाऽपि लोकानां चेतसां ह्लादिनी परा । [७०]अपृच्छन्—स्वं प्रभुं ब्रूहि विशदं कथयेत् स नः ॥१०८॥
कीदृशी सा भवेदघ्न्या कारणञ्चात्र वर्त्तते । भेदेऽन्योन्यगवां मूढा नो विवेकोऽपि जायते ॥१०९॥
अल्लाहस्य प्रसादेन युक्तऽ पन्थापि भोत्स्यते । [७१]अनूवाद-भवेदघ्न्या त्वयोक्त्री नापि सीरिणी ॥११०॥
एकरागा न संमिश्रा सर्वथा सा भवेदिति । अवोचन्-साम्प्रतं सम्यग् विशदं कथितं हि नः ॥१११॥
ततोऽघ्नन् ते हि गामेकां व्यरुन्धंस्तु पुनर्ह्रदा । (क्रिव्तीयानां प्रजाः पूर्वं वनीस्रायीलमानुषाः ॥११२॥
शासका गोकुलस्यासन् भक्ताः सम्पोषकास्तथा । तेषां सम्पर्क वैशिष्टयात् अघ्न्याभक्ता इमेऽभवन् ॥११३॥
परीक्षां कठिनां श्रद्धा वधादेशाद्‌गताऽभवत्) । [७२]अवधिष्ट यदा किञ्च व्यक्तिमेकां ततोऽन्यके ॥११४॥
वधस्यारोपितं पापं मिथ्या, प्राकटयच्चसः । अल्लाहः, संवृतो योऽभूद् युष्माभिः सकलैरपि ॥११५॥
[७३]अवोचाम-हतास्यांशं, तदित्थं प्रेतलोकगान् । जीवयन्नीश्वरो नैजा विभूतीर्विवृणोति वः ॥११६॥
[७४]तत्क्रमानन्तरं चापि युष्माकं हृदयानि तु । कठिनान्येव जातानि पाषाणाः कठिना इव ॥११७॥
तानतिक्रम्य किं वाऽपि सन्ति ते दृषदो यतः । येभ्यो नद्यः स्रवन्त्यत्र, परे त्वेवं विधा अपि ॥११८॥
येषां स्फोटाज्जलस्रावश्चेतरेऽन्यविधा अपि । येऽल्लाहस्य भयाद्‌भीताः प्रस्खलन्त्येव निश्चितम् ॥११९॥
यद्‌यदाचरथाऽल्लाह स्तत्तन्नो वेत्ति नेति भोः । [७५]अथाशाध्वे हि युष्माकं मते स्थास्यन्ति तेऽचलाः ॥१२०॥
प्रमाणञ्चात्र वर्गकोऽल्लाहस्य श्रुतवान् गिरः । बुद्धवानपि ताः सम्यक् परिवृत्ता अभावयत् ॥१२१॥
[७६]उपैमः श्रद्धरांश्चेत् ते वदन्त्यस्माभिराहिता— । श्रद्धा; मिथो मिलन्त्येते यन्मिथो व्याहरन्ति च ॥१२२॥
पृच्छन्ति विवृतं किं भोः ! तेषु तत्तद् रहस्यकम् । प्रकाशितं यदल्लाहाद् युष्मासु ह्यभवत् पुरा ॥१२३॥
येन ते सह युष्माभिर्विवदेरंस्तु पश्यतः । तस्य तावत् प्रभोरेव, तस्यैव विषये तथा ॥१२४॥
किं पुन र्न हि युष्माभिर्धार्यते धीः कथञ्चन ? । [७७]नैव किन्ते विदन्त्येतद् वेत्त्यल्लाहः समं हि तत् ॥१२५॥
व्यक्तं चापि यदव्यक्तं यद् यत् कुर्वन्ति ते सदा । [७८]सन्ति चापठितास्तेषां शास्त्रं लोककथां तु ये ॥१२६॥
केवलं किल बुध्यन्ते निराधारानुमानिनः । [७९]रचयन्तीह ये शास्त्रं पाणिभ्यां, नून् वदन्ति च ॥१२७॥
प्राप्तये स्वल्पमूल्यस्याऽल्लाहादेतत्तु वर्त्तते । नाशएव तु कोशान्तस्तेभ्यः संरक्षितः स्थितः ॥१२८॥
पाणिभ्यां लेखनाच्चैव तेभ्यो नाशः सुरक्षितः । यत् किञ्चनार्जनाच्चापि तेभ्यो नाशः सुरक्षितः ॥१२९॥
[८०]आहुरेतेऽनलस्त्वस्मान् शक्तः स्प्रष्टुं न नारकः । कानिचित् तु दिनान्यूर्ध्वं प्रत्युत्तरत मामथ ॥१३०॥
किन्तु स्वीकरणं किञ्चिदल्लाहेनाभवत् समंम् । यद् विरुद्धं न शक्तोऽयमल्लाहश्चेष्टितुं मनाक् ॥१३१॥
अल्लाह विषये किं वा ब्रूथ वित्थ स्वयं न यत् । [८१]कृतं दुष्कर्म येनाऽपि, यं पापं पर्यधात् तथा ॥१३२॥
वह्नौ ते हि प्रवेष्टारस्तत्र स्थास्यन्ति सर्वदा । [८२]श्रद्धराः शुभ कर्माणि ये च कुर्वन्ति सर्वदा ॥१३३॥
स्वर्गं ते हि प्रवेष्टारस्तत्र स्थास्यन्ति सर्वदा । [८३]यदीस्रायीलबालैश्च पूर्वं स्वीकरणं कृतम् ॥१३४॥
वन्द्यो नान्यो विनाऽल्लाहं, सेव्येतां पितरौ तथा । अनाथाश्शरणापेक्षाः स्वाचर्या वान्धवाः पुनः ॥१३५॥
लोकैर्भद्रं प्रवक्तव्यं प्रतिष्ठेयञ्च पूजनम् । दरिद्रा अथ भर्त्तव्याः; स्खलिता हि पथस्ततः ॥१३६॥
पराङ्मुखा अजायध्वम्, अपवादास्तु केचन । [८४]मिथः स्वीकरणं यच्च नैव वध्या निजा जनाः ॥१३७॥
शरणेभ्यश्च निष्कास्या नैव नैजाः कदाचन । प्रमाणं यूयमप्यत्र, साक्षिणश्चापि तिष्ठथ ॥१३८॥
[८५]घ्नन्ति ये यूयमेवैते, नैजान् निष्कासयन्त्यपि । गृहेभ्यश्च परान् साह्यं शात्रवं कुर्वतेऽथ च ॥१३९॥
अधिकार विघातेन तथाऽत्याचरणेन वै । बन्धनाप्तांश्च तानर्थ-प्रदानान्मोचयन्त्यपि ॥१४०॥
पापमेवाऽभवत् सत्यं यत्ते निष्कासिताःकृताः । किन्नु वः कश्चिदेवांशो मतः शास्त्रस्य नेतरः ॥१४१॥
किं ततोऽन्यो भवेद् दण्डः तेभ्यो ये त्वत्र नास्तिकाः । गर्हणां ते हि विन्देयुः लौकिके जीवनेऽसकृत् ॥१४२॥
निर्णयाहे च विन्देयुः यातनाः प्रखरास्तथा । यद् यदाचरथाऽल्लाहस्तत् तत् जानाति सर्वकम् ॥१४३॥
[८६]क्रीणन्त्येवविधा ह्येव जना लौकिक जीवनम् । उपेक्षयाऽन्यलोकस्य; साह्यं प्राप्स्यन्ति नैव ते ॥१४४॥
यातनाचक्रमप्येषां शिथिलं नो विधास्यते । [८७]शास्त्रं ह्यदाम मूषाय, ऊर्ध्वं वार्ताहरांस्तथा ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

प्रैषयाम बहून् लोके मर्यमासूनवे पुनः । जीससाय प्रमाणानि विशदान्यार्पयाम वै ॥१४६॥
आत्मना पावनेनास्य साह्यं चाकुर्म ते वयम् । उपेयात् कोऽपि चेद् युष्मान् संदेशार्थं हरन् क्वचित् ॥१४७॥
अरुच्यं तदिति कृत्वा नाभ्युत्त्थास्यथ किन्तु तम् ? । विश्वसिथ न कांश्चित् तु, कांश्चिद् यूयं पुन र्हथ ॥१४८॥
[८८]"कार्कश्यं हृदयान्यस्मद् गतान्याहुरिमे, परं । अल्लाहस्य प्रकोपोऽयमश्रद्धा चात्र कारणम् ॥१४९॥
न्यूनान्यूनं हि विश्वासस्तेषां वस्तुषु वर्त्तते । [८९]यच्चाल्लाहस्य पाश्वर्त्ति शास्त्रमेकं समाप्नुवन् ॥१५०॥
यत् समर्थयते तेषां पाश्र्वे प्रागप्यवर्त्तत । श्रद्धाहीनान् पराजेतुं प्रार्थयन्त पुराऽपि ते ॥१५१॥
अश्रद्धा दर्शिता तस्मिन् विज्ञातं यदुपस्थितम् । श्रद्धाहीनेषु कोपो वै सदाऽल्लाहस्य तिष्ठति ॥१५२॥
[९०]प्राणाः पण्याः कृता एभिः हन्त ! क्षुद्राय वस्तुने । श्रद्धरास्ते न वर्त्तन्ते यदल्लाहेन काशितम् ॥१५३॥
ईर्ष्यन्तः "कथमल्लाहो यमभिप्रैति तं हि तम् । भक्तिमत्स्वपि यं कञ्चित् कृपयत्यात्मनेरितः ॥१५४॥
प्रकोपस्य भरोऽसह्यः सक्तः शीर्षेषु तैः स्वतः । श्रद्धाहीनान् प्रतीक्षन्ते दुर्निवारा हि यातनाः ॥१५५॥
[९१]यदा चोक्ता यदल्लाहात् प्राकाश्यं गतवत् तु यत् । श्रद्धत्त तत्र तेऽवोचन्—"श्रद्धरास्तत्र भोः वयम् ॥१५६॥
प्रकाशितं यदस्मासु" व्यतिरिक्तं तु यत् ततः । नैव श्रद्दधते तस्मिन्, यत् सत्यं पोषकं च यत् ॥१५७॥
तस्य यत् तत् समीपस्थं; प्रष्टव्यास्ते वचोन्विदम् । आत्मनो यदि मन्यध्वे श्रद्धराः किमशंसत— ॥१५८॥
पूर्वमल्लाह सद्दूतान; [९२]मूषो युष्मानुपैत् तथा । प्रमाणैर्विशदैः सार्धं, यूयं तस्मिन् गते पुनः ॥१५९॥
वत्सं देवममन्यध्वं, दोषोपहतचेतसः । [९३]मिथःस्वीकरणं किंचाप्यावयोः, पर्वतस्य च ॥१६०॥
मूर्धसूच्छ्रयणं युष्मत् प्रतिज्ञा चापि कारिता । सुदृढं धरतद्रव्यं प्रदत्तं स्मरताऽपि च— ॥१६१॥
तत्स्थं; प्रत्यावदंस्ते च श्रुतवन्तो न चादरः । स्वीकृतेःपालनाऽभावात् चित्तं वत्साऽऽकुलं कृतम् ॥१६२॥
उच्यन्तां ते—ऽस्ति श्रद्धा चेत्, युष्माकं यदजायत । विश्वासान्ननु बोद्धव्यं दोष एवास्त्यसौ परः ॥१६३॥
[९४]उच्यन्तां—"केवलं वश्चेत् परो लोको विनान्यकम् । अल्लाहस्य प्रविज्ञाने सत्याश्चेत् तन्मुमूर्षत" ॥१६४॥
[९५]एषिष्यन्ति परं नैते त्विदं सत्यं कदाचन । स्वकराग्रार्जितस्यैव कारणादिति निश्चितम् ॥१६५॥
वेत्ति सम्यक् स चाल्लाहः सकलानपि दुष्कृतः । [९६]त्वं (मुहम्मद !) चैतान् सुमहल्लुब्धानतिक्रम्याखिलान् स्थितान् ॥१६६॥
प्रतिमापूजकांश्चापि समतिक्रम्य, द्रक्ष्यसि । दीर्घायुष्याय लोभोऽयं, प्रत्येकं जन इच्छति— ॥१६७॥
सहस्राब्दं हि जीवेयं; लब्ध्वा तच्चापि नैव ते । यातनाभ्यो निजानल्पं चापि संरक्षितुं क्षमाः ॥१६८॥
लोकते सर्वमल्लाहो यद् यत् कुर्वन्ति ते सदा । [९७]जब्रील शत्रवो वाच्याः – जब्रीलोऽल्लाहचोदितः ॥१६९॥
हृत्सु प्राकाशयत् युष्मत् यदिदं पूर्वं पोषकम् । श्रद्धरेभ्यः शुभोदन्तस्तथा मार्गप्रदर्शकः ॥१७०॥
[९८]अल्लाहस्यास्य देवानां हर्तॄणां वाचिकस्य च । जब्रीलस्य च यःशत्रुस्तथा मीकायिलस्य च ॥१७१॥
अश्रद्धानान्तु सर्वेषां वैर्यल्लाहः स्वयं मतः । [९९]युष्मद्द्वारेण सुस्पष्टं प्रमाणं खलु काशितम् ॥१७२॥
परं श्रद्दधते नो ते, येऽवज्ञानिष्ठमानसाः । [१००]किन्विदं प्रति जानत्सु केषुचित् तत एव तु ॥१७३॥
वर्गो यः कोऽपि युष्माकं तत्तद्भंगं विधास्यति । सत्यं वहुतमास्त्वेषां श्रद्धाहीना हि सर्वथा ॥१७४॥
[१०१]वाग्घरः समुपेतोऽभूद् यदाप्यल्लाह—पार्श्वतः । पोषयन्निकषाऽऽसीद् यत् तान् पूर्वं हन्त ! तेषुचित् ॥१७५॥
लब्धशास्त्रं दलं त्वेकं पृष्ठतो वै पराऽक्षिपत् । अल्लाहस्य तु यत्शास्त्रं ज्ञात्वाऽप्यज्ञानिनो यथा ॥१७६॥
[१०२]साग्रहास्ते पुनर्जातास्तस्मिन् यत् शातनास्तु वै । सुलेमानप्रभुत्वस्य नाम्नोपास्थापयन्निह ॥१७७॥
सुलेमानस्तु नाऽश्रद्धोऽश्रद्धास्त्वासन्हि शातनाः । शिक्षितास्तै र्जना मायाः, आविर्भूतञ्च बाविले ॥१७८॥
दूते दिव्ये हि हारूते मारूते तच्च शिक्षितम् । तावशिक्षयतां नो तत् कमप्येतत्तु सुस्थिरम् ॥१७९॥
यावन् न घोषितं "वित्त, केवलाकर्षणं न्विदम् । स्यात श्रद्धाविहीना नो," ततोऽशिक्षन्त तद्धि ते ॥१८०॥
दम्पती येन भेद्यौ हि भवेतां, नैव यद्यपि । विनाऽल्लाहसमादेशं शक्तास्ते वाधने नृणाम् ॥१८१॥
अशिक्षन्त यतो हानिस्तन्न लाभकरं तु यत् । अविदंश्चापि ते सम्यक्—"व्यापारं हीदृशंश्रिताः ॥१८२॥
अंशभाजो भविष्यन्ति नापि लोके परत्रके" । प्राणपण्येन पापस्य लिप्सा हन्ताशुचि व्रतम् ॥१८३॥
अभविष्यदिदं भद्रमवेत्स्यंश्चेदृतं हि ते । [१०३]श्रदधास्यंस्तु ते लोका अत्रसिष्यन् पुनर्यदि ॥१८४॥
अल्लाहात्तु प्रतीदानं ह्यभविष्यदनुत्तमम् । अभविष्यदिदं भद्रमवेत्स्यंश्चेदिदं हि ते ॥१८५॥

CC-0. In Public Domain. Digitized by eGangotri

(राइना) (उनजुरना)

[१०४]"श्रद्धराऽ! मैव वाच्योऽसौ "श्रूयतां नः" कदाचन । "नयनेऽत्रापि सञ्चार्य" वाच्य इत्थं सदैव सः ॥१८६॥
श्रवणं ध्यानतः कार्यं एतच्चैवावधीयताम् । श्रद्धाहीनानां प्रतीक्षन्ते दुर्निवारा हि यातनाः ॥१८७॥
[१०५]भूरिदेवा भवेयुर्वा शास्त्रंमन्या अथापि वा । श्रद्धाहीनास्तु ये केऽपि न तेषां रुच्यमस्ति वै— ॥१८८॥
तत्प्रभोस्त्तेषु भद्रस्य स्तोकमप्याविशेत् क्वचित् । अल्लाहश्चिनुते स्वैरं दयायै यं स इच्छति ॥१८९॥
अल्लाहः सुमहानत्र कृपालुः सदयश्च सः । [१०६]निरस्तो यः प्रकाशस्तु प्रणीतो वाऽथ विस्मृतिम् ॥१९०॥
उत्तरस्तद्विधः किंवा तत्स्थाने दीयते किल । वित्थ किं नो यदल्लाहः सर्वसामर्थ्यभृत्स वै ॥१९१॥
[१०७]वित्थ किं नैव राज्यानां व्योम्नामुर्व्यास्तथैव च । स हि सर्वेशिताऽल्लाहो; युष्माकं चापि नेतरः ॥१९२॥
अल्लाहात् परमं मित्रं, सहायोवाऽपि कश्चन । [१०८]स्वीकरोति तु विश्वासादविश्वासस्य योऽयनम् ॥१९३॥
जानीतासौ तु सन्मार्गात् सर्वथा च्युत एव हि । [१०९]शास्त्रंमन्येष्वनेके च हृद्गतेर्ष्याविशात् तथा ॥१९४॥
ईहन्ते श्रद्धरान् वस्तु कर्त्तुमश्रद्धरान् पुनः । सत्यं यद्यपि विस्पष्टं तदग्रे भासतेतराम् ॥१९५॥
स्वीकुरुत क्षमां यूयं उपेक्षध्वं तथाच तान् । अल्लाहो निर्णयेद् यावत् सर्वसामर्थ्यभृत् स हि ॥१९६॥
[११०]पूजा संस्थाप्यतां देयं दरिद्रेभ्यो धनं पुनः । द्रक्ष्यथाऽल्लाह पार्श्वे तत् स्वस्मै भद्रं यदीरितम् ॥१९७॥
यद् यदाचरथाऽल्लाहस्तत्तत् सर्वं विलोकते । [१११]आहुरेते न कोऽप्यन्यः प्रवेष्टुं स्वर्गमर्हति ॥१९८॥
ईसायीन् याहुदाहांश्च वर्जयित्वा कथञ्चन । एते तु केवलास्तेषां कामाः, तद् ब्रूत खल्विदम् ॥१९९॥
सत्यपथां ध्रियध्वे चेत् प्रमाणं क्रियतां पुरः । [११२]अल्लाहस्य समक्षं यः करोत्यात्मसमर्पणम् ॥२००॥
लीनःसाधुषु कार्येषु प्रतिदानं हि सोऽर्हति । स्वप्रभोः, न हि ते दुःखं गमिष्यन्ति भयं न वा ॥२०१॥
[११३]याहुदाहा वदन्त्येवं—निराधारा इसायिनः । याहुदाहा निराधारा आक्षिपन्तीतरे तथा ॥२०२॥
शास्त्रस्याधीतिनावेतौ यद्यपि प्रकटावुभौ । अविज्ञायाऽपि भाषन्ते तदित्थं प्राकृता जनाः ॥२०३॥
निर्णयाहे तु सोल्लाहो निर्णयं तस्य दास्यति । [११४]कोनु तस्मान्महापाप्मा स्यादल्लाहस्य धामसु ॥२०४॥
वारयेत् कीर्त्तनाच्चापि तन्नाम्नः, प्रयतेत च । उन्मूलनाय तद्धाम्नां, तैस्तुबिभ्यद्भिरन्तरे— ॥२०५॥
सर्वथाऽऽसीत् प्रवेष्टव्यं, लोके निन्दैव तत्कृते । यातना अप्यपेक्षन्ते परलोके हि तान् खराः ॥२०६॥
[११५]स्वाम्यल्लाहः स्थितस्तावत् पूर्व पश्चिमयो र्दिशोः । मुखं यत्राऽपि युष्माकं तत्राल्लाहस्य वै मुखम् ॥२०७॥
अल्लाहः सर्वथा शंभुः सर्वज्ञश्चाप्यसंशयम् । [११६]आहुरेते यदल्लाहः सापत्यो वर्त्तते पुनः ॥२०८॥
मतःसमहिमश्चैव, व्योमसूर्व्याञ्च यत् स्थितम् । तस्य तस्य स हि स्वामी, तदाज्ञावर्त्तिनः समे ॥२०९॥
[११७]व्योम्नामुर्व्याः प्रसूरेष निश्चिनोति यदाऽपि यत् । भवतादुक्तमात्रेऽस्मिन् तत्तत् सर्वं प्रजायते ॥२१०॥
[११८]अज्ञा आहुः "किमल्लाहो भाषतेऽस्मांस्तु नैव भोः । नाऽथचिन्हं किमप्यस्मान् उपैत्यस्मात् कथं पुनः" ॥२११॥
पूर्वजा अप्यभाषन्ताक्षरश एवमेव हि । एषां स्वान्तानि सर्वेषां संविदानानि पूर्णतः ॥२१२॥
श्रद्धरेभ्यस्तुचिह्नानि सुविशदान्यक्रमम हि । [११९]आयुक्तः प्रेषितोऽस्माभिः सत्येन शुभवृत्तदः ॥२१३॥
विभीषणश्च लोकानां, नाऽनुयुक्तो भविष्यसि । समिद्धस्याग्निपुंजस्य तांस्तु (यायावरान्) प्रति ॥२१४॥
[१२०]याहुदाहास्तु नैवाऽपि नापि चेसायिनो जनाः । त्वयाप्रसादमेष्यन्ति यावत् त्वं नानुयासि तान् ॥२१५॥
कथ्यतां—संशयो नाऽत्र यदल्लाहेन दर्शितः । मार्गः स एव मार्गस्तु यथार्थं सत्य एव च ॥२१६॥
अथ चेल् लब्धवेदोऽपि त्वं तानेवानुयास्यसि । अल्लाहाद् रक्षकं मित्रं सहायो वा न ते भवेत् ॥२१७॥
[१२१]"प्रदत्तं शास्त्रमस्माभिर्येभ्यस्तेऽधीयते तथा । यथावत्तद् यथाऽध्येयं, श्रच्च धास्यन्ति तत्र ते ॥२१८॥
ये तु तच्छ्रद्धरा नैव हास्यन्त्यत्रारिवलं हि ते । [१२२]इस्रायीलस्य हे वत्साः ! मया युष्मासु यः कृतः ॥२१९॥
उपकारगणश्चिन्त्यः, चिन्त्यमेतच्च सर्वदा । माहात्म्यं स्वीकृतं यद् वः सर्वप्राणिष्वलौकिकम् ॥२२०॥
[१२३]दिनात्तस्माच् च भेतव्यं यदा लोकाःपरस्परम् । उपकृतिं न यास्यन्ति, सदाशंसा न मंस्यते ॥२२१॥
प्रतिदानं न मान्यं स्यात्, साह्यं नैव कृतं भवेत्" । [१२४]अथ चैव यदाऽब्रह्मः प्रभुणाऽभूत् परीक्षितः ॥२२२॥
विषयान् कांश्चिदादाय सफलोऽसौ बभूव च । तं स आह—"करोमि त्वां सर्वलोकस्य नायकम्" ॥२२३॥
अपृच्छत्—"मदपत्यानाम्?", सोऽब्रवीत्—"वचनं मम । अतिक्रान्त सदाचारा विशन्ति न जनाः क्वचित्" ॥२२४॥

CC-0. In Public Domain. Digitized by eGangotri

[१२५]यदा किञ्च वयं गेहं लोकेभ्योऽकृण्म सुस्थलम् । शान्त्यै चापि शरण्यञ्च, (दिशन्तस्तदनन्तरम्) ॥२२५॥
"यूयमब्रह्मवासं तु पूजावासं विधत्त भोः !" । अब्रह्मं चाऽस्मयेडञ्च प्रादिशाम पुनर्यथा— ॥२२६॥
"पूयतां मम गेहोऽयं तस्मै यः स्यादुपासकः । यः परिक्रमको यश्च भवेद् दण्डप्रणामकृत् ॥२२७॥
प्रणामी यो भवेद् वाऽपि;" [१२६]यदा चाऽब्रह्मइष्टवान् । "प्रभो ! मे ! कुरु शंक्षेत्रं भुवोभागमिमं तथा ॥२२८॥
अल्लाहे चरमाहे च श्रद्धरानस्य वासिनः । फलानां सुहितान्सर्वान्," तदस्मिन् प्रत्युवाद सः— ॥२२९॥
भोक्तुमीषत् तु दास्यामि श्रद्धरो नापि यो भवेत् । परतो नरकाग्निं च प्रणेष्याम्यतिकष्टदम् ॥२३०॥
शरणं चरमं यद्धि परमं विजुगुप्सितम् । [१२७]अब्रह्मश्चास्मयेडश्च यदाऽऽधारन्तु वेश्मनः ॥२३१॥
स्थापयामासतुस्तावत् (तदाऽब्रह्मोऽवदत् प्रभुम्) । "प्रभो मेंऽ ! गीकुरुष्वेदं आवयोर्वचनाद्, ध्रुवम् ॥२३२॥
केवलस्त्वमसि श्रोता, ज्ञाता त्वमसि केवलः । [१२८]विधेयौ नौ प्रभो ! कार्यौ, कुलीना सन्ततिश्चनौ ॥२३३॥
विधेयाऽप्यात्मनः कार्या; दर्शनीयश्च नौ विधिः । पूजायाः; अथ कार्कश्यमावां संत्यज्यतां प्रति ॥२३४॥
केवलस्त्वंहि कार्कश्याद् विहीनः सदयस्तथा । [१२९]प्रभो ! नौ त्वं पुनस्तेषामेकमन्यतमं जनम् ॥२३५॥
वाग्घरं कुरु यस्तेभ्यस्त्वत् प्रकाशमुदीरयेत् । तत्वालोकञ्च शास्त्रञ्च यः पुनस्तान् प्रशिक्षयेत् ॥२३६॥
यःप्रदद्यात् पुनस्तेभ्यो विकासं शौचमेव च । त्वं प्रभुःकेवलस्तावत् तत्वदर्शी त्वमेव च ॥२३७॥
[१३०]अब्रह्मस्य तु यो मार्गः कः स्वं भ्रंशयते ततः । व्यतिरिच्य हि तं लोकं जाड्ये यःस्वं निवेशयेत् ॥२३८॥
समेषामपि लोकानामचिन्म तं वयं तु भोः । भद्रलोकेष्वसौ भावी परलोके तथोत्तमः ॥२३९॥
[१३१]भर्त्रा तस्य यदा प्रोक्तः—"विधेयोभवताद् भवान्" । अवादीत्—"एष जातोऽहं विधेयो जगतां प्रभोः" ॥२४०॥
[१३२]इदमेव तथाऽऽदिष्टा अब्रह्मेण निजाःप्रजाः । ज्ञाकूतोऽप्युक्तवानित्थम्—"अयि मे वत्सलाः सुताः ॥२४१॥
इमं ह्येव तु पन्थानं अल्लाहो वश्चिचाय सः । वशंवदैर्हि मर्त्तव्यं, मर्तव्यं स्याद् यदापि तु" ॥२४२॥
[१३३]ज्ञाकूतमृत्युकाले किं यूयमास्त ह्युपस्थिताः । यदाऽसौ पृष्टवान् पुत्रान्—"कंमदूर्ध्वं तु यक्ष्यथ"॥२४३॥
तेऽवदन्—"त्वत् प्रतीष्टो यो पूर्वजानाञ्च ते पुनः । अब्रह्मस्यास्मयेडस्य तथैवेषशकस्य च ॥२४४॥
वयं तमेव यक्ष्यामः प्रतीष्टो यो हि केवलः । वशंवदा वयं तस्य तिष्ठामोऽस्यैव केवलम् ॥२४५॥
[१३४]गणस्तेषामभूदेकः सम्प्रति प्रेतवान् हि यः । तेषां समर्जितं तेभ्यः, युष्मभ्यं युष्मदर्जितम् ॥२४६॥
यूयं नैवानुयोक्तव्याः स्युस्तेषां कृतिकारणात् । [१३५]ईसायिनो यहूदाहा भवतेति भणन्ति वा ॥२४७॥
ब्रूहि तान् —"नहि भोः !, यात मार्गमब्रह्मसत्कृतम् । एकात्मो यस्तथानासीत् कोऽपि मूर्त्यर्चकेषु च" ॥२४८॥
[१३६]कथ्यताम्—वयमल्लाहे, प्रकाशेऽस्मान् प्रतीरिते । अब्रह्मे चास्मयेडे च तथैवेषशके पुनः ॥२४९॥
ज्ञाकूते तदपत्ये च मूषेशाभ्यां समर्पिते । तत्प्रभोः कृपया चैव नव्यव्यूहेऽवतारिते ॥२५०॥
श्रद्धराः स्मो न कुर्मश्च तेषु नीचोच्च शेमुषीम् । विधेयाः खलु तिष्ठामो वयं तस्यैव सर्वदा ॥२५१॥
[१३७]भवेयुः श्रद्धरास्त्वं वत् यदि तेऽक्षरशः क्वचित् । लब्धमार्गा वगन्तव्याः, विरुद्धास्तु पराङ्मुखाः ॥२५२॥
तुलनायां पुनरल्लाहः त्वां वलोच्चं करिष्यति । श्रोता ज्ञाता स एवास्ति—; [१३८]वर्णोऽल्लाहात्तु केवलम् ॥२५३॥
अल्लाहादुत्तमो वर्णात् कस्तमेव वयं नुमः । [१३९]कथ्यतां कथमस्माभि र्विवादोऽल्लाहकारणात् ॥२५४॥
युष्माकं पुनरस्माकं प्रभुस्तुल्यो यदाऽस्ति सः । अस्माभिःकृतमस्मभ्यं युष्माभिर्वः कृतञ्च यत् ॥२५५॥
सर्वभावेन तं ह्येव समुपेता वयं तु भोः ! । [१४०]अब्रह्मश्चास्मयेडश्च तथैवेषशकोऽप्यसौ ॥२५६॥
ज्ञाकूतस्तदपत्यञ्च मन्यध्वे तेऽभवन् उत । याहुदाहाः पुनःकिंवाप्यभवंस्त इसायिनः ॥२५७॥
यूयं सत्यविदः किं वाऽल्लाहो भवति सत्यवित् ? । को नु दुष्टतरस्तस्मात् अल्लाहादर्पितं तु यः ॥२५८॥
प्रमाणं ह्नोतुमत्रेष्टेऽल्लाहो नाज्ञस्ततस्तु वै । यद् यदाचरणं यूयं कुरुथ भूमिसंस्थिताः ॥२५९॥
[१४१]गणस्तेषामभूदेकः सम्प्रति प्रेतवान् हि यः । तेषां समर्जितं तेभ्यो युष्मभ्यं युष्मदर्जितम् ॥२६०॥
यूयं नैवानुयोक्तव्याः स्यात तेषां कृतेर्वशात् । ....

(इति प्रथमं पारायणमवसितम्; अथ द्वितीयं पारायणमारभ्यते)

.... । [१४२]मूर्खलोका भविष्यन्ति—केन ते हि पराङ्कृताः ॥२६१॥

CC-0. In Public Domain. Digitized by eGangotri

ततो याऽभूदभीष्टाशा तेषां शश्वन्मता किल । स्वाम्यल्लाहः स्थितो, वाच्यं, पूर्वं पश्चिमयोर्दिशोः ॥२६२॥
यमभिप्रैति तं ह्येव दर्शयत्यृजुवाटकम् । [143]वयमित्थञ्च मध्यस्थं गणं युष्मानकुर्म भोः ॥२६३॥
समक्षं येन लोकानां साक्षिमत्वं भवेत्तु वः । समक्षं चापि युष्माकं वाग्घरःसाक्षितां व्रजेत् ॥२६४॥
अभीष्टाशाञ्च युष्माभिः श्रितामस्थापयाम यत् । पृष्ठतो येऽपवक्तारस्तेषांस्युर्विदिता मम ॥२६५॥
येऽनुगच्छन्ति भावेन वाग्घरं, नात्र संशयः । परीक्षा दुष्करा ह्येषा, परं तेभ्यो न वर्त्तते ॥२६६॥
वोधयेन्मार्गमल्लाहो यान्, अल्लाहश्च नेदृशः । योऽवमन्येत वः श्रद्धां, कृपालुः स दयान्वितः ॥२६७॥
मनुष्येभ्योऽपि सर्वेभ्यो भवत्यल्लाह (ईदृशः) । [144]गगनाभिमुखं युष्मन्मुखमस्माभिरीक्षितम् ॥२६८॥
साम्प्रतं युष्मदिष्टाशां प्रत्यावृत्तं कृतं तु तत् । रुच्यां तन् नीयतां तावत् पूजास्थानं त्वनिन्दितम् ॥२६९॥
यत्र तत्र च पूजाया मुखं तत्रैव तिष्ठतात् । शास्त्रं ये त्वलभन्तेह प्रभोःपार्श्वाद् विदन्ति ते ॥२७०॥
एतदेव परं सत्यं नाज्ञोऽल्लाहस्ततस्तु वै । यद्यदाचरणं यूयं कुरुथ (भूमिसंस्थिताः) ॥२७१॥
[145]शास्त्रधीनां समीपं चेद् यैश्च कैश्चापि लक्षणैः । यास्यथाऽलं तु भूता पि युष्मदिष्टां दिशं तु ते ॥२७२॥
सर्वथा नानुयास्यन्ति यूयं चैषां तथैव नो । नाऽन्योन्यस्य च कोप्येषामन्वेष्यति दिशं प्रियाम् ॥२७३॥
ज्ञानं लब्ध्वापि चेद् यूयं तत्कामाननुयास्यथ । नास्तु संदेहलेशोऽपि पाप्मनां वै भविष्यथ ॥२७४॥
[146]लब्धशास्त्रास्तु येऽस्मत्तोऽभिजानन्ति तथैव ते । यथैव स्वान्यपत्यानि प्रकाशं (तमिमंमम) ॥२७५॥
तेषामन्यतमो वर्गो जानंश्चैवाप्यसंशयम् । निह्नोतुं चेष्टते सत्यं;—[147]युष्मदीशादुपागतम् ॥२७६॥
एतदेव परं सत्यं, नातो यूयं कदाचन । भूयास्ताऽन्यतमास्तेषां संशयाद् ये विमानिताः ॥२७७॥
[148]लक्ष्यमेकं समस्याऽपि निश्चितं, यत् प्रयात्यसौ । स्पर्धनीयं हि युष्माभिश्चातो भद्राय वै मिथः ॥२७८॥
स्यात यत्रापि कुत्रापि वोऽल्लाहः संग्रथिष्यति । अल्लाहो नाऽत्र सन्देहः सर्वसामर्थ्यधारकः ॥२७९॥
[149]यस्याःकस्याश्चिदाशायाः समवेताऽ (र्चनाकृते) । मुखं स्वं नीयतां तावत् पूजास्थानं त्वनिन्दितम् ॥२८०॥
एतदेव परं सत्यं युष्मदीशादुपागतम् । यद् यदाचरथाऽल्लाहस्ततो नाऽज्ञस्तु तिष्ठति ॥२८१॥
[150]यस्याः कस्याश्चिदाशायाः समवेताऽ र्चनाकृते । मुखं स्वं नीयतां तावत् पूजास्थानं त्वनिन्दितम् ॥२८२॥
स्यात यत्राऽपि कुत्रापि तत्रैव प्रेर्यतां मुखम् । विरोधे वक्तुमीशो वो भवेल्लोको न कोऽपि यत् ॥२८३॥
तान् विहाय तु ये जाल्माः; त्रस्यताऽपि न वै ततः । मत्त एव बिभीताऽथ येन युष्मास्वहं निजाम् ॥२८४॥
कान्ति सञ्चारयेयं भोः ! स्याच्च वो मार्ग दर्शनम् । [151]प्रैषयाम पुनस्तेषामेकमन्यतमं जनम् ॥२८५॥
वाग्घरं नः प्रकाशं यो निशामयति किञ्च वः । यो ददाति च युष्मभ्यं विकासं शौचमेव च ॥२८६॥
तत्वालोकञ्च शास्त्रं च शिक्षयत्यथ यश्च वः । यच्च युष्मदविज्ञातं शिक्षयत्यथ तच्च वः ॥२८७॥
[152]स्मरत तेन मे नित्यं स्मरिष्याम्यथ वोऽप्यहम् । दर्शनीयं हि कार्त्तज्ञं कृतघ्नत्वं न मे पुनः ॥२८८॥
[153]श्रद्धराःकामयध्वं भोः! साह्यं धैर्यात् तथा स्तुतेः । सहायको हि सोऽल्लाहोऽसन्देहं धैर्यशालिनाम् ॥२८९॥
[154]"मृताः" नैवं च भोः! ब्रूत, मृता येऽल्लाहवर्त्मनि । "जीवन्ति" न पुनर्वित्थ यूयं तान् जीवितान् सतः ॥२९०॥
[155]परीक्षिष्यामहे युष्मान् दरात् स्तोकं क्षुधस्तथा । प्राणान्नसम्पदां चैव हानात् स्तोकमसंशयम् ॥२९१॥
सूचनेयं शुभा देया तेभ्यो ये धैर्यशालिनः । [156]वदन्त्येते विपत्काले स्वाम्यल्लाहस्तु नो मतः ॥२९२॥
संशयोनाऽत्र, गन्तास्मो वयं चैवाऽपि तं पुनः । [157]एत एव तु वै लोका येभ्यस्तेषां प्रभोः सदा ॥२९३॥
दयाऽऽस्ते स्यायिनी येषां कृते सन्त्याशिषस्तथा । एत एव च वै लोकाः सन्मार्गस्यानुयायिनः ॥२९४॥
[158]स्फायश्च मारवांश्चैव चिह्नेऽल्लाहस्य (पर्वतौ) । तद् योऽल्लाहगृहं काव्यं प्रयायादथवा पुनः ॥२९५॥
समुपेयान् न दोषोऽत्र यद्यसौ तौ परिक्रमेत् । यश्चरत्यात्मना भद्रं अल्लाहस्तस्य तत् कृतम् ॥२९६॥
वृणुते च विजानाति (माभूदत्र तु संशयः) । [159]प्रकाशं प्रापितानां मे लक्षणानां तथैव च ॥२९७॥
निह्नवं कुर्वते ये हि तथाऽस्मद् दर्शिताध्वनः । शास्त्रे लोकस्य लाभाय सर्वैशद्यं तु वर्णितम् ॥२९८॥
पुराऽभूत् तत्, त एवैतेऽल्लाहधिक्कारभागिनः । गमिष्यन्ति च धिक्कारं तेभ्यो ये धिक्कृतौ क्षमाः ॥२९९॥
[160]पश्चात्तापं तु ये प्रायन् अकुर्वन् सुधृतान् निजान् । आलपन् स्पष्टतःसत्यं, गतेर्ष्यस्तत् कृते त्वहम् ॥३००॥
अहं कार्कश्यहीनोऽस्मि सदयश्च तथास्म्यहम् । [161]आसते ये ह्यपेतास्तु श्रद्धाया, ये पुनस्तथा ॥३०१॥

CC-0. In Public Domain. Digitized by eGangotri

जनुषो मरणं यावत् श्रद्धाहीनाःसदाऽभवन् । धिक्कृता मानवैर्देवैः अल्लाहेनापि ते सदा ।।३०२।।
[१६२]शश्वत् स्थास्यन्ति तस्यां ते न मृद्वी स्याच्च यातना । नाऽवकाशश्च तेषां स्यात्; [१६३]स एको ह्येव वः प्रभुः ।।३०३।।
न प्रभुस्तमृते त्वन्यः, दयालुः सकृपश्च सः । [१६४]व्योम्नामुर्व्याः स्वरूपेऽथाहर्निशोरनुवर्त्तने ।।३०४।।
भोग्यसंभारमादाय जलाजेषु चलत्सु च । पातितात् खाच् च तस्मिन् के भूयेनोज्जीविता मृता ।।३०५।।
यत्र भूरि विधा जीवास्तेन सम्यक् प्रसारिताः । मरुत् चंक्रमणेऽब्देषु धराऽऽकाशान्तरीयिषु ।।३०६।।
लोकेभ्यस्तत्र चिन्हानि बुद्धिं व्यापारयन्ति ये । [१६५]ईदृशाश्चापि लोकानां येऽल्लाहसमवर्त्तिनः ।।३०७।।
मन्यन्ते कांश्चिदत्रान्यान् तेभ्यःस्निह्यन्ति चोत्तरम् । यथाऽल्लाहाय स्नेग्धव्यं, श्रद्धरास्त्वतिरिच्य वै ।।३०८।।
अल्लाहायैव कुर्वन्ति हार्दमन्यजनाय नो । अभविष्यद् वरं तावत् यद्येते जाल्म पूरुषाः ।।३०९।।
अद्रक्ष्यन् पूर्वतोह्येव कृच्छकालं समागतम् । सर्वा शक्ति तथाऽल्लाहे भीष्म दण्डप्रदञ्च तम् ।।३१०।।
[१६६](चिन्त्यताम्)अनुयाता येऽनुयायिभ्यो विरज्य ते । पार्थक्यं यावदेष्यन्ति, यातनाऽभिमुखास्तथा ।।३११।।
आत्मीयतादिसम्बन्धा नंक्ष्यन्त्येषा (मसंशयम्) । [१६७]वदिष्यन्त्यनुयातारः—संभवे तु निवर्त्तने ।।३१२।।
वयं नेतॄन् विहास्यामः पुरा तेऽस्मान् यथाऽजहुः । दर्शयिष्यति तानित्थमल्लाहः स्वाप्रसन्नताम् ।।३१३।।
तद्विधक्षुद्रचारित्र्यात्, तेषां मुक्तिर्नचाऽनलात् । [१६८]मानवाः ! भुक्त वस्तूनां भूमौ यद्यत्तु पावनम् ।।३१४।।
यत् पुनर्विधिनैवाऽप्तं; पद्धतिं नानुयात च । शातनस्य तथा यूयं स वै वो विदितोह्यरिः ।।३१५।।
[१६९]युष्मान् हि प्रदिशत्येष—"दुष्टमश्लीलमेव च । ब्रूत न ज्ञायते यच्च तच्चाप्यल्लाहकं प्रति" ।।३१६।।
[१७०]उच्यन्ते ते यदाऽस्माभिः—"अल्लाहात् यत् प्रकाशितम् । यूयं तमनुवर्त्तध्वम्"; ते प्रति प्रवदन्ति हः— ।।३१७।।
"तद् वयन्त्वनुयास्यामः काशितं पूर्वजेषु यत्" । पूर्वजानान्तु भोः ! तेषा मनुयानेऽस्ति को गुणः ।।३१८।।
न प्रावर्त्तन्त ये वुद्ध्या, स्थिता ये नाऽपि सत्पथे । [१७१]अश्रद्धानान्तु साम्यं तैं र्न जानन्ति विदन्ति ये ।।३१९।।
क्रन्दाद् ऋते च चीत्काराद् यदि संबोधिता अपि । अतो नाप्येव वुद्ध्यन्ते मूकान्धवधिरा इमे ।।३२०।।
[१७२]पूतं यद् दत्तमस्माभिः श्रद्धराः ! भुज्यतां हि तत् । यात चाऽल्लाहकार्तज्ञमर्चथैकं तमेव चेत् ।।३२१।।
[१७३]मृतं रक्तं च मांसं च शूकरस्य न्यषेधयत् । भोज्यरूपेण युष्माकं, हत्यायां नाम यत्र च ।।३२२।।
कीर्त्तितं पृथगल्लाहात् निषिद्धं तदपि कृतम् । यः परं विवशीभूतो निर्लोभो नातिचार्यपि ।।३२३।।
तत्कृते न वधे दोषो दम्यल्लाहः क्षमाकरः । [१७४]निह्नवं कुर्वते ये तु यस्य कस्याऽपि वस्तुनः ।।३२४।।
प्रकाशितस्य शास्त्रान्तस्तेनाऽल्लाहेन, ये तथा । क्षुद्रं लाभं लभन्ते वा तत् क्रयाज्ज्ञायतामिदम् ।।३२५।।
पूरयन्त्युदरं ते वै वह्निना नान्य वस्तुना । निर्णयाहे हि नाऽल्लाहस्तान् वदिष्यति नाऽथवा ।।३२६।।
तान् पविष्यत्यपेक्षन्ते यातनास्तानरुन्तुदाः । [१७५]एत एव जना येऽत्र पथभ्रंशं च यातनाः ।।३२७।।
मार्गदर्शनतश्चैव क्षमातश्चातिमन्वते । अग्निमालिंगितुं हन्त ! व्यूढोरस्का इमे जनाः ।।३२८।।
[१७६]इदं त्वस्माद्यतोऽल्लाहः शास्त्रं सत्येन पूरितम् । चकाराविस्तु ये लोकाः मतभेदं ततो व्यधुः ।।३२९।।
विरोधो विशदस्तेषां विशदाद् विशदोऽभवत् । [१७७]आस्यावर्त्तनमात्रं तु पूर्वपश्चिमयोर्दिशोः ।।३३०।।
न प्रमाणं तु कस्यापि सत्यताया हृदो मतम् । प्रमाणं पुनरल्लाहे चरमाहे सुरेषु च ।।३३१।।
वाग्धरेषु च शास्त्रे च सत्यबुद्धि र्ध्रुवं मतम् । ये प्रभौ तत्र सम्मुग्धा अनाथान् बान्धवानपि ।।३३२।।
अध्वनीनान् मुखंपश्यान् याचकानपि विश्रुति । गृहीतानां विमोक्षार्थं प्रयच्छन्ति च ये धनम् ।।३३३।।
पूजादाने तथा कुर्युः पिपूर्युर्वचनं कृतम् । तंके शरीरकष्टेषु जन्ये धैर्यावलम्बिनः ।।३३४।।
एत एव जनाः सत्याः तथाऽल्लाहस्य भीधराः । [१७८]श्रद्धराः ! प्रतिशोधो हि हतानां विषये स्मृतः ।।३३५।।
घातात् सेव्यस्य सेव्यो वै सेवकस्य तु सेवकः । स्त्रीघातात् स्त्री तथा बध्या, प्रतिशोधःसमात्समः ।।३३६।।
भ्रात्रा भ्राता यदि क्षन्तो भवेत् किञ्चित्, स दण्ड्यताम् । समाजस्य प्रवृत्तेन नियमेन तथैव च ।।३३७।।
अर्थदण्डेन दण्ड्योऽसौ, प्रभोर्वो वचनादिदम् । मार्दवं च दया चैव (दण्डत्वेन निवेशिते) ।।३३८।।
सत्यप्येवं तु योऽतीयात् तदर्थं कृच्छ्रयातनाः । [१७९]धीमन्तः ! प्रतिशोधे हि, जीवनं निहितं तु वः ।।३३९।।
यूयमित्थं (प्रहर्तृभ्यः) रक्षिता येन तिष्ठत । [१८०]धर्म्यमेतद् विजानीथ युष्माकं यस्य कस्यचित् ।।३४०।।
मृत्युकाले समायाते धनत्यागाय चोद्यते । प्रवृत्तंनियमं श्रित्वा पितृभ्यां दीयतां हि तत् ।।३४१।।

CC-0. In Public Domain. Digitized by eGangotri

बान्धवेभ्यश्च दातव्यं, सत्यं तद् धर्मभीभृताम् । [१८१]उत्क्रमिष्यन्ति बुद्ध्वाऽपि ह्यन्तिमेच्छां तु ये जनाः ॥३४२॥
पापमेव भवेत् तेषां ज्ञात्वोत्क्रमणकारिणाम् । अल्लाहोऽसंशयं श्रोता विज्ञाता वर्त्तते तथा ॥३४३॥
[१८२]अन्तिमेच्छस्त्वनौचित्यात् पक्षपातं करोति चेत् । वञ्चनामधिकारस्य योग्यस्याऽथ करोति वा ॥३४४॥
ईदृशे जायमाने तु भये भद्रो जनस्तदा । कारयेदुभयोर्मध्ये संधिं चेत्, नात्र दूषणम् ॥३४५॥
असंशयं तु सोऽल्लाहो दयावांश्च क्षमा करः । (ज्ञानाय सर्वलोकस्य घोष्यते वै मुहुर्मुहुः) ॥३४६॥
[१८३]यथा पूर्वतनेभ्योऽभूत्, श्रद्धराः (तद्वदेव तु) । औपवस्तै समादिष्टं युष्मभ्यं (कीर्त्तिवर्धनम्) ॥३४७॥
येन यूयं क्षमाः स्यात (पापानां) विनिवारणे । [१८४]अहानि कानिचित्त्वेव, तेनाऽप्यार्त्तः प्रवासगः ॥३४८॥
युष्माकं चेद् भवेत् कश्चित् संख्यामूर्ध्वं स पूरयेत् । ये तु भोजयितुं शक्ताः व्रतैकस्य कृते हि ते ॥३४९॥
भोजयेयुर्मुखंपश्यं; भद्रं भद्रतरकृते । औपवस्तं प्रशस्तं तु युष्माभिर्ज्ञायतां यदि— ॥३५०॥
[१८५]रामायणस्य मासो वै (सर्वतः प्रथमं यदा) । सर्वलोकहितायाऽविः कुराणः (खल्वभाव्यत) ॥३५१॥
मार्गसन्दर्शकं कृत्वा प्रमाणैर्मार्गदर्शकैः । सत्याऽसत्यान्तरस्यापि स्पष्टतः प्रतिपादकैः ॥३५२॥
औपवस्तं हि कर्त्तव्यं युष्माकं योऽप्युपस्थितः । रुग्णो यो वा प्रवासे वाप्यूर्ध्वं संख्यां स पूरयेत् ॥३५३॥
जोषं नैव च कार्कश्यमल्लाहस्त्वीप्सते स वः । ईप्सते चैव संख्यां च पूरयेताऽथ शंसत ॥३५४॥
यूयं तावत् तमल्लाहं मार्गदर्शनकारणात् । कार्त्तज्ञं चापि गच्छेत; [१८६]वन्दकाश्चापि मे यदा— ॥३५५॥
युष्मान् मां प्रति पृच्छेयुः—सन्निकर्षे स्थितोऽस्म्यहम् । आह्वाने प्रतिवच्म्येव यदाऽह्वाता समाह्वयेत् ॥३५६॥
मदुक्तं तैरपि श्रव्यं, श्रद्धेयोऽहं तथैव च । येन सत्यस्य मार्गे ते स्थिरास्तिष्ठन्तु सर्वदा ॥३५७॥
[१८७]औपवस्ते निशाकाले स्वपत्नीरुपगच्छत । यूयं ताभ्यश्च युष्मभ्यं ताः परीधान संनिभाः ॥३५८॥
आत्मनावञ्चनां यूयमकार्ष्ट सततंन्विदम् । बुध्यते तावदल्लाहः ततोऽसौ वो दयाक्षमे ॥३५९॥
अकरोत्, तदिदानीं स्त्री यूयं यभ्यास्त, निश्चितम् । कामयध्वं तथाऽल्लाहात् युष्मभ्यं यदपि स्थितम् ॥३६०॥
पिबताश्नीत तं कालं श्वेतलेखोषसो यदा । कृष्णाया रात्रिलेखाया विस्पष्टं भासते पृथक् ॥३६१॥
प्रदोषो जायतेयावत् चोपवासं विधत्त भोः । यावल्लीना नमस्यायां मन्दिरेषु च स्म भोः ॥३६२॥
यूयं यभिष्ट तास्तावत्, धर्मा अल्लाहनिश्चिताः । नोपसर्यास्तथा ता हि, व्याख्यात्यल्लाह ईदृशम् ॥३६३॥
स्वं प्रकाशं नरेभ्यो, यत् भीधरास्तस्य सन्तु ते । [१८८]अन्योन्यस्य धनं चैव मिथो नाऽवैधरूपतः ॥३६४॥
उपयोज्यन्तु युष्माभिः, कार्यं तत् साधनं न वा । आयुक्तानुपगन्तुं तु विदाना हि कदाचन ॥३६५॥
धनांशं ग्रसितुं शक्ताः परेषां प्रभवेत च । [१८९]युष्मान् पृच्छन्ति चन्द्राणां विषये तेऽथ तान् वद ॥३६६॥
कालोऽयं धर्मयात्रायाः सर्वलोकहितस्य च । पराङ्द्वार्भिः प्रवेशस्तु गृहेषु न हि भद्रता ॥३६७॥
असौ भद्रः क्षमो यस्तु (पापानां) विनिवारणे । प्रवेष्टव्यानि वेश्मानि प्राङ्द्वार्भिः, भीश्च धार्यताम् ॥३६८॥
तस्मात् (शक्तिमतो) ऽल्लाहात् साफल्यं येन यात वै । [१९०]ये तु युध्यन्ति युष्माभिः यूयं तैश्चापि युध्यत ॥३६९॥
तदस्मिन् प्रथिते मार्गे योऽल्लाहस्यास्ति सम्मतः । मा सीमोल्लंघनं कार्ष्ट नाल्लाहस्य रुचिः क्वचित् ॥३७०॥
तेभ्यो ये कुर्वते तावत् सीमोल्लंघन (दूषणम्) । [१९१]लभेरन् यत्र कुत्रापि तत्र तत्रैव तान्हत ॥३७१॥
युष्मान्निष्कासयन्तस्ते निष्कास्याश्च ततः स्थलात् । मताऽतिचार (फितना) गर्ह्यत्वं बधादप्यतिरिच्यते ॥३७२॥
युध्यत तान् न यावत्ते युष्मान् युध्यन्ति हि स्वयम् । निकषाऽनिन्दितं तद् वै पूजास्थानं कदाचन ॥३७३॥
कुर्वन्त्येव तु चेद् युद्धं तस्य पार्श्वं पुनस्तु तान् । हतैव, प्रतिशोधोऽयमश्रद्धानां कृते मतः ॥३७४॥
[१९२]विमुखा यदि युद्धेभ्यस्ते भवन्ति (कथंचन) । असंशयं तदल्लाहो दयावांश्च क्षमाकरः ॥३७५॥
[१९३]मताऽतिचारमूलस्य यावच्छेदो न जायते । युध्यतां युध्यतां तावत् मार्गेऽल्लाहस्य संस्थिते ॥३७६॥
विमुखाः पुनरेते चेद् भवेयुर्न हि शात्रवम् । जाल्मेभ्यो व्यतिरिक्तेभ्यस्तिष्ठताद् वः कदाचन ॥३७७॥
[१९४]आदृतेभ्यस्तु मासेभ्यः सादरेष्वादरस्यधीः । प्रतिशोध इदंरूपःसमताऽऽधारितो मतः ॥३७८॥
आक्रान्तारश्च युष्मासु येहि, यूयं तु तेषु वै । तत्समाचरणं तावत् कुरुत भीधरास्ततः ॥३७९॥
ज्ञायतां वर्त्ततेऽल्लाहस्तै यें तस्मात्तु बिभ्यति । [१९५]मार्गेऽल्लाहस्य यूयं भोः ! विनियुंक्त निजं धनम् ॥३८०॥
क्षेपिष्ट मा तथाऽत्मानं सर्वनाशे स्वयं स्वकम् । भद्रकर्माणि कुर्यास्त सदल्लाहस्त्वसंशयम् ॥३८१॥

CC-0. In Public Domain. Digitized by eGangotri

भद्रकृद्भ्यो जनेभ्यो वै स्निह्यतीति (सुनिश्चितम्) । [196]सेव्यतां धर्मयात्रा चाल्लाहहेतोस्तथोमरा ॥३८२॥

युष्माकं यदि रोधः स्याद् बलिद्रव्यं प्रदेशनम् । सुलभं दीयताम्, नाऽथ कार्यतां शीर्षमुण्डनम् ॥३८३॥

बलिद्रव्यं न यावत् तु लक्ष्यमिष्ट प्रयाति हि । रुग्णो वा शीर्षपीडो वाऽप्यौपवस्तं समाचरेत् ॥३८४॥

दानं वाऽपि बलिद्रव्यं प्रतिदानमथोऽर्हति । धर्मयात्रा क्षणात् पूर्वं तूमरालाभमश्नुवन् ॥३८५॥

सुलभं स बलिद्रव्यं गतचिन्त उपाहरेत् । यस्य तत् सुलभं न स्यात् धर्मयात्रादिनेष्वसौ ॥३८६॥

औपवस्तं त्र्यहेभ्यस्तु, सप्तभ्यो विनिवृत्य च । चरेदेवं दशाहो वै जायते ह्युभयोगतः ॥३८७॥

तदिदं केवलं तेभ्यो न यान् वै निकषा भवेत् । कुटुम्बं किल पूजायाः (प्रोक्तं) स्थानमनिन्दितम् ॥३८८॥

सेव्यतां मतमाल्लाहं, वित्ताऽल्लाहोऽतिकष्टदः । [197]सम्यग् ज्ञातास्तु मासा वै धर्मयात्राकृते मताः ॥३८९॥

मानसे येन केनाऽपि तदा यात्रा सुनिश्चिता । ज्ञायतां तेन भोगस्य विषयाणां विवर्जनम् ॥३९०॥

अवज्ञाकारिता चैव कलहश्चापि वर्जितः । युष्माभिः कृतमल्लाहो भद्रं कृत्यं सुवेत्ति हि ॥३९१॥

चीयतां मार्गसामग्री चेश्वरत्रासरूपिणी । ईश्वरत्रासरूपैव सामग्री सूत्तमा मता ॥३९२॥

बुद्धिमन्तः ! ततो यूयं भयं मे कुरुताऽसकृत् । [198]नाऽत्र दोषस्तु वः कश्चित् कृपांयत्त्विच्छथ प्रभोः ॥३९३॥

प्रयाणे खलु वो जातेऽरफातात् चिन्त्यतामसौ । युष्माभिः पुनरल्लाहो मशअरे हरामके ॥३९४॥

इतः पूर्वं तु भोः ! यूयं यथाऽसौ प्रत्यपादयत् । अभूताऽन्यतमे तावत् लोकानामपयायिनाम् ॥३९५॥

[199]प्रतिष्ठन्ते यतो लोकाः प्रतिष्ठध्वं ततो हि भोः । क्षमाऽल्लाहस्य काम्यां च, सोऽल्लाहो नाऽत्र संशयः ॥३९६॥

दयावान् सुतराञ्चैव क्षमाशीलस्तथामतः । [200]पुनश्चस्मरताऽल्लाहं सम्पन्ना प्रार्थना यदा ॥३९७॥

धर्मयात्रा प्रसंगस्य यथा प्राग् भाविनः स्मृताः । ततो वाऽप्यतिमात्रं स; केचिदाहुरिदं नृषु—॥३९८॥

प्रभो नः ! दीयतां नस्तु लोके, भागं परत्र तु । नैव ते पुनरर्हन्ति; [201]त्वन्ये प्राहुस्तथेदृशम् ॥३९९॥

प्रभो नोऽस्मिन् परत्राऽपि चोभयोर्यच्छ भद्रताम् । नारकादनलाच्चैव त्वमस्मान् रक्षतात् पुनः ॥४००॥

[202]त एवैते कृतस्यांशो येभ्यो देयो हि वर्त्तते । शीघ्रमेव किलाऽल्लाहः सर्वेभ्यो योग्यभागदः ॥४०१॥

[203]पूर्वसंख्यातवारेषु तमल्लाहं तथेडताम् । यो द्व्यहाद्रीडनं कर्त्ता यः पुनश्च चिरायिता ॥४०२॥

तत्र दोषो न कोऽपि स्यात्, भीधरेभ्यः परन्त्विदम् । विभीत यूयमल्लाहात् जानीतेदं च सर्वथा ॥४०३॥

तत् समक्षं हि सेवार्थं समवेता विधास्यथ । [204]तत्र केचिच् च येषां ते रोचते भाषणं परम् ॥४०४॥

लोक जीवनमाश्रित्य यच् च तच् चेतसि स्थितम् । साक्षिणं कुर्वते तस्मिन् अल्लाहं वस्तुतस्तु ते ॥४०५॥

ये कलिप्रियतां यातास्तेषां शीर्षे प्रतिष्ठिताः । [205]ते पराऽवर्त्तनादूर्ध्वं धरित्र्यां तन्वते तथा ॥४०६॥

यत्नजालं यथोत्पन्नो विकारो जायतांतराम् । कृष्यन्नं पशवश्चापि विकृतिं संप्रयान्तु च ॥४०७॥

विकृतिं परमल्लाहो नैव सत्यमभीप्सति । [206]बिभीत यूयमल्लाहात् एवमुक्तानहंकृतिः ॥४०८॥

दुरिते हि नयत्येनान्, निरयो ह्येव तत्कृते । अवर्ण्यं शरणं तत् तु; [207]केचिदेवं विधा अपि ॥४०९॥

येऽल्लाहस्य प्रसादस्य लाभहेतोरिहात्मनः । त्यागञ्चापि प्रकुर्वन्ति, वन्दकेभ्यस्त्वनुग्रही ॥४१०॥

वर्त्तते स किलाऽल्लाहः—[208]सश्रद्धाः ! सर्व एव हि— । तस्मिन् आत्मार्पणं यात, पद्धतिं नाऽनुयात च ॥४११॥

शातनस्य पुनस्तस्य प्रसिद्धो वैर्यसौ हि वः । [209]प्रकटेषु प्रमाणेषु युष्मत् पार्श्वे भवत्स्वपि ॥४१२॥

यास्यथ स्खलनं यत्तु वित्त तत् स प्रभुत्ववान् । तत्वदर्शी तथाऽल्लाहः—[210]किं प्रतीक्षापरा इमे ॥४१३॥

आविर्भूयाद यदल्लाहो देवताभिर्हि सम्मुखम् । मेघच्छायास्वमीषां वै, भवेद् दत्तश्च निर्णयः ॥४१४॥

निर्णयायाभियोगा हि यान्त्यल्लाहं हि केवलम् । [211]प्रष्टव्यास्ते तथा वत्सा इस्रायीलस्य यद् वयम् ॥४१५॥

अदद्म स्पष्टचिन्हानि खलु तेभ्यः कियन्त्यपि । अल्लाहात् समवाप्तं यः प्रसादं परिवर्त्तयेत् ॥४१६॥

असंशयं तमल्लाहः कठिनं दण्डमाहरेत् । [212]लौकिकं जीवनं तेभ्यः सशोभं विहितं हि ये ॥४१७॥

हीनश्रद्धा अतिष्ठंस्ते सश्रद्धान् प्रहसन्ति च । परं ये भीधरास्ते वै हीनश्रद्धेभ्य उत्तराः ॥४१८॥

निर्णयाहे भविष्यन्ति, यमल्लाहस्तु वांछति कामतस्तं तमर्थेन मनोहृत्य पिपर्ति हि ॥४१९॥

[213]अविभिन्नः समाजोऽयंनराणां (परमत्र तु) । (भेदाङ्कुरोद्भवे जाते) वाग्धरान् प्राहिणोत् प्रभुः ॥४२०॥

शुभं वृत्तमयच्छन् येऽकुर्वताऽवहितान् पुनः । आविस्तैश्च समं चक्रे शास्त्रं सत्येन सम्भृतम् ॥४२१॥

CC-0. In Public Domain. Digitized by eGangotri

येन लोकेषु यन्मूलं भेदवृद्धेस्तदस्य तत् । माध्यस्थ्यान्निर्णयं कुर्यात्, विभेदो जनितश्च तैः ॥४२२॥
यैर्हि शास्त्रं समालब्धं प्रमाणानि स्फुटानि च । तैरवाप्याऽपि वैराय परेभ्यो भिन्नता कृता ॥४२३॥
श्रद्धरान् दर्शयामास स्वतोऽल्लाहः शुभायनम् । यत्र भिन्नमतालोका अभूवन्, सरलाऽयनम् ॥४२४॥
कामतो यमभिप्रैति प्रभुस्तद् दर्शयत्यलम् । [२१४]मन्यध्वे ननु किं यूयं साक्षात् स्वर्गं प्रवेक्ष्यथ ॥४२५॥
असोढ्वा पूर्वजैः सोढं यद् विधं कष्ट जालकम् । तेषु पर्यापतंस्तंकाः बाधास्तान् पर्यचालयन् ॥४२६॥
वाग्घरः श्रद्धराश्चैव यावत् तत् पार्श्व वर्तिनः । समाक्रन्दन्—"कदा साह्यमल्लाहस्योपयास्यति" ॥४२७॥
ज्ञायतां साह्यमाल्लाहं नेद एवाऽभिवर्त्तते । [२१५]ते त्वां पृच्छन्ति—"यद् राशिः कियान् तैः स्याद् व्ययीकृतः" ॥४२८॥
ब्रूह्यभीष्टं यदप्येषां पितृभ्यां तद् भवेदथ । मुखंपश्याऽध्वनीनेभ्यः स्यादनाथेभ्य एव च ॥४२९॥
युष्माभिश्चर्यमाणं हि वेत्यल्लाहोऽखिलं शुभम् । [२१६]अप्रियस्यापि युद्धस्य वो विधानं विधीयते ॥४३०॥
शक्यमेतदरुच्यं यद् भवेच्छ्रेयस्तदेव वः । शक्यमेतच् च यद् रुच्यं भवेदश्रेय एव वः ॥४३१॥
नो यूयं त्वस्य वेत्तारः, वेत्ताऽल्लाहस्तु वर्त्तते । [२१७]"आदृते खलु मासे" ते "योद्धव्यं वा न वेति वा" ॥४३२॥
पृच्छन्त्यमूंस्तु भाषस्व—"तदिदं त्वतिगर्हितम्" । अल्लाहस्य परं मार्गात्, पूजास्थानादनिन्दितात् ॥४३३॥
वारणञ्च जनानाञ्च ततो निष्कासनं पुनः । श्रद्धात्यागोऽखिलं ह्येतत् ततश्चाप्यतिरिच्यते ॥४३४॥
मतातिचारगर्ह्यत्वं वधादप्यतिरिच्यते । युष्माभिस्ते तथाऽजस्रं योत्स्यन्ति शक्नुयुर्यदि ॥४३५॥
मार्गाच्च च्यावयिष्यन्ति, च्युतोऽश्रद्धो म्रियेत यः । तस्य तत्तत् कृतं कर्म परत्राऽत्र च निष्फलम् ॥४३६॥
वह्निमेते हि वेष्टारस्तत्र स्थास्यन्ति चाऽनिशम् । [२१८]श्रद्धधरा ये व्रजित्वा ये गृहेभ्योऽल्लाहमार्गगाः ॥४३७॥
तेनिरे ये च संघर्षं तत् दयाशां प्रकुर्वते । असंशयं तदल्लाहो दयावांश्च क्षमाकरः ॥४३८॥
[२१९]ते त्वां पृच्छन्ति मद्यस्य द्यूतस्य विषये तथा । ब्रूहि—"दोषाकरं ह्येतत् द्वयं भूरि गुणाश्च वै" ॥४३९॥
वर्त्तन्ते केऽपि लोकेभ्यः, गुणाद् दोषोऽतिरिच्यते । ब्रूहि तान् यदि पृच्छन्ति "व्ययः स्याच्च कृतः कियान्" ॥४४०॥
व्ययनीयं धनं यद् वोऽपेक्षायोऽर्ध्वं वितिष्ठते । प्रकाशं निजमल्लाहः, युष्मास्वित्थं प्रभासयेत् ॥४४१॥
प्रवर्त्तध्वं यथा बुद्ध्या यूयं कर्मणि कर्मणि । [२२०]इमं लोकमधिकृत्य परं लोकं तथैव च ॥४४२॥
ते त्वां पृच्छन्त्यनाथानां विषये ब्रूहि तान् पुनः । यस्मिन् कर्मणि तेषां स्याद् हितं तत्कर्म सूत्तमम् ॥४४३॥
तैः सहैक्यात् कृतात् तेषां बन्धुतागुण आप्यते । विवेकं कुरुतेऽल्लाहो नाशके कारके तथा ॥४४४॥
ऐषिष्यत् चेदतोत्स्यद् हि, सोल्लाहो वोऽतिनिश्चितम् । संशयो नैव सोऽल्लाहस्तत्वदर्शी प्रभुत्ववान् ॥४४५॥
[२२१]तत्र या महिलाः सन्ति मूर्त्तीनां पूजिकाः न ताः । तावदुद्वहनीया नो यावच्छ्रद्धामुपासते ॥४४६॥
बन्धकी श्रद्दधानाऽपि रुच्यायास्तु वरा स्त्रियाः । प्रतिमापूजिकाया वै; नोपम्याश्च पूजकाः ॥४४७॥
न यावच्छ्रद्दधानास्ते बन्धकः श्रद्धरो वरः । पुरुषात् पूजकान्मूर्त्तेः रुच्यः स्यादपि चेदसौ ॥४४८॥
इमे निमन्त्रयन्त्यन्यान् वह्न्यर्थं; कृपया त्वसौ । क्षमार्थं चैव नाकार्थं, स्वं प्रकाशं व्यनक्ति च ॥४४९॥
प्रचेतन्तां जना येन—[२२२]त्वां च पृच्छन्ति ते जनाः । रजः स्त्रीणामधिकृत्य; ब्रूहि तान्—"व्याधिरेष तु ॥४५०॥
ता विविक्ताः प्रकुर्वीत यदा यावद् रजः स्रवेत् । यूयं नैवोपयातैताः यावत् पुष्पं न शुद्धयति ॥४५१॥
शुद्धपुष्पास्तु यव्धव्याः, यथाऽल्लाह; प्रचोदयात् । आश्रयन्ते तु येऽल्लाहं, शुचौ येषां मनो रतम् ॥४५२॥
तानिमान् सकलान् रक्तोऽल्लाहस्तिष्ठत्यसंशयम् । [२२३]स्त्रियो वः कृषिरूपा वः स्वाः कृषीः स्वैरमेत तत् ॥४५३॥
आत्मभ्यो भद्रकर्माणि पुरस्तात् प्रणिधत्त च । विभीत यूयमल्लाहात्, ज्ञायतां तावदेकदा ॥४५४॥
संगन्तव्यः स युष्माभिः, आख्याहि श्रद्धरान् शुभम् । [२२४]शपेऽल्लाहेन भद्रं नो, भक्ति नो, नोभयं ततः ॥४५५॥
करिष्यामि, न लोकेषु सुव्यवस्था—प्रसारणम् । लक्षयित्वेत्थमल्लाहं कर्हिचित् शाप्त मा जनाः ॥४५६॥
अल्लाहः शृणुते वेत्ति; [२२५]सत्यंकारेषु तेषु च — । अनिश्चितोपनीतेषु नाऽल्लाहस्तोत्स्यते च वः ॥४५७॥
तोत्स्यते वस्तुतस्तेषु हृन्मन्थादुत्थितेषु तु । दयावान् प्रथितोऽल्लाहः क्षमावान् पुनरेव च ॥४५८॥
[२२६]यैः स्त्रियः स्वाः परित्यक्ताः सत्यंकारेण ते जनाः । प्रतीक्षेरन् हि मासेभ्यश्चतुर्भ्यः, परतस्तु ते ॥४५९॥
यद्यौदार्यं प्रपद्यन्ते, क्षम्यल्लाहो दयी तथा । [२२७]तिलाञ्जलिं प्रपद्यन्ते मनसा संप्रधार्य चेत् ॥४६०॥
ज्ञायतां परमोऽल्लाहः श्रोता वेत्ता परः स्थितः । [२२८]प्रतीक्षेरन् रजोमाभ्यस्तिसृभ्यश्च पुनः स्त्रियः ॥४६१॥

CC-0. In Public Domain. Digitized by eGangotri

पतिभ्यः खलु नैजेभ्यः प्राप्स्यमानास्तिलाञ्जलिम् । चरमाहे तथाऽल्लाहे श्रद्धराः सन्ति ता यदि ॥४६२॥
नैव ता निह्नवं कुर्यु:तासां गर्भान्तरे तु यत् । निविष्टं जातमल्लाहात् पतिभ्यश्चापि साम्प्रतम् ॥४६३॥
अमू: स्वीकुर्वतां तासु पुनः सम्बन्धमिच्छुषु । सामान्यतः समा ह्येव स्त्र्यधिकारास्तु पूरुषैः ॥४६४॥
एक कोटि विशिष्टत्वान् नरोऽस्या अतिशायनः । तत्वदर्शी मतोऽल्लाहः पुनश्चैव प्रभुत्ववान् ॥४६५॥
[२२९]द्विवारं नियमेनाऽथ घोषणीयः तिलाञ्जलिः । ततः संस्तभ्यते स्त्री वा भद्रभावाद् विसृज्यते ॥४६६॥
न दत्ताद् युक्तमादानं तयोर्यावन्न संशयः । न क्षमौ पालने स्याव सीमामल्लाहनिश्चिताम् ॥४६७॥
न क्षमाविति संजाते संशये तु प्रतिष्ठिते । स्त्री प्रदायाऽपि यत् किंचिद् विसृष्टिं लब्धुमर्हति ॥४६८॥
उभाभ्यामपि दोषोऽत्र नैव कश्चिन् मतो (बुधैः) । इमा अल्लाह मर्यादा नातिक्रम्याः कदाचन ॥४६९॥
जाल्मास्ते हि मता एता येऽतियाय स्थिताः पुनः । [२३०]तिलाञ्जलिप्रदानोर्ध्वं न सा धर्म्या तु तत्कृते ॥४७०॥
यावन्नैवोपयच्छेत् सा पतिमन्यं; पतिस्तु ताम् । विसृज्याद् यदि (कालेन) परावृत्तिस्तयोः पुनः ॥४७१॥
पूर्वयोरुभयोरुक्ता मिथः श्रेयस्यदूषणा । परन्त्वाशासितौ स्यातां यद्यल्लाह प्रतिष्ठिताम् ॥४७२॥
मर्यादां पालयिष्याव इतीत्थं तावुभौ दृढम् । इमान् अल्लाहसीम्नोऽसौ सुविज्ञान् बोधयत्यलम् ॥४७३॥
[२३१]तिलाञ्जलिं तु संयाता याताः कालावधिं च याः । संस्तभ्यन्ते स्त्रियस्ता वा विसृज्यन्तेऽथवा पुनः ॥४७४॥
सामान्यं नियमं श्रुत्वा, संस्तभ्याः तंकितुं न ताः । मर्यादाऽतिक्रमस्तेन, स्वयं दोषी त्वतिक्रमी ॥४७५॥
मा हासिष्ट यदल्लाह; स्वतो युष्मास्वकाशयत् । बुध्यतां या कृपाऽऽल्लाही शश्वद् युष्मासु तिष्ठति ॥४७६॥
शास्त्रं तत् साऽथ बुद्धिश्च चोदयन्त्यवतारिता । अल्लाहात् खलु भेतव्यं सोऽल्लाहः सकलार्थवित् ॥४७७॥
[२३२]याभिस्तिलाञ्जलिर्लब्धो गताः कालावधिं च याः । सामान्यं नियमं श्रुत्वा, यौ मिथो योक्तुमुद्यतौ ॥४७८॥
तत्र ता वारणीया नो; युष्माकं योऽपि श्रद्धरः । अल्लाहे चरमाहे च तत्कृतेऽदोऽनुशासनम् ॥४७९॥
पवित्रोऽयं वदातोऽयं ह्यभ्युपायस्तु वो मतः । विजानाति तदल्लाहो यूयं जानीथ नैव तत् ॥४८०॥
[२३३]काम्यं पूर्णावधिं यावत् यदि वत्सः स्तनं धयेत् । मातरः स्वशिशून् स्तन्यं धापयेयुः समाद्वयम् ॥४८१॥
सामान्यं नियमं श्रुत्वा जनन्यै जनकः शिशोः । परिधानाशने दातुं नियमाबद्ध इष्यते ॥४८२॥
अतीत्य कोऽपि नो शक्ति कर्म कर्त्तुमिहेष्यते । कृच्छ्रक्षेप्यः पिता नाऽपि माता वा शिशु कारणात् ॥४८३॥
उत्तराधिकृते तस्य प्रतीष्टं हीत्थमेव च । इष्येत स्तन्यपानस्य यदि ताभ्यां तु वारणम् ॥४८४॥
प्रसादेन मिथो मत्या ताभ्यां दोषो न विद्यते । इष्टं धापयितुं स्तन्यं शिशुं स्याच्चेत् स्वतोऽन्यतः ॥४८५॥
किञ्चिद् दत्वा न दोषोऽत्र सामान्यनियमाऽश्रयात् । बिभीत यूयमल्लाहात् ज्ञायतां पुनरेव च ॥४८६॥
सर्वं स लोकतेऽल्लाहो यद् यूयं कुरुथेह तु । [२३४]मृतास्तु पतयो यासां प्रतीक्षेरन् हि ताः स्त्रियः ॥४८७॥
दिनानि दश मासांश्च चतुरो (जोषमाहिताः) । कालावधिं तु सम्प्राप्ताः सामान्यनियमाश्रयात् ॥४८८॥
स्वस्यै यद् यद् विदध्युस्ताः तत्र यूयं न दोषिणः । यद् यद् यूयं तु चेष्टध्वेऽल्लाहः सर्वं प्रवेत्ति तत् ॥४८९॥
[२३५]वैवाह्यं यदि सन्दिष्टं यद् वा चेतस्यवस्थितम् । स्त्रीभ्यो नैवाऽत्र दोषो वः; ता यूयं संस्मरिष्यथ ॥४९०॥
बुध्यते हीदमल्लाहः विवाहं वाक्त मा रहः । यावत् कालं न सामान्यनियमेनोदितं भवेत् ॥४९१॥
यावत् कालावधिं नैव सर्वमेतत् प्रयात्यलम् । तावन्निश्चिनुतोद्वाह-बन्धनं न कदाचन ॥४९२॥
अशेषं वेत्ति सोऽल्लाहः यद् युष्मच्चेतसि स्थितम् । बिभीत युयमल्लाहात् वित्त चेदं पुनस्तथा ॥४९३॥
अल्लाहः सक्षमोऽत्यर्थं दयालुः पुनरेव च । [२३६]स्पृष्टा एवाऽपिनो, याभ्यो निश्चितोऽर्थांश एव नो ॥४९४॥
स्त्रीभ्यस्तिलाञ्जलिर्दत्तश्चेन् न दोषस्तथाऽपि वः । सम्पन्नो यो दरिद्रो वा स्वस्थितिं समवेक्ष्य सः ॥४९५॥
सामान्यं नियमं श्रुत्वा ताभ्यो दद्याद्ध्यसंशयम् । कुर्वतां भद्रकार्याणां कृते कर्त्तव्यमस्त्यदः ॥४९६॥
[२३७]स्पर्शनाद् यदि दत्तः स्यात् पूर्वमेव तिलाञ्जलिः । कृतश्चेन् निश्चितोऽर्थांशो, निश्चितार्धः प्रदीयताम् ॥४९७॥
स्वयंकृत्वा न यावत् स्त्री भविष्यन् वा वरः स्वयम् । प्रतिषेधेद् धनाऽऽदानं; ह्यात्मना प्रतिषेधनम् ॥४९८॥
शुद्ध्याति संगतं प्राहुः; औदार्यं यत् परस्परम् । मैव विस्मार्ष्ट तद् यूयं, द्रष्टाऽल्लाहस्तु वः कृतम् ॥४९९॥
[२३८]प्रार्थनानां च तत्रापि सूत्तमानां विशेषतः । विषयेऽवहिता यूयं सदैव खलु तिष्ठत ॥५००॥
अल्लाहाऽभिमुखं चोर्ध्वं भक्तिभावेन तिष्ठत । [२३९]पादयोर्वाऽश्व पृष्ठे वा दरकाले यथाऽपि वा ॥५०१॥

CC-0. In Public Domain. Digitized by eGangotri

भवेच्छक्यं हि कुर्वीध्वं प्रार्थनाः; गनसंभ्रमाः । पुनर्यदा तदाऽल्लाहं ध्यात यूयं हि शिक्षिताः ॥५०२॥
विधौ यस्मिन्, न युष्माभिः ज्ञातो यस्त्वभवत्पुरा । [२४०]कालधर्मं प्रयास्यन्तो दाराणां सुहिते हि ते ॥५०३॥
अन्तिमेच्छां प्रकुर्युर्यत् वर्षमेकं न कोऽपि तान् । गृहान्निष्कासयेत्तेऽथ लभेरन् सर्वपोषणम् ॥५०४॥
त्यजेयुः स्वेच्छया चेत् ते गृहं नो कोऽपि दोषभाक् । सामान्यं नियमं शृत्वा हितं बुध्वा स्वकं स्वयम् ॥५०५॥
प्रभुत्वात् शालतेऽल्लाहस्तत्त्वदर्शी तथा मतः । [२४१]सामान्यं नियमं शृत्वा सामग्रीं पोषणीं पुनः ॥५०६॥
लभेरन् याःपरित्यक्तास्ताः स्त्रियोऽपि सुनिश्चितम् । तेषामेतद्धि कर्त्तव्यं येऽल्लाहस्य दरन्धराः ॥५०७॥
[२४२]आविरित्थं प्रकाशं स्वं सोऽल्लाहः कुरुते हि वः । येन यूयं विजानीत—[२४३]किन्न तेषां विचारितम् ॥५०८॥
परः सहस्र संख्याका अपि मृत्युभयात् तु ये । गृहांस्त्यक्त्वाऽपयाता हि; तानल्लाहः समादिशत् ॥५०९॥
"म्रियध्वम्"; स पुनः प्राणैस्तान् सर्वान् समयोजयत् । जनेभ्यः सत्यमल्लाहो महानुग्रहकृत् सदा ॥५१०॥
लोकाःप्रायेण कार्त्तज्ञं दर्शयन्ति न तं प्रति । [२४४]युध्यताऽल्लाहमार्गेण ज्ञायतां पुनरेव च ॥५११॥
श्रोता ज्ञाता तथाऽल्लाहः—[२४५]कोन्वसौ वर्तते जनः । योऽल्लाहायोत्तमर्णः स्यात्, अल्लाहस्तद् विवर्धयेत् ॥५१२॥
येन तत् सुबहुकृत्वोऽल्लाहः संकोचयत्यपि । स्फाययत्यपि, युष्माकं चरमं शरणं हि सः ॥५१३॥
[२४६]चिन्त्यतामीश्वरालीन वत्सनेतृगणस्य भोः । मूषादूर्ध्वं यदेकं ते वाग्घरं व्याहरन्निदम् ॥५१४॥
"नायकं नः कुरुष्वैकं युध्याम येन भोः ! वयम् । मार्गे तस्मिन् इहाऽल्लाहे", प्रत्युवाच पुनश्च सः ॥५१५॥
"अनुशिष्टाः कृता यूयं न युध्येतापि चेत् पुनः" । प्रत्यवोचन्—"न योत्स्यामो ऽल्लाहेमार्गे कथं वयम् ॥५१६॥
गृहेभ्यः खलु सापत्या ह्यपध्वस्ता वयं यदा" । अनुशिष्टास्तु युद्धाय पश्चात् तेषां परापतन् ॥५१७॥
सर्व एव हि यान् कांश्चित् विरलान् प्रविहाय वै । दोषिणस्तावदल्लाहः सम्यग् वेत्तीति (निश्चितम्) ॥५१८॥
[२४७]तांस्तेषां वाग्घरोऽव्रादीत्—"अल्लाहः शासकं हि वः । शौलं न्ययुंक्त", तेऽवोचन्—"शक्यमेतत् कथंन्वसौ ॥५१९॥
लभेत शासकत्वं नः उत्तरा यद्वयं ततः । धनेनाप्यधिको नासौ", प्रत्यवादीदसौ पुनः ॥५२०॥
"कृतोऽल्लाहेन युष्मासु" शासकः केवलो हि सः । विज्ञानेन शरीरेण कृतोऽसौ गुणवत्तमः ॥५२१॥
कामयेत यमल्लाहः शासकं कुरुते हि तम् । सर्वविद् वर्त्ततेऽल्लाहः क्षमावान् पुनरेव च ॥५२२॥
[२४८]तांस्तेषां वाग्घरोऽवादीत्—"नियुक्तेस्तस्य लक्षणम् । शासकत्वे तु मञ्जूषा देवताभिः समाहृता ॥५२३॥
प्रभुणा प्रेषितः शान्ति-सम्भारो यत्र, यत्र च । हारूनमूषगेहानामवशेषाः स्मृतिञ्जनाः ॥५२४॥
श्रद्धराश्चेत् तदत्र स्युर्महान्ति लक्षणानि वः" । [२४९]शौलोऽभिषेणयन्नाहाऽल्लाहो युष्मान् परीक्षितुम् ॥५२५॥
नद्या (मार्गगया) तावत् कांक्षते, वारि पास्यति" । यो ममासौ न, तावत् स्या दपिबंस्तु भवेन्मम ॥५२६॥
केवलाञ्जलिपूरेण चापि मेऽसौ भवेदिति । सर्व एवाऽपिबन् वारि तेषु कांश्चिद् विहाय वै ॥५२७॥
श्रद्धरेषु ततस्तेषु तस्मिन् तीर्णे च निम्नगाम् । प्रावदंस्ते जनाः—"नाद्य शक्तिरस्मासु विद्यते ॥५२८॥
वाहिनीमभियातुं तं जालवन्तं तथैव च ।" तेऽप्यवोचन् व्यजानन् येऽल्लाहसंगोऽस्ति सत्वरम् ॥५२९॥
"सुपुष्टोऽरिगणोनेकः दुर्बलैरप्यकिंचनैः । सहेलं विजितोऽल्लाहादनुज्ञां समवाप्य वै" ॥५३०॥
धैर्यवद्भिः सदाऽल्लाहः, [२५०]जालवन्तं च वाहिनीम् । प्राभियाय तु तेऽव्रोचन्—"प्रभो नः ! त्वं प्रदेहि नः ॥५३१॥
धैर्यं स्थैर्यं च पादेषु चाधिपत्यं च शाश्वतम् । तेषु येऽश्रद्धराः सन्ति" [२५१]परास्यंस्तांश्च ते तदा ॥५३२॥
दायदो जालवन्तं चाऽल्लाहशिष्ट्या तदा व्यहन् । शासनञ्च मनीषाञ्चाऽल्लाहस्तस्मा अदात् पुनः ॥५३३॥
शिक्षितश्च ततः शिक्ष्यं यस्माज् ज्ञानादमन्यत । अपध्वंसं गणेनाऽत्राऽकारयिष्यन् न चेदसौ ॥५३४॥
गणान्तरस्य भूमेस्तु व्यवस्थाऽनंक्ष्यदेव तत् । प्रजाभ्यः सुहितोऽल्लाहः सदैवाऽनुग्रही तथा ॥५३५॥
[२५२]इमान्यल्लाह वाक्यानि श्रावयामो हि यानि वः । सोद्देश्यं, न च सन्देहः वाग्घराणां त्वमप्यसि ॥५३६॥

(इति द्वितीयं पारायणमवसितम्; अथ तृतीयं पारायणं आरभ्यते)

[२५३]वाग्घराणां पुनःकेचित् कृता अस्माभिरुत्तराः । एषां कैश्चित् तथा सार्द्धमल्लाहोऽभाषताऽपि च ॥५३७॥
कृताः केऽप्युन्नताश्चैव, मर्यमायाः सुताय च । स्पष्टचिन्हानि दत्तानि पवित्रात्माऽप्यदीयत ॥५३८॥
वाग्घराणां परस्ताद् ये जाता लोका अवाप्य ते । स्पष्टचिन्हानि नायोत्स्यन् नैषिष्यच्चेदसौ क्वचित् ॥५३९॥
भिभेदस्तेषु जातोऽभूत् श्रद्धराऽश्रद्धराविति । ऐषिष्यद् यदि सोऽल्लाहो नायोत्स्यन् ते परस्परम् ॥५४०॥

CC-0. In Public Domain. Digitized by eGangotri

परन्त्विवच्छति सोऽल्लाहो यत् तदेव करोत्यसौ । [254]श्रद्धराः! यत् प्रदत्तं वो व्ययस्तस्माद् विधीयताम् ॥५४१॥

दिनस्यागमनात् पूर्वं तस्य यस्मिन् न वै भवेत् । क्रयो वा विक्रयो वाऽपि, मैत्र्यं चाशंसनं च सत् ॥५४२॥

श्रद्धरा ये न, तेह्येव दुष्टकार्याणि कुर्वते । [255]ईड्योऽल्लाहं विना नान्यः सजीवः शाश्वतोऽप्यसौ ॥५४३॥

न तन्द्रा न पुनर्निद्रा बाधते तं कदाचन । निविष्टं तत्तदस्यैव धरित्र्यां गगनेषु यत् ॥५४४॥

तदनुज्ञां विना कोऽत्र कुर्यात् सदभिशंसनम् । तत्समक्षं; स वेत्त्येषां पृष्ठतश्चाग्रतश्च यत् ॥५४५॥

प्रभुत्वं ते प्रपत्तुं च शक्नुवन्ति न कर्हिचित् । ततोऽधिके तु विज्ञाने यदयं कांक्षते स्वयम् ॥५४६॥

प्रसृतं तत् प्रभुत्वं च धरित्र्यां गगनेष्वपि । दुष्करं न मनागेषां तदर्थं रक्षणं तथा ॥५४७॥

स्थितोऽयन्तूच्चकैरस्ति महांश्चैवाऽस्त्ययं (सदा) । [256]न कोऽपि विवशीभावः प्रणाली विषये मतः ॥५४८॥

सत्यमज्ञानवार्त्तायाः विविक्तं ह्ययते पुरः । मिथ्या देवान् किलाऽऽनिन्द्यादल्लाहे श्रच्च दर्शयेत् ॥५४९॥

दृढस्तेनाश्रयो लब्धः संस्थूलोऽत्रुट्य एव च । श्रोताऽल्लाहःप्रसिद्धोऽत्र ज्ञाता चाप्युच्यते पुनः ॥५५०॥

[257]श्रद्धराणामिहाल्लाहो रक्षकं मित्रमस्ति वै । अन्धकाराद् विनिः सार्यं प्रकाशे तान् नयत्यलम् ॥५५१॥

रक्षकत्वेन मित्राणि मिथ्यादेवा भवन्ति च— । श्रद्विहीनजनानान्तु, विनिःसार्य नयन्ति ये ॥५५२॥

ज्योतिषस्तान् तमः क्षेत्रे ह्यग्नियोग्या इमेध्रुवम् । तत्र वत्स्यन्ति शश्वच्च [258]चिन्त्यतां तस्य तत् तथा ॥५५३॥

योऽब्रह्मेण (पुरा) सार्धमधिकृत्य प्रभुं तु वै । अल्लाहाद् दत्तराज्यः सन् विवादं समुपेयिवान् ॥५५४॥

अब्रह्मस्तमुवाचेदम् – "प्रभुर्मे जीवयत्यपि— । मारयत्यपि चैवाऽसौ", प्रत्युवाचवचस्त्वसौ— ॥५५५॥

"जीवयामि तथैवाऽहं, मारयाम्यपि जीविनः' । अब्रह्मस्तमुवाचेदम्—"अल्लाहोऽर्कं तु पूर्वतः— ॥५५६॥

गमयत्युदयं त्वञ्च प्रतीच्या गमयोदयम्" । इत्थमश्रद्धरस्तेन लज्जितोऽभूत्कृतस्तदा ॥५५७॥

नयत्येव न सन्मार्गमल्लाहो दोषिणः क्वचित् । [259]चिन्त्यतां समकक्षस्य तस्य वाऽपि (नरस्य भोः) ॥५५८॥

यस्य मार्गं प्रयातस्य वसतिः सम्मुखेऽभवत् । सर्वथाऽऽसीद् हि या नष्टा सर्वतः; योऽवदत् पुनः— ॥५५९॥

"सर्वनाशोर्ध्वमल्लाहो वसतिं जीवयिष्यति । केन तावत् प्रकारेण ?" ततोऽल्लाहो हि तं नरम् ॥५६०॥

शतैकार्थं तु वर्षाणां मारयामास; जीवनम्—। तदूर्ध्वं तमयच्छच् चाऽपृच्छदित्थं पुनश्चतम्—॥५६१॥

"कियत्यस्त्वं समा मृत्यौस्थितोऽ" वोचज्जनोह्यसौ । "दिनैकं वा तदंशं वा", प्रत्यवोचत् स तं नरम्—॥५६२॥

"शतैकं त्वं तु बर्षाणं तदवस्थस्स्थितोऽसि भोः । पानाशनस्य वस्तूनि त्वं निजानि प्रपश्य च ॥५६३॥

विकृतिं नाऽपि यातानि, खरं पश्य निजं तथा । सर्वमेतत् कृतं यस्माल् लोकेभ्यस्त्वं कृतो भवेः ॥५६४॥

प्रमाणं; पश्य चाऽस्थीनि चमत्कारेण पूर्णतः । व्यवस्थां किल नीतानि तदूर्ध्वं त्वचया पुनः ॥५६५॥

छादितानि च", खल्वित्थं वैशद्यं प्राप्य सोऽवदत् । "ज्ञातं सम्प्रति सोऽल्लाहः सर्वसामर्थ्यधारकः" ॥५६६॥

[260]यदाऽब्रह्मोऽवदच् चैव (स्वंप्रभुं) "मम हे प्रभो । दर्शय त्वं यथा प्राणैर्मृतान् युक्तान् करोषि मे" ॥५६७॥

प्रत्यवोचदसौ—"किन्ते शंकतेऽत्रमनः ?" स च । प्रोक्तवान्—"शाम्यतात् पापं, चेत आश्वासनाय तु ॥५६८॥

त्वामिदं खलु पृच्छामि," स होवाचाऽस्तु "गृह्यताम् । पक्षिणां चतुरस्तांश्च विधेहि स्वेन संगतान् ॥५६९॥

ततस्त्वेकैकमेतेषां ग्रहीत्वै कैकपर्वते । निधेह्याकारयैनांश्च पश्चात्, उत्कण्ठिताश्च ते ॥५७०॥

उपस्थास्यन्ति शीघ्रं त्वामल्लाहो ज्ञायतां ततः । प्रभुत्वेन हि पूर्णोऽस्ति तत्वदर्शी तथाऽस्ति च ॥५७१॥

[261]येऽल्लाहस्य तु मार्गेण धनस्य कुर्वते व्ययम् । स्वस्य, तस्योपमा तेन कणेन क्रियते हि यत्— ॥५७२॥

सप्तकर्णजनं यत्र प्रतिकर्णं पुनर्भवेत् । शतैकं हि कणोत्पत्तिरल्लाहः कामयेत चेत् ॥५७३॥

उत्तरोत्तरमेव स्यात् विवृद्धिस्तत्र तत्र तु । महौदार्योऽथ सर्वज्ञः सोऽल्लाहः (प्रथितः किल) ॥५७४॥

[262]येऽल्लाहस्य तु मार्गेण धनस्य कुर्वते व्ययम् । स्वस्य, कृत्वा व्ययं चैव प्रशंसाऽपेक्षिणो न हि ॥५७५॥

नापि वा व्यथयन्त्येव, तदर्थं निकषा प्रभुम् । वर्तते प्रतिदानं वै, भयं तेभ्यो भविष्यति ॥५७६॥

नैव, क्लिष्टा न चैवाऽपि भविष्यन्ति हि ते क्वचित् । [263]दयार्द्रः शब्द एकोऽपि क्षमावृत्या सभाजितः ॥५७७॥

दत्वा दानन्तु पीडायाः प्रदानादतिरिच्यते । निरपेक्षः क्षमाशीलस्तथाऽल्लाहो ध्रुवं मतः ॥५७८॥

[264]अल्लाहे चरमाहे च श्रद्धरो न हि यः पुमान् । व्ययं प्रदर्शनायैव स्वस्य स्वस्य करोति यः ॥५७९॥

श्रद्धराः ! तत्समं दानं व्यर्थं यूयं विधत्त नो । ज्ञापयित्वा कृतं, पश्चात् पीडयित्वा तथा (जनान्) ॥५८०॥

CC-0. In Public Domain. Digitized by eGangotri

शिलोपमः स या धूल्या संवृता तिष्ठते शिला । महावृष्ट्या पतन्त्या सा धूलिः सर्वाऽपवाहिता ॥५८१॥
शिलामात्रं तथाऽतिष्ठत् अर्जयन्तीदृशास्तु ये । न किञ्चित् समया शिष्टममूंस्तिष्ठति वै ततः ॥५८२॥
नो प्रदर्शयते मार्गमल्लाहोऽश्रद्धरानिह । [२६५]येऽल्लाहस्य प्रसादाय बलाय पुनरात्मनः ॥५८३॥
कुर्वते हि व्ययं रामः वनौपम्यं हि ते गताः । स्थितं यत्तूच्चकं भूमौ महावृष्ट्या फलत्यति ॥५८४॥
महावृष्टेरभावे च वृष्टिर्मन्दैव यत्र तु । यद् यद् यूयं हि चेष्टध्वेऽल्लाहस्तत्तद् विपश्यति ॥५८५॥
[२६६]कश्चिद् युष्माकमेतत् किं प्रतीष्टं मन्यते हि यत् । द्राक्षाखर्जूरसम्पन्नं तदाऽयत्तं वनं भवेत् ॥५८६॥
तदर्थं विविधं तत्र फलजातं समुद् भवेत् । प्लवन्तःप्रवहन्तःस्युर्नदास्ततत् पार्श्वतः पुनः ॥५८७॥
वार्द्धक्यं तमुपेतं स्यात्, बालसंघोऽस्तु दुर्गतः । आपतेच्च च वने तत्र वायुगोलोऽग्नि सन्निभः ॥५८८॥
भस्मीभवेद् वनं तच्चाऽल्लाह इत्थं करोति हि । काशितं युष्मदर्थं स्वं प्रकाशं सततं यथा ॥५८९॥
यूयं विचारणामत्र कुर्यात (श्रेयसे किल) । [२६७]श्रद्धरा ! भद्रवस्तूनां यद् यद् युष्माभिरर्जितम् ॥५९०॥
भूमेश्चैवापि युष्मभ्यं यदस्माभिस्तथाऽजनि । व्ययं तस्मात् कुरुध्वं, नो व्ययकाले प्रतीच्छथ ॥५९१॥
दूषितं गलितं ह्यंगं दातुं यस्याऽपि कस्यचित् । यदा युष्माकमप्येतत् ग्राह्यं नैव क्वचिद् भवेत् ॥५९२॥
गर्ह्यभावेन वा ग्राह्यं, ज्ञायतां पुनरेव च । निरपेक्षस्तथाऽल्लाहः प्रशस्यश्चापि सम्मतः ॥५९३॥
[२६८]युष्मभ्यं लक्ष्य सम्प्राप्ति प्रति जानाति शातनः । विगतश्लीलवर्त्मानं गन्तुं प्रोत्साहयत्यपि ॥५९४॥
परन्तु प्रतिजानाति वोऽल्लाहस्तु दयाक्षमे । महौदार्योऽथ सर्वज्ञः सोऽल्लाहः (प्रथितः किल) ॥५९५॥
[२६९]यं स कामयते तं हि कुरुते तत्वदर्शिनम् । तत्वदर्शित्वदानञ्च वैपुल्यं संप्रकीर्त्तितम् ॥५९६॥
परन्ते ह्येव चेतन्ते बुद्धिमन्तो हि ये जनाः । [२७०]यं व्ययं वा प्रणं वाऽपि युयमत्रकरिष्यथ ॥५९७॥
वेत्त्यल्लाहस्तु तत् सर्वं, साह्यस् स्याद्दोषिणां न वै । [२७१]दानं प्रकाशितं दत्तं वरमेव प्रकीर्त्तितम् ॥५९८॥
गुप्तदानं दरिद्रेभ्यो वरीयः कीर्त्तितं ततः । दोषघ्नं च भवेत्तद् वोऽल्लाहस्तत्तद् विपश्यति ॥५९९॥
यद् यद् यूयं हि चेष्टध्वे; [२७२]दायित्वं नैव तत् ते—। तेषां मार्गस्य नेतृत्व, मल्लाहः कामयेत यम् ॥६००॥
तं संदर्शयते मार्गं; व्ययं यस्य करिष्यथ— । प्रसादं लब्धुमाल्लाहं तदप्यत्रात्मने मतम् ॥६०१॥
प्रसादं लब्धुमाल्लाहं ह्येव कार्यो व्ययःसदा । यस्य यस्य व्ययं यूयं तावदत्र करिष्यथ ॥६०२॥
क्षति पूर्तिर्हि युष्माकं तस्य तस्य विधास्यते । अप्रियं न हि युष्माकं कथञ्चिच्च करिष्यते ॥६०३॥
[२७३]इदं (दानं) तेभ्यो दरिद्रेभ्योऽल्लाहमार्गं व्रजन्ति ये । जीविकायै निजायै ये शक्नुवन्ति न चेष्टितुम् ॥६०४॥
मूढस्तत् स्वाभिमानेन धनाढ्यांस्तान् निबोधति । परिचेतुं तु शक्तास्तान् यूयं तेषां स्वलक्षणैः ॥६०५॥
नो याचन्ते तु ते लोकान् संपरिष्वज्य नाटकैः । यस्य यस्य व्ययं यूयं तावदत्र करिष्यथ ॥६०६॥
असन्देहमिहाऽल्लाहस्तस्य तस्य निबोधति । [२७४]प्रकाश्य गोपयित्वा वा निजां रायं तु येऽनिशम् ॥६०७॥
व्ययीकुर्वन्ति तेभ्योऽस्ति समीपं तत्प्रभोः पुनः । प्रतिदानं, न चैवैषां भवितारौ भयव्यथे ॥६०८॥
[२७५]वृद्ध्यर्थभोजिनो (सूद) ये तु समुत्थास्यन्ति ते तथा । यथाऽसौ शातनाऽऽस्पृष्टः सोन्मादश्चेष्टते नरः ॥६०९॥
इदं ते तेन यत् प्राहुः—(हा) वणिज्याऽपि तादृशी । वृद्ध्यर्थो यादृशो लोके; ऽल्लाहो यद्यपि स स्वयम् ॥६१०॥
समर्थको वणिज्यायाः, वृद्ध्यर्थस्य निषेधकः । प्रभुणा प्रेषिताऽऽदेशं लब्ध्वा यस्तु निवर्त्तते ॥६११॥
तेन लब्धं तु तस्यैव समीपं स्थास्यति ध्रुवम् । तस्य तत् सकलं वृत्तमल्लाहाधीनमस्ति वै ॥६१२॥
तत्रैव यःपरावृत्तस्तद्विधास्तु नराः सदा । नारकाग्नौ प्रवेष्टारः सदा स्थास्यन्ति तत्र च ॥६१३॥
[२७६]स्यति वृद्ध्यर्थमल्लाहो दानं प्रोत्साहयत्यथ । अश्रद्धश्चाधिकारघ्नोऽल्लाहाय न हि रोचते ॥६१४॥
[२७७]श्रद्धराः शुभकार्याणां कर्त्तारो, दान दायिनः । ये च पुजा विधातारः, तदर्थं निकषा प्रभुम् ॥६१५॥
वर्त्तते प्रतिदानं वै, भयं तेभ्यो भविष्यति । नैव; क्लिष्टा न चैवाऽपि भविष्यन्ति हि ते क्वचित् ॥६१६॥
[२७८]बिभीत यूयमल्लाहात् श्रद्धराः ! योऽवशिष्यते । युष्माभिर्ग्राह्यवृद्ध्यर्थः, श्रद्धराश्चेत्, स हीयताम् ॥६१७॥
[२७९]कृतं न स्याद् यदि त्वेवं, युद्धसज्जा विधीयताम् । अल्लाहेन पुनश्चास्य वाग्धरेण समं तदा ॥६१८॥
अनुशेध्वे तु चेद् यूयं धनेमूले ह्यधिकृताः । यूयं नात्याचरिष्यध्वे, नात्याचरत चैव वा ॥६१९॥
[२८०]दुरवस्थां प्रयाते चाऽधमर्णे प्रतिपाल्यताम् । यावत् सौख्यं न यायात् स, दानं (किंवा) विधीयताम् ॥६२०॥

CC-0. In Public Domain. Digitized by eGangotri

जानत्स्वेतत्तु युष्मासु, वरीयो वो हि कीर्त्तितम् । [२८१]सावधानाः पुनर्यूयं स्मृत्वा स्मृत्वा हि तिष्ठत ॥६२१॥
दिनस्य तस्य, यूयं वै यदाल्लाहस्य सम्मुखम् । निर्वर्त्तिताः प्रतिव्यक्ति करिष्यध्वे (ह्यसंशयम्) ॥६२२॥
येन यच्चार्जितं तत्स लप्स्यतेऽशेषतःकिल । न चाऽत्याचरितोप्येव कोऽपि तेषां भविष्यति ॥६२३॥
[२८२]श्रद्धराः! व्यवहारं चेत् कुर्वीध्वं भोः! ऋणान्तरा । नियताय हि कालाय मिथस्तल्लिख्यतां पुनः ॥६२४॥
मध्यस्थो लेखकः कश्चिल् लिखेन् न्यायात्तदुत्तमम् । नोचितं प्रतिषेधेच् च लेखको लिखितुं तु तत् ॥६२५॥
अशिक्षयत् तमल्लाहो यथा; युक्तं लिखेद् ह्यसौ । लेखयेदधमर्णश्चाप्युदित्वाऽथ विभेतु च ॥६२६॥
अल्लाहात् स्वप्रभोः; तत्र वेशयेन्नोनतां तथा । अधमर्णोऽल्पवुद्धिर्वा हीनो वाऽपि यदा भवेत् ॥६२७॥
शक्तो लेखयितुं नो चेत् तस्य संरक्षकस्ततः । व्याहृत्य लेखयेन् न्यायात् आत्मनोर्नरयोर्द्वयोः ॥६२८॥
साक्षितां कारयेच् चापि, तदभावे द्वयोः स्त्रियोः । एकस्य पुरुषस्यैषां रुच्यानां साक्षितां हरेत् ॥६२९॥
तदेतत्ः– स्खलिते ह्यन्यो येन तं स्मारयेद् द्रुतम् । साक्षिणः साक्षितादानं निषेधन्तु न कर्हिचित् ॥६३०॥
गुर्वी लध्वी भवेद् वाऽपि संविदा लेखने क्वचित् । भजनीयं तु नालस्यं समं कालाङ्कनेन हि ॥६३१॥
अल्लाहस्य मतेनाऽयं सूत्तमो न्यायसङ्गतः । साक्षितौचित्यरक्षार्थञ्चाऽभ्युपायः श्रियाऽन्वितः ॥६३२॥
अपैतु सर्वसन्देहञ्चापतन्तमिहान्तरा । नाऽपि लेखान्वितः स्याच्चेत् नास्ति दोषो, भवेद् यदि— ॥६३३॥
प्रत्यक्षस्थं तु वः पण्यं; कालेऽथ पण्यसाधने । साक्षिणः खलु कर्त्तव्याः; न स्याद्बाधा पुनः क्वचित् ॥६३४॥
साक्षिणो लेखकस्याऽथ; तेषु वाधां गतेषु च । पापात्मता हि युष्माकं स्पष्टसिद्धा भविष्यति ॥६३५॥
बिभीत यूयमल्लाहात् अल्लाहः शास्ति वो भृशम् । सर्वविच्च तथाऽल्लाहः; [२८३]प्रवासे स्यात वा यदि ॥६३६॥
लेखकोऽनुपलभ्यश्चेत् हस्ताभ्यां स्यात् कृतः प्रणः । विश्वस्तौ यौ मिथः स्यातां निक्षिप्तं वस्त्वसौ पुनः ॥६३७॥
विश्वासात् प्रतिदद्याद् हि सेवायां पुरतः प्रभोः । साक्षिताऽपह्नवो नैव विधेयो, विहितस्त्वसौ ॥६३८॥
पापात्मतां हि युष्माकं स्पष्टसिद्धां प्रकाशयेत् । यद् यद् यूयं हि चेष्टध्वेऽल्लाहःसर्वं प्रवेत्ति तत् ॥६३९॥
[२८४]यद् यत्तिष्ठति तत् सर्वं धरित्र्यां गगनेष्वपि । अध्यल्लाहं च युष्माकं चेतसि यत् स्थितं च तत् ॥६४०॥
गुप्तंव्यक्तमशेषस्याऽल्लाहः प्रक्ष्यति वो ध्रुवम् । क्षंस्यते तोत्स्यते किं वा यं यथा कामयिष्यते ॥६४१॥
समर्थः पूर्णतोऽल्लाहः; [२८५]वाग्घरः श्रद्धरा अपि । श्रत्तस्मिन्नदधुस्तेषु प्रभुणा यत् प्रकाशितम् ॥६४२॥
सर्वोऽप्येषान्तु सश्रद्धोऽल्लाहे तद्देवशास्त्रयोः । वाग्घरेषु पुनस्तस्य; (व्याहरन्ति स्फुटंत्विमे) ॥६४३॥
भेद वुद्धि न वै दध्मो वाग्घरेष्वस्य कामपि । त आहुः—संश्रुतं चैव पालितञ्चाथ नः प्रभो ! ॥६४४॥
क्षमा देयोपगन्तव्यस्त्वमेव चरमे क्षणे । [२८६]वाहयेच्छक्तिमुत्क्रम्य नाऽल्लाहो भारमत्र वै ॥६४५॥
अर्जितं येन तत्तस्य पापं यत्तेन चार्जितम् । आपतन् परिणामोऽपि तस्मिन्नेवाऽपतिष्यति ॥६४६॥
प्रभोऽस्माकं ! वयं नेया निग्रहं नो कदाचन । विस्मृता यदि वा भ्रष्टा लक्ष्याद् यामो (भवेऽत्र तु) ॥६४७॥
पूर्वजेषु यथा भारं तथाऽस्मासु च मा क्षिपः । अनुह्यं देहि नो भारं प्रभो नः ! नः क्षमस्व च ॥६४८॥
संवृणुष्व दयस्वाऽस्मान् रक्षकस्त्वं हि नः पिता । आभिमुख्ये जयं चाऽस्मानश्रद्धेषु प्रदेहि वै ॥६४९॥

योगः—६४९

CC-0. In Public Domain. Digitized by eGangotri

३

सूक्तम्–इमरान कुलम्

(आले इमरान)

(मदहीनाऽवतीर्णा द्विशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अलिफ लाम मीमेति; [2]सोऽल्लाहोऽमुं विनेतरः— । पूज्यो नैव, स नित्यश्च सजीवश्चापि तिष्ठति ॥ १ ॥
[3]अल्लाहः किञ्च यस्तावत् प्रकाशं त्वानयत् त्वयि । स शास्त्रं सत्य सम्पूर्णं, प्रकाशं गमितं पुरा ॥ २ ॥
समर्थयन् हि तत् सर्वं, तौरतेञ्जीलके यथा । [4]इतःपूर्वं हि लोकेभ्यो मार्गसन्दर्शनाय च ॥ ३ ॥
निकषत्वेन चैवेभ्योऽगमयत् स प्रकाशताम् । श्रद्दधाना न येऽल्लाहप्रकाशेषु जना इह ॥ ४ ॥
यातनास्तान् प्रतीक्षन्तेऽल्लाहः शक्तेः समुच्चयः । पापस्यासौ प्रतीकर्त्ताऽ, ल्लाहाद्वै निह्नुतं तु नो ॥ ५ ॥
[5]गगनेषु धरित्र्यां च वस्तु किञ्चिद् हि वर्त्तते । [6]स एवाऽयं तु रूपाणि स्वच्छन्देन करोति यः ॥ ६ ॥
गर्भाशयेषु युष्माकं, पूज्यो नाऽन्यो हि तं विना । प्रभुता शाल्यसौ चैव तत्वदर्शी तथैव च ॥ ७ ॥
[7]स एवाऽयन्तु यः शास्त्रं प्रकाशं ह्यानयत् त्वयि । आयाताः सारभूता ये शास्त्राधारास्तु ते मताः ॥ ८ ॥
लाक्षणिकाः ततोऽन्ये तु तेनाऽस्पष्टाश्च ते मताः । हृदा ये तु तिरश्चीना अस्पष्टांस्ते भजन्ति हि ॥ ९ ॥
तत्वार्थदर्शनस्याऽत्र प्रसंगेन विभिन्नता । शक्या जनयितुं येन (सर्वथापि) भवेदिति ॥१०॥
नाऽथ कोऽपीतरोऽल्लाहात् तदर्थं वुध्यते तु यः । ज्ञानसिद्धास्त्विवदंह्याहुः—श्रद्धरा वयमेषु तु ॥११॥
सर्वमस्मत् प्रभोश्चैतत् परं ये हि मनीषिणः । त एव त्वत्र चेतन्ते, प्रभो नः ! हृदयानि नः ॥१२॥
[8]माऽपथे कुरु यायीनि सन्मार्गालोकनोत्तरम् । स्वकोषान्नो दयां देहि, परो दाताऽस्यसंशयम् ॥१३॥
[9]प्रभो नः ! सर्वलोकांस्त्वं संहृतान् प्रविधास्यसि । उपैष्यत्यहनीत्यस्मिन् सन्देहो नैव वर्त्तते ॥१४॥
स्वां प्रतिज्ञामिहाल्लाहो न कथञ्चिद् विरुध्यति । [10]श्रद्धाहीनास्तु येऽल्लाहे धनं तेषां तथा प्रजाः ॥१५॥
नापि तावद् भविष्यन्ति कथञ्चित् कार्यसाधकाः । इन्धनानि त एवाऽग्नौ भविष्यन्ति जना ध्रुवम् ॥१६॥
[11]यथा फ़ारोहलोकानां चाऽभूत् तत् पूर्ववर्त्तिनाम् । आयातेषु गतश्रद्धा अस्माकं तेऽभवन् यदा ॥१७॥
न्यग्रहीत् तान् ततोऽल्लाहोऽ—[12]श्रद्धरान् ब्रूहि तानिदम् । भविष्यथाऽतिशीघ्रं वै यूयं तावत् पराजिताः ॥१८॥
भविष्यथ प्रणीताश्च नरकं दुर्गतेःस्थलम् । [13]लक्षणं दलयोर्वश्च तत्र (बद्र) रणोद्यमे ॥१९॥
एकोऽल्लाहस्य मार्गेणाऽयुध्यत् त्वश्रद्धरोऽपरः । तान् अपश्यन्त्स्वदृग्भिर्यद् द्विगुणास्तेऽभवंस्ततः ॥२०॥
एवं साह्येन स स्वेन शक्तिमन्तं करोत्यमुम् । अल्लाहो यमभिप्रैति; नेत्रिभ्योऽस्त्यत्र शिक्षणम् ॥२१॥
असंशयं हि; [14]लोकेभ्यस्तदभीष्टं तदीप्सितम् । स्त्रियः पुत्राश्चया रौप्याः सौवर्णा श्चिह्निता हयाः ॥२२॥
मृगाः कृष्यश्च सर्वेऽपि शोभिताःसत्कृताः कृताः । इदं सौख्यकरं तावज् जिहानस्याऽत्र जीवने ॥२३॥
वरीयः शरणं त्वस्मात् पार्श्वेऽल्लाहस्य वर्त्तते । [15]कथ्यतां—सूचयानि त्वां यत्ततोऽप्यधिकं वरम् ॥२४॥
मंस्यन्ते ये भयं तेभ्यः तत् प्रभोः पार्श्वतः सदा । सन्त्यारामा हि यत् पार्श्वं कुल्याःप्रस्रवणास्तथा ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

वत्स्यन्ति सर्वदा तत्र, विशुद्धास्तत्र च स्त्रियः । प्रसादस्तत्र चा ऽऽल्लाहो ऽल्लाहस्स्वदास-दर्शकः ।।२६।।
[16]ये वदन्ति—प्रभो नो भोः ! श्रद्दध्मः साम्प्रतं वयम् । त्वं क्षमस्व ततोऽस्माकं पापानि, रक्ष चैव नः ।।२७।।
यातनायास्ततो वह्नेः; [17]ये धीरा ये वशंवदाः । व्ययिनश्च, क्षपान्ते च स्वपापानां क्षमेच्छुकाः ।।२८।।
[18]अल्लाहस्साक्षिमान् तेन विना नान्यः प्रभुस्तथा । विद्वांसो येऽपि देवाश्च (साक्षिणस्तेऽपि सम्मताः) ।।२९।।
न्यायस्य रचनां स्वीयां स्थिरयत्येष, तं विना । पूज्यो नान्यः, स तत्वार्थदर्शी चाऽथ प्रभुत्ववान् ।।३०।।
[19]मतं त्वाऽऽल्लाह मेतद् वै यद् "ईशाराम" मात्रकम् । शास्त्रं ये त्वत्र लब्धारोऽधिगमाऽनन्तरं हि ते ।।३१।।
भेद बुद्धिं मिथोऽकुर्वन् अन्योऽन्यं गर्हितुं पुनः । आयातेषु न वै श्रद्धां कुर्वते ये विदन्तु ते— ।।३२।।
शीघ्रमेव हि सोऽल्लाहः प्रतीकर्त्ता (स्त्यसंशयम्) । [20]विवदन्ते त्वयाचेत् ते ब्रूहि—अहं चानुयायिनः ।।३३।।
मम चाऽपि तमल्लाहमात्मभिर्ह्यर्पयाम वै । पृच्छ्यंतां शास्त्रिणश्चैव ततस्तानप्यशिक्षितान्(उम्मी) ।।३४।।
ईशारामो नु किं लब्धः ? लब्धश्चेत् स्वयना इमे । पराङ् आस्या भवेयुश्चेत् सन्दिश्यन्तां त्वया हि ते ।।३५।।
दासानामीक्षिता ऽल्लाहोऽ—[21]ऽल्लाहायातेषु ये जनाः । श्रद्विहीनास्तथा घ्नन्ति निरर्थं वाग्धरानथ ।।३६।।
तान जनान् खलु ये लोके कुर्वते न्याय-सारणम् । वोधयैतान्प्रतीक्षन्ते ह्याभीलोपेतयातनाः ।।३७।।
[22]त एवंते जिहाने च परलोके तथैव च । अन्यथासिद्धकर्माणः, सहायैश्च विना सदा ।।३८।।
[23]किन्न दृष्टं हि यच्छास्त्रं यैरलम्भि जना हि ते । तच्छास्त्रं स्वविवादेषूत्थितेषु पर्युपासते ।।३९।।
निर्णयाय, पराङ्आस्यं दलमेकं विरुध्यते । [24]इदञ्चास्माद् वदन्त्येते यतोहीदम्—स पावकः ।।४०।।
शक्नोत्यस्मान् न वै स्प्रष्टुं त्यक्त्वाऽहानि तु कानिचित् । घटयन्ति यदप्येते तदेतान् वञ्चनाऽवटे ।।४१।।
मतस्य व्यतिरेकेण पातयत्येव सत्वरम् । [25]का दशा भविता त्वेषामसन्देहं वयं यदा ।।४२।।
समवेतान् करिष्यामः सर्वानेतानशषेतः । योऽपि यच्चार्जयत् तस्मै तत्तत् पूर्णं प्रदास्यते ।।४३।।
न चात्याचरितस्तेषां कश्चनापि भविष्यति । [26]कथ्यतामथ हेऽल्लाह ! राज्यसत्ताऽधिप ! त्वकम् ।।४४।।
दद्याः किं वाऽप्यपाकुर्याः स्वेच्छया राज्यमत्र वै । स्वेच्छया यञ्च कञ्चाऽपि मानयेर्वाऽपमानयेः ।।४५।।
भद्रं पाणौ तवैव त्वं सर्वसामर्थ्यभृद् ध्रुवम् । [27]रात्रिं दिने दिनं रात्रौ निवेशयसि, जीवितम् ।।४६।।
निर्जीवादथ निर्जीवं निष्कासयसि जीवितात् । वैपुल्यञ्च कृपारूपं प्रददासि निजेच्छया ।।४७।।
[28]श्रद्धराः श्रद्धरानेव कुर्युर्नाऽश्रद्धरान् पुनः । मित्राणि, योऽन्यथाचारी नाऽल्लाहस्तस्य वै सखा ।।४८।।
सत्यमेतच्च युष्माभिरात्मा संरक्ष्यतां ततः । स्वस्माद् भीषयतेऽल्लाहः स्वतो युष्मांस्तथा पुनः ।।४९।।
युष्माकं सर्वयात्राऽन्तोऽल्लाह एवास्ति (निश्चितम्) । [29]कथ्यताम्—हृत्सु युष्माकं निगूढं विशदं च वा ।।५०।।
यदप्यस्ति तदल्लाहो जानात्येव तथैव च । यद् वियत्सु धरित्र्यां वा वेत्ति तच्चापि किञ्च सः ।।५१।।
सर्वसामर्थ्यं भृत्तावद् वर्त्ततेऽल्लाह इत्यपि । [30]दिन यस्मिन् प्रतिव्यक्ति शुभेनाऽप्यशुभेन च ।।५२।।
स्वकृतेनाऽभियुक्तः स्वं द्रक्ष्यत्येषिष्यति स्वयम् । अभविष्यद् वर तावद् दवीयस्त्वं तु कालतः ।।५३।।
अगमिष्यत् कृतं तस्य यद्येतत् तत् तथैव च । भीषयत्येव चाऽल्लाहो युष्मांस्तावत् सदाऽऽत्मनः ।।५४।।
बन्धकेभ्योऽति चाऽल्लाहो मतोऽस्ति करुणामयः । [31]कथ्यतां—यूयमल्लाहं स्निह्यथ चेत् ततो हि माम् ।।५५।।
अनुगच्छत सोऽल्लाहो युष्मान्स्नेहिष्यति ध्रुवम् । क्षंस्यते वश्च पापानि ह्यल्लाहः सदयः क्षमी ।।५६।।
[32]कथ्यतां—यत् समादेशेऽल्लाहस्य वाग्धरस्य च । तिष्ठन्तु ते पराङ्ङास्या भवन्ति चेद् विबुध्यताम् ।।५७।।
नाऽल्लाहः स्नेहमाधत्तेऽश्रद्धरेषु कदाचन । [33]असन्देहं हि सोऽल्लाहोऽकरोल् लोकेष्वनुत्तमान् ।।५८।।
इमरानकुलं नूहमब्रह्यकुलमादिमम् । [34]अन्योऽन्यस्य हि संतानाः, श्रोताऽल्लाहो ज्ञ एव च ।।५९।।
[35]ज्ञायतां—इमरानस्य जायाऽवोचद् यदा—प्रभो । गर्भस्थं तु शिशुं तुभ्यमुपहारांकरोमि वै ।।६०।।
त्वमंगीकुरु मत्तस्तूपहारस्तुभ्यमस्ति यः । श्रोताऽसि चैव विज्ञाता चाऽसन्देहं त्वमेव भोः ।।६१।।
[36]प्रसवोद्ध्वं च साऽवोचत्—सूतवत्यस्मि वालिकाम् । अवेत् सम्यक् तमल्लाहोऽजनयद् यं शिशुं हि सा ।।६२।।
बालः संवदते नैव बालिकां; शिशु नाम च । मर्यमेति मयाऽकारि तदपत्यञ्च तामहम् ।।६३।।
गर्हितात् शातनात् त्रातुं प्रार्थये शरणं तव । [37]स्वीकृत्या तत्प्रभुश्चापि स्वीचकार च तां पुनः ।।६४।।
वर्धयामास चोन्नत्या सम्यक् तां; चाभिरक्षकम् । यज्ञक्रियं व्यधादस्याः; प्रार्थनाऽलयमागतः ।।६५।।

CC-0. In Public Domain. Digitized by eGangotri

यज्ञक्रियो यदाप्यस्याः पार्श्वे भोज्यान्यलोकत । मर्यमैषां कुतो लाभः ? पृष्टा साऽब्रूत—खल्विदम् ।।६६।।
लभेऽल्लाहादभिप्रैति यं स तस्मै ददात्यलम् । [३८]यज्ञक्रियस्तदाऽऽह स्वं प्रभुं संबोध्य—हे प्रभो ! ।।६७।।
उत्तमं देहि मेऽपत्यं, प्रार्थनाऽकर्णको ध्रुवम् । [३९]प्रार्थनायां स्थितो यावत् सोऽभवत् प्रार्थनाऽऽलये ।।६८।।
देवा अवोचन्—अल्लाहो वक्ति त्वां सूचनां शुभाम् । योधनस्यैष चाल्लाहात् समर्थनाय शब्दकम्(जोहन) ।।६९।।
उपैति श्रीधरो दूतः सत्यस्याऽथ च संयमी । [४०]जराजीर्णोऽस्मि जाया च वन्ध्या मे स्यात्सुतः कथम् ।।७०।।
तस्मिन्नुक्तवतीत्थं स दूत आह—इत्थमेव भोः । यत् त्वभिप्रैति सोऽल्लाहः करोति तत्तदेव सः ।।७१।।
[४१]उवाचाऽयं—प्रभो ! मह्यं लक्ष्म किंचित्तु निश्चिनु । अवोचत्—लक्ष्म ते ह्येतत् त्रिदिनं त्वं जनैः सह ।।७२।।
वक्तुं शक्ष्यसि संकेतादृते नाप्येव सर्वथा । स्वप्रभुः स्मर्यतां भूरि सन्ध्ययोरुभयोस्तथा ।।७३।।
शंस तं सततं चैव; [४२]देवाश्चापियदाऽब्रुवन् । मर्यमे ! त्वं चिताऽल्लाहात् पूता चैवामुना पुनः ।।७४।।
स्त्रीषु जागतिकासु त्वं वरीयस्त्वेन चाऽदृता । [४३]मर्यमे ! स्वप्रभोस्त्वं भोः ! विधेया तिष्ठ, ये च ते ।।७५।।
कुर्वतेऽष्टांगपातञ्च नमस्यन्ति तथैव च । कुरुष्वैवं हि तैः सार्धम्; [४४]गमयामः प्रकाशताम् ।।७६।।
त्वयि यत् तत् परोक्षं वै सूचनानां तु विद्यते । तेषां पार्श्वे तदानाऽऽसीः, स्वलेखन्या तु चेष्टितम् ।।७७।।
यदा तैः खलु निर्णेतुंमर्यमारक्षकोऽस्तु कः । तेषां पार्श्वे तदा चापि त्वं नैवाऽऽसीर्यदा हि ते ।।७८।।
विवदन्तेस्म संभूय तं प्रसंगमुपाश्रिताः । [४५]ज्ञायतां—अथचावोचन् यदा देवाश्च—मर्यमे ! ।।७९।।
अल्लाहस्त्वां स्वतो भद्रां दत्ते शब्दस्य सूचनाम् । यस्याभिख्या हि दूतेशो भविता मर्यमात्मजः ।।८०।।
लोकेऽपि परलोकेऽपि प्रख्यातोऽसौ भविष्यति । समीपवर्त्तिनां चैकोऽल्लाहस्यासौ भविष्यति ।।८१।।
[४६]स दोलास्थः शिशुश्चापि सवयाश्चापि मानुषैः । भाषिष्यतेऽथ भद्राणामन्यतमो भविष्यति ।।८२।।
[४७]अवोचत् सा—प्रभो ! नाहं स्पृष्टा पुंसा तु केनचित् । कथं पुत्रं प्रसोष्ये तत्; प्रत्युवाच—इत्थमेव तु ।।८३।।
यत् स कामयतेऽल्लाहो जनयत्येव तत् किल । आदिशत्यथ यद् वस्तु तद् वदत्युद्भवं व्रज ।।८४।।
उद्भवत्यथ तत्, [४८]किञ्च शास्त्रं वुद्धि तथैव च । तौरातेञ्जीलकेऽल्लाहस्तं पुनर्ज्ञापयिष्यति ।।८५।।
[४९]वाग्घरं चाप्यमुं कृत्वा प्रेषयिष्यति तत्पुनः । ईश्वरालीनसन्तानं प्राप्यासौ तानुवाच ह— ।।८६।।
युष्माकं यः प्रभुस्तस्माल्लक्ष्मादायास्म्युपस्थितः । मृदा युष्मभ्यमेषोऽहं चटकाः संसृजामि च ।।८७।।
फूत्कारेण यदा प्राणैर्युनज्म्येनां इयं तदा । जायते चटका साक्षात् अल्लाहस्यानुशासनात् ।।८८।।
अन्धस्य कुष्ठिनश्चापि विकारान् नाशयाम्यहम् । मृतान् उज्जीवयाम्येष तथाऽल्लाहानुशासनात् ।।८९।।
शक्तो बोधयितुं किञ्च यदत्थाऽऽवसथेषु वा । संगृह्णीथ, पुनर्यूयं भवथ श्रद्धरा यदि ।।९०।।
अत्र लक्ष्म महत् तावद् युष्मभ्यं वर्त्तते ध्रुवम् । [५०]प्राक्तने यच्च तौराते मत्तस्तत्तत् समर्थये ।।९१।।
उपेतोऽहञ्च युष्मभ्यं वर्जितं यत् पुराऽभवत् । विदध्यां तत् पुनर्वैधमुपेतो वस्तथैव च ।।९२।।
लक्ष्माऽऽदाय प्रभोर्यो वः, विभीताऽल्लाहतस्तथा । मन्यध्वं यद् वदाम्येष; [५१]सन्देहो नात्र विद्यते ।।९३।।
अल्लाहो मे प्रभुः किञ्च युष्माकञ्चाप्यसौ प्रभुः । तमेव तेन वन्दध्वमृजुर्मार्गो ह्ययं किल ।।९४।।
[५२]ईशोऽजानाद् यदा तेषामश्रद्धां तानुवाच ह । सहायः को नु भावी मेऽल्लाह कार्ये ? तदाऽब्रुवन्— ।।९५।।
तच्छिष्या वयमल्लाह सहायाः, श्रद्धरा वयम् । पूर्णतस्तावदल्लाहे, साक्षिता ते च तिष्ठतात् ।।९६।।
स्वात्मार्पका वयं तस्य; [५३]हे प्रभो ! यत् प्रकाशितम् । त्वया श्रद्धाधरास्तस्मिन्, वयञ्चाप्यनुयायिनः ।।९७।।
तस्य यं प्रैषयस्त्वं भोः ! लिखाऽस्मन्नाम साक्षिषु । [५४]अभिसन्धिःकृता यत्तैरल्लाहोऽप्यतिसन्दधौ ।।९८।।
पारगस्तावदल्लाहस्त्वभिसन्धिमनस्सु हि । [५५]यदाऽवोचत् तथाऽल्लाहः परावर्त्तयितेश ! भोः ।।९९।।
इदानीमचिरादेवोद्धर्ता तेऽभिस्वमेव च । ये तथा ऽश्रद्धरास्तेभ्यः कर्त्ता निष्कण्टकोऽप्यहम् ।।१००।।
प्रदाताऽहं प्रभुत्वस्य तद् गणेभ्यस्तु तेषु ये । श्रद्विहीनाः सदाऽतिष्ठन् आमृतोत्थापन क्षणम् ।।१०१।।
प्रत्यागन्तव्य एव स्याम् युष्माभिस्त्वन्ततो ह्यहम् । निर्णयस्य पुनःकर्त्ता विवादानां हि वस्तदा ।।१०२।।
[५६]परस्मिन्निह लोके चाऽश्रद्धराणां नृणामहम् । क्लेशिता ते भृशं चैव स्थास्यन्ति चाऽसहायिनः ।।१०३।।
[५७]ये तु तद् व्यतिरिक्ताश्चोचितं कमव कुर्वते । श्रद्धराश्च प्रतीकारं तेभ्यो दास्यत्यसंशयम् ।।१०४।।
अल्लाहाय न रोचन्ते जनाः पापकृतस्त्विह । [५८]वयं त्वां श्रावयामो वै वाचं तां या तु संकुला ।।१०५।।

CC-0. In Public Domain. Digitized by eGangotri

तत्वार्थेन तथैवेय "मायाते" ति प्रभाष्यते । [५९]दृष्टान्तस्तावदीशस्य भवत्यल्लाहमानसे ॥१०६॥
तथा यथाऽदिमसृष्टिर्मृदा, तञ्चाब्रवीत् पुनः । "उद्भव त्वं" गतश्चासावुद्भवं तदनन्तरम् ॥१०७॥
[६०]त्वत् प्रभोः सत्यमेतद् भोः ! विषये मास्मभूस्ततः । सन्दिहानजनानां त्वं पूरुषोऽन्यतमःक्वचित् ॥१०८॥
[६१]ज्ञान लाभे तु ते जाते विवादं यस्त्वयाऽऽचरेत् । कथ्यतां—एहि, स्वान् दारानपत्यानि निजानि च ॥१०९॥
त्वं तथाऽहं निजांश्चैव समाहूय स्तुमो हि तम् । ये तथैवाऽपवक्तारो धिक्तान् वै भाषयेम च ॥११०॥
[६२]एतदेवास्त्यसन्देहं वचनं सत्यसम्भृतम् । प्रभुर्नान्यो विनाऽल्लाहं, तत्वदर्शी प्रभुर्ह्यसौ ॥१११॥
[६३]पराङ् आस्यास्ततोऽपि स्युर्यद्यल्लाहस्त्वसंशयम् । विजानाति हि तानत्र ये भवन्ति विवादिनः ॥११२॥
[६४]कथ्यतां शास्त्रिणो लोकाः ! कुर्याम समयं मिथः । स्तोष्यामो नाऽन्यमल्लाहात् मंस्यामहेऽसमं च तम् ॥११३॥
न चान्यः कोऽपि नोऽल्लाहान् मन्यतामीश्वरप्रभुः । पराङ् आस्या इतस्ते स्युस्तदैतान् प्रतिबोधय ॥११४॥
साक्षिता स्याद् हि युष्माकं वयं स्वात्मार्पकाः किल । [६५]शास्त्रिणोऽब्रह्मसन्बन्धे विवदध्वे कथं ? यतः ॥११५॥
तौरातेञ्जीलके तावत् प्रकाशं गमितेऽनु तम् । बुध्यध्वे किं न भोः ! यूयम्; [६६]यूयमेव हि ते जनाः ॥११६॥
विषयं नाऽपि ये वुद्ध्वा वितण्डातत्परा इह । नैव जानीथ चेत् किञ्चित् वितण्डा क्रियते कथम् ? ॥११७॥
तद् विजानाति सोऽल्लाहो यूयं जानीथ नैव तत् । [६७]अब्रह्मो न यहूदाहो नेशयायी तथाऽभवत् ॥११८॥
स्वात्मार्पकस्तथर्जुः स न मूर्त्याराधकेषु वा । [६८]अब्रह्मात्त्विह ते लोका नेदीयस्त्वेन ये हि तम् ॥११९॥
सर्वथैवान्ववर्तन्त श्रद्धराश्चैष वाग्घरः । सखा संरक्षिताऽल्लाहः श्रद्धराणां तु वर्त्तते ॥१२०॥
[६९]शास्त्रिणां दलमेकं ते पथभ्रंशाय चोन्मनाः । भ्रंशयन्ति परन्त्वेवं पथस्स्वात्मानमेव ते ॥१२१॥
परन्त्वेतन्न बुध्यन्ते; [७०]निषेधःक्रियते कथम् ? । शास्त्रिणो ! ननु युष्माभिरायातानां तु तस्य वै ॥१२२॥
अल्लाहस्य यदा यूयं साक्षिणः स्थ स्वयं बत । [७१]शास्त्रिणः ! केन भोः ! यूयं सत्येनाऽसत्यमिश्रणम् ॥१२३॥
कुरुथ निह्नवं चैव ज्ञात्वा सत्यस्य चात्मना । [७२]शास्त्रिणां दलमेकं तु ब्रूते प्राकाश्यमागतम् ॥१२४॥
श्रद्धरेषु हि यत् तस्मिन् दिनादौ श्रद्विधत्त भोः । दिनान्ते तु पुनस्तस्मिन् श्रद्धां नैव विधत्त भोः ॥१२५॥
श्रद्धाया येन ते चाऽपि गच्छेयुःप्रतिकूलताम् । [७३]ये मतस्यानुयातारो युष्माभिस् तान् विहाय वै ॥१२६॥
नान्येषु प्रत्ययः कार्यः, ब्रूहितान्—मार्गदर्शनम् । मार्गदर्शनमेतत् तु ह्यल्लाहादेव केवलम् ॥१२७॥
अवधेहि न चान्योऽपि लभेत यत् त्वदीयत । तुभ्यं तद्रूपकं वस्तु, प्रत्यक्षं त्वत् प्रभोरथ ॥१२८॥
विवदन्तां त्वया सार्धं ते पुनः—ब्रूहि तानिदम्— । दया त्वल्लाहपाणौ वै शेतेऽसौ कांक्षते हि यम् ॥१२९॥
तस्मा एव तु तां दत्तेऽल्लाहो ज्ञाता क्षमी तथा । [७४]यं स कामयते तं वै दयावृष्ट्यै स रक्षति ॥१३०॥
महौदार्यो हि सोऽल्लाहः, [७५]शास्त्रिणामीदृशा अपि । निक्षेपाप्तं हि ये राशिं पूलितञ्चापि याचिताः ॥१३१॥
प्रत्यर्पयन्ति, तेऽप्यन्ये सुवर्णांशमवाप्य ये । निक्षिप्तं याच्यमाना वै दुःखात् प्रत्यर्पणोन्मुखाः ॥१३२॥
कारणञ्चात्र खल्वेतत् ह्याहुस्ते—ऽशिक्षितान् प्रति । नास्ति संभावना काचित् त्वस्माकं मानसेषु हि ॥१३३॥
अल्लाहोत्तरदायित्वं विधायाऽनृतवादिनः । भवन्त्येते यदा सर्वं सत्यं जानन्ति पूर्णतः ॥१३४॥
[७६](अल्लाहपक्षपातित्वं तेषु) ये तस्य पालकाः । समयस्य, पुनस्तस्मात् ये च त्रस्यन्ति मानवाः ॥१३५॥
अल्लाहस्त्रस्त-लोकेभ्योऽतिमात्रंस्निह्यति ध्रुवम् । [७७]अथैते ये प्रतिज्ञातमल्लाहेनाऽत्मना कृतम् ॥१३६॥
शपनं च पणन्त्यत्र प्रहीणार्घस्य लोभतः । परलोके निरंशास्ते, पुनरुत्थापनाऽहनि ॥१३७॥
न वा भाषिष्यतेऽल्लाहस्तान् न वेक्षिष्यते पुनः । दर्शयिष्यति नाऽप्येतान् अभ्युत्थानं तथैव च ॥१३८॥
यातनास्तान् प्रतीक्षन्ते साभीला नारका बत । [७८]ईदृशाश्चापि ये तावत् शास्त्रवाचनतत्पराः ॥१३९॥
उच्चारयन्ति वै वाचा साचीकरणदुष्टया । येन यूयं विजानीत शास्त्रान्तस्तदशेषतः ॥१४०॥
तन्न यद्यपि शास्त्रान्तः, एवमेते वदन्ति च— । इयं वाक् तावदल्लाहात्, यद्यपीयं तु नो ततः ॥१४१॥
अल्लाहोत्तरदायित्वं विधायाऽनृतवादिनः । भवन्त्येते यदा सर्वं सत्यं जानन्ति पूर्णतः ॥१४२॥
[७९]मनुष्यस्य तु कस्याऽपि शोभनीयं न खल्विदम् । च्चिया दौत्येन शास्त्रेण ह्यल्लाहात् पूजितोऽपि सन् ॥१४३॥
यद् वदेदन्यलोकान्सः—वन्दनीयोऽहमेव तु । अपेक्षया न चाऽल्लाह; प्रत्युताऽसौ वदिष्यति ॥१४४॥
भवेत तत्प्रभोर्दासाः यूयं शास्त्रं यतः स्वयम् । शिक्षयथेतरान् किञ्चाऽप्यधीध्वे चापि तत् स्वयम् ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

[८०]न चाऽप्यादिष्टमेतेन—युष्माभिर्देववाग्घराः । दीयन्तां तत्प्रभोः स्थानं यूयं स्वात्मार्पका यदा ॥१४६॥
केन वो विगतश्रद्धान् भवितुं सोऽनुमंस्यते ? । [८१]अग्राहयत् प्रतिज्ञाञ्च यदाऽल्लाहस्तु वाग्घरान् ॥१४७॥
दृश्यतां तत्वदर्शित्वमदां शास्त्रं तथैव यत् । परस्ताद्वाग्घरश्चैको युष्मान् त्सर्वानुपैष्यति ॥१४८॥
विद्यते समया युष्मान् त्स्थिरयंस्तदशेषतः । श्रद्धा तस्मिन् विधेयाऽथ साह्यं तस्य विधीयताम् ॥१४९॥
अपृच्छत्-किन् नु युष्माभिः स्वीकृतं ? यो मयाधृतः । भारः स चापि किन्नूढः ? प्रत्यवोचन् हि तं तदा— ॥१५०॥
"स्वीकृतं तावदस्माभिः," प्राहैतान् पुनरप्यसौ— । "भवत साक्षिणः," साक्षी युष्माभिश्चाप्यहं पुनः ॥१५१॥
[८२]प्रतिकूलास्त्वितः पश्चाद् ये भविष्यन्ति ते जनाः । अवज्ञाकारिणस्तावत् मंस्यन्ते; [८३]किन्नु ते जनाः— ॥१५२॥
अल्लाहस्य मताद् भिन्नं कामयन्ते मतान्तरम् । यद्यप्युर्व्यां च ये स्वेषु हीच्छया वाऽप्यनिच्छया ॥१५३॥
तद् विधेयाः, परावर्त्यास्तमेवाभि (न संशयः) । [८४]कथ्यतां वयमल्लाहे प्रकाशेऽस्मान् प्रतीरिते ॥१५४॥
अब्रह्मे चाऽस्मयेडे च तथैवेषशके पुनः । ज्ञाकूते तदपत्ये च मूषेशाभ्यां समर्पिते ॥१५५॥
तत्प्रभोः कृपया चैव दूतव्यूहेऽवतारिते । श्रद्धराः स्मो न कुर्मश्च तेषु नीचोच्चशेमुषीम् ॥१५६॥
विधेयाः खलु तिष्ठामो वयं तस्यैव सर्वदा । [८५]स्वात्मार्पणादृते यस्तु ह्येषिष्यति मतान्तरम् ॥१५७॥
न स्वीकार्यमदस्तु, स्यात् परत्रवञ्चितोऽप्यसौ । [८६]अश्रद्धामार्गमापन्नाः श्रद्धामार्गादनन्तरम् ॥१५८॥
ये तु तान् केन सोऽल्लाहोऽध्वानं सन्दर्शयिष्यति । स्वयं ते साक्षितां याता वाग्घरः सत्यवानयम् ॥१५९॥
विशदानि प्रमाणानि चाप्युपेतानि तानथ । पापकृद्भ्यस्तु नाऽल्लाहोऽध्वानं दर्शयतिक्वचित् ॥१६०॥
[८७]पुरस्कारश्च तेभ्योऽयं यत्ते यास्यन्ति धिक् क्रियाम् । देवताभ्यस्तथाऽल्लाहात् मनुष्येभ्योऽपि चध्रु वम् ॥१६१॥
[८८]ते स्थिराऽयतनास्तत्र भविष्यन्ति, न यातनाः । ह्रासमेष्यन्ति, वा दत्तो नाऽवकाशो भविष्यति ॥१६२॥
[८९]परं ये परतश्चाऽपि प्रायश्चित्तमुपासते । साधयन्ति तथाऽत्मानं ह्यल्लाहो नाऽत्र संशयः ॥१६३॥
तेषां कृते क्षमाशीलो दयादाता च वर्त्तते । [९०]अश्रद्धामार्गमापन्नाः श्रद्धामार्गादनन्तरम् ॥१६४॥
ये च येऽविहतोच्छ्रायं तं मार्गं ह्युत्पतिष्णवः । प्रायश्चित्तं तु नो तेषां स्वीकार्यं स्यात् कथञ्चन ॥१६५॥
इमे ह्येव हि ये लोका मार्गाद् भ्रष्टा मता इह । [९१]गतश्रद्धास्तु · ये सन्तस्तदवस्था मृतिं गताः ॥१६६॥
धरित्रीं संवृतां हेम्ना चापि यद्यर्पयन्ति ते । (दुर्गतेस्त्रातुमात्मानं) न तद् ग्राह्यं भविष्यति ॥१६७॥
साभीला यातनास्तेषां, साह्यं नाऽपि भविष्यति । ....

(इति तृतीयं पारायणमवसितम्; अथ चतुर्थं पारायणमारभ्यते)

.... । [९२]अनर्हाः शुचितामाप्तुं व्ययो नैजात् प्रियाद्धनात् ॥१६८॥
क्रियते तु न भोः ! यावत् युष्माभिर्यूय (मत्र वै) । अल्लाहो वेत्ति तं यूयं यं व्ययं भोः ! करिष्यथ ॥१६९॥
[९३]ईश्वरालीनसन्तत्यै वैधमन्नं समं ह्यभूत् । तद्विहायेश्वरालीनो यदवैधं स्वतोऽकरोत् ॥१७०॥
तौरातस्य प्रकाशात् प्राक्; कथ्यतां—यदिसद्धराः— । आनीयतां हि तौरातः स पुनर्वाच्यतां तथा ॥१७१॥
[९४]अल्लाहोत्तरदायित्वं विधायाऽनृतवादिनः । ये भवन्ति ततोऽप्यत्र ज़ालमास्ते ह्येव सम्मताः ॥१७२॥
[९५]कथ्यतां—सत्यमल्लाहोवक्ति, तेनाऽनुगम्यताम् । अब्रह्मस्य तु यः पन्था ऋजुर्यो, यश्चनाऽभवत् ॥१७३॥
प्रतिमापूजकेष्वेकः; [९६]महाकाले हि यत् स्थितम् । तदेव प्राक्तनं गेहं लोकेभ्यो यद् व्यरच्यत ॥१७४॥
सौभाग्यविन्दु यच्चाऽस्ते लोकानां मार्गदर्शकम् । [९७]स्पष्टानि तत्र लक्ष्माणि, वासोऽब्रह्मस्य तत्र च ॥१७५॥
प्रवेशं तत्र यो याति निश्चिन्तो जायते ह्यसौ । तस्य स्थानस्य वै यात्राऽल्लाहसेवा मता परा ॥१७६॥
सर्वेभ्योऽपि हि लोकेभ्यः तद्गन्तुं शक्नुवन्ति ये । चेष्टतेऽश्रद्धया यस्तु (स विजानात्वशेषतः) ॥१७७॥
सर्वेभ्योऽप्यत्र जीवेभ्यः स्वतन्त्रोऽल्लाह इत्यपि । [९८]कथ्यतां—शास्त्रिणः ! यूयमल्लाहायातमन्तरा ॥१७८॥
केन श्रद्धाविहीना वै यद्यप्यल्लाह ईक्षते । तत् तत् सर्वं हि यद् यूयं कुर्वाणा भवथाऽत्र वै ॥१७९॥
[९९]कथ्यतां - शास्त्रिणः ! केन यूयमल्लाहमार्गतः । श्रद्धरान् खलु रुन्ध्वेऽस्य वक्रीकरणमानसाः ॥१८०॥
साक्षिताऽस्त्येव युष्माकं चेष्टध्वे यच्च किञ्चन । तस्य नाऽज्ञस्तु सोऽल्लाहः; [१००]श्रद्धराः ! शास्त्रिणां यदि— ॥१८१॥
दलैकस्य वचो यूयं मंस्यध्वे तदनन्तरम् । श्रद्धायाः पुनरश्रद्धामार्गगान् वो विधास्यति ॥१८२॥
[१०१]केन श्रद्धाविहानञ्च यूयमाप्तुं हि शक्नुथ । श्राव्यते साम्प्रतं येन ह्यल्लाहवाक् सवाचनम् ॥१८३॥

CC-0. In Public Domain. Digitized by eGangotri

वाग्घरस्तस्य चाऽप्यास्ते यदा युष्मानुपागतः । स्थैर्येणाऽल्लाहमार्गं यः श्रयते, मार्गदर्शनम् ॥१८४॥
स एव प्राप्तुमर्होऽत्र; [102]यूयं भोः श्रद्धरा जनाः ! । विभीताऽसकृदल्लाहात्, उचितैव भयस्थितिः ॥१८५॥
स्वात्मार्पणस्य चाऽवस्थामुपेता एव नश्यत । [103]दृढं सन्धार्यतां रज्जुरल्लाहस्य, पुनर्मिथः ॥१८६॥
मा तथा गमताऽनैक्यं, युष्मास्वस्य कृपामथ । स्मरत, शत्रवो यूयमन्योऽन्यं खल्वतिष्ठत ॥१८७॥
सांमनस्यान्त्स वोऽकार्षीद्, भ्रातृतांप्रापयत्तथा । स्वीयया दयया, यूयं सर्वथाऽभूत भोःस्थिताः ॥१८८॥
प्रान्ते वै वह्निगर्त्तस्य ह्यल्लाहोऽत्रायताऽपि वः । इत्थं युष्मभ्यमायातान् ह्यल्लाहः स्वान्करोति हि ॥१८९॥
प्रकाशितान् यथा यूयं लभेध्वं मार्गदर्शनम् । [104]उचितं चैव युष्मासु दलमेकं भवेच्च तत् ॥१९०॥
शुभत्वे प्रेरयेल् लोकान् भद्रं चैवादिशेत्तथा । वारयेद् दुरितेभ्यश्च, त एवैते हि ये जनाः— ॥१९१॥
साफल्यमधिगन्तारः; [105]ये त्वनैक्यमुपागताः । न तन्मार्गोऽनुसर्त्तव्यो, लब्धवन्तोऽपि हन्त ! ते ॥१९२॥
मिथो वै स्पष्ट लक्ष्माणि भेदवादे रताः किल । त एवैते जनास्तावत् प्रतीक्षायां समुत्सुकाः ॥१९३॥
महत्यो यातना येषां, (सत्यं याः सन्त्यरुन्तुदाः) । [106]उज्ज्वलानि करिष्यन्ते कानिचिद् वदनानि तु ॥१९४॥
कानिचित् कालवर्णानि करिष्यन्तेऽपराणि च । प्रक्ष्यन्तेऽथ दिने तस्मिन् कालतुण्डाः—अयात किम्—॥१९५॥
श्रद्धायाः पुनरश्रद्धाम् ?, गतश्रद्धात्वकारणात्— । स्वदन्तां यातना बह्वीः, [107]ये पुनश्चोज्ज्वलाऽननाः ॥१९६॥
अल्लाहस्य दयाऽऽवासे ते हि वत्स्यन्ति सर्वदा । [108]आयाताः खलु सन्त्येते ह्यल्लाहस्य हि यान् वयम् ॥१९७॥
युष्मान्त्सत्येन संगत्य श्रावयामो (यथाविधि) । सांसारिकेषु नाऽल्लाहस्त्वत्याचरितुमिच्छति ॥१९८॥
[109]धरित्र्यां खेषु यच्चापि ह्यल्लाहार्थं समं हि तत् । तत् परावर्त्ततेऽल्लाहं समं यच्चेतनं जडम् ॥१९९॥
[110]उत्तमाः स्थ हि लोकानां यूयं जाता हि ये भुवि । भद्रायाऽदिशथाऽघाच्च रुन्ध लोकांस्तथैव च ॥२००॥
सश्रद्धा भवथाऽल्लाहे, ऽभविष्यन् शास्त्रिणोऽपि चेत्—। श्रद्धावन्तो; ऽभविष्यद् भोः ! तेभ्य एतत्तु सूत्तमम् ॥२०१॥
सश्रद्धा अपि सन्त्येषां भूर्यवज्ञापराः परम् । [111]नाऽपकर्त्तुञ्च ते शक्ता ऋते सामान्यतर्दनम् ॥२०२॥
युष्मान् युध्यन्ति चेद् युद्धात् प्रद्रविष्यन्ति तेऽचिरात् । साह्यं नैवाऽपि लप्स्यन्ते ते पुनश्च कुतश्चन ॥२०३॥
[112]यत्र कुत्राऽपि सर्वत्र गमिष्यन्ति च गर्हणाम् । अल्लाहमाश्रयिष्यन्ते मानवं वाऽपि ते यदि ॥२०४॥
भिन्ना कथा पुनस्तु स्यात् अल्लाहकोपपात्रताम् । ते गताश्च पुनःक्षिप्तास्तमसामति गह्वरे ॥२०५॥
इदञ्चास्माद् यतो ह्येतेऽघ्नन् निरर्थं हि वाग्घरान् । अल्लाहस्य तथाऽयातान् न्यषेधन् (सर्वथैव तु) ॥२०६॥
इदञ्चास्माद् यतो ह्येते व्यद्रुह्यन् सततं तथा । मर्यादोल्लंघनं चापि कुर्वाणा अभवन् पुनः ॥२०७॥
[113]एक वर्ग्यो न वै सर्वः, शास्त्रिणामीदृशा अपि । स्थिरा ये स्वप्रतिज्ञाते तथाऽयातान् पठन्त्यपि ॥२०८॥
निश्यल्लाहसमक्षञ्च नमन्त्यष्टांगपातनम् । [114]अल्लाहे चरमाहे च श्रद्धरा आदिशन्त्यपि ॥२०९॥
भद्रायाऽथ निषेधन्ति पाप्मभ्योऽग्रेसरन्ति च— । भद्रकृत्येषु, भद्राणां लोकानां खल्विमे जनाः ॥२१०॥
[115]यदप्येते करिष्यन्ति भद्रं तन्नापुरस्कृतम् । गमिष्यत्यथ सोऽल्लाहो वक्ति तांस्तद्भयाकुलान्—॥२११॥
[116]श्रद्धाहीनास्तु येऽल्लाहे धनं तेषां तथा प्रजाः । अल्लाहेनाऽसमाः, नाऽपि कार्यसिद्धौ क्वचित् क्षमाः ॥२१२॥
अग्निं ते समुपेतारस्तस्मिन् स्थातार एव च । [117]व्ययं कुर्वन्ति यञ्चाऽपि ते च लौकिक जीवने ॥२१३॥
हिमानी वायुना सार्द्धं तत् तुलां याति, यः पुनः— । कृषिं म्लानयितुं वास्यन् सर्वनाशं तनोत्यलम् ॥२१४॥
तेषां ये त्वात्मना दोषान् आत्मन्येव प्रकुर्वते । जाल्मो नाऽल्लाह एतेषु, जाल्मास्स्वस्मिन्निमे स्वयम् ॥२१५॥
[118]श्रद्धराः ! अन्तरंगा नो बाह्याः कार्याः कदाचन । स्वीयान् विहाय, युष्माकं नाशहेतोरिमे ध्रुवम् ॥२१६॥
अपि नीचं मतं यत्नं शेषयिष्यन्ति नो क्वचित् । तदेवैते तु कांक्षन्ते स्तंभो वो येन संभवेत् ॥२१७॥
एषां वाचैव सुव्यक्तं एते द्वेषधियो हि यत् । निह्नुतं यत् पुनर्हृत्सु तत् ततोऽप्यतिशायि वै ॥२१८॥
प्रवृत्ताश्चेद् धिया यूयं सन्ति लक्ष्माणि नस्तु वः । [119]यूयमेव हि येत्वेते तेभ्यः स्निह्यन्ति, ते पुनः ॥२१९॥
स्निह्यन्ति नैव युष्मभ्यं, यूयं भवथ यद्यपि— । श्रद्धराःसर्वशास्त्रेषु; संगच्छन्ते यदा च ते— ॥२२०॥
युष्मान् वदन्ति—'सश्रद्धा भवामः', तदनन्तरम्— । वियुक्ताः क्रोधसंवेगाद् प्रान्ततः कर्त्तनाद् भृशम् ॥२२१॥
स्वांगुल्यभिनयं तावत् कुर्वते; ब्रूहि तानिदम्— । पञ्चतां निज कोपाग्नौ यात यूयमसंशयम् ॥२२२॥
वेत्त्यल्लाहस्तु तत् सर्वं सुगुप्तं हृत्सु यत् स्थितम् । [120]युष्माकं तु भवद् भद्रं तान् समुद्वेजयत्यलम् ॥२२३॥

CC-0. In Public Domain. Digitized by eGangotri

ते प्रसीदन्ति युष्मासु कष्टमापततीह चेत् । सधैर्यं कार्यजोषेण ह्यल्लाहभीर्धिया तथा ॥२२४॥
नाऽभ्युपायस्तु वस्तेषामपकुर्यान् मनागपि । यदप्येते विचेष्टन्ते ह्यल्लास्तदध्यशेषतः ॥२२५॥
आत्मनः परिवेषे वै कृत्वा सन्तिष्ठते सदा । [१२१]स्मर्यताञ्च यदा हि त्वं गृहात् प्रातर्विनिर्गतः ॥२२६॥
श्रद्धरान् विनियोक्तुं वै प्रधनायायनेषु च । ज्ञाता श्रोता तथाऽल्लाहः; [१२२]युष्माकं किच भोः! यदा ॥२२७॥
द्वे दले समजायेतां पाराङ्मुख्योन्मुखे रणात् । आसीद् यद्यपि चाऽल्लाहः तेषां मित्रं च रक्षकः ॥२२८॥
विश्वासो ननु कर्त्तव्यः श्रद्धरा ये जनास्तु तैः । [१२३]अदीयत जयो बद्रेऽस्थाताऽल्लाहेन, यद्यपि— ॥२२९॥
यूयं नैव तदा पुष्टाः, ततोऽल्लाहाद् बिभीत भोः । प्रकाशं येन कार्त्तज्ञं समुपेयात् सदैव वः ॥२३०॥
[१२४]श्रद्धरांश्च यदाऽऽत्थ त्वं—नैतन्युष्मभ्यमस्ति किम् । पर्याप्तं स प्रभुर्वश्चेत् साह्यं वो विदधातु वै ॥२३१॥
देवानां त्रिसहस्रेण प्रेषितेनाऽधरं किल । [१२५]न केवलं ह्यदश्चैव, धैर्यात् कर्त्तव्यकृत्सु तु ॥२३२॥
दोषाद्रक्षत्सु चात्मानं सत्सु युष्मत् प्रभुस्तदा । अर्याऽक्रमणवेलायां साह्यं शीघ्रं विधास्यति ॥२३३॥
देवपञ्चसहस्रेण; [१२६]ह्यल्लाहस्त्वेवमादिशत्— । सूचना स्यादियं येन युष्माकं प्रीतिकारणम् ॥२३४॥
समाश्वासो भवेच्चैव युष्माकं हृदयेष्वथ । जयस्त्वल्लाहतो ह्येव सुधियोऽतिबलात्तथा ॥२३५॥
[१२७]यतोऽसौ श्रद्विहीनानामंशं छिन्द्यादथापि वा । परास्तांस्तान् प्रकुर्वीत येन ते विफला अथ ॥२३६॥
निराशा रणभूमे हि निवर्त्तन्तां (अधोमुखाः) । [१२८]प्रसंगे नाऽत्र कश्चित्तेऽधिकारोऽस्ति (मुहम्मद!) ॥२३७॥
क्षमतां यातना-ग्रस्तान् वाऽपि कुर्वीत तानसौ । ते यतः प्रथिता जाल्माः; [१२९]धरित्र्यां खेषु वाऽपियत् ॥२३८॥
ह्यल्लाहस्यैव तत् सर्वं क्षमतां वाधतामथ । कामतः सर्वमप्यस्य ह्यल्लाहः सदयः क्षमी ॥२३९॥
[१३०]श्रद्धरा ! मास्म भुङ्ध्वं भोः! वर्धमानं दिवाऽनिशम् । वृद्धार्थं, पुनरल्लाहाद् बिभीत स्याज्जयो यथा ॥२४०॥
[१३१]बिभीताऽग्नेश्च यः सज्जोऽश्रद्धरेभ्यः स्थितः सदा । [१३२]दयालाभाय किञ्चाऽपि विधेयास्तिष्ठताऽसकृत् ॥२४१॥
अल्लाहस्य तथैवाऽस्य वाग्घरो यो हि वर्त्तते । [१३३]अहमहमिकामेत्य प्रैताऽग्रे स्वप्रभोः क्षमाम् ॥२४२॥
स्वर्गञ्चापि समालब्धुं प्रसृतिर्हि ययोस्तथा । धरित्र्या गगनानाञ्च यथाऽस्ते, ये तु भीधराः ॥२४३॥
तदुभं तेभ्य एवाऽस्ते कृतं सिद्धं (हि पूर्वतः) । [१३४]सम्पन्नायां विपन्नायां दशायाञ्चापि ये पुनः ॥२४४॥
व्ययं दानेन कुर्वन्ति, क्रोधयन्तार एव च । सहन्ते चापि लोकान् येऽल्लाहो भद्रेऽनुरज्यते ॥२४५॥
[१३५]ये तथा पाप कृत्यानि दोषान् स्वार्थाद् विधाय च । स्मृत्वाऽल्लाहन्तु याचन्तेऽपराधानां क्षमामिह ॥२४६॥
कश्चान्योऽत्र विनाऽल्लाहं ह्यपराधान् क्षमेत यः । विदन्तो ये कृते कृत्ये निजे मिथ्या न साऽग्रहाः ॥२४७॥
[१३६]एत एव जना ये वै स्वप्रभोः पार्श्वतो ध्रुवम् । प्रतीकार स्वरूपेण लप्स्यन्ते हि क्षमामथ ॥२४८॥
सदुद्यानानि यत्पार्श्वे नद्यः प्रस्रवणाः किल । वत्स्यन्ति ते सदा तत्र ह्यर्थाय कर्मिणांत्विदम् ॥२४९॥
हन्त! दानमहो! दानम्; [१३७]युष्मत्तः प्राग् बहूनि च—। निदर्शनानि वीतानि भ्रमत भुवि चेक्षितुम् ॥२५०॥
परिणामोऽभवत् कस्कः ये हि मिथ्याकृतोऽभवन् । [१३८]घोषणा मनुजेभ्यस्तु मार्गदर्शनमप्यथ ॥२५१॥
सूपदेश इदं तेभ्यो भयं येऽन्तस्तु बिभ्रति । [१३९]मैव माद्यत मा दुःखं चापि वा यूयमाप्नुत ॥२५२॥
प्रभुत्वं स्याद्धि युष्माकं यूयं श्रद्धाधरा यदि । [१४०]आहता यदि यूयं स्थ तेऽप्याघातं गताः पुरा ॥२५३॥
एते विपर्यया अह्नां लोके संभावयामि यान् । श्रद्धरान् येन सोऽल्लाहः प्रविविङ्क्तां च कांश्चन ॥२५४॥
हुतात्मनो विदध्याच्च, ह्यल्लाहो न कदाचन— । स्पृहयत्यत्र जाल्मेभ्यः; [१४१]किञ्चाऽल्लाहः प्रमाणयेत्— ॥२५५॥
तांस्तु श्रद्धाधरा येऽत्र नाशयेदितरांस्तथा । [१४२]विभावयथ किं यूयं स्वर्गमन्तः प्रवेक्ष्यथ ॥२५६॥
अल्लाहेन न वै यावत् तदिदं भोः विभावितम् । युष्माकं के हि ते प्राणपणैर्ये कुर्वते श्रमम् ॥२५७॥
ये तथा कर्मशीलाश्च धैर्यस्थैर्यहृदः पुनः । [१४३]अभ्युपेतश्च वो मृत्युः पुरस्तादीक्षितश्च सः ॥२५८॥
यं यूयं ह्याभिमुख्यायाऽकामयध्वं तदा पुरा । [१४४]मुहम्मदस्तु (भो लोकाः!) वाग्घरः केवलोऽस्ति वै ॥२५९॥
ततश्चाऽप्यभवन् पूर्वं वाग्घराः, किन्तु भोः ! यदि— । मृतो वा मारितो वाऽयं भवेत् यूयं पराङ्गताः— ॥२६०॥
भविष्यथ रणात् ? योऽथ पराङ्यातो न खल्वसौ । कथञ्चित् पुनरल्लाहं शक्तो दुःखयितुं क्वचित् ॥२६१॥
अल्लाहस्तु कृतज्ञान् वै पुरस्कर्त्ता तथाऽचिरात् । [१४५]न जीवः कोऽपि शक्नोति मर्त्तुं त्वाज्ञां विनाक्वचित् ॥२६२॥
अल्लाहस्य तथा कालो निश्चितो यश्च तं विना । सांसारिकं पुरस्कारं त्विच्छद्भ्यो हि वयं ततः ॥२६३॥

CC-0. In Public Domain. Digitized by eGangotri

पारलौकिकमप्येवं दग्नस्तस्मात् तथा वयम् । पुरस्कर्त्तार एवाऽपि कृतज्ञानचिराद् वयम् ॥२६४॥
[१४६]अभूवन् वाग्घराश्चैव बहवः पक्षमाश्रिताः । येषां तावदयुध्यन्त ह्यनेके प्रभुवादिनः ॥२६५॥
अल्लाहस्य पुनर्मार्गे ह्यायन् कष्टानि तैर्न ते । अजहुः पौरुषं किञ्चित् नाऽयुर्दौर्बल्यमेव च ॥२६६॥
नाऽजहुः शस्त्रम्, अल्लाहो धैर्यवत्स्वनुरज्यते । [१४७]तेषां प्रार्थितमेवासीत् यत्तेऽवोचंस्तु—नः प्रभो ! ॥२६७॥
क्षमस्वाऽस्मत्तु पापानि यदत्याचरितं च नः । पादयोर्धेहि नः स्थैर्यं विजयं देहि नस्तथा ॥२६८॥
तेषु लोकेषु ये नैव श्रद्धां तु समुपासते । [१४८]तानिहाऽपि तु सोऽल्लाहः परलोकेऽपि सूत्तमम् ॥२६९॥
पुरश्चकार; भद्रेभ्योह्यल्लाहोऽत्यनुरज्यते । [१४९]श्रद्धावन्तो जनाः ! यूयं तान् यद्यनुसरिष्यथ ॥२७०॥
श्रद्धावन्तो न ये सन्ति परावृत्तान् हि वस्तु ते । विधास्यन्ति, ततो यूयं परां हानिं गमिष्यथ ॥२७१॥
[१५०]अल्लाहो रक्षको मित्रं युष्माकं वर्त्तते ध्रुवम् । सहायानाञ्च सर्वेषां सहायः सूत्तमो हि सः ॥२७२॥
[१५१]साध्वसं जनयिष्यामोऽश्रद्धराणां मनस्स्वरम् । प्रतिम्नस्ते व्यधुर्येन ह्यल्लाहेन (वृथा) समान् ॥२७३॥
न येषां विषये किञ्चिल्लक्ष्म तेन प्रकाशितम् । तेषामावसथं वह्नि र्जाल्मावसथमत्र धिक् ॥२७४॥
[१५२]अल्लाहः समयं नैजं युष्माभिश्चाप्यपालयत् । तदादेशाद् यदा यूयं ह्यहत तान् ततः परम्— ॥२७५॥
उत्साहो वोऽभवत् क्षीणस्तथाऽऽदेशेऽभवत् कलिः । अवज्ञातत्पराश्चैव ह्यभूत वस्तु यद्यपि— ॥२७६॥
अदर्शयत् तदल्लाहः स्पृहा यस्मिन्नधिश्रिता । युष्माकं केऽपि खल्वैच्छन् इमंलोकं परे तथा ॥२७७॥
परलोकं तथैवैच्छन् परावृत्तास्ततस्ततः । यूयं कृताः परीक्षार्थं क्षमितास्तेन चापि वै ॥२७८॥
अल्लाहोऽनुग्रहाऽगारः श्रद्धराणां कृते महान् । [१५३](ज्ञायताञ्च) यदा यूयं प्रद्रुताः तिष्ठथ स्म च ॥२७९॥
अनन्यमनसो भूत्वा पश्चाद् युष्मांश्च वाग्घरः । आह्वयामास सोऽभीक्ष्णं तदाऽल्लाहोऽददात्तु वः ॥२८०॥
क्षोभं क्षोभप्रतीदाने, ह्यनेन कारणेन वै— । प्राप्त-हस्तेऽपि नष्टेऽर्थे कष्टे चाऽपतितेऽप्यथ ॥२८१॥
दुःखं-दुःखं न मन्यध्वं येन यूयं कदाचन । वेत्ति तत् सर्वमल्लाहो यूयं यद्-यद् विधत्थ भोः ! ॥२८२॥
[१५४]तेष्ववातारयच्चासौ सुरक्षां क्षोभतः परम् । तन्द्रिताः केऽपि युष्माकं ह्यभूवन् केऽपि चाऽपरे ॥२८३॥
स्वाऽसुरक्षापरा आसन्, ह्यल्लाहं प्रति खल्विमे । प्रादर्शयन्निजाऽज्ञानं त्वयथार्थमधिश्रितम् ॥२८४॥
तेऽवदन्—"एषु काऽस्माकं प्रसंगेष्वधिकारता" । कथ्यताम्—"अधिकारस्तु ह्यल्लाहस्यैषु वर्त्तते ॥२८५॥
हृद्यन्तारक्षितं ह्येभिः व्यञ्जन्ति यत्तु न त्वयि" । आहुः—यद्यभविष्यन्नः प्रसंगेऽत्राऽधिकारता— ॥२८६॥
नाऽभविष्याम व्यापन्ना जना अत्र वयं तदा । कथ्यताम्—नियता हत्याऽभविष्यच्चेद्धिकालतः ॥२८७॥
गृहस्था अपि निःसृत्य प्राप्स्यत बध्यमास्पदम् । इदञ्चास्माद् यतोऽल्लाहः परीक्षेतोरसि स्थितम् ॥२८८॥
यत्तथा हृदयाऽसीनं युष्माकं तत् प्रकाशयेत् । उरःस्थं सर्वमल्लाहो वृत्तं वेत्येव पूर्णतः ॥२८९॥
[१५५]दलयोराभिमुख्ये तु युष्माकं तत्र ये तदा । पलायन्त रणात् तान् वै प्रद्रुतान् शातनोऽकरोत् ॥२९०॥
केषाञ्चित् तत् कृतानां तु कारणात् कर्मणां ध्रुवम् । क्षमिताः पुनरल्लाहात्, सहिष्णुश्चाप्यसंशयम् ॥२९१॥
क्षमाशीलस्तथाऽल्लाहो वर्त्तते सुमहानसौ । [१५६]श्रद्धराः ! माऽनुयातैतान् श्रद्धरा नैव सन्ति ये ॥२९२॥
यात्रायां रणभूमौ वा मृतानां विषये हि ये । वन्धूनामात्मनीनानां प्रायशो हीत्थमावदन्— ॥२९३॥
अभविष्यंस्तु चेत् पार्श्वे ह्यस्माकं ज्ञातयः क्वचित् । नाऽमरिष्यन्त नैवाऽपि चाऽहनिष्यन्त येन तत् ॥२९४॥
तेषां हृत्सु यथाऽल्लाहः कुर्यात् सन्ताप कारणम् । प्राणयत्यपि सोऽल्लाहः स एव प्रणिहन्ति च ॥२९५॥
सर्वं पश्यति सोऽल्लाहो यूयं यद् यद् विधत्थ भोः । [१५७]अल्लाहाध्वनि चेद् यूयं मृता वाऽप्यथ मारिताः ॥२९६॥
अल्लाहस्य क्षमा चैव दया चैवाऽपि सूत्तमा । सर्वेषामपि वस्तूनां संगृह्णन्ति हि यान्यमी ॥२९७॥
[१५८]भवेताऽप्यथ चेद् यूयं मृता वाऽप्यथमारिताः । अल्लाहस्यैव तूत्संगे करिष्यध्वे हि संगताः ॥२९८॥
[१५९]दयाऽल्लाहस्य हेतुर्वै लोकेभ्यः सरलोऽसि यत् । स्वभावादभविष्यश्चेत् क्रूरोऽथ कर्कशो हृदा— ॥२९९॥
वाग्घरैते ऽभविष्यंस्तत् त्वत्तो दूरमवस्थिताः । त्वं क्षमस्व तदेतान् भोः ! प्रार्थयैभ्यः क्षमां तथा ॥३००॥
प्रसंगेषु तथा चैते परामृश्यास्त्वया पुनः । निश्चयोत्तरमल्लाहं विश्वसिहि तथैव च ॥३०१॥
तद्विश्वासेषु सोऽल्लाहो भूरिभूर्यनुरज्यते । [१६०]सहायो यदि सोऽल्लाहःप्रभवेत् त्वयि नेतरः ॥३०२॥
विहीनस्तेन त्वं चेत् स्याः कः सहायोऽस्तु ते पुनः । कार्योऽल्लाहस्य विश्वासः श्रद्धरास्तस्य येऽत्र तैः ॥३०३॥

CC-0. In Public Domain. Digitized by eGangotri

[१६१]परेषामपकारस्तु वाग्घरस्य न शोभते । अहितेच्छुः पुनस्तस्मिन् पुनरुत्थापनाहनि ॥३०४॥
स्वापकारं पुरस्कृत्य ह्युपस्थास्यत्यसंशयम् । ततो जीवाःप्रदास्यन्ते स्वार्जितेन यथायथम् ॥३०५॥
नात्याचरिष्यते कोऽपि; [१६२]किं कदाचिदसौ जनः—। योऽल्लाहस्य प्रसादस्य मार्गमासेवते सदा ॥३०६॥
तद्विधोभवितुं शक्तो यद्विधोऽल्लाहगर्हितः । नारको बह्निरावासो सदा धिग् यस्य सर्वथा ॥३०७॥
[१६३]विभिन्ना खलु वै श्रेण्योह्येषामल्लाहसद्मनि । अल्लाहो लोकते सर्वं यद् यदेते हि कुर्वते ॥३०८॥
[१६४]अल्लाहस्योपकारोऽयं श्रद्धरेषु महान् हि यत् । तेषामेकतमो यद् वै वाग्घरत्वेन नोदितः ॥३०९॥
आयातांस्तस्य यस्तान् वै श्रावयत्यथ शुद्धताम् । ददाति, प्रविकासे च नियोजयति तानलम् ॥३१०॥
शास्त्रं प्रशिक्षयत्येतान् तत्वदर्शित्वमेव च । ततःपूर्वमिमे स्पष्टं पथभ्रष्टाः किलाऽसत ॥३११॥
[१६५]यदैका वोऽग्रसच्चापद् द्वैगुण्याद् यूयमापदः । तान् किलाऽग्रसयन् यूयं त्ववादिष्ट—"कुतोन्वियम्"? ॥३१२॥
ब्रूहितान्—इयमभ्याशाद् युष्माकं ह्येव वर्त्तते । असंशयं हि सोऽल्लाहः सर्वसामर्थ्यभृन्मतः ॥३१३॥
[१६६]आभिमुख्यदिने तस्मिन् उभयोर्दलयोस्तथा । यद्धि कष्टं गता यूयं ह्यल्लाहानुज्ञयैव तत् ॥३१४॥
तच्चैतेन यथाऽल्लाहः श्रद्धरान् सुविभावयेत् । [१६७]दाम्भिकानपि येनाऽयं विजानातु यथैव च ॥३१५॥
उक्तास्ते ह्यभवन्—एताऽल्लाहमार्गे च युध्यत । किंवा परास्यताऽरीन् भोः ! तदैवं ते त्ववादिषुः— ॥३१६॥
"जानीयाम यदीदं यत् युद्धं भाव्येव सर्वथा । अनुसरेम युष्मान् वै", तेषां सान्निध्यमास्त ह— ॥३१७॥
अश्रद्धया किलात्यर्थं श्रद्धया न पुनस्तदा । तद् वदन्ति स्व वाचा ते न यत्तेषां हृदि स्थितम् ॥३१८॥
वेत्ति सम्यक् तदल्लाहो निह्नुवते हि ते तु यत् । [१६८]इमे ह्येते किलाऽरुन्धन् ये तु पश्चात् स्वसद्मसु ॥३१९॥
अब्रुवन् निजबन्धूनां विषये चेत्थमप्यथ— । "अमंस्यन्तवचोऽस्माकं नाऽहनिष्यन्त ते तदा" ॥३२०॥
ब्रूहि तान्—सत्यपक्षाश्चेद् यूयमत्र हि तिष्ठथ । शीर्षारूढस्ततो मृत्युः केन नैवाऽपनुद्यते ॥३२१॥
[१६९]ये तथाऽल्लाह मार्गे वै समहन्यन्त नैव तान् । हतान् वित्त परं ते तु जीवन्ति स्व प्रभुंश्रिताः ॥३२२॥
लभन्ते चाऽथ भोग्यानि; [१७०]प्रसीदन्त्यथ तेषु ते—। यद् यदल्लाह एतेभ्यः प्रादात् स्वौदार्य कोषतः ॥३२३॥
साह्लादाश्च पुनस्तेषां विषये ये न संगताः । पश्चात् तिष्ठन्ति ये तेभ्यः यतस्तेषां भविष्यति ॥३२४॥
न किञ्चिद् भयमेवाऽत्र भविष्यन्ति न दुःखिनः । [१७१]लभन्ते ते दयां यस्मादल्लाहात् तत् कृपां तथा ॥३२५॥
ततस्तेऽतीव हृष्यन्ति, किञ्चाऽल्लाहो न कर्हिचित् । श्रद्धरेभ्यः प्रतीदानमकृतार्थं करिष्यति ॥३२६॥
[१७२]येऽल्लाहस्य तथाऽऽह्वानमशृण्वन् वाग्घरस्य च । जातेऽप्येषुमहाऽऽघाते तेषां ये भद्रकारिणः ॥३२७॥
भीधराश्च प्रतीक्षन्तां प्रतीदानं महद् हि ते । [१७३]त एते यान् जना आहुः—लोका युष्मद् विरोधिनः ॥३२८॥
संहता ननु संजातास्ततो यूयं बिभीत तत् । परं तद् वचनं तेषां वैपरीत्येन हन्त ! भोः ! ॥३२९॥
श्रद्धां समेधयामास तेषां, ते चैवमब्रुवन्— । अस्मभ्यंत्विह सोऽल्लाहो ह्येव खल्वस्ति केवलः ॥३३०॥
विशेषादुत्तमश्चासौ वर्त्तते कार्यसाधकः । [१७४]निवृत्ताश्चाऽथ ते लब्ध्वा ह्यल्लाहात्तत् कृपादये ॥३३१॥
न यातास्ते मनाक् कष्टं सृता तैः सरणिश्च सा । याऽल्लाहस्य प्रसादस्य, ह्यल्लाहस्त्वत्यनुग्रही ॥३३२॥
[१७५]केवलः शातनो ह्येष मित्रलोकादपीह यः । भीषयत्यत्र वै लोकान्, तेभ्यो मैव बिभीत भोः ॥३३३॥
श्रद्धरा यदि यूयं स्थ मत्त एव विभीत तु । [१७६]श्रद्धाहीनजनानान्तु ये शिरोमणयो मताः ॥३३४॥
स्वात्मानं मैव तद् हेतोः तुदथ, नो कथञ्चन । तोत्तुं शक्ता इमेऽल्लाहं ह्यल्लाहस्याऽथछन्दतः ॥३३५॥
नांऽशभाजो भविष्यन्ति परलोके हि ते क्वचित् । महत्यो यातनाश्चापि प्रतीक्षन्ते हि तान् ध्रुवम् ॥३३६॥
[१७७]श्रद्धायाः पुनरश्रद्धां ये तु क्रीणन्ति मानवाः । कथञ्चिन्नापि तेऽल्लाहं तोत्तुं शक्ष्यन्ति, प्रत्युत— ॥३३७॥
साभीला यातना ह्येव तत् प्रतीक्षापराः सदा । [१७८]सौदार्यः प्रग्रहो यश्च तेभ्यो दत्तो न तं तु ते ॥३३८॥
गतश्रद्धा विजानीयुः स्वात्मभ्यः शंकरं हितम् । प्राप्नुयुस्ते हि पापानां प्रगुणीभावमित्यतः ॥३३९॥
सौदार्यं प्रग्रहं दद्मो ह्येतन्मात्रं प्रयोजनम् । यातनाः सापमाना वै तेभ्यस्तिष्ठन्त्यसंशयम् ॥३४०॥
[१७९]नैतच्छक्यं यदल्लाहस्तूदास्तं सर्वमीक्षताम् । यथापूर्वं तथा पश्चात् तिष्ठन्तु श्रद्धरास्तथा ॥३४१॥
यावद् भद्रानभद्रांश्च न विविङ्क्तां कुतोऽस्य शम् । नैतच्छक्यं यदल्लाहः परोक्षं वश्च बोधयेत् ॥३४२॥
चिनोति यमभिप्रैति वाग्घराणामसौ किल । श्रद्धत्त यूयमल्लाहे वाग्घरेष्वपि चास्य तत् ॥३४३॥

CC-0. In Public Domain. Digitized by eGangotri

पुरस्कारो महान् वोऽस्ति यदि यूयं भविष्यथ । श्रद्धरा अपि किञ्चाऽपि भीधरा (नाऽत्र संशयः) ॥३४४॥
[१८०]ये च संग्राहकास्तस्य यदल्लाहः प्रसादतः । तेभ्योऽदत्त न मन्येरन् आत्मनस्तत् शुभाय ते ॥३४५॥
अशुभाय हि तत् तेभ्यः, पुनरुत्थापनाऽहनि । परिणंस्यति तच्चैव कण्ठपाशे सुखग्रहे ॥३४६॥
या धरित्र्यां तथा खेषु सर्वा साऽल्लाहसम्पदा । यद् यद् यूयं विचेष्टध्वेऽल्लाहस्तत्तत् प्रवेत्त्यलम् ॥३४७॥
[१८१](युद्धसाह्यप्रसंगेन) यत्तेऽवोचन् श्रुतं हि तत् । जल्पतस्तान् हि तत् सर्वं ह्यल्लाहेन—"स निर्धनः ॥३४८॥
धनवन्तो वयं किञ्च," विधास्यामो वयञ्च तत् । लेखात्तं यच्च ते ह्यघ्नन् निरर्थं वाग्घरान् पुनः ॥३४९॥
वदिष्यामो वयञ्चैतान्—स्वदत वह्नियातनाः । [१८२]प्रतीकारश्च तस्याऽयं प्रैषयन् यद्धि वः कराः ॥३५०॥
अल्लाहो न क्वचिज्जाल्मो बन्धकेषु कदाचन । [१८३]त एवाऽहुर्यदल्लाहस्तावदस्मानुपादिशत् ॥३५१॥
श्रद्धत्त वाग्घरे नैव तावत् कस्मिंश्चिदत्र भोः ! । नाऽनयेत् स बलिं यावत् प्रत्यक्षं नस्तथाविधम् ॥३५२॥
(आकाशादवपत्याऽधः) यमश्नातु तु पावकः । ब्रूहितान् समया युष्मान् पूर्वं मत्तोऽप्युपस्थिताः ॥३५३॥
वाग्घराः स्पष्टलक्ष्माणि समादाय, तथाऽऽनयन् । वस्तु तद् यस्य सम्बन्धे वाग् युष्माकं प्रवर्त्तते ॥३५४॥
भवथ सत्यदेवाश्चेत् असासिष्ट कथं हि तान् ? । [१८४]त्वामिमे चेन् निषेधन्ति निषिद्धा वाग्घरा अपि ॥३५५॥
त्वत्तः पूर्वं य आयाताः स्पष्टैश्चिह्नैस्तथैव च । सामभिश्चापि शास्त्रेण दीव्यता; [१८५]देहधारिणा ॥३५६॥
येन केनाऽप्यसौ मृत्योः स्वादो द्रष्टव्य एव तु । प्रतीदानं च युष्मभ्यं पुनरुत्थापनाऽहनि ॥३५७॥
अर्जितस्यानुपातेन भविता न्यायतः समम् । तस्य सौभाग्यमुद्यातं योऽनलाद् विनिवर्त्तितः ॥३५८॥
प्रवेशितस्तथा स्वर्गे; जीवनं लौकिकंत्विदम् । वञ्चनामात्रमेवाऽस्ति (मायामोहस्य कारणात्) ॥३५९॥
[१८६]परीक्षणेन युष्माकं भवितव्यं हि सर्वथा । असुभिः सम्पदा चैव, सोढव्यं दुःखमप्यथ ॥३६०॥
युष्माभिस्तैरलम्भि प्राक् शास्त्रं यै र्यें पुनस्तथा । प्रतिमाश्जका लोकाः; धैर्यवन्तोऽथ भीधराः ॥३६१॥
यूयं तिष्ठेत यद्यत्र, भवेत् सत्यमिदं पुनः । महतांस्थिरकार्याणां स्थिरं ह्यन्यतरद् ध्रुवम् ॥३६२॥
[१८७]यदा किञ्च तथाऽल्लाहो दृढं ह्येतदकारयत् । तान् यैरलम्भि तच्छास्त्रं यद् यूयं हि प्रवक्ष्यथ ॥३६३॥
लोकानेतत्, न चैवाऽस्य निह्नवं तु करिष्यथ । परं ते पृष्ठतस्त्वेनत् प्राक्षिपन् ह्यस्य चाऽचरन् ॥३६४॥
पण्यमल्पेन मूल्येन कृतं किंपण्यमेव तत् । [१८८]मैव मन्तव्यमेतच्च ये हृष्यन्ति स्व कर्मसु ॥३६५॥
अकृतेभ्योऽपि कर्मभ्यो ये प्रशंसेच्छुकास्तथा । तद् विधाः खलु वै लोका मोक्ष्यन्ते कृच्छ्रजालतः ॥३६६॥
यातना दुःखदायिन्यस्तत्प्रतीक्षापराः किल । [१८९]धरित्र्यां खेषु चैवाऽपि ह्यल्लाहस्यैव शासनम् ॥३६७॥
सर्वसामर्थ्यभृच्चापि सोऽल्लाहः परमो मतः । [१९०]व्योम्नां चैव धरित्र्याश्च रचनायां निशस्तथा ॥३६८॥
अह्नश्च रूप भेदेऽपि गुप्त लक्ष्माणि धीमताम् । [१९१]उत्थिता ये स्थिता ये च गताः शय्याञ्च येऽसकृत् ॥३६९॥
अल्लाहस्य स्मरन्त्येव रचनां, चिन्तयन्ति च । व्योम्नां चैव धरित्र्याश्च (स्तुवन्त्येवञ्च) नः प्रभो ! ॥३७०॥
निरर्थं रचितं नेदं त्वया, त्वं भवतात् सदा । महीयान्, किञ्च नः पाहि यातनाभ्योऽनलस्य च ॥३७१॥
[१९२]प्रभो नः ! वह्निमध्ये यं प्राक्षिपः न हि संशयः । परास्तं ह्यकरोस्तं भोः !; सहायो न भविष्यति ॥३७२॥
कोऽपि ये दोषिणस्त्वत्र तेषां (पापाध्वचारिणाम्) । [१९३]आह्वातारमशृण्मैकं श्रद्धां प्रति हि नः प्रभो ! ॥३७३॥
श्रद्धत्तात्मप्रभुं ह्येतद् ब्रुवन्तं च ततो वयम् । श्रदद्ध्म, प्रभोनस्त्वं किल्विषाणि क्षमस्व नः ॥३७४॥
अस्माकं दुरितान्यस्मत् चापि त्वं भोः ! परासुव । भक्तिमद्भिः समं मृत्युं किञ्चास्मभ्यं प्रदेहि वै ॥३७५॥
[१९४]प्रभो नः ! देहिनस्तद् वै प्रत्यजाना हि यत् पुरा । वाग्घरद्वारतोऽस्माभिः, पुनरुत्थापनाऽहनि ॥३७६॥
परास्याऽस्मान् न वै, सत्यं प्रतिज्ञां न भनक्षि हि । [१९५]अशृणोच्च प्रभुस्तेषां विनयं (पुनराह च) ॥३७७॥
पुमान् वा स्यादथ स्त्री वा, कर्मिणः कर्म खल्वहम् । नाऽकृतार्थं करिष्यामि, यात एकैकशोऽग्रतः ॥३७८॥
येऽत्यजन् निज—गेहांस्तु ये च निष्कासितास्ततः । मार्गकष्टेपु ये ग्रस्ताः येऽयुध्यन्त तथैव च ॥३७९॥
अहन्यन्त, तदेतेषां परासिष्यामि दुर्गुणान् । वेशयिष्यामि चैवैतान् तेषूद्यानेषु यत्र वै ॥३८०॥
पार्श्वतः प्रवहन्त्योऽथ भविष्यन्ति हि निम्नगाः । प्रतिदानमिदं तेभ्यस्तदल्लाहाद् भविष्यति ॥३८१॥
प्रतिदानं प्रशस्यं च ह्यल्लाहादेव वर्त्तते । [१९६]वञ्चयेन्न पुनर्युष्मान् चेष्टनं ह्यद्भुतं हि यत् ॥३८२॥
श्रद्धाहीनजनानां वै पृथिव्याम् (अवधत्तच) । [१९७]सुखसम्भार एषोऽत्र कुत्सितः स्तोक एव च ॥३८३॥

CC-0. In Public Domain. Digitized by eGangotri

तेषामावसथं पश्चान्नरको ह्येव विद्यते । धिगेवावसथं तच्च; [१९८]स्वप्रभोर्ये तु बिभ्यति ॥३८४॥
सन्त्युद्यानानि वै तेभ्यः पार्श्वतो यत्र निम्नगाः । प्रवहन्त्यो भविष्यन्ति तत्र वत्स्यन्ति ते सदा ॥३८५॥
स्वागतायोपहारोऽयं प्रभोःपार्श्वाद् भविष्यति । सूत्तमं समयाऽल्लाहं भक्तिमद्भ्यो हि तिष्ठति ॥३८६॥
[१९९]शास्त्रिणां तेऽपि केचित्तु ह्यल्लाहे श्रद्धरा हि ये । बिभ्यन्तो हि पुनस्तस्मात् श्रद्धराश्चाऽवतारिते ॥३८७॥
तस्मिंस्त्वय्यथ चैतेषु, कुपण्यं नाऽचरन्ति च । मूल्यमादाय खल्वल्पं ह्यल्लाहाऽऽयातविक्रयात् ॥३७८॥
तत्प्रभुं समया तेभ्यः प्रतिदानं हि तिष्ठति । असंशयं हि सोऽल्लाहो लेखाकार्येऽतिशीघ्रगः ॥३८९॥
[२००]श्रद्धराः ! धैर्यमाधत्त, धैर्यं लोकोत्तरं तथा । दर्शयत स्थिराश्चैव तिष्ठताऽल्लाहतः पुनः । ॥३९०॥
बिभीत येन वै युष्मान् साफल्याधिगमो भवेत् ।

योगः—३९०॥

CC-0. In Public Domain. Digitized by eGangotri

४

सूक्तम्—निशा

(अन-निसा)

(मदहीनाऽवतीर्णाः षट्सप्तत्युत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]बिभीत स्वप्रभोर्यूयं लोकाः ! वोऽजनयद्धि यः । एकात्मनः; ततश्चैव भिन्नलिंगं तथा ऽसृजत् ॥ १ ॥
प्रपञ्चं योऽकरोत् ताभ्यां स्त्रीणां पुंसां; बिभीत च । ततो ऽल्लाहाद्धि माध्यस्थ्याद् यस्य साह्यमपेक्षितम् ॥ २ ॥
परस्परं, बिभीताऽपि बान्धवेभ्यस्तथैव च । असंशयं हि वोऽल्लाहो निरूपयत्यनारतम् ॥ ३ ॥
[२]अनाथेभ्योधनं तेषां दत्त, हीनेन वस्तुना । विनिमयं न कुर्वीध्वं तेषामुत्तमवस्तुनः ॥ ४ ॥
तेषां रिक्थैः स्वरिक्थानि मिश्रयित्वा कदाचन । स्वाधीनानि न कुर्वीध्वं महान् दोषोऽस्त्ययं ध्रुवम् ॥ ५ ॥
[३]अनाथेषु किमर्हामो न्यायेन वर्त्तितुं वयम् । इतीत्थंभूतसन्देहे तन्महेलासु या अपि ॥ ६ ॥
युष्मभ्यं युक्तरूपाः स्युस्तासां द्वे तिस्र एव वा । चतस्रो वैककालेऽपि ह्युपयच्छेत यूयकम् ॥ ७ ॥
पक्षपातं वयं त्यक्त्वा ताभिः साम्येन वर्त्तितुम् । अर्हिष्यामो न वेत्येवं सन्देहे तूद्गते ततः ॥ ८ ॥
तुष्यध्वमेकया नार्या तुष्यध्वं वा पुनस्तया । बन्धकी या ऽभवत् पूर्वं युष्माकं वशवर्त्तिनी ॥ ९ ॥
यूयमेवं प्रकुर्वीथा अन्यायाद् रक्षितुं स्वकम् । प्रभवः स्यात खल्वैतत् संभाव्यं वर्त्ततेऽधिकम् ॥१०॥
[४]उद्‍ढाभ्यस्तथा स्त्रीभ्यो निश्चितार्थांशतः पुनः । महर्घो दीयतां किञ्च, स्वयं चेत् प्रेरितास्तु ताः ॥११॥
कञ्चिदंशं जहत्येव युष्मभ्यं भुंक्त तत् ततः । आनुकूल्यकरं येन जोषकार्यपि तद् भवेत् ॥१२॥
[५]यूयं यस्य हि गोप्तारो ऽल्लाहाद् रक्ष्यं न तद्धनम् । निकषाऽज्ञान्, परन्त्वेभ्यो देयेऽस्माद् वसनाऽदने ॥१३॥
मार्दवेन च वक्तव्यं तैः समं भद्रभावतः । [६]निरूप्या अथ चाऽनाथा एषामोपयमाऽऽयुषः ॥१४॥
सुज्ञा निरूपिताश्चेत् स्युस्तद्धनं तान् प्रयच्छत । वर्धिष्यन्ते दिनैर्मत्वा तद्धनं भुंक्त मात्वऽरम् ॥१५॥
अनावश्यकरूपेण तन्न नाशयताऽपि च । धनिनाऽत्मा निजो रक्ष्यो भोगादेवंविधस्य तु ॥१६॥
दरिद्रेण पुनर्भोज्यो ह्यस्यांशो योऽत्र तूचितः । साक्षिणः किल कर्त्तव्यास्तेषां तावदुपस्थितौ ॥१७॥
यदा तत् संप्रदेयं स्याद् धनं तेभ्यः (सुगोपितम्) । समर्थो गणकस्तावद् वर्त्तते ऽल्लाह इत्वरः ॥१८॥
[७]पुमांसोऽर्हन्ति तं ह्यर्थं पितृभ्यां यश्च बन्धुभिः । कुले त्यक्तो भवेत्, स्त्रीणां चाऽपि तत्राधिकारिता ॥१९॥
स्तोका वाऽप्यधिका वाऽपि विधिवत् प्रतिपादिता । [८]विभज्येत यदा सम्पत् तदाऽनाथाश्च बान्धवाः ॥२०॥
पराश्रिताश्च तत्स्थानं सकामा यद्युपासते । तेभ्यश्चापि ततो देयं यत् किञ्चाऽथ समार्दवम् ॥२१॥
दर्श्यतां विनयस्तेभ्यः; [९]भेतव्यं च जनैस्सदा । अबलान् बालकांस्तेऽपि यद्यत्यक्ष्यन् हि पृष्ठतः ॥२२॥
अभविष्यद् भयं तेषां कियत् तावन्मनस्सु तु । भेतव्यं तैः सदा ऽल्लाहात् न्याय्यं वक्तव्यमेव च ॥२३॥
[१०]ये तु लोका अनाथानां धनं पापेन भुञ्जते । स्वोदरं ते पृणन्त्यत्र वस्तुतो वह्निनैव तु ॥२४॥
अर्चिषु भ्राजमानासु ते पतिष्यन्ति चाऽचिरात् । [११]सन्ततेर्विषयेऽल्लाहो ह्यादिशत्येवमत्र वः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

पुंसो भागो द्वयोर्नार्योः भागाभ्यां सम्मतः समः । स्त्रीणां द्वाभ्यां वहुत्वे तु द्वयशता त्रिषु सम्पदाम् ॥२६॥
सत्यां स्त्रियां तथैकस्याममुष्याः सामिभागता । स्थिते तस्य पुनः पुत्रे पितृभ्यां षष्ठभागता ॥२७॥
अपुत्रे तु स्थिते तस्मिन् भवेतां पितरौ यदि । उत्तराऽधिकृतौ रिक्थात् तृतीयांशं हरेत् प्रसूः ॥२८॥
यद्यस्य भ्रातरः सान्ति षष्ठांशं तद् हरेत् प्रसूः । इमे भागा हृदिच्छाया अमीषां पूरणोत्तरम् ॥२९॥
ऋणराशिप्रदानोर्ध्वञ्चावशिष्टाद् धनात् स्मृताः । पितरौ सन्ततिर्वाऽपि कतरोऽतितरां हितम् ॥३०॥
युष्माकमिच्छतीदं तु न यूयं वित्थ (भो जनाः !) । अल्लाहेन समादिष्टा इमेंऽशा नाऽत्र संशयः ॥३१॥
तत्वदर्शी हि सो ऽल्लाहस्तथा बुद्ध्या समन्वितः । [12]युष्माकं चाऽथ पत्नीभिः समन्यस्यत यद्धनम् ॥३२॥
सामिभाजस्ततो यूयं अप्रजाः सन्ति ता यदि । सप्रजासु भवन्तीषु यूयं तुर्यांशमर्हथ ॥३३॥
इमे भागा हृदिच्छाया अमूषां पूरणोत्तरम् । ऋणराशि—प्रदानोर्ध्वञ्चावशिष्टाद् धनात् स्मृताः ॥३४॥
युष्माभिर्यत् पुनस्त्यक्तं युष्माकं योषितस्ततः । अनपत्येषु युष्मासु चतुर्थांशहराः किल ॥३५॥
सप्रजेषु तु युष्मासु ह्यष्टमांशहरा हि ताः । इमे भागा हृदिच्छाया अमीषां पूरणोत्तरम् ॥३६॥
ऋणराशि—प्रदानोर्ध्वञ्चावशिष्टाद् धनात् स्मृताः । अप्रजः पुरुषो वा स्यात् स्त्रीभवेदप्रजाऽपि चेत् ॥३७॥
मातृपितृविहीनौ च, भवेद् भ्राता स्वसाऽपि च । तयोः प्रत्येकमंशस्य भवेत् षष्ठस्य भागिता ॥३८॥
अनेके ते भवेयुश्चेत् तृतीयांशात् समेत्य ते । स्वं स्वमशं ग्रहीष्यन्ती (त्येवमेतद् विबुध्यताम्) ॥३९॥
इमे भागाः हृदिच्छाया अमीषां पूरणोत्तरम् । ऋणराशि—प्रदानोर्ध्वञ्चावशिष्टाद् धनात् स्मृताः ॥४०॥
हृदिच्छा—लेखपत्रे वा हानिकृत् चेन् न किञ्चन । अल्लाहादिदमादिष्टं सुज्ञोऽल्लाहस्तथा क्षमी ॥४१॥
[13]इमा अल्लाहतः सीमाः वाग्घराल्लाहयो हि यः । रक्षिष्यति समादेशान् ह्यल्लाहस्तं जनं पुनः ॥४२॥
वेशयिष्यति सत्यं वै किलारामेषु यत्र हि— । पार्श्वतः प्रवहन्त्योऽथ भविष्यन्ति च निम्नगाः ॥४३॥
भवेत्तस्य सदाऽवासस्तत्र, चेदं पुनर्महत् । साफल्याय हि कल्पेत; [14]यः पुनर्विपरीततः ॥४४॥
वाग्घराऽल्लाहयोस्तावत् ह्यवज्ञां प्रकरिष्यति । सीमोल्लंघनमेवाऽपि तमल्लाहस्त्वसंशयम् ॥४५॥
वह्नौ क्षेप्स्यति यस्मिन् वै स्थातव्यं तेन संततम् । अवमन्त्री मता तस्मै यातना खल्वियं त्वति ॥४६॥
[15]पत्नीनामथ युष्माकं व्यभिचारे रता यदि । चतुर्णामात्मनीनानां ग्राह्यं साक्ष्यं, ततो यदि ॥४७॥
प्रमाणयन्ति ते लोकाः, मृत्यवेऽन्तर्गृहेषु ताः । पिधेया अथवा ऽल्लाहश्चिन्तयेदपरं विधिम् ॥४८॥
[16]रमेतां द्वौ जनौ वश्चेत् व्यभिचारस्य कर्मसु । ताडनीयौ हि तौ सम्यक्, विप्रतीसारदर्शने ॥४९॥
साधने चाऽत्मनोः पश्चात् क्षन्तव्यौ भवतः किल । सप्रसादोदयी तेषु त्वल्लाहो येऽनुशेरते ॥५०॥
[17]अमीषां विप्रतीसारं त्वल्लाहः स्वीकरोति च । अज्ञानात् प्रेरिता ये वै भजन्ते दुष्कृतानि तु ॥५१॥
प्रायश्चित्तं पुनर्यान्ति कालक्षेपं विहाय च । त एवैते तु सोऽल्लाहो यानिह क्षमते ततः ॥५२॥
सुज्ञोऽल्लाहः पुनश्चैव तत्वदर्शी तथैव सः । [18]न तेषां विप्रतीसारो मन्यते, ये जना इह ॥५३॥
आमृत्योर्नीचकर्माणि समासेवन्त सर्वदा । तेषामन्यतरो यच्च मृत्युकाले ह्युपस्थिते ॥५४॥
अक्रोशत्—विप्रतीसारं साम्प्रतं ग्राम्यहं जनाः । आमृत्योर्ये स्थिताः किञ्च पूर्णतो ऽश्रद्धरास्तथा ॥५५॥
न तेषां विप्रतीसारश्चापि सार्थोऽत्र तिष्ठति । सज्जास्तेभ्यः कृताः सन्ति साभीला भूरि यातनाः ॥५६॥
[19]स्त्रीषु स्वाम्यं हठान् नैव श्रद्धराः ! वैधमुच्यते । स्वयं दत्तं तथाऽऽहर्तुं ताभ्यः स्यान्नामभागतः ॥५७॥
तासां रोधो न वै वैधो यावत् स्पष्टं न पांसुलाः । भद्रभावेन ताभिश्च समं कालोऽथ नीयताम् ॥५८॥
भवेच् चेदरुचित्वं च युष्माकं तासु तत् पुनः । संभाव्यं खल्विदं चापि यदल्लाहो न्यवेशयत् ॥५९॥
यत्र भद्राण्यनेकानि सैव वो विषयोऽरुचेः । [20]पत्नीं विहाय यद्येकां वरयेतेतरां स्त्रियम् ॥६०॥
प्रभूतं दत्तमप्यर्थं यदेकस्यै ततो न वै । किञ्चनाऽपि प्रतिग्राह्यं किन्न यूयं ग्रहीष्यथ ॥६१॥
मिथ्याऽऽरोपाऽभियोगेन पुरोभक्त्योल्वणं तथा । [21]युष्माकं योग्यता का च तद्धनस्य प्रतिग्रहे ॥६२॥
अन्योऽन्याभिमुखं यूयं विवृतिं प्राग्गता यदि । अबध्नन् तास्तथा युष्मान् प्रणानां दृढश्रृंखलैः ॥६३॥
[22]ताः स्त्रियो नोपयन्तव्याः या हि वः पितरः पुरा । उपायच्छन्, परं पूर्वं घटितेऽगतिको जनः ॥६४॥
अश्लीलं हन्त ! कर्मैतत् निन्द्यं रीत्या च दुर्मतम् । [23]निषिद्धा दारकर्मार्थं युष्मभ्यं वस्तु मातरः ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

पुत्र्यश्चैव भगिन्यश्च स्वसारश्चाऽथ वः पितुः । भगिन्यः किञ्च वो मातुः, पुत्र्यो भ्रातुः स्वसुः पुनः ॥६६॥
धात्र्यश्चैव भगिन्यश्च या भवेयुः सपीतयः । मातरो धर्मतः, स्त्रीणां पुत्र्यो वोऽङ्केषु लालिताः ॥६७॥
पुत्र्यः स्त्रीणां रतं याभिः स्त्रीभिर्युष्माभिरप्यथ । अभुक्तानान्तु युष्माभिः पुत्रीभिर्न रतेष्वघः ॥६८॥
युष्माभिर्मैथुनोत्पन्ना युष्माकं च सुतस्त्रियः । सोदर्ये द्वे भगिन्यौ च नैककालं गृहे पुनः ॥६९॥
निवेश्येतां विवाहार्थं जनेनैकेन कर्हिचित् । (अदोऽमेध्यं), परं पूर्वं घटितेऽगतिको जनः ॥७०॥
असंशयं हि सोऽल्लाहो दयावानति च क्षमी ।

इति चतुर्थं पारायणम्

अथ पञ्चमं पारायणम्

। [२४]निषिद्धा अथ युष्माकं सर्वा ऊढाः स्त्रियः किल ॥७१॥
अपत्यकर्मणे त्यक्त्वा (बन्धक्यः) वो वशं गताः । इमे ऽल्लाहसमादेशा युष्मभ्यं ये प्रकीर्त्तिताः ॥७२॥
इतो ऽन्या वैधतां यान्ति युष्मभ्यं सकलाः स्त्रियः । स्वकेनाऽर्थेन यद् यूयं ता अवाप्योद्वहेत वै ॥७३॥
व्यभिचारमनाश्रित्य रतं याभिः पुनश्च ताः । महर्घेण हि संभाव्याः निश्चितेन पुरैव तु ॥७४॥
महर्घे निश्चिते पश्चात् प्रसादात् समयः कृतः । मिथः कश्चिद् युवाभ्यां चेत् तत्र दोषो न वः स्मृतः ॥७५॥
तत्वदर्शी च विज्ञश्च सोऽल्लाहो नात्र संशयः । [२५]युष्माकं ये ऽसमर्थास्तु विवोढुं श्रद्धरा रमाः ॥७६॥
बन्धकीः श्रद्धरास्ते वै विवहेयुः वशंगताः । श्रद्धां युष्माकमल्लाहः सम्यग् वेत्ति, तथैव च ॥७७॥
सहजा बान्धवा यूयं मिथः, तत् स्वामिनां ततः । आज्ञयोद्वहत ह्येताः महर्घं नियमेन च ॥७८॥
दत्तैताभ्यो यथोदूढास्तिष्ठेयुस्ताः, परं न च । स्वैरिण्यो हि भवेयुस्ता नैव किञ्च रहोरताः ॥७९॥
स्वैरित्वं यान्ति यद्यूढाः स्त्रीणां दण्डार्धगा हि ताः । उपर्युक्तं तु युष्माकं तस्मै यो ह्यत्र शंकते ॥८०॥
कदाचिद् विचलेयं हि चारित्र्यात् सुत्तमादहम् । संयमस्त्विह युष्मभ्यं भवेदुत्तमभेषजम् ॥८१॥
क्षमाशीलो दयालुश्च ह्यल्लाहः संप्रकीर्त्तितः । [२६]पूर्वजानान्तु मार्गेण युष्मान् गमयितुं तथा ॥८२॥
युष्मासु प्रकटीकर्त्तुं तद् दयां वर्षितुं ह्यथ । समनाः किल सो ऽल्लाहो मतिमान् विज्ञ एव च ॥८३॥
[२७]दयां वर्षितुमल्लाहो युष्मास्विच्छति, ये परम् । क्षुद्रेच्छाः पूरयिष्यन्तः युष्मानिच्छन्ति तेत्विदम् ॥८४॥
यद् यूयं पथिका भूरि स्यात योऽत्रास्ति कापथः । [२८]अल्लाहस्य तु खल्विष्टं लघुं कुर्याद् भरं तु यत् ॥८५॥
मानवस्य यतोऽसौ वै किम्बलः खल्वजन्यत । [२९]श्रद्धराः ! नात्मसाद् यूयं विधानं ह्यनपेक्ष्य तु ॥८६॥
परस्परं प्रकुर्वीध्वं धनं यावन्न सम्मतिः— । प्ररोहेत् पण्यकार्याय मिथो युष्माकमात्मसु ॥८७॥
नात्मनीनाश्च हन्तव्या ह्यल्लाहः सदयः सदा । युष्मासु नाऽत्र सन्देहः; [३०]परन्त्वित्थं करिष्यति ॥८८॥
हिंसया यो ऽनयेनाऽपि तं वयं त्वचिरं पुनः । क्षेप्स्यामो ज्वलने त्वेतत् ह्यल्लाहे सुकरं मतम् ॥८९॥
[३१]निषिद्धेभ्यो हि कार्येभ्यो महद्भ्यो यदि रक्षत । यूयमात्मानमेते वै वयं दोषान् लघून् ततः ॥९०॥
युष्मत्तो द्रावयिष्यामो वेशयिष्याम एव च । युष्मान् द्वारात्तु तस्माद्वै भद्रमास्ते हि यद् (ध्रुवम्) ॥९१॥
[३२]अल्लाहेन हि यद् दत्तं कैभ्यश्चित् तूत्तरं धनम् । तन्न काम्यं भवेत् पुंसां भागस्तस्यानुपाततः ॥९२॥
तैर्यदप्यर्जितं स्त्रीणां भागस्तस्यानुरूपः । ताभिर्यदर्जितं किञ्च महौदार्यं त्वमुष्य यत् ॥९३॥
कामयध्वं तदल्लाहात् ह्यल्लाहः सर्वविद् ध्रुवम् । [३३]नियुक्ता पुनरस्माभिश्चोत्तराधिकृता जनाः ॥९४॥
तद्धनस्य परित्यक्तं पितृभ्यां यच्च बन्धुभिः । प्रतिज्ञातञ्च यैः यूयं तेषां तेभ्यस्तथोचितम् ॥९५॥
भागं प्रदत्त, सोऽल्लाहः प्रत्यक्षं सर्वधारकः । [३४]अल्लाहः कृतवानेकं परस्मादतिशायिनम् ॥९६॥
व्यययन्ति तथा चाऽर्थं ताभ्यो येन जनाः किल । तिष्ठन्ति तेन खल्वत्र ते जनीशीर्षमास्थिताः ॥९७॥
स्त्रियो भद्रास्तु याः शश्वत् विधेयाऽऽपालिकास्तथा । रहस्यानाञ्च तिष्ठन्ति यथैव समपालयत् ॥९८॥
स्वतो ऽल्लाहो रहस्यानि याः पुनः सन्त्यतद्विधाः । विद्रोहः शंक्यते यासां बोधनीया हि तास्तथा ॥९९॥
पृथक् पर्यंकशायिन्यः क्रियन्तां दण्डिताः पुनः । उद्बुद्धे तासु सद्बोधे विरोद्धव्या न ताः पुनः ॥१००॥
परेषां हि परो ऽल्लाहो महांश्चात्र न संशयः । [३५]शंक्यते प्रविभेदश्चेत् तयोर्मध्ये नियुज्यताम् ॥१०१॥

CC-0. In Public Domain. Digitized by eGangotri

मध्यस्थः पुरुषेष्वेकः मध्यस्थैका जनीषु च । आनुकूल्ये सतीष्टे तु ताभ्यां जनयेत् पुनः ॥१०२॥
आनुकूल्यं किलाऽल्लाहस्तयोर्मध्ये, न संशयः । अप्रमत्तो हि सोऽल्लाहो ज्ञाता किञ्चाप्युदीर्यते ॥१०३॥
[३६]वन्द्यतां केवलोऽल्लाहः प्रतिमानं तथाऽस्य च । कञ्चनाऽपि न कुर्वीध्वं पितृभ्यां वन्धुभिस्तथा ॥१०४॥
परमुखेक्षिभिः सार्धं ह्यनाथैः प्रतिवेशिभिः । कौल्यैरप्यथवाऽकौल्यैः पार्श्वगेन जनेन च ॥१०५॥
सयात्रैः बन्धनं प्राप्तैः वशगैः सार्धमप्यथ । वर्त्तितव्यं हि भद्रेण भावेनाऽत्र न संशयः ॥१०६॥
सदर्पो वाक्प्लवो रुच्यो नाऽल्लाहस्य तु कर्हिचित् । [३७]निह्नवं कुर्वतेऽर्थस्य परांश्चोपदिशन्ति ये ॥१०७॥
महौदार्यमहाकोषादल्लाहाल् लब्धमेव च । ये हि निह्नुवते चाऽर्थं श्रद्हीनेभ्यो वयं किल ॥१०८॥
यातनाः सावमाना वै सज्जिताः खल्वकुर्म हि । [३८]येऽर्थं प्रदर्शनायैव व्ययीकुर्वन्ति मानुषाः ॥१०९॥
निजं लोकेषु नाऽल्लाहे श्रद्धराश्चान्तिमे दिने । यस्य कस्याप्यभूद् दुष्टः सार्थ एवाऽस्ति शातनः ॥११०॥
[३९]भवेयुः श्रद्धरास्ते चेत् ह्यल्लाहे चान्तिमे दिने । व्ययीकुर्युस्तथा तस्मात् ह्यल्लाहाद् यस्त्वलभ्यत ॥१११॥
का नु हानिर्भवेत् तेषां, प्रभुस्तान् वेत्त्यशेषतः । [४०]अल्लाहः केनचिच् चापि स्तोकमप्यनयं क्वचित् ॥११२॥
आचरत्यत्र नैवाऽपि; चेद् भद्रं स्तोकमप्यथ । वर्धयिष्यति बाहुल्यात् प्रतीदानं स्वतस्तथा ॥११३॥
करिष्यत्यति दानेन; [४१]कां यास्यन्ति दशाञ्च ते । साक्षिणं वयमेकैकं दलेभ्यश्च यदा पुनः ॥११४॥
उपस्थितं करिष्यामः, त्वां तथैव (मुहम्मद !) । उपस्थितं करिष्यामः साक्षित्वेन जनेषु वै ॥११५॥
[४२]श्रद्विहीना दिने तस्मिन् अनाज्ञाकारिणस्तथा । वाग्घरस्येदमेवाऽथ ह्येषिष्यन्ति कृता वयम् ॥११६॥
भूमिसाच् चेद् भवेमेतः किमन्यत् स्याद्वरं पुनः । शक्ष्यन्ति ते न निह्नोतुं ह्यल्लाहात् किंचनाऽपि च ॥११७॥
[४३]समया प्रार्थनां यात तावच्छ्रद्धाधरा न वै । तिष्ठेद् यावन्मदाऽवस्था न बुध्येतोक्तमेव च ॥११८॥
समया प्रार्थनां यात नाऽशौचे चैव तिष्ठति । शौचे जाते पुनर्यात मार्गयात्रां विहाय तु ॥११९॥
रोगे, मार्गस्ययात्रायां, मलत्यागे कृते च वः । स्त्रीणां स्पर्शे च युष्माकं जलाऽलाभे स्थिते तथा ॥१२०॥
यात शुद्धं ततः स्थानं स्वहस्तांश्च मुखानि च । मर्दयत (मृदा चोर्ध्वम्) ह्यल्लाहो नाऽत्र संशयः ॥१२१॥
क्षमाशीलो दयालुश्च; [४४]किन्न यूयमपश्यत । तान् लोकान् कश्चिदेवांशो येभ्यः शास्त्राददीयत ॥१२२॥
इच्छन्ति चैव ते यूयं चापि भ्रश्येत वर्त्मनः । [४५]सम्यग् जानाति सोऽल्लाहो युष्माकं विद्विषस्तथा ॥१२३॥
मित्ररूपेण सोऽल्लाहः समर्थो ह्येव वर्त्तते । सहायस्येव चाल्लाहः समर्थः स हि तिष्ठति ॥१२४॥
[४६]याहूदाहास्तु ये लोकाः शब्दान् दूरं नयन्ति ते । प्रसंगेभ्यस्तथा चाऽऽहुः "निशामितमसेवितम्" ॥१२५॥
'निशाम्या' ऽहुस्तथा चाऽऽहुः, 'अयोग्यस्त्वं निशामितुम्'। "श्रूयतां नश्च" स्वां वाचं विकुर्वन्तो तथैव च ॥१२६॥
हिंसन्तो मतमाल्लाहं; तेऽवदिष्यन् यदि क्वचित् । "निशामितं" ततश्चैवावदिष्यन् "अनिमस्त्वयि" ॥१२७॥
'निशाम्य' अस्मांस्तथा नेत्रे 'उद्योजय न' चेत्यपि । अभविष्यद् वरं तेभ्यः युक्तमासीदिदं तथा ॥१२८॥
श्रद्हानात्तु खल्वेतान् अल्लाहोधिग् धिगाऽकरोत् । तेनैव श्रद्धरास्तेषां केचिदेव भवन्ति ह ॥१२९॥
[४७]ते हि यूयं अये लोकाः ! शास्त्रं येभ्यस्त्वदीयत । मुखानां विकृतेः पूर्वं ह्यमीषां परिवर्त्तनात् ॥१३०॥
पृष्ठतश्च तथा ऽस्माभिः धिक्क्रियायाः पुरैव च । यथा ते धिक् कृता आसन् शनिवारस्य भंगिनः ॥१३१॥
श्रद्धत्त तत्र योऽस्माभिः प्रकाशः प्रकटीकृतः । पोषयद्भिर् यदाप्तं वै युष्माभिः प्राक्तनाद् युगात् ॥१३२॥
अल्लाहाऽज्ञा न वै तिष्ठेदनवाप्य क्रियाऽन्वितिम् । [४८]असन्देहं हि सोऽल्लाहः क्षमते नो कदाचन ॥१३३॥
कोऽपि यद् घटितस्तस्य प्रतिम्नोऽर्थो भवेदिह । अमुष्माद् व्यतिरिक्तार्थे क्षमेताऽपि निजेच्छया ॥१३४॥
महत् पापं कृतं तेन घटयेदत्र यो नरः । अल्लाह प्रतिमानं तु; [४९]किन्न यूयमपश्यत— ॥१३५॥
"शुद्धात्मानो वयं" हीत्थं विकत्थन्ते हि ये जनाः । यं स कामयते ऽल्लाहस्तमेवाऽसौ पुनाति तु ॥१३६॥
न चाऽनीतिं चरत्येभिः तथाणोरप्यणीयसीम् । [५०]असत्यं घटयन्त्येते ह्यल्लाहे चित्रमद्भुतम् ॥१३७॥
स्वतोप्येवाऽस्ति खल्वेतत् सुव्यक्तं निन्द्यपातकम् । [५१]लोकांश्च कश्चिदेवां ऽशो येभ्यः शास्त्राददीयत ॥१३८॥
किन्नाऽपश्यत तान् यूयं श्रद्धरास्ते भवन्ति ह । मिथ्यामतेषु किञ्चापि मिथ्यादेवेषु किञ्च ते ॥१३९॥
अश्रद्धान् श्रद्धरेभ्योऽपि स्वध्वगान् प्रवदन्ति च । [५२]एत एव हि ते लोकाः यानल्लाहो धिगाऽऽकरोत् ॥१४०॥
सहायस्तस्य लब्धुञ्च यमल्लाहो धिगाऽऽकरोत् । नैव शक्यस्त्वया चाऽपि कश्चनाप्यत्र निश्चितम् ॥१४१॥

CC-0. In Public Domain. Digitized by eGangotri

[53]शासने साधिकारास्ते कथञ्चित् किं भवन्ति च । सत्येवं खलु लोकेभ्यो दद्युस्स्तोकं न चाप्यमी ॥१४२॥
[54]किं वेर्ष्यन्ति हि लोकेभ्यो हीमे यस्माददादसौ । महौदार्यं स्वमल्लाहः तेभ्योऽदाञ्च वयं तथा ॥१४३॥
शास्त्रं चैव मनीषां चाऽ ब्रह्मसन्ततये ऽथ च । महद् राज्यं पुनश्चाऽदाम्; [55]तेषां श्रद्धारकास्ततः ॥१४४॥
तस्मिन् केचित् पराङ् आस्याः परेऽतिष्ठन् तथैव च । नारको वह्निरेतेषां दहनायास्त्यलं ध्रुवम् ॥१४५॥
[56]श्रद्दधाना न ये ऽस्माकं त्वायातेषु जना इह । सद्यस्तान् वयमग्नौ हि क्षेप्स्यामस्तत् पुनर्यदा ॥१४६॥
धक्ष्यन्ति तत् त्वचो नूत्ना विनिमयेन वै त्वचः । तेभ्यो वयं प्रदास्यामो यातनानां यथा हि ते ॥१४७॥
रसाऽऽस्वादं विदध्युर्वै ह्यल्लाहो नाऽत्र संशयः । प्रभुत्वात् शालते किञ्च तत्वदर्शी भवत्यसौ ॥१४८॥
[57]श्रद्धरा ये त्विहाऽतिष्ठन् सुकर्माणस्तथैव च । सद्यस्तान् वेशयिष्यामो ह्यारामेष्वीदृशेषु वै ॥१४९॥
नद्यः प्रान्तवहा यत्र ते च स्थास्यन्ति सर्वदा । भविष्यन्ति च यत्रैभ्यः सार्थाः शुद्धा हि सर्वतः ॥१५०॥
तान् वयं वेशयिष्यामो घनच्छायामये स्थले । [58]अल्लाहो वो दिशत्येतत् यूयं निक्षेपकान् सदा ॥१५१॥
निर्यातयत वै तेभ्यः तेषां ये स्वामिनोऽत्र हि । निर्णयायोद्यताश्चैव यदा लोकेषु तिष्ठथ ॥१५२॥
न्याय्यो हि निर्णयः कार्यो यदल्लाहोऽनुशास्ति वः । कियत् सौभाग्यपूर्णं तत्, श्रोता द्रष्टा च वै प्रभुः ॥१५३॥
[59]श्रद्धराः ! पालनीयाऽऽज्ञा वाग्घराल्लाहयोरथ । अध्यक्षाणाञ्च युष्मासु, विवादे पुनरुत्थिते ॥१५४॥
युष्मासु तं विवादाऽर्थं वाग्घराऽल्लाहयोस्ततः । अनुपवतं विधत्तेह श्रद्धरा यदि तिष्ठथ ॥१५५॥
अल्लाहे चरमाहे च, सूत्तमोऽयं विधिर्मतः । परिणाममपेक्ष्याऽपि विधिः शस्यो भवत्ययम् ॥१५६॥
[60]किन्नाऽपश्यश्च तान् लोकान् मिषं ये कुर्वते हि यत् । श्रद्धरास्ते हि वै तस्मिन् प्रकाशं गमितं तु यत् ॥१५७॥
त्वयि चाऽपि पुरा चैव त्वत्तः, वाञ्छन्ति चापि यत् । निर्णयायाभ्युपेयाम मिथ्यादेवान् हि यद्यपि— ॥१५८॥
समादिष्टा भवन्त्येते तेषां त्यागाय सर्वथा । शातनस्तान् पथभ्रष्टान् कृत्वा दूरं निनीषति ॥१५९॥
[61]भवन्त्युक्ता यदा ते च समुपैत प्रकाशितम् । यदल्लाहेन, किञ्चापि वाग्घरं समुपैत च ॥१६०॥
पाषण्डान् पश्यसीमास्त्वं दवीयो यास्यतो भृशम् । [62]किं तदा भविता चाऽपद् यदा तेष्वापतिष्यति ॥१६१॥
तत् कृतैः कर्मभिस्ते हि शप्स्यन्ति त्वामुपेत्य च । अल्लाहेन वयं त्वेते ह्यकांक्षामहि केवलम् ॥१६२॥
शमं चैव दयां चैव; [63]तदेते ते हि मानवाः । येषां हृत्स्थं विजानाति ह्यल्लाहस्तदिमान् न भोः! ॥१६३॥
विरुध्यध्वं, परं बोधं दत्त, बोद्धुं सुगं च यत् । तदेतान् आत्मना चैव शंसत; [64]वाग्घरस्तथा ॥१६४॥
प्रेषितोऽस्माभिरासीद् यत् ह्यल्लाहानुज्ञया जनाः । पालयेयुस्तदादेशान्, उपैष्यन् त्वां तदा यदि ॥१६५॥
यदाऽऽत्मन्यात्मना दोषं कृतवन्त इमे जनाः । प्रार्थयिष्यत चाऽल्लाहं तत्क्षमां वाग्घरस्तथा ॥१६६॥
प्रार्थयिष्यत खल्वेभ्यः क्षमां, नैवाऽत्र संशयः । अवेत्स्यंस्तावदल्लाहं क्षमिणं च दयाकरम् ॥१६७॥
[65]प्रभुणा ते शपे, नैव भवितुं शक्नुवन्ति नो । श्रद्धराः खल्विमे यावत् कारयेयुर्न निर्णयम् ॥१६८॥
विवादस्योत्थितस्यैषु त्वत्तो, नैवाऽरुचिं तथा । युष्मन्निर्णयमाश्रित्य दर्शयेयुः कथञ्चन ॥१६९॥
मन्येरन् पूर्ण रूपेण तं तथा च; [66]वयं यदि । विहातुं स्वानिमान् प्राणान् आदेक्ष्याम गृहांस्तथा—॥१७०॥
त्यक्तुं तर्ह्येषु खल्वल्पे ह्यचेष्टिष्यन्त तद् विधम् । अभविष्यद् हि भद्राय तेषां यद् यत्तु बोधितम् ॥१७१॥
आचरिष्यन् तथा चेत् ते ऽभविष्यत् स्थैर्यदं च तत् । [67]निजात्मनः प्रतीदानं तदानीं सुमहत् तथा ॥१७२॥
अदास्याम पुनस्तेभ्यः; [68]सरलस्याध्वनोऽप्यमून् । व्यधास्यामाऽध्वनीनांश्च; [69]वाग्घराल्लाहयोस्तु यः ॥१७३॥
आज्ञाकारी स सांगत्यं तैः करोत्यत्र येषु वै । दयां वर्षति सोऽल्लाहो हुतात्मानोऽथ वाग्घराः ॥१७४॥
सन्तो भद्रा यथा लोकाः सार्थां भूर्युत्तमा न्विमे । [70]इदं रूपं महौदार्यं ह्याल्लाहं वर्त्तते ध्रुवम् ॥१७५॥
ज्ञातृ रूपेण सोऽल्लाहः समर्थो भवतीह च । [71]श्रद्धराः ! निजशस्त्राणि संभ्रियन्तामनन्तरम् ॥१७६॥
दलशः संहता वाऽपि प्राभियात (सुसाहसाः) । [72]युष्माकं त्वीदृशश्चापि हतोत्साहः प्रयाति यः ॥१७७॥
विपन्ने त्वयि जाते च वदत्येवं "मयि प्रभुः । कृपां व्यधादहं तै हि नाऽभवं यत्तु संगतः" ॥१७८॥
[73]युष्मासु चेन्महौदार्यं वर्षेदल्लाहपार्श्वतः । क्रन्दनं स पुनः कुर्यात् अपास्तं युवयोः मिथः ॥१७९॥
यथा सख्यं भवेत् तावत् सुतरामेव सर्वथा । प्रब्रवीत्यथ—भद्रं मेऽभविष्यत् संगतो यदि ॥१८०॥
अवर्त्तिष्ये समं ह्येभिरभविष्यं महाफलः । [74]प्रलोकस्य तु ये पण्यं महनीयं हि मन्वते ॥१८१॥

CC-0. In Public Domain. Digitized by eGangotri

जीवाज् जागतिकादत्र तेभ्यस्स्यादुत्तमं न्विदम् । युध्येरंस्ते यदल्लाहात् दर्शितेऽध्वनि सर्वदा ॥१८२॥
म्रियेरन् वा जयेयुर्वा वयं तेभ्यस्तु सत्वरम् । प्रतीदानं प्रदास्यामो विपुलं सारगर्भितम् ॥१८३॥
[७५]"प्रार्थयन्ते ऽबला ये च पुमांसश्च स्त्रियोऽर्भकाः । "प्रभो नः ! वसतेरस्या यत्र जाल्मा वसन्ति हि ॥१८४॥
निष्क्रासय तथा ऽस्मभ्यं ह्यात्मनः परिरक्षकम् । मित्रं प्रेषय किञ्चाऽपि ह्यात्मनो ऽस्मत् सहायकम् ॥१८५॥
मार्गे ऽल्लाहस्य युध्यध्वे यूयं तेषां कृते न किम् ? । [७६]"युध्यन्ते मार्ग आल्लाहे श्रद्धरा येऽथ ये जनाः ॥१८६॥
श्रद्विहीनास्तु युध्यन्ते—मिथ्यादेवपथे हि ते । युध्यध्वं तेन भोः ! सार्थैः शातनस्य समं किल ॥१८७॥
शातनस्य नयः क्षीणो भवत्यति न संशयः । [७७]"किन्नाऽपश्यश्च तानुक्ता ये ऽभवन् "निजपाणयः ॥१८८॥
संह्लियन्तां हि संग्रामात्, प्रतिष्ठाप्यं च पूजनम् । दानं प्रवर्यतां चैव", युद्धादेशो व्यधायि तु ॥१८९॥
यदा, तेषां दलैकस्य दशाऽभूदीदृशी तदा । लोकेभ्योऽबिभयुस्ते वै ह्यल्लाहात् स्याद् भयं यथा ॥१९०॥
किं वा ऽतिशीय तच्चापि, तेऽब्रुवन् - नः प्रभो ! कथम् । युद्धमादिष्टमस्मभ्यं, विश्रामाय तथा न किम्—॥१९१॥
कालो दत्तोऽतिरिक्तोऽभूत्", ब्रूहितान् "भवसम्पदा । तिष्ठतेऽकिञ्चनैवेह, किञ्चाल्लाहाद् बिभेति यः ॥१९२॥
परो लोको वरीयान् स्यात् तस्मै नाप्याचरिष्यते । मनागप्यनयश्चाऽत्र युष्माभिः (ज्ञायतामिदम्) ॥१९३॥
[७८]"यूयं यत्राऽपि कुत्राऽपि तिष्ठेताऽट्टालिकास्वपि । अनिवार्यतया युष्मान् उपैष्यत्येव पञ्चता ॥१९४॥
इष्टे जाते वदन्त्येवम्—"अल्लाहात् समपद्यत" । जातेऽनिष्टे पुनः प्राहुः—"विपन्नं त्वद् भवत्यदः" ॥१९५॥
ब्रूहि तान्—"उभयं तद् वै प्रभोरेवाऽभवत् समम् । आहताः केन नन्वेते यत् स्याद् यच् चापि किञ्चन ॥१९६॥
समया बुद्धिवादन्तु न प्रयान्त्येव कर्हिचित् । [७९]"भद्रं यत् त्वां ह्यवाप्नोति तदल्लाहात्, परन्तु या—॥१९७॥
विपत् त्वां पुनराप्नोति त्वत्त एव तु सा किल । वाग्घरं त्वां वयं कृत्वा जनेभ्यः प्रैषयाम भोः ! ॥१९८॥
साक्षिरूपेण चाऽल्लाहः समर्थः केवलो मतः । [८०]"मन्यते यः समादेशं वाग्घरस्य स मन्यते ॥१९९॥
प्रभोरेव समादेशं, पराङ् आस्यस्तु यः स्थितः । वयं नो प्रैषयाम त्वां रक्षकं प्रविधाय तु ॥२००॥
ईदृशेषु हि लोकेषु; [८१]"प्रवदन्त्यपि ते ह्यदः । "पालनं हि नियोगस्य"त्वत्तो दूरं प्रयान्ति च ॥२०१॥
यदा ते दलमेतेषां निजोक्तं प्रविरुध्य तु । सुगुप्तं मन्त्रणालीनं तिष्ठत्येषां च मन्त्रणम् ॥२०२॥
लिखत्यल्लाह एतस्मात् त्वया नैवापि शोच्यताम् । विश्वस्तव्यस्त्वयाऽल्लाहः समर्थः स हि वर्त्तते ॥२०३॥
साधकत्वेन कार्यस्य ह्यल्लाहो (नाऽत्र संशयः) । [८२]"कुराणस्य न किं वा ते प्रकुर्वन्त्यनुशीलनम् ? ॥२०४॥
कस्माच्चिदभविष्यच् चेत् अल्लाहादन्यतस्त्विदम् । अद्रक्ष्यंस्ते बहून् भेदानप्रसंगानुषंगिणः ॥२०५॥
[८३]"रक्षाया वाऽथ भीतेर्वा वृत्तं यत् प्राप्य ते हि तैः । सारयन्ति हि तद् दिक्षु; परं चेद् वाग्घरं तथा ॥२०६॥
साधिकारान् जनांश्चापि ह्यख्यास्यन्नात्मनः पुनः । अवेत्स्यन्ननुबन्धं ते तेषां येऽर्हन्ति दर्शनम् ॥२०७॥
कांश्चिद् विहाय युष्माकं प्रभूताश्शातनं किल । अन्वयास्यन् न युष्मासु ह्यल्लाहानुग्रहस्तथा ॥२०८॥
दया किञ्चाऽभविष्यत् चेत्; [८४]"त्वं चैवाल्लाहवर्त्मनि । युध्यस्व तेन, किञ्चापि त्वय्यस्त्येव च नो मनाक् ॥२०९॥
विहायाऽऽत्मानमन्यस्य दायित्वं, श्रद्धराश्च ये । प्रोत्साह्यास्तेपि युद्धाय ह्यल्लाहः क्षपयेद् बलम् ॥२१०॥
संभाव्यं श्रद्विहीनानां, ह्यल्लाहस्त्वतिगो बलात् । दण्डदो दारुणश्चासौ; [८५]"प्राभिशंसिष्यते हि यः—॥२११॥
भद्रं तस्य पुरस्कारं तस्माद् विन्देदसौ ध्रुवम् । अथाऽभद्रं पुनश्चात्र प्राभिशंसिष्यते तु यः ॥२१२॥
अभद्रं तत्पुरस्कारं लप्स्यते स हि मानवः । पर्यवेक्षापरोऽल्लाहः सर्वस्याप्यत्र विद्यते ॥२१३॥
[८६]"प्रार्थितं तव सौभाग्यं भवेच्चेदमुतोऽधिकम् । वरीयः प्रार्थयस्व त्वं तदेवाऽवर्त्तयस्व वा ॥२१४॥
असंशयं हि सोऽल्लाहः सर्वलेखाकरोमतः । [८७]"अल्लाहोऽसौ, न पूज्यस्तु कश्चिन् नृणां मतो भुवि ॥२१५॥
निर्णयाहमसन्दिग्धं प्रत्यशेषान् हि वः स तु । समवेतान् पुनः कर्त्ता कश्चाल्लाहाद् ऋते तथा ॥२१६॥
सत्यो वक्तव्यदाने च; [८८]"किन्नु त्वां तुदतीह, यत् । पाषण्डिनोऽधिकृत्याऽमून् व्यभजत दलं तव ॥२१७॥
अल्लाहस्तत् कृतैरेतान् विपर्यस्तान् व्यधात् किल । अल्लाहेनाऽध्वनोऽपास्तं किं त्वं मार्गं निनीषसि ॥२१८॥
अल्लाहेनाध्वनोऽपास्तो जनो यः खलु वर्त्तते । नार्हसि त्वं किलाऽध्वानं तस्मै लब्धुं कदाचन ॥२१९॥
[८९]"यथा ते यूयमप्येवं भवेताऽश्रद्धरा इति । ते हि वाञ्छन्ति यत् तेन जायेत समतोभयोः ॥२२०॥
मा कृथास्तेन तेषां तु मित्रं यावन्न ते पुनः । स्वगृहाणि त्यजेयुर्हि प्रभोर्मार्गेऽथ ते यदि ॥२२१॥

CC-0. In Public Domain. Digitized by eGangotri

दर्शयेयुः निजं पृष्ठं ह्यमुष्मात् तांस्तदा (ध्रुवम्) । यत्र कुत्राप्युपादाय निगृह्णीत तथा हत ॥२२२॥
तेषां कञ्चिन्न मित्रं वा सहायं वा विधत्त च । [९०]व्यतिरिच्य च तान् लोकान् सम्बद्धा ये हि तादृशैः ॥२२३॥
युष्माभिः सन्धिता येषां तान् वा येषां स्वतो हृदि । युष्माभिर्योद्धुमुत्साहो मन्दो जातोऽथवा पुनः ॥२२४॥
स्वैर्येषां सह नो योद्धुं जायते साम्प्रतं मतिः । अल्लाहस्याऽभविष्यच् चेत् कामस्तान् सबलान् हि सः ॥२२५॥
अकरिष्यत् किलाऽऽयोद्धुं युष्माभिः समनोबलान् । अतश्चेत् ते तटस्था वाऽथवा तिष्ठन्त्ययोधनाः ॥२२६॥
प्रस्तुवन्ति शमं वाऽपि नानुजानाति वः प्रभुः । कञ्चनाप्यभ्युपायं तु तद् विरोधाय (निश्चितम्) ॥२२७॥
[९१]कांश्चिदन्यान् पुनः लोकान् वेत्स्यसीच्छन्ति ये किल । सुरक्षां नु स्वकीयेभ्यो युष्माकं चापि पार्श्वतः ॥२२८॥
यदा तूपद्रवाध्वानं नीतास्तिष्ठन्ति ते तदा । रमन्ते सर्वतस्तस्मिन्, न तिष्ठेयुः पृथग् यदि— ॥२२९॥
त्वत्तस्ते न च कांक्षेरन् संधातुं न पुनस्तथा । तिष्ठेयू रुद्धहस्ता वा यत्र कुत्रापि तांस्ततः ॥२३०॥
निग्रहीतान् विधायोर्ध्वं समुज्जासय (भोः ! ध्रुवम्) । इमे ते हि जना येषां साधिकारमकुर्म वै ॥२३१॥
त्वां वयं प्रविरोधाय स्पष्टायाऽसंयताय च । [९२]श्रद्धरस्य वधं कर्त्तुं श्रद्धरोह्येव नार्हति ॥२३२॥
स्मृतिभ्रंशादिकान् दोषान् प्रविहायाऽथ वै भ्रमात् । श्रद्धरस्य वधे जाते बन्धकः श्रद्धरस्तु यः ॥२३३॥
मोक्तव्यो बन्धनात् तेन ह्यसौ, मृत्युधनं तथा । मृतोपजीविलोकेभ्यो देयं ते न जना यदि—॥२३४॥
क्षमन्ते तद्विधं दानम्, शत्रुपक्षाद् भवेद् यदि । श्रद्धरश्चाप्यसौ किञ्च श्रद्धरोबन्धकस्ततः ॥२३५॥
मोक्तव्यो बन्धनादेकः; तेषां पक्षाद् भवेद् यदि । येषां सार्धं हि युष्माभिः सन्धिः स्याद् घटितस्ततः ॥२३६॥
मृतोपजीविलोकेभ्यो देयं मृत्युधनं, तथा । मोक्तव्यो बन्धनादेको बन्धकः श्रद्धरस्तु यः ॥२३७॥
अलभ्ये बन्धके जाते त्वसौ मासद्वयं ततः । अनिशं सोपवासो वै तिष्ठेदल्लाह—पार्श्वतः ॥२३८॥
विप्रतीसार एषोऽत्र ह्यल्लाहस्सः सुधीस्तथा । [९३]सम्यग् बुद्ध्वाऽपि यो हत्यां श्रद्धरस्यानुतिष्ठति ॥२३९॥
शाश्वतो नरकस्तस्मै प्रतीदानं तु विद्यते । अल्लाहस्य प्रकोपश्च धिक् क्रियाऽस्मै च विद्यते ॥२४०॥
महतीर्यातनास्तस्मै तथा सज्जाश्च सोऽकृत । [९४]श्रद्धराः ! मार्गं आल्लाहे (युद्धाय) गमनक्षणे ॥२४१॥
विवेच्यं स्वधिया सम्यग् यश्च वः शमुदीरयेत् । "श्रद्धरस्त्वन्न" वाच्योऽसौ मैव, युष्मत् प्रयोजनम् ॥२४२॥
ऐहिकैश्वर्यसंप्राप्तिः स्यात् कदाचिदनेन तु । भूतयो ऽल्लाह पार्श्वे तु प्रभूतास्सन्त्यतः पुरा ॥२४३॥
यूयमप्यवहीना वै बभूव परतस्ततः । अल्लाहाऽनुग्रहो जातोऽभवद् युष्मासु तत् ततः ॥२४४॥
विवेच्यं स्वधिया सम्यग् ह्यल्लाहः सक्षणः सदा । तस्य तस्य परिज्ञाने चेष्टध्वे यूयमत्र यत् ॥२४५॥
[९५]श्रद्धराः स्वासनं तावत् विनाऽपत्ति समाश्रिताः । धनैः प्राणैस्तथाऽऽल्लाहे मार्गे योद्धार एव ये ॥२४६॥
तावुभौ समतां नैव मिथो यातः कदाचन । आसनं स्वं श्रितेभ्यो हि युध्यतां स्वैस्तथाऽसुभिः— ॥२४७॥
एकश्रेणी समुच्छ्रायं ह्यल्लाहो व्यदधात् किल । प्रत्यजानाद् हि सर्वेभ्योऽल्लाहो भद्रं परन्त्वसौ— ॥२४८॥
आसीनेभ्यः पुरस्कारं युध्यतामकरोद् गुरुम् । [९६]श्रेण्यस्तस्मात् क्षमा चैव दया तस्मात् तथा मता ॥२४९॥
अल्लाहोऽति क्षमी चैव दयावानपि किं च सः । [९७]आत्मस्वत्याचरन् ये च तान् देवा अग्रसंस्तथा ॥२५०॥
अपृच्छन्—कां दशां याताः स्थिता यूयं पुनश्च ते । प्रावदन्—दुर्दशां याता धरित्र्यां दुस्स्थिता वयम् ॥२५१॥
प्रत्यवोचंस्ततस्तांस्ते—ह्यल्लाहस्य धरा तु या । किं न सा प्रथिताऽऽसीद् (भोः !)गन्तुं वः खल्वितस्ततः ॥२५२॥
एत एव हि ते लोका नरकावसथा हि ये । पापावासो महांश्चायम्; [९८]व्यतिरिच्य तु तान् नरान् ॥२५३॥
स्त्रियो बालान् प्रदीनांस्तु निरुपायान् न ये क्वचित् । लभन्ते कञ्चिदध्वानं; [९९]संभवेद् यदिमान् जनान्—॥२५४॥
क्षमेत ह्येव सोऽल्लाहो ह्यल्लाहोऽस्ति क्षमी तथा । मृदुशीलः किलाऽऽख्यातः; [१००]ह्यल्लाहाध्वनि चापि वै ॥२५५॥
योऽपि कोऽपि जनस्तावत् परायानं विधास्यति । महौदार्यं धरित्र्यां स शरणञ्चाप्यवाप्स्यति ॥२५६॥
स्वस्माद् गेहात् परायानं कृत्वा निर्याति यो जनः । अल्लाहं प्रति तस्यैव वाग्घरं प्रति चापि वै ॥२५७॥
मृत्युं प्रसंगतश्चाऽथ लभते चेत्, पुरस्क्रिया । तस्या ऽल्लाहेन देया स्यादल्लाहो ऽतिक्षमी तथा— ॥२५८॥
दयावांश्चाऽपि खल्वस्ति; [१०१]भूयात्रा स्याद् यदा तु वः । नात्र दोषो मतः कोऽपि संक्षेपः स्यात् कृतो यदि ॥२५९॥
प्रार्थनायां भये तावद् विद्यमाने सतीह तु । श्रद्धविहीना हि यद् युष्मान् विहनिष्यन्ति सर्वथा ॥२६०॥
श्रद्विहीनास्तु युष्माकं सत्यं वै प्रथिताऽरयः । [१०२]यदा चैवाऽन्तरा तांस्त्वं भवेः, पूजाप्रयोजनात् — ॥२६१॥

CC-0. In Public Domain. Digitized by eGangotri

स्यास्स्थितः किञ्च तत् तेषां दलमेकं भवेत् स्थितम् । त्वया सार्द्धं गृहीत्वा स्वानायुधान् पुनरेव च ॥२६२॥
प्रणिपातोर्ध्वमेतद्धि परा यायात् ततस्तदा । संगच्छेत दलं भिन्नं त्वामनिर्वृत्तपूजनम् ॥२६३॥
निर्वर्त्तयेदिदं चापि पूजां सार्धं त्वया पुनः । रक्षोपायैरिदं तिष्ठेदायुधैश्चापि संवृतम् ॥२६४॥
श्रद्विहीना उशन्त्येतत् प्रमत्ताः स्यात सर्वथा । रक्षोपायेषु यद् यूयं ह्यायुधेष्वपि येन ते— ॥२६५॥
युगपदभियायुर्वो; जाते कष्टे तु वर्षणात् । ज्वरस्याक्रमणे किं वा शस्त्र त्यागान्न दूषणम् ॥२६६॥
रक्षोपायास्तु तिष्ठन्तु ततोऽप्यत्र न संशयः । अल्लाहः श्रद्विहीनेभ्योऽ सज्जयद् ह्लीलयातनाः ॥२६७॥
[103]पूजा-कार्ये तु सम्पन्ने ध्याता ऽल्लाहं स्थितास्तथा । लेटिताश्चोपविष्टाश्च रक्षणाश्वासने पुनः ॥२६८॥
पूर्णतः पूजनं यूयं कुर्वीध्वं नाऽत्र संशयः । श्रद्धरा अनतिक्रम्य समयं पूजनं सदा ॥२६९॥
कुर्वीरन्नयमादेशः स्पष्टस्तेभ्यो हि वर्त्तते । [104]दलस्याऽस्यानुयाने च ह्युत्साहो नैव श्लथ्यताम् ॥२७०॥
दूयध्वे यदि ते चापि दूयन्ते ह्येव यद् विधम् । दूयध्वे यूयमप्यत्र ह्याशाध्वे यत् तथा प्रभोः ॥२७१॥
आशासते न तद् वैते, ज्ञः सुधीश्चाप्यसौ प्रभुः । [105]वयं शास्त्रमिदं तावत् त्वयि सत्येन सम्भृतम् ॥२७२॥
प्राकाशयाम येन त्वं ह्यल्लाहाद् दर्शिताद् विधेः । लोकेषु निर्णयं गच्छेः, न च विश्वासघातिनः— ॥२७३॥
पक्षमाश्रित्य वाणीनां व्यवहारं प्रवर्त्तय । [106]क्षमां भिक्षस्व चाऽल्लाहात् क्षमाशीलो ह्यसी दयी ॥२७४॥
[107]आत्मनश्चात्मना येऽथ खलु विश्वासघातिनः । न तेषां पक्षमाश्रित्य त्वद् व्याहारः प्रवर्त्तताम् ॥२७५॥
असंशयं हि सोऽल्लाहो नरं विश्वासघातिनम् । दोषैरुपहतञ्चापि न स्निह्यति कदाचन ॥२७६॥
[108]ते च निह्नुवते लोकात् न चाऽल्लाहात्तु यद्यपि । यदा ते मन्त्रणां गुप्तां कुर्वन्त्येकान्तमाहिताः ॥२७७॥
अनिष्टा या भवत्यस्य विद्यमानस्तदाप्ययम् । चरन्त्येते यदप्यत्र तदल्लाहात् परिवृतम् ॥२७८॥
[109]त्वमेवाऽसौ य एतेषां पक्षमाश्रित्य जीवने । लौकिके निजवाचानां व्याहारं प्रव्यकाशयः ॥२७९॥
परं पक्षादमीषां कः पुनरुत्थापनाऽहनि । अल्लाहाभिमुखो भूत्वा व्याहारं तु न्यसिष्यति ॥२८०॥
रक्षणं पुनरेतेभ्यः को वा दाता तदा किल । [110]आत्मनाऽऽत्मनि दुष्कर्म ताडनां प्रविधाय वा ॥२८१॥
क्षमामल्लाहतो याचन् अल्लाहं प्राप्स्यति ध्रुवम् । क्षमावन्तं दयालुञ्च; [111]पापं यस्तु चरत्यसौ— ॥२८२॥
विरोधायात्मनो ह्येव तत् पापं चरतीह ह । अल्लाहः सर्व विच् चैव तत्वदर्शी तथैव च ॥२८३॥
[112]चरित्वा ऽघञ्च दोषञ्च यस्तन् निर्दोषवज्जने । आरोपयेत् स शीर्षेण स्वेनाऽसत्यस्य भारकम् ॥२८४॥
स्पष्टदोषस्य किञ्चैव भारकं प्रकटं वहेत् । [113]नाभविष्यद् दया चैव ह्यल्लाहानुग्रहस्त्वयि ॥२८५॥
निश्चयस्त्वां दलैकस्याऽभ्रंशयिष्यद् हि सत्पथः । यद्यप्यात्मानमेवैते पथभ्रष्टं तु कुर्वते ॥२८६॥
हानिञ्चापि न ते काञ्चित् कर्मणा तेन कुर्वते । त्वयि प्राकाशयच् छास्त्रं ह्यल्लाहो धियमेव च ॥२८७॥
त्वदज्ञातं तथा ज्ञानं सोऽयच्छत् ते तथैव च । त्वय्याऽऽल्लाहो महांश्चापि वर्त्ततेऽनुग्रहः किल ॥२८८॥
[114]रहस्यमन्त्रणाष्वेषामतिवृद्धासु नो गुणः । गुणस्तस्य भवेन् नाम मन्त्राणासु हि यो जनः ॥२८९॥
दिशेद् दानाय किं वाऽपि भद्रकर्मभ्य एव वा । शंप्रसाराय लोकेषु मन्त्रयेत तथैव वा ॥२९०॥
प्रसादं लब्धुमाल्लाहं यो ह्येवं तु करिष्यति । पुरस्कर्त्तार एवाऽमुं त्वचिरात् सुमहद् वयम् ॥२९१॥
[115]मार्गोन्मेषे तु जातेऽपि पुरस्ताद् योऽथ कश्चन । वाग्घरं प्रविरोत्स्यत्र मार्गमन्वेष्यतीह च ॥२९२॥
श्रद्धराणामृते मार्गं कञ्चिदन्यं ततो वयम् । अर्पयिष्याम एनं वै चाऽऽश्रयं तं हि यन्त्वयम् ॥२९३॥
आत्मनांऽगीचकारैनं क्षेप्स्यामो नारके तथा । यो मतः पुनरत्राऽऽस्ते कुत्सितं केतनं किल ॥२९४॥
[116]क्षंस्यते नेदमल्लाहः प्रतिमा यत् कृतो भवेत् । तस्य कोऽपि, क्षमेताऽपि व्यतिरिक्तं ततस्त्वसौ ॥२९५॥
दवीयो यात्यसौ मार्गाद् भ्रष्टो भूत्वा हि यो जनः । अल्लाहेन समं कञ्चित् प्रतिमानं प्रकल्पयेत् ॥२९६॥
[117]केवलं स्त्रैणमेवैते संबोधयन्त्यथो ऋते । अल्लाहं, तेन चैवैते संबोधयन्ति केवलम् ॥२९७॥
शातनं तं हि विद्रोहे दत्तात्मानं हि केवले । [118]धिगल्लाहस्तमावोचत् प्रत्यवोचदसौ पुनः ॥२९८॥
बन्धकानां त्वदीयानां हरिष्यामि हि निश्चितम् । भागमेकम्; [119]अहन्तान् वै भ्रंशयिष्यामि चाऽध्वनः ॥२९९॥
पाशयिष्यामि किञ्चाऽपि मायापाशे पुनश्च तान् । आदेक्ष्यामि ततस्ते च छेत्स्यन्ति पशुकश्रवान् ॥३००॥
जगत्यत्र तथाऽऽल्लाहे ज्ञापितास्ते मया पुनः । परिवर्त्तन (माचूलम्) करिष्यन्त्यति निश्चितम् ॥३०१॥

CC-0. In Public Domain. Digitized by eGangotri

योऽल्लाहमन्तरेणाऽत्र रक्षकं मित्रमाकरोत् । शातनं विशदं सोऽत्र परिहीणो हि सर्वतः ॥३०२॥
[१२०]तैः प्रतिज्ञां विधत्तेऽसौ, कामपाशे तथैव च । पाशयति पुनश्चामून्, प्रतिजानाति शातनः ॥३०३॥
यच् च तद् वञ्चनामात्रं नान्यत् तत्र तु किञ्चन । [१२१]इमे ते हि जना येषां केतनं नरको ध्रुवम् ॥३०४॥
तस्मात् त्रातुं तथाऽऽत्मानं लप्स्यन्ते शरणं न ते । [१२२]धारयन्ति तु ये श्रद्धां भद्राणि चापि कुर्वते ॥३०५॥
अचिराद् वेशयिष्यामो वयन्तूपवनेषु तान् । पार्श्वतः स्रवणा यत्र कुल्याः स्थास्यन्ति तत्र ते ॥३०६॥
सततं, हीयमल्लाहात् प्रतिज्ञाऽथान्तरेण तम् । प्रतिज्ञापालने कश्च समर्थो जायतेतमाम् ॥३०७॥
[१२३](फलं) नाशीष्षु युष्माकं निर्भरं नापि शास्त्रिणाम् । आशीष्षु निर्भरं तच् च दुश्चरो यस्तु विद्यते ॥३०८॥
तत्फलं स लभेतैव प्रतिद्वन्द्विनमप्यथ । नाल्लाहस्य लभेताऽसौ भिन्नं रक्षितृरूपकम् ॥३०९॥
सहायत्वेन वा नैजम्; [१२४]भद्रं यस्तु चरिष्यति । स्त्री वाऽसौ पुरुषो वाऽसौ श्रद्धरत्वेन खल्वसौ ॥३१०॥
प्रवेक्षत्यव्ययंलोकं नो मनाक् चापि ते क्वचित् । बाधिताश्च करिष्यन्ते; [१२५]सूत्तमः कस्ततो भवेत्—॥३११॥
मतदृष्ट्या य आत्मानं ह्यल्लाहाग्रे समर्पयेत् । विधिना चोत्तमेनैव कुर्यात् कर्माणि, यः पुनः— ॥३१२॥
अब्रह्माऽध्वानमाश्रित्य त्वध्वनीनो भवेत् तथा । संन्यस्याखिललोकान् यश्चैकान्तं तं समाश्रयेत् ॥३१३॥
स्वतोऽल्लाहो व्यधान् मित्रंमब्रह्मं परमं स्वकम् । [१२६]खेषु यद् यद् धरित्र्याञ्च ह्यल्लाहस्यैव तत्समम् ॥३१४॥
वस्तुजातं च यत् किञ्चित् प्रभुणैव परीवृतम् । [१२७]जिज्ञासन्ते समादेशमधिस्त्रि त्वत् तदा भण — ॥३१५॥
ता अधिकृत्य सोऽल्लाहो युष्मान् दिशति यत्तथा । अभवच् छ्रावितं शास्त्रं युष्मान् तच् चादिशत्यपि ॥३१६॥
अनाथाः स्त्रीरधिकृत्य विवोढुमनसोऽपि याः । यूयं ताभ्यो महर्घं नो प्रदद्ध्वे यत् प्रदिश्यते ॥३१७॥
अधिबालं बलाद् हीनं चाध्यनाथं जनं पुनः । न्यायं तद् विषये यूयं चरतेति यदादिशत् ॥३१८॥
यच्छुभाचरणं युष्मत् ह्यल्लाहो वेत्ति तत् समम् । [१२८]पत्युः पार्श्वादभद्रस्य त्यागस्य शंकयाऽऽकुला ॥३१९॥
या ऽथवा स्त्री न दोषोऽत्र तावुभौ चेत् परस्परम् । सन्धितामुपगच्छेतां, सन्धिता हि वरीयसी ॥३२०॥
लोभस्तिष्ठति लोकानां मनोभूमौ, परं यदि । व्यवहारो भवेत् सत् तु त्रासोऽल्लाहात् तथा भवेत् ॥३२१॥
अशेषं वेत्ति सोऽल्लाहः चेष्टध्वे यूयमत्र यत् । [१२९]शक्नुथ व्यवहर्त्तुं नो पूर्णे यत्नेऽपि निर्भरम् ॥३२२॥
न्यायेन स्वासु पत्नीषु, चरतेत्थं न चाऽपि वा । यदेकान्तं मनो वस्तु ह्येकस्यामेव लीयताम् ॥३२३॥
अन्याश्चाऽथ परित्यक्ताः त्रिशंकूयन्तु किम्बलाः । उचितो व्यवहारश्चेत् त्रासोऽल्लाहात् तथा भवेत् ॥३२४॥
क्षम्यल्लाहो दयी चैव भवत्येव न संशयः । [१३०]उभौ त्यागाद् वियुक्तौ चेद् भवेतां तं च तां च सः ॥३२५॥
स्वौदार्येण करिष्यन्त्स्यात् निरपेक्षं महीयसा । अल्लाहः समहौदार्यः तत्वदर्शी तथैव च ॥३२६॥
[१३१]खेषु यद् यद् धरित्र्यां च ह्यल्लाहस्यैव तत् समम् । पुरा त्वत्तस्तु वै शास्त्रं येभ्योऽदायि हि ते जनाः ॥३२७॥
त्वच् चाप्यस्माभिरादिष्टो बिभीताऽल्लाहतः सदा । अश्रद्धां त्वन्तु चेद् यासि धरित्र्यां खेषु चापि यत् ॥३२८॥
ह्यल्लाहस्यैव तत् सर्वं स्वतन्त्रः परमं हि सः । प्रशंसानां तथैवाऽऽस्तेऽधिकारे केवले प्रभुः ॥३२९॥
[१३२]खेषु यद् यद् धरित्र्याञ्च ह्यल्लाहस्यैव तत् समम् । समर्थोऽसौ शरण्यश्च; [१३३]भोजनाः! कामयेत चेत्—॥३३०॥
कुर्यात् परागतान् युष्मान् प्राऽऽगतानितरांस्तथा । समर्थोऽल्लाह एतस्मिन्; [१३४]ऐहिकं लिप्सते तु यः ॥३३१॥
फलं खल्वैहिकं तद् वै पारलौकिकमप्यथ । अल्लाहाऽऽयत्तमेवाऽऽस्ते द्वयं, श्रोता तथेक्षिता ॥३३२॥
सर्वदा वर्त्ततेऽल्लाहः; [१३५]श्रद्धरा न्यायवर्त्मनि । स्थिरास्तिष्ठत भोः! यूयं सन्तोऽल्लाहाय साक्षिणः ॥३३३॥
साक्षिता चेद् विरोधाय चाऽपि कल्पेत नाम सा । युष्माकं वाऽथ बन्धूनां वाऽपि पित्रोस्तथैव वः ॥३३४॥
अधनः सधनो वाऽपि यो हि साक्षीह विद्यते । नेदीयस्तं हि सोऽल्लाहः, न्यायवर्त्मनि नैव च ॥३३५॥
पोष्यन्तां स्वाऽधमाः कामाः प्रमादं चेत् करिष्यथ । भेष्यथाऽपि च यूयं चेज् ज्ञाता ऽल्लाहस्तु वर्त्तते ॥३३६॥
तस्य तस्य समस्याऽपि चरथ यद् यदत्र तु । [१३६]श्रद्धरा धत्थ भोः ! श्रद्धामल्लाहे तस्य वाग्घरे ॥३३७॥
शास्त्रे प्रकाशितं यत्तु तेन चैवात्मवाग्घरे । शास्त्रे तस्मिंश्च यत् पूर्वं त्वितः प्राकाशयद् ह्यसौ ॥३३८॥
अश्रद्धामतनोद् यस्तु ह्यल्लाहे देवतासु च । शास्त्रेषु वाग्घरेष्वस्य चरमाहे तथैव च ॥३३९॥
अध्वनोऽसौ परिभ्रष्टः प्रदूरं यातवान् किल । [१३७]असंशयं हि ये लोकाः श्रद्दधुः परतस्तथा ॥३४०॥
श्रज्जहुः परतश्चैव श्रद्दधुः परतः पुनः । श्रज्जहुः परतश्चैवं ह्युत्तरोत्तरमेव च ॥३४१॥

CC-0. In Public Domain. Digitized by eGangotri

श्रद्धाहान कृतारम्भाः नाल्लाहस्तद्विधान् क्वचित् । क्षंस्यते न तथा ऽध्वानं दर्शयिष्यत्यसंशयम् ॥३४२॥
[१३८]सूच्यन्तां कपटाचाराः कष्टदं तान् प्रतीक्षते । महद् वै हन्त! दौर्भाग्यम्; [१३९]मित्रीयन्ति हि ये जनाः ॥३४३॥
श्रद्विहीनान् विहायाऽमून् श्रद्दधानानिमे नु किम् । मार्गयन्ते हि सम्मानं तद्द्वारेण ? समोऽप्ययम्— ॥३४४॥
मानोऽधिकारभूमिर्वै ह्यल्लाहस्यैव वर्त्तते । [१४०]पूर्वमेव स आदेशं शास्त्रात् तुभ्यमकाशयत् ॥३४५॥
यद् यदाऽपि शृणोषि त्वं ह्यश्रद्धाभावकीर्त्तनम् । परिहासं सनिन्दञ्च तानाऽऽयातान् प्रतीह यान् ॥३४६॥
प्राकाशयद्धि सोऽल्लाहो मोपविश तु तैः सह । यावत् कथान्तरं नैते संक्रामन्त्यविपश्चितः ॥३४७॥
नो चेत् तद् रूपतामेव त्वमप्येष्यस्य संशयम् । असन्देहं हि सोऽल्लाहः कपटाचारिणः समान् ॥३४८॥
दुर्गतौ श्रद्विहीनांश्च समवेतान् करिष्यति । [१४१]कष्टानीच्छन्ति युष्मभ्यं ये हि ते त्वज् जये सति ॥३४९॥
अल्लाहस्य प्रसादेन त्वामित्थं प्रवदन्ति ह । "अभूम त्वत् सहायाः किं वयं नैव" ? तदा पुनः—॥३५०॥
शक्त्याधिक्ये तु वै जाते श्रद्हीनानां वदन्ति ह । अतिष्ठाम न किं युष्मान् परिवृत्य वयं तदा ? ॥३५१॥
अरक्षाम न किं युष्मान् श्रद्धरेभ्यो वयं तथा ? । निर्णयाहे हि सोऽल्लाहो युष्माकं विषये तदा ॥३५२॥
निर्णेष्यति न चाऽश्रद्धान् श्रद्धराणामपेक्षया । दर्शयिष्यति सोऽल्लाहो (जय) मार्गं कदाचन ॥३५३॥
[१४२]प्रतारयितुमल्लाहं चेष्टन्ते मायिनो जनाः । असावेव परन्त्वेषां वञ्चकः परमो मतः ॥३५४॥
प्रार्थनायै यदा सिद्धा भवन्त्येते हि तन्द्रिताः । प्रदर्शनपराः स्तोकं ह्येवाऽल्लाहं स्मरन्ति च ॥३५५॥
[१४३]दोलायन्ते पुनर्मध्ये भ्रष्टाश्चेतस्ततस्तथा । तस्मै त्वञ्चापि नो लब्धुं शक्नोस्यध्वानमत्र तु ॥३५६॥
यमल्लाहः स्वतो मार्गात् च्यावयेत्; [१४४]श्रद्धरा जनाः । शरणंदत्त नोऽश्रद्धान् श्रद्धराणामपेक्षया—॥३५७॥
संचिचीषथ किं यूयं स्पष्टं तर्कं निजद्रुहम् । अल्लाहं समया ? [१४५]नात्र सन्देहो लेशतोऽपि वै ॥३५८॥
मायिनो नारकाग्नीनां कक्षे वत्स्यन्त्यधस्तले । सहायं त्वं न तेषाञ्च कञ्चिदासादयिष्यसि ॥३५९॥
[१४६]तान् विहाय तु वै लोकान् प्रायश्चित्तं हि येऽभजन् । प्रासाधयंस्तथाऽत्मानं दृढं चाऽल्लाहमाधरन् ॥३६०॥
आत्मनः सम्प्रदायेऽपि ह्यल्लाहं खल्वशिश्रियन् । श्रद्धरैः सहगा ह्येते श्रद्धरान् अचिरात् तथा ॥३६१॥
पुरस्कर्त्ता हि सोऽल्लाहः; [१४७]कष्टाविग्नान् विधाय हि । युष्मान् कं लिप्सते लाभं त्वात्मने ब्रूहि स प्रभुः ॥३६२॥
प्रदर्शयत्सु कार्तज्ञं श्रद्धरेषु भवत्सु च । गुणग्राही हि सोऽल्लाहः सर्वविच् चाप्यसौ मतः ॥३६३॥

इति पञ्चमं पारायणम्

इति श्रीसत्यदेववर्मणा कृते सांस्कृते कुराणे पारायणपञ्चकम् ।

अथ षष्ठं पारायणम्

[१४८]नाभिनन्दति सोऽल्लाहो वाक्पारुष्यं कदाचन । तं विहाय तु योऽन्येषां अत्याचारैः प्रपीडितः ॥३६४॥
विज्ञः श्रोता तथा ऽल्लाहः; [१४९]यदि यूयं प्रकाशतः । चरेत भद्रकर्माणि ह्नुवीध्वं तानि वाऽप्यथ ॥३६५॥
क्षमेध्वं वा कृतं दोषं, ह्यल्लाहश्चापि वर्त्तते । क्षमाशीलस्तथा चैव सर्वसामर्थ्यभृत् पुनः ॥३६६॥
[१५०]अल्लाहे वाग्घरेष्वस्य चैवाऽश्रद्धां वितन्वते । अल्लाहे वाग्घरेष्वस्य विच्छित्त्यैं चिकीर्षवः ॥३६७॥
आमनन्ति च ये तावत्—श्रद्दध्मः केषुचिद् वयम् । श्रद्दध्मः केषुचिन्नाि मध्यमार्गमुशन्ति च ॥३६८॥
मार्गितुं यं कमप्यत्र; [१५१]श्रद्विहीना इमे जनाः । एव सत्येन तिष्ठन्ति, ह्येभ्यः सज्जाश्च यातनाः ॥३६९॥
अरुन्तुदा हि तिष्ठन्ति कृताः; [१५२]तान् प्रविहाय तु । ये जनाः श्रद्धयोपेता अल्लाहे वाग्घरेषु च ॥३७०॥
तन्वते न च विच्छित्तिं तयोर्मध्ये, तदीदृशान् । सद्योऽल्लाहः पुरस्कर्त्ता तेषां कर्मफलैः (ध्रुवम्) ॥३७१॥
अल्लाहोऽस्ति क्षमी चैव दयावांश्चापि वर्त्तते । [१५३]शास्त्रिणस्त्वां वदन्तीत्थम् 'तेषु काशय पुस्तकम् ॥३७२॥
प्रत्यक्षं किमपि व्योम्नः, पुरा मूषं तथैव च । अन्वयौक्षुर्महद् हीमे, तमेवं ते तदाऽब्रुवन्— ॥३७३॥
"प्रत्यक्षं दर्शयैवाऽस्मान् तमल्लाहं", ततः परम् । एषां धार्ष्ट्यापराधेन तड़िच् चैषु समापतत् ॥३७४॥
प्रतिष्ठितं पुनर्वत्सं देवत्वेन च ते व्यधुः । यद्यपि स्पष्टलक्ष्माणि ते ऽलभन्तैव तत्पुरा ॥३७५॥
अक्षमामहि तच् चापि मूषाय चाऽप्यददमहि । उपेतं सुप्रभावेण ह्यधिकारमति स्फुटम् ॥३७६॥
[१५४]कारिते वचने चैव तैर्जनैस्तूरपर्वतम् । शीर्षेष्वेषां, वयं तावद् व्यतन्म प्रावदाम च— ॥३७७॥

CC-0. In Public Domain. Digitized by eGangotri

"नमयित्वा स्वशीर्षाणि द्वारादन्तः प्रविश्यताम् । अवोचाम पुनश्चैतान् "नातियात शनैश्चरम् (सब्त)॥३७८॥
सुदृढं पुनरेतांश्च हि प्रत्यज्ञापयाम वै । [१५५]ततश्च स्ववचो भंगादश्रद्धानात् तथैव च ॥३७९॥
अल्लाहाऽऽयातसम्बन्धे, वाग्घराणां विशंसनात् । निरर्थं, कथनाच् चैषां हृदयानि जडानि नः ॥३८०॥
जातानि, वस्तुतो ऽल्लाहो ह्न्ध्येषां सममुद्रयत् । अश्रद्धाकारणादेव, श्रद्धरास्ते भवन्त्यतः ॥३८१॥
केषुचिद् विषयेष्वेव; [१५६]ह्यश्रद्धानात् तथैव च । मर्यमाया विरोधे च तेषां तत्तद् विवेचनात् ॥३८२॥
यत् परीवाद सम्भारात् सम्भृतं समजायत । [१५७]घोषणाच् चेदमेतेषां अल्लाहस्य हि वाग्घरम् ॥३८३॥
मर्यमाऽपत्यमीशं वै व्यशंसाम वयं किल । यद्यप्येते न खल्वेनं व्यशंसन् न तथैव च ॥३८४॥
शूलमारोपयंश्चैव भ्रमगर्त्ते ऽपतंस्त्विमे । सन्दिहाना ध्रुवं चैते नाऽदो ये मन्वते मतम् ॥३८५॥
नाऽन्यज् जानन्ति ते किंचित् कल्पना दोलानदृते । वाग्घरं ते हि नैवाऽघ्नन् सन्देहो नात्र विद्यते ॥३८६॥
[१५८]प्रत्युतैनं तु सोऽल्लाहो ह्युद्दधारात्मनात्मने । प्रभुत्वात् शालतेऽल्लाहस्तत्वदर्शी तथाप्यसौ ॥३८७॥
[१५९]प्रागमुष्य तथा मृत्योरमुं न श्रद्दधीत हि । शास्त्रिणां कोऽपि नो तावद् द्रक्ष्यते पुरुषो भुवि ॥३८८॥
साक्ष्ययं भविता चैषां पुनरुत्थापनाऽह्नि । [१६०]वैधमासीत् पुरा यत्तु तदवैधमकृष्महि ॥३८९॥
भद्रञ्चाप्यपराधानां याहूदानान्तु कारणात् । प्रभोर्मार्गविरोधाच् च प्रायशस्तैस्तथैव च ॥३९०॥
[१६१]वृद्धार्था ऽऽस्वादनाच्चैषां प्रतिषेधे कृतेऽपि च । अवैधेन च रूपेण लोकार्थग्रसनात् तथा ॥३९१॥
अकृष्महि वयं त्वित्थं, सज्जिता अथ यातनाः । साभीलाः पुनरस्माभिः तेभ्योऽश्रद्धास्तु सन्ति ये ॥३९२॥
[१६२]प्रौढा ये तु पुनर्ज्ञाने श्रद्धराः सन्त एव च । तस्मिन् श्रद्दधते यद्धि त्वय्यस्माभिः प्रकाशितम् ॥३९३॥
प्रकाशितञ्च यत् पूर्वं त्वत्तः, ये चाऽपि साग्रहाः । प्रार्थनायां, प्रदातारो दरिद्रेभ्यस्तथैव च ॥३९४॥
अल्लाहे चरमाहे च ये च श्रद्दधते पुनः । एत एव हि ते सद्यो यान् वयं गुरुभिः फलैः ॥३९५॥
पुरस्कृतान् विधास्यामः; [१६३]तुभ्यं तद्वदकुर्म च । दिव्यान् वयं हि संकेतान् नहुषाय यथैव च ॥३९६॥
वाग्घरेभ्यश्च संकेताः कृता दिव्यास्ततो यथा । अब्रह्मायास्मयेडाय तथेष्वासाय चाऽप्यथ ॥३९७॥
याप्यकूपाय सापत्यं जवायेशाय चाप्यथ । हारदूनशिलामानयवनेभ्योऽप्यकुर्म च ॥३९८॥
दिव्यान् वयं हि संकेतान् सामाऽदद्म वयं पुनः । दानोधाय तथा चैव; [१६४]वाग्घराःसन्ति केऽपि ते ॥३९९॥
वर्णिता ये मया तुभ्यं पूर्वमेव तथाऽपि ते । सन्ति केऽपि मया तुभ्यं नाऽपि ये सन्ति वर्णिताः ॥४००॥
प्रत्यक्षं मूषमल्लाहः समभाषत; [१६५]वाग्घराः । शुभोदन्तस्य दातारः सावधानकरास्तथा ॥४०१॥
प्रैष्यन्त वाग्घराः सृष्ट्वा यल्लोका वाग्घराननु । अल्लाहाऽपेक्षयाऽ दोषा वयं, नो तर्कयन्त्विति ॥४०२॥
प्रभुत्वात् शालते ऽल्लाहः तत्वदर्शी तथाप्यसौ । [१६६]साक्ष्यल्लाहः स्वतस्तावत् त्वयियत् स त्वकाशयत् ॥४०३॥
स्वेन ज्ञानेन तत् सर्वं, देवाश्चैवाऽपि साक्षिणः । अल्लाहस्यैव साक्षित्वं पर्याप्तं यद्यपीह तु ॥४०४॥
[१६७]असन्देहं हि ये लोकाः श्रद्विहीनास्तथैव च । अल्लाहस्याऽध्वनो ऽरुन्धन् दवीयो यान्ति ते जनाः ॥४०५॥
भ्रष्टा मार्गात्; [१६८]असन्देहं श्रद्विहीना हि ये ऽभवन् । अत्याचारपराश्चैव क्षंस्यतेऽमून् कदाचन ॥४०६॥
नैवाऽल्लाहो न चाऽध्वानं दर्शयिष्यति तान् क्वचित् । [१६९]ऋते वै नारकान्मार्गात् सदा वत्स्यन्ति यत्र ते ॥४०७॥
आर्जवं वर्त्तते ह्यत्र खल्वल्लाहाय सर्वथा । [१७०]सत्यमादाय युष्माकं प्रभोः पार्श्वात् तु वाग्घरः ॥४०८॥
युष्मानाऽऽयात एतस्मात् श्रद्धत्त श्रेयसे जनाः । युष्माकमेतदत्राऽस्ति, श्रद्हीनाश्चेद् भविष्यथ ॥४०९॥
खेषु यद् यद्—धरित्र्याञ्च ह्यल्लाहस्यैव तत् समम् । ज्ञाता तत्वस्य दर्शी च ह्यल्लाहः परमो मतः ॥४१०॥
[१७१]शास्त्रिणः ! नैव मर्यादां स्वमते क्राम्यत क्वचित् । सत्यादृते न चाऽल्लाहमन्तरा ब्रूत किञ्चन ॥४११॥
मर्यमाया हि पुत्रोऽसौ मिसीहः खलु वाग्घरः । अल्लाहस्य ततो भिन्नो न किञ्चिद् वर्त्तते किल ॥४१२॥
वागेका पुनराल्लाही मर्यमायै च यामसौ । प्राहिणोत् स ततो ऽल्लाहादात्मैकोऽवर्त्तत ध्रुवम् ॥४१३॥
वाग्घरेष्वस्य चाल्लाहे यूयं श्रद्धत्त तेन भोः ! । वदत नाऽपि खल्वेतत् "त्रयस्ते" संनियम्यताम् ॥४१४॥
आत्मा, युष्माकमेवैतत् सुहिताय भविष्यति । अल्लाहस्त्वेक एवेष्टो महिमानममुष्य च ॥४१५॥
क्षपयेत् प्रोच्यतेऽदश्चेत्—"पुत्रः कोऽप्यस्य वर्त्तते" । खेषु यद् यद् धरित्र्याञ्च ह्यल्लाहस्यैव तत् समम् ॥४१६॥
रक्षितृत्वेन चाऽल्लाहः समर्थः पुनरात्मना । [१७२]मिसीहः 'बन्धको वर्त्ते' ह्यल्लाहस्येति न क्वचित् ॥४१७॥

CC-0. In Public Domain. Digitized by eGangotri

तिरस्कर्त्ता, दयाभाजो नाऽपि देवास्तथैव च । मन्यते यस्तिरस्कार्यं तत्प्रणामं पुनस्तथा ॥४१८॥
जायते साभिमानश्च सर्वांस्तान् समया निजम् । समवेतान् हि सोऽल्लाहः करिष्यत्येव (निश्चितम्) ॥४१९॥
[१७३]श्रद्दधानास्तु ये लोका न्यायवर्त्मपरास्तथा । पूर्णां पुरस्क्रियां तेभ्यो ऽल्लाहो दास्यति चाप्यथ ॥४२०॥
ततश्चाऽभ्यधिकां तेभ्योऽनुग्रहात् स प्रदास्यति । सदर्पान्त्सतिरस्कारान् असौ तु दण्डयिष्यति॥४२१॥
यातनाभिः सकृच्छ्राभिः; [१७४]नाल्लाहमन्तरेण ते— । सहायं रक्षकं मित्रं लप्स्यन्ते वा कुतश्चन ॥४२२॥
[१७५]लोकाः ! युष्मत् प्रभोः स्पष्टं प्रमाणं सविधे हि वः । प्राप्तं, प्रत्यक्षमालोकं वयं युष्मांस्तथा प्रति ॥४२३॥
प्रासारयाम किञ्चाऽपि; [१७६]ह्यल्लाहे श्रद्धरास्तु ये । संयुक्तास्तेन ये चैव सद्यस्तान् वेशयिष्यति ॥४२४॥
अनुग्रहे दयायाञ्च स्वस्यां, संदर्शयिष्यति । सरलाध्वानमप्येतान् सोपानं ह्यात्मलब्धये ॥४२५॥
[१७७]जिज्ञासन्ते समादेशं त्वत्तस्तान् ब्रूहि—"खल्वसौ । तामधिकृत्य वै व्यक्तिं निरपत्या तु या भवेत् ॥४२६॥
पितृभ्याञ्चापि या हीना ह्यल्लाहो वो दिशत्यदः । म्रियेत निरपत्यश्चेत् सोदराऽस्य भवेद् यदि ॥४२७॥
रिक्थसाम्यंशभाक् सा स्यात्, अनपत्या तु सोदरा । मृता चेत् अंशभाक् सोऽपि, भवेतां सोदरे यदि ॥४२८॥
त्रयाणां द्व्यंशभाजौ ते रिक्थस्य, बान्धवा यदि । स्त्रियः स्युः पुरुषाश्चैव, स्त्रियोर्भागसमांशताम्—॥४२९॥
पुरुषोऽर्हति खल्वेको; ऽवर्णयद् विशदं प्रभुः । समादेशान् हि युष्मभ्यम्, स्खलिताऽपोहनाय वः ॥४३०॥
विजानाति हि सोऽल्लाहो यत् किञ्चिद् विद्यते त्विह ।

योगः—४३०॥

CC-0. In Public Domain. Digitized by eGangotri

५

सूक्तम्–आहारपोठिका

(अल-माइदा)

(मदहीनावतीर्णा विंशत्युत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]बन्धनानि प्रतिज्ञाश्च श्रद्धराः ! पूर्णरूपतः । पालयताऽथ युष्मभ्यं पशवो हि चतुष्पदाम्— ॥ १ ॥
कृता वैधा विहायाऽथ वक्ष्यामो यांस्तथैव च । मृग्यान् वैधान् न वै वित्त तीर्थयात्रा दशासु तु ॥ २ ॥
आदिशत्यत्र सोऽल्लाहः कामयेत यथैव सः । [2]अल्लाहस्य प्रतीकानि निन्दिष्ट श्रद्धराः ! तु मा ॥ ३ ॥
पवित्रं नाऽपि वा मासं मालाश्चोपायनानि च । पवित्रं वेश्म यातश्च लिप्सूनल्लाहतः कृपाम् ॥ ४ ॥
तत्प्रसादञ्च; त्यक्त्वाऽथ गता यूयं यदा भुवम् । पावनीं, खलु गच्छेत च्छन्दतो मृगया कृते ॥ ५ ॥
ये (कदाचित्) तथा युष्मानरुन्धन् यानतत्परान् । अनिन्द्यं वेश्म पूजायाः घृणा तज्जा न चाऽपि वः— ॥ ६ ॥
मर्यादोल्लंघने हेतुर्भवेत्, यूयं तु प्रत्युत । सत्यस्य पालने चैव सद्धर्माचरणे पुनः ॥ ७ ॥
विधताऽ न्योन्यसाहाय्यं, विधत्त न पुनःक्वचित् । मर्यादोल्लंघने किञ्च पापकर्मणि चाप्यथ ॥ ८ ॥
बिभीत यूयमल्लाहात्, दण्डदाने तु निष्ठुरः । असन्देहं हि सोऽल्लाहः; [3]निषिद्धं खल्विदं तु वः— ॥ ९ ॥
मृतो रक्तं च मांसं च शूकरस्याऽन्तरेण च । अल्लाहं पुनरन्यस्य नामोच्चारात्तु योऽर्पितः ॥१०॥
कण्ठपाशान्मृतो यश्च ताडनाभिश्च यो मृतः । उच्छ्रायात् पतनाच्चैव श्रृंगाघातान्मृतश्च यः ॥११॥
हिंसकैः पशुभिर्यश्च भित्वाऽत्तोऽप्यथवा भवेत् । तं विहाय य आघातान्मारकात्तु हतो भवेत् ॥१२॥
हतो वा यो भवेत् किञ्च केनचिन्मूर्त्तिधामनि । इषूणामथ सञ्चारात् भाग्यस्य यत् परीक्षणम् ॥१३॥
तदाऽज्ञोल्लंघनं तावत्; श्रद्विहीनास्तु ये जनाः । निराशास्तेऽद्य वै जाता युष्माकं यन्मतं ततः ॥१४॥
विभीत न परं तेभ्यो विभीताऽस्मत् तु प्रत्युत । त्वदर्थे त्वन्मतं ह्यद्य पूर्णितं वर्त्तते मया ॥१५॥
पूर्णताञ्चाऽद्य वै नीतोऽनुग्रहस्त्वत् कृते मया । आत्मार्पणत्वमद्याऽहं मतं तुभ्यमरोचयम् ॥१६॥
यः क्षुधापीडितः पापं कर्त्तुं तावद् व्यवस्यति । न सामान्येच्छया त्वेव ह्यल्लाहो नाऽत्र संशयः ॥१७॥
क्षमाशीलो दयालुश्च (तदर्थं वर्त्तते ध्रुवम्) । [4]ते त्वां पृच्छन्ति—किं तेभ्यो वैधं दिष्टम् ? अमून् वद ॥१८॥
वस्तुजातन्तु यद् भद्रं युष्मभ्यं वैधमेव तत् । ये पुनर्जन्तवः सिद्धा मृगयायां सहायिनः ॥१९॥
रक्षिताः खलु ये सिद्धा युष्माभिश्चैव शिक्षिताः । अल्लाहेन यथा यूयं, तेषामाखेटितं किल—॥२०॥
उच्चार्यऽल्लाहनामाऽत्तं, विभीताऽल्लाहतस्तथा । असंशयं हि सोऽल्लाहः शीघ्रं लेखाकरो मतः ॥२१॥
[5]वस्तुजातन्तु यद् भद्रं युष्मभ्यं वैधमद्य तत् । शास्त्रिणां भोजनं वैधं युष्मदर्थं तथैव वः— ॥२२॥
वैधं तेभ्यः, स्त्रियश्चापि श्रद्धराणां भवन्ति हि । वैधा युष्मद् विवाहाय, शास्त्रं येप्यलभन्त च— ॥२३॥
पुरा, वैधाः स्त्रियस्तेषां महर्घस्य प्रदानतः । स्वीकृता ह्युपयामेन व्यभिचारो न वा पुनः— ॥२४॥
रहो रागो विधातव्यस्ताभिस्सार्धं कथञ्चन । यो जहातीह वै श्रद्धां मोघं तत् चेष्टितं समम् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

हार्नि गच्छत्सु लोकेषु परलोकान्करेण च । स चात्येकतमो भावी; [६]श्रद्धराः प्रार्थना कृते— ॥२६॥
जायमाने समुत्थाने निजाऽस्यं खलु धावत । हस्तौ कफोणि—पर्यन्तौ सम्यग् यूयं च धावत ॥२७॥
क्लेदयित्वा शिरश्चैव (हस्ताभ्यां) तत् प्रमृन्यताम् । गुल्फान्तौ च निजौ पादौ धावनीयौ, ततो यदि— ॥२८॥
अशौचः स्यात् तदा शौचं कार्यं, स्याच्चेत् ज्वरोऽथवा । यात्रा स्याद् वा मलोत्सर्ग· कृतः स्यादथवा स्त्रियः ॥२९॥
स्पृष्टास्स्यु र्न जलप्राप्तिर्भवेच्चेत् पावनं स्थलम् । गत्वा ततो मुखं पाणी तेन प्रमृज्यतां पुनः ॥३०॥
कष्टं वेशयितुं युष्मान् नैवाऽल्लाहः प्रतीच्छति । पवितुं तु परं युष्मान्, निजानुग्रहमेव च— ॥३१॥
पूलयितुं हि युष्मासु कृतज्ञाः स्यात येन वै । यूयं तस्य, प्रतीच्छा ऽस्य; [७]ह्यल्लाहाऽनुग्रहं च तम् ॥३२॥
कृतं युष्मासु ताञ्चैव प्रतिज्ञां स्मरत स्थिरान् । अकार्षीद् हि यया युष्मान् अवादिष्ट यदाऽथ च - ॥३३॥
"श्रुतञ्चैव मतञ्चैव खल्वस्माभिः" बिभीत भोः । अल्लाहात् खलु सोऽल्लाहो हृत्स्थं चैवाऽपि बोधति ॥३४॥
[८]अल्लाहाय स्थिरा न्याये श्रद्धराः प्रतितिष्ठत । साक्षिणः सन्नये सन्तः, दलैकेन च शत्रुता— ॥३५॥
उत्क्रामयेन् न वा युष्मान् न्याय्यान्मार्गात् कदाचन । न्यायं विधत्त खल्वेतत् धर्माचारेण संगतम् ॥३६॥
बिभीत यूयमल्लाहात् अल्लाहो वेत्ति तत्समम् । यद् यद् यूयं विचेष्टध्वे; [९]ये जनाः श्रद्धरा इह— ॥३७॥
भद्रकार्येषु लीनाश्च प्रतिजानाति तै स्समम् । अल्लाहः, क्षंस्यते तान् वै पुरस्कर्त्ता महत्तथा ॥३८॥
[१०]श्रद्विहीनास्तु ये तावत् निषेधन्ति तथैव च । मामकान् पुनरायातान् त एव नरकाभिगाः ॥३९॥
[११]श्रद्धराः ! ध्यात युष्मासु ह्यल्लाहानुग्रहस्तु यः । युष्माकं त्वभिघाताय दलैकं प्राहिणोद् भुजान्— ॥४०॥
यदाऽ, ल्लाहस्तदाऽरौत्सीत् युष्मास्वापततो भुजान् । बिभीत यूयमल्लाहात्, विश्वस्तव्यस्सदैव च— ॥४१॥
श्रद्धरैः केवलो ऽल्लाहः; [१२]ह्रीश्वरालीन सन्ततिम् । आश्रावयद् दृढं चैव ह्यल्लाहोऽथ न्ययुञ्जम च— ॥४२॥
द्वयुत्तरान् दशमुख्यान् वै वयं तेषां, तथाऽह च । अल्लाहस्तान्—भवाम्येष सहस्थोऽहन्तु वो यदि— ॥४३॥
पूजां प्रतिष्ठितां यूयं दानं चैव करिष्यथ । वाग्घरेषु मदीयेषु यदि श्रद्धां करिष्यथ ॥४४॥
साहाय्यं चैव चेत् तेषां यदि यूयं विधास्यथ । उत्तमर्णेन चाऽल्लाहं यदि संभावयिष्यथ ॥४५॥
दुरितानि परासिष्ये युष्मद् विश्वानि वै ततः । वेशयिष्याम्यसन्देहं तद्विधोपवनेषु च ॥४६॥
स्रवन्त्यः पार्श्वतो यत्र भविष्यन्ति हि निम्नगाः । इतस्तूर्ध्वं च युष्माकं योऽप्यश्रद्धां करिष्यति ॥४७॥
वस्तुतोऽसौ परिभ्रष्टः सुपथो हि भविष्यति । [१३]प्रतिज्ञाभंगदोषाच्च वयं तान् धिगकृष्महि ॥४८॥
कर्कशानि तथा हृन्दि वयं तेषामकृष्महि । प्रसंगात् ते हि वै शब्दान् च्यावयन्ति तथैव च ॥४९॥
स्मारिता येन ते तस्य व्यस्मरन् कांश्चिदंशकान् । त्वं निरन्तरमेतेषां यां हि काञ्चित् प्रवंचनाम् ॥५०॥
भोत्स्यसे ह्येव, ते तेषां केचनैव हि तादृशाः । वञ्चनां ये न कुर्वन्ति, त्वं क्षमस्वैव तान् ननु ॥५१॥
मा प्रमादेषु चैतेषां ध्यानं देहि कथञ्चन । स्निह्यत्यसंशयं तेभ्यः सोऽल्लाहो ये दयालवः ॥५२॥
[१४]आश्रावयाम तांश्चापि सुदृढं ये ऽब्रुवन् – "वयम् । ईशानुयायिनो हि स्मः" व्यस्मरन् हि परन्त्वमी— ॥५३॥
स्मारिता येन तस्यैकं कञ्चिदंशं, ततो वयम् । अकाष्र्मोद्भावितं वह्निं तेषु द्वेषस्य खल्वथ— ॥५४॥
वैमनस्यस्य किञ्चाऽपि पुनरुत्थापनाऽवधि । बोधयिष्यति चाऽल्लाहो यत्तेऽकुर्वंञ्च तान् द्रुतम् ॥५५॥
[१५]शास्त्रिणः ! समुपेतो वो वाग्घरो नस्तथैव च । युष्माभिर्निह्नुतं शास्त्रात् यद् यत्तत्तदसौ पुनः ॥५६॥
व्याचष्टे हि तथा युष्मान् प्रसंगान् सुवहूनथ । प्लवते चा,प्युपेतश्चाल्लाहादधुना तु वः ॥५७॥
प्रकाशो विशदञ्चैव शास्त्रं चैवा (प्यसंशयम्) । [१६]तद् द्वारेण हि सो ऽल्लाहः शान्तिमार्गप्रदर्शनः ॥५८॥
कांक्षते तत्प्रसादं यस्तस्मै लोकाय (निश्चितम्) । गमयतीदृशान् लोकान् निजादेशेन खल्वथ ॥५९॥
ज्योतींषि तमसोऽपोह्य किञ्च संदर्शयत्यपि । अध्वानं तानृजुं तावत्; [१७]श्रद्धाऽऽघातं हि ते व्यधुः ॥६०॥
येऽवदन् खलु सो ऽल्लाहो ह्येव तावत्तु वाग्घरः । मर्यमायाः सुतः सत्यं, ब्रूहि त्वं—कस्य योग्यता—॥६१॥
प्रतिरोद्धुं तमल्लाहं यद्युद्धत्तुं स कांक्षताम् । वाग्घरं मर्यमाऽपत्यं तत्प्रसूं यच्च तिष्ठति— ॥६२॥
धरित्र्यां तत् समं चापि; धरित्र्या वियतां तथा । मध्यगस्य तयोश्चापि राजा ऽल्लाहोऽखिलस्य वै—॥६३॥
यत् स कामयते तद् वै जनयत्यप्यसौ पुनः । सर्वसामर्थ्यभृत् चासावल्लाहो वर्त्तते तथा ॥६४॥
[१८]याहूदाहा वदन्त्येतत् हीशानुयायिनस्तथा । "अल्लाहस्य वयं पुत्राः प्रेष्ठास्तस्य तथैव च ।" ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

ब्रूहि तान्—स कथं युष्मान् युष्माकं पापकारणात् । दण्डयति तदेवं चेत्, नैतत्, यूयं तु मानवाः ।।६६।।
असृजद् यानसौ, यं सः कामयेत क्षमेत हि । पीडयेद् वा यथाकामं, धरित्र्या वियतां तथा ।।६७।।
मध्यगस्य तयोश्चापि राजाऽल्लाहोऽखिलस्य वै । यात्रान्तः सैष चैवाऽस्ते सर्वेषां (नात्र संशयः) ।।६८।।
[19]शास्त्रिणः ! वाग्धराऽऽयानक्रमस्य मान्द्यमुत्तरम् । उपेतो वाग्धरो युष्मान् अस्माकं, यः प्रभाषते— ।।६९।।
व्याख्यया (ऽस्मत् समादेशान्, ब्रुवीध्वं येन नो क्वचित् । समायातो न वै कश्चित् चेतयितुं, न वा पुनः ।।७०।।
बोधयितुं शुभं वृत्तं ह्यस्मान्, यूयं प्रपश्यत । शुभस्य सूचकश्चापि चेतकश्चाप्युपागतः— ।।७१।।
युष्मान्, किञ्चाऽथ सो ऽल्लाहः सर्वसामर्थ्यभृत् किल । [20]यदा चैवात्मनो लोकान् मूष इत्थमभाषत— ।।७२।।
मद् वंश्याः ! स्मरताऽऽल्लाहं कृतं युष्मास्वनुग्रहम् । युष्माकं प्रससर्जाऽसौ वाग्धरान् अथ चाऽकृत ।।७३।।
युष्मान् प्रशासकान् किञ्च युष्मभ्यं तददत्त वै । नान्यस्मै खलु यल्लोके कस्मैचिच्चाप्यदीयत ।।७४।।
[21]मद् वंश्याः ! पावनीं भूमिं यूयं विशत, वो हि या । अल्लाहेन समादिष्टा, मा परापतत क्वचित् ।।७५।।
अन्यथा तद्धि युष्माकं कल्पिष्यते हि हानये । [22]अवोचंस्ते तु—भोः मूष ! तस्यां भूमौ वसन्ति हि ।।७६।।
महाशक्ता जनास्तेन वयं नैवोत्सहामहे । गन्तुं तत्र न यावत्ते निर्गच्छन्ति ततः किल ।।७७।।
वयं गच्छेम सत्यं चेत् ते निर्गच्छन्ति वै ततः । [23]विभ्यतां द्वौ नरौ तत्र ह्यल्लाहानुग्रहं गतौ— ।।७८।।
ऊचतुः—विशतान्तर्वै द्वाराद् यातुं हि तानभि । कृते द्वारात् प्रवेशे च जयो युष्माकमेव च ।।७९।।
यूयं विश्वसिता ऽल्लाहं भवथ श्रद्धरा यदि । [24]प्रत्यवोचन्—अये मूष ! वयं नैवोत्सहामहे ।।८०।।
प्रवेष्टुं तत्र यावत्ते समासीना हि तत्स्थलम् । गच्छतां किञ्च युध्येतां त्वञ्च त्वच्चाप्यसौ प्रभुः ।।८१।।
वयं त्वत्रैव तिष्ठामः; [25]ह्याह मूषः—मम प्रभो ! । भ्रातरं च तथाऽऽत्मानमृते नान्यत्र मे वशः ।।८२।।
व्यङ्धि तन् माममीभ्यस्तु विधेया नो भवन्ति ये । [26]असावाह "वरं, भूमिरप्रवेश्या कृता मया ।।८३।।
चत्वारिंशत् समाभ्यो वै, ह्येभिरेषाऽथ खल्विमे । अटाटिष्यन्त उद्भ्रान्ता यत्र कुत्रचिदेव च ।।८४।।
मा शुचस्त्वमिमान् लोकान् अवज्ञाकारिणः पुनः । [27]पुत्रयोरादिमर्स्यतान् ब्रूहि सत्येन संकथाम् ।।८५।।
तावुपाहरतां यद्धि बलिं सोऽन्यतरस्य तु । स्वीकृतोऽभून्न चान्यस्य स्वीकृतोऽभूत्तु सर्वथा ।।८६।।
तयोराह—हनिष्यामि त्वामहं, प्रत्युवाच सः । "स्वीकरोति बलिं तेषामेवा ऽल्लाहस्तु ये जनाः ।।८७।।
ततो बिभ्यति; [28]किञ्चाऽथ चेत् त्वं मां हन्तुमुद्यतः । सारयिष्यसि दोषं स्वां मामभि न हि खल्वहम् ।।८८।।
सारयिष्यामि दोषं स्वां त्वामभि, प्रविभेम्यहम् । अल्लाहाद् यः प्रभुस्तावद् जगतां वर्त्तते किल ।।८९।।
[29]कामये त्वं निजाऽघञ्च ममाऽघञ्च समुद्वह । निजेनैव हि शीर्षेण स्या यथाऽनलवासिनाम् ।।९०।।
एतदेव फलं यद् वै जाल्माः प्राप्स्यन्ति कर्मभिः । [30]तन्मनो भ्रातृहत्यायै तं सुसज्जं व्यधत्त च ।।९१।।
अहंस्तं तु ततश्चासौ, बभूवान्यतरस्तथा । उद्यतानां स्वपक्षस्य हानये (मूढताऽश्रितः) ।।९२।।
[31]वायसं त्वेकमल्लाहः प्रैषयत् तदनन्तरम् । यो ऽखनद् दर्शनायाऽस्य भूमिं स्याद् गोपनं कथम्— ।।९३।।
सोदरस्य शवस्याऽथ प्राह—"धिङ् मां तु नाऽप्यहम् । गुणैः काकसमश्चापि कुर्यां यन्निह्नवं क्वचित् ।।९४।।
शवस्य सोदरस्यापि", सलज्जश्चाऽभवत् ततः । [32]ईश्वरालीनसन्तत्यै वयं तेनाऽलिखाम यत्— ।।९५।।
"योऽत्र कंचिन् नरं हन्ति कारणेनेतरेण वै । कलहोत्पादनं भूमौ, कृतं पूर्वं वधं तथा ।।९६।।
विहायाऽसौ समग्रान् हि मनुष्यान् इव हन्ति वै । यः पुनर्जीवनं प्रादाद् तस्मै तन्मन्यतां यथा ।।९७।।
प्रादादसौ समग्रेभ्यो मनुष्येभ्यो हि जीवनम् । अस्माकं समुपेतास्तान् वाग्धराः स्पष्टलक्ष्मभिः ।।९८।।
तेषां ततोऽपि बाहुल्याद् लोका लोके तथाविधाः । मर्यादां ये समुल्लंघ्य प्रवर्त्तन्ते क्रियासु वै ।।९९।।
[33]अल्लाहेन तु युध्यन्ते वाग्धरेणास्य चैव ये । धरित्र्यां ये विचेष्टन्ते कलहोत्पादनाय च ।।१००।।
दण्डं तेभ्य इदं ह्येव दुर्दशां प्रापिता हि ते । हताः स्युः, रोपिताः शूल्यां भवेयुर्वा, ऽथवा पुनः ।।१०१।।
हस्तपादं विपर्यस्तं तेषां कृत्तं भवेत् किल । देशाद् वहिष्कृता वा स्युः, दण्डः सांसारिकस्त्वयम् ।।१०२।।
लोके परत्र चैतेभ्योऽरुन्तुदाः सन्ति यातनाः । [34]प्रभावारोपणात् त्वत्तः पूर्वं येऽन्वतपन् जनाः ।।१०३।।
विद्धि तद् विषये ऽल्लाहो दयावांश्चाप्यति क्षमी । [35]विभीत यूयमल्लाहाद् यतध्वं श्रद्धरास्तथा ।।१०४।।
तत् प्राप्तेरयनं लब्धुं यायत्यध्वं तथैव च । तन्मार्गेण यथाशीघ्रं साफल्यमधिगच्छत ।।१०५।।

CC-0. In Public Domain. Digitized by eGangotri

[३६]श्रद्धा त्यक्ता तु यैर्लौकैस्ते यदीच्छन्ति रक्षितुम् । आत्मनो यातनाभ्यो वै पुनरुत्थापनाहनि ॥१०६॥
अर्पयित्वा यदप्यस्ति धरित्र्यां तैरधिकृतम् । ततश्चाप्यधिकं दत्वा रक्षामिच्छन्ति वाऽऽत्मनः ॥१०७॥
तदप्येषां धनं तेभ्यो नो ह्येव स्वीकरिष्यते । यातनाः परमेतान् वै प्रतीक्षन्ते ह्यरुन्तुदाः ॥१०८॥
[३७]एषिष्यन्ति वयं त्राता भवेम (निरया) ग्नितः । शक्ष्यन्ति न परं त्रातुं स्थिरा एभ्यस्तु यातनाः ॥१०९॥
[३८]पुमान् स्तेनो भवेत् स्त्री वा तेषां कर्मानुरूपतः । दण्डरूपेण शिक्षार्थं ह्यल्लाहात् कर्त्यतां करः ॥११०॥
प्रभुत्वात् शालतेऽल्लाहस्तत्वदर्शी तथाप्यसौ । [३९]दोषान् कृत्वा जनो योऽत्र पश्चात्तपति निश्चितम् ॥१११॥
दयिष्यते तमल्लाहो ह्यल्लाहः सदयः क्षमी । [४०]किन्न विथ धरित्र्याश्च वियतां राज्यमप्यथ ॥११२॥
अल्लाहस्यैव तत् सर्वं तुदेद् वाऽपि क्षमेत वा । यथाऽयं कामयेतासौ सर्वसामर्थ्यभृत् प्रभुः ॥११३॥
[४१]मोद्विजस्त्वं निजात्मानं तेषां वाग्घर ! कारणात् । अविश्वासाय चेष्टन्तेऽहमहमिकया हि ये ॥११४॥
ये मुखादात्मनस्त्वाहुस्तेषां "श्रद्दध्महे वयम्" । तेषां यद्यपि सत्येन श्रन्न हृत्सूपजायते ॥११५॥
याहूदाहाश्च ये तेषामजायन्त जनाः पुनः । योजयन्ति श्रवान् श्रोतुं केवलासत्यभाषणम् ॥११६॥
नोपयन्ति पुनर्ये त्वां तेभ्यः शृण्वन्ति ते तथा । प्रसंगान् निश्चितात् चापि शब्दान् दूरे क्षिपन्ति च ॥११७॥
वदन्तीत्थम्—यदीदं स्याल्लब्धं ग्राह्यं न चेदिदम् । रक्षणीयो निजो, ऽल्लाहो ह्येव क्षेप्तुं यदीच्छति ॥११८॥
कञ्चित् पापविपत्तौ तत् त्वञ्चापि नैव शक्ष्यसि । अल्लाहाभिमुखं किञ्चित् चेष्टितुं तस्य वारणे ॥११९॥
एते ते हि जना येषां हृन्यल्लाहः कथञ्चन । नो पुपूषति, संसारे प्रतीक्षन्तेऽवमाननाः ॥१२०॥
एतान् लोके परस्मिश्च यातना अत्यरुन्तुदाः । [४२]योजयन्ति श्रवान् श्रोतुं केवलासत्यभाषणम् ॥१२१॥
अवैधं धनमादाय भोक्तुकामा भवन्ति च । उपेयुस्त्वान्तु यद्येते समाधानं प्रयच्छ वा ॥१२२॥
उपेक्षस्व पुनः किम्वा, त्वयैते यद्युपेक्षिताः । हानये ते न शक्ष्यन्ति किंचनाऽपि, परं यदि— ॥१२३॥
समाधानोद्यतः त्वं स्या न्यायपूर्वं विधेहि तत् । स्निह्यति न्यायिलोकेभ्यो ह्यल्लाहो निश्चितंत्विदम् ॥१२४॥
[४३]निर्णयायोपयन्ति त्वां कथमेते तु बिभ्रति । पूर्वतो ह्येव तौरातं यत्राल्लाहस्य निर्णयाः ॥१२५॥
पराङास्यास्ततोऽप्येते श्रद्धरा नो कथञ्चन । [४४]प्राकाशयाम तौरातं वयं यन्मार्ग—दर्शकम् ॥१२६॥
यत् प्रकाशश्च, ये तावद् विधेया वाग्घरा हि ते । याहुदाह (समस्याना) मकुर्वन् निर्णयं किल ॥१२७॥
तदेवाश्रित्य धर्मज्ञा ये च धर्माधिकारिणः । यतः संरक्षकास्ते वै ह्यल्लाहपुस्तकस्य हि ॥१२८॥
कल्पिता अभवन्नासन् साक्षिणोऽस्य च यन्त भोः ! । यूयं बिभीत लोकेभ्यः परं मत्तो बिभीत तु ॥१२९॥
विक्रीणीत न चायातान् अल्पमूल्येन मामकान् । प्राकाशयद् यदल्लाहस्तदालम्ब्य न ये जनाः ॥१३०॥
निर्णयन्ति त एवैते श्रद्विहीनाः प्रकीर्त्तिताः । [४५]आदिशाम वयं तेन तस्मिन् तानिदमप्यथ ॥१३१॥
प्राणानां कारणात् प्राणाः चक्षुषः चक्षुरप्यथ । नासायाः कारणान्नासा कर्णः कर्णस्य कारणात् ॥१३२॥
दतो दन्तश्च योऽपि स्याद् घातश्चान्यो द्विषत् कृतः । तत् समो हि प्रतीकारः, क्षमेत यः परं द्विषम् ॥१३३॥
अनुष्ठेयं भवेत् तेन प्रायश्चित्तं तु तत् कृते । निर्णयं यस्तु नो कुर्याद् यदल्लाहेन काशितम् ॥१३४॥
तत् समालम्ब्य हीदृक्षा जना एवात्र पापिनः । [४६]एषां पदानुयानाय प्रैषयाम वयं ततः ॥१३५॥
मर्यमापत्यमीशं वै योऽभवच् च समर्थकः । प्राक्तनस्य प्रकाशस्य ह्यथेञ्जीलमदाम च ॥१३६॥
अस्मै यदध्वसंदर्शि प्रकाशञ्चापि विद्यते । प्राक्तनं पुस्तकं यच् च स्वतः पुष्णाति सर्वथा ॥१३७॥
विभ्यतीह तु ये ऽल्लाहात् तेभ्यो यच् चोपदेशनम् । मार्गसन्दर्शनं चापि; [४७]य इञ्जीलानुयायिनः ॥१३८॥
तेषां कर्त्तव्यमेतद्धि यत् ते यायुर्हि निर्णयम् । तत् समालम्व्य यो ऽल्लाहः (सकृपम्) समकाशयत् ॥१३९॥
निर्णयं यस्तु नो यायात् तत् समालम्व्य यत् पुनः । अल्लाहात् काशितं जातं तदेते ह्येव ते जनाः ॥१४०॥
अवज्ञाकारिणो ये वै; [४८]वयञ्चाऽथ त्वयि न्विदम् । प्राकाशयाम सत्येन शास्त्रं यद् वर्त्तते भूतम् ॥१४१॥
यत् किंचिच् चापि वै शास्त्रं पुराऽतिष्ठदितस्तथा । पोषकं तस्य तस्येदं सुसंरक्षकमप्यथ ॥१४२॥
लोकेषु चरत न्यायं तत् समालम्व्य यत् प्रभुः । प्राकाशयच्च यत् सत्यं युष्मास्वन्तोऽवतीर्णवत् ॥१४३॥
तद् विहाय न खल्विच्छा यूयं तेषां तथान्वित । एकैकस्मै च युष्माकं ह्येकं धर्म-विधिं वयम् ॥१४४॥
कर्म-पन्थानमप्येकं निश्चितं नन्वकुर्म वै । युष्मानेकगणे नद्धान् प्राकरिष्यत् प्रभुर्यदि ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

एतदीदृशमैषिष्यत्, परन्त्वेवं न सोऽकरोत् । यथा वो तेन यद् दत्तं युष्मांस्तत्र परीक्षताम् ॥१४६॥

भद्रकार्येषु तद् यूयं सेर्ष्यास्तिष्ठत सर्वदा । उद्यानाय हि युष्माकं गन्तव्योऽल्लाह एव हि ॥१४७॥

ज्ञापयिष्यति युष्मान्त्स तदैव यत्र वर्तते । भेदबुद्धिर्हि युष्मासु (संशयो नाऽत्र कश्चन) ॥१४८॥

[49]निर्णयं यात किञ्चापि तेषु यूयं तदाश्रयात् । प्राकाशयद् यदल्लाहस्तदिच्छाश्चापि नान्वित ॥१४९॥

त्रायध्वमात्मनस्तेभ्यः कदाचिन्नो घटेदिदम् । युष्मान् निवर्त्तयेयुस्ते ह्यल्लाह-प्रेषितन्तु यत् ॥१५०॥

तस्य कस्माच्चिदादेशात् पराङास्यास्तु ते यदि । भवन्ति प्रविजानीत यदल्लाहः स्वयं हि तान् ॥१५१॥

तेषां कतिपयैनोभिः संकटे क्षेप्तुमिच्छति । अवज्ञाकारिणो लोका लोकेऽनेके त्वसंशयम् ॥१५२॥

[50]किमेते कामयन्ते यत् तादृशो निर्णयो भवेत् । यदाधारः किलाऽज्ञानम् ? श्रद्धराणां कृते तु वै ॥१५३॥

निर्णये को नु वै श्रेष्ठो ह्यल्लाहाद् वर्तते बिना । [51]श्रद्धराः ! न हि भोः ! यूयं याहूदाहान् तथैव च ॥१५४॥

ईशानयायिनश्चैव मित्रतां नयत स्वकाम् । मित्रतैषां मिथो ह्येव, युष्माकं यदि कश्चन ॥१५५॥

तान् नयेन् मित्रतां तद्वै यूयं जानीथ तं जनम् । तेषां वर्गेण सम्बद्धं, नाल्लाहस्तु कदाचन ॥१५६॥

दर्शयत्यत्र वै मार्गं तान् ये दोषान् प्रकुर्वते । [52]अथैतल्लोकसे त्वञ्च येषां रोगो हृदि स्थितः ॥१५७॥

अमून् संयान्ति धावन्तस्ते वदन्तीत्थमेव च । विभीमः मा पतीताऽऽपत् काचनाऽस्मासु सम्भवम् ॥१५८॥

दद्याच् शीघ्रं हि सोऽल्लाहो जयं, काशेत वा पुनः । किञ्चनाऽपि हि तत्पार्श्वात् लज्जेरंश्च जना इमे ॥१५९॥

तस्मिन् यन्निह्नुतं हृत्सु भवत्येभिः (प्ररक्षितम्) । [53]श्रद्धरा आक्षिपन्तश्च वक्ष्यन्त्येवं ततो-नु किम् ॥१६०॥

एत एव जना ये वै ह्यल्लाहेनाशपन् भृशम् । "वयं सार्धं हि युष्माभिः", सर्वं मोघं हि चेष्टितम् ॥१६१॥

गतं तेषां तथा हानिरुदर्कस्तत् कृते स्थितः । [54]श्रद्धराः! यदि युष्माकं कश्चिन्निजमतात् क्वचित् ॥१६२॥

स्खलिष्यति तदा शीघ्रं ह्यल्लाहश्चोपनेष्यति । लोकांस्तथाविधान् रक्ता तस्मिन् ये तेषु यस्तथा ॥१६३॥

भविष्यति तथा ते वै ह्युदाराः श्रद्धरेषु तु । न चोदारा भविष्यन्ति पुनरश्रद्धरेषु तु ॥१६४॥

मार्गेऽल्लाहस्य ते चैव योत्स्यन्ते, ते कथञ्चन । न भेष्यन्ति पुरोभागात् पुरोभागिजनस्य च ॥१६५॥

अनुग्रहोऽयमाल्लाहः यमभिप्रैति तं ह्यसौ । अर्पयत्यथ सोऽल्लाहो ह्युदारो विज्ञ एव च ॥१६६॥

[55]तवैतान्येव मित्राणि सोऽल्लाहोऽस्य च वाग्धराः । श्रद्धराश्च हि ये पूजां कुर्वन्त्यत्र प्रतिष्ठिताम् ॥१६७॥

दानं यच्छन्ति किञ्चैव (ह्यल्लाहाग्रे) नमन्ति च । [56]योऽपि कोऽपि तथाऽल्लाहं श्रद्धरानस्य वाग्धरम् ॥१६८॥

आत्मनो मित्ररूपेण स्वीकरिष्यति वेत्स्यति । अल्लाहस्य गणो ह्येव जयं गन्तेति निश्चितम् ॥१६९॥

[57]श्रद्धरा ! ये पुरा युष्मत् शास्त्रलाभं गताः परम् । परिहास्यं हि मन्यन्ते लल्यं युष्मन्मतं पुनः ॥१७०॥

तांस्तथाऽश्रधरान् यूयं मैत्र्यं मा नयत क्वचित् । बिभीत सर्वदाऽल्लाहाद् उपेताः श्रद्धया यदि ॥१७१॥

[58]प्रार्थनार्थं यदा यूयं शब्दापयत किञ्च भोः ! । क्रीडाञ्च परिहास्यं च मन्वते ते तु तद् यतः ॥१७२॥

ते न बुद्ध्या प्रवर्तन्ते कर्मसु; [59]ब्रूत शास्त्रिणः ! । युष्माभि र्निन्द्यमस्माकं त्यक्त्वेदं त्वन्यदस्ति किम् ॥१७३॥

श्रद्धरा यद् वयं तावत् प्रभो अस्मांश्च यत् प्रति । अकाश्यत, ततः पूर्वमकाश्यत तथैव च ॥१७४॥

अथेदं यच् च युष्माकं त्वनेके तादृशा अपि । अवज्ञाकारिणो ये हि; [60]ब्रूत, युष्मान् वदानि किम् ॥१७५॥

एषामपेक्षया ऽल्लाहाल् लब्धारो येऽवरं फलम् ? । ते हि ते यत् कृते ऽल्लाहश्चुकोप धिक् तथा च यान् ॥१७६॥

उवाच, किल येषाञ्च कांश्चित् क्रोडांश्च वानरान् । स व्यधाद् ये ऽव्यवन्दन्त प्रतिम्नो हीदृशा नराः ॥१७७॥

अधोभूमिं प्रयाता वै, सुदूरं सरलाध्वनः । प्रयाताश्चैव ते लोकाः; [61]यदा त्वामुपयन्ति च ॥१७८॥

वदन्तीत्थम्—वयं तावत् श्रद्दध्मो यद्यपि त्विमे । श्रद्विहीना उपाऽयंश्च न्यवर्त्तन्त तथैव च ॥१७९॥

यदेभिर्निह्नुतं सम्यग् वेत्त्यल्लाहोऽखिलन्तु तत् । [62]पश्यसि त्वं यदेतेषामहम्पूर्विकया जनाः ॥१८०॥

अनेकेऽघेषु जायन्ते प्रसक्ताः पुनरेव च । साति-क्रमेषु कार्येषु यदवैधं तदप्यथ ॥१८१॥

पापतन्ति समाहर्त्तुं ह्यधर्म्यं परमं हि तत् । आचरन्ति यदप्येते; [63]किन्न रुन्धन्त्यमूंस्तु ते ॥१८२॥

य एषां धर्मविज्ञाश्च धर्माध्यक्षास्तथैव च । भाषणात् पाप्मनोऽवैधधनस्याहरणात् तथा ॥१८३॥

अधर्म्यं परमं कर्म यदेते पर्युपासते । [64]बद्धपाणिर्हि सोऽल्लाहो याहूदाहा वदन्त्यदः ॥१८४॥

एत एव हि वै येषां बद्धाः सन्त्यत्र पाणयः । धिगेतान् यदिमे तावत् प्रजल्पन्ति निरर्थकम् ॥१८५॥

CC-0. In Public Domain. Digitized by eGangotri

मुक्त-पाणिः स वै भाति, कुरुते व्ययमिच्छया । बहूनां खल्वमीषाञ्च धार्ष्ट्यं श्रद्धीनतां तथा ॥१८६॥
वर्धयिष्यत्यसन्देहं त्वत् प्रभोः काशितं त्वयि । वैमनस्यं मिथो द्वेषं सृष्टवन्तो वयं पुनः ॥१८७॥
एषु यावत् समभ्येति पुनरुत्थापनादिनम् । इन्धते च यदाप्येते युद्धस्याग्नि तदैव सः ॥१८८॥
अल्लाहः शमयत्येनं, चेष्टमाना इमे भुवि । विकाराणां प्रसाराय नाल्लाहाय परन्तु ते ॥१८९॥
कलिप्रसारका रुच्याः; [६५]भवेयुः शास्त्रिणो यदि । श्रद्धराः सभयाश्चापि तदेभ्यो निश्चितं वयम् ॥१९०॥
दुर्गुणान् हि परास्येम महानन्दोद्भरांस्तथा । प्रापयेम सदाऽऽरामान्; [६६]यद्येते च पुनः क्वचित्— ॥१९१॥
तौरातं च तथेञ्जीलं यदेषां प्रभुणाऽपि च । एष्वभूत् काशितं तस्मिन्नस्थास्यन् श्रद्धयाऽचिताः ॥१९२॥
अवेदिष्यंस्ततो भोक्तुं तूपरिष्टादथापि च । पदोऽवस्ताच्च, खल्वेषां गणैकमृजुमार्गगम् ॥१९३॥
परन्त्वन्ये प्रभूतास्तु महैनःपथचारिणः । [६७]काशितं त्वत् प्रभोरासीत् त्वयि यत् त्वं जनेषु तत् ॥१९४॥
वाग्घर ! ख्यापय, स्याच्चेत् कृतं नेत्थं त्वया तदा । सन्देशः ख्यापितो नैव तस्य कोऽपीति सिध्यति ॥१९५॥
त्रास्यते त्वां हि सोऽल्लाहो लोकेभ्यो नात्र संशयः । दर्शयत्येव नाऽल्लाहः श्रद्धीनेभ्यः पथं क्वचित् ॥१९६॥
[६८]ब्रूहि तान् "शास्त्रिणः ! यूयंस्थ विनाऽऽधारमेव तु । तौरातञ्च तथेञ्जीलं काशितं प्रभुणा च यत् — ॥१९७॥
यौष्माकेण हि युष्मासु न यावद् धारयेत तु । (वाग्घर !) त्वत्प्रभो र्यच्च त्वय्यभूत्काशितं हि तत् ॥१९८॥
वहूनां खल्वमीषाञ्च धार्ष्ट्यं श्रद्हीनतां तथा । सुतरां वर्धितुं शक्तं श्रद्धीनान् मा शुचस्ततः ॥१९९॥
[६९]श्रद्धरा ये त्वसन्देहं याहूदाहा अथाऽपि च । सावीया अथ ये चापि भवन्तीशानुयायिनः ॥२००॥
योऽपि कोऽपि तथाऽल्लाहे चरमाहे तथैव च । श्रद्धरोऽसेवताऽथापि चानुकूलं हि कर्म यः ॥२०१॥
ईदृशानां तु लोकानां भयं नैव भविष्यति । नापि कष्टं (कदाचित्) ते गमिष्यन्ति हि किञ्चन ॥२०२॥
[७०]ईश्वरालीन-सन्तानं वाग्वद्धं खल्वकुर्म हि । प्रैषयाम च तत्पार्श्वं वाग्घरान् सुबहून् वयम् ॥२०३॥
यदा तान् वाग्घरः कोऽपि प्रयातो धारयन् हि तत् । यन्न रुच्यं हृदां तेषां कांश्चित्ते खल्वखण्डयन् ॥२०४॥
कांश्चिदघ्नन् तथैवान्यान्; [७१]अबुध्यन्तेत्थमेव च । नैवाऽनेन भविष्यामो ह्यापन्ना अतएव ते — ॥२०५॥
दृष्ट्यन्धा वधिराश्चैव तस्थुः साभिनया इव । ततस्तेषु हि सोऽल्लाहो दयादृष्टिं ववर्ष ह ॥२०६॥
ज्ञात्वाऽन्धा बधिरास्तेषां केचित्तस्थुस्तदापि तु । सर्वं पश्यति सोऽल्लाहो यत्ते कुर्वन्ति चेष्टितम् ॥२०७॥
[७२]श्रद्धीनाः निश्चितं ते वै ये तु तावद् वदन्ति हि । मिसीहो मर्यमापत्यं ह्येवाल्लाहस्तु वर्तते ॥२०८॥
मिसीहो यद्यपीदं तु जगाद स्वयमेव च । "ईश्वरालीनवंश्या भोः! स्तुताऽल्लाहं हि(केवलम्)॥२०९॥
प्रभुर्यो मे च युष्माकं वर्तते चापि यःप्रभुः । अल्लाहप्रतिमानं तु योऽपि कश्चित् करिष्यति ॥२१०॥
अवैधं तत्कृते स्वर्गं ह्यल्लाहः कुरुते हि सः । अग्निरावसथं चाऽस्य, सहायो नो भविष्यति ॥२११॥
तेषां जात्यास्तु ये सन्ति; [७३]ह्यश्रद्धास्ते जना ध्रुवम् । ये वदन्ति यदल्लाहस्त्वेको वै वर्तते त्रिषु ॥२१२॥
ऋते नो केवलाल्लाहादल्लाहस्त्वस्ति यद्यपि । वदन्त्येते हि यत् तस्मात् नैव चेद् विरमन्ति तु ॥२१३॥
श्रद्धीनान् खल्विमान् लोकान् यातनाः कष्टदाःपुनः । ग्रसिष्यन्ति; [७४]न किं वै ह्यल्लाहाभिमुखं जनाः ॥२१४॥
अनुतापं करिष्यन्ति याचिष्यन्ते च नो क्षमाम् । क्षमाशीलो दयालुश्च ह्यल्लाहो वर्तते यदा ॥२१५॥
[७५]मिसीहो मर्यमापत्यं वाग्घरः केवलोऽस्ति वै । नाऽथ कश्चित्ततोऽन्यस्तु प्राक्ततोऽपि च वाग्घराः ॥२१६॥
समायन्, यस्य माताऽभूत् साध्व्यति तावुभौ पुनः । भोजनं खल्वभुञ्जातां पश्य ताभ्यां वयं तथा ॥२१७॥
आयातान् विशदीकृत्य वर्णयामोऽतिलीलया । दृश्यतां तौ ततोऽप्यन्यं यात एव हि कापथम् ॥२१८॥
[७६]ब्रूहि—पूजयथोऽल्लाहाद् विनान्यं किं हि सर्जने । युष्माकं नाशने वाऽपि यः समर्थो न विद्यते ॥२१९॥
यः शृणोति तथा वेत्ति केवलोऽल्लाह एव सः । [७७]ब्रूहि "भोः शास्त्रिणः स्वस्मिन्मते यूयं क्रमिष्ट मा ॥२२०॥
मर्यादाः, नानुयायात तेषां कामान् स्वयं हि ये । पूर्वमस्मात् पथोभ्रष्टा भ्रंशिता वहवश्च यैः— ॥२२१॥
ऋजोर्मार्गात् प्रयाताश्च सुदूरं; [७८]येऽपि मानवाः । ईश्वरालीन वंश्यानां श्रद्धाया हानिमागताः ॥२२२॥
अभ्याख्याता अभूवंस्ते दानोधस्य तथैव च । मर्यमापुत्रवाग्भिर्हि तस्येशस्यात्र कारणम् — ॥२२३॥
अवाजानन् यतस्ते वै मर्यादातिक्रमं तथा । अभूवंस्तत्पराः कर्तुं; [७९]नारुन्धन् कञ्चनाऽपि च—॥२२४॥
तस्मात् यत्ते विगीतं वै किंचित् कर्माऽप्यकुर्वत । विगीतं सुमहज्जातं यत्तेऽचेष्टन्त सर्वतः ॥२२५॥

CC-0. In Public Domain. Digitized by eGangotri

"श्रद्विहीनान् निजं मित्रं तेषां कुर्वन्ति ये जनाः । तान् प्रपश्यसि निन्द्यं हि सुमहत् तद् यदात्मने ।।२२६।।
अग्रतः प्रेषयन्त्येते ह्येभ्योऽल्लाहस्तु कोपनः । ग्रस्ताः स्थास्यन्ति ते किञ्च यातनासु सदैव तु ।।२२७।।
"अकरिष्यन्त मित्राणि ते तु तान् श्रद्धरा यदि । अभविष्यन् हि तेऽल्लाहे वाग्घरे तत्र चाप्यथ ।।२२८।।
काशितं यत्, परं तेषामवज्ञाकारिणोऽधिकाः । "याहूदाहान् प्रतिमनाञ्च पूजकान् त्वं प्रवेत्स्यसि ।।२२९।।
सर्वातिशायिरूपेण तेषां वै श्रद्धर—द्रुहाम् । "ईशानुयायिनो वै स्म:" येऽवोचन् तांश्च वेत्स्यसि ।।२३०।।
नेदीयसोऽधिकं मैत्र्ये लोकान् वै श्रद्धरान् प्रति । तदेतस्मात् यतस्तेषामनेके सन्त्युपासकाः ।।२३१।।
विद्वांसस्त्यागिनश्चैव तथेदं चात्रकारणम् । भजन्ते नाभिमानं ते;

इति षष्ठं पारायणम्

अथ सप्तमं पारायणम्

"यदा शृण्वन्त्यमी तथा— ।।२३२।।
काशितं वाग्घरेऽभूद् यत् नेत्रेभ्यो लोकसे तदा । स्रवन्त्यश्रुप्रवाहा वै ह्यनीषां हेतुनाऽमुना ।।२३३।।
पर्यचिन्वन्निमे सत्यं यतस्तेऽनुवदन्ति च । प्रभो नः ! श्रद्धरा जाता वयं नामानि नस्तथा ।।२३४।।
साक्ष्यदातृषु लोकेषु विनिवेशय (साम्प्रतम्) । "वयं केनाऽथ नाऽल्लाहे सत्ये ऽस्मानागते तथा ।।२३५।।
भवेम श्रद्धरा एतन्नाशासीमहि वा कथम् । वेशयिष्यति भद्रेषु प्रभुर्नोऽस्मांस्तथैव च ?" ।।२३६।।
"तेषां सूक्त्यनुरोधेन ह्यल्लाहस्तान् पुरोऽकरोत् । सूद्यानानि ह्यधो यानि स्रवणाः सरितः किल ।।२३७।।
शश्वद् यत्र तथा ते च वासं यास्यन्ति (निश्चितम्) । पुरस्कारोऽयमेवस्ति भद्राणां कर्मणां कृते ।।२३८।।
"परं येऽ श्रद्धरा लोका आयातान् ये न्यषेधयन् । अस्माकं, तेऽधिकुर्वन्ति नारकाग्नि हि (सत्यतः) ।।२३९।।
"श्रद्धरा हे जनाः ! वैधं ह्यल्लाहः पावनं तु यत् । अकरोद् युष्मदर्थं हि तन्निषेधत नो क्वचित् ।।२४०।।
मा क्रमिष्ट च मर्यादामल्लाहाय न रोचते । क्राम्यत्यत्र हि मर्यादां योऽपि कोऽपि जनस्तु वै ।।२४१।।
"भुञ्जीध्वं यत् पवित्रं वै भोजनं ह्यददात् प्रभुः । वैधं चैवापि युष्मभ्यं श्रद्धरा अथ यत्र च— ।।२४२।।
तस्माद् बिभीत चाऽल्लाहात; "नाल्लाहो दण्डयिष्यति । युष्मान् युष्मन्निरर्थेषु ह्यचिन्तोपनतेषु च— ।।२४३।।
शपथेषु, परं युष्मान् दण्डयेत् खल्वसौ किल । प्रयुक्तेषु हि युष्माभिः शपथेष्वन्तरात्मना ।।२४४।।
प्रायश्चित्तममीषान्तु भोजनेन हि भोजनम् । तेन सामान्यरूपेण भोज्यन्ते येन गृह्यकाः ।।२४५।।
परापेक्षजनानां वै दशानामथवा पुनः । तेभ्यो वासोऽर्पणं किम्वा दासस्यैकस्य मोक्षणम् ।।२४६।।
अलाभे तु पुनस्तस्य त्र्यहायाऽनशनं भवेत् । शपथानान्तु युष्माकं प्रायश्चित्तमिदं पुनः ।।२४७।।
गृहीत-शपथाः सन्तः सर्वतस्तान् विरक्षत । स्वानायातान् हि युष्मभ्यं विशदं वर्णयत्यसौ ।।२४८।।
अल्लाहः किल भोः ! यूयं कार्तज्ञं दर्शयेत यत् । "श्रद्धरा ! मदिरा हीयं द्यूतं चैताश्च मूर्तयः ।।२४९।।
सायकाश्च पुनर्दिव्याः शातनस्य भवन्ति वै । दुश्चेष्टितानि तद् ह्येभ्यो रक्षत स्वान् यथा पुनः ।।२५०।।
भवेत सफला यूयम्; "शातनस्य समीहितम् । त्वेतदेव हि युष्मासु जनितं यद् भवेद् ध्रुवम्— ।।२५१।।
वैमनस्यं तथा द्वेषो द्यूतेन शीधुनाऽथ च । निषेधयेत् पुनर्युष्मानल्लाहस्मरणात्तथा ।।२५२।।
पूजाया वारिता स्यात तथा तस्याः; तमनो न किम् । यूयं विनेष्यथाऽद्यापि ? "शासनं परिपाल्यताम् ।।२५३।।
अल्लाहस्य तथा चैव वाग्घरस्य तथात्मभिः । तिष्ठताऽवहिताः, यूयं पराङ् आस्या भवेत चेत् ।।२५४।।
वित्ताऽस्त्युत्तरदायित्वं वाग्घरेऽस्मत्तु केवलम् । स्पष्टतः प्रेषणस्यैव (सन्दिष्टस्य); "अथ ये जनाः ।।२५५।।
श्रद्धरा अनुकूलानि चैव कर्माणि कुर्वते । यदप्येतेऽघसन् यच्चाप्यपुर्दोषो न तत्र वै ।।२५६।।
यदेते सभयास्तावत् श्रद्धराः पुनरेव च । भद्रकर्मकृतश्चापि परस्तात् सभयाः पुनः ।।२५७।।
श्रद्धराश्च ततः किञ्च भवन्ति सभयास्ततः । युक्ताः कर्म कृतो येऽपि ह्यल्लाहस्तद्विधान् जनान् ।।२५८।।
भद्रकर्मकृतस्तावत् (परमं) स्निह्यति (ध्रुवम्) । "श्रद्धराः ! खलु सोऽल्लाहो युष्माकं हि परीक्षणम् ।।२५९।।
तेन मृगेण कर्तैव ध्रुवं यं समया हि वः । पाणयश्चैव कुन्ताश्च प्राप्तुं शक्ष्यन्ति यत् प्रभुः— ।।२६०।।
वेत्तु तं यो बिभेतीह किलाऽमुष्माद् निजात्मना । अथाऽयं योऽपि कोऽप्यत्र तत् सीमोल्लंघनेन वै ।।२६१।।

CC-0. In Public Domain. Digitized by eGangotri

यायादग्रे प्रतीक्षन्ते यातनास्तं हि कष्टदाः । [९५]वधिष्ट शरभं मैव श्रद्धरास्तीर्थ-यायिनः ॥२६२॥
ज्ञात्वा हते मृगेऽसौ हि विधिज्ञ-द्वय-निर्णयात् । तद्विधं पशुमेकं वै समादाय चतुष्पदाम् ॥२६३॥
काव्यं प्राप्यार्पयेत्तत्र प्रायश्चित्ताऽनुसारतः । दरिद्रान् भोजयेत् किं वा, भोजनस्याऽनुसारतः ॥२६४॥
औपवस्तं स वै गच्छेत् यथासौ स्वदतां हि यत् । कृतं तेन फलं तस्य, यद् भूतं क्षमते हि तत् ॥२६५॥
सोल्लाहः पुनरावृत्तौ त्वल्लाहो याति हि ध्रुवम् । तस्य तावत् प्रतीकारं, प्रभुत्वात् शालते ह्यसौ ॥२६६॥
प्रतीकारपरश्चैव ह्यल्लाहो वर्त्तते किल । [९६]वैधमाखेटनं चैव जन्तूनां भोजनं तथा ॥२६७॥
युष्मभ्यं ये समुद्रेषु विचरन्ति तथैव वः । समुद्रगेभ्य एवाऽपि भोज्यार्थास्ते हि कल्पिताः ॥२६८॥
आखेटनं परं भूमाववैधं वर्तते यदा । तीर्थयात्रां गता यूयं, विभीताऽल्लाहतो हि यम् ॥२६९॥
एतास्थ समवेत्यान्ते यूयं सर्वेऽपि मानवाः । [९७]अल्लाहः कृतवान् काव्यं लोकादर्शं हि पावनम् ॥२७०॥
माल्यानि, पावनान् मासनथो हव्यान्यकल्पयत् । इदञ्चैतेन यद् यूयं जानीतोर्व्याञ्च खेषु च ॥२७१॥
यद् यत्तिष्ठति तत् सर्वं वेत्त्यल्लाहस्तथैव च । समञ्चाप्यत्र यत् किञ्चित् वेत्ताऽल्लाहोऽस्य वर्तते ॥२७२॥
[९८]ज्ञायतां तावदल्लाहो महान् दण्डयिता तथा । क्षमाशीलो दयालुश्च किञ्चाल्लाहोऽथ वर्तते ॥२७३॥
[९९]प्रेषणोत्तरदायित्वं केवलं किल वाग्वरे । निह्नुतं यच्च युष्माभिर्व्यक्तं तत् खल्वशेषतः ॥२७४॥
वेत्त्यल्लाहः; [१००]वदाऽ भद्रं भद्रं यच्चापि ते न वै । उपैतः समतां, रुच्यमभद्रं विपुलं भवत् ॥२७५॥
स्यादपि नाम वो ऽत्यर्थं, सुधियः ! तद् विभीत भोः । अल्लाहात्, स्यात यच्छक्ताः फललाभे कदाचन ॥२७६॥
[१०१]श्रद्धराः ! तन्न भोः ! यूयं पृच्छत कथितं हि यत् । उद्वेजयेत्परं युष्मान् यूयं प्रक्ष्यथ तद्धि चेत्— ॥२७७॥
कुराणस्यावतारस्य प्रसंगे तद् भविष्यति । समाख्यातं हि युष्मभ्यम्, ह्यल्लाहः क्षमते हि तत् ॥२७८॥
क्षमाशीलो दयालुश्च त्वल्लाहो वर्तते किल । [१०२]युष्मत् पूर्वं गणश्चैक इत्थमेवान्वयुंक्त तु ॥२७९॥
ततश्चासौ हि तत् सर्वं न्यषेधत्; [१०३]न हि कञ्चन । गर्भीरां न च वस्तेल्यं सपर्याभाजमप्पथ ॥२८०॥
नो दशाऽयामिनं (हामी) वाऽपि ह्यल्लाहस्त्वकरोदिह । श्रद्विहीना जना अत्र ह्यल्लाहे सत्यमेव तु ॥२८१॥
आरोपयन्ति मिथ्यैव ह्यनेके तत्र सन्ति ये । बुद्धया नैव प्रवर्तन्ते कर्मसु; [१०४]उक्ता भवन्ति ते ॥२८२॥
यदोपाध्वं नु तद् यूयं प्रभुणा काशितं हि यद् । वाग्घरं तञ्च तेह्याहुः—पर्याप्तं नस्तदेव तु— ॥२८३॥
समाश्वस्ता अभूवन् वै यत्रास्माकं तु पूर्वजाः । कस्यचिन्नापि विज्ञाः स्युरमीषां पूर्वजा यदि— ॥२८४॥
भवेयुर्नापि सन्मार्गे (तादृशानपि पूर्वजान्) । (श्लेक्ष्यन्ति) किं ततोप्येते; [१०५]श्रद्धरा अयिमानवाः ! ॥२८५॥
युष्माभिश्चिन्त्यतामात्मा, यूयं मार्गे भवेत चेत् । अन्यस्मिश्च पथो भ्रष्टे हीयते वो न किञ्चन ॥२८६॥
सर्वैर्युष्माभिरल्लाहः संभूयेत्यो हि वर्तते । बोधयिष्यति वः सर्वमचेष्टध्वं हि यत् तदा ॥२८७॥
[१०६]युष्माकं कस्यचिन् मृत्योः काले तावदुपस्थिते । श्रद्धराः ! अन्तिमेच्छायाः क्षणे स्यातां तु साक्षिणौ ॥२८८॥
युष्माकं न्यायशीलौ द्वौ गणाद् द्वावन्यतोऽथवा । प्रवासे सत्सु युष्मासु भये मृत्योरुपागते ॥२८९॥
तयोर्जाते तु सन्देहे पूजा-निर्वर्त्तनोत्तरम् । तत्र तौ खलु रोद्धव्यौ ह्यल्लाहेन च तौ पुनः ॥२९०॥
शपेतां "न किलाऽवां तु स्याद्धि यच्चाप्यमुष्य वै । पण्यं तावच्चरिष्यावो बन्धुष्विच्छापरेष्वपि ॥२९१॥
ह्नुवहे साक्ष्यमाल्लाहं नैवावामन्यथा किल । पाप्मनां वै भविष्यावो ह्यावामेकतमौ पुनः ॥२९२॥
[१०७]पश्चाज् ज्ञाने तु वै जाते ऽवदतामनृतं हि तौ । तयोः स्थानेऽपरौ द्वौ तावनुपक्तावनेन तु ॥२९३॥
साक्षिरूपेण खल्वग्रे सरतां शपतां तथा । अल्लाहेन, "उत्तरा सत्या पूर्वौ द्वावतिरिच्य हि ॥२९४॥
साक्षिता वर्तते नौ तु, नाऽतिचारस्तथा कृतः । आवाभ्यामथ सीमायाः, सातिचारा भवेम चेत् ॥२९५॥
भवेम जाल्म-लोकानाम्"; [१०८]इत्थं संभाव्यतेतराम् । स्थास्यतस्तावृते साक्ष्ये भेष्यतो वाऽपि यत्तयोः— ॥२९६॥
शपथोत्तरमन्येषां शपथं कारयिष्यते । विभीत यूयमल्लाहात् शृणुताऽपि च, नो क्वचित् ॥२९७॥
अध्वानं तावदल्लाहो दर्शयत्यवजानतः । [१०९]वाग्घरान् समवेतान् वै यदाल्लाहः करिष्यति ॥२९८॥
प्रक्ष्यत्येतान् "प्रतिस्पन्दः कोप्यभूत् किं ?" तदा हि ते । वक्ष्यन्त्येनं—"न वै विद्मः, रहस्यज्ञस्त्वमेव तु" ॥२९९॥
[११०]यदा वक्ष्यति चाऽल्लाहः—"मर्यमापुत्रकेश भोः ! । त्वं स्मराऽनुग्रहं तं मे प्रसौ ते त्वयि चाप्यहम् ॥३००॥
अकृषि यं बलाधानं पवित्रेणात्मना त्वयि । शिशुर्दोलाधिरूढोऽपि सवया इव चाऽवदः ॥३०१॥

CC-0. In Public Domain. Digitized by eGangotri

त्वां तथाऽशिक्षयं शास्त्रं तत्व-संदर्शनं तथा । तौरातं पुनरिञ्जीलं किञ्च मे शासनाद् यदा— ॥३०२॥
मृदस्त्वं चटकाऽऽकारं ह्यकरोरोष्ठ-वायुना । पूरितः सोऽभवत्साक्षात् चटका मम शासनात् ॥३०३॥
शासनान् मम जन्मान्धान् कुष्ठिनश्चाप्युपाचरः । शासनान् मे मृतांश्चैव किञ्च लोकानजीवयः ॥३०४॥
ईश्वरालीन-वंश्यांश्च यदा त्वत्तो ऽप्यवारयम् । तान् यदा त्वमुपेतोऽभूः लक्ष्मभिर्विशदैर्हि तैः ॥३०५॥
श्रद्हीनास्तेषु ये त्वासन् प्राब्रुवंस्तेऽखिलं न्विदम् । मायैव नेतरत् किंचित्; [111]प्रैरयं हृदयानि च ॥३०६॥
यदाऽन्तेवासिनामस्मि श्रद्धत्त मयि वाग्घरे । मम चाऽपि, तदाऽवोचन्-श्रद्दध्मो ननु भोः ! वयम् ॥३०७॥
साक्षितां गच्छ चाऽस्माभिस्त्वय्यात्माऽपि समर्पितः । [112]यदाऽन्ते वासिनो ऽपृच्छन् "मर्यमापुत्रकेश भोः ! ॥३०८॥
प्रभुस्ते ऽस्मत् कृते किं भोः! खाद्याऽऽपूर्णां हि पीठिकाम् । समानेतुं भवेच्छक्तो ह्याकाशादथ सोऽब्रवीत् ॥३०९॥
श्रद्धरा यदि यूयं स्थ ह्यल्लाहात् प्रबिभीत तत् । [113]ते ऽवदन्-वयमिच्छामस्तस्माद् भोक्तुं, भवेत्तथा ॥३१०॥
अस्माकं हृदये तोषः जानीयाम तथैव च । अस्मानभाषथाः सत्यं, साक्षिणःस्याम तत्र च ॥३११॥
[114]मर्यमापत्यमीशो ऽसावाहा ऽल्लाह ! मम प्रभो ! । पीठिकां खाद्य सम्पन्नां नयाऽस्मान् वियतो हि या ॥३१२॥
भवेदीड्या किलाऽस्मभ्यं पूर्वेभ्यश्चापि या भवेत् । अन्तगेभ्यस्तथा चैव प्रमाणं त्वत्त एव च ॥३१३॥
वर्त्तनं देहि नः त्वञ्च वृत्तिदानां त्वमुत्तमः । [115]प्रत्यवादीत्ततोऽल्लाहः समानेताऽस्म्यहं हि ताम् ॥३१४॥
युष्मभ्यं निश्चितं, पश्चात् परं यो ऽश्रद् हि धास्यति । युष्माकं, तदहं तोत्स्ये यातनाभिस्तु तं तथा ॥३१५॥
तद्विधा न यथा दृष्टा क्वचित् पूर्वं हि यातनाः । [116]यदाऽल्लाहस्तथा ऽवादीत् "मर्यमापुत्रकेश भोः ! ॥३१६॥
अवादीः त्वं नु किं लोकान्—"मां तथा जननीञ्च मे । ईड्यं वित्त किलाल्लाहाद् व्यतिरिक्तं," स वक्ष्यति ॥३१७॥
"महिम्ना राजसे त्वं, मे नार्हता वक्तुमस्त्यदः । नाधिकारोऽस्ति मे यत्र यद्यवक्ष्यमदस्तदा ॥३१८॥
अवेत्स्यस्तत्तदानीं त्वं, मनःस्थं वेत्सि मे, न च । वेद्मि यत्ते मनःस्थं तु, निह्नुतज्ञस्त्वमेव तु ॥३१९॥
[117]यदादिष्टं त्वया नाऽहं ततो भिन्नमवादिषम् । तान्हि यद् यः प्रभुर्मेऽस्ति युष्माकञ्चास्ति यः प्रभुः ॥३२०॥
स्तुताऽल्लाहं हि तं यूयं यावत्कालञ्च तेष्वहम् । अवात्सं तान् समारक्षं, त्वयाऽऽहूतो यदात्वहम् ॥३२१॥
तदा तांस्त्वं समारक्षः, सर्वविच्चाऽसि पूर्णतः । [118]ग्रसेश्चेद् यातनाभिस्तान् त्वदीयास्तेहि वन्धकाः ॥३२२॥
क्षमेथाः चेत् पुनस्त्वं तान् सुधीस्त्वञ्च महाबलः । [119]वदिष्यत्यथ सोऽल्लाहो-दिनं तद् वै इदं यदा ॥३२३॥
सत्यं सत्यवतां नूनं (सुतरां) सुफलिष्यति । सन्ति तेभ्यः सदारामा निम्नगाः यत्र पार्श्वगाः ॥३२४॥
वत्स्यन्ति ते सदा यत्र, तैरल्लाहः प्रहृष्यति । ते चाल्लाहेन हृष्यन्ति, विजयः सुमहानयम् ॥३२५॥
[120]धरित्र्या वियताञ्चैव तयोर्यन्मध्यगं तथा । राज्यं तस्याखिलस्याऽपि ह्यल्लाहस्यैव वर्त्तते ॥३२६॥
सर्वसामर्थ्यभृच्चासावल्लाहो वर्तते सदा ।

योगः—३२६॥

CC-0. In Public Domain. Digitized by eGangotri

६

सूक्तम्–पशवः

(अल-अन-आम)

(महाकालेऽवतीर्णाः षट्षष्ट्युत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अल्लाहाय प्रशंसाऽस्ति धरित्रीञ्च दिवश्च यः । प्रासृजत् यस्तथाऽऽलोकं यस्तमांसि तथाऽकरोत् ॥ १ ॥
श्रद्विहीना अमी लोकास्ततोऽप्यन्यान् निजप्रभोः । प्रतिम्नः कुर्वते (हन्त!); [2]स एवाऽसौ हि योऽसृजत् ॥ २ ॥
मृदो युष्मान्, पुनश्चैकं समयं निरधारयत् । अन्यश्चैकोऽवधिस्तत्र नियतः, संशयं बत ॥ ३ ॥
यूयं तेनाऽप्युपारुढ़ाः; [3]धरित्र्यां खेषु खल्वपि । सोऽल्लाहो हि, स जानाति व्यक्ताव्यक्तं समं हि वः ॥ ४ ॥
चेष्टध्वे यच् च किञ्चापि वेत्त्यसौ तच् च सर्वथा । [4]तत् प्रभोर्लक्ष्मणां नैकं लक्ष्म यत् तान् गतं भवेत् ॥ ५ ॥
तस्माच् चैभिर्न स्वं वक्त्रं पराङ् चापि कृतं भवेत् । [5]न्यषेधन् सत्यमेते वै यदा तत् तानुपस्थितम् ॥ ६ ॥
सदा पर्यहसन् यत् ते तत् प्रसंगेन तेऽचिरम् । वृत्तानि कानिचित् तावत् श्रोष्यन्ति; [6]दृग्गतं न किम् ॥ ७ ॥
तेषां ततः पुरा चाऽपि कियतोऽपि गणान् वयम् । व्यनाशयाम येभ्यो हि धरित्र्यां समदीयत ॥ ८ ॥
अस्माभिस्तत् प्रभुत्वं वै न वो यत् समदीयत । वर्षा आकाशतोऽस्माभिरवृष्यन्तैषु तानधः ॥ ९ ॥
निम्नगाश्चाप्यवाह्यन्त, ततोऽनाश्यन्त ते तथा । तेषां पापैरथाऽस्माभिस्तत् स्थाने खल्वसृज्यत ॥१०॥
गणान्तरम्; [7]तथा किञ्चित् साक्षरं चापि लेखनम् । त्वय्युदभावयिष्याम वयं चेत् ते जना अथ ॥११॥
स्पृष्ट्वा स्पृष्ट्वा करैश्चापि श्रद्विहीना यतो हि ते । इदं केवलमाख्यास्यन्—"नान्यन् मायामृते त्विदम् ॥१२॥
[8]त आहुः—केन नो देवः कश्चिदस्मिंस्तु (वाग्धरे) । अवातार्यत, यद्येवम् कोऽप्यवातारयिष्यत ॥१३॥
देवोऽस्माभिस्तदा (सत्य) मभविष्यद् हि निर्णयः । नान्यः कालावधिश्चापि ह्येभ्योऽस्माभिरदास्यत ॥१४॥
[9]देवो दिष्टस्त्वसौ चापि पुमानेवाकरिष्यत । अकरिष्यन्त मग्नाश्च भ्रमे ते यत्र साम्प्रतम् ॥१५॥
[10]वाग्धरा अपहास्यञ्च बहवो गमिताः पुरा । त्वत्तः, परं जनैर्यस्तु ह्यपहासः कृतोऽभवत् ॥१६॥
पर्यावि्रयन्त ते तेन विगीतं हसितेन तत् । [11]ब्रूहि—विहृत्य विहृत्य धरित्र्यां परिपश्यत ॥१७॥
लभन्ते ह्यफलं यत् ते (श्रद्विहीनाः) निषेधकाः । [12]ब्रूहि—कस्याऽस्ति तत् सर्वं धरित्र्यां खेषु यत् समम् ॥१८॥
ब्रूहि "अल्लाहस्य तत् सर्वं आत्मन्यारोपयद् दयाम् । समवेतानसौ कर्त्ता पुनरुत्थापनाऽह्नि ॥१९॥
युष्मान् त्सर्वानसन्देहं, श्रद्धास्यन्ति न कर्हिचित् । ते हि ये त्वात्मनो मार्गं नाशनं प्रणयन्ति वै ॥२०॥
[13]यद् दिने यत् तथा रात्राववष्टब्धं हि तिष्ठति । तस्यैव तत् समं चाऽपि श्रोता ज्ञाता स विद्यते ॥२१॥
[14]ब्रूह्यहं किं तमल्लाहं त्वन्तरेणेह कञ्चन । मित्रं संरक्षकं कुर्याम् धरित्रीं योऽसृजद् दिवः ॥२२॥
यो ददाति तथा भोक्तुं न प्रतीच्छति यः परम् । ब्रूहि—मह्यम् समादेशो ह्येष एवाऽस्ति यद्ध्यहम् ॥२३॥
आत्मानमर्पयेयं वै लोकानामग्रणीर्भवन् । स्यां कदाचिच्च नैवाऽपि प्रतिमापूजकेष्वहम् ॥२४॥
[15]ब्रूहि—अहं यातनाया वै भीषणाह्नो विभेमि चेत् । स्वप्रभोर्हि समादेशः पालितो न भवेन्मया ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[16]यस्माल्लोकाद् दिने तस्मिन् (यातना) स्यादपाकृता । अमुना दयितं तत्र, साफल्यं विशदञ्च तत् ॥२६॥
[17]लम्भयेत् कष्टमल्लाहो युष्मांश्चेन् नान्तरेण तम् । कश्चिदन्योऽपकर्त्ता स्यात् भद्रं चेल्लम्भयेदसौ ॥२७॥
किञ्चनाप्यथ सामर्थ्यं सर्वरूपं बिभर्त्यसौ । [18]बन्धकेषु निजेष्वस्ति सर्वसामर्थ्यवानसौ ॥२८॥
तत्वदर्शी तथा ज्ञाता बोभवीति स सर्वथा । [19]ब्रूहि—सर्वोत्तमं साक्ष्यं वर्त्तते कस्य कथ्यताम् ॥२९॥
मध्यस्थो मम युष्माकं चाल्लाहः साक्षिमानिह । कुराणं लोकतां नीतं मयि चेदं, यथा न्वहम्— ॥३०॥
युष्मान् यत्र प्रसारश्च भवेदस्य हि तान् जनान् । सचेतसो विदध्यां वै सकलान्, ननु बिभृथ— ॥३१॥
साक्ष्यं यूयं यदल्लाहात् ऋते पूज्योऽपरोऽस्त्यपि ? । ब्रूहि—नैवाऽत्र साक्ष्यं मे कथ्यतामेकलो हि सः ॥३२॥
प्रतीष्टोऽहं विरज्ये च समताकल्पनात्तु वः । [20]येभ्यश्शास्त्रमिदं दत्तं त्वस्माभिस्ते जना इदम् ॥३३॥
आत्मनीनान् यथा पुत्रान् परिचिन्वन्ति वै तथा । परं ये त्वात्मनो लोका नाशमार्गे प्रवर्त्तकाः— ॥३४॥
श्रद्धास्यन्ति त एवाऽत्र नैव; [21]जालमतमश्च कः । तेभ्योऽल्लाहे हि ये मिथ्याऽऽरोपणे तत्परा अथ— ॥३५॥
मिथ्यापयन्ति चाऽऽयातान् तस्य, जाल्माः कदाचन । निश्चितं न हि साफल्यं शक्ता लब्धुं कथञ्चन ॥३६॥
[22]यदा चैव जनान् त्सर्वान् समवेतान् वयं पुनः । कर्त्तास्मः, प्रतिमामन्तॄन् प्रक्ष्यामो हि जनान् वयम् ॥३७॥
प्रतिमानो हि युष्माकं मताः कुत्रासते तु ते ? । प्रतिमानो भवन्त्येते युष्माभिर्यत् प्रतिष्ठितम् ? ॥३८॥
[23]आरवं ते ततः कर्त्तुं नैव शक्ष्यन्त्यतोऽधिकम् । वदिष्यन्ति यदेतत् ते—ह्यल्लाहेन शपामहे ॥३९॥
प्रभो नः ! नो वयं त्वास्म कदाचिन्मूर्त्ति-पूजकाः । [24]अनृतं कीदृशं पश्य ब्रुवते तेऽन्तरात्मनः ॥४०॥
अशेषं निष्फलं जातं यदेभिर्घटितं तथा । [25]ईदृशाश्चापि तेषां ये भवन्ति त्वयि कर्णदाः ॥४१॥
तिरस्कृतानि हृन्द्येषामस्माभिर्न परञ्च ते । शक्ता ज्ञातुं तु बाधिर्यं श्रवेष्वेषां निवेशितम् ॥४२॥
दृष्ट्वा लक्ष्माणि सर्वाणि श्रद्धरा न तथाऽपि ते । तेषु तावद् भविष्यन्ति खल्वितोऽपि परं हि ते— ॥४३॥
श्रद्धविहीना जना वै ये विवदन्ते त्वया सह । त्वामुपस्थाय चैवाऽऽहुः—सर्वमेतत्तु केवलम्— ॥४४॥
वंशानुवंशमायातं भवत्याख्यानमात्रकम् । [26]तेऽमुष्मान् नॄन् निषेधन्ति दूरे तिष्ठन्ति च स्वयम् ॥४५॥
नाशने स्वं नयन्त्येव मार्गे ते, नैव यद्यपि । विदाङ्कुर्वन्ति स्वेनेदम्; [27]नारकाग्निमुपायितान् ॥४६॥
कदाचिद् यदि पश्येत यूयं तान् वदतस्तथा । कि त्वया न भवेद् देव ! कृतं, चेद् विनिर्वर्त्तिताः ॥४७॥
वयं भवेम (संसारे) नैव मिथ्यापयेम च । निजप्रभोस्तथाऽऽयातान्, भवेम मिलिता अथ ॥४८॥
श्रद्धरेषु वयम्; [28]ते वै निह्नुतं यदकुर्वत । पुरा तत् तत् समक्षं यत् समुपेतमजायत ॥४९॥
(संसारे) यदि ते लोका भवेयुर्विनिर्वर्त्तिताः । तदेवावर्त्तयेयुस्ते यतस्ते वारिताः पुरा— ॥५०॥
असन्देहमिमे लोकाः सुतरामनृतोत्कराः । [29]वदन्त्येते तथा—"सर्वं लौकिकं ह्येव जीवनम् ॥५१॥
पुनश्चोज्जीवनं नाऽतः परं स्यान्नः कथञ्चन । [30]कदाचिद् यदि पश्येत तान् यूयं प्रापितान् पुनः— ॥५२॥
स्वं प्रभुं, वक्ष्यतीत्थं सः—किन्न सत्यमिदं ? तदा । ते वक्ष्यन्ति—कथन्नेदम् ? शपामः प्रभुणात्मनः ॥५३॥
वक्ष्यत्यसौ—वरं यूयं श्रद्दृहानैः फलतां गतम् । यातनानां रसं तावद् भुञ्जीध्वम्; [31]नात्र संशयः— ॥५४॥
ते तु हानिं गता लोका ये ह्यमिथ्यापयन्निदम् । तावदल्लाहसांगत्यं, यदाऽकस्माच्च स क्षणः ॥५५॥
आपतिष्यति खल्वेषु क्रोशिष्यन्ति हि ते—"बत । कीदृशोऽति प्रमादोऽयं त्वस्माभिर्घटितः किल" ॥५६॥
ऊढो भारस्तथा चैभिः पृष्ठतो हि भविष्यति । धिक् क्रियार्हो ह्यसौ भारः यस्यैते पृष्ठवाहिनः ॥५७॥
[32]लौकिकं जीवनं नान्यत् महः खेला च केवलम् । वरीयांश्च परो लोके धाम तेभ्यस्तु वर्त्तते ॥५८॥
कर्तव्ये ये निजे युक्ताः बुध्यध्व किं ततोऽपि नो ? । [33]जानीमो यद् वदन्त्येते तत्ते दुःखस्य-कारणम् ॥५९॥
त्वां ते नैव निषेधन्ति निषेधन्ति परन्तु ते । आयातान् पुनराल्लाहान्; [34]त्वत्तः पूर्वञ्च वाग्घराः ॥६०॥
अनेके हि न्यषेधन्त निषिद्धाः दुःखिता अपि । भेजिरे ते तु सन्तोषं ,साह्यं यावदवाप्नुवन् ॥६१॥
अल्लाहनिर्णयान् कोऽपि न शक्तः परिवर्त्तितुम् । वाग्घराणां तथोदन्ता लब्धा एव त्वया किल ॥६२॥
[35]ध्रुवं चेन्मन्यसे तेषां मुखस्य परिवर्त्तनम् । आविष्कुरु त्वमुर्व्यां वै सुरंगां शक्यते यदि ॥६३॥
सोपानं व्योम्नि चैवाऽपि लक्ष्म यत् किञ्चिदाहर । तांश्च चेत् खलु सोऽल्लाहः ऐषिष्यद् ह्ययने समे ॥६४॥
अकरिष्यत् समेतान् वै; तन्न त्वं मूर्खताद् वृथा । [36]ये हि शृण्वन्ति ते ह्येव मन्यन्तेऽपि, मृतांस्त्वसौ— ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

नेष्यत्युद्‌वोधमल्लाहः तमेवावर्त्तिताः पुनः । ते तथा च भविष्यन्ति; [३७]वदन्तीत्थञ्च ते जनाः ॥६६॥
"वाग्घरेऽस्मिन् कथन्नैवाऽल्लाहेन लक्ष्म काशितम् । ब्रूह्यल्लाहस्तु वै शक्तो लक्ष्मणां काशने परम् ॥६७॥
तेष्वनेके न जानन्ति; [३८]जीवा उर्व्यां चलन्ति ये । पक्षाभ्यां ये च डीयन्ते यूयं व सगणा हि ते ॥६८॥
पुस्तके नास्त्यनिर्विष्टं ह्यस्माभिः किञ्चनाऽपि तु । करिष्यन्ते पुनस्ते तु समेताः स्वं प्रभुं प्रति ॥६९॥
[३९]ते जना वधिरा मूका मग्ना अन्धतमस्यपि । न्यषेधन् अस्मदायातान् ये,ऽल्लाहो यं यथेच्छति ॥७०॥
पथो भ्रंशयते कामात् अध्वन्यारोहयत्यपि । [४०]कथ्यतां—चिन्तितं तावत् कदाचित् किं त्वया यदि ॥७१॥
आपतेद् यातनाऽल्लाहात्, कालो वाऽसौ समापतेत् । त्वयि तत् किमृतेऽल्लाहात् इतरं संस्मरिष्यसि ॥७२॥
सत्यवानसि चेद् (ब्रूहि); [४१](कृच्छ्रे) यद्यपि (उपस्थिते) । तमेवाऽऽह्वयथाऽऽभीलात् यस्मादाह्वयथेच्छति—॥७३॥
तस्मिंस्तत् स शृणात्येव, मन्यध्वे यांस्तथैव च । प्रतिम्नोऽस्य हि तान् यूयं नयत विस्मृतिं पराम् ॥७४॥
[४२]प्रैषयाम गणेभ्यश्च वाग्घरान् हि वयम् पुरा । कतिभ्यश्चित् तथाऽऽपत्सु किञ्च कष्टेष्वमून् वयम् ॥७५॥
प्राक्षिपाम यतस्ते स्युः गमिता विनयं क्वचित् । [४३]दिशोऽस्माकञ्च कष्टानि यदा तेष्वापतन्नपि ॥७६॥
गतास्ते विनयाऽऽपूरं, ह्यमीषां हृदयानि तु । कार्कश्यं यातपूर्वाणि, यदेते चाप्यकुर्वत ॥७७॥
तत्तत् शोभाकरं नाम ह्यमीषां शातनोऽकरोत् । [४४]व्यस्मरंस्ते ततश्चोर्ध्वं यदा तत् यददीयत ॥७८॥
रक्षणाय स्मृतेस्तेभ्यः सर्वद्वाराणि वै तदा । सर्वौदार्यानुबन्धीनि ह्यकार्ष्माऽपावृतानि वै ॥७९॥
तत्समक्षं, ततस्तेषु महानन्दरसोत्तरम् । प्राप्य जातेषु मग्नेषु ह्यकार्ष्मविधृतान् वयम्— ॥८०॥
अकस्मादेव तांस्तावत्, ततस्ते त्वभवन्नति । नैराश्यं गहनं याताः; [४५]इत्थं ये पापिनोऽभवन् ॥८१॥
मूलच्छेदोऽभवत् तेषां, प्रशसां केवलोऽर्हति । अल्लाह एव, लोकस्य प्रभुर्यस्त्वखिलस्य हि ॥८२॥
[४६]ब्रूत—किं चिन्तितं चाऽपि युष्माभिर्हि कदाचन । यद्यल्लाहो हि वशवित्तं श्रवयोश्च दृशोस्तथा ॥८३॥
हापयेत्, हृन्दि चैवाऽपि विदध्यान्मुद्रितान्यथो । कोऽल्लाहादितरो देवस्तामिहावर्त्तयेत्तु यः ॥८४॥
दृश्यतां भद्रभावेन त्वायातान् कैन वै वयम् । वर्णयामः परन्तें तु पराङ् आस्यास्ततोऽपि (हा) ॥८५॥
[४७]ब्रूत किं चिन्तितं चापि युष्माभिर्हि कदाचन । यद्यल्लाहादकस्माद् वा प्रत्यक्षं वाऽपि यातना ॥८६॥
आपतेत् (बत) युष्मासु किन्नु तत् प्रविहाय वै । जालमानन्यो विनाश्येत कश्चित्?; [४८]चैवाऽथवाग्घरान् ॥८७॥
शुभप्रवृत्तिदानेव सचेतःकारकांस्तथा । प्रेषयामो वयं कृत्वा केवलं, तदनन्तरम् ॥८८॥
यस्तु दध्यादिह श्रद्धां कुर्याद् भद्रं तथैव च । ईदृशेषु भयं नाऽपि किञ्चिदप्यापतिष्यति ॥८९॥
कदाचिद् दुःखभाजो वा भविष्यंति न ते क्वचित् । [४९]ये त्वायातान् निषेधन्ति परं नस्तेषु निश्चितम् ॥९०॥
यातना आपतिष्यन्ति सावज्ञा ननु ते यतः । [५०]ब्रूहि-वच्म्येष नो युष्मान्—"कोषान् यद्धारयाम्यहम् ॥९१॥
अल्लाहस्य, परोक्षं वा वेद्म्यशेषं, भवामि वा । कश्चिद् देवोऽनुवर्त्तेऽहं केवलं तद्धि यन् मयि ॥९२॥
प्रकाशं नीयते तावत्, कथ्यतां किं समौ हि तौ । उभावन्धश्च यश्चापि सचक्षुः ? किन्न भोः! धिया—॥९३॥
कार्ये यूयं प्रवर्त्तध्वे ?; [५१]कुरुष्वावहितांश्च तान् । विभ्यत्येतेन ये यद् वै स्वप्रभौ संहता वयम् ॥९४॥
कर्त्तास्महे, विहायैनं नान्यस्तेषाञ्च कश्चन । रक्षिता स्यात् पुनर्मित्रं प्राभिशंसक एव वा ॥९५॥
येन दोषापहन्तृत्वं ह्युदीयात्तेषु (सर्वतः) । [५२]स्वं प्रभुं ये तु वै प्रातः सायञ्चैवाप्युपासते ॥९६॥
प्रसादं प्राप्तुकामा ये तस्य त्वं तान् परास्य मा । यत्ते कुर्वन्ति तेन त्वं ते वा यत्त्वं करोषि हि ॥९७॥
तेन नैव प्रयास्यन्ति संशयं हि कदाचन । इत्थं भूतेऽपि तान् लोकान् त्वं परासिष्यसीह चेत् ॥९८॥
जालमानां जालम एव स्याः; [५३]इत्थं केचित् परीक्षणे । कैश्चिदन्यैरिहास्माभिः क्षिप्ता येन वदन्तु ते ॥९९॥
"किमेते ह्येव तेऽस्माकं येष्वल्लाहो निजां दयाम् । अदर्शयन् न किं वेत्ति तानल्लाहोऽन्तरात्मना ॥१००॥
प्रदर्शयन्ति कार्त्तज्ञं ये हि तम्; [५४]त्वां यदा च ते । उपेयुः श्रद्धरा ये वै ह्यायातेषु भवन्ति नः ॥१०१॥
ब्रूहि—शं वोऽमतात्, स्वस्मिन् दयां युष्मत् प्रभुस्तथा । वर्त्तते खल्वधिष्ठाय येन युष्मासु योऽप्यथ ॥१०२॥
चरेद् दोषं प्रमादेन प्रायश्चित्तं तथा चरेत् । कुर्याद् भद्रञ्च तत् सत्यं ह्यल्लाहो नात्र संशयः— ॥१०३॥
क्षमाशीलो भवत्येष दयालुश्च महांस्तथा । [५५]वयं स्वानित्थमायातान् व्याख्यामो विशदं किल ॥१०४॥
दोषिणां (व्यवहारा) ऽध्वा काशतां सुतरां यथा । [५६]ब्रूह्यहं प्रतिषिद्धोऽस्मि ह्यमीषां परिपूजनात् ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

अल्लाहाद् व्यतिरिक्तानां यान् यूयं ह्वयथेह तु । ब्रूह्यहं युष्मदिच्छानां पालको न भवामि च ॥१०६॥
तत्कृत्वा स्यामहं भ्रष्टो मार्गात् सन्मार्गगश्च न । [57]ब्रूह्यहं स्वप्रभोर्वर्ते श्रित्वा स्पष्टं हि लक्षणम् ॥१०७॥
निषिद्धं तत्तु युष्माभिः, यूयं यस्मात्तथोत्सुकाः । मदधीनं न तत्त्वस्ति, निर्णयेऽधिकृतस्तथा ॥१०८॥
केवलः किल सोऽल्लाहः वक्त्यसौ सत्यमेव च । निर्णेतॄणां पुनश्चासावुत्तमः केवलो मतः ॥१०९॥
[58]ब्रूहि—चेन्मदधीनन्तु यूयं यस्माद् बहूत्सुकाः । अभविष्यन् मिथो नूनं त्वावयोरपि निर्णयः ॥११०॥
अचिरादभविष्यद्धि, जाल्मान् सम्यक् प्रवेत्त्यसौ । [59]तालिकाश्च परोक्षस्य तदधीनाः, विहाय तम् ॥१११॥
नान्यः कोऽपि विजानाति तथोर्व्यामर्णवे च यत् । तत् स एवैष जानाति, नैतत् जानात्वसौ न वा ॥११२॥
पतत् पत्रं द्रुमाच्चैव कणं किंचित् तमस्सु च । नैकमार्द्रञ्च शुष्कञ्च किञ्चित्तन्नांकितं तु यत् ॥११३॥
पुस्तके किल वैशद्यात्; [60]स एवाऽसौ निशासु यो । युष्माकं ग्रसति (प्राणान्) यत्तथाऽऽचरितं दिवा ॥११४॥
युष्माभिस्तद् विजानाति, युष्मांस्तत्रोच्छ्रयत्यपि । निश्चितः पूर्तिमागच्छेदवधिर्येन, तत्पुनः ॥११५॥
सर्वैः स एव गन्तव्यः परावृत्य, ततः स वः । बोधयिष्यति यद् यूयमचेष्टध्वं (निरन्तरम्) ॥११६॥
[61]बन्धकेषु निजेष्वेष पूर्णसामर्थ्यवान् किल । युष्माकं रक्षकान् कृत्वा स (देवान्) प्रेषयत्यथ ॥११७॥
युष्माकं कस्यचिन्मृत्युर्यदा चैवोपसर्पति । अस्माभिः प्रेषिता (देवाः) तेषां (प्राणान्) ग्रसन्ति ह ॥११८॥
प्रमादं कञ्चनाप्येते न तथैवाचरन्ति च । [62]ततः सर्वे तमल्लाहं सत्यं तत् स्वामिनं प्रति ॥११९॥
परावृत्योपनेष्यन्ते, ह्यधिकारी तु निर्णये । केवलः स हि, सोऽत्यर्थं शीघ्रं लेखाकरो मतः ॥१२०॥
[63]कथ्यतां को नु युष्मभ्यं तमोभ्योऽब्धेर्भुवस्तथा । मोक्षदः, कञ्च वा यूयं ह्वयथ विनयाद् रहः ॥१२१॥
"रक्षिता यद् भवेमास्मात् (संकटात्) तेऽनुकम्पया । कृतज्ञानां वयं सत्यं भवेमान्यतमा जनाः ॥१२२॥
[64]ब्रूहि वः संकटादस्मान्मोचयत्यन्यतस्तथा । अशेषात् किल सोऽल्लाहः यूयं तेनाऽप्यमुष्य तु ॥१२३॥
प्रतिम्नोऽन्यानि वस्तूनि घटयथे (त्यहो मतिः !) । [65]ब्रूहि सामर्थ्यभृच्चासौ यातना प्रेषणे किल ॥१२४॥
युष्माकमुपरिष्टाच्च ह्यवस्तात् पादयोस्तथा । विरोधयेन् मिथो वाऽपि प्रविभज्य दलेष्वथ ॥१२५॥
स्वादयेत् क्रूरतां किम्वा ह्यन्योन्यं कलिहेतुना । पश्य वैचित्र्यमापद्य वर्णयामो हि किम्विधम् ॥१२६॥
स्वान् वयं तावदायातान् येन (सम्यग्) विदन्तु ते । [66]न्यषेधंस्ते परं लोकाः सत्यं यद्यप्यदः, वद— ॥१२७॥
नाहं युष्मासु कश्चिद् भोः ! प्रभुत्वेनास्म्यलंकृतः । [67]निश्चितावधिवद्धं वै सर्वं वृत्तं भवेत् किल ॥१२८॥
वेत्स्यथ द्रागिदं यूयम्; [68]यदा पश्येस्तथा जनान् । दुरालोचनसंव्यग्रान् आयातानधिकृत्य नः ॥१२९॥
अपास्याऽऽत्मानमेतेभ्यो यथैते विषयान्तरम् । रताः स्वान्तेन जायेरन्, अकस्माच्चापि शातनः ॥१३०॥
मज्जयेद् विस्मृतौ चेत् त्वाम्, जाते स्मृत्या निवर्त्तने । जाल्मांस्त्वमीदृशान् लोकान् मैवोपस्थाः कदाचन ॥१३१॥
[69]ये हि पापानि निघ्नन्ति न ते तूत्तरदायिनः । तत् कृते तु मनाक् चापि परं तेषां प्रबोधनम् ॥१३२॥
(कृत्यमस्त्येव) यत्तेऽपि विभीयुर्हि कदाचन । [70]त्वं जहाहीदृशान् लोकान् खेलायन्ते स्वकं मतम् ॥१३३॥
महायन्ते पुनः ये च वञ्चिता जीवनेन च । भौतिकेनाऽमुना तान् वै चेतय त्वमनारतम् ॥१३४॥
यथा नैतद् घटेत् कश्चित् स्वार्जनैः पाशितो भवेत् । यन्नाऽस्याऽस्तु विनाऽल्लाहं कश्चिन् मित्रं सुगोपनः ॥१३५॥
प्राभिशंसक एवाऽपि लब्धोऽमुष्य भवेदिह । मोक्षहेतोः प्रदित्सौ च सर्वस्वस्याऽस्य तिष्ठति ॥१३६॥
भवेन्नाङ्गीकृतं तत्तु विनिमयप्रयोजनात् । इमे ते हि जना ये वै पाशिताः स्वाऽर्जनैरिह ॥१३७॥
दुःखदा यातना (भोक्तुं) पातुञ्चैवोद्वलज् जलम् । एभ्यस्तिष्ठति येनैते श्रद्विहीना इहाऽभवन् ॥१३८॥
[71]ब्रूहि—किं तादृशान् भिन्नानल्लाहादाह्वयाम किम् । न ये ऽस्माकन्तु वै शक्ताः साधने बाधने तथा ॥१३९॥
भवामाऽथ परावृत्ता ह्यल्लाहोऽदर्शयद् यदा । अध्वानं पुनरस्मभ्यम्, यथैव कोऽपि मानवः ॥१४०॥
प्रच्युतः शातनैः मार्गात् संभ्रमाप्लावितो भवेत् । भवेदाहूयमानश्च कैश्चित् सार्थैर्निरन्तरम् ॥१४१॥
एह्येह्यत्रेममध्वानं त्वमस्मानेहि चाऽवद । अध्वदर्शनमाल्लाहं ह्येव खल्वध्वदर्शनम् ॥१४२॥
अर्पयेम तथाऽऽत्मानं जगतां सुप्रभौ वयम् । एवं भवाम आदिष्टाः; [72]विभयाम ततस्तथा ॥१४३॥
पूजां प्रतिष्ठितां चैव करवाम, स एव हि । यूयं यत्र समेता वै करिष्यध्वेऽ (न्ततः किल) ॥१४४॥
[73]स एव प्रासृजद् यो वै सत्यनोर्वीं दिवस्तथा । वक्ष्यत्यह्नि तथा यस्मिन् "भवेदं" च भविष्यति ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

[७४]सत्या तस्यैव चाप्युक्तिः, आध्मातञ्च भविष्यति । तूर्यं यस्मिन् दिने राज्यं स्यादस्यैव प्रतिष्ठितम् ॥१४६॥
विवृतं संवृतं सर्वं विजानाति हि सोऽखिलम् । तत्वदर्शी तथा वेत्ता स वै सर्वस्य वर्तते ॥१४७॥
[७५]ध्यायताम्—अजरं तातं स्वमब्रह्मो यदाऽवदत् । प्रतिम्नः किं त्वमिष्टान् वै विदधासि? परन्त्वहम् ॥१४८॥
पश्यामि त्वं त्वदीयाश्च मग्ना वै ज्ञातयः परम् । अज्ञानान्धतमस्स्वेव विस्तृतेष्वति सर्वथा ॥१४९॥
[७६]इत्थंकारं धरित्र्याश्च दिवो राज्यं तथैव च । अलोकयाम ह्याऽब्रह्मं, विश्वस्तानां भवेत् स यत् ॥१५०॥
[७७]छन्ना तस्मिन् यदा रात्रिः भमेकं स तदैक्षत । अवोचत् "मे प्रभुर्ह्येषः" ह्यस्तं तस्मिन् गते त्वसौ ॥१५१॥
अवोचत् 'नास्ति मे स्नेहस्त्वस्तंशीलैः कदाचन । [७८]चमच्चन्द्रं यदाऽपश्यत्—"प्रभुर्ह्येष मम" आह सः ॥१५२॥
परन्त्वस्तं गते तस्मिन् आह-मार्गं न दर्शयेत् । प्रभुर्मे यदि नष्टानां स्यां हि मार्गादहं पुनः ॥१५३॥
[७९]चमत् सूर्यं यदाऽपश्यत्—"प्रभुर्ह्येष मम" आह सः । "महान् सर्वेष्वयम्" ह्यस्तं गते तस्मिन् जगाद सः ॥१५४॥
ज्ञातयो मम ! यान् यूयं प्रतिम्नो वित्थं खल्वहम् । तेभ्यस्तिष्ठाम्युदासीनः; [८०]विरज्याऽशेषपार्श्वतः ॥१५५॥
तमेवाऽहन्तु संरक्तो यो धरित्रीं तथा दिवः । असृजत् न तथा चास्मि तेषां ये मूर्तिपूजकाः ॥१५६॥
[८१]ज्ञातयस्तस्य तेनाऽथ विवादं प्रारभन्त हि । स आह—कि मया सार्धं ह्यल्लाहमधिकृत्य वै ॥१५७॥
विवदध्वे, स मार्गं मे सत्येनाऽदर्शयत् किल । भयं तेभ्यो न मे चैव यान् प्रतिम्नोऽस्य किञ्च भोः ॥१५८॥
कुरुध्वे, न हि यावन्मे प्रभुस्तत् कामयेत तु । पर्याविध्याखिलं ज्ञानात् प्रभुर्मे खलु तिष्ठति ॥१५९॥
चेतिष्यध्वे न किं यूयं ततोऽपि; [८२]करवाणि च । प्रतिमभ्यो भयं कस्मात् कृतिभ्यो वो यदा हि नो ॥१६०॥
विभीथाऽल्लाहसदृक्षान् सृजन्तस्तेन यद्यपि । यूयं नैव समादिष्टाः कर्त्तुमित्थं (कथञ्चन) ॥१६१॥
वित्थ चेद् (वेदनीयोऽहम्) दलयोरुभयोरपि । नैश्चित्यस्य (प्रसादस्य) कोऽधिकार्यधिको भवेत् ॥१६२॥
[८३]श्रद्धरा ये च न श्रद्धामंहोभिर्मिश्रयन्ति च । निश्चिन्तता स्थिरा तेभ्यः सन्नीता ते तथैव च ॥१६३॥
[८४]अयं तर्कोऽस्मदीयो यं ह्यब्रह्माय वयं किल । अयच्छामाऽस्य बन्धूनामाभिमुख्यव्यपेक्षया ॥१६४॥
तस्य दध्मः समुत्कर्षं प्रतीष्टो यस्तु नो भवेत् । प्रभुस्ते तत्वदर्शी च सर्वज्ञश्चेति निश्चितम् ॥१६५॥
[८५]प्रायच्छाम वयं तस्मै इष्वासयाप्यकूपकौ । प्रत्येकं दर्शितो मार्गस्ततः प्राग् नहुषाय च ॥१६६॥
तदपत्येषु दान्यूधः शिलामानोऽथ यूषपः । अयेभहारदूनौ च मूषश्चैवाऽपि दर्शिताः ॥१६७॥
सत् क्रियाऽस्माभिरेवं वै भद्राणां क्रियते किल । [८६]वंश्येष्वयोहयश्चैव पुनरीशजयक्रियौ ॥१६८॥
ईड्याशो भद्रलोकानां प्रत्येकं समजायत । [८७]वंश्येष्वस्याऽस्मयेडश्च यवनाशस्तथैव च ॥१६९॥
अर्यशनोऽथ लूतश्च (मार्गदृश्वान एव ते) । सर्वलोकानतिक्रम्य ह्येतेऽस्माकं परं मताः ॥१७०॥
[८८]पूर्वजानाममुष्याऽथ सन्ततावस्य बन्धुषु । अनेके पुनरस्माभिश्चितास्तेभ्यः प्रदर्शितः ॥१७१॥
नानृजुश्च तथा मार्गः; [८९]इदं खल्वध्वदर्शनम् । अल्लाहेन कृतं, येन यमभिप्रैत्यसौ हि तम् ॥१७२॥
बन्धकानां निजानां वै मार्गं सन्दर्शयत्यरम् । प्रतिम्नां स्थापनात्तेषां परं तैरखिलं कृतम् ॥१७३॥
अन्यथासिद्धमेवाऽत्र; [९०]लोका एते हि ते किल । येभ्यः शास्त्रञ्च शक्तिं च निर्णयस्य तथैव च ॥१७४॥
वाग्घरत्वमदां चापि यदीदानीन्तु ते जनाः । श्रद्हीना अत्र तिष्ठन्ति, तदन्येभ्यो वयं पुनः ॥१७५॥
तादृशेभ्यः प्रदास्यामस्तदेतत् ये न वै क्वचित् । निषेद्धारो भविष्यन्ति सर्वस्याऽस्य (सुनिश्चितम्) ॥१७६॥
[९१]त एते यान् किलाऽल्लाहः सन्मार्गं समदर्शयत् । अन्वितैषां ततो मार्गं, ब्रूहि—मे नास्ति याचना ॥१७७॥
पुरस्कारस्य कस्याऽपि, स्मारणं ह्येव खल्विदम् । केवलं सर्वलोकेभ्यः (वसद्भ्यो जगतीह तु) ॥१७८॥
[९२]अल्लाहस्य कृतोमानस्तैर्न कार्यस्तु योऽभवत् । यदा ते प्राहु—"रल्लाहः कस्मिंश्चित् चापि मानवे ॥१७९॥
प्राकाशयन् न किं चापि (याहूदाहांस्तु तान्) वद । कः पुनः पुस्तकं तद् वै प्रकाशं नीतवान् हि यत् ॥१८०॥
आयातो मूष आदाय लोकेभ्यो मार्गदर्शनम् । प्रकाशं चैव यद् यूयं निधत्थ पत्रशस्तथा ॥१८१॥
दर्शयथ, परं यूयं निह्नुध्वेऽपि ततोऽधिकम् । शिक्षिताश्च कृता यूयं तेषु तेषु हि वस्तुषु ॥१८२॥
युष्माकं पूवजश्चापि यन्नाजानन्, त्वमावद । "अल्लाहेन" ततस्तूर्ध्वं जहीह्येतान् समारतान् ॥१८३॥
तर्कवाचां प्रपञ्चेषु; [९३]पुस्तकं चेदमस्ति तत् । प्रकाशं यत् समानीतं किलाऽस्माभिस्तथैव यत् ॥१८४॥
सौभाग्यस्य करं तावत् पोषणं यदितः पुरा । (प्रकाशं तेन चानीतं) येन त्वं ग्राम-केन्द्रकम् ॥१८५॥

CC-0. In Public Domain. Digitized by eGangotri

अमुष्य प्रतिवेशांश्च चेतयेः, अथ ये जनाः । परस्मिन् श्रद्धराः लोके श्रद्धरा अत्र चापि ते ॥१८६॥
पूजां सम्यक्तया कर्तुं (सदैवाऽ) वहिताश्च ते । [94]जालमस्तस्मात् तथा कःस्यात् अल्लाहे ह्यनृतं तु यः ॥१८७॥
आरोपयेद् वदेच्चापि मयीदं तु प्रकाशितम् । तस्मिन् यद्यप्यभून्नैव काशितं कथयेत् तथा ॥१८८॥
यथाऽल्लाहेन तद्वद्धि काशयिष्याम्यहं त्वपि । पश्येत यदि तान् यूयं (विचित्रां तें गता दशाम् ॥१८९॥
भविष्यन्ति) यदा जालमा मृत्युजम्भेष्ववस्थिताः । कालदूतास्तथा दोषः सारयन्तो वदन्ति च ॥१९०॥
आत्मनः स्वान् हि नो दत्त सावमानाश्च यातनाः । भविष्यन्ति हि युष्माकं, कारणं खल्वदो यतः ॥१९१॥
अल्लाहं समधिकृत्य मिथ्या वै भाषितं तथा । तदाऽयातान् पुरस्कृत्य सावमानं विचेष्टितम् ॥१९२॥
[95](भणिष्यत्येवमल्लाहः) सृष्टोऽभूः प्रथमं यथा । तथैवैकः समायातस्त्वं मां, यच्चाप्यदीयत ॥१९३॥
पराङ् तच्चापि विसृष्टम्, न प्रपश्यामि चैव तान् । त्वयाऽहं प्राभिशंसितृन् यानवोचस्त्वमीदृशम् ॥१९४॥
"अस्माकं व्यतिरेकेण समकक्षास्तु तेऽपि वै" । युष्माकं बन्धुभावो हि नष्टः सर्वोऽपि साम्प्रतम् ॥१९५॥
युष्मान् विहाय ते याता, येषु वः साभिमानता । [96]गुहलीनकणादीनां अल्लाहः स्फोटनो ध्रुवम् ॥१९६॥
निर्जीवेभ्यः सजीवान्तसः सूते निर्जीवकांस्तथा । सजीवेभ्योऽयमल्लाहो हीदृशः विपथा ततः ॥१९७॥
गम्यते केन युष्माभिः; [97]ह्युषसः स्फोटनो ह्यसौ । विश्रामाय निशां चक्रे सूर्याचन्द्रमसौ तथा ॥१९८॥
विवेक्तुं हि धिया चक्रे स्थिरो मानोऽयमस्ति वै । तस्य यो वर्तते विज्ञः प्रभुत्वात् शालते च यः ॥१९९॥
[98]स एवाऽसौ हि युष्यभ्यं सृष्टवान् नारकाणि यः । यूयं यैः सुविजानीत भूम्यामब्धौ तमस्सु हि ॥२००॥
अध्वानं विशदं तावत्, विज्ञेभ्योऽवर्णयाम च । आयातान्विशदीकृत्य वयम्; [99]किञ्चास्त्यसौ हि यः ॥२०१॥
एकस्मादात्मनो ह्येव ससर्ज वस्तथाऽददात् । एकमावसथं किञ्च धामैकं शरणाय वः ॥२०२॥
विज्ञेभ्यो वयमायातान् स्पष्टतोऽवर्णयाम च । [100]स एवाऽयं जलं व्योम्नो यो हि वर्षति तद् वयम् ॥२०३॥
बानस्पत्यं पुनस्तेन भावयामः पृथग्विधम् । क्षेत्राणि श्यामलांगानि क्षुपान् वृक्षान् तथा लताः ॥२०४॥
भावयामस्ततस्तेन सर्वतश्चाचितान् कणान् । खर्जूरीकक्षगर्भेषु लम्बन्ते चापि गुच्छकाः ॥२०५॥
भावयामस्तथाऽऽरामान् जयतन्वाः तथैव च । स्वाद्वीनां दाडिमानाञ्च समांश्चाप्यसमानपि ॥२०६॥
ते फलन्ति यदा तेषां त्वं प्रपश्य फलं तथा । पाकोन्मुखत्वमप्येषां पश्य तन्नात्र संशयः ॥२०७॥
एषु सर्वेषु लक्ष्माणि श्रद्धरेभ्यो भवन्ति ह । [101]जिनानल्लाहसदृक्षान् किञ्च लोका अकल्पयन् ॥२०८॥
तांश्चापि वस्तुतोऽल्लाहो ह्येव वै सृष्टवान् यदा । अविज्ञायैव तत्पुत्रान् पुत्रीश्चैवाऽप्यकल्पयन् ॥२०९॥
महिम्ना शालतेऽसौ हि, यैर्गुणैस्तं स्तुवन्ति च । ते ततोऽप्यधिकास्तावत्; [102]स्रष्टाऽसौ वर्त्तते किल ॥२१०॥
धरित्र्याकाशरूपाणां विस्मयोद्भाविनां पुनः । अकलत्रो यदाऽऽस्तेऽसौ पुत्रस्तस्य भवेत् कथम् ॥२११॥
असृजत् सर्ववस्तूनि सर्वविच्च भवत्यसौ । [103]ईदृशः किल सोऽल्लाहः प्रभुर्वो नान्तरेण तम् ॥२१२॥
प्रतीष्टः कोऽपि, स्रष्टाऽसावत्र सर्वस्य वस्तुनः । केवलं तं हि वन्दध्वं, सर्वेषां धारकस्त्वसौ ॥२१३॥
[104]नोपयन्ति दृशस्तन्तु, स दृशः समुपैति तु । अत्यर्थं सूक्ष्मदर्शी च धारकश्चाप्यसौ पुनः ॥२१४॥
[105]प्रभोर्वश्च प्रमाणानि युष्मान् प्राप्तानि किञ्च(भोः)। यश्चरिष्यति वै बुद्धया भवेद् भद्रममुष्य हि ॥२१५॥
अबुद्ध्या त्वाऽचरन्नन्धः स्वस्यैवाभद्रकृद् भवेत् । नाधितिष्ठामि किञ्चाऽपि ह्यहं युष्मान् कथञ्चन ॥२१६॥
[106]वर्णयामो निजायातान् इत्थमेव वयं, यतः । लोका वदेयुरेते यत् "कस्माच्चित् पठितोऽसि हि ॥२१७॥
काशयेम पुनश्चैतत् ज्ञानवत्सु वयं किल । [107]तदेवाऽन्वित युष्मासु काशितं तु प्रभो र्हि वः ॥२१८॥
प्रतीष्टोऽन्यो न वै तस्मात् मान्वित मूर्त्ति-पूजकान् । [108]नाऽभविष्यन्निमे तावत् मूर्त्तीनां पूजका यदि ॥२१९॥
ऐषिष्यत् किल सोऽल्लाहः रक्षकत्वेन नाप्यथ । अकृष्महि वयं चैषु त्वां न वोत्तरदायिनम् ॥२२०॥
[109]ह्वयन्ते यानिमे ऽल्लाहाद् बिना निन्दत तांश्च मा । कदाचित् पुनरज्ञानात् मर्यादामतियाय ते ॥२२१॥
अल्लाहञ्चापि निन्देयुः, इत्थमापाततो वयम् । रम्यदृश्यानि कर्माणि दलानां खल्वऽकृष्महि ॥२२२॥
तैः परावृत्य गन्तव्यः स्वप्रभुः किल वर्तते । अचेष्टन्त यदप्येते स वै तान् बोधयिष्यति ॥२२३॥
[110]अल्लाहेन शपन्त्येते सगाम्भीर्यं कदाचन । उपेयाल्लक्ष्म तान् किंचित् चेदवश्यं पुनस्तु ते ॥२२४॥
तत्राऽऽधास्यन्ति हि श्रद्धाम्, ब्रूहि तान् त्वमिदं ततः । "लक्ष्माण्यल्लाहपार्श्वे वै" न चेदं वेत्सि ते जनाः ॥२२५॥

CC-0. In Public Domain. Digitized by eGangotri

उपेतेष्वपि खल्वेषु न वै स्युः श्रद्धराः क्वचित् । [111]व्याकुलानि विधास्यामः चक्षूंष्येषाञ्च हृन्दि च ॥२२६॥
यथा पूर्वमिमेऽतिष्ठन् श्रद्विहीना अमुत्र हि । एषां त्यागं करिष्यामो यथैते पर्यटन्तु वै ॥२२७॥
आत्मनाशनकार्येषु व्यापृता अन्धतां गताः ।

इति सप्तमं पारायणम्

अथ अष्टमं पारायणम्

। [112]प्रेषिता अभविष्यंश्चेदेषु देवा अपि क्वचित् ॥२२८॥
अलपिष्यन् मृताश्चापि यदेतान् यदि चाऽपि वा । वस्तून्यस्थापयिष्यंश्च यानि कानिचिदप्यथ ॥२२९॥
अमीषां सम्मुखं नैते श्रदधास्यंस्ततोऽपि च । जातेऽल्लाहस्य कामे तु कथाऽन्या, बह्वो जनाः ॥२३०॥
ततोऽप्येषां विमूढ़ा हि; [113]प्रतिपक्षः कृतोऽभवत् । प्रत्येकं वाग्घरस्येत्थं किलाऽस्माभिर्हि शातनः ॥२३१॥
नृणां चैव जिनानाञ्च ये सदा वञ्चनापराः । माधुर्यासिक्तवाचाभिः नैते कुर्युस्तथा यदि ॥२३२॥
प्रभुर्वः साभिलाषः स्यात् यूयमेनान् जहीत तत् । वाचां प्रागल्भ्यमेषाञ्च; [114]यतो ये न जना इह ॥२३३॥
विश्वसन्ति परं लोकं, ते चाप्येतदुशन्तु हि । प्रसादञ्चाऽत्र मन्येरन्, समारम्भांस्तथाऽप्रियान् ॥२३४॥
कुर्युर्यथाऽभिलाषञ्च कर्तुं यांस्ते समुद्यताः । [115]मार्गयेयमृतेऽल्लाहं निर्णेतारमहं नु किम् ॥२३५॥
काशितं पुस्तकं तेन युष्मान् यद्यपि, यत्र च । वैशद्याद् वर्णनं ह्यास्ते, येभ्योऽस्माभिरदीयत ॥२३६॥
पुस्तकं तेऽपि जानन्ति सत्येनाऽऽकाशितंन्विदम् । प्रभो र्वःस्तेन न त्वञ्च सन्देहाऽऽप्लुतचेतसाम् ॥२३७॥
भवेहैकतमस्तावत्; [116]त्वत् प्रभोर्वचनं तथा । न्याय-सत्य-समापूर्णं, तदुक्तं नाऽपि कश्चन ॥२३८॥
शक्नोतीहाऽन्यथाकर्तुं, श्रोता विज्ञस्तथैव सः । [117]लोकेऽनेके जना येषामुक्तं त्वं परिपालयन् ॥२३९॥
अनुयास्यसि चेन्मार्गं त्वान्तेऽल्लाहस्य वर्त्मनः । भ्रंशयिष्यन्ति वै लोका, विचाराऽध्वानुवर्तिनः ॥२४०॥
केवलं ते, तथाऽऽरुढा ऊहापोहे हि केवले । [118]त्वत् प्रभुर्वेत्ति तं सम्यग् विहीनो योऽध्वनो ध्रुवम् ॥२४१॥
वेत्ति तञ्चाऽप्यसौ सम्यग् यो हि सन्मार्गमाश्रितः । [119] तस्याऽऽयातेषु सश्रद्धा यदि यूयन्तु तिष्ठथ ॥२४२॥
तं यूयमत्त यत्राऽऽस्तेऽल्लाहनाम प्रकीर्त्तितम् । अद्य: [120]कस्मात् न युष्माभिस्सोऽल्लाहनाम यत्र तु ॥२४३॥
भवेदुच्चारितं तावत् यदाऽवैधन्तु यन्मतम् । युष्मभ्यं तदशेषेण ह्यसावादिष्टवान् पुरा ॥२४४॥
पारवश्यं गता यूयं यदि तत्र, कथान्तरम् । भ्रश्यन्ते बहवस्त्वत्र कामैरज्ञानतः किल ॥२४५॥
प्रभुस्ते वेत्त्यसौ सम्यक् सीमात्याचारिणो ध्रुवम् । [121]जहाहि त्वं पुनः पापं व्यक्ताऽव्यक्तोभयात्मकम् ॥२४६॥
ध्रुवं ये पापभाजस्ते स्वकृतानां फलं ह्यरम् । लब्धारः; [122]नाम नाऽऽल्लाहं यत्र तूच्चारितं भवेत् ॥२४७॥
न स त्वद्यो भवेज्जन्तुरवज्ञा स्यादितोऽन्यथा । कलहाय त्वया सार्धं शातनो निजबल्लभान् ॥२४८॥
समुत्साहयतीत्यत्र संशयो नैव लेशतः । तेषां यद्यनुगन्तृत्वं तावकं (भोः !) भविष्यति ॥२४९॥
प्रतिमापूजकानान्त्वं ध्रुवं ह्येको भविष्यसि । [123]जनोऽसौ यो मृतः पश्चात् जीवितश्च तथा कृतः ॥२५०॥
अर्पितञ्च प्रकाशं यः समादाय विसर्पति । लोकाल्लोकं न किं तावत् स तुलां याति तेन यः ॥२५१॥
तमस्स्वन्तर्निविष्टः स्यात् नोत्त्थानाय च यत्नवान् । श्रद्विहीनजनेभ्योऽपि हीत्थं शोभाकरं कृतम्— ॥२५२॥
तत्तद् यत्ते प्रकुर्वन्ति; [124]वयमेवं पुरीं पुरीम् । न्यवेशयाम तत्रत्यान् महादोषकरान् जनान्— ॥२५३॥
छलानां यत् प्रपच्चे ते मज्जेयुः, न परन्तु ते । विदन्ति वञ्चयन्त्येते त्वात्मनो ह्येव नेतरम् ॥२५४॥
[125]उपैत्येतान् यदा किंचिल् लक्ष्मैते कथयन्ति यत् । 'तावच्छ्रद्धां न यास्यामो यावद् दत्तं न वै भवेत् ॥२५५॥
तद्रूपं लक्ष्म यद्रूपं वाग्घरेभ्यो ह्यदीयत । अल्लाहेन पुरा' ऽल्लाहो वेत्ति सम्यग् हि तं जनम्—॥२५६॥
सन्देष्टव्यो भवेद् यस्तु, सापराधा हि ये ऽभवन् । अल्लाहाच्छीघ्रमेवैतान् पराभूतिरवाप्स्यति ॥२५७॥
कर्कशा यातनाश्चैव दुर्नयाऽऽजीविताकृते । [126]नेतुमिच्छति सन्मार्गं यमल्लाहस्स तस्य वै ॥२५८॥
उरः स्फालयतेऽत्यर्थं ह्यात्मनोऽर्पणताकृते । पथश्च्यावयितुं यञ्च तस्य कामो भवेदिह ॥२५९॥
उरः संकुचितं तस्य मुकुलस्य दशां गतम् । असौ करोति खल्वेव ह्युत्पतिष्णुर्यथा भवेत् ॥२६०॥
श्रद्धरा ये न, तेष्वित्त्थं मलारोपं करोत्यसौ । [127]सोऽयमृजुः प्रभोस्ते वै वर्त्ततेऽध्वा, वयन्तथा— ॥२६१॥

CC-0. In Public Domain. Digitized by eGangotri

जनेभ्योऽवहितेभ्यो वै वैशद्येन पुनः किल । व्याख्यामस्स्वान् सदाऽऽयातान्; [१२८]तेभ्यस्तेषां प्रभौ तथा ।।२६२।।
शान्तेरावसथं चाऽऽस्ते मित्रं संरक्षकश्च सः । तेषां यद् यत् कृतं त्वेभिः, तस्य तस्य हि कारणात् ।।२६३।।
[१२९]पर्यावृत्य यदा चैतान् संहनिष्यत्यसौ तदा । वक्ष्यति—"जिन संघात ! त्वयाऽनेके हि मानवाः ।।२६४।।
सत्पथो भ्रंशिताः सम्यक्" तेषां येऽन्धानुयायिनः । स्वामिन्नः ! ते वदिष्यन्ति 'मिथो लाभान्विता वयम् ।।२६५।।
अस्मभ्यं निश्चितं कालं त्वया प्राप्ता वयं तथा" । प्रत्यसौ वक्ष्यति त्वेतान्—"अग्निर्वै शरणन्तु वः" ।।२६६।।
युष्माकं स स्थिरो वासः, ह्यल्लाहेच्छा तु चेद् भवेत् । कथैवान्या भवेत् तर्हि, सन्देहो नाऽत्र वः प्रभुः ।।२६७।।
तत्वदर्शी च विज्ञश्च; [१३०]जालमानित्थं वयन्ततः । सशक्तान् प्रविधास्यामः परेष्वेषान्तु तैः कृतैः ।।२६८।।
यानिमेऽकार्षुरश्रान्तम्; [१३१]जिनमानवयूथजाः ! । किन्न युष्मांश्च युष्माकं समुपेता हि वाग्घराः ।।२६९।।
श्रावयन्ति स्म ये युष्मान् ममायातानथापि च । दिनस्योपगमादस्य भीषयन्ति स्म चापि ये ।।२७०।।
वक्ष्यन्ति—"साक्षिताऽस्माकं स्वविरोधे स्वतोऽद्य तु" । भौतिकं जीवनं तान् वै पथभ्रष्टान् बताऽकरोत् ।।२७१।।
"श्रद्विहीना अतिष्ठाम" तदित्थं ते स्वयं पुनः । वक्ष्यन्ति साक्षितां तावत् स्वविरोधे समुद्यताम् ।।२७२।।
[१३२]इदञ्चास्माद् यतो वासान् प्रभुर्वो न समुद्यतः । उत्खातुं हि यतस्तेषां वासिनस्ते हि सर्वथा ।।२७३।।
निस्संज्ञाः किल तिष्ठन्ति (तस्मिन् यद् यच्चरन्ति ते) । [१३३]कर्मणामानुरूप्येण सर्वः श्रेणीगतो जनः ।।२७४।।
यद् यच्चरन्ति ते तस्मादनभिज्ञो न वः प्रभुः । [१३४]अनपेक्षः प्रभुर्वोऽसौ दयालुश्चापि विद्यते ।।२७५।।
इच्छा—मात्रेण किञ्च त्वां परास्येदितरं तथा । इच्छयारोहयेद् वापि तस्मिन् स्थाने तथा यथा ।।२७६।।
उद्धृतस्त्वमभूस्तावत् सन्तत्याऽन्यजनस्य वै । [१३५]तद् घटिष्यत्यसन्देहं यद्युष्मभ्यं प्रतिश्रुतम् ।।२७७।।
न ततो रक्षणोपायश्चापि वः कोऽपि विद्यते । [१३६]ब्रूहि-लोकाः ! यथाशक्ति कर्त्तव्ये तिष्ठताऽऽरताः ।।२७८।।
अहञ्चाप्यारतो वर्त्ते, यूयं सद्योऽथ वेत्स्यथ । यस्मै तस्य शुभोदर्को भावि, नैवाऽत्र संशयः ।।२७९।।
नो गमिष्यन्ति साफल्यं जालमा अत्र कदाचन । [१३७]अल्लाहादथ सृष्टानां पशूनाञ्च कृषेस्तथा ।।२८०।।
अल्लाहार्थमिमे लोका भागमेकमकल्पयन् । आहुरेवं तथा चैते—"भागोऽल्लाहार्थमेष तु ।।२८१।।
अयं चान्यः प्रतिम्नोऽस्य ह्यस्माभिर्ये प्रतिष्ठिताः । तैर्ये प्रतिष्ठितास्तेषां प्रतिम्नां वर्त्तते तु यः ।।२८२।।
भागस्तं न किलाऽल्लाहो भजेत् सत्यं कदाचन । अल्लाहस्य परं भागं तैर्ये तावत् प्रतिष्ठिताः ।।२८३।।
सत्यं भजन्ति ते त्वेव प्रतिमानो, जना इमे । निर्णयं हन्त ! कुर्वन्ति विगीतं सुमहत् ततः ।।२८४।।
[१३८]प्रतिमभिरमीपाञ्च तदित्थं सन्ततेरपि । वधस्स्वस्या हि शोभायाः कृतं धामकृते नु वै ।।२८५।।
मूर्त्तिपूजकलोकानां बहूनां येन ते किल । नीयेरन् सुतरां नाशं मतञ्चैषां कृतं भवेत् ।।२८६।।
भ्रामकं जालकं, ते तु नाकरिष्यन्नपीदृशम् । नैषिष्यद् यदि सोऽल्लाहः; जहीहि त्वं तु तेन तान् ।।२८७।।
अनृताऽऽडम्बरं यच्च ते समुत्थापयन्ति तत् । [१३९]चिन्तयन्तस्तथाऽऽहुस्ते—"कृषीयं पशवोऽप्यमी ।।२८८।।
निषिद्धा वै कृताः सन्ति, शक्नोत्यत्तुं स एव तु । वयं यान् निर्दिशामो वै, पशवस्तादृशा अपि ।।२८९।।
अवैधं खलु निर्दिष्टं येषां पृष्ठं ततोऽपरे । तादृशाः पशवश्चापि नाल्लाहनामकीर्त्तनम् ।।२९०।।
(बधे येषां) भवत्येव, कल्पितमनृतं समम् । अल्लाहाय भवत्येभिः, सद्योऽल्लाहश्च तान् पुनः ।।२९१।।
तत्कृतैरनृतैः सम्यक् पुरस्कर्त्तेत्य (संशयम्) । [१४०]आहुरेते—"पुनश्चैषां जन्तूनामुदरेषु यत् ।।२९२।।
वैधं पुंभ्यः परं स्त्रीभ्यस्तदवैधं हि तिष्ठति । अंशभाजस्तु ताश्चापि मृतो गर्भे भवेद् यदि" ।।२९३।।
प्रतीदानं विधाताऽसावचिरं चित्रकल्पनात् । तत्वदर्शी च विज्ञश्च वर्त्ततेऽपावसंशयम् ।।२९४।।
[१४१]हानिभाजो हि ते लोका अज्ञानान् मूर्खतावशात् । येऽघ्नन् स्वान्यप्यपत्यानि ह्यवैधं चाप्यघोषयन् ।।२९५।।
अल्लाहेनार्पितं खाद्यं ह्यल्लाहेऽनृतकल्पनात् । वस्तुतस्ते पथोभ्रष्टा द्रष्टारो नाऽयनं पुनः ।।२९६।।
[१४२]स वै यश्चाकृताऽऽरामान् जालकोद्गलतान् तथा । तद् विहीनांश्च, खर्जूरान् कृषिं भिन्नफलामपि ।।२९७।।
दाडिमान् जयतन्वानं, समाञ्चाप्यसमांस्तथा । फलिष्वेतेषु जातेषु भोक्तव्यानि फलान्यपि ।।२९८।।
यदा चाऽऽहरणावस्था समुपेता भवेत्तदा । न्याय्यांशस्तस्य देयो वै, मर्यादाया अतिक्रमः ।।२९९।।
विधेयो नैव, नो रुच्या ह्यल्लाहाय तु ते जनाः । क्रियासु ये प्रवर्त्तन्ते मर्यादातिक्रमेण वै ।।३००।।
[१४३]पशूनां चासृजत् कांश्चित् पृष्ठतो भारवाहिनः । कांश्चिदन्यान् लघूच्छ्रायान्, अल्लाहो यत्त्वदादिह ।।३०१।।

CC-0. In Public Domain. Digitized by eGangotri

ततो भुङ्ध्वं, न चैवाऽपि पद्धतिं यूयमन्वित । शातनस्य, स युष्माकं प्रोद्भिन्नोऽरि र्न संशयः ॥३०२॥
[144]युगान्यष्टौ अवीनां द्वावजानां द्वावथाऽपि च । ब्रूहि—"तेन निषिद्धौ किं पुमांसावथवा स्त्रियौ ॥३०३॥
किं वा गर्भौ स्त्रियोर्यच्च पुष्यतो विशदं वद । ज्ञानपूर्वं निजं चेत् त्वं सत्यवन्तं हि मन्यसे ॥३०४॥
[145]उष्ट्राणां द्वौ गवां द्वौ च निषिद्धौ तेन किं ! वद । पुमांसौ वा स्त्रियौ वाऽपि, स्त्रीभ्यां गर्भे च यद्धृतम् ॥३०५॥
समीपस्थोऽथवाऽभूस्त्वं किमल्लाहो यदाऽदिशत् । इदं सर्वं, ततः को वा महापापो भविष्यति— ॥३०६॥
विना ज्ञानं मनुष्यान् यः पथो भ्रंशयितुं पुनः । अल्लाहे सत्यमादध्यात्, जालमान् लोकानसंशयम् ॥३०७॥
दर्शयत्येव नाऽल्लाहः सन्मार्गन्तु कदाचन । [146]ब्रूहि यन्मे प्रकाशोऽभूत् नावैधं तत्र किञ्चन— ॥३०८॥
जिघत्सुभ्यो हि पश्यामि त्यक्त्वा प्रेतं प्रवाहितम् । रक्तं शूकरमासञ्च ह्यमेध्यं यच्च निश्चितम् ॥३०९॥
मर्यादाऽपहृतं यच्च, यत्र नाम च कीर्त्तितम् । ऋतेऽल्लाहात् परस्यैव, भवेद् यो विवशस्तु वै ॥३१०॥
अनिच्छुर्यो भवेद् यो वा सीमानं नातियाति च । दयालुस्तत् क्षमाशीलः स प्रभु र्वर्तते हि वः ॥३११॥
[147]येऽभवन् याहूदाहाश्च सनखाः पशवः किल । तेभ्योऽवैधाः कृताः, लग्नां पृष्ठान्त्रेष्वस्थिगामपि ॥३१२॥
प्रविहाय, तथेयञ्च तेषां तावत् पुरस्क्रिया । नाशनाऽध्वाऽनुवर्त्तित्वात्, वयं सत्यास्सनिश्चयम् ॥३१३॥
[148]ततो मिथ्यापयेयुस्ते यदि त्वां ब्रूहि—वः प्रभुः । विश्वङ् दयामयस्तावत्, नापराद्धेष्वमुष्य च ॥३१४॥
शक्यन्ते यातनाश्चापि हापयितुं कथञ्चन । [149]मूर्त्तिस्तुताः प्रवक्ष्यन्ति ह्यैषिष्यच् चेत् कदाचन ॥३१५॥
अल्लाहो नाऽकरिष्याम प्रतिम्नो, न वयं तथा । पूर्वजा वाऽपि नास्माकं त्ववैधं किञ्चनाऽपि तु ॥३१६॥
घोषितं त्वकरिष्यन् वा," ह्यनेन विधिनैव च । एषां पुरा गता लोकाश्चाप्यमिथ्यापयंस्ततः ॥३१७॥
अस्माकं कटुकष्टानामलभन्त च ते रसम् । ब्रूहि किं ध्रियते ज्ञानं किञ्चित् स्यात क्षमा हि यत् ॥३१८॥
न्यासायास्माकमग्रे वै ? यूयं लोकास्तु केवलम् । भावेनैव प्रवर्त्तध्वे कल्पनालोकमुद्गताः ॥३१९॥
[150]ब्रूहि—केवलमल्लाहो ह्येव तर्कान्तगो; यदि । ऐषिष्यत् स पुनर्युष्मान् अनेष्यत् साधुवर्त्मनि ॥३२०॥
[151]ब्रूहि तान्—साक्षिणो यूयं समुपानयतेह ये । साक्ष्यं कुर्वन्त्यवैधं वै ह्यल्लाहस्त्वकरोदमुम् ॥३२१॥
साक्ष्यं ते यदि कुर्वन्ति तैः साक्ष्यं त्वन्तु मा कृथाः । माऽनुयायाश्च तत् कामान् न्यषेधन् ये तु मामकान् ॥३२२॥
आयातान्, श्रद्विहीनाश्च परलोके भवन्ति ये । स्वप्रभोः समकक्षांश्च विदधतीतरानपि ॥३२३॥
[152]ब्रूह्युपैत वदेयं वो यत् कर्त्तव्यं प्रभुर्हि वः । अकरोन् ननु युष्मभ्यं तदेतत्—समकक्षताम् ॥३२४॥
तस्य कश्चिन्न नेतव्यः, पितृभ्यां साधुवर्त्तनम् । कर्त्तव्यम्, न च हन्तव्या दारिद्रयात् सन्ततिर्निजा ॥३२५॥
यतस्तस्यै च वश्चैव दद्माऽन्नं वयमेव तु । अश्लीलं व्यक्तमव्यक्तं मा यासिष्ट च किञ्चन ॥३२६॥
हिंसिष्ट नाप्यवैधं यं किलाल्लाह इहाकरोत् । तं विहाय तु हन्तव्यो यो भवेन्न्यायवर्त्मनि ॥३२७॥
इदं सर्वं तदादिष्टं युष्मभ्यं वर्त्तितुं धिया । [153]नैदोऽनाथस्य रिक्तस्य न यूयं यात र्कहिचित् ॥३२८॥
विहाय (तत् प्रबन्धस्य मनस्स्थां) रीतिमुत्तमाम् । यावन् नासौ वयस्कः स्यात्; न्याय्यं पूर्णं तथैव च ॥३२९॥
मान्यं तौल्यं च दातव्यम्, नैव कञ्चिज् जनं वयम् । तस्य शक्तिमतिक्रम्य भारवन्तं विदध्महे ॥३३०॥
न्यायपूर्वञ्च वार्त्तानां प्रसंगेष्वनुसज्जत । वान्धवैरपि तन् नाम सम्पृक्तं स्यात् ततोऽपि किम् ॥३३१॥
अल्लाहेन समं या च प्रतिज्ञा साऽपि पूर्यताम् । इदं सर्वं समादिष्टं तेन वश्चिन्तनाय हि ॥३३२॥
[154](समादिष्टम्) इदञ्चापि ममाध्वायमृजुस्तथा । अन्वितैनं हि तद् यूयं नातोऽन्यम्, त्वितरे यथा ॥३३३॥
तत्पथो भ्रंशयिष्यन्ति त्वाम्, इदं यत् स दिष्टवान् । सभयस्तिष्ठताद् येन त्वं सदैव; [155]वयं पुनः— ॥३३४॥
मूषायाददम वै शास्त्रं, पूर्णं भद्रकृतेऽथ च । वर्णयितृ सवैशद्यं विविधस्यापि वस्तुनः ॥३३५॥
दर्शकं चाध्वनः, किञ्च दयारूपं यथैव ते । स्वप्रभोर्दर्शनादूर्ध्वं जायन्तां श्रद्धराः किल ॥३३६॥
[156]इदं सौभाग्य कृच् छास्त्रं यदस्माभिः प्रकाशितम् । इदं चान्वेहि तत्, किञ्च तिष्ठतात् सभयो यथा ॥३३७॥
त्वं दयापात्रतां गच्छेः; [157]न चैवं त्वं वदेः क्वचित् । काशितं ह्यभवच् छास्त्रं सम्प्रदायद्वये पुरा ॥३३८॥
केवले, न वयञ्चास्म विज्ञा यत्ते ततोऽपठन् । [158]क्वचित् त्वं न वदेश्चैवम् शास्त्रमस्मासु खल्वथ ॥३३९॥
काशितं ह्यभविष्यच् चेत् ऋजौ मार्गे ततो वयम् । सुतरामभविष्याम तेभ्यः, तत् समुपागतम्— ॥३४०॥
त्वां प्रभोस्तेऽस्ति विस्पष्टं लक्ष्म मार्गस्य दर्शकम् । दयाधाम; ततः कोऽन्यो भवेज् जाल्मो निषेधतु ॥३४१॥

CC-0. In Public Domain. Digitized by eGangotri

आयातान् यः किलाऽऽल्लाहान्, पराङास्यश्च यो भवेत् । तेभ्यो, येऽत्र जनास्तावत् पराङास्या भवन्ति ह ।।३४२।।
आयातेभ्योऽस्मदीयेभ्यः, शीघ्रं दुष्टा हि यातनाः । वयं तेभ्यः प्रदास्यामः तद् विरोधस्य कारणात् ।।३४३।।
[१५९]किं प्रतीक्षापराश्चैते यद् देवा उपयन्त्वमून् । स्वतश्चाऽथ प्रभुर्वो वा लक्ष्म वोपैतु किञ्चन ।।३४४।।
प्रभोर्वः किल लक्ष्माणि ह्युपैष्यन्ति यदैव तान् । साधयिष्यति नो कार्यं श्रद्धा तस्य तु पूर्वतः ।।३४५।।
यः स्थितो नैव सश्रद्धः, भद्रकार्यमथापि यः । श्रद्धया नाकरोत् किंचित्, प्रतीक्षस्वेति तं वद ।।३४६।।
आत्मना वयमेतेऽपि सम्प्रतीक्षामहेऽथ च । [१६०]खण्डशो ये मतं नैजं समकुर्वन्, तथाऽऽत्मना ।।३४७।।
दलेषु व्यभजंश्चैव सामरस्यं क्व तैस्तु ते । प्रसंगस्त्वखिलोऽमीषां ह्यल्लाहाधीनतां गतः ।।३४८।।
बोधयिष्यत्यसावेव तानकुर्वंस्तु यद्धि ते । [१६१]योऽपि भद्रं चरेदत्र भवेत् तस्य पुरस्क्रिया ।।३४९।।
दशभिर्गुणिता तावत्, अभद्रं चाऽऽचरेत्तु यः । पुरस्क्रिया तु तन्मात्रा ह्येव तस्य भविष्यति ।।३५०।।
नाति वै दण्डितश्चापि कश्चिदत्र भविष्यति । [१६२]ब्रूह्यसौ मे प्रभुर्मार्गमृजुं मां समदर्शयत् ।।३५१।।
सर्वथैवोचितो मार्गः, मार्गोऽब्रह्मस्य यः किल । यो विहायाऽखिलान् एकं ह्येव तावत् स्थिरोऽभजत् ।।३५२।।
नाभवच् चाप्यसौ किञ्च कथञ्चित् प्रतिमास्तुताम् । [१६३]ब्रूहि तावत्—सपर्या मे, हविर्मे जीवनञ्च मे ।।३५३।।
मृत्युश्चाप्यथ मे किंच ह्यल्लाहायैव वर्त्तते । प्रभुर्यो वोभवीत्यत्र समेषां जगतामपि ।।३५४।।
[१६४]न तस्य प्रतिमा चाऽति समादिष्टमिदं हि मे । आत्मनश्चार्पयितॄणां सर्वेषां प्रथमोऽस्म्यहम् ।।३५५।।
[१६५]ब्रूहि—किं मार्गयेयं भोः ! ह्यल्लाहादितरं प्रभुम् । यद्यप्यसौ समेष्वेव प्रभवन् भवति प्रभुः ? ।।३५६।।
यदप्यत्र जनो यस्तु ह्यर्जनं कुरुते खलु । तत् कृतात् कर्मणस्तावत् तस्यैवोत्तरदायिता ।।३५७।।
भारवाही परस्येह भारं नोद्वहति क्वचित् । प्रत्यावर्त्यश्च युष्माकं स प्रभु ह्र्यैव वर्त्तते ।।३५८।।
बोधयिष्यति तद् युष्मान्, विभेदो, ह्यास्त यत्र वः । [१६६]स एवासौ विराजो वो धरित्र्यां योऽकरोदथ ।।३५९।।
यश्च वः कांश्चनान्येभ्योऽकृतापि विभवोत्तरान् । परीक्षेत ततो युष्मान् दत्तस्यैवानुषंगतः ।।३६०।।
प्रभुर्वो दण्डदाने तु प्रचण्डोऽति हि वर्त्तते । क्षमाशीलो दयालुश्चाप्यतीवासाविति ध्रुवम् ।।३६१।।

योगः—३६१

CC-0. In Public Domain. Digitized by eGangotri

७

सूक्तम्–आरोहः

(अल-आराफ़)

(महाकालेऽवतीर्णाः षडुत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ० लाम० मीमाश्च साद (श्चैते ह्युपक्रमे) । [२]पुस्तकं तदिदं त्वेकं काशितं त्वयि वर्त्तते ॥ १ ॥
न ते स्वान्ते तदेतेन संकोचः कोऽपि जायताम् । चेतयेर्यत् त्वमेतेन, श्रद्धरेभ्योऽस्ति बोधनम् ॥ २ ॥
[३]अन्विहि त्वत् प्रभोर्यत्ते काशितं त्वयि वर्त्तते । नान्विहि तदृते चान्यान् सखीन् संरक्षकानथ ॥ ३ ॥
दीयते ह्यवधानन्तु युष्माभिः किञ्च नैव हा । [४]प्रभूतान्यथ गेहानि ह्यस्माभिर्नाशितानि च ॥ ४ ॥
सौप्तिकेष्वापदापातो निश्यस्माभिरजायत । यदा मध्याह्नवेलायां वा ते विश्रान्तिमाभजन् ॥ ५ ॥
[५]यातनापातकाले वै नाभ्युपायन्तु कञ्चन । तेऽशकन् मनसा कर्त्तुं केवलं तेऽवदन्निदम् ॥ ६ ॥
"कश्चिदत्र न सन्देहो जाल्मा आस्म वयं किल । [६]प्रक्ष्यामस्तान् वयं येषु वाग्घराः प्रेषिता ध्रुवम् ॥ ७ ॥
अभवन् अनुयोक्ष्यामो ध्रुवं तान् वाग्घरानपि । [७]ततस्तान् श्रावयिष्यामोऽशेषं वृत्तं धियान्वितम् ॥ ८ ॥
नाभवाम यतो लुप्ता वयं कुत्रापि (तत्क्षणे) । [८]पूर्णौचित्येन तौल्यञ्च दिने तस्मिन् भविष्यति ॥ ९ ॥
तेषां पार्श्वाणि किञ्चाऽपि भविष्यन्ति गुरूणि वै । ते पुनः सफला अत्र भविष्यन्ति च कीर्त्तिताः ॥१०॥
[९]येषां पार्श्वाणि किञ्चापि भविष्यन्ति लघूनि वै । त एवैते भविष्यन्ति त्वात्मना हानिमागताः ॥११॥
इदं तस्मादिमे येन किलायातान् हि नः (सदा) । न्यषेधन्; [१०]किञ्च युष्मभ्यं धरित्र्यां खल्वदद्म च ॥१२॥
वयं स्थानञ्च संभारं समचिन्म तथैव च । जीविकार्थे हि युष्माकं वयं, (हन्त !) कृतज्ञताम् ॥१३॥
दर्शयथ नगण्यां हि; [११]परस्तादसृजाम च । वयं युष्मान् सदाकारान् अकुर्म तदनन्तरम् ॥१४॥
अवदाम ततो देवान् "सपातं नमताऽऽदिमम्" । विहायाऽथ त्विभालीनं प्राणमन् सकला अपि ॥१५॥
नासावासीत् प्रणन्तृणाम्; [१२]उक्तो ऽसौ किमवारयत् । प्रणिपातप्रणामात् त्वाम्, मयादिष्टोऽभवो यदा ॥१६॥
प्रत्यवादीत् 'भवाभ्येष ह्युत्तरोऽहं ततस्तु वै । त्वयाऽहं जनितो वह्नेः मृत्तिकायास्तथैव सः ॥१७॥
[१३]उक्तो ऽसौ "याह्यधस्तात् त्वं हीतो, नेदन्तु युज्यते । सदर्पो यद् भवेः सत्यं, परेहि, निन्दितेष्वसि" ॥१८॥
[१४]आह—"व्याक्षिप्यतां दण्डो मम यावन्न मानुषाः । उत्थाप्यन्ते पुनः(मृत्योः पश्चात्); [१५](तं)प्रत्युवाच सः ॥१९॥
दण्डो व्याक्षिप्यते तुभ्यम्"; [१६]स आह "त्वं यथैव माम् । पथः प्राच्यावयस्तावद् ऋजौ ते ऽध्वनि खल्वहम् ॥२०॥
तथैव चापि तिष्ठामि समाहन्तुमिमान् जनान् । [१७]अग्रतः पृष्ठतश्चैषां दक्षिणाद् वामतस्ततः ॥२१॥
प्रहरिष्यामि वै विश्वङ् तदेनान्, सुबहूनथ । त्वमेषां भोत्स्यसे, नैव कृतज्ञास्सन्ति पे तव" ॥२२॥
[१८]स आह "त्वं परेहीतो धिक्कृतश्चाव मानितः । वचस्ते योऽनुवर्त्तेत चैवैषां तदहं ध्रुवम् ॥२३॥
पूरयिष्यामि युष्माभिः नारकं सर्वमानुषैः । [१९]किञ्च भोः आदिम ! त्वञ्च तव जाया तथैव च ॥२४॥
तिष्ठतात् अव्यये चाऽत्तात् यतोऽपीष्टं, परन्तु मा । उपैतं वृक्षमेतं भोः ! विरुद्धाचरणेन तु ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

पापिनामेव वै स्यातम्; [२०]शातनस्तदनन्तरम् । तौ पथो ऽभ्रामयद् येन ताभ्यां संगोपितानि वै ।।२६।।
तयोर्गुप्ततमांगानि तयोः स्युः काशितानि हि । तावुवाच पुनश्चासौ "वारितौ प्रभुणा तु वः ।।२७।।
युवां वृक्षात् ततोऽमुष्मात् भवेतं नैव देवते । नाऽमरत्वञ्च यायातं युवां येन कथञ्चन ।।२८।।
[२१]हितैषी युष्मदीयोऽहमशपत् तत्पुराऽथ च । [२२]एवं सवञ्चनं चासौ प्राणयत् तौ, यदापि च ।।२९।।
अगृह्णीतां तरुस्वादं काशितान्यभवंस्तदा । तयो गुह्यतमांगानि तत्समक्षं, पुनश्च तौ ।।३०।।
पत्रैरुद्यानजैस्तानि ह्यारभेतां प्रगोपितुम् । आह्वयन् आह तत्पश्चात् तत् प्रभुस्तावुभावपि ।।३१।।
"युवां किं वारितौ नाऽऽस्तं तरोरस्मात् तथैव च । शातनो युवयो वैंरी स्पष्टो नोक्तो मया युवाम्" ।।३२।।
[२३]ऊचतुः "नः प्रभो ! आवां सापराधौ किलात्मनोः । दर्शयेर्न दयां किञ्च त्वक्षमेथा न नौ यदि ।।३३।।
आवां तेषां भविष्यावो हानिभाजो भवन्ति ये" । [२४]आह "यातमधो यानं, ह्यन्योन्यं वैरिणौ युवाम् ।।३४।।
(दिनादस्मात् समारभ्य), पृथिव्यां युवयोः कृते । स्तोककालाय वासोऽपि, संभारो भोजनस्य च ।।३५।।
सज्जितो हि कृतः; [२५]प्राह "युवयोर्जीवनस्य च । धाम मृत्योश्च तद्ध्येव, ततश्चैवान्तिमेऽहनि ।।३६।।
युवां उद्भावयिष्यामः; [२६]वयं ह्यादिमसन्तते ! । आविश्चक्रम युष्मभ्यं वस्त्रं संगोपनाय वः ।।३७।।
गुह्यांगानां सहायञ्च शोभायां रक्षणेऽपि च । संयमस्य परीधानं तूत्तमं कीर्त्तितं किल ।।३८।।
अल्लाहस्य भवत्येतल् लक्ष्मणां, येन वै जनाः । कदाचिन् ननु चेतेयुः; [२७]युष्मानादिम सन्तते ! ।।३९।।
कदाचिच्छातनो मास्म कृथा भ्रष्टान् पथो यथा । प्रावासयत् स युष्माकं आरामात् पितरौ पुरा ।।४०।।
तयो (र्निर्दोषता) वस्त्रं ततोऽपाकारयत् तथा । तयोर्गुह्यांगगन्योन्यं समक्षं काशतां यथा ।।४१।।
स चासौ तद् दलं चापि युष्मान् पश्यति वै ततः । ततो यूयं न तावत् तं पश्यथ, नात्र संशयः ।।४२।।
शातनं रक्षकं मित्रं वयं तेषामकुर्म वै । जनानां येन खलवत्र श्रद्धरा हि कथञ्चन ।।४३।।
[२८]यदा ऽश्लीलं तथा कर्म किंचित् कुर्वन्त्यमी जनाः । वदन्ति पूर्वजाश्चापि हीत्थमस्माकमाचरन् ।।४४।।
अल्लाहेन समादिष्टाः भवामश्च वयं पुनः । ब्रूह्यल्लाह समादेशोऽश्लीलतायै न कर्हिचित् ।।४५।।
अल्लाहेन हि सम्बध्य यूयं ब्रूथेदृशं किमु । जानीथ नैव यद् यूयम् ? [२९]ब्रूहि "न्यायं समादिशत् ।।४६।।
प्रभुर्मे, ऽथापि यद् यूयं भवेत् पूजा यदा यदा । स्वास्यान्युन्नीय तिष्ठेत तमेवाह्वयताऽपि च ।।४७।।
तदर्थं स्वमतं पूतं कृत्वा, यद् वत् पुरा ह्यसौ । युष्मानजीजनत् तद् वत् पुनर्यूयं भविष्यथ ।।४८।।
[३०]मार्गं त्वदर्शयच् चासौ दलमेकं, दलान्तरम् । परं मार्गात् परिभ्रष्टं, सिद्धमेतदजायत ।।४९।।
यतो ऽल्लाहाद् विभिन्नं ते शातनं मित्ररक्षकम् । अकुर्वंश्चाप्यबुध्यन्त "वयमृज्वध्वगा" इति ।।५०।।
[३१]पूजायाश्च प्रतिष्ठाने तथैवादिम सन्तते ! । शोभाकरं हि वक्तव्यमत्तव्यं पुनरेव च ।।५१।।
पातव्यं, न तु भंक्तव्या मर्यादा, नात्र संशयः । नाऽल्लाहस्य भवेत् स्नेहो मर्यादाभंगिभिर्जनैः ।।५२।।
[३२]ब्रूहि "अल्लाहस्य तां शोभां वन्धकेभ्यः प्रचोदिताम् । भोज्यानि तानि वस्तूनि चाऽवैधानीह कोऽकरोत् ।।५३।।
ब्रूहि "ये श्रद्धराः सन्ति भौतिके चाऽपि जीवने । तिष्ठन्त्यमूनि वै तेभ्यः, पुनरुत्थापनाऽहनि ।।५४।।
त्वमूनि तेभ्य एव स्युः केवलम्, विशदं वयम् । वदामो हीत्थमायातान् तेभ्यो विज्ञा हि ये जनाः ।।५५।।
[३३]ब्रूहि "मे प्रभुणा यद् यदवैधं ननु घोषितम् । तत् त्विदम् व्यक्तमव्यक्तं कर्मश्लीलञ्च किल्विषम् ।।५६।।
अत्याचारस्तथा मोघो ऽल्लाहसादृश्यकल्पना । यदर्थं काशितं नाभूत् प्रमाणं तेन किञ्चन ।।५७।।
अथाऽल्लाहमधिकृत्य प्रसंगो वचसां पुनः । ज्ञानं येषां न युष्माकं स्वयञ्चापि भवेत् किल ।।५८।।
[३४]जातस्य यस्य कस्याऽपि नियतः समयावधिः । कालावधावुपेते तु न कालो ह्यग्रतः सरेत् ।।५९।।
पृष्ठतो नाऽपि वा कालः सरेत् किञ्च कथञ्चन । [३५]वाग्घरः कोऽपि चेद् युष्मान् उपैत्वादिम सन्तते ! ।।६०।।
युष्माकं मध्यतो ह्येव ह्यायातान् श्रावयेच् च मे । भयं वो दर्शयेत् किञ्च पुनीयात् स्वान्तरं तथा ।।६१।।
नो दुःखं नो भयञ्चापि तद्विधानां भविष्यति । [३६]न्यषेधन् ये ऽस्मदायातान् धिगकुर्वंश्च किंच तान् ।।६२।।
त एवैते जना ये हि गन्तारोऽग्निं तु, यत्र च । शाश्वतंधाम तेषां स्यात्; [३७]पापस्तस्माच्च को भवेत् ।।६३।।
आरोपयेदसत्यं यस्त्वल्लाहे योऽथवाऽस्य हि । निषेधेत् पुनरायातान्, लप्स्यन्ते चेदृशा जनाः ।।६४।।
भागं स्वं लिखितञ्चापि, ततोऽप्युत्तरमेव च । यदाऽस्मत् प्रेषिता दूतास्तेषां ग्रासार्थमुद्यताः ।।६५।।

CC-0. In Public Domain. Digitized by eGangotri

तानुपैष्यन्ति वक्ष्यन्ति "क्व ते ऽल्लाहाद् विना तु यान् । यूयमाहूतवन्तोऽथ वदिष्यन्ति हि तेऽखिलाः ॥६६॥

अस्मन्नष्टाः" स्वयञ्चैते स्वविरोधेऽपि साक्षिताम् । श्रद्विहीना वयं त्वास्म" व्याहरिष्यन्ति हीदृशम् ॥६७॥

[३८]वक्ष्यति "संप्रयाता ये गणा युष्मत् पुरैव तु । मनुष्याणाञ्च जिन्नानां समं तैर्यूयमप्यथ ॥६८॥

प्रविष्टा भवताऽग्नौ वै; योऽपि कश्चिद् गणस्तथा । प्रवेशाभिमुखो वह्नौ धिक् कृतिं प्रापयिष्यति ॥६९॥

सजातीयं गणं ह्यन्यं वन्धुभूतं स वै ध्रुवम् । इतोऽप्युत्तरमित्थं यत् समुपेतेषु तत्र च ॥७०॥

सर्वेष्वपि हि लोकेषु गणोऽनन्तरमागतः । पूर्वप्राप्तगणस्यैवं विषये वक्ष्यति ध्रुवम् ॥७१॥

प्रभो नः ! एत एवाऽस्मान् पथभ्रष्टान् व्यधुस्ततः । देहयेभ्यो यातना वह्नौ द्वैगुण्येनाधिकाः किल ॥७२॥

वक्ष्यति "यातना वह्नौ द्वैगुण्येनाधिकाः किल । सर्वेभ्योऽपि हि वर्त्तन्ते न यूयं वित्थ तत् परम् ॥७३॥

[३९]ततो वक्ष्यति चैवेत्थं गणोऽनन्तरमागतः । "गरीयस्त्वं न युष्माकं वर्त्तते ऽस्मासु किञ्चन ॥७४॥

चेष्टितं तद् यथा पूर्वं प्रतिदानानुरूपतः । यातनानां ततः स्वादो युष्माभिर्गृह्यतां किल" ॥७५॥

[४०]न्यषेधन् ये ऽस्मदायातान् धिगकुर्वंश्च किञ्च तान् । करिष्यन्ते न वै तेभ्यो ऽपावृतानि कदाचन ॥७६॥

स्वर्गद्वाराणि, ते नाऽपि तथाऽऽरामे कथञ्चन । प्रवेक्ष्यन्ति, मयो यावत् सूचिकाक्षि न संक्रमेत् ॥७७॥

अस्माकन्तु प्रतीदानं सापराधेभ्य ईदृशम् । [४१]नारकाऽऽस्तरणं किञ्च पुनस्तेभ्यो भविष्यति ॥७८॥

इत्थमेवोपरिष्टाच्च भविष्यति परिच्छदः । अस्माकन्तु प्रतीदानं सापराधेभ्य ईदृशम् ॥७९॥

[४२]श्रद्धरा ये पुनर्लोका भद्रकर्मकृतस्तथा । अतिरिच्य तु सामर्थ्यं न किंचिच्च विदध्महे ॥८०॥

भारवन्तं वयं लोकं, ईदृशा ह्येव मानुषाः । स्वर्गमर्हन्ति, तद्धाम तेषाञ्चैवाऽस्ति शाश्वतम् ॥८१॥

[४३]अन्योन्यं प्रति यत् किंचित् तेषां हृत्सु भविष्यति । वैमनस्यं वयं तद् वै करिष्यामो ह्यपाकृतम् ॥८२॥

निम्नगाः प्रवहन्त्योऽथ भविष्यन्ति हि तानधः । वक्ष्यन्ति ते "प्रशस्यो वै ह्यल्लाहो यो त्वदर्शयत् ॥८३॥

अस्मान् मार्ग, न मार्गस्याकारयिष्यत्तु दर्शनम् । यद्यस्मान् किल सोऽल्लाहो ह्यलप्स्यामहि नैव तम् ॥८४॥

वाग्धराः सत्यमादाय समुपायन् यथार्थतः" । ते च शब्दापयिष्यन्ते "स्वर्गमेतत्, कृता मया ॥८५॥

उत्तराधिकृतौ यस्य यूयं तेषां हि कर्मणाम् । युष्माभिः कृतपूर्वाणां प्रतिदानानुरूपतः ॥८६॥

[४४]किञ्च शब्दापयिष्यन्ति स्वर्गवन्तो जना हि तान् । नारकाग्निं गतान् "याऽपि त्वस्माकं प्रभुणा कृता ॥८७॥

प्रतिज्ञा सार्धमस्माभिः स तामाद्रियतैव तु । युष्माभिर्या प्रतिज्ञा च युष्माकं प्रभुणा कृता ॥८८॥

साऽऽदृता तेन किं सत्यम् ? प्रतिवक्ष्यन्ति "साऽऽदृता" । एतस्मिन्नन्तरे ह्येव तेषामेव तु कश्चन ॥८९॥

घोषकोऽतर्कितं ह्येव रविष्यति "हि धिक् कृतिः । अल्लाहस्यालमेतेषु वर्तते किल पाप्मसु" ॥९०॥

[४५]वारयन्ति हि ये (लोकान्) अल्लाहस्याध्वनोऽथ च । तिर्यञ्चं कर्त्तुकामास्तं, चरमाहं तथैव च ॥९१॥

निषेधन्ति; [४६]द्वयोर्मध्ये तयोरावरणं तथा । स्थास्यत्येकं, भविष्यन्ति स्थिताः केचिज्जना अपि ॥९२॥

आरोहेष्वथ ये लोकान् प्रत्येकं तस्य लक्ष्मणा । परिचेतुं परास्तावत् तत्र स्थास्यन्त्य (संशयम्) ॥९३॥

ते चाऽप्याशीर्वदिष्यन्ति स्वर्गिणः "शं भवेद्धि वः" । तत्र तेऽद्यापि संविष्टा भवन्ति नैव यद्यपि ॥९४॥

तदप्याशासते त्वेव (तं प्रवेष्टुं हि सर्वशः) । [४७]यदा चैव दृशस्तेषां पतिष्यन्त्यग्निमत्सु वै ॥९५॥

तदा वक्ष्यन्ति 'नस्स्वामिन्! जालमानां नस्तु मा कृथाः' । [४८]सारोहाः कतिचिल् लोकान् तैस्तैरेवाऽथलक्ष्मभिः ॥९६॥

विजानन्तो हि संवोध्य वक्ष्यन्त्येवं तथैव च । "साह्यं युष्मद् गणा नैव युष्माकं कर्त्तुमाशकन् ॥९७॥

गरीयस्त्वाभिमानोऽपि रक्षितुं नाशकच्च वः" । [४९]त एवैते न किं येषां युष्माभिर्विषयेऽसकृत् ॥९८॥

शप्तम्—नैभ्यस्तु सोऽल्लाहो दयांशं चापि दास्यति" । (भविष्यन्ति प्रदिष्टास्ते) "स्वर्गमन्तः प्रयात वै ॥९९॥

भयं वो भविता नाऽपि, नो दुःखं भविताऽथ च" । [५०]साग्नयः स्वर्गिणश्चैव वक्ष्यन्त्येवं (तदुत्तरम्) ॥१००॥

"क्षिप्यतां स्तोकमस्मासु चापि वार्यथवा पुनः । किंचिन्नो दीयतां तस्मादन्नाद्याद् यत् प्रभुर्हि वः ॥१०१॥

प्रादात्; तत्ते वदिष्यन्ति "ह्यवैधं तूभयं कृतम् । अल्लाहेन, न सन्देहः श्रद्विहीनेभ्य एव तु ॥१०२॥

[५१]क्रीडायाश्च विनोदस्य धर्मं ये साधनं निजम् । त्वकुर्वन् भौतिकं यांश्च जीवनं खल्ववञ्चयत् ॥१०३॥

वयञ्चापि ततश्चैतान् करिष्यामोऽद्य विस्मृतान् । ऐषमस्य दिनस्यैते यथा सम्मेलनं किल ॥१०४॥

व्यस्मार्षुश्च न्यषेधंश्च ह्यायातान् नस्तथाऽसकृत् । [५२]पुस्तकं चैकमेतेषामानयामान्तिकं वयम् ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

वर्णनं यत्र सज्ञानं विशदञ्चापि वर्त्तते । मार्गदर्शनमेतद् वै श्रद्धरेभ्यो दयैव च ॥१०६॥
[५३]प्रतीक्षन्ते नु किं ते यद् याथार्थ्यं तस्य काशताम् ? । यदाऽपि तस्य याथार्थ्यं काशितं वै भविष्यति ॥१०७॥
व्यस्मरन् ये तु पूर्वं ते ह्येव वक्ष्यन्ति "वस्तुतः । प्रभोर्नः वाग्घराः सत्यं समादाय किलागताः ॥१०८॥
सन्ति किन्नु तदस्माकं केऽपि वै प्राभिशंसकाः । प्राभिशंसन्तु ये ह्यस्मान् ? भवेम प्रेषिता वयम् ॥१०९॥
भौतिके जीवने किम्वा परावृत्य यथा वयम् । यत् कृतं तद् विरुद्धं हि कर्म कुर्याम (साम्प्रतम्) ॥११०॥
निजान् सक्तानकुर्वंस्ते हानिकृत् कर्मसु ध्रुवम् । अनृतं घटितं यच्च न तेभ्यः फलितं तु तत् ॥१११॥
[५४]वस्तुतोऽल्लाह् एवाऽस्ति प्रभुर्वो यः किलासृजत् । व्योमानि च धरित्रीं च षट्स्वहस्स्वेव केवलम् ॥११२॥
राजसिंहासनं चैव समासीनस्तदुत्तरम् । संवृणोति निशं त्वह्नाऽनुयानार्थं हि सत्वरम् ॥११३॥
यदस्याः सर्वदोत्कं वै, सूर्याचन्द्रमसावथ । तारकाण्यसृजच्चापि विधिना तेन यत् पुनः ॥११४॥
तदादेशात् स्वकार्येषु प्रसक्ता ह्येव खल्वमी । बुध्यतां रचनामुष्य शासनञ्चाप्यमुष्य वै ॥११५॥
अल्लाह्ः सर्वविश्वस्य प्रभुः सौभाग्यवानथ । [५५]संस्तुत स्वं प्रभुं यूयं विनयातिशयेन च ॥११६॥
एकान्तं पुनराश्रित्य, ह्यसौ नैवानुरज्यते । तैर्हि येऽत्र प्रवर्त्तन्ते मर्यादोल्लंघनेन तु ॥११७॥
[५६]मा जनिष्ट कलिं भूमौ तत्कृतात् सुक्रमादनु । स्तुताऽथ तं भयाच्चैव साशावन्धं तथैव च ॥११८॥
भद्रोपस्थायिनी सत्यं दयाऽऽल्लाही तु वर्त्तते । [५७]स चैवासौ हि यो वातान् सुसमाचारवाहकान् ॥११९॥
कृत्वा संप्रेषयत्यग्रे स्वदयायाः प्रकाशकान् । यदाऽथ भारवन्मेघान् धारयन्ति च ते, वयम् ॥१२०॥
निर्जीवं भूमिखण्डं तान् गमयामो हि कञ्चन । तत्र वर्षन्ति ते वारि, विविधानि फलानि च ॥१२१॥
तेन तावत् प्रजायन्ते, वयञ्चापीत्थमेव तु । प्रापयिष्याम उद्बोधं समुद्धृत्य मृतान् जनान् ॥१२२॥
कदाचिद् यूयमेतेन चेतेत; [५८]श्रेष्ठभूस्तु या । तत् प्रभोर्हि समादेशादुद्भिद्यन्ते ततो गणाः ॥१२३॥
हारित्यस्य धरास्तावत्, हीना वै भूस्तु या पुनः । ततो नोद्भिद्यते किञ्चित् हीनस्योत्पादनादृते ॥१२४॥
इत्थमेव वयञ्चाऽपि ह्यायातान् विविधं पुनः । वर्णयामस्तदर्थं ये कार्त्तज्ञभावधारिणः ॥१२५॥
[५९]नहुषं प्रैषयामाऽथ तद् वन्धुष्वाह तानसौ । ज्ञातयो मम भोः ! यूयं स्तुताल्लाहं, विना न च ॥१२६॥
तमिष्टः कश्चिदन्यो वः, न युष्मास्वथ चापतेत् । यातना दारूणस्याह्नो ह्यापतिष्णो र्विभेम्यतः ॥१२७॥
[६०]ये तु तज् ज्ञातिमुख्यास्ते तमाहुः "पतितं वयम् । विस्मृतेस्त्वां हि पश्यामः सर्वथज्वर्यितेऽध्वनि ॥१२८॥
[६१]अवोचत् "ज्ञातयो मे ! ऽहं विस्मृते र्न किलाऽध्वनि । वाग्घरस्तु परं वर्त्ते प्रभोर्विश्वस्य कश्चन ॥१२९॥
[६२]प्रहिणोमि च सन्दिष्टं प्रभुणा मे तथैव वः । हितैषी किञ्च युष्माकं, वेद्मि तन्नैव वितथ यत् ॥१३०॥
अल्लाह् प्रतिरूपत्वात्; [६३]आश्चर्यं किमनेन वः । युष्माकं सविधे यद्धि युष्मास्वेव च केनचित् ॥१३१॥
प्रापितं स्मारणं तस्य प्रभोर्वश्चेतयेद् यथा । युष्मान्, विभीत यच्चापि पुनर्यूयं तथा दया ॥१३२॥
दर्शिता स्यादथो युष्मान्; [६४]न्यषेधंस्ते परन्तु तम् । परस्तात् तं वयं चास्य सहायान् नाव्यधिष्ठितान् ॥१३३॥
अरक्षामाऽथ ये ऽस्माकं ह्यायातान् खल्वखण्डयन् । अमज्जयाम तांस्तावत्, आसन्नन्धा हि ते जनाः ॥१३४॥
[६५]प्रैषयाम वयं सूदं चाऽऽदलोकस्य सन्निधौ । योऽभवत् तस्य वै भ्राता यो बन्धूनेवमाह च ॥१३५॥
ज्ञातयो मम भोः ! यूयं स्तुताऽल्लाहं, विना न च । तमिष्टः कश्चिदन्यो वः, न यूयं किं बिभीत भोः ! ॥१३६॥
[६६]ये तु तज्ज्ञातिमुख्यास्ते श्रद्हीनास्तमवादिषुः । वयं त्वान्तु प्रपश्यामो मूढ़ताग्रस्तमेव हि ॥१३७॥
मिथ्याचारेषु विद्मस्त्वां तथैकं नात्र संशयः । [६७]अवोचत् ज्ञातयो मे ! तु न मय्यल्पाऽपि मूढ़ता ॥१३८॥
वाग्घरस्तु परं वर्त्ते प्रभोर्विश्वस्य कश्चन । [६८]प्रहिणोमि च सन्दिष्टं प्रभुणा मे तथैव वः ॥१३९॥
विश्वस्तोऽहं हितैषी वः; [६९]किमाश्चर्यमनेन वः । युष्माकं सविधे यद्धि युष्मास्वेव च केनचित् ॥१४०॥
प्रापितं स्मारणं तस्य प्रभोर्वश्चेतयेद् यथा । वुध्यताञ्च यदाऽल्लाहो ह्युत्तराधिकृतौ च वः ॥१४१॥
नहुषस्याऽथ वन्धूनां परस्तादकरोत् किल । परिणाहं शरीरस्य युष्माकं चाप्यथाकरोत् ॥१४२॥
अल्लाहस्य महौदार्यं बुध्यतां येन कर्हिचित् । फलानां सुहिता यूयं भवेत; [७०]ते तदा ऽवदन् ॥१४३॥
"किमस्मात् त्वमुपेतोऽस्मान् स्तुवीयाम हि केवलम् । तमल्लाहं, विजह्याम चाऽस्तुवन् यांस्तु पूर्वजाः ॥१४४॥
सत्यश्चेत् त्वं भयं यस्य किलाऽस्मान् दर्शयस्यलम् । तं तदाऽऽपातयाऽस्मासु; [७१]प्रत्यवोचदसौ ततः ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

"प्रकोपः फिटकारश्च ह्यापतद् वः प्रभोः किल । युष्मासु, किं मया सार्धं विवदध्वे हि नामसु ॥१४६॥
यूयञ्च पूर्वजाश्चैव यान्यकुर्वन्, न लक्ष्म च । किंचिदल्लाहतो वाऽपि यदर्थं त्ववतीर्णवत् ॥१४७॥
अस्तु, कालं प्रतीक्षध्वम्, प्रतीक्षेऽहं समं तथा । [७२]स्वीयया दयया सूदं तस्य लोकांस्ततो वयम् ॥१४८॥
अरक्षाम, परं मूलञ्चाप्यकृन्ताम वै वयम् । तेषां ये त्वस्मदायातान् न्यषेधन् न तथैव च ॥१४९॥
श्रद्धामधारयन्; [७३]किंच समुद्गस्य हि सन्निधौ । प्रैषयामाऽथ सालेहं भ्रातरं तस्य, सोऽवदत् ॥१५०॥
ज्ञातयो मम भोः ! यूयं स्तुताल्लाहं विना न च । तमिष्टः कश्चिदन्यो वः, लक्ष्मैकं समुपागतम् ॥१५१॥
युष्मानल्लाहसान्निध्यात् सुस्पष्टं;ह्युष्ट्रिकान्वियम् । अल्लाहस्य हि लक्ष्मैकं, युष्मदर्थञ्च वर्त्तते ॥१५२॥
दीयतामवकाशोऽस्यै त्वल्लाहोर्व्यां प्रखादितुम् । मैव स्पर्शो विधेयोऽस्याः कष्ट आपादनाय च ॥१५३॥
परिवारयितुं सज्जा यातनास्स्युस्तु वोऽन्यथा । [७४]स्मर्यतां चाप्यसौ कालो यदाऽल्लाहश्च वोऽकरोत् ॥१५४॥
उत्तराधिकृतावादात् समनन्तरमेव च । अयच्छच् चैव युष्मभ्यं स्थानमुर्व्यां ततोऽथ च ॥१५५॥
महीतानेषु खल्वस्याः समेषु सम्प्रतिष्ठितम् । कुरुध्वे हर्म्यसंघातं, पर्वतानां शिलास्तथा ॥१५६॥
छित्वा च कर्त्तयित्वा च विधध्वे हि ततो गृहान् । अल्लाहस्य महौदार्यं बुध्यतां, भुवि नाऽथ च ॥१५७॥
चंक्रमध्वं सदोत्पातप्रसारायैव तत्पराः । [७५]ये तु तज् ज्ञातिमुख्यास्ते गर्वापन्नास्तदाऽवदन् ॥१५८॥
हीनान् लोकान् परं तेषां श्रद्दधानानिदं वचः । "जानीथ स्वप्रभोर्यत् किं शालेभो वाग्घरोऽस्त्ययम्?" ॥१५९॥
प्रत्याहुः "यत् प्रदायासौ प्रेषितस्तत्र वै वयम् । सविश्वासा हि तिष्ठामः; [७६]गर्वापन्नास्तु तेऽवदन् ॥१६०॥
वर्त्तध्वे श्रद्धरा यूयं यत्र तत्र तु नो वयम् । श्रद्धराः खलु तिष्ठामः; [७७]उष्ट्रिकान्ते त्वनन्तरम् ॥१६१॥
अघ्नन् निकर्त्तयन्तोऽस्याः स्नायुबंधं, निजप्रभोः । समादेशांश्च धाष्ट्र्येण त इत्थं ह्यवजज्ञिरे ॥१६२॥
प्रावदंस्ते च "शालेभ ! वर्त्तसे वाग्घरेषु चेत् । तां तदाऽऽपातयाऽस्मासु यतो नः कुरुषे भयम् ॥१६३॥
[७८]तदित्थं तान् महत्यापद् भूचालोत्था समन्ततः । प्रावृणोत्, ते तथाऽतिष्ठन् प्रणिपातपरा इव ॥१६४॥
शयानाः स्वेषु गेहेषु; [७९]शालेभस्त्वाह तान् पुनः । ततो निवर्त्तमानोऽसौ "ज्ञातयो मम ! तन्मया ॥१६५॥
स्वप्रभोर्योऽपि सन्देशः स वै वोऽदीयतैव तु । मयेष्टं वो हितम्, रुच्याः परं नो वो हितैषिणः ॥१६६॥
[८०]प्रेषितश्चाभवल्लूतो यदासौ चाऽऽह वान्धवान् । "कर्म तन् महदश्लीलं किं कुरुध्वे ? न यत् पुरा ॥१६७॥
कृतं केनाऽपि युष्मत् तु ?; [८१]स्त्रीर्विहाय प्रयाथ यत् । पुंसः, भूत्वा सकामा वै, नेदमेव तु सर्वथा ॥१६८॥
निर्मर्यादा जना यूयं; [८२]उत्तरं केवलं न्विदम् । सनाभीनां त्वभूत् "एते बहिष्कार्याः स्वसद्मनः ॥१६९॥
शुद्धाः सातिशयं पूता इत्येवं तेऽभिमानिनः । [८३]वयञ्चाऽथ ततो लूतं तस्य लोकांस्तथैव च ॥१७०॥
अरक्षाम परं त्यक्त्वा तस्य जायां तु याऽभवत् । पृष्ठस्थायिषु लोकेषु तावदन्यतमा किल ॥१७१॥
[८४]पुनस्तेषु वयं वर्षा अवर्षयाम (सन्ततम्) । ज्ञायतां का नु जाता स्यात् पाप्मनां दुर्दशा ततः ॥१७२॥
[८५]शुभेभं प्रैषयामाऽथ मदयानस्य सन्निधौ । भ्रातरं तस्य, यश्चाह "ज्ञातयो मम ! संस्तुत ॥१७३॥
अल्लाहं यमृते नान्यो हीष्टो वः कोऽपि वर्त्तते । स्पष्टं लक्ष्म प्रभोर्वश्च युष्माभिः प्राप्तमेव तु ॥१७४॥
अतो मानञ्च भारञ्च पूर्णं कृत्वैव दत्त भोः । कृढ्वं भारोनतां माऽपि लोकेभ्यो देयवस्तुषु ॥१७५॥
प्रश्रयत कलिं नापि धरित्र्यां सुक्रमे सति । तनुयाद् भद्रमेतद्धि युष्माकं चेत् कदाचन ॥१७६॥
यूयं भवेत खल्वत्र श्रद्दधाना हि मानवाः । [८६]मार्गे मार्गे तथा यूयं नासीध्वं (गुप्तविग्रहाः) ॥१७७॥
अल्लाहे श्रद्दधानानां भर्त्सनायै तथैव तान् । रोद्धुमल्लाहवाटाच् च, रमध्वं न कदाचन ॥१७८॥
किञ्च वक्रममुं कर्त्तुं, स्मर्यतां तद् दिनं यदा । यूयं कतिपये ह्यास्त ततोऽल्लाहो बहून् व्यधात् ॥१७९॥
भ्रष्टमाचरतां किञ्च ज्ञायतां का ऽभवद् दशा । [८७]एको गणस्तु युष्माकं श्रद्धरो यदि वर्त्तते ॥१८०॥
तस्मिन् यत् सममादाय भवामि प्रेषितोन्वहम् । गणोऽन्यो न पुनस्तस्मिन् श्रद्धरो यदि वर्त्तते ॥१८१॥
धैर्यमाश्रित्य तद् यूयं चेष्टध्वम्, निर्णयं यथा । कारयेत्तावदल्लाहो मध्येऽस्माकं (गतो हि सन्) ॥१८२॥
निर्णेतृणान्तु सर्वेषां स एव सूत्तमो मतः ।

इति अष्टमं पारायणम्

CC-0. In Public Domain. Digitized by eGangotri

अथ नवमं पारायम्

। [८८]ये तु तज् ज्ञातिमुख्या वै सावज्ञास्ते ततोऽवदन् ॥१८३॥
"शुभेभ ! त्वां त्वदीयांश्च श्रद्गतांस्त्वयका समम् । वयं स्वावसथेभ्यो वै करिष्यामो ध्रुवं बहिः ॥१८४॥
परावर्त्य मतेऽस्माकं किम्वाऽ" सौ पुनरब्रवीत् । "अनभीष्टं मतं तच्चेद् भवेन्नः किं तदाऽपि च ? ॥१८५॥
अल्लाहेन भवामो हि वयं यन्मोचितास्ततः । असत्यारोपिणोऽल्लाहे भवेम खलु चेद् वयम् ॥१८६॥
परावृत्य मतं वो हि प्रयाताः स्याम साम्प्रतम् । समर्थं न मनोऽस्माकं तत् परावर्त्तितुं क्वचित् ॥१८७॥
अल्लाहो नः प्रभुर्यावन्नात्मना कांक्षतां स्वयम् । ज्ञानेनावृत्य सर्वं हि प्रभुर्नस्तिष्ठते किल ॥१८८॥
आश्रिता वयमल्लाहे, "प्रभो नः ! त्वं हि निर्णय । सत्येनाऽस्मासु किं चैव ज्ञातिष्वस्माकमप्यथ ॥१८९॥
[९०]ततस्तज् ज्ञातिमुख्या हि श्रद्विहीनास्तु येऽभवन् । प्रत्यवोचन् "शुभेभं चेद् यूयमन्वेष्यथ ध्रुवम् ॥१९०॥
भविष्यथ गतास्तावद् हानिं (नैवाऽत्र संशयः) । [९१]विपन्नास्ते त्वतो जाता भुवः कम्पात् तदोदृशम् ॥१९१॥
प्रणिपातपराः प्रातः ह्यदृश्यन्त स्ववेश्मसु । [९२]न्यषेधन् ये शुभेभं ते त्वापद्यन्त दशां हि ताम् ॥१९२॥
यथैव नावसंस्तत्र ते कदाचिदपीति वै । गता हानिन्तु ते ह्येव न्यषेधन् ये शुभेभकम् ॥१९३॥
[९३]निवृत्तोऽसौ ततश्चैवं कथयन् "ज्ञातयो मम ! । प्रभोर्नः प्रापितं ह्येव सन्दिष्टं वो मयाऽथ च ॥१९४॥
कांक्षितं युष्मदीयन्तु सर्वदैव हितं मया । श्रद्विहीनजनानां तद् विषण्णः स्यामहं कथम् ॥१९५॥
[९४]वसत्यां नैव कस्यांचित् तत्पश्चात् कञ्चनाऽपि तु । वाग्धरं प्रैषयामाऽथ; परं तत्स्थानवासिनः ॥१९६॥
अभावेन च कृच्छ्रेण वयं ग्रस्तान् व्यधाम तु । हेतुनाऽनेन यन् नम्रा भवेयुस्ते पुरो हि नः ॥१९७॥
[९५]दुर्दशां परिवर्त्यैषां सुदशां प्रापितास्तथा । यथाऽति खल्वमोदन्त भृशं च व्याहरन् इदम् ॥१९८॥
अस्माकं पूर्वजाश्चापि दुःखानि च सुखानि च । एवं रूपाण्ययुस्तावत्" तदस्मिंस्तान् वयं पुनः ॥१९९॥
विस्मृतानात्मनाऽकस्मात् न्यगृह्णीमैव (सत्वरम्) । [९६]श्रद्धराः सभयाश्चापि ह्यस्थास्यंस्ते जना यदि ॥२००॥
वासतेयाः, वयं तेभ्यो धरित्र्या वियतां तथा । रिक्थान्यपावृतान्येव ह्यकरिष्याम (सत्यतः) ॥२०१॥
न्यषेधंस्ते परं तत्तु, ततो यत्ते समार्जयन् । तत् प्रतीकाररूपेण न्यगृह्णीम वयं हि तान् ॥२०२॥
[९७]रक्षितानात्मनः किन्तद् वासतेया हि मन्वते । अस्माकं यातनाऽऽपातात् तेषु रात्रौ यदैव ते ॥२०३॥
भवन्ति शयनं याताः ? [९८]वासतेया हि मन्वते । रक्षितानात्मनः किम्वा दिवा खेलत्सु तेषु चेत् ॥२०४॥
अस्माकं यातना तावद् (वज्ररूपा) समापतेत् ? । [९९]एतेऽल्लाहस्य किं कूटात् तिष्ठन्ति रक्षिताः क्वचित्? ॥२०५॥
त एवाऽल्लाहकूटात्तु मन्वते रक्षितान् निजान् । पतिष्यन्तो हि ये त्वत्र हानिगर्त्ते गता जनाः ॥२०६॥
[१००]किं न बोधं गतास्ते वै ये धरित्रीधरा जनाः । ऊर्ध्वं पूर्वजलोकानां, यदस्माकं मतं यदि ॥२०७॥
तत्कृतैस्तान् वयं दोषैः बध्नीयामैव (तत्क्षणम्) । मुद्रयेमाऽथ तद् हृन्दि ते यथा स्युर्गतश्रवाः ॥२०८॥
[१०१]वासा एते वयं येषां वचमस्त्वां वृत्तजालकम् । वाग्धरास्तत्र वै तेषां लक्ष्मभिर्विशदैर्गताः ॥२०९॥
श्रद्विहानात् परं ते प्राक् प्रत्ययं न गताः किल । मुद्रयत्येवमल्लाहः श्रद्हीनहृदयानि वै ॥२१०॥
[१०२]बहुष्वेषां न वै दृष्टः प्रतिज्ञापालनं गुणः । बहुष्वेषां परं दृष्टा अवज्ञास्वेव तत्पराः ॥२११॥
[१०३]ऊर्ध्वं तस्माद् वयं मूषं प्रिययौनस्य सन्निधौ । लक्ष्मभि र्विशदैस्तस्य प्रमुखानाञ्च सन्निधौ ॥२१२॥
प्रैषयाम, परन्ते तु ह्यवामन्यन्त तानि ह । पश्य तद् विकृतास्ते तु प्रापद्यन्त हि कां दृशाम् ॥२१३॥
[१०४]आह मूषस्ततश्चेत्थम् "प्रिययौन ! भवाम्यहम् । वाग्धरोऽस्य हि सर्वस्य लोकस्येशस्य निश्चितम् ॥२१४॥
[१०५]स्थिरोऽहं मनसा, सत्यादृते यन्नेतरद् वचः । वदेयं व्यतिरेकेण तस्याल्लाहस्य सर्वथा ॥२१५॥
उपेतस्त्वामहं स्पष्टैर्लक्ष्मभिस्त्वत् प्रभोः किल । पार्श्वतस्त्वं तदस्माभिरीश्वरालीनसन्ततिम् ॥२१६॥
साकं प्रेषयितुं तावत् सम्यगर्हस्य (संशयम्) । [१०६]स आह "यदि केनाऽपि चिन्हेनाऽसि त्वमागतः ॥२१७॥
निधेहि पुरतस्तन्मे भद्राणां भवसीह चेत् । [१०७]ततोऽसावक्षिपद् यष्टिं निजां (भूमौ) हि याऽभवत् ॥२१८॥
चमत्काराय द्रष्टृणां अजगरोऽहिरेव तु । [१०८]ततोऽसावक्षिपद् हस्तं बहिरंकाच्च योऽभवत् ॥२१९॥
चमत्काराय द्रष्टृणां भासमानो मरीचिभिः । [१०९]ज्ञातिमुख्यास्तु ये तावत् प्रिययौनस्य तेऽवदन् ॥२२०॥
महानेषोऽस्ति मायावी सिद्धो विज्ञो न संशयः । [११०]त्वां स्वदेशाद् बहिष्कर्त्तुं मनीषाऽस्य हि वर्त्तते ॥२२१॥

CC-0. In Public Domain. Digitized by eGangotri

किं तदत्रोचितं तेन मन्यसे ब्रूहि तत् पुनः । [१११]अवोचंस्ते त्विमं तावत् सोदरञ्चास्य रक्षतात् ॥२२२॥
प्रतीक्षायां (मुहूर्त्ताय), पूष्णु संप्रेषयाऽथ च । संहर्तुं न् हि जनान(शीघ्रम्); [११२]यत्ते मायाविनोऽखिलान् ॥२२३॥
अभिज्ञानिह संहृत्य त्वामुपस्थापयन्तु वै । [११३]ततो मायाविनस्ते वै प्रिययौनमुपागताः ॥२२४॥
अवोचन् "यदि जेष्यामो भविष्यामः पुरस्कृताः ? । [११४]प्रत्युवाच "अस्तु, किं चापि यूयं तावद् भविष्यथ ॥२२५॥
ममान्तरंगलोकानां ह्यन्यतमाः सुनिश्चितम् । [११५]त ऊचुः-मूष भोः! त्वं वा क्षिपेः किं वा वयं पुरा? ॥२२६॥
[११६]असावाह "भवेन्नाम पूर्वं क्षेपस्तु वः"; तदा । तेऽक्षिपन्, लोकचक्षूंषि चात्यर्थं खल्वमोहयन् ॥२२७॥
भयन्तेऽजनयन् किञ्च महामायामदर्शयन् । [११७]प्रैरयाम वयञ्चाऽथ मूषं यद् यष्टिकां निजाम्— ॥२२८॥
धरित्र्यां त्वं क्षिपे (दानीं) तच्चाश्चर्यं चकार ह । अमीषां कृत्रिमां मायामञ्जसा साऽगिरत् किल ॥२२९॥
[११८]सत्यं प्रमाणितं हीत्थं जातं यच्चाऽथ तत्कृतम् । मिथ्या प्रकाशितं तच्च (लोकेषु) जातमेव तु ॥२३०॥
[११९]परास्तास्तेऽभवन्नित्थं निन्दिता अपि तत्र ते । [१२०]तथा मायाविनोऽभूवन् प्रणिपातपरा अधः ॥२३१॥
[१२१]आक्रोशन् "श्रद्धरा जाता वयं विश्वप्रभौ किल । [१२२]हारदूनस्य मूषस्य चाऽपि यो वर्त्तते प्रभुः" ॥२३२॥
[१२३]प्रिययौनोऽवदत् "यूयं ममादेशात् पुरैव यत् । श्रद्धरास्तत्र संजातास्तदेतत् कपटं हि वः ॥२३३॥
यदस्मिन् नगरे यूयं कुरुथाऽस्य जनानितः । पुरात् सारयितुं तावत्, तच्छीघ्रं ह्येव वेत्स्यथ ॥२३४॥
[१२४]अहं वो हस्तयोश्चैव पादयोश्चैव कर्त्तनम् । पार्श्वाभ्यां विपरीताभ्यां कारयिष्यामि, किं च वः ॥२३५॥
शूलारोपणमप्यूर्ध्वं कारयिष्यामि (मृत्युदम्) । [१२५]"गन्तुमुन्मनसो ह्येव स्वं प्रभुं," तेऽवदन्निदम् ॥२३६॥
[१२६]वैरायसे त्वमस्माभिस्त्वनेनैव हि केवलम् । श्रद्धरा यद् वयं जाताः समुपेतेषु लक्ष्मसु— ॥२३७॥
प्रभोर्नोऽस्माञ्जनांस्तावत्';प्रभो नोऽस्माञ्जनान्किल । देहि स्थैर्यस्य किञ्चाऽथ यदैव तु म्रियेमहि ॥२३८॥
अर्पितात्मान एवाऽत्र वयं भूत्वा म्रियेमहि । [१२७]अवदन् ज्ञातिमुख्याश्च प्रिययौनस्य तं पुनः ॥२३९॥
"किमुपेक्षिष्यसे त्व भोः! मूषं तद् बान्धवांस्तथा । अशान्तिञ्च कलिञ्चैव सारयतो भुवस्तले— ॥२४०॥
त्वाञ्च त्वद् देवसंघांश्च प्रत्युदास्तान् स्थितानथ । स आह—"विहनिष्यामस्तत् सुतान् दुर्गतेन हि ॥२४१॥
परं नो विहनिष्यामो जायास्तेषां वयं ध्रुवम् । प्रभवामः किलैतेषु पूर्णरूपेण बुध्यताम्" ॥२४२॥
[१२८]स्वबन्धूनवदन्मूषः "ह्यल्लाहात् साह्यमिच्छथ । सन्तोषञ्च पुनर्धत्थ ह्यल्लाहस्यैव काश्यपी ॥२४३॥
स्वदासानां हि यानेष मन्यते ह्यात्मना मतान् । तान् हि योजयते तावत् स्वामित्वेऽस्यास्तथैव च ॥२४४॥
ये चरन्ति हि कर्त्तव्यं भविता निर्णयोऽन्तिमः । तेषामेव ध्रुवं पक्षे;" [१२९]ते तमाहुरनन्तरम् ॥२४५॥
तवोपस्थानतः पूर्वं चापि संत्रासिता वयम् । पश्चाच्चैवा" ऽप्यसावाह—"हन्यात् तावत् प्रभुर्हि वः ॥२४६॥
कदाचिद् वैरिणो वोऽसावभिषिचेत् क्वचित्तथा । धरित्र्यां शासकत्वेन युष्मान् पश्येत् तथैव च ॥२४७॥
कुरुध्वे यद्विधं कर्म"; [१३०]प्रिययौनजनान् वयम् । अग्रसाम समाः यावत् किं च दुर्भिक्षसंकटे— ॥२४८॥
ह्रासे चोत्पादनस्याऽथ, मत्वेदं यत् कदाचन । तेऽवदध्युः; [१३१]परं जाते सौभाग्ये ते सदाऽवदन्— ॥२४९॥
साधिकारा भवामोऽत्र वयं, जात उपस्थिते । दौर्भाग्ये त्ववदन्नेवम् विषादादिदमापतत् ॥२५०॥
ज्ञातीनां तस्य मूषस्य चैव, यद्यपि वस्तुतः । विषादस्त्वाश्रयाणो वै सर्वथाऽल्लाह एव ह ॥२५१॥
अनेके न परं तेषां अत्र बोधयुता जनाः । [१३२]अवोचंस्ते—"भविष्यामः श्रद्धरा न वयं त्वयि ॥२५२॥
कथञ्चिच्चापि त्वं कुर्या नाम व्यामोहितानपि । माययाऽस्मान् स्वमादाय लक्ष्म यत् किंचनाऽपि च ॥२५३॥
[१३३]ततश्चाऽऽपातयामैषु परीवाहमपामथ । शिरींश्चैव कृमींश्चैव दर्दुरांश्च तथाऽसृजम् ॥२५४॥
कौमलानि हि लक्ष्माणि विविधानि निरन्तरम् । प्रैषयाम, वयं ते तु मर्यादाभंगिनोऽभवन्— ॥२५५॥
सापराधा अतश्चैव; [१३४]यातना चाऽपतद् यदा । आक्रोशन् 'ननु भो मूष ! प्रार्थयस्वात्मनः प्रभुम्— ॥२५६॥
अस्मदर्थे, त्वया यस्मात् वाचाबद्धः स तिष्ठति । यातनां त्वमिमामस्मद् यदि प्रद्रावयिष्यसि ॥२५७॥
वचस्तेऽङ्गीकरिष्यामस्सत्यं, सार्धं त्वया तथा । ईश्वरालीनसन्तानं प्रेषयिष्याम एव च" ॥२५८॥
[१३५]निश्चितादवधेरूर्ध्वं प्राप्तव्यो ह्येव योऽभवत् । तैः, वयं यातनास्तेभ्योऽवारयाम यदा तदा ॥२५९॥
प्रतिज्ञाभंगमप्येते ह्यकुर्वन् एव सत्वरम् । [१३६]प्रत्यकार्ष्म वयं तेन न्यमज्जयाम तांस्तथा ॥२६०॥
सिन्धौ, यतो हि लक्ष्माणि ह्यस्मदीयानि ते पुनः । न्यषेधन् अभवंश्चापि निध्यानास्तत्र ते किल ॥२६१॥

CC-0. In Public Domain. Digitized by eGangotri

[१३७]तेषां येऽत्रमतास्तत्र तूत्तराधिकृतान् वयम् । तानकुर्म भुवोंऽशस्य तस्य पश्चिमपूर्वयोः ॥२६२॥
अस्माभिर्वृष्टसौभाग्यो यो बभूव (पुराकिल) । ईश्वरालीनसन्तत्यै प्रभोर्वाक्यं शुभञ्च यत् ॥२६३॥
तत्पक्षे पूर्णतां यातं यतस्ते हि सहिष्णवः । प्रिययौनस्य बन्धूनां तस्य चाप्यथ यत् कृतम् ॥२६४॥
यच्च क्लृप्तं वयं तत्तदनाशयाम चाखिलम् । [१३८]पारे सिन्धोर्वयञ्चाऽथ हीश्वरालीनसन्ततिम् ॥२६५॥
प्रापयाम तथा ते च लोकान् प्राप्ताः किलेदृशान् । येऽभवन्त्सततं सक्ताः स्वाभिर्मूर्त्तिभिरेव तु ॥२६६॥
प्रार्थयन्त हि ते मूष ! घटयास्मत् कृतेऽपि च । कञ्चनैवंविधं देवं यद्विधांस्ते हि बिभ्रति" ॥२६७॥
उवाचाऽसौ-ननु ब्रूथ यूयमज्ञानिसदृशम् । [१३९]यत्र लोका इमे लग्नास्तत्तु नाशोन्मुखं समम् ॥२६८॥
चेष्टन्ते यत्तथा चैते सर्वं वन्ध्यं भवत्यदः" । [१४०]उवाचासौ प्रतीष्टं किं ह्यल्लाहादितरं न्वहम् ॥२६९॥
मार्गयेयं हि युष्मभ्यं स एव त्वत्र यद्यपि । यो वै युष्मान् व्यधात् सर्वान् महनीयतमान् भुवि ॥२७०॥
[१४१]स्मर्यतां समयश्चासावमोचयाम वो यदा । प्रिययौनस्य लोकेभ्यो युष्मान् ये त्वतुदन् भृशम् ॥२७१॥
अघ्नन् बालांश्च वोऽरक्षन् कलत्राण्यसुभिः सह । परीक्षा महतीयं वः प्रभुणा वस्त्ववर्त्तत ॥२७२॥
[१४२]निशस्त्रिंशद् यदा चैव मूषाय प्रादिशाम तु । अवर्धयाम चैवान्या दश तत्र यदा वयम् ॥२७३॥
तेन निर्वर्त्तितश्चासौ काल इत्थं हि तत्प्रभोः । चत्वारिंशन्निशो दिष्टाः पूर्त्तिमायंस्तदा निजम् ॥२७४॥
भ्रातरं प्राह वै मूषो हारदूनमिदं वचः । पृष्ठतो मां मम स्थानं ज्ञातिषु त्वं गृहाण भोः ! ॥२७५॥
न्याय्यं कर्म सदा चैव चर त्वं मा गमस्तथा । मार्गं तं यं हि गच्छन्ति विकृतेः करणा जनाः ॥२७६॥
[१४३]यदा मूषोऽस्मदीयञ्च संकेतस्थानमाययौ । तत्प्रभुस्तेन साकं च वाग्व्यापारं किलाकरोत् ॥२७७॥
तदासावाह तम् स्वामिन् ! दर्शयात्मानमद्य मे । त्वामहं येन पश्येयम्", प्रत्यवादीदसौ पुनः ॥२७८॥
"न द्रष्टुं मान्तु शक्नोषि, परं तं पश्य पर्वतम् । स्थितोऽसौ स्याद्यदि स्थाने निजे तद् द्रक्ष्यसीह माम् ॥२७९॥
ततस्तस्य प्रभुस्तस्मिन् पर्वते चाऽभवद् यदा । सालोकः स हि तं त्वद्रिं चूर्णयामास एव ह ॥२८०॥
मूर्च्छितश्चापतन् मूषः, ससंज्ञः पुनराह च । महिम्नां भाजनं त्वं हि, तवाग्रेऽनुतपामि च ॥२८१॥
श्रद्धराणाञ्च मूर्धन्यः समेषामपि खल्वहम् । [१४४]सोऽवदत् मूष ! सर्वेषां त्वमेवाद्य चितो मया ॥२८२॥
वाग्धरत्वाय चैवाऽपि संलापाय तथा मया । ध्रियतां तत् त्वया यत्ते ददाम्येष तथैव च ॥२८३॥
कार्त्तज्ञं भावमेहि त्वम्; [१४५]अलिखाम पुनर्वयम् । काष्ठपट्टे तदर्थं हि सर्वं किञ्चित्, समस्य च ॥२८४॥
वर्णनं विस्तृतं चैव ह्युपदेशं तथैव च । (अवोचाम) पुनः किञ्च—"ध्रियस्वेदं दृढं किल ॥२८५॥
शाधि ज्ञातीर्निजाश्चैव यदंगीकुर्वतां हि ते । तत्र यद् युक्तमुक्तं तत्, सावज्ञानां गृहं न्वहम् ॥२८६॥
दर्शयिष्यामि ते सद्यः; [१४६]धरित्र्याञ्चाथ ये जनाः । मोघमेवोन्नतायन्ते स्वलक्ष्मभ्यस्तु तानहम् ॥२८७॥
परावर्त्तयिता चाऽस्मि, स्यान्नाम लक्ष्म किञ्चन । लोकितस्तैर्न वै तस्मिन् श्रदाधास्यन्ति ते क्वचित् ॥२८८॥
लोकित्वा चाप्यृजुं मार्गं न स्वीयिष्यन्ति तं तथा । लोकित्वाऽघस्य मार्गन्तु स्वीयिष्यन्त्येव तं पुनः ॥२८९॥
तदेतद् येन तेऽस्माकं न्यषेधन् लक्ष्मजालकम् । उपेक्षावृत्तयश्चैव तेष्वतिष्ठन् सदैव ते ॥२९०॥
[१४७]न्यषेधन् ये त्विहास्माकं लक्ष्मजालं च संगमम् । भाविलोके हि यद् भावि, तत्कृतं सममेव तु— ॥२९१॥
निष्फलं विकलं जातम्, कृताद् भिन्नस्य किन्नु ते । अन्यस्य कस्यचित् तावल् लब्धारो वै फलं क्वचित् ? ॥२९२॥
[१४८]गते मूषे तु तल्लोकाः स्वकीयैरेव भूषणैः । रचयामासुरेकं वै धेनुवत्सस्य पुत्रकम् ॥२९३॥
निर्गमोऽभूद् यतश्चैव रम्भणस्य ध्वनेः पुनः । कथन्नालोचितं तैर्यत् तानसौ नैव भाषते ॥२९४॥
नाऽस्य दर्शयते मार्गं कञ्चनाऽपि च तान् जनान् । देवं कृत्वा त्वमन्यन्त तं हि ते, तेऽभवन् किल ॥२९५॥
सापराधा जना अत्र; [१४९]सानुतापास्तु तेऽभवन् । यदाऽपश्यंश्च यन्मार्गात् सत्यं भ्रष्टास्तदाऽवदन् ॥२९६॥
अस्मान् दयिष्यते नो चेत् क्षंस्यते नाऽथ नः प्रभुः । हानिं ध्रुवमुपेष्यत्सु भविष्यामो वयं खलु ॥२९७॥
[१५०]यदा मूषोऽतिसंक्रुद्धो विग्नः स्वान् वान्धवान् प्रति । परावर्त्तत खल्वाह—मयीतः प्रगते सति— ॥२९८॥
युष्माभिश्चेष्टितं दुष्टं, पूर्वं शीघ्रायितं नु किम् । स्वप्रभोः शासनाच्चापि, काष्ठपट्टांस्ततश्च सः— ॥२९९॥
शाययन् सम्मुखं भूमौ, भ्रातुः स्वस्य शिरस्तथा । समाकर्षितुमारेभे गृहीत्वा स्वेन पाणिना ॥३००॥
असावाह—जनन्या मे पुत्रक ! एते जना हि माम् । बलाद्धीनममन्यन्त, हन्तुमुन्मनसस्तथा— ॥३०१॥

CC-0. In Public Domain. Digitized by eGangotri

मामभूवन्, तदेतस्मात् रिपून् मे मयि कारय । मैव लब्धजयान् नाऽथ गणय दोषकृत्सु माम् ॥३०२॥
[151]असावाह प्रभोर्मे! त्वं माञ्च मद् भ्रातरं तथा । क्षमस्व, स्वदयायाञ्च ह्युभावेव प्रवेशय ॥३०३॥
दयादानेऽतिरिच्य त्वं वर्त्तसे सकलानपि । [152]देवं वत्सममन्यन्त ये जना आशु तेष्वपि ॥३०४॥
प्रकोपश्चाऽपमानश्च तत्प्रभोः पार्श्वतो ध्रुवम् । लौकिके जीवने तावत् पतिष्यति, वयं किल— ॥३०५॥
इत्थमेव पुरस्कुर्मस्तान् ये मिथ्याकृतो जनाः । [153]येऽथ मिथ्याकृतः पश्चात् प्रायश्चित्तं व्रजन्ति च ॥३०६॥
श्चत्तथा दधते चोर्ध्वं तेभ्योऽसौ वर्त्तते प्रभुः । क्षमावान्त्सदयश्चापि; [154]गतक्रोधो यदाऽभवत् ॥३०७॥
मूषस्तान् काष्ठपट्टान् वै हस्तयोः खल्वधारयत् । मार्ग-दर्शनमाविष्टं दयाऽऽविष्टाऽभवत् तथा— ॥३०८॥
तस्मिन् लेखे हि तेभ्यो ये बिभ्यति स्व प्रभोः किल । [155]किञ्च मूषः स्वलोकानां सप्तर्ति ह्यचिनोत् पुनः ॥३०९॥
उपस्थापयितुं स्थाने निश्चितेऽस्माभिरेव तु । भुवः कम्पो यदोद्विग्नान् व्यधात् तान् प्राब्रवीदसौ ॥३१०॥
ऐषिष्यश्चेत् प्रभो ! पूर्वं ह्येव सर्वानिमान् जनान् । माञ्चाप्यनाशयिष्यस्त्वं; नाशयिष्यसि साम्प्रतम्—॥३११॥
किमस्मान् कारणात्तस्य विमूढैर्नस्तु यत्कृतम् । परीक्षोपस्थितेयन्तु त्वत्त एकाऽन्यया पुनः ॥३१२॥
कामतो भ्रंशये वाऽपि पथः, मार्गमथाऽपि वा । दर्शयेः कञ्चनाऽपि त्वम्; त्वमस्माकन्तु तिष्ठसि ॥३१३॥
मित्रं संरक्षकस्तावत् तदस्मांस्त्वं क्षमस्व च । [155]दयादानञ्च नो देहि, क्षन्तॄणां त्वं महत्तमः ॥३१४॥
[156]अस्मिन् परत्र चैवाऽपि लोके भद्रं च शाधि नः । परावृत्ता वयं त्वां हि, ततोऽसौ प्राब्रवीदिदम् ॥३१५॥
"कामये यं तमेवाऽहं कृच्छ्रैरापूरयामि तु । दयावास्यमिदं सर्वं परं मे त्वत्र विद्यते ॥३१६॥
शासिष्यामि दयां ताञ्च तेभ्य एव तु केवलम् । ये भयेन प्रवर्त्तन्ते ददन्ते निर्धनाय च ॥३१७॥
श्रद्दधाना अथा ऽस्माकं चाऽऽयातेषु भवन्ति ह । [157]ऊनमीञ्च रसालं वै नवीञ्चानुसरन्ति ये ॥३१८॥
यमिञ्जीले च तौराते पश्यन्ति वर्णितं किल । शास्ति यस्तान् सदा भद्रमभद्राद् वारयत्यथ ॥३१९॥
उत्तमानि तु वैधानि ह्यवैधान्यपराणि च । करोति यः, तथा यश्च तेषां भारं ततः पुनः ॥३२०॥
सन्दानञ्च स्थितं तेषु परस्तान्नुदते किल । तदस्मिन् श्रद्धरा ये तु तस्य पक्षं गताश्च ये ॥३२१॥
तस्य साह्यं व्यधुर्ये च ह्यनुसस्रुस्तथैव च । तं प्रकाशं किलासीद् यः समं तेनाऽवतारितः ॥३२२॥
एत एव जना ये वै साफल्यलाभतत्पराः । [158](मोहम्मद !) वदैतत्त्वम् 'अयेलोकाः ! सनिश्चयम् ॥३२३॥
युष्माकं प्रातिनिध्येन रसालस्त्वहमेव भोः ! । तस्याल्लाहस्य खल्वत्र भवामि, यः प्रभुः किल— ॥३२४॥
व्योम्नाञ्चैव धरित्र्याश्च राज्यस्यापि समस्य तु । तमृते नेतरः पूज्यः, स एव जीवयत्यपि— ॥३२५॥
मारयत्यप्यसावेव, तदल्लाहेऽथ तस्य च । ऊनमेऽथ रसाले वै नविनि श्रद्विधत्त भोः ! ॥३२६॥
श्रद्दधाति तदुक्तेषु तथा ऽल्लाहे ऽपि यः किल । यूयं तमनुयातेह, तेन तावत् कदाचन— ॥३२७॥
विन्देताऽपि सुमार्गं वै; [159]मूषज्ञातिषु कश्चन । गणो वै तादृशोऽप्यस्ति यस्सत्यमार्गदर्शकः— ॥३२८॥
सत्येनैव तथा न्यायं यः पुनः कुरुते (सदा) । [160]व्यभजाम वयं पश्चात् तान् द्वादश गणेषु च ॥३२९॥
यदा तज्ज्ञातयस्तञ्च ह्ययाचन् सलिलं किल । मूषः प्रोत्साहितोऽस्माभिरमूं दण्डेन वै शिलाम्— ॥३३०॥
ताडयितुं, ततोऽमुष्याः शिलायाः स्फुटिताः पुनः । द्वादशोत्सा गणाश्चापि नैजं पानस्थलं पृथक्— ॥३३१॥
जज्ञिरेऽथ वयं तेषु मेघच्छायामकुर्म च । सल्वामन्नौ वतीर्णौ च तेष्वकुर्म (दिशाऽनया) ॥३३२॥
विशुद्धं भोज्यमस्माभिर्यद् दत्तं भुज्यतां ततः । नापाराध्यन्त तेऽस्मभ्यं स्वेभ्य एव तु केवलम् ॥३३३॥
[161]ऊदिमाऽथ यदा किञ्च वसति विशतेह वै । यथेच्छं सर्वतो भुंक्त, ब्रूत चैवं पुनस्तथा— ॥३३४॥
"क्षमाऽर्थं प्रार्थयामो" ऽथ यात द्वारं शिरोनताः । वयं क्षंस्यामहे वोऽघान्, भरिष्यामोऽधिकैः फलैः ॥३३५॥
आदेशवर्त्तिनश्चोर्ध्वम्; [162]परन्तेऽस्मद् गिरो व्यधुः । स्थानापन्नां पृथग् वाचं दुष्टाः, तेनाऽथ यातनाः ॥३३६॥
वियतस्तेषु दुष्टेषु पुनरस्माभिरीरिताः । [163]सिन्धोस्तटे य आवासस्तमधिकृत्य खल्वमून् ॥३३७॥
पृच्छाऽकार्षुर्यथैतेऽह्नः सीमाभंगं शनैः किल । मत्स्यास्तेषां यथा नीरादुपेते शनिवासरे— ॥३३८॥
उत्तलं ह्युपयान्ति स्म तत्समक्षं तु ते पुनः । मर्यादोल्लंघनादेवं वयमित्थं तु ताञ्जनान् — ॥३३९॥
जुहुमस्स्मः परीक्षायाम्; [164]अथैकस्तद्गणो यदा । अब्रवीत्—केन भोः! यूयं शिष्ट एवं विधान् जनान् ॥३४०॥
अल्लाहस्तत्परो येषां विनाशाय तु विद्यते । तत्परो भीष्मकृच्छ्राणां दानाय वाऽपि विद्यते" ॥३४१॥

CC-0. In Public Domain. Digitized by eGangotri

तेऽवदन्—रक्षितुं दोषात् समक्षं त्वत् प्रभोरथ । कदाचित् सभयास्ते वा भवेयु (रनयाऽऽशया) ॥३४२॥
[१६५]यदा ते व्यस्मरन् पश्चात् स्मारितं यदभूत् पुरा । अरक्षाम वयं तांस्तु दोषाद् ये ऽवारयन्नथ— ॥३४३॥
अवज्ञाकारणाज्जाल्मान् यातना क्रकचे दृढ़े । अदध्म; [१६६]धाष्ट्र्यसीमान्तं समुपेत्य यदाऽथ ते ॥३४४॥
साभ्यासं तद्व्यचेष्टन्त वारिता अभवन् यतः । वयन्तानुक्तवन्तो हि—"कीशा भवत धिक्कृताः ॥३४५॥
[१६७]यदा किञ्च प्रभुस्तेऽसौ सुस्पष्टं खल्वघोषयत् । पुनरुत्थापनायास्तु दिनपर्यन्तमेव सः— ॥३४६॥
तद् विरोधाय वै लोकान् सततं प्रेरयिष्यति । यातनापातने ये हि साग्रहा अनिशं खलु ॥३४७॥
शीघ्रकारी प्रभुस्ते तु दण्डदाने हि वर्त्तते । निश्चितं स क्षमावांश्च दयाकृच् चापि तिष्ठति ॥३४८॥
[१६८]धरित्र्यां तान् वयं किञ्च व्यभजाम गणेषु तु । केचिद् भद्रा हि तत्रासन् विपरीतास्तथेतरे ॥३४९॥
पर्यैक्षामहि तु स्थित्यां वयं क्षिप्त्वा पुनश्च तान् । समायां विषमायाञ्च, निवर्त्तेरन् क्वचिद्धि ते ॥३५०॥
[१६९]स्थानापन्ना जना जातास्ततस्तेषामलम्भि यैः । उत्तराधिकृतौ शास्त्रं जीवनस्य तथाऽपि ते— ॥३५१॥
तुच्छस्यैव हि सम्भारं संगृह्णन्त्यत्र संततम् । वदन्त्येवं च—"सत्येन वयं क्षंस्यामहे खलु" ॥३५२॥
तद्विधश्चैव सम्भारः पुनस्तानुपयाति चेत् । प्रतिगृह्णन्ति तञ्चापि, कारिता तैरभून्न किम्— ॥३५३॥
प्रतिज्ञा शास्त्रवाचाभिः यदेते नैव किञ्चन । व्याहरेयुर्हि सम्बन्धे त्वल्लाहस्य कदाचन— ॥३५४॥
सत्यं तावद् विहायाऽन्यत्, यद् यत् तत्र च विद्यते । पठितं हि स्वतस्त्वेभिः, सभयास्त्वत्र सन्ति ये— ॥३५५॥
परलोकस्य वै वासस्तेभ्यः साधिष्ठ एव तु । किन्न यूयं विजानीथ ?; [१७०]शास्त्रं ये तु जना इह ॥३५६॥
धारयन्ति दृढं, पूजां किञ्च निर्वर्त्तयन्त्यथ । निश्चितं वयमीदृक्षान् परिवर्त्तनदान् जनान्— ॥३५७॥
नष्टकर्मफलान्नैव करिष्यामः कदाचन । [१७१]सानुमन्तं यदा किञ्च छदिवत् तेष्वकुर्म वै ॥३५८॥
ते त्वमन्यन्त तेष्वेव पर्यापतति खल्वसौ । अवोचाम पुनः—"दत्तं यदस्माभिर्हि वर्त्तते— ॥३५९॥
युष्मभ्यं तद् दृढैर्भूत्वा युष्माभिर्धार्यतामथ । स्मर्यतां तत्र यच् चास्ति, भवत सभया यतः ॥३६०॥
[१७२](स्मर्यताम्) च यदा तावत् प्रभुर्वंशचादिमस्य तु । सुतानां पृष्ठतस्तेषां सन्तर्ति ह्युदपादयत् ॥३६१॥
स्वयं तेष्वेव तांश्चैव साक्षिणो ह्यप्यकारयत् । (अपृच्छत्) "किन्न युष्माकं प्रभुस्तावद् भवाम्यहम् ? ॥३६२॥
ते ऽवदन्—"असि सत्येन, साक्षिणो वयमत्र च" । इदञ्चैतत् कदाचित् त्वं पुनरुत्थापनाऽहनि— ॥३६३॥
इदन्नैव वदेरस्मादनभिज्ञोऽभवं त्वहम् । [१७३]इदं किम्वा वदेः—"यत्ते कदाचित् पूर्वजाः पुरा ॥३६४॥
प्रतिम्नो हि व्यधुः, पश्चात् वयन्तूत्पत्तिमागताः । तेषामेव हि सन्तत्याः, नाशयसि किमत्र नः— ॥३६५॥
मिथ्याचारकृताद् दोषात्तेषां (येऽस्मत्तु पूर्वजाः) । [१७४]वर्णयामो वयं स्पष्टं स्वायातानीदृशं किल ॥३६६॥
आशास्महे कदाचित् ते निवर्त्तेरन् अथापि च । [१७५]वृत्तं तस्य जनस्यैतान् कीर्त्तय त्वं तथैव च ॥३६७॥
यस्मै वयमयच्छाम स्वायातान्, परतस्तु सः । अत्यजत् तान् ततश्चैनं ह्यात्मसात् शातनोऽकरोत् ॥३६८॥
पथभ्रष्टेषु सोऽप्येकः तत्पश्चात् खल्वजायत । [१७६]अदास्यामोन्नतिं तस्मै ह्यैष्यिाम तु चेद् वयम् ॥३६९॥
तैरेव, तु परं (हन्त !) जातो लोकमना ह्यसौ । प्रावर्त्तताऽथ कामेन, जातोऽसौ कुक्कुरोपमः ॥३७०॥
क्लिष्टोऽपि सुबहुश्वासस्तद् वदक्लिष्ट एव च । न्यषेधन् ये ऽस्मदायातान् तुलां तेऽपि व्रजन्त्यमूम् ॥३७१॥
ऐतिह्यमीदृशं तावद् भृशं श्रावय खल्विमान् । कदाचित्ते प्रवर्त्तेरन् ह्येव बुद्ध्याश्रयेण तु ॥३७२॥
[१७७]उपस्थापयितारस्ते दुष्टं दृष्टान्तमेव तु । न्यषेधन् येऽस्मदायातान्, दूषितस्सततञ्च तैः ॥३७३॥
आत्मा त्वेवात्मना तावत्; [१७८]यमल्लाहस्तु दर्शयेत् । मार्गं लब्धा स एवाऽत्र, यं पथो भ्रंशयेच्च सः ॥३७४॥
निश्चितं ह्युपगन्तारो हानिमेव तु ते जनाः । [१७९]जिनांश्चैव मनुष्यांश्च सुबहून् निश्चितं वयम् ॥३७५॥
अप्रययाम (काश्यप्यां) नरके प्रेषणाय वै । संवेदनन्तु नास्त्येव सत्सु यद् हृदयेष्वपि ॥३७६॥
सचक्षुषः परं नो ते लोकन्ते तैस्तथैव च । सश्रवा न तु शृण्वन्ति तैः, कडङ्गरसदृशाः— ॥३७७॥
ते तु, प्रत्युत तेभ्यो ऽपि हीनहीना भवन्ति ते । ते हि ये पतिता अत्र तिष्ठन्ति खल्वचेतनाः ॥३७८॥
[१८०]भवन्त्यल्लाहनामानि चारिष्ठानि हि, तं ततः । तैरेव नामभिर्यूयं संबोधयत, किञ्च ये— ॥३७९॥
तस्य नामानि निन्दन्ति तान् परास्यत वै जनान् । यत्ते कुर्वन्ति लप्स्यन्ते तत्फलं त्वञ्जसैव ते ॥३८०॥
[१८१]असृजाम वयं यांश्च तेषामेकश्च तादृशः । गणो यः किल सत्येन मार्गसन्दर्शनोन्मुखः— ॥३८१॥

CC-0. In Public Domain. Digitized by eGangotri

सत्येनैव तथा न्यायं चाचरीतीह यः पुनः । [१८२]न्यषेधन् येऽस्मदायातान् तान् वयञ्च शनैः शनैः ॥३८२॥
(विनाशाभिमुखां) स्तावद् विधास्यामः परन्न ते । ज्ञानमप्यस्य यास्यन्ति; [१८३]शिथिलप्रग्रहानिमान् ॥३८३॥
करोम्येष, न सन्देहः, दृढा मे सन्ति योजनाः । [१८४]नो विचारस्य नन्वेते प्रयाताः सरणिं किमु ? ॥३८४॥
सार्थ एषां न केनाऽपि खलून्मादेन पीडितः । सचेतसान् करोत्येष युष्मांस्तु केवलं हि सः ॥३८५॥
[१८५]दृष्टिपातमकुर्वंस्ते किन्नोर्व्यां वियतां तथा । राज्ये यत् सर्वमल्लाहः सृष्टवान् न तथाऽत्र च ॥३८६॥
कदाचिन् नियतः कालः स्यादेवैषामुपागतः । इतोऽन्यत् किन्नु तद् भावि विश्वसिष्यन्ति यत्त्विमे ॥३८७॥
[१८६]मार्गं कोऽदर्शयत्तस्मै यमल्लाहः स्वयं किल । भ्रंशयेत् (सुभगा) न्मार्गात्, जहात्येनानसौ पुनः ॥३८८॥
प्रतीपाद् दर्शनादेषाम्; [१८७]ते त्वां पृच्छन्ति तां घटीम् । कदाऽसौ यत् स्थितिं कर्त्री, ब्रूहि तान् ज्ञानमस्य तु ॥३८९॥
प्रभुरेव ममासौ भोः ! विभर्त्ति, नोऽन्तरेण तम् । काशयिष्यति तां कोऽपि नियते समये सति ॥३९०॥
प्रभुत्वं गुरु खल्वस्या धरित्र्यां च वियत्सु च । अकस्मादेव युष्मासु तथा सा चाऽऽपतिष्यति ॥३९१॥
सम्यग् वेत्तेति कृत्वा ते त्वां पृच्छन्ति ततो वद । "केवलोऽल्लाह एवाऽस्य ज्ञाता," (हन्त!) परं जनाः ॥३९२॥
बहवोऽत्र न बुध्यन्ते; [१८८]ब्रूहि—नाहं प्रभुः किल । स्वस्मिन् भद्रेऽप्यभद्रे च, तदेव घटतीह तु— ॥३९३॥
यत् स कामयते ऽल्लाहः, यद्यज्ञास्यं परोक्षजम् । संग्रहीतानहं लाभानकरिष्यं ततो ध्रुवम् ॥३९४॥
हानये नो ऽभविष्यच् च कोऽपि मे ऽहन्तु चेतकः । केवलं श्रद्धरेभ्योऽस्मि शुभोदन्तप्रदस्तथा ॥३९५॥
[१८९]स एवैकात्मनो यस्त्वामसृजत् तत एव च । असृजत् तस्य सार्थञ्च तस्यां जोषं व्रजेद् यथा ॥३९६॥
यदाऽसौ संवृतां ताञ्च ह्यकरोत् लघु गर्भकम् । सा बभार यमादाय स्वगतिः साह्यवर्त्तत ॥३९७॥
सभारा सा यदा जाता तावल्लाहं निजं प्रभुम् । प्रार्थयेताम्—"कृतज्ञौ वै भविष्यावस्तु नौ यदि— ॥३९८॥
स्वस्थं भद्रं पुनर्वत्सं दास्यसि (कृपया स्वया)" । [१९०]लब्ध्वा ऽल्लाहात् तु तौ स्वस्थं भद्रं वत्सं तदुत्तरम् ॥३९९॥
ताभ्यां स यददात् तस्मिन् तौ तदंशहरं पुनः । प्रत्यस्थापयतामेव, यद् विधां तुलनां हि ते— ॥४००॥
जनयन्ति, ततो ऽल्लाहस्त्वस्ति वै सुमहत्तमः । [१९१]प्रतिम्नः कुर्वते किन्ते तान्, न वै जनयन्ति ये— ॥४०१॥
किञ्चित् प्रत्युत ते तावत् जन्यन्ते त्वेव केवलम् । [१९२]नाऽथ सामर्थ्यवन्तस्ते साह्यं दातुं कथञ्चन ॥४०२॥
नापि साह्यं निजं कर्त्तुं प्रभवन्ति कथञ्चन । [१९३]आहूताश्चापि मार्गे त्वां नानुयान्त्यत्र नान्तरम् ॥४०३॥
तेभ्यः, तान् आह्वयेः किम्वा तूष्णीं तिष्ठेरथाऽपि वा । [१९४]आह्वयथ पुनर्यूयमृते ऽल्लाहं तु यान् जनान्— ॥४०४॥
युष्माभिः सदृशा ह्येव भवन्ति तेऽपि बन्धकाः । आह्वयत ततो यूयं तांश्च सत्या भवेत चेत्— ॥४०५॥
प्रत्याह्वानं हि कर्त्तव्यं तैस्ततः; [१९५]सन्ति किं पुनः । पादास्तेषां यथा ते वै चलेयुः ? सन्ति किं पुनः ॥४०६॥
हस्तास्तेषां यथा ते वै विदध्युर्ग्रहणं पुनः ? । सन्ति चक्षूंषि वा तेषां पश्येयुर्यैरथापि ते ? ॥४०७॥
सन्ति श्रोत्राणि वा तेषां यैः शृण्वन्तु जना अमी ? । यूयमाह्वयत स्वान् वै प्रतिम्नस्तु स्थिरीकृतान् ॥४०८॥
अनुज्झित्वा पुनर्माञ्च मद् विरोधेऽभिगच्छत । [१९६]रक्षकं मित्रमल्लाहस्त्वसौ मे वर्त्तते किल ॥४०९॥
प्राकाशयद् हि यः शास्त्रं, रक्षणं स ददाति ह । लोकेभ्यः किल भद्रेभ्यः; [१९७]त्यक्त्वाऽल्लाहं तथा च यान् ॥४१०॥
आह्वयथ न शक्तास्ते युष्मत् साह्ये कथञ्चन । नाऽपि साह्यं निजं कर्त्तुं स्वतस्ते प्रभवः क्वचित् ॥४११॥
[१९८]आहूताश्चापि मार्गे त्वां न ते शृण्वन्ति किंचन । वेत्सि त्वं पश्यतस्त्वां तान्, न बुध्यन्ते तथाऽपि ते ॥४१२॥
[१९९]विनयस्य क्षमायाश्च क्रमो ह्येव तु पाल्यताम् । भद्रं हि शास्यताम्, मूढात् परस्तात् स्थीयतां तथा ॥४१३॥
[२००]क्षपयेद् गर्हणा चेत् त्वां शातनात् तु पुरस्कृता । याह्यल्लाहं शरण्यं तत् श्रोता ज्ञाता स हि ध्रुवम् ॥४१४॥
[२०१]वस्तुतः सभया ये तु क्षपयेद् गर्हणा तु तान् । शातनाच् चेत् तदैवामी सावधाना भवन्ति ह ॥४१५॥
स्फुरत्येषां तथा बुद्धिः; [२०२]अमीषां येऽथ बान्धवाः । ते त्वमून् दोषपंके हि मज्जयन्त्येव सर्वथा ॥४१६॥
न चैवान्तं प्रयान्त्यस्य; [२०३]ह्येषां त्वं सम्मुखं यदा । एकमप्यथ नायातं प्रस्तौषीमे वदन्ति च— ॥४१७॥
'चित्वा नैकोऽपि किं तावत् प्रस्तुतः', ब्रूहि खल्विमान् । "प्रभोर्मे यन्निविष्टन्तद् ह्युपजीव्य तु केवलम् ॥४१८॥
प्रवर्त्तेऽहं, तथेमास्तु किलान्तर्ज्ञानसूक्तयः । प्रभोर्वः पार्श्वतः किञ्च मार्गसन्दर्शनं पुनः ॥४१९॥
दया चैवाऽपि लोकेभ्यः श्रद्धरा ये भवन्ति ह । [२०४]वाचनं स्यात् कुराणस्य यदा सावहितास्तदा ॥४२०॥

CC-0. In Public Domain. Digitized by eGangotri

भूत्वाऽऽकर्णयतैनन्तु जोषं तिष्ठत चाऽप्यथ । दयाभाजः कदाचिद् यद् भवेतेह; [२०५]तथैव च – ॥४२१॥
प्रातरात्मप्रभुं ध्यात ध्यात सायं पुनस्तथा । विनीता आत्मना सन्तः सदरा मध्यमस्वराः ॥४२२॥
सप्रमादजनानाञ्च न यूयं भवत क्वचित् । [२०६]महिम्नः स्वस्य दर्पात्तु त्वत् प्रभोः पार्श्वगा हि ये ॥४२३॥
प्रार्थनायाः किलामुष्य पराङ्आस्या भवन्ति नो । स्तुवन्त्यस्य गुणान् तेऽथ निपतन्तो नमन्ति च ।४२४॥

योगः—४२४

CC-0. In Public Domain. Digitized by eGangotri

८

सूक्तम्—युद्ध संत्याजितानि

(अल-अनफाल)

(महाकालेऽवतीर्णाः पंचसप्ततिरायाताः)

साल्लाह्नामजापं योऽल्लाह्रो दयी हितैष्यपि

[१]ते त्वां पृच्छन्ति युद्धानां त्याजितान्यधिकृत्य वै । ब्रूह्यल्लाहस्य वै तानि वाग्घरस्य तथैव च ॥ १ ॥
बिभीत यूयमल्लाहात् तेन, किं च परस्परम् । प्रवर्त्तध्वं सदा न्यायात्, वाग्घराल्लाह्योस्तथा ॥ २ ॥
वर्त्तध्वं शासने नित्यं श्रद्धत्थ यूयमत्र चेत् । [२]श्रद्धरास्त्वत्र ते ह्येव सहृत्कम्पास्तु ये जनाः ॥ ३ ॥
कीर्त्तने जायमाने तु ह्यल्लाहस्य भवन्ति वै । वाच्यमानास्तथाऽऽयाताः समक्षं वर्धयन्त्यथ ॥ ४ ॥
उत्तरादुत्तरं येषां श्रद्धां, ये विश्वसन्ति च । प्रभुं स्वं सर्वकालेषु; [३]ये प्रतिष्ठापयन्त्यथ ॥ ५ ॥
पूजां, व्ययञ्च कुर्वन्ति ह्यस्माभिर्दत्तवैभवात् । [४]ईदृशा ह्येव ते येऽत्र श्रद्दधाना जना मताः ॥ ६ ॥
आसते तत्प्रभोः पार्श्वे तेभ्यस्तावत् क्षमाऽथ च । (मान-) सोपान एवाऽपि महौदार्यञ्च पूजितम् ॥ ७ ॥
[५]त्वत् प्रभुस्त्वां हि सत्येन वेश्मनस्ते ह्यसारयत् । यथा, किञ्च दलैकाय श्रद्धराणान्तु नाऽभवत् ॥ ८ ॥
सर्वथैव च तद् रुच्यम्; [६]सत्यस्य विषये हि ते । सविवादास्त्वयाऽतिष्ठन् प्रत्यक्षं तत्तु यद्यपि ॥ ९ ॥
सुतरामभवत् स्पष्टं यथैव वाहिता हि ते । दृश्यमानमभिमृत्युं भवेयुः; [७]किञ्च वै यदा ॥१०॥
अल्लाहः प्रत्यजानाच्च युष्मान् यद् दलयोर्द्वयोः । भवेदन्यतरद् युष्मत्, युष्मदिष्टं तथाऽभवत् ॥११॥
निरस्त्रं यद् दलं तद् वै समुपेयात्, अथाऽपि च । अल्लाह इष्टवान् सत्यं जयतात् तस्य भाषितात् ॥१२॥
श्रद्विहीनजनानाञ्च मूलं कृत्तं भवेत् पुनः । [८]जयताद् येन वै सत्यमसत्यं स्याद् गतप्रभम् ॥१३॥
सदोषाणामिदन्तावत् त्वरुच्यं स्यात् तथापि किम् । [९]प्रार्थयध्वं यदा किञ्च यूयं खल्वात्मनः प्रभुम् ॥१४॥
स चाप्युवाच "यास्यामि साह्यहेतोरहं किल । अभंगक्रममादाय देवसेनासहस्रकम्" ॥१५॥
[१०]भद्रोदन्तमिमं तावदकृत केवलं प्रभुः । येन स्वान्तेषु युष्माकं शं ततं स्यात् कथञ्चन ॥१६॥
विजयः केवलात् तावदल्लाहाद्धि प्रवर्त्तते । प्रभुत्वाच्छालतेऽल्लाहस्तत्वदर्शी तथाप्यसौ ॥१७॥
[११]तस्माद् विश्वासहेतोश्च यदासावकरोत् तथा । युष्मान् त्स्वापावृतान् सर्वान् अवर्षद् वारि चाम्बरात् ॥१८॥
पुनातु तेन युष्मान् यत् अपाकुर्यात्तथैव च । शातनाद् त्रिभयं युष्मत्, युष्माकं हृदयान्यथ ॥१९॥
पुष्णातु च, तथा कुर्यात् पदानि निश्चलानि वः । [१२]यदा युष्मत् प्रभुर्देवान् प्रेरयंश्चाब्रवीदिदम् ॥२०॥
युष्माभिः सार्धमेषोऽहं, तद् यूयं श्रद्धरान् जनान् । प्रापयत स्थिरीभावं, श्रद्धीनहृत्सु चाप्यहम् ॥२१॥
क्षिपाम्येष भयं शीघ्रं, तत्तेषां कन्धराः पुनः । आहताऽऽहत चाप्येषां गात्रसन्धीन् सुनिश्चितम् ॥२२॥
[१३]एतच्चास्माद् यतो ह्येते व्यरुन्धंस्तस्य वाग्घरम् । तथाऽल्लाहं हि, यः कोऽपि ह्यल्लाहं चाऽथ वाग्घरम् ॥२३॥
विरुन्ध्यात्तस्य खल्वत्र त्वल्लाहोऽपि न संशयः । प्रचण्डस्य हि दण्डस्य दाता भवति सर्वथा ॥२४॥
[१४]तदेतद् (दण्डमास्ते वः) स्वादं वित्तास्य (वेद्यताम्) । इदञ्चापि यदग्निर्वै ह्यश्रद्धेभ्योऽस्ति यातना ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[15]श्रद्धरा हे जनाः ! यूयं जन्येऽश्रद्धैः समं किल । आभिमुख्ये, न वै यात पाराङ् मुख्यं कदाचन ।।२६।।
[16]विहाय यस्तु सन्धानं स्वगणेन तथैव च । विहाय युद्धनीतिञ्च पाराङ्मुख्यं व्रजेत् पुमान् ।।२७।।
उदिते हीदृशे कालेऽल्लाहकोपं भजेदसौ । नारको वसतिस्तस्य महानिन्द्यं हि वेश्म यत् ।।२८।।
[17]नाऽवधिष्ट तु तान् यूयं ह्यल्लाहस्तान् किलाऽवधीत् । नाक्षिपस्त्वञ्च तांस्तावत् ह्यल्लाहस्तान् किलाऽक्षिपत् ।।२९।।
श्रद्धराणां परीक्षार्थं त्वात्मनो ह्येव सर्वथा । श्रोता ज्ञाता तथाऽल्लाहः सन्देहो नात्र कश्चन ।।३०।।
[18]इदं (हीत्थं) तदेतच् च (वेत्तव्यं) यदसौ प्रभुः । श्रद्विहीनाभिसन्धीनां वर्त्तते क्षपणः किल ।।३१।।
ऐच्छश्चेत् निर्णयं तत्तत् तव प्रत्यक्षमागतम् । [19]विरतश्चेद् भवेस्तत्ते गुणायैव भवेत् किल ।।३२।।
अथ त्वं पूर्वमाचारं पुनरेव चरिष्यसि । प्रवर्त्तिष्यामहे तद् भोः ! वयञ्चापि तथैव तु ।।३३।।
परिमाणाधिकश्चापि न हि त्वां त्वद् गणस्तथा । उपकर्त्ता हि, सोऽल्लाहः श्रद्धरान् संगतः किल ।।३४।।
[20]श्रद्धराः ! अनुवर्त्तध्वं यूयमल्लाहशासनम् । वाग्घरस्य पुनस्तस्य, श्रुत्वा तान्न पुनस्तथा ।।३५।।
वैमुख्यं वै ततो यात; [21]मा तथाऽऽचरत क्वचित् । तद्-वद् ये कथयन्तीह—श्रुतं, शृण्वन्ति नाऽपि तु ।।३६।।
[22]सर्वथा येन बुध्यन्ते ते मूका बधिरा जनाः । सपर्णा भुवि सन्तीह ह्यल्लाहस्य दृशा किल ।।३७।।
सर्वेषामपि जीवानां घोरा दुष्टतमा ध्रुवम् । [23]अल्लाहोऽश्रावयिष्यत्तान् सत्यं भद्रांशमेव तु ।।३८।।
अवेत्स्यत्तेषु चेत् किंचित्, परं तान् यदि खल्वसौ । किमप्यश्रावयिष्यत् तत् त्वस्थास्यंस्ते पराङ्मुखाः ।।३९।।
[24]श्रद्धराः ! अनुवर्तध्वं यूयमल्लाह—शासनम् । वाग्घरस्य तथा चैव यदाऽसावाह्वयेत्तु वः ।।४०।।
दिशायां तत्र या वै वो वर्त्तते जीव—दायिनी । बुध्यतां चाऽथ सोऽल्लाहो नृहृदोर्मध्यगः किल ।।४१।।
स एवासौ च यं यूयं समवेता भविष्यथ । [25]रक्षणीयश्च युष्माभिः स्वात्मा दण्डात् तु यः किल ।।४२।।
नापतिष्यति तेष्वेव जाल्माः वः केवलन्तु ये । बुध्यतां चाऽथ सोऽल्लाहस्तूग्रदण्डो हि वर्त्तते ।।४३।।
[26]सार्यतां हीनसंख्याका यूयमास्त यदाऽथ च । अगण्यध्वं बलाद् हीनाः किञ्च यूयमतिष्ठत ।।४४।।
त्रस्ताः, लोकाः कदाचिन्नो युष्मानुन्मूलयन्तु हि । ततोऽयच्छत् स आवासं साह्यात् पुष्टिं च वोऽकरोत् ।।४५।।
अयच्छत् पूतभोग्यानि वृत्तिरुपेण वस्तथा । कृतज्ञा येन वै यूयं तिष्ठतेह (सदैव तु) ।।४६।।
[27]अल्लाहेन समं चैव वाग्घरेण तथैव च । व्याप्य स्थितं तु विश्वासं श्रद्धराः ! हत मैव भोः ।।४७।।
वञ्चनां चाऽथ मा काष्टं संविदानास्स्थ वै यदा । कर्त्तव्येषूररीकृत्य प्रगृहीतेषु चात्मना ।।४८।।
[28]परीक्षार्थं हि युष्माकं विभवाश्चाऽथ सन्ततिः । ज्ञायतां श्रयते चाऽथ पुरस्कारो महान् प्रभुम् ।।४९।।
[29]श्रद्धरा ! यूयमल्लाहात् सततं यदि भेष्यथ । विवेकेन पुनर्युष्मान् असौ संभावयिष्यति ।।५०।।
परासिष्यति युष्मत् स दुरितान्यखिलानि वै । क्षंस्यते च पुनर्युष्मान् अल्लाहेऽनुग्रहो महान् ।।५१।।
[30](स्मर्यताञ्चैव कालोऽसौ) श्रद्विहीना जना यदा । अकुर्वन्नभिसन्धींस्ते त्वद्विरोधे बहून् किल ।।५२।।
निग्रहाय हि ते किम्वा त्वद्वधायाथवा पुनः । सारणाय (प्रदेशात्) ते लीनास्ते स्वाभिसन्धिषु ।।५३।।
तत्राऽतिष्ठन् इहाऽल्लाहः स्वेषु लीनो व्यतिष्ठत् । अभिसन्धिपराणान्तु ह्यल्लाहस्तूत्तमः किल ।।५४।।
[31]वाच्यन्तेऽस्मद् यदाऽऽयातास्तेभ्य इत्थं वदन्ति ते । श्रुतवन्तो वयम्, सत्यामिच्छायां शक्नुमो वयम् ।।५५।।
चापि व्याहर्त्तुमेवन्तु, भवन्तीमानि सर्वथा । पूर्वजानां हि लोकानां कथाख्यानानि केवलम् ।।५६।।
[32]यदाऽवोचन् पुनस्ते च भगोऽल्लाह ! अस्ति चेदिदम् । ह्येव सत्यं स्रुतं त्वत्तः व्योम्नस्तत्त्वं प्रवर्षय ।।५७।।
पाषाणानथवाऽस्मांस्तु कृच्छ्रदां यातनां किल । कांचिदापातयैव त्वम्; [33]न चापीत्थं घटिष्यति ।।५८।।
त्वयि तान् संगतेऽल्लाहस्तान् कथञ्चित् प्रपीडयेत् । तुदेद् वाऽपि यदल्लाहस्तान् क्षमार्थं कृतक्रमान् ।।५९।।
[34]दण्डयेत् केन नाल्लाहस्तान् यदा ते निरोधकाः । मार्गस्य किल जायन्तेऽनिन्द्यपूजागृहस्य हि ।।६०।।
नाधिकारो भवत्येषां निरोधे कोऽपि यद्यपि । साधिकारास्तु ते ह्येव ये (ततः) सभया जनाः ।।६१।।
विदन्ति न परन्त्वेषां बहवस्त्वत्र (खल्विदम्) । [35]शीत्कारं (तालिकानादं) व्यतिरिच्य न वर्त्तते ।।६२।।
काचनान्या तु वै पूजा तेषां काव्यमुपेत्य हि । (उक्तास्तेनाऽभवंस्ते च) श्रद्विहानाद्धि साम्प्रतम् ।।६३।।
नारकं स्वदत स्वादम्; [36]श्रद्विहीनास्तु येऽभवन् । अल्लाहमार्गरोधाय व्ययीकुर्वन्ति ते धनम् ।।६४।।
सततञ्च करिष्यन्ति, पश्चात्तापाय चाप्यदः । परिणंस्यति तेषां वै ते तथा चान्ततः पुनः ।।६५।।

CC-0. In Public Domain. Digitized by eGangotri

पराजिता भविष्यन्ति, श्रद्विहीनाश्च ये जनाः । समवेताः करिष्यन्ते नारकं प्रति ते तथा ॥६६॥
[३७]येनाल्लाहः सपापान् वै निष्पापेभ्यो वियोजयेत् । सपापान् चिनुयाच् चैव ह्युपर्युपरि तु व्रजे ॥६७॥
नारकाग्नौ पुनश्चैतान् सर्वान् संधुक्षयेदपि । एत एव जना ये वै हानिभाजो भवन्ति ह ॥६८॥
[३८]भणैतत् श्रद्विहीनांस्त्वं—विरतास्ते भवन्ति चेत् । क्षमितास्ते भविष्यन्ति कृतानां खल्वपेक्षया ॥६९॥
कर्मण्यावर्त्तयन्त्येते यदि चेत् सन्तु सम्मुखम् । निदर्शनानि खल्वेषां पूर्वजानान्तु वै नृणाम् ॥७०॥
[३९]तावत् तैरथ योद्धव्यं कलिर्यावन्न नश्यति । धर्मः सर्वांगरुपेण कल्पेत प्रभवे च न ॥७१॥
विरमन्ति यदाप्येते ततस्तूर्ध्वं (ह्यसंशयम्) । यदप्येते तु चेष्टन्ते ह्यल्लाहस्तस्य दर्शकः ॥७२॥
[४०]प्रतिकूला अथैते चेद् भवेयुस्तद् विबुध्यताम् । अल्लाहस्त्वत् प्रभुमित्रं रक्षकश्चापि वर्त्तते ॥७३॥
महान् वै रक्षको ह्येष वरिष्ठश्च सहायकः ।

इति नवमं पारायणम्

अथ दशमं पारायणम्

[४१]युद्धसंत्याजितानीति लभध्वे यच् च वेद्यताम् ॥७४॥
पंचमांशो भवेत् तस्य ह्यल्लाहस्य कृतेऽथ च । वाग्घराय च वन्धूनां कृतेऽनाथेभ्य एव च ॥७५॥
कृते यायावरस्याऽपि श्रद्दध्वे यदि वै क्वचित् । अल्लाहे, यदथास्माभिः काशितं बन्धके निजे ॥७६॥
विवेकाहनि यस्मिन् वै साम्मुख्यमह्न्यजायत । सेनयोरुभयोर्मध्ये, सर्वं कर्त्तुं क्षमः प्रभुः ॥७७॥
[४२]यदा चैवाभवोऽवारे पारे तु चाप्युपत्यकाम् । गणस्त्वामभवच् चाधोऽभविष्यच्चेत् कृता पुनः ॥७८॥
युवाभ्यां काचिदप्यागूस्तामधिकृत्य निश्चितम् । युवयोर्मतभेदो वै ह्यभविष्यत् कदाचन ॥७९॥
(घटितं यच् च तत् तेन) भवितव्यं च निश्चितम् । घटयेदेव सोऽल्लाहः नश्येन् नष्टव्यमेव तु ॥८०॥
येन स्पष्टैः पुनश्चिन्हैः जीवितव्यं च येन तु । जीव्यात् स्पष्टैः स वै चिन्हैः, श्रोता ज्ञाता ध्रुवं प्रभुः ॥८१॥
[४३]यदाऽल्लाहश्च संवेशे हीनसंख्यानदर्शयत् । त्वां हि तान्, चेत् प्रभूतांस्तु यद्यल्लाहः कदाचन ॥८२॥
तांस्त्वामदर्शयिष्यद् वै ह्यत्यक्षस्त्वन्तु साहसम् । अभविष्यन् मिथश्चापि युष्माकं कलहो ध्रुवम् ॥८३॥
अरक्षत् परमल्लाहस्ततो वो, नाऽत्र संशयः । हृदिस्थं चापि लोकस्य वृत्तं जानात्यशेषतः ॥८४॥
[४४]साम्मुख्यञ्च यदा जातं युवयोरुभयोरपि । युष्मानदर्शयत् तान् वै ह्यल्लाहोऽत्यल्पसंख्यकान् ॥८५॥
तांस्तथाऽदर्शयद् युष्मानल्लाहोऽत्यल्पसंख्यकान् । घटितव्यं यथाऽल्लाहो घटयेदेव निश्चितम् ॥८६॥
सर्वमत्र परावृत्तं भवत्यल्लाहमेव तु । [४५]श्रद्धराः ! यदि जायेत केनचित् तु दलेन वः ॥८७॥
साम्मुख्यं तत् स्थिरी भावं यातध्याताऽति च प्रभुम् । यायात येन साफल्यम्; [४६]तिष्ठताऽपि च शासने ॥८८॥
अल्लाहस्य तथैवाऽस्य वाग्घरस्य च नो मिथः । कलहायध्वमेवाऽपि भवेत दुर्बला यथा ॥८९॥
अशक्ताश्चैव जायध्वम्, प्रवर्त्तध्वञ्च कर्मसु । धीरतां हि समाहृत्य, ह्यल्लाहो नाऽत्र संशयः ॥९०॥
धैर्यशालिजनानां वै पक्षमाश्रित्य तिष्ठति । [४७]अभिमानपरीता ये, ये प्रदर्शनतत्पराः ॥९१॥
गृहान्निर्यान्ति वै लोकाश्चेष्टध्वं नो कदाचन । तानिव, मार्गमाल्लाहं ये च रुन्धन्ति मानुषाः ॥९२॥
यद् यत् कुर्वन्ति ते लोका अल्लाहस्संवृणोति तत् । [४८]चेष्टितानि यदा चैव तेषां हि शातनोऽकरोत् ॥९३॥
रम्यालोकानि तेभ्यश्च, तांस्तथोवाच—"नाऽद्य तु । लोकानां कोऽपि युष्मान् वै पराजेतुञ्च शक्ष्यति ॥९४॥
अहं युष्मत् सहायश्च" दलयोरुभयोस्ततः । साम्मुख्ये प्रविजाते तु सहसाऽसौ पलायत ॥९५॥
उवाचैतांश्च—"युष्माभिः न मे काप्यस्ति बन्धुता । पश्याम्येष च यद् यूयं कथञ्चित् तानि पश्यथ ॥९६॥
विभेम्यल्लाहतोऽल्लाहः प्रचण्डदण्डदो ध्रुवम् । [४९]यदा पाषण्डिनोऽन्ये च हृद्रोगात् सरुजोऽवदन् ॥९७॥
एषां धर्मो हि खल्वेतान् करोति भ्रष्टमानसान् । योऽपि कश्चित् तमल्लाहं शरण्यं मनुते परम्— ॥९८॥
(तं स जानाति) सोऽल्लाहो धीमांश्च प्रभुरेव च । [५०]यूयं द्रष्टुं समर्थाः स्युः (कामये) किंविधं सुराः ॥९९॥
संभावयन्ति तान् ये वै श्रद् विहीना इहासते । मुखन्ते (प्रतलेः) पृष्ठं तथैवाघ्नन्त्यनारतम् ॥१००॥
(वदन्तः) स्वदतेदानीं बर्हिषां यातना अपि । [५१]प्रतीकारस्त्वमुष्याऽयं वर्त्तते यत् करै हि ते ॥१०१॥
प्रागेव प्रैषयन्नत्र (बुध्यता) मिदमप्यथ । नैव जाल्मस्स्वकीयेषु ह्यल्लाहो बन्धकेषु तु ॥१०२॥

CC-0. In Public Domain. Digitized by eGangotri

[52](आचर्यतैवमेभिर्हि) प्रिययौनजनैर्यथा । यथापूर्वजनैश्चापि, न्यषेधन् स्वप्रभोर्हि ते ॥१०३॥
आयातांस्तेन सोऽल्लाहो न्यगृह्यात् तत्कृतैरघैः । शक्तिमान् ध्रुवमल्लाहः प्रचण्डदन्डदस्तथा ॥१०४॥
[53]तदेतस्माद् यतोऽल्लाहः प्रदत्तंत्वात्मना वरम् । यस्मै कस्मैचिदप्यत्र गणाय न कदापि तु ॥१०५॥
प्रत्याददाति नो यावत् लोक आत्मानमात्मना । परिवृत्तं करोतीह, तदेतस्मादथापि च ॥१०६॥
यदल्लाहो भवत्यत्र श्रोता ज्ञाता तथैव च । [54](आचर्यतैवमेभिर्हि) प्रिययौनजनैर्यथा ॥१०७॥
यथापूर्वजनैश्चापि, न्यषेधन् स्वप्रभोर्हि ते । आयातान् तान् वयं तेन ह्यनाशयाम तत्कृतैः ॥१०८॥
पापैरमज्जयामाऽथ प्रिययौनजनान् किल । तेऽखिला अभवन् जाल्माः; [55]श्रद्विहीना जनास्तु ये ॥१०९॥
नाऽथ श्रद्दधते चापि सर्वथा तादृशा जनाः । सर्पणा भुवि सन्तीह ह्यल्लाहस्य दृशा किल ॥११०॥
सर्वेषामपि जीवानां घोरा दुष्टतमा ध्रुवम् । [56]जनास्ते यैः समं सन्धिं कृतवांस्त्वं तथा च ये ॥१११॥
समयात् समयं लब्ध्वा तस्य भंगं प्रकुर्वते । नैव बिभ्यति चाल्लाहात्; [57]साम्मुख्यन्ते व्रजन्ति चेत् ।११२॥
त्वया युद्धे समं तैस्तत् चरितव्यं तथा यथा । तेषां पार्ष्णैः समुत्पन्नो दरो हृत्सूपजायते ॥११३॥
चेतन्तां ते क्वचित् तेन; [58]समुत्पन्ने गणाद् भये । निर्वृत्तः स्पष्टतः सन्धिः क्षिप्यतां तत्पुरो हि सः ॥११४॥
अल्लाहस्य न रोचन्ते सत्यं विश्वासघातिनः । [59]श्रद्विहीना न बुध्यन्ताम् यत्क्षेत्रं विजितं हि तैः ॥११५॥
पराजितान्न ते शक्ताः कर्त्तुमन्यान् कथञ्चन । [60]बलमानेन सैन्यान्तु शक्तिं सज्जान् हयांस्तथा ॥११६॥
निधत्त सर्वथा सज्जांस्तेभ्योऽल्लाहद्विषो हि यत् । आत्मद्विषस्तदन्यांश्च ह्यविज्ञातान् जनांस्तथा ॥११७॥
येन भीतान् प्रकुर्वीत ह्यल्लाहो वेत्ति तानपि । मार्गेऽल्लाहस्य यद् यूय व्ययं तावत् करिष्यथ ॥११८॥
तस्य पूर्णः पुरस्कारो युष्मभ्यं दास्यते किल । नैव कोऽप्यनयाचारो युष्माभिश्च विधास्यते ॥११९॥
[61]ते स्युस्सन्धातुकामाश्चेत् सन्धत्त यूयमप्यथ । यूयं विश्वसिताऽल्लाहं श्रोता ज्ञाता स वं ध्रुवम् ॥१२०॥
[62]त्वान्तु ते वञ्चयेयुश्चेदल्लाहस्ते सहायकः । स एवाऽसौ हि यः शक्तिं तुभ्यं प्रादात् स्वतोऽथ च ॥१२१॥
श्रद्धरैश्चापि यः शक्तिं किञ्च ते समदापयत् । [63]सन्धितान्यकरोद् हृन्दि तेषाञ्चासौ परस्परम् ॥१२२॥
महांश्चापि व्ययस्तावद् युष्माभिस्तु कृतोऽपि वै । धरित्र्यामत्र यत्त्वस्ति हृत्सन्धौ न भवेदलम् ॥१२३॥
अल्लाहस्तु परं तान् वै समयोजयदेव सः । प्रभुत्वाच् छालतेऽल्लाहस्तत्वदर्शी तथा ध्रुवम् ॥१२४॥
[64]तुभ्यं वाग्घर ! यश्चान्यः श्रद्धरस्त्वाऽनुवर्त्तते । समर्थो केवलोऽल्लाहस्तस्मै चैवाऽपि वर्त्तते ॥१२५॥
[65]वाग्घर ! उत्साहयैतांस्त्वं श्रद्धरान् संगराय वै । युष्माकं विंशतिश्चापि संगरे स्थैर्यमागताः ॥१२६॥
विजेष्यन्ते हि शत्रूणां द्विशतं, चेत् शतं भवेत् । सहस्रं श्रद्विहीनानां विजेतुं शक्नुयुस्ततः ॥१२७॥
यतस्ते तादृशा ये नो सामान्यज्ञानधारिणः । [66]भारं साम्प्रतमल्लाहो युष्माकं त्वकरोल्लघुम् ॥१२८॥
साम्प्रतं ज्ञातमेनेन यूयं वै हीनशक्तयः । अतस्त्येकशतं वश्चेत् स्थिरास्ते द्विशतं नृणाम् ॥१२९॥
विजेष्यन्ते, सहस्रं चेद् द्विसहस्रं पुनस्तथा । अल्लाहस्य समादेशात्, तत्पक्षीयस्स वर्त्तते ॥१३०॥
तिष्ठन्ति ये स्थिरास्त्वत्र; [67]वाग्घराय न युज्यते । कस्मैचनाऽपि यत् पार्श्वे तिष्ठेयुस्तस्य वन्दिनः ॥१३१॥
प्रमाथं नैव विश्वस्य यावदुर्व्यां चरत्यसौ । यूयं जागतिकं सौख्यं परमल्लाह इच्छति ॥१३२॥
(युष्मभ्यं) हि परं लोकं, ह्यसौ धीमान् प्रभुस्तथा । [68]अलेखिष्यन्न चेत् पूर्वं ह्यधिकृत्य त्विदं प्रभुः ॥१३३॥
प्रापयिष्यत् महाकष्टं युष्मान् युष्मत्कृतैस्तु सः । [69]युद्धसंत्याजितं लब्धं ततो युष्माभिरस्ति यत् ॥१३४॥
वैधं पूतञ्च तज्ज्ञात्वा तद् भुंजीत बिभीत च । अल्लाहात् सत्यमल्लाहः क्षमावान्त्सदयस्तथा ॥१३५॥
[70]वाग्घर! त्वं वशस्थान् स्वान्वन्दिनो ब्रूहि खल्विदम् । 'यद्यल्लाहो विजानाति भद्रं हृत्स्वस्ति वः क्वचित् ॥१३६॥
गृहीताद् बहुकृत्वोऽति स वो दास्यति निश्चितम् । क्षंस्यते चाप्यसौ युष्मान् क्षमावान् सदयस्तथा ॥१३७॥
वर्त्तते किल सोऽल्लाहः; [71] चेष्टन्ते ते त्वया समम् । विश्वासस्य विघाताय यदि (विद्धि) ततः पुरा ॥१३८॥
कृतो विश्वासघातस्तैः अल्लाहेन समं ध्रुवम् । स चासौ साधिकारं (त्वां) तेषु चैवाकरोत् किल ॥१३९॥
धीमान् ज्ञाता तथाऽल्लाहः; [72]निश्चितं ये जना इह । श्रद्धरा अभवन् किञ्च त्यक्तावासास्तथाऽभवन् ॥१४०॥
अल्लाहस्य पुनर्मार्गे वसुजीवार्पणोत्सुकाः । अयुध्यन्त, पुनर्ये च वासं साह्यं तथाऽप्यदुः ॥१४१॥
ते मिथो रक्षका लोका मैत्रीवन्तो भवन्ति ह । ये पुनः श्रद्दधानास्तु त्यक्तावासास्तु नो परम् ॥१४२॥

CC-0. In Public Domain. Digitized by eGangotri

तैः समं न हि युष्माकं मैत्रीसम्बन्ध एव तु । यावत्ते न निजावासान् परित्यज्य वहिर्गताः ॥१४३॥
परन्ते यदि धर्मस्य कारणात् साह्यकांक्षिणः । त्वत्तो भवन्ति तत्तेषां साह्यं धर्मो हि ते मतः ॥१४४॥
परं येन गणेनाऽऽस्ते सन्धिस्ते पूर्वतः कृतः । नैव तस्य विरोधाय तत्साह्यं तूचितं क्वचित् ॥१४५॥
तत्तंत् पश्यति सोऽल्लाहो यद् यत्त्वं चेष्टसे किल । [७३]श्रद्विहीनास्तु ये लोका अन्योऽन्यरक्षका हि ते ॥१४६॥
मित्ररुपेण तिष्ठन्ति; नेत्थं त्वं चेष्टसे यदि । धरित्र्यां सुमहान् क्षोभः कलिश्च प्रसरिष्यति ॥१४७॥
[७४]श्रद्धरा अभवन् येऽथ त्यक्तावासास्तथाऽभवन् । अल्लाहस्य पुनर्मार्गे ह्ययुध्यन्त तथैव ये ॥१४८॥
अदुर्वासञ्च साह्यञ्च तादृक्षा एव वै जनाः । सत्यं श्रद्धाधराः सन्ति तेभ्यश्चैवाऽत्र वर्त्तते ॥१४९॥
क्षमासम्मानपूर्वा च पुष्कलाऽऽजीविकाः पुनः । [७५]येऽथ चोर्ध्वं गताःश्रद्धां त्यक्तावासास्तथाऽभवन् ॥१५०॥
त्वत् पक्षं समुपाश्रित्य तथाऽयुध्यन्त सर्वथा । त्वत् पक्षीया हि ते चाऽपि ह्यल्लाहशासनात् खलु ॥१५१॥
रक्तसम्बन्धिनो लोकास्तिष्ठन्त्यत्र परस्परम् । अंशभाजस्समीपस्यास्सन्देहो नात्र कश्चन ॥१५२॥
यत्तत् सर्वं प्रवेत्त्येव ह्यल्लाहस्सततं किल ।

योगः—१५२॥

CC-0. In Public Domain. Digitized by eGangotri

९

सूक्तम्–प्रायश्चित्तम्

(अत तौबा)

(मदहीनावतीर्णा एकान्नत्रिंशदुत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]मूर्त्तिपूजकलोकेभ्यः कृपाभाराद्विमोक्षणम् । अल्लाहवाग्घराभ्यां वै स्पष्टमाघोष्यते हि यैः ॥ १ ॥

त्वया सन्धिः कृतोऽभूत् प्राक्; [2]ततो (हे मूर्त्तिपूजकाः) । चतुर्भ्योऽप्यन्यमासेभ्यो देशेऽस्मिन् चरताऽधुना ॥ २ ॥

बुध्यतां यूयमल्लाहं पराजेतुं न शक्नुथ । तथा ऽल्लाहोऽवमन्ता च श्रद्धीनानां हि वर्त्तते ॥ ३ ॥

[3]महायात्रादिनेऽल्लाहवाग्घराभ्यां हि घोष्यते । मूर्त्तिपूजकलोकेभ्यः कृपाऽऽभाराद्विमोक्षणम् ॥ ४ ॥

अल्लाहस्य हि लोकेभ्यो वाग्घरस्याथ तस्य च । पश्चात्तापो भवेच्चेद् वो वरम्, स्युश्चेत् पराङ्मुखाः ॥ ५ ॥

बुध्यतां यूयमल्लाहं पराजेतुं न शक्नुथ । घोष्यतां श्रद्विहीनेभ्योऽरुन्तुदाः सन्ति यातनाः ॥ ६ ॥

[4]श्रद्विहीनान् विहायामून् यैस्तु ते सन्धिरस्ति हि । नाऽचेष्टन्त त्वया ये च हानिकार्यं, न कस्यचित् ॥ ७ ॥

त्वद् विरोधे पुनः साह्यं तथैवाऽकृपताऽपि च । पालय त्वं हि तैस्सन्धिं यावत् स्यान्नियतोऽवधिः ॥ ८ ॥

त्रस्तंमन्यान् किलाऽल्लाहः स्निह्यतीति न संशयः । [5]पावनेषु तु मासेषु व्यतीतेषु ततः परम् ॥ ९ ॥

यत्र कुत्रापि लभ्येरन् जनास्ते मूर्त्तिपूजकाः । विधत्त तद् बधं, तांश्च निगृह्णीत, तथैव च ॥१०॥

पर्यावर्त्तयतैतांश्च गुप्ताघातस्थलेषु च । सुगूढं तान् प्रतीक्षध्वम्, प्रायश्चित्तं गतेषु तु ॥११॥

पूजां पुनः चरत्स्वेषु ददत्सु दानमप्यथ । जहीत मार्गमेतेषां ह्यल्लाहो नात्र संशयः ॥१२॥

क्षमाशीलो दयालुश्च; [6]भवेच्चेत् शरणोत्सुकः । प्रतिमापूजकानां हि कश्चित् तस्मै प्रदत्त तत् ॥१३॥

अल्लाहस्य वचो येन शृणुयात् सः, ततश्च तम् । प्रापयत तदावासं रक्षितं तदिदं यतः ॥१४॥

सविज्ञाना न वै लोका भवन्तीमे; [7]न सम्भवम् । सन्धिः कश्चिद् घटेन्मध्ये वाग्घराल्लाहयोरथ ॥१५॥

मूर्त्तिपूजकलोकेषु विहाय तांस्तु यैस्त्वया । पूजाया मन्दिरेऽनिन्द्ये (काव्ये) सन्धि र्व्यधीयत ॥१६॥

सधर्मास्ते त्वया यावत् तावत् त्वमपि तद् विधः । तिष्ठाऽल्लाहस्य रागो वै त्रासम्मन्यैर्जनैः किल ॥१७॥

[8]कथमेतच्च सम्भाव्यं त्वयि तेषु हि सत्सु चेत् । प्रभविष्णुषु ते नैव मानयन्ति हि बन्धुताम् ॥१८॥

प्रतिज्ञां वा कृतां नैव पालयन्ति त्वया समम् । वाचा पुष्पितया ते त्वां रञ्जयन्ति हृदा न तु ॥१९॥

अवज्ञातत्परास्तेषां बहवस्तु जनाः किल । [9]अकुर्वंस्ते तु वै पण्यं ह्यल्लाहायातमाध्यमात् ॥२०॥

(भौतिकानां हि वस्तूनां) हीनमूल्यभृतां किल । अतस्ते खल्वरुन्धंश्च ह्यल्लाहमार्गतो (जनान्) ॥२१॥

दुष्टमेव हि तत् सर्वं यत्तेऽकुर्वन् न सशयः । [10]प्रतिज्ञा ना ऽपि मानं वा श्रद्धरानधिकृत्य ते ॥२२॥

मानयन्ति, त एवैते सीमात्याचारिणो हि ये । [11]कुर्वन्ति विप्रतीसारं, पूजनं चाऽथ ते यदि ॥२३॥

प्रतिष्ठितं हि कुर्वन्ति, दानं यच्छन्ति चेदथ । भवन्त्येते हि युष्माकं भ्रातरो धर्मतस्तदा ॥२४॥

विशदं वर्णयामो वै स्वायातान् वयमत्र तु । तेभ्यस्तावद् हि लोकेभ्यः सज्ज्ञाना ये भवन्ति हि ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[१२]विदध्युस्ते वचो भंगं प्रतिज्ञोर्ध्वमथापि चेत् । आहन्युश्चाथ ते धर्मं युध्यस्व प्रमुखैस्तु तैः ॥२६॥
श्रद्विघातस्य, निस्सारास्तत् प्रतिज्ञा भवन्ति ह । कदाचिद् विरमेयुस्ते व्यापारादीदृशादपि ॥२७॥
[१३]योत्स्यसे त्वं न किं लोकैः अभांक्षुर्ये तु सम्विदः । वाग्घरञ्च बहिष्कर्तुं अकुर्वन् प्रचुरा मतीः ॥२८॥
सूत्रधारा अभूवन् ये त्वद् विपक्षे कलेस्तथा । किन्तु तेभ्यो विभेषि त्वम् ? श्रद्दधानोऽसि चेत्पुनः ॥२९॥
अल्लाहोऽतितरामत्र विषये त्वर्हतीति यत् । कुर्यास्त्वं हि भयं तस्मात्; [१४]युध्यस्व तैस्समं किल ॥३०॥
तव द्वारेण सोऽल्लाहो दुःखैस्तान् पीडयिष्यति । पातयिष्यति तान् नीचैः जयन्ते च करिष्यति ॥३१॥
श्रद्धराणां तथा हृन्दि चिकित्सिष्यत्यलं पुनः । [१५]तेषां हृद्दाहमप्येष शमयिष्यति यं हि सः ॥३२॥
कामयेत भवेत्तस्मिन् दयावान्, तिष्ठति प्रभुः । ज्ञानवांस्तत्वदर्शी च; [१६]यूयं किं वित्थ नो न्विदम् ॥३३॥
त्यक्ष्यध्वे यदविमृष्टा ह्येवाल्लाहस्तु यद्यपि । नावेदद्यापि युष्माकं तान् ये युद्धेऽरमन्त वै ॥३४॥
अभिन्नं नाऽथ ये मित्रं चाकुर्वन् प्रविहाय तु । अल्लाहं वाग्घरं तस्य, श्रद्धरानपि वा जनान् ॥३५॥
यद् यद् यूयन्तु चेष्टध्वे ऽल्लाहस्तत्तत्तु वेत्त्यलम् । [१७]मूर्त्तिपूजकलोकानां कर्त्तव्यं नास्त्यदस्तु यत् ॥३६॥
अल्लाहपावनस्थानं पालयेयुरुपेत्य ते । यदोपस्थापयन्त्येते प्रमाणानि स्वतः स्वयम् ॥३७॥
श्रद्धायास्स्वविरोधे हि विघातस्य, जना इमे । ते हि येषां कृतं कर्म मोघमेवाऽभवत् समम् ॥३८॥
सदा वत्स्यन्ति किञ्चैते(नारका)ग्नौ(सुनिश्चितम्)। [१८]कृत्यं हि वर्त्तते तस्य सुपर्याजीवनस्य तु ॥३९॥
अल्लाहशुद्धभूमेर्यस्त्वल्लाहे चान्तिमे दिने । श्रद्दधानश्च, दानञ्च दद्यात्, पूजां प्रतिष्ठिताम् ॥४०॥
कुर्याद्, विहाय चाऽल्लाहं नान्यस्माद् बिभियात्तथा । ईदृशा ह्येव ये लोकाः, मन्यतां, मार्गदर्शनम् ॥४१॥
अर्हन्ति; [१९]किं नु वै यूयं यात्रितृट्शमनं तथा । पर्याजीवनमर्चाया अनिन्द्यस्य च वेश्मनः ॥४२॥
जनेन तेन वै साम्यं नयथ श्रद्धरो हि यो । अल्लाहे चरमाहे च, ह्यकरोज्जन्यमेव च ॥४३॥
अल्लाहस्य तथा मार्गे, नेक्षते समतां तयोः । अल्लाहस्तु, न चाल्लाहो जाल्मेभ्योमार्गदर्शकः ॥४४॥
[२०]श्रद्धरा येऽभवन् किञ्च त्यक्तावासास्तथा ऽभवन् । अल्लाहस्य पुनर्मार्गे वसुजीवार्पणोत्सुकाः ॥४५॥
अयुध्यन्त, त एवाऽत्र ह्यल्लाहस्य दृशा किल । महामानार्हतां यान्ति, त एवाऽत्र पुनर्जनाः ॥४६॥
भाविनः सफलाश्चैव; [२१]तेभ्यस्तेषां प्रभुः किल । स्वां दयां स्वं प्रसादञ्च मगलं घोषयत्यलम् ॥४७॥
सुखं स्थायि हि यत्राऽऽस्ते, सदुद्यानानि खल्वथ । [२२]सदा ते तत्र वत्स्यन्ति, ह्यल्लाहसविधे किल ॥४८॥
पुरस्कारो महांस्तावत्; [२३]श्रद्दधाना अये जनाः ! । अन्तरंगान् न जानीत पितॄन् भ्रातॄन् तथा निजान् ॥४९॥
श्रद्धायाः श्रद्विहानन्तु ये ऽभिनन्दन्ति सर्वथा । युष्माकं यस्तथा कोऽपि मैत्र्यं कुर्यात्तु तैस्समम् ॥५०॥
मंस्यन्ते तादृशा लोकाः पापाचारा हि (पूर्णतः) । [२४]ब्रूहि—चेत् पितरः पुत्राः पत्न्यो भ्रातर एव च ॥५१॥
कुटुम्बिनश्च युष्माकं, रायो युष्माभिरर्जिताः । व्यवसायो भयं यस्य मन्दतां नैत्वितीदृशम् ॥५२॥
गृहा रुच्यनुकूलाश्च ह्यल्लाहात्तस्य वाग्घरात् । तन्मार्गे चाऽथ संघर्षात् सुतरां मोहकारिणः ॥५३॥
प्रतीक्षध्वं ततो यावद् ह्यल्लाहो निजनिर्णयम् । दर्शयेन्नो पुरस्ताद् वो, नावज्ञाकारिणो जनान् ॥५४॥
दर्शयति किलाल्लाहस्त्वध्वानम्; [२५]साह्यमाचरत् । अल्लाहोऽनेककालेषु सुनयनदिनेऽपि वः ॥५५॥
यदाऽभूत् सुप्रहर्षो वः संख्याधिक्यस्य कारणात् । परं तत्त्वन्यथासिद्धं ह्येवाऽतिष्ठत् तथैव च ॥५६॥
विशालं चाऽपि तत्क्षेत्रं संकोचं ह्यभजत्तु वः । पृष्ठं सन्दर्शयन्तश्च पलायध्वं हि वो रणात् ॥५७॥
[२६]आत्मनो वाग्घरे चैव श्रद्धरेषु तथैव च । ततो ऽल्लाहस्तु वै शान्तिं जनयामास (सत्यतः) ॥५८॥
प्रेषयामास सेनाश्च तवादृश्याश्च यातनाः । श्रद्विहीनेषु लोकेषु, श्रद्विहीनेभ्य ईदृशः ॥५९॥
एव तावत् पुरस्कारः; [२७]ह्यल्लाहस्तदनन्तरम् । भवेद् वै सदयो यत्र भवेदिष्टं ह्यमुष्य तु ॥६०॥
क्षमाशीलो दयालुश्च ह्यल्लाहः प्रथितः किल । [२८]श्रद्धराः ! अपवित्रा वै वर्त्तन्ते मूर्त्तिपूजकाः ॥६१॥
ऊर्ध्वं वर्षात्ततो ऽमुष्मात् मा स्मैते निकषा गमन् । अनिन्द्यं वेश्म पूजायाः, मुखापेक्षित्वमस्तु चेत् ॥६२॥
तेषां वः, शीघ्रमल्लाहः प्रसादसुमुखो हि सन् । आत्मनोऽनुग्रहाद् युष्मान् राभिः पुष्टान् विधास्यति ॥६३॥
विज्ञः सुधीस्तथा ऽल्लाहो वर्त्तते नाऽत्र संशयः । [२९]शास्त्रिणो ये तु नाल्लाहे चरमाहे तथैव च ॥६४॥
श्रद्धराः, नाऽथ मन्यन्तेऽ वैधं तद् वाग्घरोऽस्य तु । अमंग्येतां तथा ऽल्लाहो ह्यवैधं यद् ऋतञ्च ये ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

नांगीकुर्वन्ति धर्मन्तु, युध्यस्व तैस्समं किल । अप्रतिष्ठां व्रजेयुर्यत् ते तथोपनयन्तु च ॥६६॥
प्राभृतं स्वैः करैरेव; [३०]याहूदाहा अवादिषुः । "उदीड्यो ऽल्लाह पुत्रो वै", ह्यूचुरीशानुयायिनः ॥६७॥
"मिसीहोऽल्लाहपुत्रो वै", तेषामेते हि (केवलम्) । मुखोद्गाराः प्रजल्पन्ति तथेमेऽश्रद्धरा यथा ॥६८॥
प्राजल्पन् पूर्वमेतेषां, ह्यल्लाहो युध्यते स्वयम् । ईदृशानां विरोधाय, पथभ्रष्टा हि खल्विमे ॥६९॥
[३१]अमन्यन्त प्रभुं ते वै धर्मज्ञांश्च सतस्तथा । मिसीहं मर्यमाऽपत्यं चाप्यल्लाहमृते किल ॥७०॥
यद्यप्यस्थात् समादेशस्तेभ्यो यत्ते न तं विना । अर्हन्तु कञ्चिदप्यन्यं स्तुवीयुर्न, ततो विना ॥७१॥
प्रतीष्टः कश्चिदन्यस्तु, प्रतिमानं तदस्य यत् । ते प्रकुर्वन्ति खल्वस्य महिम्नो विगुणं हि तत् ॥७२॥
[३२]एत आलोकमाल्लाहं वाञ्छन्ति स्वास्य (वायुना) । निर्वातुं, परमल्लाहस्त्वकृत्वा न विरंस्यति ॥७३॥
पूरणं स्वप्रकाशस्य, स्यान्नामारुचिकृद्धि तत् । श्रद्विहीनजनेभ्यो वै; [३३]स एवासौ हि यो निजम् ॥७४॥
वाग्घरं प्रेषयामास समं सत्येन धर्मणा । दर्शनेन च मार्गस्य, कारयेत् प्रभुतां यतः ॥७५॥
तस्य धर्मण्यशेषेऽपि, स्यान्नामारुचिकृद्धि तत् । मूर्त्तिपूजकलोकेभ्यः; [३४]श्रद्धराः ! शास्त्रिणामिह ॥७६॥
धर्मज्ञा अथ निःसंगाः सन्तो ऽनेके ऽपि सम्पदः । अवैधं ह्येव लोकानां भुञ्जते वारयन्ति च ॥७७॥
अल्लाहस्याध्वनो (लोकान्), सुवर्णं रजतञ्च ये । लोका रक्षन्ति संगृह्य नाल्लाहाध्वनि तस्य च ॥७८॥
व्ययं कुर्वति तान् लोकान् सूचयैतत् प्रतीक्षते । कष्टदा यातना तान् वै; [३५]दिने यस्मिंश्च संचयः ॥७९॥
भविष्यत्यनले दग्धो नारके, तेन चाऽप्यथ । मस्तिष्कपृष्ठपार्श्वाणि करिष्यन्ते तथैव च ॥८०॥
तदेषामंकिता (न्येते वक्ष्यन्ते पुनरेव च) । "तदेवेदं निजार्थे यद् युष्माभिः संचितं (पुरा) ॥८१॥
तत्तस्य रसत स्वादं युष्माभिः संचितं तु यत्" । अल्लाहस्य समादेशो दिनात्तस्माद् यतो ह्यसौ ॥८२॥
धरित्रीं वियतश्चापि प्रासृजत् खल्वसंशयम् । दृष्ट्या ऽल्लाहस्य मासानां गणनायां भवन्ति वै ॥८३॥
मासा द्वादश संख्याकाः, चत्वारः पावना इह । धर्मश्च युक्तरूपोऽयं; एषु सत्सु न कर्हिचित् ॥८४॥
विधत्ताऽतिक्रमं स्वेषु, यूयं सर्वे च संगताः । प्रतिमापूजकैः सार्धं युध्यन्तां, ते यथाऽखिलाः ॥८५॥
युध्यन्ते किल युष्माभिस्सर्वे संगत्य मानवाः । ये भयं मन्वते ऽल्लाहं तत्पक्षीयं हि बोधत ॥८६॥
[३७]परस्तात् कारिता मासः (पावनस्य) तु केवलम् । कल्पते श्रद्विहानस्य वृद्धये ह्येव (सर्वथा) ॥८७॥
पथभ्रष्टा विधीयन्तेऽश्रद्धरा येन मानवाः । ख्यापयन्ति हि तं वैधं कस्मिंश्चिद् वत्सरे ततः ॥८८॥
ख्यापयन्त्यथवाऽवैधं त्वन्यस्मिन् वत्सरे पुनः । यथा ऽल्लाहो ऽकरोद् वैधं यं भवेद् गणनाऽस्य तु ॥८९॥
पूर्णा; तदित्थमल्लाहोऽवैधं यं त्वकरोदिह । तत्कृतं स्यात् पुनर्वैधं, अमीषां दुष्कृतानि तु ॥९०॥
तत्कृते रम्यदृश्यानि तिष्ठन्त्यत्र कृतानि वै । श्रद्विहीनजनानान्तु नाल्लाहो मार्गदर्शकः ॥९१॥
[३८]श्रद्धराः ! को नु वः क्लेशो वर्तध्वे कथिता यदा । "याताऽल्लाहस्य मार्गेण", रमध्वेऽधो भुवं तदा ॥९२॥
किन्नु यूयं पराङ् त्यक्त्वा परलोकस्य चिन्तनम् । लौकिके जीवने ह्येव सप्रसादमुदङ्मुखाः ? ॥९३॥
अयं (भोः !) सुखसंभारः लौकिकाज्जीवनाद् भृतः । वर्त्ततेऽल्पतरस्तावत् परलोकव्यपेक्षया ॥९४॥
[३९]क्लेशयिष्यति वोऽल्लाहः कृच्छ्रैः कष्टप्रदैर्यदि । यास्यथाऽग्रे न वै यूयं कञ्चिदन्यं दलं च सः ॥९५॥
अग्रतः सारयेच्चैव, नाल्लाहञ्च कथञ्चन । तोत्तुं शक्ष्यथ वै यूयम्, सर्वसामर्थ्यभृत् प्रभुः ॥९६॥
[४०]साह्यं कुर्या न चेत् तस्य, तेन किम् ? साह्यमाचरत् । तस्य त्वल्लाह एवाऽपि, श्रद्विहीना यदा हि तम् ॥९७॥
बहिश्चक्रुः, द्वयोर्मध्ये द्वितीयः सोऽभवत्तथा । यदा तौ बिलमन्तःस्थावास्तां प्राह स चात्मनः ॥९८॥
वयस्यम् "मा गम (स्तात !) शोकमस्माकमस्ति यत् । सहायः किल सो ऽल्लाहः" तत्राल्लाहस्तदा पुनः ॥९९॥
अतनोच्छम्, अथोऽदृश्यै र्युष्माभिश्चैव सैनिकैः । साह्यं तस्याकरोच् चैव, ह्यवकृष्टं व्यधात् तथा ॥१००॥
वचो वै श्रद्विहीनानाम्, अल्लाहस्यैव वागिह । उत्कर्षशालिनी तावत्, शक्तो ऽल्लाहस्सुधीस्तथा ॥१०१॥
[४१]प्रयाताऽभिमुखं त्वेव सन्नह्याऽस्त्रैस्तु सर्वथा । गुरुभिर्लघुभिर्वाऽपि वसुभिरसुभिस्तथा ॥१०२॥
युध्यध्वं मार्ग आल्लाहे, कल्याणाय हि वो भवत् । विद्यात यूयमेतच्चेत्; [४२]अभविष्यत्तु किञ्चन ॥१०३॥
लघूपायेन लभ्यञ्चेत् यानञ्चापि सविश्रमम् । ते त्वामन्वगमिष्यंस्तत्, मार्गः परमभूत् त्वयम् ॥१०४॥
सश्रमः, साम्प्रतं ते वै शप्स्यन्ति प्रभुणा हि यत् । अशक्ष्याम कदाचिच्चेत् चलितुं तत्वतो वयम् ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

अचलिष्याम तत् सार्धं युष्माभिरनिवार्यतः । आत्मनाऽऽत्मानमेते वै नाशयन्तीत्यसंशयम् ॥१०६॥
अल्लाहो वेत्ति ते सत्यं मृषात्वे निरता जनाः । [४३]अल्लाहः क्षमतां वै त्वाम्, वाग्घर! केन भोस्त्वया ॥१०७॥
अनुज्ञाता जनास्ते हि (नान्वज्ञास्यस्तु चेत् पुनः) । सत्यनिष्ठाः पुरस्तात्ते ह्यभविष्यन् प्रकाशतः ॥१०८॥
अज्ञास्यस्त्वञ्च तान् येऽत्र मृषात्वं संश्रिता जनाः । [४४]अल्लाहे चरमाहे च श्रद्धरा ये न ते जनाः ॥१०९॥
तवाज्ञालिप्सवो ऽपि स्यु र्न युध्येमहि संगरे । स्वासुभिर्वसुभिः सार्धं भयंमन्यान् जनान् किल ॥११०॥
वेत्ति तानथ सोऽल्लाहः; [४५]श्रद्धरा न हि ये जनाः । अल्लाहे चरमाहे च तवादेशस्य लिप्सवः ॥१११॥
त एव सन्दिहाना ये, सन्दिग्धाश्चानवस्थिताः । [४६]अभियानमभीष्टञ्चेदभविष्यत् कदाचन ॥११२॥
सज्जां तत्ते ऽकरिष्यन् वै यां काञ्चित्, परमुद्गतिः । अल्लाहाय न रुच्याऽभूत् तेषां, तेन हि तानसौ ॥११३॥
व्यधात् सुस्थांस्तथाऽवोचत् 'स्थितैः सार्द्धं स्थितिं न्वित' । [४७]अयास्यंश्चेत् त्वया सार्द्धं ते विकारं विहाय तु ॥११४॥
न चैवावर्द्धयिष्यन् वै किंचिदन्यच्छुभं त्वयि । विद्रोहोद्भावनार्थञ्च युष्मासु सततं हि ते ॥११५॥
अचेष्टिष्यन्त, युष्मासु सन्तीदृक्षा जना अपि । दत्तकर्णास्तदुक्तौ ये ऽल्लाहो जाल्मान् सुवेत्ति हि ॥११६॥
[४८]द्रोहाचारं विधातुं वै पुराऽप्यैच्छन्निमे जनाः । विपर्यासानकुर्वंश्च विविधांस्त्वद् विरोधिनः ॥११७॥
सत्यं समक्षमायातं यद्यप्यादिष्टमेव च । अल्लाहस्याभवत् स्पष्टं, ततो ऽप्येभिर्निरन्तरम् ॥११८॥
विमनायितमेवाऽभूत्; [४९]एषां कोऽपीदृशोऽपि च । आह "मामनुजानीहि (गृहे स्थातुं) न चाऽथ माम् ॥११९॥
भयेऽध्वभ्रंशजाते च पातय त्वम्", विबोध तु— । भयेऽध्वभ्रंशजाते तु प्रागेव पतिता इमे ॥१२०॥
नारकोऽ श्रद्धरानेतान् परिवृत्य हि तिष्ठति । [५०]तुदत्येतान् यदा भद्रं त्वां किञ्चित्तूपतिष्ठते ॥१२१॥
विपन्ने तु त्वयीत्थं ते वदिष्यन्ति—"हि पूर्वतः । सावधाना अतिष्ठाम वयं", चैते मुदा ततः ॥१२२॥
अन्विता हि करिष्यन्ति प्रत्यावर्त्तनमप्यथ । [५१]ब्रूहि 'नास्मांस्तु किञ्चिद् वै तद् विहाय विपत्स्यते ॥१२३॥
आदिशद् यत्तु सोऽल्लाहः, मित्रं संरक्षकश्च सः । प्रभुर्वै वर्त्तते ऽस्माकम्, श्रद्धरैः केवलश्च सः ॥१२४॥
विश्वस्तव्यो भवत्यत्र; [५२]किमन्यद् यत् प्रतीक्ष्यते । युष्माभिस्तावदस्मभ्यं द्वयोरेकन्तु भद्रयोः ॥१२५॥
(मृत्युरल्लाहमार्गे वा विजयो युधि वा पुनः) । अस्माकञ्चाऽथ युष्मभ्यं वर्त्तते यत् प्रतीक्षितम् ॥१२६॥
तदेतत् किन्नु सोऽल्लाहो युष्मान् पीडयति स्वयम् । अस्मद् द्वारेण वा युष्मान्, अस्तु, तावत् प्रतीक्ष्यताम् ॥१२७॥
युष्माभिर्वयमप्येते प्रतीक्षातत्पराः समम् । [५३]स्वैरं वाऽपि व्ययं यूयं अस्वैरं कुरुथाऽथ वा ॥१२८॥
स्वीकार्यं तत्तु नो भावि युष्मद्धस्तात् कदाचन । अवज्ञाकारिणो यूयं तिष्ठथाऽत्र न संशयः ॥१२९॥
[५४]व्ययाऽस्वीकारहेतुश्च नातो भिन्नो हि विद्यते । श्रद्विहीना इमे ऽतिष्ठन् अल्लाहेऽस्य च वाग्घरे ॥१३०॥
पूजार्थं तूपतिष्ठन्ते परं म्लानेन चेतसा । व्ययं चाप्यथ कुर्वन्ति परं तं चाप्यनिच्छया ॥१३१॥
[५५]अतो नाऽश्चर्यमायातु वसून्येषां विलोक्य तु । सन्ततिं चाऽपि नाऽथैषां, अल्लाहस्त्विच्छति न्विदम् ॥१३२॥
यदेभिः क्लेशयेदेतान् वस्तुभिर्भवजीवने । तिष्ठत्सु श्रद्विहीनेषु त्यजन्त्वेतान् तथासवः ॥१३३॥
[५६]अल्लाहेन शपन्त्येते "वयं युष्माकमेव तु" । न ते यद्यपि युष्माकं, सभया ह्येव ते जनाः ॥१३४॥
[५७]शरणं वा गुहां किम्वा प्रवेशस्थानमेव वा । प्राप्नुयुर्यदि ते किंचित् को भवेदत्र संशयः ॥१३५॥
अवश्यं तद् दिशां ते तु प्रणश्येयु (र्विना चिरम्) । [५८]कश्चित्तेषामथेदृक्षस्त्वय्याक्षेपोऽस्ति यस्य च ॥१३६॥
दानराशिमधिकृत्य, तेभ्यो दत्तो भवेद् यदि । कश्चिदंशस्ततस्ते वै जायन्ते हृष्टमानसाः ॥१३७॥
नैव दत्तस्तु चेत्तत्ते जायन्ते प्लुष्टमानसाः । [५९]महामोदकरं ह्येतत् अभविष्यत्तु ते यदि ॥१३८॥
अतोक्ष्यन् यत् किलाऽल्लाहात् वाग्घरात्तस्य चाप्यथ । प्राप्तवन्तस्तदादाय, ह्यवक्ष्यंश्चापि खल्विदम् ॥१३९॥
"अल्लाहः केवलोऽस्मभ्यं कल्पतेऽनुग्रहेण च । आत्मनः शीघ्रमल्लाहो वाग्घरस्तस्य चाप्यथ ॥१४०॥
दास्यत्यस्मभ्य (मन्यच्च) वयं त्वल्लाह-याचकाः । [६०]दानराश्युपयोगस्तु केवलं विधनाय हि ॥१४१॥
सापेक्षाय तथा चैव समाहर्त्रे तदस्य च । हृन्त्यर्हन्ति तथा येषां समाश्वासं, तथैव च ॥१४२॥
मोक्षणाय ग्रहीतानां अधमर्णजनाय च । अल्लाहार्थं, प्रवासार्थं प्रोद्गताय जनाय च ॥१४३॥
अल्लाहादिष्टकर्त्तव्यं भवत्येतद् ध्रुवं (भवे) । ज्ञाता सुधीस्तथाल्लाहः; [६१]केचित्तत्रेदृशा अपि ॥१४४॥
वाग्घरं ये तुदन्त्यत्र (ह्यधिक्षेपाद्) वदन्ति च । वाग्घरो हि श्रुतम्मन्यः केवलं (हन्त !) वर्त्तते ॥१४५॥
ब्रूहि तान्—स श्रुतम्मन्यः केवलं स्वस्तये हि वः । श्रद्दधानो हि सोऽल्लाहे, श्रद्धरान् विश्वसित्यपि ॥१४६॥

CC-0. In Public Domain. Digitized by eGangotri

दयाकृच्चाऽथ युष्माकं ये तु विश्वासमागताः । ये तु लोकास्तुदन्त्यत्र ह्यल्लाहस्यापि वाग्घरम्— ॥१४७॥
वर्त्तते किल तेभ्योऽत्र यातनाऽत्यर्थ दुःखदा । [६२]युष्मदग्रेत्विमे लोका ह्यल्लाहेन शपन्ति वै— ॥१४८॥
आराधनाय युष्माकं यद्यप्यत्राधिकारिता । पराऽल्लाहस्य किञ्चास्य वाग्घरस्यैव विश्रुता— ॥१४९॥
यद् यदीमे भवन्त्येव श्रद्धरास्तत्तमेव हि । आराधयन्तु; [६३]नैते किं जानन्ति योऽपि कश्चन ॥१५०॥
अल्लाहं वाग्घरञ्चाऽस्य विरुणद्धि हि तत्कृते । नारकाग्निः, तथा यत्र तूषितव्यं सदाऽमुना ॥१५१॥
अपकर्षो महानेषः; [६४]पाषण्डिनः सभीतयः । कदाचित्तानधिकृत्य सूक्तं स्यान्नावतारितम् ॥१५२॥
यथा तेभ्यो भवेदाविर्यत्तेषां हृत्सु तिष्ठति । कथ्यताम् –"अवजानीत कणेहत्य, न संशयः— ॥१५३॥
विवर्त्तुं तत्परो ऽल्लाहस्तद् यतो वो भयं स्थितम् । [६५]पृष्टाश्चेत्ते वदिष्यन्ति—"घघने वदने वयम्— ॥१५४॥
केवले निरता अस्म," ब्रूहि तान्—आस्त किन्न सः । परिहासस्तमल्लाहं प्रति चैवाऽस्य वाग्घरम् ॥१५५॥
आयातान् प्रति किं चास्य ?; [६६]व्यपदेशन्तु कार्ष्ट मा । विश्वासादुत्तरं यूयं ह्यविश्वासमकार्ष्ट वै ॥१५६॥
गणैकं क्षमितं स्याच्चेत् युष्माकं तदपीतरः । तोत्तव्यो वर्त्तते ह्येव गणोऽमीभिः कृतैरघैः ॥१५७॥
[६७]स्त्रियो वा पुरुषा वाऽपि पाषण्डास्तु सनाभयः । शासत्यभद्रकार्येभ्यो, भद्रेभ्यो वारयन्ति च ॥१५८॥
पिनद्धाविव हस्तौ च कृत्वा तिष्ठन्ति सर्वथा । विस्मृतस्तैर्यदल्लाहस्तेऽपि तत्तेन विस्मृताः ॥१५९॥
अवज्ञाकारिणस्त्वेते पाषण्डा ह्येव सर्वथा । [६८]आवासाय प्रतिज्ञातो ह्यमीषां नारकानलः ॥१६०॥
स्त्रीणां पुंसान्तु ये तावत् पाषण्डा, अथ ये पुनः । श्रद्विहीनास्तथा तेषां, यत्र वत्स्यन्ति ते सदा ॥१६१॥
अलं स खल्वमीभ्यस्तु, धिगल्लाहश्चकार तान् । यातना वर्त्तते तेभ्यो ध्रुवा—; [६९]यद्वत्तु ते जनाः ॥१६२॥
ये पुरा त्वदजायन्त बलेन बलवत्तराः । अपत्यैर्विभवेनाऽपि ये ऽभवन्त्सुमहत्तराः ॥१६३॥
अभौक्षुर्हि निजानंशान्, अभौक्षुः पूर्वजा यथा । अभौक्त तद्वदेवाऽपि यूयमंशान् निजान् किल ॥१६४॥
अरमध्वञ्च वादेषु यथा पूर्वेऽरमन्त हि । त एते वै जना येषां व्यर्थं सर्वं कृतं गतम्— ॥१६५॥
परत्राऽपीह चैवाऽपि, हानिभाज इमे च वै । [७०]पूर्वजानां न जानन्ति प्रवृत्तीः किमिमे जनाः— ॥१६६॥
नहुषाऽऽद समुद्गानामब्रह्मस्य तथैव च । मदयानस्य चैवाऽपि वश्यानां, सद्मनां तथा— ॥१६७॥
तेषां योऽभूत् कृतः सादः, उपायंस्तांस्तु लक्ष्मभिः । तेषां वै वाग्घराश्चापि, न चाल्लाहः किलाचरत्— ॥१६८॥
अत्याचारन्तु तैस्सार्धम् सात्याचारा हि ते ऽभवन् । आत्मनाऽऽत्मनि; [७१]सश्रद्धाः स्त्रियोऽपि पुरुषा अपि— ॥१६९॥
रक्षका मित्रताभाजोऽथ भवन्ति परस्परम् । भद्रं शासत्यभद्राच्च वारयन्ति, प्रतिष्ठिताम् - ॥१७०॥
पूजां तथैव कुर्वन्ति, दानं ददति चाऽथ ते । अल्लाहस्य विधेयाश्च वाग्घरस्याप्यमुष्य च ॥१७१॥
त एते यान् किलाल्लाहः (सत्यमेव) दयिष्यते । प्रभुत्वाच्छालतेऽल्लाहस्तत्त्वदर्शी तथाप्यसौ ॥१७२॥
[७२]प्रतिजानाति सोऽल्लाहस्स्त्रीभ्यः पुंभ्यो ऽपि सर्वथा । श्रद्धरेभ्यस्सदारामान् कुल्या यत्र स्रवन्त्यधः ॥१७३॥
वत्स्यन्ति ते सदा तत्र, पावनाश्च गृहा अपि । आरामेष्वथ वासाय, वसन्तो यत्र सर्वदा ॥१७४॥
अल्लाहस्य प्रसादस्तु वरिष्ठः सुमहत्तमः । उपलब्धिर्महत्येषा; [७३]युध्यस्व त्वं हि वाग्घर ! ॥१७५॥
श्रद्विहीनैश्च पाषण्डैः, निष्ठुरस्तैः समं भव । नारको वसतिस्तेषां दुर्गता वसतिर्हि सा ॥१७६॥
[७४]अल्लाहेन शपन्त्येते नाऽवदाम वयन्तु तत् । ध्रुवं यद्यप्यभाषन्त तेऽविश्वासस्य भाषितम् ॥१७७॥
अर्पणात् स्वस्य चैवोर्ध्वं ते विश्वासमहासिषुः । अविन्दन् यन्न तच्चैव सदा ते ऽचिन्तयन् पुनः ॥१७८॥
अकार्षीत् सधनानेतान् अल्लाहोऽस्य च वाग्घरः । स्वीयया दयया यद् वै तत् प्रतीकार एव हि— ॥१७९॥
केवलं क्रियते ऽमीभिः, पश्चात्तापं व्रजन्ति चेत् । कल्पेत तद्धितायैषां, विमुखास्तु भवन्ति चेत्— ॥१८०॥
परत्राप्यत्र चैवाऽपि तोत्स्यते खल्विमान् जनान् । अल्लाहोऽतितरां कष्टैः, सहायो नापि कश्चन— ॥१८१॥
मित्रं संरक्षको वाऽपि किंचामीषां भविष्यति । [७५]ईदृशाश्चापि सन्त्येषां प्रतिज्ञा यैः कृता ऽभवत् ॥१८२॥
अल्लाहेन यदस्मभ्यं विभवश्चेददीयत । वयं दानं प्रदास्यामो भविष्यामस्तथैव च ॥१८३॥
भद्राणां किल लोकानां पुनरन्यतमे जनाः । [७६]विभवं परमल्लाहो यदा तेभ्यो ऽददाद् हि ते ॥१८४॥
सञ्चये खल्वजायन्त तस्य लीना अथाऽभवन् । प्रतिकूलाः कृताभ्यस्ते प्रतिज्ञाभ्यो ऽपि सर्वथा ॥१८५॥
[७७]परिणामवशात्तेन हृत्सु तेषां निवेशितम् । पाषण्डित्वं न यावत्ते तं मिलन्ति, यतो हि ते— ॥१८६॥
वचोभंगमकार्षुर्यत् त्वल्लाहेन समं कृतम् । भाषणादनृतस्यापि; [७८]किन्न जानन्ति ते च यत् ॥१८७॥

CC-0. In Public Domain. Digitized by eGangotri

रहस्यं वेत्त्यसौ यच्च गुप्तं कर्णे जपन्ति ते । सम्यक् तदपि सोऽल्लाहः; परोक्षं यच्च वर्त्तते— ॥१८८॥
तस्य सर्वस्य चैवाऽपि ह्यल्लाहः सुतरां प्रवित् । [७९]ददतः स्वेच्छया दानं श्रद्धरान् आक्षिपन्ति ये ॥१८९॥
कुर्वते परिहासं च. तेषां येषां न वर्त्तते । विहाय स्वेदसारेण त्वर्जितादितरद् धनम् ॥१९०॥
हसतस्तान् हि सोऽल्लाहः स्वयमेव हसत्यलम् । प्रतीक्षन्ते तथैवैतान् यातनाः खल्वरुन्तुदाः ॥१९१॥
[८०]याचेथा वा न याचेथाः क्षमां तेभ्यो (मुहम्मद !) । त्वं चेत् सप्ततिकृत्वोऽपि याचेथा वै क्षमां किल— ॥१९२॥
तेभ्यस्तदाऽपि नोऽल्लाहः क्षंस्यते तान् कदाचन । तदेतस्माद्यतस्ते वै श्रदभावमदर्शयन् - ॥१९३॥
अल्लाहाय तथैवाऽस्य वाग्घराय, न चा ऽयनम् । अवज्ञाकारिणोऽल्लाहो दर्शयति कदाचन ॥१९४॥
[८१]प्रासीदन् ये जनाः पश्चात् स्थायिनस्त्वभवन् किल । वाग्घरस्य प्रभोः संगं त्यक्त्वा मत्वा 'स्थिता वयम्' ॥१९५॥
तेभ्यो ऽरोचत नैवेदं मार्गे ऽल्लाहस्य यद् वयम् । असुभिर्वसुभिश्चैव युध्येमहि कदाचन ॥१९६॥
अवोचंस्ते "न वै तापे बहिर्यानं विधीयताम्" । ब्रूहि तान्—नारकाग्निस्तु प्रतापादतिरिच्यते ॥१९७॥
अभविष्यन्महद्भद्रं यद्यवेत्स्यन्निदं हि ते । [८२]एभिः सर्माजितं यद् वै तत् प्रतीकाररूपतः ॥१९८॥
युज्यतेऽल्पं हसेयुस्ते रुद्युर्बह्वधिकं परम् । [८३]अथा ऽल्लाहो नयेच् चेत् त्वां परावर्त्य दलं प्रति ॥१९९॥
कञ्चिदेकममीषान्तु त्वदाज्ञां पुनरेव च । युद्धे यानाय लिप्सेरन् यदीमे, ब्रूहि तानिदम्— ॥२००॥
"नाभियानं मया सार्धं युष्माकं युज्यते क्वचित् । नाऽपि युद्धं मया सार्धम् शत्रुभिर्युज्यते च वः ॥२०१॥
आसनं रुच्यमासीद् वः प्रारम्भे, चापि साम्प्रतम् । पश्चात् तिष्ठत्सु लोकेषु तिष्ठतैव हि केवलम् ॥२०२॥
[८४](वाग्घर !) त्वं कदाचिन्नो कस्मिंश्चिन् मृतवत्यपि । तदेषां प्रार्थनां कुर्याः, तिष्ठेः कब्रेऽस्य नाप्यथ ॥२०३॥
असन्देहमिमे लोकाः श्रदभावमदर्शयन् । अल्लाहाय तथैवाऽस्य वाग्घरायाऽथ खल्विमे ॥२०४॥
अवज्ञाकारिणो ह्येव सन्तः पंचत्वमागताः । [८५]रायः सन्ततयश्चैषां विस्मयाय न सन्तु ते ॥२०५॥
अल्लाहस्येष्टमस्त्येतत् यदेभिः करणैरिमान् । यातनासु क्षिपेल् लोके प्राणा एषां प्रयान्तु च ॥२०६॥
श्रद्विहीनेषु खल्वेषु तिष्ठत्स्वेव च सर्वथा । [८६]यदा सूक्तावतारश्च कदाचिज्जायते हि यत् ॥२०७॥
श्रद्धत्त यूयमल्लाहे युध्यध्वं चापि संगताः । वाग्घरेणास्य भूत्वा वै तत्तेषां ये धनाधिपाः ॥२०८॥
तवाज्ञालिप्सवस्ते हि जायन्ते ऽनुवदन्ति च । "अनुमन्यस्व खल्वस्मान् आसितैः सममासितुम् ॥२०९॥
[८७]सन्तोषो जायते तेषां संगच्छेमहि संस्थितान् । तदेषां हृदयान्येवं मुद्रितान्यत एव ते— ॥२१०॥
न किञ्चिद् बोद्धुमर्हन्ति; [८८]वाग्घरस्तु परं तथा । श्रद्धरास्तत् समं लोका वसुभिरसुभिः पुनः— ॥२११॥
अयुध्यन्तैव, चैते ते येभ्यो भद्रशतं ततम् । साफल्यार्हा इमे चैव; [८९]ह्यल्लाहस्तत्कृते किल ॥२१२॥
आरामान्त्सम्यगासाध्य किलारक्षद्धि यानधः । वहन्त्यः सन्ति नद्यश्च, वत्स्यन्ति तत्र ते सदा ॥२१३॥
इदं ह्येव तु साफल्यं सर्वेषां यन्महत्तमम् । [९०]आरव्याणामुपेताश्च यात्रिणामपि केचन ॥२१४॥
मिषोत्का यल्लभेरंस्ते (पश्चात्स्थातुं) निदेशनम् । स्थिताश्चैवाऽपि ते पश्चात् असत्यं ये ऽवदंस्ततः ॥२१५॥
अल्लाहस्य समक्षञ्च वाग्घरस्यास्य चैव तु । आपतिष्यत्यमीषु द्राक् कष्टदा यातना हि ये— ॥२१६॥
श्रद्विधातमकुर्वन् वै; [९१]नैव दोषाय जायते । (पश्चात् स्थानन्तु) हीनेभ्यो रुजार्त्तेभ्यस्तथैव च ॥२१७॥
न किंचित् सविधे येषां व्ययाय किं च वर्त्तते । सश्रद्धा यदि ते सन्ति ह्यल्लाहे ऽस्य च वाग्घरे ॥२१८॥
नाऽयनं त्वीदृशानां वै विरोधे भद्रकर्मिणाम् । क्षमाशीलो दयालुश्च ह्यल्लाहो वर्त्तते ध्रुवम् ॥२१९॥
[९२]नाऽयनं तद् विरोधे ऽपि ये ते पार्श्वमुपागताः । यानप्रबन्धसाह्यार्थं परं त्वं त्ववदो हि तान्— ॥२२०॥
"नास्ति किंचित् समीपे मे युष्मदारोहणाय तु" । न्यवर्त्तन्त पुनस्ते च विषण्णाः, पुनरस्रवन्— ॥२२१॥
नेत्रेभ्यो ऽश्रूणि वै तेषां नालभन्त यतो हि ते । (अल्लाहाय) व्ययीकर्त्तुं किंचिदप्युपयाचितम् ॥२२२॥
[९३]तेषामेव विरोधे तु (किलाक्षेपा) ऽयनं हि ये । धनवन्तो भवन्तोऽपि तवाज्ञालिप्सुतां गताः ॥२२३॥
ते किलैच्छन् वयं यत्तान् संगच्छेमहि संस्थितान् । मुद्रितान्यकरोत्तेषामल्लाहो हृदयानि तु ॥२२४॥
ततो ह्येव न बुध्यन्ते किंचित्ते (दुर्धियो जनाः) ।

इति दशमं पारायणम्

इति श्रीसत्यदेववर्मणः कृतौ सांस्कृते कुराणे पारायणदशकम् ।

CC-0. In Public Domain. Digitized by eGangotri

अथ एकादशं पारायणम्

[94]परावृत्य यदा त्वञ्च तानुपेष्यसि ते तदा— ॥२२५॥
समक्षन्ते मिषांस्तावत् प्रस्तोष्यन्ति, परन्तु तान् । ब्रूह्यलं भोः! मिषैः, युष्मान् विश्वसिष्याम एव नो ॥२२६॥
अल्लाहोऽब्रूत खल्वस्मान् युष्मद्वृत्तानि सर्वशः । अल्लाहो वाग्घरश्चास्य कृत्यानीक्षिष्यते हि वः ॥२२७॥
पुनरेव ततो यूयं नेष्यध्वे तद् दिशं प्रति । यो हि सर्वं विजानाति संवृतं विवृतञ्च यत् ॥२२८॥
युष्माभिर्यत् कृतं युष्मांस्ततोऽसौ बोधयिष्यति । [95]परावृत्य यदा यूयं तान् पुनः समुपेष्यथ— ॥२२९॥
अल्लाहेन पुरस्ताद् वस्ते तु शप्स्यन्ति वै तदा । येन मुञ्च्यात यूयं तान्, सत्यं मुञ्चत चापि तान् ॥२३०॥
ते ऽपवित्रा हि तिष्ठन्ति, यच्च तैर्रजितं ततः । तत्पुरस्काररूपेण तेषां वासो हि नारकः ॥२३१॥
[96]पुरस्तात् ते हि युष्माकं भृशं शप्स्यन्ति येन हि । प्रसादः किल लब्धः स्यात् युष्माकं,त्वथ चेत् क्वचित् ॥२३२॥
यास्यथाऽपि प्रसादन्तु नाल्लाहस्तु प्रसत्स्यति । तेषु तावज्जनेष्वत्र सदाऽवज्ञापरा हि ये ॥२३३॥
[97]एते चलाऽचला अर्वास्त्वत्यन्तं साग्रहाः किल । अविश्वासे च पाषण्डे, तथेयं ह्येव योग्यता— ॥२३४॥
एतेषां तु प्रधानाऽस्ति यदल्लाहेन काशितान् । वाग्घरे नियमांस्तावन्न बुध्यन्ते कथञ्चन ॥२३५॥
अल्लाहस्तत्वदर्शी च विज्ञश्चैवाऽपि वर्त्तते । [98]यायावरेषु चाऽर्वेषु तादृशाश्च ापि सन्ति ये— ॥२३६॥
यं व्ययं ते प्रकुर्वन्ति हानिं तं मन्वते किल । प्रतीक्षन्तेऽथ कृच्छ्राणि युष्मदर्थे हि ते जनाः ॥२३७॥
कुचक्रे तु परं ते हि वर्त्तन्ते प्रपतिष्णवः । अल्लाहो वर्त्तते श्रोता तथा ज्ञाता ऽप्यसौ मतः ॥२३८॥
[99]यायावरेषु चाऽर्वेषु सन्ति ते ऽपि हि ये जनाः । अल्लाहे चरमाहे च श्रद्धराः, यञ्च ते व्ययम्— ॥२३९॥
कुर्वन्ति साधनं, तं वै कुर्वन्त्यल्लाहलब्धये । आशिषां प्राप्तये चैव वाग्घरस्य तथैव च ॥२४०॥
संशयो नाऽत्र तेभ्यो ऽसौ सामीप्यार्थं हि (साधनम्) । दयाक्षेत्रे निजे ऽल्लाहः सत्यं तान् वेशयिष्यति ॥२४१॥
क्षमाशीलो दयालुश्च किलाल्लाहो न संशयः । [100]जनानां त्यक्तवासानां सहायानाञ्च ये ऽग्रगाः ॥२४२॥
तेषां ये चानुसर्त्तारोऽभवन् शुद्धेन चेतसा । तेष्वल्लाहप्रसादोऽस्ति प्रसन्नास्ते ऽपि तेन च ॥२४३॥
सज्जितान्यकरोत्तेभ्यः स सूद्यानानि यत्र हि । वहन्त्यो निम्नगाः पार्श्वे, तत्र वत्स्यन्ति ते सदा ॥२४४॥
अयमेव महानेषां वर्त्तते विजयः किल । [101]यायावरेषु चार्वेषु परितस्त्वां हि तादृशाः ॥२४५॥
सन्ति पाषण्डिनश्चापि, मदहीननिवासिनाम् । ईदृशाश्चापि ये तावत् कूटनीतौ दृढाग्रहाः ॥२४६॥
तांस्तु त्वं नैव (भोः) वेत्सि, वेद्म्यहं तांस्तु सर्वशः । वयन्तान् दण्डयिष्यामो दण्डद्वैगुण्यतः किल ॥२४७॥
परावृत्ताः करिष्यन्ते ततस्ते बहुयातनाम् । [102]सन्ति केऽपीतरे चैव ये स्वपापान्यमन्वत ॥२४८॥
मिश्रिता ह्याचरंस्ते वै भद्राभद्राः किल क्रियाः । कदाचित् सदयस्तेषु ह्यल्लाहः स्यादसंशयम्— ॥२४९॥
क्षमाशीलो दयालुश्च ह्यल्लाहो वर्त्तते ध्रुवम् । [103]भैक्ष्यं त्वन्तु किलैतेषां राभ्यो हर पुनीहि च— ॥२५०॥
तान् विकासोन्मुखांश्चैव विधेहि तेभ्य आशिषः । कुरुष्वाऽत्र न सन्देहः तेभ्यस्ते त्वाशिषः किल— ॥२५१॥
शामकास्तुष्टिकारिण्यो ऽल्लाहः श्रोता ज्ञ एव च । [104]विदन्ति किन्न ते ऽल्लाहो ह्येव स्वीकुरुते तु यः ॥२५२॥
प्रायश्चित्तं स्वदासानां स एव स्वीकरोति च । उपाहृतं पुनर्भैक्ष्यं, तथा ऽल्लाहो हि यः पुनः— ॥२५३॥
विप्रतीसारसम्मन्ता दयावांश्चापि वर्त्तते । [105]ब्रूहितान्– व्यापृता यूयं स्वेषु कर्मसु तिष्ठत ॥२५४॥
अल्लाहो वाग्घरश्चास्य श्रद्धराश्चापि ये जनाः । निरीक्षणं करिष्यन्ति कर्मणां वस्तदुत्तरम्— ॥२५५॥
गुप्तागुप्तक्रियाज्ञं तं प्रत्यानीता भविष्यथ । युष्मद् यच्चेष्टितं तत्तत् तदासौ बोधयिष्यति ॥२५६॥
[106]ईदृशाः पुनरन्ये च सप्रतीक्षा भवन्ति ये । किमल्लाहो दिशत्येतान्, दण्डयेदपि तानसौ ॥२५७॥
दर्शयेत् तान् दयां किम्वा तदधीनमिदं समम् । अल्लाहस्तत्वदर्शी च विज्ञ एव तथैव च ॥२५८॥
[107]ईदृशा अपि लोका ये पूजास्थानं किल व्यधुः । विरोधात् श्रद्विहानाच्च भेदस्य प्रसवाय च— ॥२५९॥
श्रद्धरेष्वथ घातस्य सुगुप्तं तद् भवेत् स्थलम् । तेभ्यो ये प्रागयुध्यन्त प्रभुणा वाग्घरेण च ॥२६०॥
ते तु सत्यापयिष्यन्ति भद्र एव मनोरथः । तेषां बभूव न त्वन्यो, ह्यल्लाहसाक्षिता त्वियम् ॥२६१॥
ते त्वशंकितमेवाऽत्र मिथ्याचारा हि मानवाः । [108]कदाचिच्चापि नो यूयं तत्र तिष्ठत तत् किल ॥२६२॥
तत्तु पूजास्थलं युष्मत् स्थित्यर्हंत्वं व्रजत्यपि । साधिकं यत्समारम्भो हीशसेवेति लक्ष्यतः ॥२६३॥

CC-0. In Public Domain. Digitized by eGangotri

तादृशाः पुरुषास्तत्र शुद्धि-शीला भवन्ति ये । अल्लाहाय च रोचन्ते ते हि शुद्धास्तु ये नराः ॥२६४॥
[१०९]योऽकरोद् भवनं नैजं प्रसादभीतिमूलकम् । अल्लाहस्य गरीयान् स गरीयानितरो ऽथवा— ॥२६५॥
योऽकरोद् भवनं नैजं निखाततटमूलकम् । पतिष्यमाणमेवाऽस्ति यत् समापतति क्षणे ॥२६६॥
यस्तथा चाऽपतत् सार्धं तेन वै नारकानले ? । नो वै दर्शयते मार्गं पाप्मनो ऽल्लाह ईदृशान् ॥२६७॥
[११०]तैरिदं रचितं वेश्म हृत्सु तेषां निरन्तरम् । संशयोद्भावनं तावत् सुचिरं स्थास्यति ध्रुवम् ॥२६८॥
खण्डशो न भवन्त्येषां हृन्दि यावदशेषतः । अल्लाहस्तत्वदर्शी च विज्ञश्चैवाऽपि वर्त्तते ॥२६९॥
[१११]विनिमाय सदुद्यानैः प्राणानां सम्पदां तथा । श्रद्धरेभ्यः किलाल्लाहः क्रयमकृत निश्चितम् ॥२७०॥
अल्लाहाध्वनि युध्यन्ते, घ्नन्ति ते स्वयमप्यथ । हन्यन्ते चैव, खल्वेषां प्रतिज्ञा वर्ततें ऽकिता ॥२७१॥
तौरातेञ्जीलयोर्मध्ये कुराणे ऽप्यथ च प्रभोः । प्रतिज्ञापूरणे को वाऽतिरिच्याल्लाहमत्र तु ॥२७२॥
भवताऽऽनन्दिता यूयं निर्वृत्ते तेन वै समम् । पण्यसन्धौ, महांश्चैष मन्यतां विजयो निजः ॥२७३॥
[११२](जयन्ति) ते हि ये त्वत्र विप्रतीसारतत्पराः । स्तोतारो यात्रिणश्चापि, विनम्राः पुनरेव च— ॥२७४॥
सांगपातं प्रणन्तारः, भद्रस्यादेशिकास्तथा । वारयन्त्यसकृद् दोषान्, मर्यादारक्षकाश्च ये—॥२७५॥
अल्लाहस्य, शुभं वृत्तं श्रद्धरान् प्रति वाहय । [११३]प्रार्थनन्तु क्षमाहेतो येऽत्र वै मूर्तिपूजकाः—॥२७६॥
तेभ्यो नैवोचितं किञ्चित् श्रद्धराणां कदाचन । वाग्घरस्य तथा चैव, भवेयुश्चापि ते यदि ॥२७७॥
तेषां सनाभयस्तावत् यदाऽऽविर्जातमेव च । तेषां यत्ते हि कल्पन्ते नारकायैव वह्नये ॥२७८॥
[११४]प्रतिज्ञाकारणादेव क्षमार्थं ह्यर्थना कृता । अब्रह्मेणात्मनः पित्रे प्रतिज्ञा तेन यत् कृता ॥२७९॥
विरक्तोऽभूत् परं पश्चात् असौ ज्ञात्वा त्विदं हि यत् । पिता मे ऽल्लाहवैमुख्यं बिभर्त्तीति ततः किल— ॥२८०॥
अब्रह्मोऽति क्षमी किञ्च दयावान् हृदये ऽभवत् । [११५]न चेदं किल सम्भाव्यं लोकान् मार्गप्रदर्शनात्— ॥२८१॥
ऊर्ध्वं कुर्यात् पथभ्रष्टान् अल्लाहो नैव बोधयेत् । यावत्तान् विशदं कृत्वा ह्यात्मा रक्ष्यो ऽस्ति वै यतः ॥२८२॥
सर्वविद् वर्त्तते ऽल्लाहो नात्र कश्चन संशयः । [११६]संशयो न हि यद् व्योम्नां राज्यमुर्व्यास्तथैव च ॥२८३॥
अल्लाहस्यैव तत् सर्वं, स एव जीवनस्तथा । हन्ता स एव किञ्चापि, नाल्लाहादितरस्तथा— ॥२८४॥
युष्माकं रक्षको मित्रं किञ्च कश्चित् सहायकृत् । [११७]वाग्घरे सकृपो जातः किला ऽल्लाहस्तथैव च— ॥२८५॥
त्यक्तावासेषु लोकेषु सहायकृत्स्वथापि च । संकटस्य तु ये काले ह्यन्वयुर्वाग्घरं तदा ॥२८६॥
यद्यप्येकस्य वै तेषां दलस्य हृदयानि ह । विश्वासस्योपघाताय तत्पराण्यभवंस्तदा ॥२८७॥
ततोऽसावभवत्तेषु सकृपो नाऽत्र संशयः । दयाशीलः स वै तेभ्यः करुणामय एव च ॥२८८॥
[११८]त्यक्तेषु तेषु पश्चाच्च (सकृपः सोऽभवत्) त्रिषु । पृथ्वी सुप्रथिता चाऽपि तेभ्यः संकोचमादधौ ॥२८९॥
तै र्यदा स्वयमात्माऽपि दुर्भरश्चान्वभूयत । अविदुश्चाऽथ ते नान्यत् त्वल्लाहाच्छरणं किल ॥२९०॥
क्वचिच् चेच्छरणं तद् वै ह्यल्लाहपार्श्व एव च । ययौ तान् कृपयाऽऽविष्टस्ततोऽसौ येन ते ऽपि च— ॥२९१॥
प्रेरितास्तमुपेयुर्वै, ह्यल्लाहो नाऽत्र संशयः । अनुतापोररीकर्त्ता, दयावांश्चापि वर्त्तते ॥२९२॥
[११९]बिभीत यूयमल्लाहात् श्रद्धराः संगतं तथा । सत्यवादि जनैः सार्धं कुरुध्वं (गतसंशयाः) ॥२९३॥
[१२०]मदहीनस्य वास्तव्यैस्तांस्तथा परितो गतैः । अर्वैः यायावरैश्चापि नोपपन्नन्तु विद्यताम्— ॥२९४॥
अल्लाहवाग्घरं त्यक्त्वा स्थीयते यद् विदूरतः । तस्य प्राणसुरक्षाया भूत्वोदास्तैस्तथैव च— ॥२९५॥
आत्मनः प्राणरक्षैव युक्तरूपा च मन्यते । इदञ्चास्माद् यतो मार्गे ह्यल्लाहस्य तृषाऽथवा ॥२९६॥
क्षुधा वाऽप्यथवा श्रान्तिः कष्टमन्यद्विधं पुनः । भवेत्तैरनुभूतं चेत् चेष्टा काचित् कृता भवेत् — ॥२९७॥
किम्वा क्रोधाय शत्रूणां हानये वाऽथ कल्पताम् । तेषां सा, तत्समग्रं हि तत्पक्षे त्वंक्यते किल— ॥२९८॥
सुकर्मेत्यक्षरैः कृत्वा, ना ऽफलं कुरुते ध्रुवम् । भद्राणां चेष्टितं कर्म त्वल्लाहोऽत्र कथञ्चन ॥२९९॥
[१२१]अल्पं वाऽप्यधिकं यत्ते व्ययीकुर्वन्ति वै जनाः । पारयन्ति दरीं यद् वा तत्पक्षे लिख्यते हि तत् ॥३००॥
सूत्तमानां फलं तेभ्यो ह्यल्लाहः प्रददातु यत् । [१२२]श्रद्धराणान्तु सर्वेऽपि योद्धुं माऽशेषतो गमन् ॥३०१॥
गणानामखिलानान्तु दलमेकं ह्यभिव्रजेत् । (पृष्ठत स्स्थाः) हि विन्देरन् मतज्ञानं यथा दृढम् ॥३०२॥
बोधयेयुर्यथाऽऽत्मीयांस्ते बन्धून् हि परागताः । येन ते (दुष्टकर्मभ्यः) रक्षन्त्वात्मान (मात्मना) ॥३०३॥

CC-0. In Public Domain. Digitized by eGangotri

[१२३]श्रद्धराः ! ननु युध्यध्वं तर्हि ये तु समन्ततः । श्रद्विहीना हि युष्माकं, निष्ठुराः स्थेति ते पुनः ॥३०४॥
युष्मान् किञ्चाऽपि जानीयुः, ज्ञायतां पुनरेव च । भीतिमन्तो हि येऽल्लाहः पक्षे तेषां हि वर्त्तते ॥३०५॥
[१२४]सूक्तस्य कस्यचिच्चैव प्रकाशों जायते यदा । वदन्तीत्थं पुनस्तेषाम्— "अस्य सूक्तस्य कारणात् ॥३०६॥
श्रद्धायां कस्य पुंसस्तु सम्वृद्धि र्जायतेतराम्" ? । श्रद्धरा ये तु तल्लोकास्तेषां श्रद्धा ह्युदङ्गता ॥३०७॥
अनेनाऽथ च नन्दन्ति ते जना (जोषमागताः) । [१२५]सरुजानि परं येषां तिष्ठन्ति हृदयानि तु— ॥३०८॥
अशुचौ कुरुते तेषां ह्यध्यारोपं पृथम्विधम् । अन्यस्याप्यशुचेः सूक्तम्, यावदन्तञ्च ते जनाः ॥३०९॥
श्रद्विहीना हि तिष्ठन्ति; [१२६]नैव पश्यन्ति किन्नु ते । समाः समाः परीक्ष्यन्ते यत्ते वारद्वयं ह्यथो—॥३१०॥
वारमेकं, परन्त्वेते न ततो ऽप्यनुतापिनः । न चेतन्ते पुनर्वाऽपि; [१२७]सूक्तं किंचिदुदेति च ॥३११॥
यदैतेऽन्योन्यमीक्षन्ते हीदं स्वान्ते निधाय तु । पश्यति वस्तु नो कश्चित्, मुखं पर्यस्य तत् पुनः ॥३१२॥
प्रद्रवन्त्यपि च स्थानात्; पराञ्चि हृदयानि तु । अकृतैषां किला ऽल्लाहो हीदृशास्ते जना यतः ॥३१३॥
नो बुध्यन्ते हि ते किञ्चित्; [१२८]वाग्घरो व उपेयिवान् । युष्माकमेव खल्वन्यः, न चासौ सहितुं क्षमः— ॥३१४॥
यूयं भारातिरेकेण समाक्रान्ता भवेत यत् । यूयं काम्या हि वै तस्य, श्रद्दधानास्तु ये जनाः ॥३१५॥
वर्त्ततेऽसौ (सदा) तेभ्यः कारुण्य कृपयोर्गृहम् । [१२९]यदीदानीं जना एते पराङ् आस्याभवन्त्यपि ॥३१६॥
ब्रूहि—"मे केवलो ऽल्लाहो ह्येव सन्तिष्ठते त्वलम् । प्रतीष्टो नेतरस्तस्मात् तमेवाऽहं तथाऽऽश्रितः— ॥३१७॥
स चैवैकः प्रभुस्तस्य तुंगसिंहासनस्य च ।

योगः—३१७॥

१०

सूक्तम्—यवनाशः

(यूनुस)

(महाकालेऽवतीर्णाः नवोत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ० लाम० राश्लोका धीरे शास्त्रे भवन्ति ह । [२]किमाश्चर्यकरं जातं लोकानामिदमेव यत्— ॥ १ ॥
वयमन्यतमं तेषां ह्येव चेतनया किल । अपूरयाम यल् लोकान् असौ कुर्यात् सचेतसः ॥ २ ॥
सूचयेच् च शुभं वृत्तं श्रद्दधानान् जनानिदम् । तत्प्रभुं समया तेभ्यः पदमुच्चैः सुरक्षितम् ? ॥ ३ ॥
श्रद्विहीनास्ततोऽवोचन्—"संशयो नाऽत्र विद्यते । जनोऽयं केवलं मायी; [३]प्रभुर्वो नात्र संशयः— ॥ ४ ॥
केवलः खलु सोऽल्लाहो वियतश्च धराञ्च यः । षड्दिनेष्वसृजत्, पश्चाद् राज्यसिंहासने स्थितः— ॥ ५ ॥
सर्वान् प्रशास्ति वै लोकान्, प्राभिशंसनमप्यथ । न चाऽपि तदनुज्ञाया विना कश्चन पूरूषः— ॥ ६ ॥
कर्त्तुं क्षमो भवत्यत्र, तदल्लाहो हि वः प्रभुः । पूजां तेन तदस्यैव यूयं कुरुत सर्वदा ॥ ७ ॥
चेतथ केन नो यूयम् ?; [४]स एव सकलैरपि । प्रत्युपेयो हि युष्माभिः, सत्याऽल्लाहस्य संविदा ॥ ८ ॥
असन्देहमिमं सर्गं कुरुतेऽसौ पुनस्ततः । सर्जनं कुरुते किञ्च श्रद्धरान् किल यज्जनान्— ॥ ९ ॥
अनुकूलकृतश्चापि पुरस्कुर्यान्नयेन वै । श्रद्विहीनास्तु ये ऽतिष्ठन् उद्वलन्ति जलानि वै— ॥१०॥
प्राप्स्यन्ति ते हि पानाय दुःखदा यातनास्तथा । अश्रद्धा हेतुना तेषां भविष्यन्ति पुरस्क्रियाः ॥११॥
[५]स एवाऽऽकाशयद् योऽर्कं चन्द्रं प्राकाशयत् तथा । सोपानान्यस्य चक्रे च समास्संख्यानहेतुना ॥१२॥
गणना हेतुना ऽन्येन ह्यल्लाहो ऽखिलमसृजत् । सप्रयोजनमेवैतत्, ज्ञातारो ये जना इह— ॥१३॥
निजाऽऽयातान् स वै ब्रूते तेभ्यो वैशद्यतः किल । [६]अह्नश्चैव निशायाश्च प्रभेदे सुविनिश्चितम्— ॥१४॥
तस्मिंस्तस्मिंश्च सर्वस्मिन् तथोर्व्यां गगनेषु च । असृजद् यद् यदल्लाहः सन्ति लक्ष्माणि सर्वशः— ॥१५॥
जनेभ्यः किल तेभ्यो हि ये भवन्ति भयन्धराः । [७]संगतेरस्मदीयाया नाऽऽशां रक्षन्ति ये त्विह ॥१६॥
भाविकं कामयन्ते तु जीवनं तेन चैव ये । परं तोषं हि मन्यन्ते, तथोदास्ताश्च ये जनाः— ॥१७॥
लक्ष्मणां विषये ऽस्माकम्; [८]तदेते ते हि वै जनाः । वह्निर्येषां किलावासः पुरस्कारोऽर्जितस्य हि ॥१८॥
[९]श्रद्धरा ये ऽनुकूलानि किञ्च कर्माणि कुर्वते । श्रद्धायाः कारणात् तेषां प्रभुस्तान् दर्शयिष्यति— ॥१९॥
पन्थानं यमधो नद्यः प्रसादोपहितेषु वै । आरामेषु भविष्यन्ति प्रवहन्त्यो निरन्तरम् ॥२०॥
[१०]स्तवस्तत्र पुनस्तेषामयन्तावद् भविष्यति । 'माहात्म्यं ते हि नोऽल्लाह'! किञ्च तेषां भविष्यति ॥२१॥
अभिवादनशब्दोऽयम्—'शान्तिः' तेषां स्तवोऽन्तिमः । भविष्यति—"भवस्यास्मै प्रशस्तिः प्रभवेऽस्तु नः" ॥२२॥
[११]अल्लाहः शीघ्रतां लोकैः, तेषां पापार्जने यदि । अकरिष्यद् यथा लोकाः भव्ये शैघ्र्यं प्रकुर्वते ॥२३॥
कालावधिर्बहोः कालात् नष्टः सत्यं व्यधास्यत । चरेयुर्धृष्टतायान्ते निजायामेव सर्वदा— ॥२४॥
इतीदं चिन्तयित्वा तांस्त्यजामः स्वैरिणो वयम् । संगतेरस्मदीयाया नाऽऽशां रक्षन्ति ये त्विह ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[१२]यदा च मानवः कष्टं ह्युपैत्यस्मानसौ तदा । लेट्यंस्तिष्ठन् पुनः किम्वाऽऽकारयत्यासनं गतः ॥२६॥
वयं तस्य तदा कष्टं वारयामः परन्त्वसौ । स्वमेति ह्ययनं तद् वद् विपन्नो ऽपि कदाचन— ॥२७॥
यद् वन्नाकारयत्त्वेव किलास्मान् त्सर्वथा ध्रुवम् । मर्यादां प्रविहायेत्थं चरतां वै नृणां कृते— ॥२८॥
कृता कृत्यततिस्तेषां दृष्टि हेतोः शुभायना । [१३]त्वत्तः प्राक् सुबहून् वंशान् अत्याचारपरान् वयम् ॥२९॥
अनाशयाम, तत्पार्श्वे तेषामायन् हि वाग्घराः । स्पष्टलक्ष्माण्युपादाय श्रद्दधुस्ते ततोऽपि नो ॥३०॥
सापराधान् जनानित्थं पुरस्कुर्मो वयं किल । [१४]अकुर्मोर्व्यां वयं पश्चात् त्वां तदायतिरूपतः ॥३१॥
द्रष्टुं केन प्रकारेण कर्म कुर्वंस्त्वमीहसे । [१५]विशदाश्च तथा ऽऽयाताः अस्माकं तत् पुरो यदा ॥३२॥
पठ्यन्ते ते गताशा ये त्वस्माकं मेलके ततः । वदन्तीत्थम्—"समानेयं भिन्नमस्मात् कुराणकम् ॥३३॥
कार्यो वाऽत्र परीवर्त्तो" ब्रूहि तांस्त्वम्—"न शक्यते । कर्त्तुं कोऽपि परीवर्त्तस्त्वत्र तावत् स्वतो मया ॥३४॥
पालयाम्येष तद्ध्येव केवलं यत् प्रकाश्यते । मयि, मन्येय चेन्नाहं समादिष्टं निज प्रभोः— ॥३५॥
भयम्मे स्याद्धि कष्टानामह्न्येकस्मिन्नुपेयुषि" । [१६]ब्रूह्यल्लाहः किलैषिष्यत् चेदहं न हि वः पुरः— ॥३६॥
इदन्त्वश्रावयिष्यं भोः !, सूचनामात्रमप्यथ । न वा प्रासारयिष्यन्तु, प्रागितस्त्वन्ततः किल— ॥३७॥
वयः खण्डं विशिष्टं वै मया युष्मासु यापितम् । बुद्ध्या तत् किन्न वै यूयं प्रवर्त्तध्वे ऽ(ल्पया त्वपि)? ॥३८॥
[१७]जाल्मस्तस्माज्जनात् कोऽन्यो मिथ्यात्वं रोपयेत्तु यः । अल्लाहे, वा तदायातान् किञ्च मिथ्यापयेत्तु यः ॥३९॥
सफलाः सापराधास्तु नो भवन्ति कदाचन । [१८]तदल्लाहाद् ऋते ह्येते पूजयन्ति, न यत् क्वचित् ॥४०॥
लाभं वाऽप्यथवा हानिं कर्त्तुमेषां भवत्यलम् । वदन्तीत्थञ्च—"खल्वेतत् प्राभिशंसकमस्ति नः— ॥४१॥
अल्लाहस्य पुरस्ताद् वै", ब्रूहि तान् —यन्न तिष्ठति । अल्लाहस्य किल ज्ञाने धरित्र्यां गगनेष्वपि— ॥४२॥
बोधयध्वे किमेनं तत् ?, महिम्ना शालते ह्यसौ । कल्प्यमानञ्च सादृश्यमतिक्रम्य स तिष्ठति ॥४३॥
[१९]एक एव समाजोऽयं सर्वे येऽप्यत्र मानुषाः । विभेदन्ते ततो ऽकुर्वन्; सकाशात् त्वत् प्रभोर्यदि ॥४४॥
निश्चयो नाऽभविष्यत्तु ह्येकस्मिन् विषये पुरा । यदादाय हि वैमत्यं तेषु, तत्र हि निर्णयः— ॥४५॥
अभविष्यत् कृतस्तावत्; [२०]वक्ष्यन्तीत्थञ्च ते जनाः । "प्रभोरस्य सकाशात्तु कथन्नास्मिन् जने पुनः— ॥४६॥
कस्यचिल् लक्ष्मणस्तावदवतारो ह्यजायत" । ब्रूहि तावत् —परोक्षे तु ह्यल्लाहः केवलः प्रभुः" ॥४७॥
अस्तु, कार्या प्रतीक्षाऽतः प्रतीक्षे सममप्यहम् । [२१]संकटे पतितं लोकं चोद्धरामो यदा वयम् ॥४८॥
आत्मनो दयया, पश्चात् असौ लोको वयत्यलम् । उद्दिश्यास्माकमायातान् कूटान्, ब्रूहि —भवत्यसौ ॥४९॥
कूटजालेऽतिगो ऽल्लाहः, कूटान् यूयञ्च यद्विधान् । तनुथाऽत्र हि लेखात्तांस्तान् प्रकुर्वन्ति वाग्घराः ॥५०॥
[२२]स एवाऽयं हि यो भूमावकूपारे तथैव च । युष्मान् नाययते किञ्च यदा यूयञ्च तिष्ठथ— ॥५१॥
जलनौकासु, वो लोकान् प्रेरितास्ताश्च वायुना । प्रचरन्त्यनुकूलेन नयन्त्य, स्ते जना अपि— ॥५२॥
तत्र स्थित्वा प्रसीदन्ति, ततोऽकस्मात् प्रभञ्जनः । तानुपैति, तरंगाश्च पुनरेव च सर्वतः— ॥५३॥
पर्यावृण्वन्ति तान् लोकान् "वयं पर्यावृताः किल" । इतीदं ते च बुध्यन्ते, क्षणे तस्मिन् निरन्तरम्— ॥५४॥
आह्वयन्ते हि ते ऽल्लाहं विश्वासं पूतमात्मनः । तस्मिन्नेव समाधाय गोपायिष्यसि नो यदि— ॥५५॥
कार्तज्ञं दर्शयिष्यामो वयन्तत् त्वां (सुनिश्चितम्) । [२३]गोपायितास्तु ते भूमौ विरुद्धाचरणे रताः— ॥५६॥
त्यक्त्वा सत्यं हि जायन्ते, विरुद्धाचरणं जनाः ! । कल्पिष्यते विरोधाय युष्माकं त्वेव चात्मनाम् ॥५७॥
(भुज्यतां) वर्त्तते सौख्यं यद्धि लौकिकजीवने । भवामः समुपेयास्तु वयमेव किलान्ततः ॥५८॥
तदानीं बोधयिष्यामो युष्मान् यूयं हि यत् पुरा । अन्वेष्टध्वम्; [२४]किलौपम्यं जगज्जीवस्य वर्त्तते— ॥५९॥
जलेन वृष्यते ऽस्माभिर्यद् हि व्योम्नो यतः पुनः । वानस्पत्यं घनं तावद् धरित्र्यास्संप्ररोहति — ॥६०॥
यन्नराः पशवश्चापि सर्वे भुञ्जन्ति कामतः । अपूर्वे किल शृंगारे धरित्र्या विहिते सति ॥६१॥
सर्वतः सम्भृतायाञ्च स्वामिष्वस्यास्तदा पुनः । चिन्तयत्स्वधिकारोऽस्यां जातोऽस्माकं हि सर्वशः ॥६२॥
अकस्मान्नः समादेशस्तत्रापतति वासरे । निशायां वा वयं चाऽथ विदध्मस्तां तथा यथा ॥६३॥
कृषिर्लूना भवेत् काचिदनाढ्या सस्यसम्पदा । वर्णयामः सवैशद्यं तदित्थं पुरतो वयम् ॥६४॥
मनीषाधारिणां वाचः; [२५]ह्यल्लाहो ह्वयते तु वः । शान्तिधामनि, मार्गे च सरले तं नयत्यपि ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

यं स कामयते लोकम्; [26]ये तु भद्रं प्रकुर्वते । भद्रं तेभ्य, स्ततोऽप्यन्यत् तेभ्यस्तिष्ठति साऽधिकम् ॥६६॥
म्लानतां नैव यास्यन्ति तन्मुखानि कदाचन । नापवादस्य वादश्च, हीत्थं भूता जना ध्रुवम् ॥६७॥
स्वामिनो वै भविष्यन्ति स्वर्गलोकस्य यत्र ते । सदा वासं हि वत्स्यन्ति; [27]परं ये तु जना इह ॥६८॥
अरमन्त हि पापेषु, फलं पापस्य तत् पुनः । भवितृ तद्विधं ह्यैव, पापैराच्छादिताश्च ते ॥६९॥
स्थास्यन्ति, नापि चाल्लाहात् लप्स्यन्ते रक्षणञ्च ते । तमिस्राया यथैवैषां खण्डेनैकेन वै मुखम् ॥७०॥
संवृतं स्यात्, इमे ह्येव लोका ये त्वग्नये वृताः । स्थास्यन्ति सर्वदा चैव यत्र ते; [28]तान् वयं यदा ॥७१॥
समवेतान् करिष्यामः, प्रतिम्नो ये ह्यधारयन् । वक्ष्यामस्तान् वयं सर्वान् "स्वस्थाने तिष्ठतेह भोः! ॥७२॥
यूयं, तिष्ठन्तु ये चाऽपि प्रतिमानो ऽक्रियन्त हि । तेषु चोद्भावयिष्यामो वयं भेदं, ततश्च ते ॥७३॥
कल्पिताः प्रतिमानो हि वक्ष्यन्त्येतानिदं किल । "युष्माभिः पूजितास्तावन्नो वयं तु कदाचन" ॥७४॥
[29]साक्षिता चावयोर्मध्ये त्वल्लाहस्यैव केवलम् । पर्याप्ता यद् वयं पूजां नाज्ञासिष्म तु वः क्वचित् ॥७५॥
[30]प्राक् कृतान्यात्मकर्माणि तत्र सर्वेऽपि जन्तवः । ईक्षिष्यन्ते स्वतश्चैव, प्रत्यावृत्तास्तथैव च ॥७६॥
करिष्यन्ते तमल्लाहं प्रति यो वस्तुतः प्रभुः । असत्यस्य समुद्भावो यः कृतस्तैभूत् तथा ॥७७॥
नासौ कल्पिष्यते किंच तेषां साफल्यसिद्ध्ये । [31]पृच्छ "युष्मान् विभर्त्युर्व्यां विहायस्स्वथ को नु भोः! ॥७८॥
कर्णयोश्चक्षुषोर्वाऽपि प्रभुता कस्य वर्त्तते ? । मृतात् को जीवितं को वा जीविताद् भावयेन्मृतम् ? ॥७९॥
सूत्रधारः प्रपञ्चस्य समस्य कोऽथवा पुनः ?" । सहसा ते वदिष्यन्ति "ह्येषो ऽल्लाहो"ऽथ ब्रूत तत् ॥८०॥
विभीथ केन तस्मान्नो ?; [32]एषोऽल्लाहो हि वस्तुतः । प्रभुर्वः तदपेतस्य सत्यात् किं वाऽवशिष्यते ॥८१॥
ऋतेऽध्वभ्रंशनात्, यूयं निवृत्ताः कुत्र याथ तत् ? । [33]अवज्ञामानसेष्वेवं प्रभोर्वो वचनं त्वभूत् ॥८२॥
सत्यं प्रमाणितं यत् ते न वै श्रद्दधति क्वचित् । [34]पृच्छ "किन्न्वस्ति तुल्यानां मतानां तव कोऽपि तु ॥८३॥
यः सृजेत् प्रथमं किं च तमेवानुसृजेच्च यः । ब्रूहि "अल्लाहः सृजत्यत्र स एवानुसृजत्यपि ॥८४॥
केन यूयं ततो याथ मार्गाद् भ्रष्टा इतस्ततः ? । [35]पृच्छ "किन्न्वस्ति तुल्यानां मतानां तव कोऽपि तु ॥८५॥
सत्यमार्गे प्रणेता यो भवेद्" ? ब्रूहि "स केवलः । अल्लाहः सत्य मार्गस्य प्रणेता" तेन यः पुनः ॥८६॥
सत्यमार्ग प्रणेता स्याद् वैशिष्ट्येन किमर्हति । अनुयानं स लोकानां उतासौ यो न विन्दति ॥८७॥
कथंचिच्चापि मार्गं स्वं यावन्नेताऽस्य नो भवेत् । केन यूयं तदापन्नाः ? निर्णयान् याथ कीदृशान् ? ॥८८॥
[36]आश्रयन्ते ऽनुमानञ्च तेषां नैका जनास्तथा । कोऽपि नात्र च सन्देहो नानुमानोपयोगिता ॥८९॥
सत्यस्थाने भवेच्चापि, यथावद् वेत्ति, यच्च ते । किञ्चनाऽपि प्रकुर्वन्ति सोऽल्लाहो नात्र संशयः ॥९०॥
[37]कुराणं नेदृशञ्चैतद् यद् यः कोऽप्यन्तरेण तम् । स्वतोऽपि घटयेत् तावत्, वर्त्तते हि समर्थकम् ॥९१॥
परं पौरस्त्यवृत्तस्य, विस्तरञ्चैव वर्त्तते । पुस्तकस्य न सन्देहो वर्त्ततेऽत्र, ततोऽथ च ॥९२॥
यः प्रभुर्जगतां तावत्; [38]किन्न्विदं प्रवदन्ति ते । "स स्वतोऽघटयद्ध्येतत्", ब्रूहि "सत्यं श्रिता यदि ॥९३॥
यूयं तत् सूक्तमेकं भोः ! घटयित्वा हि तद्विधम् । समुपैत तथा ऽल्लाहादितरं कञ्चनाऽपि यम् ॥९४॥
समर्थाः स्यात चाह्वातुं तं समाह्वयताऽपि च । [39]इदञ्चात्र, न्यषेधंस्ते तज् ज्ञानं यन्न ते ऽशकन् ॥९५॥
परिक्रान्तुंधिया, यस्य याथार्थ्यं चाऽधुनाऽपि तान् । नो पयातमभूत्, इत्थं ह्येव पूर्व्या जना अपि ॥९६॥
न्यषेधन्, ज्ञायतां तद् भोः! जाल्मानां कीदृशोऽभवत् । दुःखदोऽन्तः; [40]भवन्त्येषां श्रद्धरा इह केचन ॥९७॥
नेतरे श्रद्धराश्चापि, वेत्ति सम्यक् प्रभुस्तव । तांश्च ये विकृतेरत्र भवन्त्युद्भावकाः किल ॥९८॥
[41]त्वामथो खण्डयन्त्येते यदि तद् ब्रूहि तानिदम् । "कर्त्तव्यं मे मदर्थं (भोः !) युष्मदर्थञ्च वो मतम् ॥९९॥
न सम्पर्को ऽस्ति युष्माकं तेन यत् प्रकरोम्यहम् । नाऽथ मे तेन सम्पर्को यन्तु यूयं विधत्थ च ॥१००॥
[42]ईदृशा वहवश्चैषां ये त्वां श्रोतुं समुत्सुकाः । श्रावयिष्यसि तेनाऽपि किमेडांस्त्वं, न यद्यपि ॥१०१॥
धारयन्ति हि सामर्थ्यं वोद्धुं तत् किंचनाऽपि ते ? । [43]ईदृशा वहवश्चैषां ये तु त्वद्दत्तलोचनाः ॥१०२॥
भृशं तिष्ठन्ति तेनाऽपि किमन्धान् दर्शयिष्यसि ? । त्वं नु मार्गं समर्थास्ते नैव द्रष्टुं तु यद्यपि ? ॥१०३॥
[44]सत्यं त्वेतद् यदल्लाहो नापराध्यति कञ्चन । आत्मनाऽऽत्मानमेवेह त्वपराध्यन्ति जन्तवः ॥१०४॥
[45]यदाऽल्लाहस्तथैवैतान् समवेतान् करिष्यति । होरामात्रं दिनस्यैते स्थितास्तावद् (भवे)ऽभवन् ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

भविष्यतीदृशी ह्येषांप्रतीतिः किञ्च ते पुनः । अन्योन्यं परिचिन्वन्तो भविष्यन्ति तदा स्थिताः ।।१०६।।
अल्लाहेन समं संगं न्यषेधन् ये तु वै जनाः । ध्रुवं नाशं गतास्ते च नेतारं हि विना स्थिताः ।।१०७।।
"तर्जयामोऽधिकृत्यैतान् यद् वयं दर्शयेम तत् । अंशतस्त्वामथो किम्वा (पृथिव्या) उद्धरेम हि ।।१०८।।
अन्ततो वयमेवैषां प्राप्स्युद्देशाः किल स्थिताः । यच्च किंचित् चरन्त्येते साक्ष्यल्लाहोऽस्ति तत्र वै ।।१०९।।
"वाग्घरं प्रति संघातं तिष्ठत्येको, यदा च सः । तानुपैति दिशत्येतान् नयेन निर्णयं तदा ।।११०।।
नात्याचारस्तथा तेषु कश्चनाऽपि विधीयते । "ते च पृच्छन्ति "सत्याश्चेद् यूयं कस्मिन् दिने ततः ।।१११।।
प्रतिज्ञाया हि सम्पूर्त्तिः युष्माभिः प्रविधास्यते ?" । "ब्रूहि "नाऽहं प्रभुर्भद्रे नाऽभद्रे चात्मनः प्रभुः ।।११२।।
कामितं यद् यदाऽल्लाहं तत्तदेवाऽत्र जायते । निश्चितः समयो ह्येकः प्रतिसंघातमापतेत् ।।११३।।
यदा चासौ न ते शक्ता लम्बने त्वरणेऽस्य वा । घटीमात्रमपि; "ब्रूहि "युष्माभिश्चिन्त्यतांत्विदम् ।।११४।।
निशायां दिवसे वाऽपि यद्यल्लाहात्तु यातना । आपतेत् किल युष्मासु किं वै तत्तत्र विद्यते ।।११५।।
यदर्थं शीघ्रता-कामाः सापराधा जना इह । "विश्वसिष्यथ किं यूयं यदाऽसावापतिष्यति ।।११६।।
तदैव ? साम्प्रतं तत् किं, यूयमस्यै त्वराकुलाः । चिरायाऽतिष्ठतैवाऽत्र; "येऽथ जाल्माश्च ते जनाः ।।११७।।
वक्ष्यन्ते "यातनां यूयं स्वदध्वं शाश्वतीमिमाम् । अर्जितस्यैव लप्स्यध्वे चानुकूलां पुरस्क्रियाम् ।।११८।।
"ते त्वां पृच्छन्ति "किं सत्यंन्विदम् ? ब्रूह्योमिदंकिल । सर्वथाऽस्ति परं सत्यं प्रामाण्यान्मे प्रभोरथ ।।११९।।
नात्मानं रक्षितुं शक्ता यूयं तस्याः कथञ्चन" । "यद्धरित्र्यां समं तत् चेत् प्रभुत्वे स्यात् कदाचन ।।१२०।।
तेषां ये सन्ति पाप्मानो ह्यर्पयेयुस्तु तेऽ (चिरम्) । तत् समं त्रातुमात्मानं, यातनाः समुपस्थिताः ।।१२१।।
यदा द्रक्ष्यन्ति ते स्वान्ते भृशं तप्स्यन्त्यसंशयम् । निर्णयो न्यायपूर्वश्च तेषां तावद् भविष्यति ।।१२२।।
न प्रवर्त्तिष्यते किं च मनागप्यनयेन तैः । "ज्ञायतां यद् धरित्र्यां च यत्तथैव वियत्सु च ।।१२३।।
अल्लाहस्यैव तत् सर्वं, श्रूयतां, यत् प्रतिश्रुतम् । अल्लाहेन हि तत्सत्यम्, नो विदन्ति परं जनाः ।।१२४।।
अनेके किल तेषान्तु; "स एव यो हि जीवनः । स एव यो ऽपहन्ता च, यूयं सर्वेऽप्यथो जनाः ।।१२५।।
तमेव प्रतिनिवृत्ता विधास्यध्वे पुनस्तथा । "उपदेशो हि वो लोकाः ! युष्माकं यः प्रभुस्ततः ।।१२६।।
उपेतो, हृत्सु यद्विष्टं युष्माकं तत्कृते ह्यलम् । शामकं (भेषजं) किञ्च श्रद्धरेभ्योऽथ वर्त्तते ।।१२७।।
दर्शकोऽप्यध्वनश्चैव दयात्तच्चापि सर्वथा । "ब्रूहि—अल्लाहदयायाञ्च तस्यौदार्यस्य खल्वथ ।।१२८।।
फलमेतत्, प्रसादोऽत्र विधेयस्तेन, चोत्तमः । सर्वेषामपि वस्तूनां अयं तेषां हि, संग्रहम् ।।१२९।।
येषां कर्त्तुं समुद्युक्तास्सदा तिष्ठन्ति मानवाः । "ब्रूहि-लोकैश्च युष्माभिः कच्चित् किम्वा विचारितम् ।।१३०।।
भोग्यानि यानि वस्तूनि युष्माकं भोगकर्मणे । अवातारयदल्लाहः तेषां युष्माभिरात्मना ।।१३१।।
वैधाऽवैधधिया तावद् द्विधाभेदः कृतोऽभवत् । ब्रूत "कच्चित् समादिष्टाः प्रभुणा यूयमीदृशम् ? ।।१३२।।
किम्वा दोषसमारोपो मिथ्याल्लाहे विधीयते ? । "येऽथ दोषसमारोपं मिथ्याऽल्लाहे प्रकुर्वते ।।१३३।।
पुनरुत्थापनायास्ते विदन्ति किं न वासरम् ? । अल्लाहस्तु दयी लोके, न परं दर्शयन्ति तु ।।१३४।।
लोकाः कृतज्ञतां तस्मायनेके (नाऽत्र संशयः) । "यस्यां चैवाऽप्यवस्थायां स्थितः स्यास्त्वं निशामयेः ।।१३५।।
वाचयित्वा यदप्यस्मात्, यच्च किंचिद् विचेष्टसे । सन्ततं तस्य द्रष्टारो भवामस्तद्रता यदा ।।१३६।।
यूयं तिष्ठथ, नाप्यत्र कणमात्रमपीति तत् । लघु वा गुरु वा तस्मात् धरित्र्यां खेषु वा स्थितम् ।।१३७।।
ह्नुतं तिष्ठति यद् वस्तु त्वत् प्रभोरखिलं किल । पुस्तके विशदे ह्यास्ते; "श्रूयतां, मित्रतान्तु ये ।।१३८।।
अल्लाहस्य गतास्तेषां न दुःखं न भयं तथा । "धारयन्ति भयं ये तु ये च कर्त्तव्यबुद्धयः ।।१३९।।
"शुभं वृत्तं पुनस्तेभ्यो लौकिकेऽपि हि जीवने । परस्मिन्नपि लोके च नाऽल्लाही वाग् भवेत् क्वचित् ।।१४०।।
विषयो व्यत्ययस्याऽत्र, साफल्यं सुमहत् त्विदम् । "क्षिपेत् त्वां नाऽथ कृच्छ्रेषु वागेषां, केवलाय च ।।१४१।।
अल्लाहाय भवत्यत्र प्रभुत्वं, स हि वर्त्तते । श्रोता तथा च विज्ञाता; "ज्ञायतां, व्योमवासिनः ।।१४२।।
धरित्रीवासिनो वा ये सर्वेऽल्लाहस्य चैव ते । अन्तरेण तु ये ऽल्लाहं प्रतिम्नोऽनुसरन्ति हि ।।१४३।।
अनुयान्ति कदर्थं ते कल्पनामनुयान्ति च । केवलेनानुमानेन सिद्धिमिच्छन्ति कर्मणाम् ।।१४४।।
"स एवासौ निशा सृष्टा येन यूयं यदा तथा । लभेध्वं किल विश्रामं, दिनं सृष्टं च येन यत् ।।१४५।।

CC-0. In Public Domain. Digitized by eGangotri

प्रकाशः किल दत्तः स्यात्, चिह्नान्यत्र समासते । तेभ्यो दत्तावधाना ये; [६८]वदन्तीत्थं जना हि यत् ॥१४६॥
"अल्लाहः कृतवानेकं निजं सूनुम्" स राजते । महिम्ना, सोऽनपेक्षश्च; धरित्र्यां खेपु किं च यत् ॥१४७॥
प्रभुस्तस्यास्त्यसावेव, प्रमाणं किं च नाऽपि तु । न यूयं विभृथेहास्य, यूयं तत् किन्नु जल्पथ ॥१४८॥
अल्लाहं विषयीकृत्य यन्न यूयं निबोधथ । [६९]मिथ्याऽल्लाहन्तु ये लोकाः, ब्रूहि तान् दूषयन्ति हि ॥१४९॥
फलवन्तो भविष्यन्ति न वै तेऽत्र कदाचन । [७०](भुञ्जन्तु) लौकिकानन्दं, परावृत्य ततो वयम् ॥१५०॥
भवामस्तदुपेया वै, ततोऽश्रद्धामदर्शयन् । यां हि ते, यातनास्वादं तत्प्रतीकाररूपतः ॥१५१॥
स्वादयिष्याम एवैतान्; [७१]निशाम्यन्तां सवाचनम् । आख्यान नाहुपञ्चैतान् स्वबन्धून् सोऽवदद् यदा ॥१५२॥
ज्ञातयो मम ! युष्माभिरुपस्थानं तु मे यदि । आल्लाहैः पुनरायातैः मया वश्च प्रबोधनम् ॥१५३॥
असह्यं स्यात् तदाऽस्त्येव ह्याश्रयो मे तु स प्रभुः । कर्त्तव्ये मतिराधेया युष्माभिस्त्वात्मनः समम् ॥१५४॥
तैः सहायै हि युष्माकं, न तिष्ठेत् संशयात्मता । स्वकर्त्तव्ये च युष्माकम्, वर्त्तनं क्रियतां ततः ॥१५५॥
मया सार्धं यथाकामम्, नावकाशञ्च दत्त माम् । [७२]पराङ्आस्यंकृतं स्याच्चेद् युष्माभिः(किंततोऽपिच)॥१५६॥
याचिता न मया यूयं फलं किंचित् त्वभूत वै । आल्लाहं वर्त्तते क्षेत्रं फलचिन्ता तु मामकी ॥१५७॥
भवाम्येष समादिष्टः समाविष्टो हि खल्वहम् । स्थितः स्यां तेपु ये ह्यत्र लोका आत्मार्पका किल ॥१५८॥
[७३]मिथ्यापयितवन्तस्ते परं तं, तदनन्तरम् । अरक्षाम वयं लोकान् समं तेन तरिस्थितान् ॥१५९॥
राजप्रतिनिधींश्चैव तानेवाकुर्म, चेतरान् । न्यषेधन् येऽस्मदायातान् न्यमज्जयाम तांस्तु वै ॥१६०॥
दृश्यतां तत् फलं कीदृग् विन्नं तैर्ये तु वोधिताः । [७४]ज्ञातिषु प्रेषितास्तेषां तदूर्ध्वं वाग्वरास्ततः ॥१६१॥
विशदैर्लक्ष्मभिश्चैते निजज्ञातीरुपस्थिताः । तेन सिद्धाः परं जाताः श्रद्धातुं तत्तु यत् पुरा ॥१६२॥
न्यषेधंस्ते, तदित्थं हि सीमोल्लंघनकारिणाम् । मुद्रयामो वयं हृन्दि; [७५]ततस्तेषामनन्तरम् ॥१६३॥
हारदूनञ्च मूषञ्चाप्यस्मदीयै हि लक्ष्मभिः । प्रैषयाम वयं तावत् प्रिययौनान्तिके किल ॥१६४॥
तस्य सामन्तलोकानां अन्तिके पुनरेव च । अतिष्ठन् साभिमानास्ते, सापराधा हि ते जनाः ॥१६५॥
[७६]यदाविश्चाभवत् सत्यं तत्पुरस्ताद् दिशो हि नः । वक्तुमारेभिरे ते वै "मायैवैषा तु केवला" ॥१६६॥
[७७]मूष आह "किमेतद् वै ह्यधिसत्यं तु गद्यते । युष्माभिः पुरतो युष्मान् यदाऽदः समुपस्थितम् ॥१६७॥
किन्नु मायाऽस्ति काप्येषा, सकामा न हि यद्यपि । जायन्ते मायिनस्तावत् कर्हिचिच् चापि (खल्विह) ॥१६८॥
[७८]ते ऽवदन् "किमुपेतोऽसि च्यावनाय हि नस्ततः । पूर्वजान् स्वानपश्याम वयं यत्र प्रतिष्ठितान् ॥१६९॥
युवयोरुभयोर्भ्रात्रोः तथा चैवाभिवृद्धये ? । श्रद्धरा नो भविष्यामो युवयोस्तु वयं क्वचित् ॥१७०॥
[७९]प्रिययौनस्तदाऽवोचत् "कुशला ऐन्द्रिजालिकाः । येऽपि केऽपि समानीय ह्युपस्थाप्या ममाग्रतः ॥१७१॥
[८०]मायिषु समुपेतेषु मूपस्तानब्रवीत् तदा । क्षिप्यतामग्रतस्तावत् यत् क्षेप्तुं मनसीह वः ॥१७२॥
[८१]कृतक्षेपेषु तत् तेषु मूषस्तानब्रवीत् तदा । मायैवैषा तु युष्माभिर्यदप्यत्र पुरस्कृतम् ॥१७३॥
अपार्थं सर्वमल्लाहः सद्य एतत् करिष्यति । सिद्ध्युन्मुखानि कार्याणि रतानां दोषसारणे ॥१७४॥
नाशयत्येव सोऽल्लाहः, नैव कोऽप्यत्र संशयः । [८२]आत्मनो वाग्भिरल्लाहः सत्यं सत्यं प्रमाणयेत् ॥१७५॥
विरुद्धमतयस्तावद् भवेयुर्दुर्धियोऽपि चेत् । [८३]"संकटे पातयेयुर्मा" भयेनानेन कर्हिचित् ॥१७६॥
प्रिययौनस्तथाऽमुष्य सामन्ताः प्रविचिन्त्य हि । इतीत्थं श्रद्धरा जाता मूषे कतिचिदेव तु ॥१७७॥
ज्ञातीनां तस्य तद् वंश्याः, प्रिययौनो धरातले । उद्वृत्तो ऽप्रतिमो ऽतिष्ठत् न सन्देहोऽत्र कश्चन ॥१७८॥
स चाप्यन्यतमो ऽतिष्ठत् मर्यादाघातिनां ध्रुवम् । [८४]ततश्चैवाब्रवीन्मूषः "ज्ञातयो मम ! यद्यथ ॥१७९॥
श्रद्धरा यूयमल्लाहे, यूयमात्मार्पका यदि । विश्वासस्तस्य कर्त्तव्यो युष्माभिस्तत् (स्थिरात्मना)॥१८०॥
[८५]अवोचंस्ते "कृतोऽस्माभिर्विश्वासो ऽल्लाह एव तु । उपादेहि प्रभो ! नास्मान् जाल्मेभ्यो निकषाय तु ॥१८१॥
[८६]मोचयास्मान् जनेभ्यश्च श्रद्धराः सन्ति नैव ये । स्वीयया दयया तावत्; [८७]प्रैरयाम वयन्तथा ॥१८२॥
मूषं तद्भ्रातरं चैव यत्तौ मिश्रे गृहान् पुनः । वासार्थंस्वीयलोकेभ्यः कारयेतां हि कांश्चन ॥१८३॥
प्रार्थनास्थानतां चैतान् नयेतां कुरुतामथो । पूजां प्रतिष्ठितां किं च प्रेषयेतां पुनस्तथा ॥१८४॥
श्रद्धरेभ्यः शुभं वृत्तम्; [८८]पुनर्मूषस्तथाऽवदत् । प्रभो नः ! प्रिययौनाय तत्सामन्तगणाय च ॥१८५॥

CC-0. In Public Domain. Digitized by eGangotri

लौकिके जीवने दत्ता त्वया शोभा च वैभवम् । प्रभो नः ! तदिदं कृत्वा यत्ते तावत् पथस्तव ॥१८६॥
परिभ्रष्टा भवेयुर्वै; प्रभो नः ! त्वं हि संहर । तदीयान् विभवान् सर्वान्, हृन्दि तेषां तथैव च ॥१८७॥
जड़याऽपि यथा नैते श्रद्दधत्वेव सर्वथा । यथैते किं च पश्येयुर्यातनां महतीमपि ॥१८८॥
[89]अवोचत् "स्वीकृता जाता प्रार्थना युवयोर्द्वयोः । तिष्ठतं सुस्थिरौ, यातं मार्गं तेषां युवां न च ॥१८९॥
येऽनभिज्ञा जनाः सन्ति; [90]वयञ्च तदनन्तरम् । वनिन ईश्वरालीनान् पारे सिन्धुमकार्ष्म हि ॥१९०॥
सेनया निजया सार्धं प्रिययौनोऽन्वयाच् च तान् । तेषु पापधिया शक्त्यां तथात्याचरितुं पुनः ॥१९१॥
एतस्मिन्नेव जातोऽसौ यदैव मज्जनोन्मुखः । चक्रन्द "श्रद्दधाम्येष नान्यस्त्वीड्योऽन्तरेण तम् ॥१९२॥
सश्रद्धा वर्त्तते यत्र हीश्वरालीनसन्ततिः । आत्मार्पकेषु जातोऽहं त्वित ऊर्ध्वं तथैव च ॥१९३॥
[91]साम्प्रतं किम् ! अतिष्ठस्त्वं प्रागितः (सर्वदैव तु । सावज्ञः, त्वमभूश्चैकस्तेषां ये पापकारिणः ? ॥१९४॥
[92]रक्षिष्यामोऽद्य ते देहं प्रेतं येन तवायतिः । प्रमाणं तत्र विन्देत, वर्त्तते नाऽत्र संशयः ॥१९५॥
अनेके ऽस्मत् प्रमाणानां तिष्ठन्त्यज्ञा हि पुरुषाः । [93]ईश्वरालीनसन्तत्यै वासोऽदायि हि सूत्तमः ॥१९६॥
उत्तमाश्चैव संभारास्तेभ्यो ऽस्माभिरदायि च । विभेदं कृतवत्यस्ताः परन्तूर्ध्वं यदा हि ताः ॥१९७॥
प्राप्तवत्योऽभवन् ज्ञानं, प्रभुस्ते नाऽत्र संशयः । निर्णयाहे समायाते न्यायं तावत् करिष्यति ॥१९८॥
तास्वाधिकृत्य तद् वस्तु तासां यत्राऽऽस्त भेदधीः । [94]संशयो मानसे ते चेत् अधिकृत्य तु तद् भवेत् ॥१९९॥
काशितं तावदस्माभिर्यदस्ति त्वयि पृच्छ तत् । तान् जनान् ये पठन्तीह शास्त्रं त्वत्तोऽपि पूर्वतः ॥२००॥
वस्तुतस्त्वत् प्रभोः सत्यं त्वामुपेतं हि वर्त्तते । मास्म भूः सन्दिहानानां त्वमप्यन्यतमस्ततः ॥२०१॥
[95]नो भूयाश्चैव त्वं तेषां ये तु मिथ्यापयन्ति हि । अल्लाहस्य किलायातान् अन्यथा त्वं भविष्यसि ॥२०२॥
ग्रस्यन्ते येऽत्र तेषां हि व्यर्द्धिभिः (सततं बत) । [96]प्रभोस्ते कथनं येषु जातमस्ति प्रमाणितम् ॥२०३॥
श्रद्धास्यन्ति न ते किंचित्; [97]तत्समक्षं भवेदपि । प्रमाणं यदि चैकैकम् यावत् कालं न यातनाम् ॥२०४॥
कष्टदां ते ऽभिवीक्षन्ते; [98]भवेद् दैव ! न किं यदि । ज्ञातिभ्यो यवनाशस्य व्यतिरिक्तोऽपि कश्चन ॥२०५॥
गणो भूतो भवेदत्र श्रद्दधानस्तथैव च । श्रद्धा कर्मापि निर्वृत्तं भवेद् यस्य हिताय च ॥२०६॥
श्रद्धरास्ते यदा जातास्तेषां लौकिक जीवने । पटाक्षेपः कृतो ऽस्माभिर्यातनास्वीर्मकृत्सु वै ॥२०७॥
कञ्चित् कालावधिं यावत् तेभ्यो दत्तं सुखं तथा । [99]ऐषिष्यच् चेत् प्रभुस्ते तत् धरित्र्यां येऽपि मानवाः ॥२०८॥
श्रद्धरास्तेऽभविष्यन् हि समे चाऽपि, ततो नु किम् । निर्वन्धाद् विवशीकर्त्तुं ह्युद्यतस्त्वं भविष्यसि ॥२०९॥
लोकान् यत्ते किल श्रद्धां जनयेयुर्निजात्मनि ? । [100]सामर्थ्यं कुत्र लोकेषु यदल्लाहस्य शासनाद् ॥२१०॥
विनैव श्रद्धरास्ते स्युः, न चेष्टन्ते तु ये धिया । संवृणोति स तान् लोकान् मलस्यावरणेन वै ॥२११॥
[101]ब्रूहि "पश्यत किं तत्र धरित्र्यामथ खेषु च । अप्रयोजनमेवाऽस्ति परं यः श्रद्धरो न हि ॥२१२॥
तस्मै लक्ष्माणि सर्वाणि सर्वाश्चैव विभीषिकाः । [102]प्रतीक्षन्त इमेऽन्यत् किं भूतपूर्वनृणामितः ॥२१३॥
समान् दुर्दिवसांस्त्यक्त्वा ? वदाऽस्त्वत्र प्रतीक्ष्यताम् । प्रतीक्षे चाऽप्यहं सार्धं युष्माभिः (साम्प्रतं ध्रुवम्) ॥२१४॥
[103]वाग्घरांश्चाऽथ तान् लोकान् श्रद्दधाना भवन्ति ये । वयं त्रायामहे पश्चात्, पूर्वाचारोऽयमेव हि ॥२१५॥
श्रद्धराणां परित्राणस्त्वात्मोढ़ो भार एष नः । [104]ब्रूहि 'लोकाः ! भवेच् चेद् वो विचिकित्सा ममाऽयने ॥२१६॥
(ज्ञायतां) खलु नैवेडे यूयमल्लाहतः पृथक् । यमोडिध्वे, परन्त्वीडे तमल्लाहमहं हि यः ॥२१७॥
लेलिह्यते समग्रान् वः, समादिष्टों भवाम्यहम् । "श्रद्धरेषु हि तिष्ठेयं तावदेकान्ततः किल ॥२१८॥
[105]छित्वा किं चाऽपि सम्बन्धान् दिग्भ्यः सर्वाभ्य एव तु । वृत्तिमेकान्ततः कुर्यां स्वकीयां स्वायनं प्रति ॥२१९॥
स्यां कदाचिन्न चाऽप्येष प्रतिम्नां तस्य कश्चन । [106]नान्यमाह्वय चाऽल्लाहादितरं कञ्चनाऽपि तु ॥२२०॥
लाभं कर्त्तुं समर्थो यो समर्थो नाऽपि हानये । त्वं भविष्यसि जाल्मानां तावदन्यतमो यदि ॥२२१॥
इदं रूपाणि कार्याणि पुनरप्याचरिष्यसि । [107]दुःखापन्नं तु चेत् कुर्यात् त्वामल्लाहस्ततो विना ॥२२२॥
तस्माद् वारयिता नान्यः, इच्छेद् भद्रं च ते यदि । अनुग्रहं तदस्येत्थं को नु तावद् विचालयेत् ? ॥२२३॥
वंन्धकानां निजानां स यं हि कामयते, स तम् । प्रापयत्येव खल्वेतम्, दयालुः स महाक्षमी ? ॥२२४॥

CC-0. In Public Domain. Digitized by eGangotri

[108]ब्रूहि "लोकाः ! उपेतं वो युष्मदीशस्य पार्श्वतः । सत्यम्; तद् यः पथो यायी प्रगुणस्य हि वर्त्तते ॥२२५॥
स्वात्मने ह्येव तत् सर्वं, पथो भ्रान्तस्तु यो भवेत् । तस्य सर्वोऽशुभोदर्कश्चापि तस्य निजात्मने ॥२२६॥
न चाऽहं कोऽपि युष्मासु रक्षितेति भवामि च । [109]काश्यमानं यदप्यस्ति त्वयि त्वं तदनु व्रज ॥२२७॥
आन्यायं च तथा ऽऽल्लाहं धृत्या कर्म समाचर । अद्वितीयः स निर्णेता निर्णेतॄणां मतः किल ॥२२८॥

योगः—२२८

CC-0. In Public Domain. Digitized by eGangotri

११

सूक्तम्—सूदः

(हूद)

(महाकालेऽवतीर्णास्त्रयोविंशतिरधिकैकशतमायाताः)

सांल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ०लाम०रा० एतच् छास्त्रं यस्य किलायताः । परिपूर्णाः, प्रपञ्चेन वर्णिता अथ सन्ति च ॥ १ ॥
(इदं तावत्) तथैकस्मात् (प्रवृत्तं) सुधियोऽथ च । विज्ञातुश्च; [२]न यद् यूयमल्लाहमन्तरेण तु ॥ २ ॥
ईडिध्वं कञ्चनाऽप्यन्यम्, चेतकः शुभसूचकः । भवाम्येष हि युष्मासु तस्य कामादहं किल ॥ ३ ॥
[३]याचध्वं किञ्च तद् यूयं क्षमां युष्मत् प्रभुं तथा । तमेव च निवर्त्तध्वम्, स युष्मभ्यं प्रदास्यति ॥ ४ ॥
लौकिके जीवने सौख्यं कालस्याऽऽनियतावधिम् । सौदार्याय तथौदार्यं स पुनर्वितरिष्यति ॥ ५ ॥
पराङ्आस्याः पुनर्भूत्वा यदि यूयं हि तिष्टथ । पतितेति ध्रुवं शंके यातनानां भयं किल ॥ ६ ॥
वासरस्यातिरौद्रस्य युष्मास्वेकस्य चाऽप्यहम् । [४]स एवाऽभ्युपगन्तव्यो युष्माकं वर्त्तते प्रभुः ॥ ७ ॥
सर्वसामर्थ्यभृत् चासौ; [५]पश्यतैते निजानि तु । निवर्त्तयन्ति वै तस्मात् उरांसि, बुध्यतां ततः ॥ ८ ॥
आत्मानमात्मनो वस्त्रैः संवृण्वन्ति यदा हि ते । संवृतं विवृतं किम्वा यदप्येते प्रकुर्वते ॥ ९ ॥
वेत्ति सर्वं किला ऽल्लाहः, उरस्थं चापि वेत्त्यसौ ।

इति एकादशं पारायणम्

अथ द्वादशं पारायणम्

[६]न जीवः कश्चिदप्युर्व्यां तादृशो वसतीह तु ॥१०॥
आश्रितो जीविकार्यै नो योऽल्लाहे कर्हिचिद् भवेत् । आवासान् स हि जानाति सर्वेषामाशयांस्तथा ॥११॥
विशदं पुस्तके सर्वं तावदेतत्तु वर्त्तते । [७]स एवाऽसौ धरित्रीं यस्तथा चैव विहायसः— ॥१२॥
असृजत् षडहे, किञ्च स आसिष्ट जलाऽऽसनः । परीक्षेत यथा कृत्या युष्माकं कोऽस्त्यनुत्तमः ॥१३॥
अथेदं त्वं वदेश्चेद् भोः ! "मरणाद् यूयमुत्तरम् । नेष्यथोद्बोधन सत्यं," जाल्माः प्रतिवदन्ति हि— ॥१४॥
"नेदमन्यत्, भवत्येषा मायैव विशदा किल" । [८]अथ चेद् यातनास्तेभ्यो भवन्ति प्रविलम्बिताः — ॥१५॥
समयस्यावधिं यावदस्माभिस्ते ततो ध्रुवम् । आरप्स्यन्तेऽनुयोक्तुं हि "किं तत्तासां निरोधनम् ? ॥१६॥
श्रूयताम्—आपतिष्यन्ति यदैव तेषु यातनाः । ता विलम्बयितुं नैव शक्ष्यन्ते तु कथञ्चन ॥१७॥
यदाश्रित्य प्रवृत्तञ्च तेषां हासस्तदेव च । पर्यावृत्तान् पुनः सर्वान् तानशेषान् विधास्यति ॥१८॥
[९]कारयित्वा रसास्वादं मनुष्यं चेद् वयं ततः । दयाया आत्मनस्तस्मादपाकर्षं विदध्महे — ॥१९॥
अकृतज्ञो निराशश्च तदासावुपजायते । [१०]कष्टापन्नं जनं स्वादं लम्भयामोऽथ चेद् वयम् ॥२०॥
स्वप्रसादस्य, वक्त्येष "छिन्नं कष्टं हि मेऽखिलम् । उत्सिक्तो जायते चैष तथा चात्म-विकत्थनः— ॥२१॥
[११]तान् विहाय तु वै लोकान् सन्तुष्टा ये समासते । अनुकूलानि कर्माणि कुर्वते चैत एव ते— ॥२२॥

CC-0. In Public Domain. Digitized by eGangotri

क्षमा येभ्यस्तथा येभ्यः पुरस्कारो महानपि । [१२](वुध्यताम्), न घटेच् चैतत्, त्वमकस्मात्तु यत् त्यजेः ॥२३॥
कञ्चनांशं किलैतस्मात् यद्धि तुभ्यं प्रकाश्यते । मा स्म भूश्च हृदोद्विग्नो यदीमे प्रवदन्ति तु ॥२४॥
"कोषोऽनेन समं केन धनस्य नावतारितः । सहायः कोऽपि देवो वा प्रेषितः केन नो समम्" ॥२५॥
चेतकः केवलस्त्वन्तु तिष्ठस्यत्र, समेऽथ च । प्रपञ्चे वर्त्तते ऽल्लाहः साधिकारो हि केवलः ॥२६॥
[१३]भणन्तीमेऽथ किं वैतत् "स्वयं सोऽघटयत्त्विदम्" । ब्रूहितान् "अस्तु, तद् यूयं सूक्तान्येवंविधानि हि ॥२७॥
दशाथाहरताऽस्माकं पुरस्ताद् घटितानि वै । शक्नुथाऽऽह्वातुमन्यं चेत् तमप्याह्वयतेह च ॥२८॥
अल्लाहमन्तरेणान्यं, सत्ये यूयं स्थिता यदि । [१४]नानुतिष्ठन्ति ते वाक्यं यदि तं तन्निबोध च ॥२९॥
ज्ञानपूर्वकमल्लाहादिदं तावदवातरत् । नान्तरेण हि तं चेड्यः कश्चनान्योऽत्र वर्त्तते ॥३०॥
आत्मार्पकेषु किन्न्वेके यूयं भवथ साम्प्रतम् ? । [१५]कमना लौकिकस्यास्य जीवनस्य तु ये जनाः ॥३१॥
समृद्धेश्चापि तत्तेभ्यः कृतानां हि पुरस्क्रिया । अस्माभिर्दीयतेऽत्रैव नाऽनयः क्रियतेऽथ च ॥३२॥
कारणात् तत् कृतानान्तु; [१६]तदेते ह्येव ते जनाः । विहायाग्निं किमप्यस्ति न येभ्यस्तु परत्र वै ॥३३॥
अभून् मोघं समं येषां तथाऽत्र विहितं किल । यच् च किंचित् कृतं तेषां निष्फलं तद्धि तिष्ठति ॥३४॥
[१७]किन्न्वसौ यस्य विश्वासः प्रमाणे तत् प्रभोर्भवेत् । विशदेऽथ च साक्ष्येकः ततः स्यात् समुपागतः ॥३५॥
प्रागितः पुस्तकं मौषं भवेच्चैवाऽप्युपस्थितम् । नेतृत्वस्य दयायाश्च साक्षाद्रूप-धरं यथा— ॥३६॥
(अन्यैरर्हतिसादृश्यम् ?) ईदृक्षास्तु जना इह । जायन्ते श्रद्धराः, यस्तु गणानां कोऽप्यथो जनः— ॥३७॥
प्रतिषेधेदिदं तस्मै निश्चितं धाम वर्त्तते । तदेव नारकाग्निर्यः, त्वयाऽतो नात्र कश्चन— ॥३८॥
सन्देहः खलु कर्त्तव्यः, सत्यमेतत् तव प्रभोः । उपेतं, न परं लोका अत्र श्रद्दधतेऽधिकाः ॥३९॥
[१८]असत्यं चिन्तयेद् यश्चाप्यल्लाहविषये ततः । जाल्मोऽन्यः को भवेल्लोकः, समक्षं स्वप्रभोश्च ते— ॥४०॥
उपस्थिता करिष्यन्ते वक्ष्यन्त्येवञ्च साक्षिणः । एत एव जनास्ते वै स्वप्रभोर्विषये तु यैः— ॥४१॥
असत्यं चिन्तितं ह्यासीत् अल्लाहस्यास्ति धिक्कृतिः । तेषु येऽत्रं जना जाल्माः; [१९]येऽवरुन्धन्त्यथो पथः ॥४२॥
अल्लाहस्य, तथाऽरालं कर्त्तुमिच्छन्ति तञ्च ये । निश्चितं खल्विमे लोकाः परलोक-निषेधकाः ॥४३॥
[२०]पृथिव्यामीदृशा लोका नैव शक्ष्यन्ति रक्षितुम् । आत्मनो, न विनाऽल्लाहं तेषामत्र च कश्चन— ॥४४॥
रक्षिता मित्रमप्यस्ति, नाऽशकंस्ते तु सर्वथा । श्रोतुं नाऽथ पुन र्द्रष्टुं तेऽशकन्; [२१]एत एव ते ॥४५॥
आत्मनैव य आत्मानं अकुर्वन् हानि-भाजनम् । कल्पनाश्च समा येषामकल्पन्त न सिद्धये ॥४६॥
[२२]परत्रैते भविष्यन्ति हानिभाजः सुनिश्चितम् । अतिरिच्याखिलान् लोकान्; [२३]संशयो नाऽत्र कश्चन ॥४७॥
श्रद्धरा येऽभवन् ये च भद्रकार्याण्युपासत । स्वप्रभुं समया ये च विनयं खल्वधारयन्— ॥४८॥
ईदृशा एव ते लोका ये हि स्वर्गाधिकारिणः । किञ्च स्थास्यन्ति तत्रैव सर्वकालञ्च ते जनाः ॥४९॥
[२४]भवतीदृशमौपम्यं गणयोरुभयोरपि । यथैको वधिरोऽचक्षुर्द्रष्टान्यः सश्रवस्तथा ॥५०॥
दशासाम्यं नु संभाव्यं कच्चिदस्त्युभयोर्द्वयोः ? । चिन्त्यते किन्न युष्माभिः ? [२५]नहुषः प्रेषितोऽभवत् ॥५१॥
ज्ञातिष्वस्माभिरेतस्य (तदासौ प्राह चैव तान्—) । "विशुद्धश्चेतकस्तावद् युष्मदर्थं भवाम्यहम्— ॥५२॥
[२६]तदेतद्-यूयमल्लाहाद्भिन्नान्यं न स्तुवीत भोः । विभेम्यह्नोऽहमेकस्मात् दुःखदा यातना यदा— ॥५३॥
पातोन्मुखा हि युष्मासु तिष्ठत्येका (सुनिश्चितम्) । [२७]तस्य श्रद्धाविहीनानां जनानां ये गणाधिपाः— ॥५४॥
अब्रुवंस्ते तदा—"ऽस्माकं मतेन त्वं यथा वयम् । मत्यस्तिथैव मर्त्यो हि केवलं भवसि ध्रुवम् ॥५५॥
अथैतच्चापि पश्यामो य एते क्षुद्रपूरुषाः । त एवाऽस्मासु सम्मूढा अन्वितास्त्वां भवन्ति च ॥५६॥
न चाऽथ त्वयि पश्यामोऽस्मदौपम्याद् गुणोत्तरम् । वैपरीत्येन पश्यामस्त्वामसत्यावलम्बिनम् ॥५७॥
[२८]सोऽवदत्—"ज्ञातयो मे भोः! चिन्त्यतां तु मनागिदम् । यद्यहं स्व-प्रभोरस्मि लक्ष्मसु प्रत्ययं गतः ॥५८॥
यद्यसावात्मनो मे च दयां प्रादात्, ततश्च ताम् । युष्मत् सुगोपितां कृत्वा न्यधात् इष्टं न चेद् भवेत् ॥५९॥
युष्माकं, किं वयं युष्मान् पारयिष्याम एव हि । तदर्थं विवशीकर्त्तुम्"?; [२९]अथाऽपि ज्ञातयो मम ! ॥६०॥
न चाऽपेक्षे पुरस्कारमतो युष्मच्च किञ्चन । पुरस्कारस्य दाता तु केवलोऽल्लाह एव मे ॥६१॥
न तेषां चाऽस्मि दुष्कर्त्ता श्रद्दधानास्तु सन्ति ये । स्वं प्रभुं ते हि संगन्तुं तत्पराः सत्यमासते ॥६२॥

CC-0. In Public Domain. Digitized by eGangotri

परं युष्मान् विलोकेऽहं सर्वथा ऽज्ञान आरतान् । [३०]ज्ञातयो मम ! चैवाऽथ यद्यपाकरवाण्यहम् ।।६३।।
तांस्ततो ऽल्लाहसाम्यः कः साह्यं मे तु करिष्यति ? । चिन्ताया विषयं त्वेतत् किन्न यूयं करिष्यथ ? ।।६४।।
[३१]नाऽथ युष्मान् वदाम्येतत् "निधानं यदहं ध्रिये । अल्लाहस्य", तथा "वेद्मि यत् परोक्षस्य वर्त्तनम् ।।६५।।
न चाऽहं वच्मि देवोऽस्मि', जानीथ यांश्च तुच्छकान् । तानधिकृत्य नो वच्मि "यदल्लाहो हि तान् प्रति ।।६६।।
किं च नाऽपि तु वै भद्रं कथंचिन्न करिष्यति" । निविष्टं हृत्सु यत्तेषां तस्याल्लाहः सुवित् किल ।।६७।।
पाप्मनां हि भविष्यामि (वक्ष्यामीत्थं यदि क्वचित्) । [३२]ते ऽवदन् "नहुष ! अस्माभिस्त्वया तु व्युदितं किल ।।६८।।
व्युदितञ्च मनोहृत्य, साम्प्रतं तदुपानय । अजस्रभर्त्सिता येन वयं, सत्यं श्रितोऽसि चेत् ।।६९।।
[३३]अवोचत् "तत्तु युष्मासु केवलोऽल्लाह एव सः । उपानेष्यति चेत् तस्य कामनाऽस्य भविष्यति ।।७०।।
न तस्मात् त्रातुमात्मानं परं यूयन्तु शक्ष्यथ । [३४]अल्लाहो हि पथभ्रान्तान् युष्मान् कर्त्तुं यदीच्छति ।।७१।।
भद्रे तु कामिते चाऽपि युष्माकं हि मया न वै । युष्माकं भविता भद्रं सतीष्टेऽपि शिवे मया ।।७२।।
असावेव प्रभुर्वस्तु, प्राप्यो निवृत्य चैव सः । [३५]वदन्तीमे नु किम् तावदिदं सोऽघटयत् स्वयम्— ।।७३।।
ब्रूहि तान्—आत्मनेदं चेन्मयाऽस्ते घटितं हि तत् । तिष्ठाम्युत्तरदायी तत् स्वापराधात् किलात्मना ।।७४।।
अपराध्यथ यूयं तु यत्र मुक्तोऽस्म्यहं ततः । [३६]नहुषे काशितञ्चाभूदिदं "यत्तव बन्धुषु— ।।७५।।
श्रद्धरा ये ऽभवन् सर्वान् तान् विहाय भविष्यति । नेतरः श्रद्धरः कोऽपि, तेन जल्पन्ति यद्धि ते— ।।७६।।
विषादस्तत्र नो कार्यस्त्वया; [३७]अस्माकं च पश्यताम् । अनुप्रेरणमस्माकं प्लवञ्चैकं विधत्त भोः ! ।।७७।।
मा स्म किञ्चिद् वदो मे च समक्षं पाप्मनो जनान् । अधिकृत्य, निमग्नास्ते भविष्यन्त्येव निश्चितम् ।।७८।।
[३८]अथासौ रचनाऽऽरम्भं प्लवस्याऽकृत, तस्य च । ज्ञातिमुख्या यदाप्येनमपश्यन् मार्गयायिनः— ।।७९।।
अहसन् सततं तं वै, तदासौ प्रत्युवाच तान् । अहञ्चापि हसाम्येष युष्मान् यूयं यदीह माम्— ।।८०।।
हसथाविरतं तावत्, परीहासो यथैव वः । [३९]कोऽह्यसौ यातना यस्मिन्नसौ चैवापतिष्यति— ।।८१।।
तमुद्विग्नं तथा चासौ पुनरेव विधास्यति । शाश्वती यातना यञ्च तथैवाकुलयिष्यति— ।।८२।।
तमेनं किल भोत्स्यध्वेऽचिराद् यूयम (संशयम्) । [४०]यदाऽदेशस्तथाऽस्माकं बभूव समुपस्थितः— ।।८३।।
उखाया अथ तस्याश्च जलोद्गः काशतां गतः । तदाऽवोचाम—"तस्यां हि प्रतिजाति युगैककम्— ।।८४।।
आरोहयत गृह्यांश्च स्वकीयान् तं विहाय हि । विषये यस्य खल्वाज्ञा विशदा प्रागजायत ।।८५।।
स चासौ श्रद्धानो यः कोऽप्यभूद् गृह्यतां हि सः । क्षुद्रसंख्या हि ते त्वासन् तत्समं श्रद्धरास्तु ये ।।८६।।
[४१]अथासावब्रवीत् "एनां यूयं सर्वेऽधितिष्ठत । भवेदल्लाहनाम्नैव रोधोऽस्या गतिरप्यथ" ।।८७।।
क्षमाशीलो दयालुश्च प्रभुर्मे नाऽत्र संशयः । [४२]प्लवनञ्च समारन्धं तदाऽऽदाय समान् हि तान् ।।८८।।
पर्वतोत्तुंगभंगेषु तरंगेष्वथ चाह्वयत् । स्वसूनुं नहुषस्तस्मादास्त यो हि पृथग् गतः ।।८९।।
"एहि पुत्रक मे ! ऽस्माभिरारोह त्वं पुनस्तथा । तिष्ठ मैव हि तत्संगे श्रद्विहीना हि ये जनाः" ।।९०।।
[४३]स आह "याम्यहं त्वद्रिं शरणाय हि कञ्चन । स वै त्रास्यति मामद्भ्यः", प्रत्युवाद (ततः स तम्) ।।९१।।
अद्य कश्चित् परित्राताऽल्लाहादेशान्न तिष्ठति । विहाय तं पुमांसं तु यमेष दयते किल ।।९२।।
एतस्मिन्नन्तरे वीचिस्तयोरन्तः समुत्थिता । मज्जनोन्मुखलोकानां स चाप्यन्यतमो ऽभवत् ।।९३।।
[४४]घोषितञ्चेदमासीत् "त्वं धरे ! ऽपो निगिर स्वकाः । व्योम ! संस्तम्भयात्मानं, ततोऽपो विविशुर्धराम् ।।९४।।
चरितार्थः कृतश्चैवं समादेशो बभूव ह । तथाऽसौ संगता जाता जुड़िना पर्वतेन च ।।९५।।
घोषितञ्चाऽभवत् "जाल्माः सुदूरं ह्यपयन्तु ते" । [४५]आह्वयन् नहुषश्चैव स्वं प्रभुं तदनन्तरम् ।।९६।।
प्राह चैव "प्रभो ! सूनुर्ममायं गृह्यकेषु मे । निश्चितं ते प्रतिज्ञातं सत्यं तिष्ठति किं च (भोः !) ।।९७।।
वर्त्तसे न्यायिनामेष निर्णेतॄणां परे स्थितः । [४६]आह—"हे नहुषासौ तु गृह्यकानां न कोऽपि ते ।।९८।।
गर्हितस्य स वृत्तस्य, ततो मां वद तस्य नो । यस्य ज्ञानं हि ते नास्ति," त्वां तथा चानुशास्म्यहम् ।।९९।।
"त्वमज्ञानां जनानां भोः ! कदाचित् किल मा भवः" । [४७]असावाह—प्रभो मे ! ऽहं पाप्मनस्तस्य कारणात् ।।१००।।
अज्ञानयाचनाहेतोर्जाताद् याचे हि (साम्प्रतम्) । शरणं ते, ऽथ चेन्न त्वं क्षंस्यसे न दयिष्यसे— ।।१०१।।
मां ततोऽहं भविष्यामि नष्टानां हि नृणां (बत) । [४८]औच्यत नहुषा ! ऽद्रिं त्वं याह्यधः सार्धमेव नः ।।१०२।।

CC-0. In Public Domain. Digitized by eGangotri

शमेन तुभ्यमाशीर्भिः गणेभ्यस्तेभ्य एव च । त्वत् सार्थैर्जायमानेभ्यः, गणास्तत्रेदृशा अपि— ॥१०३॥
वयं येभ्यः प्रदास्यामः सौख्यं दीर्घायुषे, पुनः । यातना दुःखदा तेषु किलाऽस्मत् चापतिष्यति ॥१०४॥
[४९]परोक्षं वृत्तमेतद् यद् वेशयामो वयं त्वयि । (मोहम्मद !) त्वमज्ञासी र्न वा ते ज्ञातयः पुरा ॥१०५॥
धैर्यमेहि ततो, येऽत्र मन्यमानाः स्थिता भयम् । हन्त ! तेभ्यः शुभोदर्कः निश्चयेन भविष्यति ॥१०६॥
[५०]गणञ्चादं प्रतिभ्राता तेषां सूदोप्यसार्यत । सोऽवदत् ज्ञातयो मे भोः! पूज्योऽल्लाहो हि वो भवेत् ॥१०७॥
नान्तरेण तु तं पूज्यः कश्चनान्योऽत्र वर्त्तते । असत्यस्य हि यूयन्तु घटकाः केवलं स्थिताः ॥१०८॥
[५१]ज्ञातयो मम ! याचेऽहं युष्मान्नातः पुरस्क्रियाम् । योऽसृजन्मां स एवाऽस्तु फलाय मम सोत्सुकः ॥१०९॥
ततो यूयं न चेष्टध्वे कथं बुद्ध्या समीरिताः । [५२]ज्ञातयो मम ! यूयञ्च स्वं प्रभुं याचत क्षमाम् ॥११०॥
परावृत्य ततश्चोर्ध्वं तमुपेताम्बरं स वै । वर्षयिष्यति वैपुल्याद् युष्मासु खल्वनारतम् ॥१११॥
बलेनाऽथ च युष्माकं स बलं वर्द्धयिष्यति । सापराधा न वै यूयं निजं वक्त्रं परास्यत ॥११२॥
[५३]ते ऽवदन् "सूद ! चिह्नैस्त्वं विशदैर्नोपयासि नः । कैश्चिदप्यथ नो त्याज्याः पूज्या देवा भवन्ति च ॥११३॥
अस्माभिः केवलामुक्ति तवाधृत्य कथञ्चन । नहीष्टं वर्त्ततेऽस्माकं तत्तु यत् त्वं प्रपद्यसे ॥११४॥
[५४]इदमेव वयं वच्मो दुष्प्रभावो हि यत् त्वयि । कस्यचिन्मान्यदेवानामस्माकं पतितो ध्रुवम् ॥११५॥
स आह "साक्षितामेष कुर्वे ऽल्लाहस्य खल्वहम् । साक्षिताऽऽस्ते च युष्माकं यद् विरक्तिर्हि मे ततः ॥११६॥
यमेनं प्रतिमानं वै तस्य यूयं विधत्थ (भोः !) । [५५]अन्तरेण तु तम्, यूयं प्रकटैरुपयात माम् ॥११७॥
नाऽथ देयोऽवकाशो मे; [५६]विश्वासं न्यस्तवानहम् । अल्लाहे यः प्रभुर्मे ऽपि युष्माकं चापि यः प्रभुः ॥११८॥
न कश्चित् तादृशो जन्तुः शिखा यस्य तु नो भवेत् । करेऽस्य, स प्रभुर्मेऽस्ति निश्चितं सरलाध्वगः ॥११९॥
[५७]परावृत्तं च युष्माभिर्मुखं चेत् क्रियतेऽधुना । दत्वा यत् प्रेषितो युष्मान् वितीर्णं तत्तु वो मया ॥१२०॥
स्थान आपादयेद् वश्च प्रभुर्मेऽथ गणान्तरम् । नैव क्षोभयितुं शक्तास्तञ्च यूयं कथञ्चन ॥१२१॥
असन्देहं प्रभुर्मेऽसौ सर्वदृश्वा हि वर्त्तते । [५८]यदाऽऽदेशस्तथा ऽस्माकं प्रवृत्तो हि बभूव च ॥१२२॥
अरक्षाम वयं सूदं श्रद्धरान् नॄंश्च तत्समम् । स्वीयया दयया सार्धं, ह्यरक्षाम तथैव च ॥१२३॥
यातनाभ्यः कठोराभ्यो जनांस्तानखिलान् किल । [५९]ईदृशा अभवन्नादाः, आयातान् ये न्यषेधयन् ॥१२४॥
स्वप्रभोश्चाप्यवाजानन् (प्रेषितान्) तस्य वाग्धरान् । सात्याचारान् शठान् ये च पुनरेवान्वयुस्तथा ॥१२५॥
[६०]भवेऽस्मिन् सकलंकास्ते पुनरुत्थापनाऽहनि । सकलंकाः पुनर्जाताः, श्रूयतां व्यश्वसन्न ते ॥१२६॥
स्वप्रभुं ये तु खल्वादाः, अपास्ताः, श्रूयतां, कृताः । ज्ञातयो नन्वतिष्ठन् ये सूदस्याऽऽदाः (हि तेऽखिलाः) ॥१२७॥
[६१]प्रैषयाम समुद्गांश्च प्रति तेषां हि वान्धवम् । शालेभं, सोऽवदत्तांश्च "ज्ञातयो मम हे जनाः ! ॥१२८॥
स्तुवीत यूयमल्लाहं, नेड्यः कश्चित् तु तं विना । धरायाः सोऽसृजद् युष्मान्, तत्रैवावासयत् पुनः ॥१२९॥
अर्थ्यतां स क्षमा, किं च निवर्त्तध्वं हि तं प्रति । प्रभुर्मे भवतीहाऽऽरात्, स्तवस्वीकरणो हि सः ॥१३०॥
[६२]तेऽवदन् "बन्धुशालेभ ! पूर्वमस्मादिहाऽभवः । अस्मासु, तद्विधो यत्र त्वस्मदाशाः सुकेन्द्रिताः ॥१३१॥
किन्नु वारयसीहास्मान् पूजायास्तस्य पूर्वजाः । पूजयन्तो यमातिष्ठन् अस्माकं, वर्त्तते हि वः ॥१३२॥
विपुला विचिकित्सा तु समाहूतिर्हि यत्र ते । [६३]सोऽवदत् "ज्ञातयो मे भोः ! चिन्त्यतामिदमत्र तु ॥१३३॥
स्वप्रभोः स्पष्टचिह्नेन समं वर्त्ते तु यद्यहम् । स्वीयया दयया सार्धं सम्भृतस्तेन चेत् कृतः ॥१३४॥
अवज्ञातो मयाऽऽसौ चेत् को मे साह्यं विधास्यति । स्थाने ऽल्लाहस्य भूत्वाऽथ न दातुं किं च शक्नुथ ॥१३५॥
मह्यं यूयमृते हानिम्; [६४]ज्ञातयो मम चैव भोः ! । उष्ट्रिका लक्ष्म युष्मभ्यं त्वेषाऽल्लाहस्य तिष्ठति ॥१३६॥
मुञ्चतैतामियं येन भूव्यल्लाहस्य जक्षितात् । कष्टदं पाणिना स्पर्शं न चास्यां कुरुत क्वचित् ॥१३७॥
अन्यथा यातना सद्यः युष्मान् पर्याक्रमिष्यति । [६५]परं तेऽघ्नन् हि तां जंघास्नायुकर्त्तनपूर्वकम् ॥१३८॥
ततोऽसौ प्राह—"मोदध्वं यूयमन्यद् दिनत्रयम् । तादृशी भर्त्सना चैषा कोऽपि मिथ्यापयेन्न याम् ॥१३९॥
[६६]यदाऽदेशस्तथाऽस्माकं प्रवृत्तो हि बभूव च । अरक्षिष्माऽपदस्तस्य दिनस्य दयया स्वया— ॥१४०॥
शालेभं तस्य लोकांश्च श्रद्दधानान् हि तत्समम् । बलाढ्यस्ते प्रभुः, स्वामी वर्त्तते च महाबलः ॥१४१॥
[६७]पर्यावृणोच्च चीत्कारो (भीषणो) जाल्मपूरुषान् । ते स्वकीयेषु वासेषु प्राऽणता इव चासत ॥१४२॥

CC-0. In Public Domain. Digitized by eGangotri

[६८](अनश्यंस्ते) यथा नैव तत्राऽवात्सुः कदाचन । श्रूयतां, श्रद् विहीनोऽसौ समुद्गः स्वप्रभौ(अतः—) ॥१४३॥
श्रूयतां, स समुद्गानां गणो दूरीकृतोऽभवत् । [६९]शुभं वृत्तं समादाय प्राप्नुवन्नथ वाग्घराः— ॥१४४॥
अब्रह्मं समया तावदस्माभिः, प्रेषिताः किल । तेऽवदन् 'स्वस्ति ते ह्यस्तु'; स आह 'स्वस्ति वै भवेत्' ॥१४५॥
अचिराद् भर्जितं चासौ वत्समेकमुपानयत् । [७०]अपश्यत्तु यदा तेषां करास्तं नोपयन्ति हि— ॥१४६॥
"अविज्ञाता इमे केऽपीत्यबुद्धाऽत्मनि चाऽविभेत् । तेऽवदन् "मा बिभीहि त्वम्; भवामः प्रेषिता वयम् ॥१४७॥
लूतलोकगणासन्नम्"; [७१]भार्यापार्श्वे स्थिताऽस्य च । साऽहसत् श्रावितं वृत्तं यदैव शुभ (जन्मनः) ॥१४८॥
इष्वासस्य ततोऽस्माभिः याप्यकूपस्य चैव तत् । [७२]सावदत् "मन्दभाग्याऽहं, कथम्मे सन्ततिर्भवेत् ॥१४९॥
स्वयं वृद्धा, पतिर्वृद्धो यदा मे चैष वर्त्तते । अमान्यं तावदाश्चर्यं मे स्थितं चक्षुषोः पुरः ॥१५०॥
[७३]तेऽवदन् "कथमाश्चर्यं तवाल्लाहस्य शासने ? । गृह्यकाः ! ननु सौभाग्यं दयाल्लाहस्य सा पुनः ॥१५१॥
युष्मासु वर्त्तते नाऽत्र सन्देहश्चैव कश्चन । सोऽधिकारी प्रशंसायाः, गौरवेण च सोऽन्वितः ॥१५२॥
[७४]यदाऽब्रह्माद् भयं यातं विन्नं वृत्तं तथा शुभम् । लूतपक्षमुपाश्रित्य (स इति) वादमस्माभिरुज्जगौ ॥१५३॥
[७५]क्षमावान् सुविनीतश्च हृदा चाऽतीव कोमलः । ईदृशो ऽब्रह्म आसीत् स निश्चितम्; [७६]चैवमौच्यत ॥१५४॥
अब्रह्म ! त्वं त्यजैनं, ते प्रभोरादेश आगतः । यातनाऽऽगन्तुकामैषु न हार्या या तु विद्यते ॥१५५॥
[७७]वाग्घरा अथ चास्माकं लूतमायन् यदा तदा । मुखेनाऽसावभून्म्लानस्तथा तेषां सुरक्षणे ॥१५६॥
शक्तिहीनं निजं मेने, क्रोशन्नेवमथाऽऽह च । "वासरो निष्ठुरो ह्येष पुरस्तान् मे ऽद्य तु स्थितः" ॥१५७॥
[७८]ज्ञातयस्तस्य धावन्त्यस्तमायन्, हि जना इमे । अभ्यस्तदुष्कृताऽऽरम्भा अतिष्ठन्; स उवाच तान् ॥१५८॥
"ज्ञातयो मम ! मे ह्येताः स्थिताः पुत्र्यः, इमाः पुनः । पावनास्सन्ति युष्मभ्यं सुतरां, तद् विभीत भोः ! ॥१५९॥
प्रभोर्यूयं, न मां चैषां कुरुताऽवमतं पुरः । ममाऽवेशिकलोकानां; न भद्रः किन्नु कोऽपि वः ? ॥१६०॥
[७९]तेऽवदन्—नांशभाजो वै भवामस्ते सुतासु तु । ईप्सितं यत्तथाऽस्माकं साधु तद् विदितञ्च ते ॥१६१॥
[८०]प्राह—भद्रं न किं स्याद्, चेद् बलं रोधाय वो मयि । स्यान्मया वाऽथ लब्धः स्यात् कस्यचिच्छक्त्युपाश्रयः ॥१६२॥
[८१](वाग्घरा)अवदन्—लूत! त्वत् प्रभोः प्रेषिता वयम् । सन्निधिं चापि ते कर्तुं न वै शक्ता इमे जनाः ॥१६३॥
समादाय निजान् लोकान् यस्मिन् कस्मिंश्चिदप्यथ । रात्रियामे प्रयायास्त्वं विहाय योषितं निजाम् ॥१६४॥
कश्चनाऽपि च युष्माकं न पश्चात् लोकतां नृणाम् । तदेवाऽऽपतिता कष्टं तस्यामापतितैषु यत् ॥१६५॥
निश्चितः समयश्चैषां प्रातः कालो हि विद्यते । प्रातः कालो न किं नेदः ?; [८२]प्रवृत्तोऽथ बभूव च ॥१६६॥
यदाऽऽदेशस्तथाऽस्माकं धूलिसाद् वसतिर्हि सा । कृताऽस्माभिः तथा तस्यां वर्षिता दृषदो मृदाम्— ॥१६७॥
[८३]यत्र दत्तानि चिन्हानि त्वत् प्रभोः पार्श्वतोऽभवन् । न चेयं विप्रकृष्टाऽऽस्ते जाल्मलोकात् कथञ्चन ॥१६८॥
[८४]प्रेषितोऽभूत् शुभेभश्च मदयानस्य सन्निधौ । ततोऽस्माभिः सनाभिर्यस्तस्य तावद् बभूव ह ॥१६९॥
सोऽब्रवीद्-बान्धवा मे भोः ! स्तुवीताऽल्लाहमेव तु । नान्तरेण तथेड्यस्तं युष्माकं त्वत्र वर्त्तते ॥१७०॥
तोलने चैव माने च वर्त्तनीयाऽथ नोनता । विलोके साम्प्रतं युष्मानहं सुस्थान् परन्तु मे— ॥१७१॥
अह्न आपततः कृच्छ्राद् भयं युष्मासु वर्त्तते । [८५]तोलनं चैव मानञ्च ज्ञातयो मम हे जनाः ! ॥१७२॥
कुरुध्वं न्यायतः, हीनं दत्त पण्यानि मैव च । विप्लवोत्पादकाः सन्तश्चरध्वं मा कदाचन ॥१७३॥
[८६]तिष्ठथ श्रद्दधानाश्चेत् अल्लाहेन व्यतीर्यत । युष्मभ्यं यत् तदेवाऽस्तु सूत्तमं, न तथा ऽस्म्यहम् ॥१७४॥
रक्षकः कोऽपि युष्मासु; [८७]प्रत्यूचुस्ते शुभेभ भोः ! । ईडितं पूर्वजैर्यत्तु वयं तद्धि त्यजेम, किम् ॥१७५॥
शास्ति पूजदेमेव त्वाम्, अथो किम्वा त्यजेम भोः । तत् स्ववस्तून्युपादाय कर्त्तुकामा हि यद् वयम् ? ॥१७६॥
एक एव त्वमस्यद्य मृदुर्भद्रस्तथा पुमान् । [८८]ज्ञातयो मम ! स प्राह "चिन्तनीयं तु सर्वथा ॥१७७॥
स्पष्टलक्ष्माश्रयाच् चेष्टे स्वप्रभोर्यद्यहं, ततः । अयच्छच् चाप्यसौ मह्यं सम्यग् वृत्ति यदा (पुनः) ॥१७८॥
क्षुद्रकामानुचारी वो भविष्यामि कथं न्वहम् ? । मनो मे मन्यते नाऽपि वारयामि हि वो यतः ॥१७९॥
वारयेयन्तु वस्तस्मात् पालयंस्तत् स्वतस्त्वहम् । यावन्मात्रः समुद्धारः शक्यते कर्त्तुमात्मनः ॥१८०॥
तावन्मात्रं समुद्धारं कर्त्तुमिच्छाम्यहं पुनः । स्वशिवाय ममाल्लाहश्चैक एव सदाश्रयः ॥१८१॥
कीलितः प्रत्ययो मे ऽस्ति किं च तत्रैव; खल्वहम् । तमेवाऽभिप्रपद्ये च; [८९]ज्ञातयो मम चाऽथ भोः ! ॥१८२॥

CC-0. In Public Domain. Digitized by eGangotri

विरोधो मे न युष्माभिः समं तद् वत् फलेद् यथा । आपतेत् तद्धि युष्मासु यदापन्नमभूत् (पुरा) ॥१८३॥
सूदशालेभलोकेषु यथाऽभून्नाहुषेषु वा । लूतलोकाश्च युष्मत्तः कथंचिन्नाति दूरतः ॥१८४॥
[९०]स्वं प्रभुं तत् क्षमां यूयं याचताऽथ तमेव च । पर्यावृत्तास्तथा यात प्रभुर्मे नाऽत्र संशयः ॥१८५॥
दयालुर्वर्तते किञ्च सानुरागः स विद्यते । [९१]तेऽवदन्—नैव बोधामः शुभेभ ! वचसां तु ते— ॥१८६॥
अधिकांशं वयं, किञ्च त्वं बलाद् हीन एव नः । अभविष्यन् सहायास्ते न ते कौटुम्बिका यदि— ॥१८७॥
अहनिष्याम सत्यं त्वां दृषद्भिस्त्वेव केवलम् । शक्तिमांस्त्वं न चैवाऽसि प्रभाव्यस्मासु यद् भवेः ॥१८८॥
[९२]सोऽवदत्—ज्ञातयो मे भोः! किन्तु कौटुम्बिका मम । सन्ति युष्मासु सर्वेषु प्रभावेणाऽतिशायिनः— ॥१८९॥
अल्लाहापेक्षया चाऽपि धृतोऽसावन्तरे हि यत् ? । युष्मत् कृतं ध्रुवं सर्वम्, प्रभुः पर्यावृणोति मे ॥१९०॥
[९३]ज्ञातयो मम ! यूयञ्च व्यापृताः स्वेन कर्मसु । तिष्ठताऽहञ्च तिष्ठामि व्यापृतः स्वेन कर्मणि ॥१९१॥
वेत्स्यथाशु च सा कस्मिन् यातनाऽपततीह, कम् । ध्वंसयत्यथवा कोऽत्र मिथ्यावाक्, तत् प्रतीक्ष्यताम् ॥१९२॥
प्रतीक्षेऽहञ्च युष्माभिः सममेव पुनस्तथा । [९४]यदाऽदेशस्तथाऽस्माकं प्रवृत्तो हि बभूव च— ॥१९३॥
शुभेभं तस्य लोकांश्च श्रद्दधानान् हि तत्समम् । अरक्षिष्माऽपदस्तस्यास्तदैव दयया स्वया ॥१९४॥
पर्यावृणोच्च चीत्कारो भीषणो जालमपूरुषान् । ते स्वकीयेषु वासेषु प्राणता इव चाऽभवन् ॥१९५॥
[९५](अनश्यंस्ते) यथा नैव तत्रावात्सुः कदाचन । मदयाना अपास्यन्त समुद्गा इव ते शृणु ॥१९६॥
[९६]प्रमाणै विशदैः सार्धं लक्ष्मभिश्चात्मनः समम् । प्रैषयाम वयं मूषम्; [९७]प्रिययौनस्य सन्निधौ ॥१९७॥
तस्य सामन्तलोकानां सन्निधावपि ते परम् । प्रिययौनमनुप्रापुः, प्रिययौनो न यद्यपि— ॥१९८॥
आसीत् कदाऽपि सन्नेता; [९८]पुनरुत्थापनाऽहनि । भविष्यत्यग्रयायी स स्वज्ञातीनां नृणां किल ॥१९९॥
तथा कीलावतारेऽसाववतारयिता समान् । दुस्तर्क्यो ह्यवतारो ऽसौ प्रणीयन्ते हि यत्र ते ॥२००॥
[९९]भवेऽपि लाञ्छनं लब्धं, पुनरुत्थापनाहनि । चापि लब्धं तदेवैभिः, पुरस्कारोऽवरोऽति सः ॥२०१॥
[१००]पुरस्तेऽस्माभिरेतानि वृत्तानि वर्णितानि हि । वसतीनान्तु कासाञ्चित्, काश्चनासां स्थिता अपि ॥२०२॥
काश्चनान्याः (कृषीवाऽथ) तिष्ठन्त्युप्ताश्च साम्प्रतम् । [१०१]अकुर्म न वयं तेषु त्वत्याचारं हि कञ्चन ॥२०३॥
आत्मना प्रत्युताऽकुर्वन् अत्याचारं निजेषु ते । त्वत् प्रभोश्च समादिष्टं यदा प्राप न ते ददुः ॥२०४॥
अल्लाहमन्तरेणैषामिष्टा देवाः सहायताम् । विनाशमन्तरेणैभ्यो न ते किंचित् तथा ददुः ॥२०५॥
[१०२]कुरुते जालमवासानां यदाऽसौ प्रग्रहं, स वै । त्वत् प्रभोः प्रग्रहो ह्येव सदैव भवतीदृशः ॥२०६॥
दुःखदः कर्कशश्चैव प्रग्रहोऽस्यास्त्यसंशयम् । [१०३]यातनाभ्यो भयं यस्तु परलोकस्य धारयेत् ॥२०७॥
ध्रुवं लक्ष्म महत् तस्मै विद्यते निहितं त्विह । तद् दिनं भविता तद् वै भविष्यन्ति यदा जनाः ॥२०८॥
समवेताः समे, तच्च दिनं तावद् भविष्यति । द्रक्ष्यन्ति यज्जनाः सर्वे; [१०४]वयं तं दिवसं तथा ॥२०९॥
व्याक्षिपामोऽल्पकालाय निश्चितो यस्य चावधिः । [१०५]विनाऽऽज्ञां तस्य नो कश्चित् तदा च व्याहरिष्यति ॥२१०॥
वासरोऽसौ यदा त्वेव तावदत्रापतिष्यति । नष्टभाग्या भविष्यन्ति तदानीमपरे पुनः ॥२११॥
केचनाऽत्र भविष्यन्ति सौभाग्याऽऽशालिनस्तथा । [१०६]नष्टभाग्यास्तु ये ते वै भविष्यन्त्यग्निना वृताः ॥२१२॥
क्रन्दनं दीर्घनिश्श्वासः स्यात्तथैषां विचेष्टितम् । [१०७]यावदभ्रञ्च गोत्रा च सदा वत्स्यन्ति तत्र ते ॥२१३॥
कामयेताऽन्यथैवासौ चेत् प्रभुस्ते कदाचन । तदा त्वन्यैव वार्ताऽस्ति, कर्त्तुं मर्हत्यसंशयम्— ॥२१४॥
कामयेत प्रभुर्यत्ते तदेव सर्वथा किल । [१०८]ये पुनर्भाग्यवन्तस्तु स्थास्यन्ति तेऽव्यये किल ॥२१५॥
यावदभ्रञ्च गोत्रा च सदा वत्स्यन्ति तत्र ते । कामयेताऽन्यथैवासौ चेत् प्रभुस्ते कदाचन— ॥२१६॥
तदा त्वन्यैव वार्त्तेयमभंगानुक्रमो यदा । [१०९]सन्दिहानो न तिष्ठेस्त्वं ततस्तद्विषये हि यम्— ॥२१७॥
अतिष्ठन् पूजयन्तोऽमी, पूजयन्ति हि ते तथा । पूर्वजा यद् वदेतेषां पूर्वमेभ्यो ह्यपूजयन् ॥२१८॥
अंशमेषां वयं चैभ्यो विना हानिञ्च काञ्चन । पूर्णतो हि प्रदातारः; [११०]शास्त्रमेकमदद्म च ॥२१९॥
वयं मूषाय, तत्राभूत् कलिश्चैव समुत्थितः । तत्प्रभो र्नाऽभविष्यच्चेत् पार्श्वतो ह्येव पूर्वतः— ॥२२०॥
तदेक, मभविष्यत् तत् कृतो ह्येव तु निर्णयः । तेषां मध्ये, इमे तस्य कारणादेव संशयम्— ॥२२१॥
गतास्तिष्ठन्ति संविग्नाः; [१११]सन्देहो नाऽत्र कश्चन । त्वत् प्रभुस्तान् समान् लोकान् पुरस्कर्ता यथाकृति ॥२२२॥

CC-0. In Public Domain. Digitized by eGangotri

स वै तत्तद् विजानाति चेष्टन्ते यद् यदेव ते । [११२]त्वं च लोकाश्च ते चाऽपि पश्चात्तापं विधाय ये ॥२२३॥
अन्वयुस्त्वां ऋजौ मार्गे स्थिरा यूयं हि तिष्ठत । यथा तेऽस्माकमादेशः, मर्यादां मा क्रमिष्ट च ॥२२४॥
स वै पश्यति तत्सर्वं यत्त्वमत्र विचेष्टसे । [११३]प्रवृतिं त्वञ्च मा कार्षीः पाप्मनस्तु जनान् प्रति ॥२२५॥
अन्यथा नारकाग्निस्त्वां स्प्रक्ष्यत्यल्लाहतः पृथक् । नाऽथ मित्रं सहायस्ते भविता कश्चनाऽपरः ॥२२६॥
लप्स्यसे न हि साह्यञ्च त्वं कुतोप्यथ किञ्चन । [११४]पूजां प्रतिष्ठिताञ्चैव दिन-पूर्वान्त-कालयोः— ॥२२७॥
कुरुष्वाऽथ रजन्याश्च भागेषु केषुचित्तथा । वस्तुतो यत्तु भद्रं तद् दुरितं खल्वपोहति ॥२२८॥
स्मारणं तिष्ठतीदं तु मनीषिभ्यः (सुनिश्चितम्) । [११५]त्वं धृतिं धारयाऽल्लाहो भद्राणां या पुरस्क्रिया— ॥२२९॥
तां न वै कुरुतेऽदत्ताम्; [११६]अभविष्यन् न किं शुभम् । अभविष्यन् यदि त्वत् प्राक् भद्रा जातेषु पूरुषाः— ॥२३०॥
वारणे तत्परा नृणां प्रपञ्चाद् विकृतेः क्षितौ । तान् विहायाऽल्पसंख्याकान् नूनरक्षाम यान् वयम् ॥२३१॥
आरमन्त हि ते पापा सौख्यानां साधनेषु वै । तेभ्यो दत्तेषु, ते चाऽथ दूष्यास्तैरभवन् पुनः ॥२३२॥
[११७]नैव सम्भाव्यमेतच्च वासान् यत्ते प्रभुः क्वचित् । नाशयेदेव, लोकानां भद्राचारेऽपि तिष्ठति ॥२३३॥
[११८]अकरिष्यद् गणैक्यस्थान् सर्वान् लोकांस्तव प्रभुः । ऐषिष्यद् यदि तद्रूपं ध्रुवम्, ते साम्प्रतं परम्— ॥२३४॥
सदा भेदधियः सन्तस्तिष्ठन्तीह (धरातले) । [११९]तं विहाय जनं यस्मिन् त्वत् प्रभुः कुरुते दयाम् ॥२३५॥
तदर्थञ्चैव तान् सर्वानसौ जन्माऽप्यलम्भयत् । चरितार्थं प्रभोस्ते च कथनं समजायत— ॥२३६॥
नारकं पूरयिष्यामि नृभिर्जिन्नैरहं समैः । [१२०]वाग्घराणाञ्च वृत्तेषु यद् यद् वृत्तं पुरस्तव ॥२३७॥
वदामस्तदिदं कृत्वा दृढं स्वान्तं भवेत् तव । त्वामगात् तत्र सत्यं च, श्रद्धरेभ्यस्तथैव च ॥२३८॥
स्मारणञ्चोपदेशश्च; [१२१]श्रद्दधानास्तु ये न हि । तान् जनान् ब्रूहि ''तद् यूयं कुरुध्वं स्वधिया कृतीः ॥२३९॥
वयञ्चैवाऽपि कर्माणि कुर्म एवाऽथ (सम्प्रति) । [१२२]प्रतीक्षध्वं वयञ्चापि प्रतीक्षायां स्थिता इह ॥२४०॥
[१२३]परोक्षं यद् धरित्र्याञ्च यद् वियत्सु च तिष्ठति । अल्लाहस्यैव तत् सर्वम्, समं तञ्चाभि वर्त्तते ॥२४१॥
तमेवेडिष्व तत्तस्मिन् विश्वासं चात्मनो धर । कुरुध्वे यन्, न तस्यासौ प्रभुस्तेऽज्ञस्तु तिष्ठति ॥२४२॥

योगः—२४२

CC-0. In Public Domain. Digitized by eGangotri

१२

सूक्तम्–यूषपः

(यूसुफ)

(महाकालेऽवतीर्णाः एकादशोत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ० लाम० रा० एते सन्त्यायातास्तु तस्य वै । पुस्तकं विशदं यद् वै; [२]ह्यर्वाणां भाषया च तत्— ॥ १ ॥
कुराणपरिधाने चाऽप्यस्माभिरवतारितम् । शक्नुयास्तद् यथा बोद्धुं; [३]कुराणं त्वयि काश्य च— ॥ २ ॥
सूत्तमं वर्णयामश्च समक्षं तदिदं तव । इतःपूर्वमतिष्ठस्त्वं सर्वथाऽस्याऽज्ञ एव तु ॥ ३ ॥
[४]यूषपोऽथ यदाऽवोचत् पितरं स्वं पितर्मम । अपश्यं दश चैकं च नक्षत्राणां तथैव च— ॥ ४ ॥
सूर्याचन्द्रमसौ स्वप्ने, तथा पश्यामि खल्विदम् । तदेते सर्व एवापि प्रणिपत्य नमन्ति माम् ॥ ५ ॥
[५]सोऽब्रवीत्—प्रियसूनो मे ! स्वप्ने दृष्टं त्वया तु यत् । भ्रातॄन् स्वान् त्वं तु मा वोचः त्वद् विरोधेऽन्यथा हि ते ॥ ६ ॥
कूटं किञ्चित् करिष्यन्ति, निश्चितं वर्त्तते त्विदम् । शातनो विशदः शत्रुर्मानवस्य हि वर्त्तते ॥ ७ ॥
[६]इतीत्थं त्वत् प्रभुस्त्वां हि सुतरां चेष्यति ध्रुवम् । शिक्षयिष्यति चासौ त्वां तलस्पर्शं च कर्मणाम् ॥ ८ ॥
दयापूरस्य दानञ्च तथासौ वितरिष्यति । याप्यकूपगृहायाऽपि तुभ्यं चैव यथा पुरा— ॥ ९ ॥
पूर्वजेषु स इष्वासे तथाऽब्रह्मे व्यधत्त हि । न सन्देहः प्रभुस्ते वै सुधीर्ज्ञाता च वर्त्तते ॥१०॥
[७]ध्रुवं यूषपवृत्तेऽथ भ्रातॄणां खल्वमुष्य च । वृते गुप्तानि चिन्हानि प्राश्निकेभ्यो(ऽन्तराऽन्तरा) ॥११॥
[८]यदाऽवोचंश्च ते 'सत्यं यूषपोऽस्य च सहोदरः । पितुर्नो नोऽतिरिच्यास्ति संख्यायामधिकानपि ॥१२॥
प्रेष्ठ एव ध्रुवं तातो विशदं नोऽस्त्यसंगतः । [९](कश्चनाऽह) हतैवैनं यूषपं क्षिपता ऽथवा ॥१३॥
यत्र कुत्रापि भूभागे पितुर्वो जायतां यथा । मनोवृत्तिर्हि युष्मभ्यं स्यात यूयं यथाऽन्ततः ॥१४॥
भद्रभावान्विताः लोकाः; [१०]एकस्तेषां त्वभाषत । "हतैनं यूषपं नैव, कर्तुं चेत् साग्रहा अथ ॥१५॥
क्षिपतैनं गभीरस्य कूपस्यान्तस्ततो ह्यमुम् । वणिज्यायात्रिणां कश्चिच्चोद्धरेद् हि कदाचन ॥१६॥
[११]प्रत्यवोचन् "पितर्नो भोः ! कारणं किमिहास्ति यत् । यूषपस्य तु सम्बन्धात् न तेऽस्मास्वस्ति प्रत्ययः ॥१७॥
वयं यद्यपि तिष्ठामस्तस्य कल्याणकामिनः । [१२]तं भवान् प्रेषयेत्तेन दिने ह्यागामिनि (ध्रुवम्) ॥१८॥
सहास्माभिः सुखं लब्धुं क्रीडनाय तथैव च । रक्षणाय वयं तस्य भविष्यामः समाहिताः ॥१९॥
[१३]असावाह 'अयं मां तु तुदत्यस्मात् निनीषथ । तं विभेमि च मा कश्चिद् वृकस्तं हन्तु चाऽगतः ॥२०॥
यौष्माकीनात् प्रमादाद्धि"; [१४]तदैवं तेऽब्रुवन् तसमे । "संघतां धारयत्स्वेषु किलाऽस्मासु वृको यदि ॥२१॥
हन्तु तं तन् प्रणष्टा नो तिष्ठामः किं वयं समे" । [१५]ततस्ते नीतवन्तस्तं मतिश्चैका ह्यजायत— ॥२२॥
भवेत् क्षिप्तो गम्भीरेऽसौ कूपस्यान्तस्तदा वयम् । अकुर्म प्रेरणां दिव्यां—"त्वमेनान् ज्ञापयिष्यसि— ॥२३॥
इदं, यावन्न बुध्यन्ते (त्वा) मिमे तु मनागपि" । [१६]उपायुः स्वञ्च तातं ते प्रदोषे क्रन्दनाकुलाः ॥२४॥
[१७]अवोचन्—तात हेऽस्माकम् ! धावनस्य यदा वयम् । स्पर्द्धयामारता जाता यूषपं वस्तुरक्षणे— ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

सक्षणं प्रविधायैव तदाऽकस्मादुपेत्य हि । जघास तं वृकः कश्चित्, सत्यवादिषु सत्स्वपि ॥२६॥
न चैवाऽस्मासु विश्वासं भवान् हन्त ! करिष्यति । [18]कञ्चुकं तस्य मिथ्यैव रक्तेनाक्तं विधाय च ॥२७॥
ते समानिन्युराहासौ—"मनोभिः क्वचिदुत्पथम् । नीतवन्तो हि यूयं स्थ, सुभगं धैर्यमस्तु मे ॥२८॥
वर्णितेऽत्राथ युष्माभिः सहायोऽल्लाह एव मे" । [19]वणिज्यायात्रिणां संघस्तत्र कश्चिदुपेयिवान् ॥२९॥
कहारं ते पुनस्तत्र प्रैषयन्नेकमात्मनः । स्वैरमन्तर्जले चासौ स्वोदभाण्डमवेशयत् ॥३०॥
तदैव सहसाऽक्रन्दं चकारासौ—"ममाद्य भो ! । सौभाग्यं, बाल एषोऽत्र" ह्नुतोऽसौ निधिवच्च तैः ॥३१॥
तत्कृतं सर्वमल्लाहः किलावेत् च यथार्थतः । [20]व्यक्रीणंस्तेऽथ तं गौणं ह्यर्घमादाय केवलम्— ॥३२॥
केषाञ्चिद् रूप्यखण्डानां त्वेव तावदपेक्षया । न तेषां काचिदप्यासीत् सक्तिस्तस्मिन् विशेषतः ॥३३॥
[21]क्रेता मिश्रस्य यो मर्त्यः स्वजायां सोऽवदत् पुनः । "पोष्यतामतिमानेन बालकोऽयं त्वया यतः— ॥३४॥
साधयेत् कार्यमस्माकं क्वचित् कुर्याम वा पुनः । आत्मनैवात्मनः पुत्रं तावदेनं वयं जनाः" ॥३५॥
धरित्र्यां यूषपं ह्रीत्थं न्वकुर्म सुप्रतिष्ठितम् । तलस्पर्शं यथार्थानां कर्तुमेषोऽस्तु शिक्षितः ॥३६॥
स्वेषु कृत्येषु सोऽल्लाहः सर्वथा वर्त्तते प्रभुः । विदन्तीदं परन्नैव बहवस्तु जना (बत) ॥३७॥
[22]प्राप्ताय यौवनं तस्मै विवेकं ज्ञानमेव च । अदद्म, भद्रलोकेभ्यस्त्वित्थमस्मत् पुरस्क्रिया ॥३८॥
[23]स्त्रिया यस्या गृहे वासं सोऽवसत् स्त्री ततश्च सा । तद्वशीकरणोपाये मनः स्वं समसञ्जयत् ॥३९॥
संवृतं द्वारमन्तश्च कृत्वाऽह—"त्वमुपेहि माम्" । प्रत्यवोचदसौ "मे तु ह्यल्लाहः शरणं परम् ॥४०॥
प्रभुर्मेऽसौ ससम्मानं मया (शश्वच्च) वर्त्तते । कदाचिन्नाभिवृद्धिञ्च यान्ति जाल्मास्तु ये जनाः ॥४१॥
[24]कामुकी तस्य सा जाताऽभविष्यत् सोऽपि कामुकः । उपास्थास्यन्न युक्तिश्चेत् तत्समक्षं तु तत्प्रभोः ॥४२॥
वृत्तमित्थं वयं येन दुरितात् यौनदोषतः । चापि (तं) वारयेमाऽसौ सन्देहो नेह कश्चन ॥४३॥
बन्धकानां तदस्माभिः प्रचितानामभूत् किल । [25]पश्चादेकोऽग्रतश्चान्यस्तावथेत्थं ह्यधावताम् ॥४४॥
द्वारं लक्ष्यं विधायाऽसौ यूषपस्य तु कञ्चुकम् । पृष्ठतः स्फोटयामास विद्यमानमपश्यताम् ॥४५॥
किञ्च तावुपरि द्वारं प्रति तस्याः स्त्रियास्तदा । साऽवदत् "को नु दण्डः स्यात् कामनिर्विष्टचेतसा ॥४६॥
यो मिलेत्तव जायां तु निग्रहादथवा पुनः । ऋते कृच्छ्रप्रदानात्तु; [26]"किलेयं त्वेव", सोऽवदत् ॥४७॥
वशीकाराय मे पुंसो निश्चितं समचेष्टत । कश्चित् कुटुम्बिनां तस्याः साक्षीभूतोऽवदत् पुनः ॥४८॥
स्फुटितं कञ्चुकं तस्य पूर्वतो यदि वर्त्तते । सत्यवाक् तद् भवेदेषाऽसत्यवाक् स च मन्यताम् ॥४९॥
[27]स्फुटितं कञ्चुकं तस्य पृष्ठतो यदि वर्त्तते । सत्यवाक् तद् भवेदेषोऽसत्यवाक् सा च मन्यताम् ॥५०॥
[28]कञ्चुकं स्फटितं तस्य पृष्ठतो दृष्टवान् यदा । स आह—"दुर्नयो ह्येष योषितां वस्तु विद्यते ॥५१॥
अद्भुतो दुर्नयस्तावद् युष्माकं योषितां स्थितः । [29]गतस्य शोचनं व्यर्थं, यूषप ! त्वञ्च कामिनी ॥५२॥
क्षमां याचस्व दोषस्य निजस्य त्वं हि निश्चितम् । पाप्मनां किल लोकानां भवस्यन्यतमा (बत) ॥५३॥
[30]प्रसृतो नगरे स्त्रीषु जनवादो बभूव ह । अजयेशस्य या जाया सा वशीकर्त्तुमीहते— ॥५४॥
युवानं ह्यात्मनो दासं हृदन्तर्विष्टमेव च । प्रेम तस्मै तथा यूने, वयं पश्याम एव च— ॥५५॥
विशदं सा प्रपन्नाऽस्ति किलान्धन्तमसि क्वचित् । [31]अमूषां चतुरां वाचं यदा चासौ न्यशामयत्— ॥५६॥
ता ह्यसावाह्यत् तत्र सोपवर्हां सभां तथा । अमूभ्यः शोभयामास, प्रददौ पुनरेव च— ॥५७॥
एकैकां छुरिकामेकां, (यूषपं) चाभ्यभाषत । "पुरस्तादेहि तासां त्वं" अपश्यंस्तास्तु तं यदा— ॥५८॥
अमन्यन्त महान्तं तम्, अकृन्तन् स्वांस्तथा करान् । अमन्दं चाघुषन्—"धन्योऽल्लाह; एषोऽस्ति नो नरः ॥५९॥
कश्चिदेष परं भद्रो देव एवाऽस्ति (सर्वथा)" । [32]साऽऽह—"सैष प्रसंगेन यस्य तावद् विनिन्दिता— ॥६०॥
अहं युष्माभिरस्म्यत्र, वस्तुतो चेष्टितं मया । आराधनाय खल्वस्य, रक्षितात्माऽभवत् त्वयम् ॥६१॥
मन्यते चेदयं नैव या सिषाधयिषा मम । निग्रहञ्चाऽवमानं च सत्यमेष प्रयास्यति" ॥६२॥
[33]आह—मां यां दिशं न्वेते त्वाह्वयन्ति मम प्रभो ! । कारावासोऽति रुच्योऽस्ति मम तस्यात्तु सर्वथा ॥६३॥
रक्षिष्यसि न चेत्त्वं माममूषां कूटजालकात् । नंस्यामि तत्र यास्यामि गणे च गतसंविदाम् ॥६४॥
[34]अतस्तस्य प्रभुस्तस्य प्रार्थनां स्वीचकार ह । दूरतो रक्षितश्चासावमूषां कूटजालकात् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

संशयो न हि, विज्ञाता तथा श्रोता स वर्त्तते । [35]पुमांसस्ते ततोऽब्रोधन् इदमेवोचितं तु यत् ॥६६॥
निग्रहं प्रापितोऽसौ स्यात् यावदल्पावधि किल । दृष्टवन्तो बभूवुस्ते स्पष्टचिन्हानि यद्यपि ॥६७॥
[36]युवानावितरौ तेन द्वावभूतां गतौ यदा । वन्दि-वेश्मनि, तत्रैकस्तयोस्तं प्राह चैकदा— ॥६८॥
"संविष्टो दृष्टवानस्मि निश्च्योतन्तमिरां निजाम्" । ततोऽन्यः प्राह—(संविष्टो दृष्टवानस्मि) यच्छिरे ॥६९॥
धृत्वा तिष्ठाम्यहं मण्डान् चाटकैराऽशनाऽकुलान् । ब्रूहि नौ कोऽनयोस्त्वर्थः, सूत्तमानां मतोऽसि नौ ॥७०॥
[37]प्रत्यवादीदसौ—यद् वै लभेथे भोजनं युवाम् । तस्य प्राप्तेः पुरैवाऽहं ज्ञापयिष्यामि (भोः) युवाम् ॥७१॥
अर्थं दृष्टस्य खल्वस्य, प्रभुर्मे मामशिक्षयत् । यत्ततो वर्त्तते शिक्षा त्वियमन्यतमापि हि ॥७२॥
त्यक्तवानस्मि पन्थानं तेषां ये श्रद्धराः न हि । अल्लाहे, ऽथ निषेधन्ति परं लोकं च ये जनाः ॥७३॥
[38]आश्रितो हि मया पन्थाः याप्यकूपस्य वर्त्तते । इष्वासाऽब्रह्मयोश्चैव पूर्वजानां (महीयसाम्) ॥७४॥
साम्प्रतं न किलास्मभ्यं विदध्याम तु यद् वयम् । प्रतिमानं किमप्यत्र तस्याऽल्लाहस्य (सर्वथा)— ॥७५॥
सोऽयमस्मासु लोकेषु चेतरेष्वथ वर्त्तते । अल्लाहाऽनुग्रहो (हन्त) न परन्त्वधिका जनाः— ॥७६॥
दर्शयन्त्यपि कार्तज्ञम्; [39]कारान्तर्वान्धवौ मम ! । प्रभवो बहवो वैकोऽल्लाहो ह्येवास्ति सूत्तमः— ॥७७॥
प्रभुत्वात् शालते योऽसौ ? [40]अन्तरेण च तं युवाम् । यान् स्तुथः केवलं ते तु ह्यृते नाम नहीतरत्— ॥७८॥
यानि नामानि दत्तानि युष्माभिः पूर्वजैरथ । तदर्थं किञ्चिदल्लाहः प्रमाणं नाप्यऽकाशयत् ॥७९॥
शासनेऽधिकृतश्चास्ति केवलोऽल्लाह एव तु । शासनं तस्य चेदं यत् स्तुताऽन्यं नान्तरेण तम् ॥८०॥
सत्यश्चायमृजुश्चायं ह्येव मार्गस्तु विद्यते । परं (हन्त) विजानन्ति नहीदं बहवो जनाः ॥८१॥
[41]कारान्तर्बान्धवौ मे भोः ! युवयोः स्वामिनं निजम् । पाययिष्यति खल्वेकस्त्विरामन्यतरस्तथा— ॥८२॥
शूलमारोपितस्तावत् स वै (सत्यं) भविष्यति । त्रोटिभिः चाटकैराश्च समत्स्यन्त्यस्य शीर्षकम् ॥८३॥
निर्णयं तस्य जानीथ त्वन्वयुंक्तां युवां हि यत् । [42]तयोश्चैव द्वयोर्यस्य सम्बन्धे तु व्यबुध्यत— ॥८४॥
स वै मोक्षिष्यतेऽवोचत् (यूषपः) तमिदं वचः । "समक्षं स्वामिनस्त्वं मे वार्त्तां तावदुदीरय" ॥८५॥
परं जातः प्रभावस्तु शातनस्य तथा, यथा । समक्षं स्वामिनः सर्वं विस्मृतं तदुदीरणम् ॥८६॥
वत्सरेभ्यो बहुभ्यस्तत् कारायामेव सोऽवसत् । [43]भूपतिः पृष्टवान् किञ्च—"स्वप्नसन्दर्शनं गतः— ॥८७॥
दृष्टवान् हृष्टपुष्टा गाः सप्तसंख्या अदन्ति याः । दुर्बलाः सप्तसंख्याका गावः (किञ्चाऽथ दृष्टवान्—) ॥८८॥
दधानाः सप्त हारित्यं त्वन्नस्य सन्ति कणिकाः । सप्तशुष्काः परन्त्वन्याः श्रीधराः ! ब्रूतमामिमम् — ॥८९॥
स्वप्नसन्दर्शनस्याऽर्थं विदग्धा अत्र चेत् क्वचित् ? । [44]तेऽवदन्—"डीयमानानि स्वप्नसन्दर्शनानि ह ॥९०॥
स्वप्नसंदर्शनानाञ्च विद्मोऽर्थं न वयं तु (भोः !) । [45]तयोश्चैव द्वयोर्यस्तु मुक्तिभाक् समजायत— ॥९१॥
कालक्षेपात् स्मृतिं यातः समुवाच सः भूपतिम् । स्वप्नसंदर्शनस्यार्थं वदाम्येष तु वो जनान् ॥९२॥
प्रेषणीयोऽस्मि पार्श्वेऽहं (यूषपस्याचिरं परम्) । [46]"सत्यवाग्यूषप ! त्वं भोः ।" स आहार्थं वदाऽस्य नः ॥९३॥
"दुर्बलाः सप्तसंख्याका गावोऽदन्ति हि गाः किल । सप्त हृष्टास्तथा पुष्टाः, सप्तशुष्काश्च कणिकाः— ॥९४॥
दधानाः सप्त हारित्यं चान्यास्तिष्ठन्ति कणिकाः" । येन निवृत्य तान् लोकानहं स्याम् समया गतः ॥९५॥
कदाचित्ते च जानन्तु; [47]स आह-षड्भिराऽरतः । समाभिस्त्वं कृषौ तिष्ठ ततो यत्त्वं लविष्यसि— ॥९६॥
खादनांशान्निजादन्यत् तिष्ठेत्तत् कणिकासु हि । [48]आपतिष्यन्ति वर्षाणि सप्तोर्ध्वं कृच्छ्रदानि तु— ॥९७॥
तत्कृते संचितं यच्च समं ह्यत्स्यन्ति तानि च । अवशेक्ष्यति तत्त्वेव स्तोकं यत् पालयिष्यसि ॥९८॥
[49]तदूर्ध्वं वर्षमेकञ्च तादृशं समुपेष्यति । यत्र लोका भविष्यन्ति कृष्या सम्पन्नया युताः ॥९९॥
सवनीयानि लोकाश्च यदाऽऽसोष्यन्ति सर्वशः । [50]भूपतिः प्राह "मर्त्योऽसौ प्रापणीयो ममान्तिकम् ॥१००॥
यदा त्वभ्यागतो दूतस्तं स तं प्राह "याहि भोः ! । स्वामिनं स्वं परावृत्तस्तदित्थं पृच्छ चैव तम्— ॥१०१॥
कीदृशी सा तु वै वार्ता स्त्रीणां याभिः कृताः किल । आत्मनः पाणयश्छिन्नाः, संशयो नेह मे प्रभुः— ॥१०२॥
कूटं तासां विजानाति; [51]भूपतिः पृष्ट्वांश्च ताः । यूषपं राध्यमानासु किन्नु वो हृदये गतम् ? ॥१०३॥
ता अवोचन्—"प्रभुर्धन्यः, नैव तस्मिंस्तु किञ्चन । दुरितं दृष्टवत्यः स्मः," भूपतेः स्त्रीरुवाच च— ॥१०४॥
"प्रकाशं ह्यागतं सत्यं, सा भवाम्यहमेव या । तत्परा मोहनायास्य स्थिताऽसं नात्र संशयः— ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

सत्यसन्धेषु लोकेषु तिष्ठत्यन्यतमो ह्ययम् । [५२]प्राह स—लक्ष्यमेतस्य तदेतत् यत् स बुध्यताम् ।।१०६।।
पृष्ठतो नास्य तेनाऽहं वञ्चनां तु मनागपि । अकार्षं नाऽथ चाऽल्लाहो वञ्चनानयगामिनाम्— ।।१०७।।
तद्विधेषु प्रयत्नेषु साह्यमाचरति क्वचित् ।

इति द्वादशं पारायणम्

अथ त्रयोदशं पारायणम्

[५३]न चेदं वच्मि "निर्दोषस्तावदेष भवामि च ।।१०८।।
स्वान्तं संप्रेरयत्येव मनुष्यं दोषदिक्षु वै । दयां वर्षेत् प्रभुर्मे चेत् वार्त्ता त्वन्या भवेत्तदा ।।१०९।।
क्षमाशीलो दयालुश्च प्रभुर्मे नाऽत्र संशयः" । [५४]भूपतिः प्राह—"तं मर्त्यं तूपस्थापयतेह माम् ।।११०।।
आत्मना तं हि संबद्धं करिष्याम्येष खल्वहम् । तेन संलप्य पश्चाच्च भूपतिस्तमभाषत— ।।१११।।
विद्धीतः परमत्र स्वं विश्वस्तं च प्रतिष्ठितम् । [५५]सोऽवदत् 'मेऽधिकारे भोः! कोषागारान्त्समान् कुरु ।।११२।।
धरायां येऽपि तिष्ठन्ति, सज्ञानो रक्षको न्वहम् । [५६]अदद्म यूषपायेत्थं ह्यधिकारान् वयं क्षितौ ।।११३।।
यथाकामं चरेद् येन यत्र कुत्राप्यसौ स्वतः । भवेद् यत्राऽप्यभीष्टं नो तानेव प्रदयामहे ।।११४।।
तां न कुर्मोऽप्रदत्तां वै भद्राणां या पुरस्क्रिया । [५७]श्रद्धरा ये भयं ये च धारयन्ति किलात्मनि— ।।११५।।
प्रवराऽऽतिष्ठते तेभ्यः परलोके पुरस्क्रिया । [५८]एकदा बान्धवाः प्रायन् यूषपाऽभिमुखं तथा— ।।११६।।
अतिष्ठन्, सोऽभिजज्ञे तांस्ते तु तं नाभिजज्ञिरे । [५९]कारयित्वाऽथ सिद्धञ्च तेषां पण्यं स आह तान् ।।११७।।
"पितृपक्ष्यस्तु यो भ्राता युष्माकं वर्त्तते ह्यसौ । अन्तिकं मे समानेयो युष्माभिः, किं न पश्यथ— ।।११८।।
यच्छामि पूर्णमानेन, साधुश्चातिथिषु न्वहम् । [६०]अन्तिकञ्चाऽथ तं मे चेत् न यूयं त्वाहरिष्यथ— ।।११९।।
ज्ञायतां नैव युष्मभ्यं मानः कश्चिद् भविष्यति । अन्तिकं मे, न चैवाऽथ मामुपैतुं हि शक्ष्यथ" ।।१२०।।
[६१]तेऽवदन्—"चाटुभिश्चैव प्रगल्भैर्वचनैरथ । वयं सिद्धं करिष्यामस्तस्य तातं तदाप्तये ।।१२१।।
कार्यमेतत् तदस्माभिः कर्त्तव्यं ह्येव वर्त्तते । [६२]आदिशत् सेवकान् यूनस्तदासौ—'यूयमत्र भोः ! ।।१२२।।
अन्तरा पण्यमेवैषां भिन्नं पण्यमथापि च । निविष्टं कुरुतैते तु प्राप्स्यन्ति स्वान् गृहान् यदा ।।१२३।।
तत् कदाचिद् विजानीयुः परावृत्ताः स्युरप्यथ" । [६३]यदा तातं स्वमायंस्ते परावृत्ता अवादिषुः— ।।१२४।।
"तात नो ! वारिता जाता मानात्तु साम्प्रतं वयम् । मानलाभाय नस्तस्माद् भ्रातरं प्रेषयाऽत्र हि— ।।१२५।।
त्वमस्माकं सहैवास्मान्, वयं तद्रक्षणोद्यताः" । [६४]प्राह स "किन्नु युष्माकं प्रत्ययं यद्विधं पुरा— ।।१२६।।
भ्रातुरेतस्य सम्बन्धात् कृतवानस्म्यहं किल । तद्विधं साम्प्रतञ्चापि कुर्यां वः प्रत्ययं पुनः ? ।।१२७।।
अल्लाहो रक्षिता श्रेष्ठो दयालुश्च दयावताम्" । [६५]यदाऽथ स्वं हि ते पण्यं गतबन्धं व्यधुस्तदा— ।।१२८।।
आत्मनश्चापि तत्त्र त्वलभन्त निर्वर्तितम् । तेऽवदन् "तात नो! कोऽन्यः कामस्त्वत्र भवेद्धि नः ।।१२९।।
आत्मनीनमपि प्राप्तं पण्यमस्माभिरद्य यत् । इदानीमाहरिष्यामः खाद्यान्नानि हि सर्वशः— ।।१३०।।
गृह्यकेभ्यस्तु बन्धुभ्यः स्वकीयं भ्रातरं तथा । रक्षिष्यामो, ऽतिरिक्तं च भारं प्राप्स्याम एव तु— ।।१३१।।
यावन्मात्रं भवेच्छक्तो वोढुं तावत्क्रमेलकः । लघीयानेव मानस्य भारस्त्वेषोऽत्र विद्यते" ।।१३२।।
[६६]प्रत्यवादीदसौ—"नाऽहं समर्थः प्रेषणेऽस्य तु । कथञ्चित् सह युष्माभिर्यावद् यूयं तु नैव मे— ।।१३३।।
अल्लाहवचनाद् ब्रूथ समक्षं स्थिरया गिरा । वयं ह्यस्य करिष्यामः सत्यं निर्यातनं पुनः ।।१३४।।
पर्यावृतेष्वकस्मात्तु कथंवाऽन्या भवेत्तदा" । वचनं दत्तवत्स्वेषु स एवं व्याजहार च— ।।१३५।।
"द्रष्टाऽल्लाहोऽस्य सर्वस्य यद्यच्चेष्टामहे वयम्" । [६७]सुता मे ऽबोधयच्चासौ "न युष्माभिः समैर्जनैः ।।१३६।।
विधेयस्तु प्रवेशोऽन्तर्द्वारा खल्वेकयैव हि । विधेयस्तु प्रवेशोऽन्तर्द्वार्भिर्भिन्नाभिरेव तु ।।१३७।।
न मे युष्मान् परित्रातुं सामर्थ्यं किञ्चनाि च । अल्लाहस्य तुलायान्तु दरात् कस्याऽपि वस्तुनः ।।१३८।।
शासनं केवलस्याऽस्य त्वल्लाहस्य प्रवर्त्तते । स एव त्वाश्रयो मेऽस्ति, विश्वस्तव्यः स एव च— ।।१३९।।
तै जनैर्ये ध्रियन्तेऽत्र विश्वासं (निजमानसे) । [६८]यथाऽऽदेशं पितुस्तेऽथ यदैव प्राविशन् पुरम्— ।।१४०।।
अल्लाहस्य तुलायान्तु तन्न तेषामकल्पत । साधनार्थमभीष्टस्य, हृदिच्छा केवलाऽभवत्— ।।१४१।।

CC-0. In Public Domain. Digitized by eGangotri

याप्यकूपस्य यां तावत्तथाऽसौ समपूरयत् । निश्चितं ज्ञानवानासीदसौ यस्माददद्म हि— ॥१४२॥
तस्मै ज्ञानं, परं लोका विदन्तीदन्तु नाऽधिकाः । [६९]उपायन् ते जनाश्चैव यूषपं; सोदरञ्च सः— ॥१४३॥
उपानिन्येऽथ वासार्थं स्वकक्षे प्राह चैव तम् । "सोदरस्तेऽस्म्यसन्देहं, मा शुचस्त्वं मनागपि— ॥१४४॥
तेन यत्ते व्यचेष्टन्त; [७०]यदा सिद्धश्च कारितः । तेषां सर्वोऽपि सम्भारः तदा स्वसोदरस्य सः— ॥१४५॥
पर्याण—स्थापयिष्णौ वै कपं तावन्न्यवेशयत् । समाह्वाता पुनस्त्वेक आह्वयन् व्याजहार च— ॥१४६॥
महांगारोहिणो लोकाः ! चौरा यूयमसंशयम् । [७१]प्रत्यावृत्तमुखास्तांस्ते प्रत्यभाषन्त—"किन्नु भोः! ॥१४७॥
वस्तु तद् यद् गतं चौर्यं युष्माकं वर्त्ततेऽत्र तु ? । [७२]तेऽवदन्—"भूपतेर्यस्तु कपस्तन्न लभामहे ॥१४८॥
विवृतं योऽत्र कुर्यात् स उष्ट्रोह्यं भारकं (ध्रुवम्) । लभेतान्नस्य, किञ्चात्र स्थितोऽहं प्रत्ययाय वै" ॥१४९॥
तेऽवदन्—साक्षितेशस्य, यूयं जानीथ यद् वयम् । न प्रविष्टा इमं देशं दूषणार्थं कथञ्चन ॥१५०॥
वयं चौराश्च नैवाऽपि; [७३]प्रत्यवोचन् ततश्च ते । असत्यवाक्षु युष्मासु दण्डः को नु भवेत् पुनः ?" ॥१५१॥
[७५]"पर्याणस्थापयिष्णौ वै" त आहुः "यस्य तद् भवेत् । दण्डभाक्स्यादसावेव, जाल्मान् लोकान् वयं सदा ॥१५२॥
दण्डयामः किलेत्थं हि; [७६]समारम्भस्ततोऽभवत् । पर्याणस्थापयिष्णूनामन्येषां मार्गणस्य तु— ॥१५३॥
मार्गणात् प्राग्घि तद्भ्रातुः, ततो लब्धोऽभवद्धि सः । पर्याणस्थापयिष्णौ हि निजभ्रातुः, कृतोऽभवत्— ॥१५४॥
उपायोऽस्माभिरित्थं हि यूषपस्य कृते तदा । भूपतेर्विधिना नाऽसौ सोदरं स्वं कथञ्चन— ॥१५५॥
शक्त आसीत्तु संप्राप्तुं, कथाऽन्यैव यदि क्वचित् । ऐषिष्यत्तु तथाऽल्लाहः; ह्यभीष्टानां वयं किल— ॥१५६॥
विभवानां परिवृद्धिं प्रकुर्मो ह्येव सर्वथा । विज्ञान् सतस्तथैवाऽपि प्रविज्ञोऽन्योऽधितिष्ठति ॥१५७॥
[७७]तेऽवदन्—"कृतवानेष यदि चौर्यं कथञ्चन । अस्य प्राक् सोदरोऽप्येवं कृतवान्"; यूषपस्त्विदम् ॥१५८॥
अरक्षत् स्वान्त आगूढं त्वेव नैवाऽनयत्तथा । प्रकाशं तत्समक्षं तत्, प्राह "यूयन्तु दुर्धियः— ॥१५९॥
वर्णितं यच्च युष्माभिरल्लाहो वेत्ति तत्समम्" । [७८]तेऽब्रदन्—"अजयेशा!ऽस्य वर्षीयान् वर्त्तते पिता ॥१६०॥
स्थानापन्नं तदस्य त्वं रक्षाऽस्माकं हि कञ्चन । विशिष्टं सत्कृतां त्वां हि विद्मस्तावद् वयं समे" ॥१६१॥
[७९]सोऽवदत्—'रक्षताद् दोषादल्लाहोऽस्मानतस्त्वसौ । यतो वस्तूपलब्धिर्नस्त्यक्त्वा तं यद् वयं परम्— ॥१६२॥
निग्रहं प्रापयेमेह, कुर्वाणा वयमीदृशम् । ख्याता जाल्मा भविष्यामः सत्यम्; [८०]नैराश्यमागताः ॥१६३॥
ते ततो मन्त्रणाहेतोरेकान्तं प्राप्य संस्थिताः । गरीयांस्तेष्वथो प्राह—यूयं जानीथ नैव किम्— ॥१६४॥
अल्लाहं साक्षिणं कृत्वा युष्मानग्राहयत् पिता । पूर्वतो हि प्रतिज्ञां यत्; विषये यूषपस्य च— ॥१६५॥
इतः पूर्वं प्रमादेन चाऽवर्त्तध्वं महीयसा । इदं स्थानमहं त्यक्त्वा न तावद् यातुमुत्सहे— ॥१६६॥
शास्ति यावत् पिता नो मां किम्वाऽल्लाहोऽत्र न स्वयम् । निर्णयं कुरुते कञ्चित् मदर्थं; स च वर्त्तते— ॥१६७॥
निर्णेतॄणां हि सर्वेषां निर्णेता सूत्तमः किल । [८१]परेत पितरं यूयं ब्रूत चैवं तु नः पितः !— ॥१६८॥
पुत्रकेण त्वदीयेन कृतं चौर्यं वयं पुनः । वर्णयामो हि तन्मात्रं विद्मो यन्मात्रमेव तु ॥१६९॥
द्रष्टारो न भवामोऽथ परोक्षं यत् प्रवर्त्तते । [८२]प्रष्टुमर्हसि तं वासमस्माभिर्यत्र तूषितम्— ॥१७०॥
बणिजां चैव तं संघं येन सार्धमिहाऽऽगताः । वयं सत्यं किल ब्रूमः"; [८३](सूचितश्च पिताऽवदत्—)॥१७१॥
"मनोभिस्तूत्पथं यूयं नीतवन्तो हि कुत्रचित् । सुभगं च पुनर्धैर्यं ममास्तु, सम्भवं च यत्— ॥१७२॥
अल्लाहकृपया तेषां मया योगो भवेदपि । तत्वदर्शो तथा विज्ञो वर्त्ततेऽसाव (संशयम्) ॥१७३॥
[८४]पराङास्यः पुनर्भूत्वाऽऽस्थादक्रन्दीदसौ तथा । "हन्त यूषप !" शोकाच्च तस्योभे पुनरक्षिणी— ॥१७४॥
श्वेतिमानं गतेऽभूताम्, प्राणाश्चैवोत्तरोत्तरम् । संकोचस्य दिशं प्रायन्; [८५]प्राहुः "साक्षी प्रभुर्हि यत् ॥१७५॥
चिन्तयन् यूषपं ह्येव स्थितस्तावद् भविष्यसि । नश्येद् यावन्न ते स्वास्थ्यं, प्राणा यायुर्न तेऽथवा" ॥१७६॥
[८६]प्रत्यवादीदसौ—"यन्मे शोको वोद्विग्नताऽथवा । वेदयामि तदल्लाहं त्वेव, वित्थ न चैव यत्— ॥१७७॥
वेद्मि तच्चाप्यहं सर्वमल्लाहकृपया पुनः । [८७]पुत्रकाः! यात तद् यूयं, मार्गणीयश्च यूषपः— ॥१७८॥
सोदरस्तस्य चैवाऽपि, न चैवाऽधिदयं प्रभोः । निराशाभाव आधेयोऽश्रद्धरा एव ये जनाः— ॥१७९॥
जायन्ते हि निराशास्तेत्वल्लाहाऽधिदयं (बत)" । [८८]यदा चैते जनाः पश्चात्तमुपायंस्तदाऽब्रुवन्— ॥१८०॥
"गृह्यकेषु तथाऽस्मासु त्वजयेशा ! ऽपदागता । मनागेवाऽर्थमादाय त्वां वयञ्चाप्युपस्थिताः ॥१८१॥

CC-0. In Public Domain. Digitized by eGangotri

पूर्णमानेन नो देहि, दयस्वाऽस्मांस्तथैव च । अल्लाहो हि पुरस्कर्त्ता त्वसन्देहं दयावतः" ॥१८२॥
[८९]प्रत्यवादीदसौ—"वित्थ किन्नु यूयमिदम्—यदा । अज्ञानोपहता यूयं वर्त्तनं कीदृशं तदा— ॥१८३॥
यूषपेण तथा चास्य भ्रात्रा चापि व्यधात तु ? । [९०]अवोचंस्ते "त्वमेवासि यूषपस्तत्वतो नु किम् ?" ॥१८४॥
प्राह स—"सोदरोऽयं मे यूषपोऽहञ्च तत्वतः । पक्षपातमतीवाऽसावल्लाहोऽस्मास्वदर्शयत् ॥१८५॥
सत्यमेव भयं योऽत्र मानसे धारयत्यथ । धैर्येण चेष्टते चाऽपि, तदल्लाहो न सर्वथा— ॥१८६॥
अफलं कुरुते कार्यं कदाप्युत्तमकारिणाम् । [९१]तेऽवदन् "साक्षिणं कृत्वाऽल्लाहं वच्मः स वो ध्रुवम् ॥१८७॥
व्यधादिष्टान् इहास्माकं सर्वेषां हि व्यपेक्षया । दोषपूर्णा वयञ्चैव निश्चयेनाऽभवाम तु" ॥१८८॥
[९२]सोऽवदत् "भैष्ट मैवाऽद्य, सोऽल्लाहः क्षमताञ्च वः । दयाकृतोऽतिरिच्याऽसौ दयालुः खलु वर्त्तते ॥१८९॥
[९३]यात कञ्चुकमेतन्मे समादाय, पितुः पुनः । क्षिपतैनन्मुखे चैव, द्रष्टा चासौ भविष्यति— ॥१९०॥
बान्धवैश्च समैर्यूयं ततो मामुपयात च" । [९४]प्रस्थानायोद्यते संघे पिताऽमीषां जगाद तु— ॥१९१॥
"क्षीण बुद्धिरिति कृत्वा यूयं मां वित्थ यद्यपि । यूषपस्य शरीरस्य गन्धं जिघ्राम्यहं परम्" ॥१९२॥
[९५]तेऽवदन्—"साक्षिणं कृत्वाऽल्लाहं वच्मो ध्रुवं भवान् । प्राक्तने विभ्रमे ह्येव मग्नस्त्वद्यापि तिष्ठति" ॥१९३॥
[९६]शुभस्य सूचको मर्त्यो यदा प्राप च तत् स्थलम् । अक्षिपत् (कञ्चुकं) तस्य तन्मुखे सोऽभवत् पुनः— ॥१९४॥
द्रष्टा स चाब्रवीदेवम्—किन्नाऽहं प्रावदं पुरा । अल्लाहदयया सर्वं वेद्मि यूयं न वित्थ यत् ? ॥१९५॥
[९७]तेऽवदन्—हे पितर्नः ! त्वमस्माकं पापकारणात् । क्षमा-दानं किलाऽस्मभ्यं याचस्व सत्यतो वयम्— ॥१९६॥
अतिष्ठाम (महा) पापाः; [९८]सोऽवदत् "स्वं प्रभुंन्वहम् । क्षमादानं हि युष्मभ्यं याचिष्ये, नाऽत्रसंशयः— ॥१९७॥
वर्त्ततेऽसौ क्षमाशीलो दयालुश्चापि वर्त्तते । [९९]यदा ते यूषपं प्रापुः पितरावात्मनो हि सः— ॥१९८॥
स्वकीयेऽवासयत् पार्श्वे प्राह चैवं—युवां किल । मिश्रदेशं प्रतिष्ठेतामल्लाहे सकृपे सति— ॥१९९॥
युवयोः सर्वसौख्यं स्यात्; [१००](अवाप्तौ) पितरौ पुनः । उन्नते ह्यासने तावत् तौ समारोपयत्तदा— ॥२००॥
सर्वे लोकास्तदग्रे तु प्रणिपातेन चाऽनताः । सोऽवदत्—हे पितः ! मे तु पूर्वस्यैतद् हि वर्त्तते— ॥२०१॥
स्वप्नसन्दर्शनस्याद्य फलं वैशद्यमागतम् । प्रभुर्मेऽकृत तत्सत्यम्, कृपां चैवाऽकरोन्मयि— ॥२०२॥
विमोच्य खलु कारायाः देशात् प्रापय्य चैव वः । शातनोऽजनयत् क्लेशं बन्धुभिर्मम यद्यपि ॥२०३॥
दयावान्त्स प्रभुर्मे तं हृदाऽभिप्रैति यं जनम् । तत्वदर्शी तथा विज्ञो वर्त्ततेऽसावसंशयम् ॥२०४॥
[१०१]"प्रभो ! राज्यमयच्छस्त्वं मह्यं, चाशिक्षयः पुनः । अर्थेष्वन्तस्तलं गन्तुं, व्योम्नामुर्व्याश्च सर्जक ! ॥२०५॥
जिहाने परलोके च त्वमेव मेऽविता सखा । त्वञ्च मां प्रेरयैवं यत् मृत्युकालेऽप्युपस्थिते— ॥२०६॥
स्वात्मार्पकत्ववैशिष्ट्यं धारयेयं निरन्तरम् । साधुभिश्च जनैः सार्धं संगतं मेऽथ कारय ॥२०७॥
[१०२]इदं गह्वरवृत्तं यत् काशयामो वयं त्वयि । निकषा त्वं तु तान्नाऽसीर्यदा गुह्यैः प्रमन्त्रणैः— ॥२०८॥
सम्मताः किल ते भूत्वा प्रायन् वै निर्णयान् निजान् । [१०३]चेष्टमानेऽपि चात्यर्थं त्वयि लोकास्तु साऽधिकाः ॥२०९॥
तादृशाह्येव ये नैव श्रद्दधाना भवन्ति ह । [१०४]त्वञ्चाऽपि याचसे तान्नो तस्मात्कांचित्पुरस्क्रियाम् ॥२१०॥
केवलं स्मारिका ह्येव जनेभ्योऽदस्तु वर्त्तते । [१०५]व्योमसूर्व्याञ्च तिष्ठन्ति लक्ष्माणि सुबहूनि तु ॥२११॥
अध्वनीनास्तदप्येते तिष्ठन्त्येभ्यः पराङ्मुखाः । [१०६]अनेके तेऽपि चैवैषामल्लाहे श्रद्धरा हि ये— ॥२१२॥
प्रतिम्नः पुनरप्येते तस्यान्यान् कुर्वते (बत) । [१०७]अनपेक्षाः किमेते यन्नाल्लाहात् काऽपि यातना ॥२१३॥
शक्ता संवरणे त्वेषां, शक्ता सा घटिकाऽथवा । नोपयातुमकस्माद्धि, भविष्यन्ति यदाऽपि ते— ॥२१४॥
प्रमादेऽतिशये मग्नाः सर्वथा; [१०८]ब्रूहि खल्विदम् । मम त्वेष हि मार्गो यत्-स्तौम्यल्लाहं तथा च मे ॥२१५॥
सन्ति येऽप्यनुगन्तारः सुष्ठु बोधेन चैव ते । महिम्ना शालतेऽल्लाहो, नो तेषाञ्च कथञ्चन— ॥२१६॥
प्रतिमापूजका ये वै भवाम्येष तु कश्चन । [१०९]प्राक्च त्वच्चाप्यथास्माभिः प्रेषिता येऽभवन् जनाः ॥२१७॥
आवासिनो हि तेऽप्यासन् प्रेरिताश्चाऽभवन् भृशम् । विहारं किन्न तेऽकुर्वन् धरित्र्यां प्रविलोकितुम्— ॥२१८॥
कीदृशं तैः समं वृत्तं प्रागभूवंस्ततस्तु ये । धारयन्ति दरं येऽत्र वासस्तेभ्यः परोभवः ॥२१९॥
सूत्तमः, किन्न तद् यूयं प्रवर्त्तध्वे धिया पुनः ? । [११०]तथेदं घटितं किञ्च, निराशा वाग्घरा यदा ॥२२०॥
अजायन्त, तदा चैभिः "निषिद्धाः" इत्यबुध्यत । तदाकस्माद् उपेता तानस्माकं हि सहायता ॥२२१॥

CC-0. In Public Domain. Digitized by eGangotri

अभीष्टाश्चाऽभवन् ये ऽपि तेऽस्माभिर्गोपिताः किल । शक्यते नाऽपनेतुञ्च यातना नः कथञ्चन ॥२२२॥
आपतन्ती पुनस्तेभ्यो ये तु जाल्मा जना इह । [१११]ऐतिह्येऽसंशयं तेषां पण्डितेभ्यः समाहिता ॥२२३॥
शिक्षा सन्तिष्ठते तावत्, छन्दसा घटिता न वा । कथा काप्यस्ति खल्वेषा, परं त्वस्त्यनुमोदनम् ॥२२४॥
पुरा जातस्य सर्वस्य; विस्तरोऽप्यखिलस्य च । दयाकृत्, श्रद्धरेभ्योऽथ वर्त्तते मार्गदर्शकम् ॥२२५॥

योगः—२२५

CC-0. In Public Domain. Digitized by eGangotri

१३

सूक्तम्–ह्राद:

(अर-रअ्द)

(महाकालेऽवतीर्णास्त्रिचत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]शास्त्रायाता भवन्त्येते ह्यलिफ० लाम० मीम० रा० । प्रकाशं चागमद् यद्धि त्वयि तु त्वत् प्रभोः समम् ॥ १ ॥
सत्यमेव तु तद् (हन्त !) न परन्त्वधिका जनाः । श्रद्दधाना भवन्त्यत्र; [2]ह्यल्लाहः स विहायसः ॥ २ ॥
उदनैषीद् विनाधारं यस्ततश्चारुरोह च । राजसिंहासनं, किञ्च सूर्याचन्द्रमसावसौ ॥ ३ ॥
सेवाकार्यकृते तावत् परस्तात् खल्वयोजयत् । निश्चितावधये द्रव्यं गतिमत् सर्वमेव च ॥ ४ ॥
असावेवास्य सर्वस्य सूत्रधारः प्रबन्धकः । स्पष्टलक्ष्माणि वैशद्याद् वर्णयन् स हि तिष्ठति ॥ ५ ॥
संगन्तुं स्वं प्रभुं यूयं विश्वस्यात कदाचन । [3]स चैवाप्रथयद् यो हि धरां तत्र च योऽसृजत् ॥ ६ ॥
स्थिरान् शैलान् नदांश्चैव वहतः, निर्ममेऽथ यो । जायमानस्य सर्वस्य भेदौ स्त्रीपुंसलक्षणौ ॥ ७ ॥
स एवाऽवृणुते यो हि वासरं निशया, ध्रुवम् । मनीषिभ्योऽत्र लोकेभ्यो लक्ष्माण्यन्तर्हितानि हि ॥ ८ ॥
[4]धरायां विविधा देशाः संयुता अपि सन्ति च । द्राक्षोद्यानानि, कृष्याणि सन्ति क्षेत्राण्यथाऽपि च ॥ ९ ॥
खर्जूराणां पलाशाश्चाप्येकानेकप्रकाण्डकाः । एकरूपेण सिच्यन्ते सर्वे यद्यपि वारिणा ॥१०॥
वर्धयामो वयं कांश्चित् फलैस्तेनाप्यपेक्षया । द्रुमाणां तावदन्येषां, लक्ष्माण्यन्तर्हितानि वै ॥११॥
मनीषिभ्योऽत्र लोकेभ्यः; [5]त्वमाश्चर्यं पुनर्यदि । कर्त्तुमिच्छसि तत्तेषां वाद आश्चर्यकृद्धि सः ॥१२॥
"यातेष्वस्मासु मृद्रूपम्, भविष्यामः पुनर्नु, किम्"? । एत एव प्रभौ स्वस्मिन् गतश्रद्धा हि येऽभवन् ॥१३॥
त एवैते जना येषां कन्धराः परितोऽभवन् । मुक्तामालाः, इमे ह्येव सत्यमर्हन्ति चाऽनलम् ॥१४॥
यत्र वासस्तथा चैषां शश्वदेव भविष्यति । [6]भद्रात् पूर्वमभद्राय शीघ्रतां जनयन्ति च ॥१५॥
पुरस्तात्ते जना एते प्रागेभ्यो यांस्तु यद्यपि । बह्व्यो हि यातनास्तावत्, प्रभुस्ते वर्त्तते परम् ॥१६॥
क्षमावांस्तेषु पापानि कुर्वाणेषु जनेष्वपि । तीक्ष्णदण्डो प्रभुस्ते वै वर्त्तते नाऽत्र संशयः ॥१७॥
[7]श्रद्विहीना भणन्त्येवम्, "अस्मिन् अस्य प्रभो र्न किम् । लक्ष्मणस्त्ववतारोऽथ कृतोऽभूत् खलु कस्यचित् ? ॥१८॥
चेतकः केवलं त्वन्तु वर्त्तसे, मार्गदर्शकः । तत्र तत्र हि लोकेषु जात एवाऽस्ति कश्चन ॥१९॥
[8]ध्रियते स्त्री च यं गर्भे वेत्ताऽमुष्याऽपि च प्रभुः । तत्राधिक्यस्य चैवाऽस्ति न्यूनतायास्तथाऽपि च ॥२०॥
मानोन्मानेन सर्वञ्चाधिप्रभु वस्तु तिष्ठति । [9]प्रत्यक्षं यत् परोक्षं च ज्ञानवानुभयोर्हि सः ॥२१॥
महानेष गरीयांश्च; [10]समास्तस्मै समे जनाः । मन्त्रयन् योऽपि मन्दं स्यात् उच्चैर्योवाऽपि मन्त्रयन् ॥२२॥
निलीनो निट्तमो मध्ये दिने यायावरोऽपि वा । [11]देवाः पश्चात् तथाऽग्रे च तस्य तिष्ठन्त्यन्त्यनारतम् ॥२३॥
अल्लाहस्य समादेशात् तञ्च रक्षन्ति मानवम् । कस्यचिच्चापि लोकस्य दशायाः परिवर्त्तनम् ॥२४॥
नाल्लाहः कुरुते तावत्तदर्थं तत्र न स्वतः । हृदोद्भूता प्रजायेत प्रेरणा यावदेव तु ॥२५॥
यातनातिक्रमश्चापि न शक्यो, कुरुते यदि । यातनाऽऽपातनस्याऽयं निर्णयं नृपु केषुचित् ॥२६॥

CC-0. In Public Domain. Digitized by eGangotri

तं विहाय सहायश्च नृणामेषां न कश्चन । [१२]स एव यश्च युष्माकं मेघज्योतिःप्रदर्शकः ॥२७॥
भीतिर्येन च येनाऽऽशा चाप्यसावेव योऽभ्रकान् । (जलाऽऽपूर्णान्) उदस्ताच्च संस्तभ्नाति (सुखेन वै) ॥२८॥
[१३]ह्लादश्चैवाऽपि देवाश्च भयस्यै वाऽस्य कारणात् । प्रशंसन्तो विगायन्ति गरिमाणममुष्य हि ॥२९॥
ह्लादिनीर्विसृजत्येष तास्तथाऽऽपातयत्यपि । तत्र कामयते यत्र, सविवादाः परं जनाः ॥३०॥
अधिकृत्य किलाऽल्लाहं तिष्ठन्त्येव निरन्तरम् । समन्युः प्रवलश्चासौ; [१४]सत्यस्तस्यैव तु स्तवः ॥३१॥
तं विहायेतरं यं ते स्तुवन्तीह तु पूरुषाः । न तस्माद् वर्त्तते तेभ्यस्त्वत्र किंचित् पुनर्वचः ॥३२॥
(स्तवस्तेषां) तथा मोघो यथा कोऽपि करौ निजौ । प्यायतां मेघपुष्पस्य दिशायां चिन्तयन्निदम् ॥३३॥
आस्ये वेक्ष्यति मे हीदं प्रविशेन्नैव यद्यपि । अस्थानोपहितो ह्येवं स्वतः श्रद्धाविघातिनाम् ॥३४॥
[१५]इच्छयाऽनिच्छया वाऽपि यो वा को वाऽपि तिष्ठति । धरित्र्याञ्च विहायस्सु प्रणिपातान्नमस्क्रियाम् ॥३५॥
तस्मा एव समश्चापि चर्करीतीत्य (संशयम्) । नानमीति प्रतिच्छाया चाप्येषां सन्ध्ययोर्द्वयोः ॥३६॥
[१६]ब्रूहीमान् "कः प्रभुस्तावद् धरित्र्या वियतां तथा ? । ब्रूह्य"ल्लाहः", (पुनः) ब्रूहि "युष्माभी रक्षका मताः ॥३७॥
किन्न्वन्ये तं विहायैव येन स्वेभ्यः स्वतोऽपि तु । प्रविदन्ते हि हानिं वा न वा लाभमथापि च" ॥३८॥
ब्रूहि "चेदेतयोः साम्यमन्धसेक्षणयोः क्वचित् ? । अन्धकारे प्रकाशे वा कच्चित् साम्यं भवेदपि ? ॥३९॥
असृजन् वाऽथ ते चापि नीता ये ऽल्लाहकक्षताम् । किंचिदप्यत्र सो ऽल्लाहो यद्वदेवासृजत् किल ॥४०॥
सर्गयोरुभयोर्येन जाता तेभ्यो ह्यभिन्नता" ? । ब्रूहि "स्रष्टा तु सर्वस्य किलाल्लाहः, स एव च ॥४१॥
प्रभुत्वाच् छालते किं चाप्येक एवाऽधितिष्ठति" । [१७]अवर्षत् कमसौ व्योम्नो, नदा देहस्य चात्मनः ॥४२॥
मानेन सार्धमादाय प्रावहन् किल तज्जलम् । जलं तत् प्रवहत् फेनमुज्जगार च शोफवत् ॥४३॥
फेनं तत्तुल्यकक्षञ्च भवेत्तेष्वपि धातुषु । तापयन्ति हि यानग्नौ यन्त्रभूषणसिद्धये ॥४४॥
अनेन विधिनाऽल्लाहः सम्यगाविष्करोति हि । असत्यसत्ययोश्चैव; ततः फेनन्तु तत्र यत् ॥४५॥
शुष्कं सत्तद् विलोपं हि संप्रयात्यथ लाभकृत् । लोकानां यत्तु तद् भूमौ स्थिरं तत्र हि जायते ॥४६॥
अनेन विधिनाऽल्लाहः सम्यगाविष्करोति हि । [१८]भद्रं तेभ्यस्तु ये लोका अल्लाहादेशमन्विताः ॥४७॥
अन्विता ये तु नाऽऽदेशं स्वामिषु तेषु सत्स्वपि । पृथिव्यां सर्वद्रव्याणां तावन्मात्राधिकस्य च ॥४८॥
तत्समं ते प्रदास्यन्ति वन्धान्मोक्तुं स्ववर्ष्मणाम् । इमे ते हि जना येषां (सत्यं) तावद् भविष्यति ॥४९॥
दुष्ठु लेखांकनं ह्येव, वासस्तेषां च नारकः । प्रथितो भीषणोऽतीव वासो यो वर्त्तते किल ॥५०॥
[१९]यस्तु वेत्ति जनस्तावत् काशितं यदपि त्वयि । प्रभुणा तेऽस्ति तत्सत्यं, तथाऽऽचारो भविष्यति ॥५१॥
चक्षुषाऽन्धो यथाचारः ? सावधानास्त एव हि । भवन्ति सुधियो येऽत्र; [२०]वचनं प्रभुणा समम् ॥५२॥
पालयन्ति कृतं ये च न भञ्जन्ति वचश्च ये । [२१]योजयन्त्यथ सम्बन्धानादिष्टान् योक्तुमेव तु ॥५३॥
अल्लाहादेशतो ये च, स्वप्रभोर्ये च विभ्यति । दुष्ठु लेखांकनस्याऽऽस्ते भयं येषां च सर्वदा ॥५४॥
[२२]स्वप्रभोः कांक्षमाणाश्च प्रसादं सततं हि ये । कर्मसु संप्रवर्त्तन्ते धैर्यात्, पूजां तथैव च ॥५५॥
प्रतिष्ठितां हि कुर्वन्ति; दत्तमस्माभिरप्यथ । तद् व्ययन्ति समक्षञ्च परोक्षञ्चाऽथ दूषणम् ॥५६॥
अपघ्नन्ति हि भद्रेण त एवैते जनाः किल । उदर्को भविता येभ्यो गृहस्यो (भयलोकयोः) ॥५७॥
[२३]सन्ति शाश्वतिकारामाः, प्रवेक्ष्यन्ति हि यत्र ते । सन्ततिष्वथ जायासु पूर्वजेषु च ये पुनः ॥५८॥
भद्रलोका भविष्यन्ति प्रवेक्ष्यन्ति समं हि ते । उपैष्यन्ति च देवास्तान् द्वार्भ्यस्सर्वाभ्य एव तु ॥५९॥
[२४]शं प्रवर्षतु युष्मासु, तोषस्येदन्तु वः फलम् । उदर्कोऽवर्णनीयस्सन् भद्रस्तावद् गृहस्य हि ॥६०॥
[२५]धिग् जनांस्तांस्तु ये पूर्वं प्रतिज्ञां सुस्थिरां कृताम् । अल्लाहेन समं पश्चात् प्रभञ्जन्ति हि तामथ ॥६१॥
प्रभञ्जन्ति च सम्बन्धानादिष्टान् योक्तुमेव तु । अल्लाहादेशतः किं च भवे ये (सुमहत्) कलिम् ॥६२॥
भावयन्ति, तदर्थन्तु गृहं दुष्ठु हि वर्त्तते । [२६]वृत्तिं विकोचयत्यस्य यस्याल्लाहो हि कांक्षते ॥६३॥
वृत्तिं संकोचयत्यस्य (यस्य किम्वा स कांक्षते) । भाविकं जीवनं लब्ध्वा ह्येव नन्दन्ति ते जनाः ॥६४॥
जीवनं यद्यपीदन्तु परलोकव्यपेक्षया । कानिचित् सौख्यजातानि विहाय न किलाऽधिकम् ॥६५॥
[२७]श्रद्विहीना भणन्त्येवमस्मिन्नस्य प्रभो र्न किम् । लक्ष्मणस्त्ववतारोऽथ कृतोऽभूत् खलु कस्यचित् ॥६६॥
ब्रूहि "अल्लाहः पथभ्रष्टं कुरुते यं स वाञ्छति । योऽभियात्यथ तं चासौ दर्शयत्ययनं स्वकम् ॥६७॥

CC-0. In Public Domain. Digitized by eGangotri

[28]ईदृशा ह्येव ते लोकाः श्रद्धरा ये ऽभवन्नथ । स्मृत्वा स्मृत्वा च ये ऽल्लाहमन्तस्तोषं प्रयान्ति हि ॥६८॥
श्रूयतां हृदयं स्मृत्वाऽल्लाहस्य तुष्यते परम् । [29]श्रद्धरा ये ऽभवन् ये चाप्यकुर्वन् कर्म सूत्तमम् ॥६९॥
परा स्यान्निर्वृतिस्तेभ्यो यात्रान्तश्चापि सूत्तमः । [30]इतीत्थं प्रैषयाम त्वामेकस्मिन् हि गणे वयम् ॥७०॥
अयान् यस्मात् पुराऽनेके गणाश्चैवाऽत्र भूतले । येन यत् काशितं किंचित् त्वयि त्वं श्रावयेरमून् ॥७१॥
श्रद्विहीना यदप्येते सन्ति तस्मिन् दयावति । ब्रूहि "असावेव मे भर्त्ता स एवाऽथ ममाश्रयः ॥७२॥
परावृत्य च गन्तव्यः स एव मे च वर्त्तते । [31]तादृशमभविष्यच्चेत् कुराणं येन पर्वताः ॥७३॥
चालिता अभविष्यन् हि, धरित्री स्फोटिता ऽथ च । अभविष्यन् मृता येन भाषिताः पुनरेव च ॥७४॥
(असेत्स्यत् किं तदा, ऽप्येते श्रद्दधानास्तु वै जनाः । नाऽभविष्यन् कदाचित्तु), सत्यन्त्वेतत् प्रभुर्ह्यसौ ॥७५॥
सर्वाधिकारलाभेन त्वतिरिच्येतरान् स्थितः । श्रद्धराः किं न जानन्ति ह्यैषिष्यच्चेत् प्रभुस्ततः ॥७६॥
अनेष्यत् स समान् लोकान् पथा, येऽश्रद्धरास्त्विह । तत्तत् कर्मवशात्तेषां आपद्यन्ते हि ते व्यथाम् ॥७७॥
गृहासन्नं क्वचित् किम्वाऽवतारोऽस्याः प्रजायते । प्रतिज्ञाऽऽपूर्यते यावत् त्वाल्लाही, ह घटिष्यति ॥७८॥
इत्थमेव हि साभ्यासम्, प्रतिज्ञामतियाय तु । निश्चितं ज्ञायतामेतत् नैवाऽल्लाहः प्रवर्त्तते ॥७९॥
[32]अनेके परिहासञ्च वाग्घरा गमिता पुरा । युष्मच्चापि; परन्त्वेतानऽसहे खल्वहं चिरात् ॥८०॥
ततोऽहं निग्रहं तेषामकार्षं, कीदृशो नु मे । उग्र आसीदसौ दण्डः; [33]किन्नु यः पर्यवेक्षकः ॥८१॥
जीवजन्तोः समस्याऽपि वृत्तेः खल्वत्र तिष्ठति । (समस्तेन भवेत् सोऽपि तद्विधो न हि यो जनः) ॥८२॥
प्रतिमानस्तदप्यस्याल्लाहस्य कल्पिता जनैः । ब्रूहि तान् "दिशतैतेषां मनाग् नामानि खल्विह ॥८३॥
किम्वाऽल्लाहस्य तद् यूयं बोधनाय समुत्सुकाः । धरित्र्यां यन्न बोद्धुं स प्रभवत्यत्र किंचन ॥८४॥
केवलो वाक्प्रपञ्चो हि युष्माकमयमस्ति वा ? । न तावत्, किन्तु चातुर्यं श्रद्विहीना हि ये जनाः ॥८५॥
तेषां विभूषितं सम्यक् कृतमित्थं हि वर्त्तते । रुद्धमार्गाः कृतास्ते च, यं पथो भ्रंशयेत् प्रभुः ॥८६॥
नास्ति तस्य जनस्याऽत्र कोऽपि मार्गप्रदर्शकः । [34]जीवने तु जिहानस्य ह्येव तेभ्योऽस्ति यातना ॥८७॥
परस्मिन् यातना लोके त्वितोऽप्यस्त्यति भीषणा । नाऽथ कश्चिच्च रक्षेद् योऽल्लाहस्य निग्रहादमून् ॥८८॥
[35]प्रतिज्ञातस्य नाकस्य त्रस्नुभ्यो वृत्तमीदृशम् । नीचैर्नद्यो वहन्त्यस्य, फलच्छायेऽत्र शाश्वते ॥८९॥
पुरस्कारस्तु तेभ्योऽयं त्रस्नवो ह्यत्र ये जनाः । श्रद्विहीनजनेभ्यस्तु पुरस्कारोऽनलो मतः ॥९०॥
[36]शास्त्रं येभ्यस्तथा ऽस्माभिः प्रदत्तं मुदिता हि ते । तेन यत् काशितं तावत् त्वय्यस्माभिस्तु वर्त्तते ॥९१॥
तादृशास्तत्र चैवाऽपि गणा येऽथ निषेधकाः । केषाञ्चित् तस्य भागानां, ब्रूहि "दिष्टोऽस्म्यहन्तु यत् ॥९२॥
अल्लाहस्य स्तुतिं कुर्यां न मन्येयेतरं तथा । प्रतिमानममुष्याऽत्र, ह्याह्वयेऽहं तमेव च ॥९३॥
परावृत्य च गन्तव्यः स एव मम वर्त्तते । [37]अर्वाणां भाषया चेदमस्माभिः काशितं त्वयि ॥९४॥
समादिश्य तदित्थं हि, लब्ध्वा ज्ञानं ततोऽपि चेत् । तेषां कामानुगस्त्वं स्या नाल्लाहाल् लप्स्यसे पुनः ॥९५॥
सखायं रक्षकं कञ्चिद् गोप्तारं चाऽथ कञ्चन । [38]अनेकान् वाग्घरांश्चाऽथ प्रैषयाम वयं पुरा ॥९६॥
सपत्नींश्चैव सापत्यान् अकुर्म चैव तान् वयम् । वाग्घरः कोऽपि नातिष्ठत् साधिकारो ह्यसौ तु यत् ॥९७॥
विनाऽल्लाहसमादेशं काशयेल्लक्ष्म किञ्चन । अक्षरेषु हि विन्यस्ता प्रतिज्ञा सकलाऽपि तु ॥९८॥
[39]नामशेषं करोत्येष तद् यदल्लाह इच्छति । (इच्छया निजयैवासौ) करोत्यन्यच्च सुस्थिरम् ॥९९॥
अमुष्यैव समीपं च तथाऽऽस्ते मूलपुस्तकम् । [40]प्रतिज्ञा पुनरस्माभिः सार्धमेभिस्तु या कृता ॥१००॥
तदंशं दर्शयेमाऽपि क्वचित् त्वामथवा पुनः । कुर्यामेवावसादन्ते, प्रापणं ह्येव केवलम् ॥१०१॥
कर्त्तव्यं तेऽस्ति (दिष्टस्य) लेख्याधानं ममाऽथ च । [41]पश्यन्तीमे न किं प्रान्ताद् धरित्र्या हि तटान् वयम् ॥१०२॥
प्रापयामः किल ह्रासं सततं, न च कश्चन । अलं व्याक्षेप्तुमस्त्यत्र त्वाल्लाहं निर्णयं किल ॥१०३॥
लेख्याधाने तथाऽस्मिंश्च शीघ्रकारी भवत्यसौ । [42]ये च जाताः पुरा त्वेभ्यस्तेऽपि कैतवमाचरन् ॥१०४॥
कैतवं सर्वमल्लाहस्त्वधिष्ठाय परं स्थितः । वेत्त्यसौ योऽपि जीवोऽत्र यस्य चाप्यर्जने रतः ॥१०५॥
वेत्स्यन्ति श्रद्विहीना द्राक् कस्मै गेहफलं त्विह । [43]श्रद्विहीना भणन्त्येवम् "प्रेषितो नासि वाग्घरः ॥१०६॥
ब्रूहि "अल्लाहः समर्थोऽस्ति साक्षिरूपेण मध्यगः । आवयोरुभयोर्मध्ये शास्त्रज्ञो यस्तथैव च" ॥१०७॥

योगः—१०७

CC-0. In Public Domain. Digitized by eGangotri

१४

सूक्तम्–अब्रह्मः

(इब्राहीम)

(महाकालेऽवतीर्णा द्विपंचाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अलिफ० लाम० रा० शास्त्रमिदं यत् काशितं त्वयि । तमसस्त्वं जनान् ज्योतिर्गमयेर्येन खल्विह ॥ १ ॥
प्रभोरादेशतस्तेषां पन्थानमनु तस्य हि । प्रभुत्वात् शालते यस्तु प्रशस्यो यश्च केवलः ॥ २ ॥
[2]अल्लाहो, विभवो यस्य यत्तत्र व्योमसु स्थितम् । धरित्र्यां यच्च किं चापि, कष्टं सन्तिष्ठतेऽथ च ॥ ३ ॥
गुर्वीभ्यो यातनाभ्यस्तु तेभ्यो ये श्रद्धरा न हि । [3]तेभ्यो येषां पुनः प्रेष्ठं परलोकव्यपेक्षया ॥ ४ ॥
भाविकं जीवनं, ये च पथो ऽल्लाहस्य वै जनान् । वारयन्त्यथ तिर्यञ्चं विधाय काशयन्ति तम् ॥ ५ ॥
मग्ना अन्धतमस्येते भवन्ति सुतरां जनाः । [4]वाक्प्रवेत्ता स्ववर्गस्य प्रेषितो ऽभूच्च वाग्घरः ॥ ६ ॥
यत्र कुत्राप्यथाऽस्माभिर्वर्गेषु येन तत्र सः । वर्णयेद् विशदं सर्वम्; अल्लाहो यन्तु कांक्षते ॥ ७ ॥
पथभ्रष्टं विधत्ते तं यमन्यं चाऽथ कांक्षते । सन्मार्गयायिनं तञ्च कुरुते (नाऽत्र संशयः) ॥ ८ ॥
प्रभुत्वाच्छालते चासौ तत्वदर्शी तथैव च । [5]प्रैषयाम वयं मूषं चाऽथ लक्ष्मभिरात्मनः ॥ ९ ॥
तमसो ऽसौ जनान् ज्योतिरात्मनो गमयेद् यथा । स्मारयेच् च दिनान्येनानल्लाहस्य तथैव यत् ॥१०॥
कृतज्ञाय च तुष्टाय लक्ष्माण्यत्र महान्ति हि । [6]स्मर्यतां बान्धवान् मूषः स्वकीयानवदद् यदा ॥११॥
"युष्मासूपकृतं यूयमल्लाहेन निबोधत । अरक्षत् स यदा युष्मान् लोकान्त्सर्वान् (पुराकिल) ॥१२॥
प्रिययौनस्य लोकेभ्यो युष्मान् येऽत्यतुदन् भृशम् । अघ्नन् बालांश्च वोऽरक्षन् कलत्राण्यसुभिः सह ॥१३॥
परीक्षा महतीयं वः प्रभुणा वस्त्ववर्त्तत" । [7]स्मर्यतां च यदा युष्मान् प्रभुर्वः खल्वसूचयत् ॥१४॥
"अधिकं वः प्रदास्यामि कार्त्तज्ञं दर्शयेत चेत् । दुःखदा यातना मे स्यात् अकृतज्ञा भवेत चेत्" ॥१५॥
[8]मूषः प्राह पुनः किञ्च "यदि यूयं तथेतरे । धरित्र्यां ये वसन्त्यत्र संघभावमुपेत्य हि ॥१६॥
श्रद्विहीना विजायन्तेऽल्लाहस्तेनापि वर्त्तते । अनपेक्षोऽधिकारी च प्रशंसाया (इति ध्रुवम्) ॥१७॥
[9]पूर्वजानां न जानीथ प्रवृत्तीः किन्नु वै नृणाम् । नहुषाऽऽदसमुद्गानामायतीनां तथैव च ॥१८॥
तान्न वेत्ति विना ऽल्लाहं को, ऽप्युपायंस्तु लक्ष्मभिः । वाग्घरास्तांश्च ते पाणीन् स्वास्येष्वावेशयन् पुनः ॥१९॥
प्राहुरेवञ्च "यद् दत्वा प्रेषितस्त्वं न तद् वयम् । मन्यामहेऽथ यत् कृत्वा यूयमाह्वयथेह नः ॥२०॥
तस्मिन् महान् हि सन्देहो जायते हृदयेषु नः । [10]वाग्घरा अथ तांस्तेषां प्राहुः "किं न्वस्तिसंशयः ॥२१॥
अल्लाहविषये कश्चित् सर्जको यो हि वर्त्तते । व्योम्नां चैव धरित्र्याश्च, युष्मानाकारयत्यसौ ॥२२॥
क्षमतां येन पापानि युष्माभिः प्रार्जितानि हि । व्याक्षिप्तञ्च पुनः कुर्यात् कंचित् कालावधिं यथा" ॥२३॥
तेऽवदन् "यूयमस्माभिः तुल्याकारा हि मानवाः । रोद्धुकामास्तथा यूयमस्मांस्तस्मादपूजयन् ॥२४॥
पूर्वजा यं किलाऽस्माकं, तदस्मांस्त्वं प्रदर्शय । विशदं लक्ष्म किंचित्; [11]तानाहुस्तेषां च वाग्घराः ॥२५॥
"भवामो ननु युष्माभिः तुल्याकारा हि मानवाः । यं स कामयते स्वेषां तमेव दयते प्रभुः ॥२६॥

CC-0. In Public Domain. Digitized by eGangotri

नाधिकारस्य च क्षेत्रे त्वस्माकं वर्त्तते न्विदम् । दर्शयेम हि यल्लक्ष्माऽल्लाहादेशान्तरेण वः ॥२७॥
श्रद्धरैस्त्वथ चाल्लाहे ह्येव विश्वस्यतामिति । [12]मार्गा उद्घाटितास्तेन त्वस्माकं सन्ति नो यदा ॥२८॥
वयन्तत् केन नोऽल्लाहे कुर्याम प्रत्ययं तदा । कष्टं यज्जन्यतेऽस्मभ्यं युष्माभिस्तद् वयं पुनः ॥२९॥
मर्षिष्यामो हि; तैर्लोकैः प्रत्ययोऽल्लाह एव तु । कार्यः संप्रत्ययस्यास्ते येषां शीलं तु सर्वथा ॥३०॥
[13]श्रद्विहीनाश्च येऽवोचंस्ते निजानथ वाग्धरान् । "सत्यं प्रद्रावयिष्यामः स्वधराया वयन्तु वः ॥३१॥
निवर्त्तध्वं न चेद् यूयं अस्मदीये पुनर्मते" । ततस्तेषां प्रभुस्तेषु तावदित्थमकाशयत् ॥३२॥
"सत्यं विनाशयिष्यामो जालमानेतान् समान् वयम्" । [14]तदूर्ध्वं वासयिष्यामो युष्मांश्चास्यां क्षितौ किल ॥३३॥
इदं तस्मै प्रकुर्याद् यो भयं मत् सन्निधौ स्थितेः । बिभीयाच्चैव यस्तावद् भर्त्सनान् मामकादथ ॥३४॥
[15]साह्यमैच्छन् ततस्ते च, विफलश्चाभवत् पुनः । साहसिक्याश्रयी किं च योऽप्यतिष्ठद् दुराग्रही ॥३५॥
[16]नारकः सम्मुखं तस्य तथाऽसौ पाययिष्यते । लोहितेन कृतः पाथः; [17]यमसावाचमिष्यति ॥३६॥
समर्थो न परं त्वस्य निगरणे भविष्यति । मृत्युर्दिशो दिशश्चैनं किं च पर्याक्रमिष्यति ॥३७॥
प्रमीतो न तथा ऽप्येष तेन चापि भविष्यति । कर्कशा यातनाऽस्याग्र उपस्थायोपयास्यति ॥३८॥
[18]श्रद्विहीना अतिष्ठन् ये स्वप्रभौ ते जना इह । उत्प्रेक्ष्यास्तत् कृतैः कृत्यैर्भस्मरूपैर्हि केवलम् ॥३९॥
यत्र वात्यामये ह्यह्नि वातु वातो महाबलः । अर्जितं कणमेकञ्च न तिष्ठेत् तद्वशे ऽथ च ॥४०॥
परान्तं चेदमेवाऽत्र वैफल्यं वर्त्तते किल । [19]पश्यथेदञ्च किन्नैव यदल्लाहः किलासृजत् ॥४१॥
व्योमानि च धरित्रीञ्च सत्येनासौ तथैव च । कांक्षेत यदि, तद् युष्मान्त्समान् प्रद्रावयेदितः ॥४२॥
नवं सर्गं पुनश्चात्र कुर्याच्च चैव प्रतिष्ठितम् । [20]दुष्करं न मनागेतत् तथाऽल्लाहाय वर्त्तते ॥४३॥
[21]अल्लाहस्य समक्षञ्च यदोपायुरिमे जनाः । अवोचन् दलितास्तान् वै गुरवो ये ऽभवन् मताः ॥४४॥
"स्थिता युष्मान् वयन्त्वत्र किलानुयानबुद्धयः । यातनांशं किमस्मत् तत् प्रभो यूयं हि शक्नुथ ॥४५॥
अपाकर्त्तुं कथञ्चिद् वै; प्रत्याहुस्तेऽथ तान् पुनः । "अस्मानदर्शयिष्यच्चेत् अल्लाहस्त्वयनं पुनः ॥४६॥
युष्मानदर्शयिष्याम वयञ्चाप्ययनं (ध्रुवम्) । धैर्यं त्यक्त्वा समुद्विग्नास्तिष्ठेम यदि वा वयम् ॥४७॥
सन्तोषेण हि कार्येषु प्रवर्त्तेमहि, वर्त्तते । द्वयं तुल्यमिहास्मभ्यं, नाश्रयः कोऽपि तिष्ठति ॥४८॥
गोपायेद् यः किलाऽत्राऽस्मान्; [22]निर्णये विहितेऽथ च । शातनः प्राह "सोऽल्लाहः प्रतिज्ञामकरोद् ध्रुवम् ॥४९॥
युष्माभिः, सा प्रतिज्ञा च सत्या, ऽहञ्च तथाऽकृषि । प्रतिज्ञां किल युष्माभिः, परं तस्या विलंघनम् ॥५०॥
अहन्त्वकृषि युष्माभिः, न चैव मम कश्चन । युष्मास्वाऽऽस्ताधिकारोऽपि, ह्यघटत् केवलं न्विदम् ॥५१॥
ममाह्वाने पुनर्यूयमुररीचक्र मे वचः । दोषभाजं न तद् यूयं कथञ्चित् कुरुतेह माम् ॥५२॥
दोषभाजं त्विहात्मानं ह्येव तत् कुरुतेह (भोः !) । नाऽहं साह्यन्तु युष्माकं शक्तः कर्त्तुं कथञ्चन ॥५३॥
न यूयं मे ऽथवा साह्यं किंचित् कर्त्तुं हि शक्नुथ । समधर्मा कृतोऽहं यद् युष्माभिः प्रागितस्ततः ॥५४॥
विरक्तः सर्वथा जातः, जालमेभ्यो नाऽत्र संशयः । दुःखदा यातनास्तावत् तिष्ठन्त्येव हि शाश्वतम् ॥५५॥
[23]श्रद्धरा ये परं लोका अनुकूलकृतश्च ये । प्रवेक्ष्यन्ते हि ते तेषु सूद्यानेषु तु यत्र वै ॥५६॥
नद्योऽधस्ताद् वहन्त्यो वै भविष्यन्ति, सदा च ते । स्वप्रभोराज्ञया तत्र वत्स्यन्त्येषां परस्परम् ॥५७॥
अभिवादनशब्दश्च शान्तिशब्दो भविष्यति । [24]पश्यथाऽथ न किं यूयं अल्लाहोऽदर्शयत्तुलाम् ॥५८॥
यथा भद्रस्य वादस्य, स वै भद्रतरूपमः । मूलं यस्य गतं भूमौ नीचैः, शाखा गताः पुनः ॥५९॥
वियन् मध्ये; [25]समादेशात् स्वप्रभोश्चाप्यसौ सदा । समृद्धिं हि फलैर्याति; तस्मादित्थं च वर्णनम् ॥६०॥
अल्लाहेनोपमानान्तु तेऽवदध्युर्यथा समे । [26]अभद्रस्य तु वादस्य कृता ऽभद्रेण शाखिना ॥६१॥
समता, उन्मूलनं यस्य लीलयैव भवेत् किल । धरित्री पृष्ठतश्चापि, स्थिरता यत्र नास्ति च ॥६२॥
[27]वचसा सुदृढेनाऽथ सोऽल्लाहः श्रद्धरान् पुनः । दाढ्यं यच्छति लोकेऽस्मिन् परलोके तथैव च ॥६३॥
पथश्च भ्रंशयत्येष जालमान् लोकान्, प्रभुर्यथा । कांक्षते स तथैवाऽत्र कुरुते कर्म चापि हि ॥६४॥
[28]लोकिताः किन्न ते लोकाः युष्माभिः पर्यवर्त्तयन् । ये ऽल्लाहस्य दयां तावत् श्रद्धाहानावथाऽपि ये ॥६५॥
बान्धवान्त्सर्वनाशस्य स्वान् प्रणिन्युश्च वेश्मनि । [29]नारको यो हि ते तस्मिन् प्रवेक्ष्यन्त्यति गर्हितः ॥६६॥
किं च वासो भवत्येष; [30]प्रतिम्नोऽथ च ते व्यधुः । अल्लाहस्य, पथो येन भ्रंशयेयुः किलापरान् ॥६७॥

CC-0. In Public Domain. Digitized by eGangotri

ब्रूहि “(भोः !) भुज्यतां सौख्यं मनागत्र ततोऽथ तु । परावृत्योपगन्तव्यो नारको ह्येव सोऽनलः ॥६८॥
[31]बन्धका ये च मे जाताः श्रद्धरा ब्रूहि तानिदम् । पूजां प्रतिष्ठितां कुर्युः, यदस्माभिरदायि च ॥६९॥
व्ययं तस्माच्च ते कुर्युर्गुप्तरीत्या तथैव च । प्रकाशं गमयित्वा च समापातादनेहसः ॥७०॥
पूर्वन्तस्य यदा नैव पण्याचारो भविष्यति । न मैत्र्याचार एवाऽपि कश्चित् तावद् भविष्यति ॥७१॥
[32]सोऽल्लाहो ह्येव येनोर्वी सृष्टा व्योमानि खल्वथ । जलं व्योम्नस्तथाऽवर्षत् तेन चाप्युदभावयत् ॥७२॥
खाद्यरूपेण युष्माकं फलानि स प्लवानथ । सेवाकार्ये च युष्माकं तत्परानकरोदपि ॥७३॥
वारिधौ तत्समादेशात् प्लवन्तां येन ते भृशम् । सेवाकार्यपरांश्चैव युष्मभ्यमकरोन् नदान् ॥७४॥
[33]सेवाकार्यपरौ वश्च सूर्याचन्द्रमसावसौ । अकृताऽनारतं येन तौ सचंक्रमणौ स्थितौ ॥७५॥
सेवाकार्यपरं वश्चाहर्निशं समकल्पयत् । [34]युष्माभिर्याचितं यच्च तदशेषमपूरयत् ॥७६॥
यथावद् गणनाऽशक्या गणनामानसेष्वपि । सत्सु युष्मासु दत्तस्याऽल्लाहेन विभवस्य तु ॥७७॥
दुष्प्रणीतोऽकृतज्ञश्च वस्तुतोऽस्त्येष मानवः । [35]यदाऽब्रह्मस्तथा प्राह “प्रभो ! शं तनुतादिह ॥७८॥
वसतौ, माञ्च सापत्यं रक्षतान् मूर्त्तिपूजनात् । [36]अकुर्वन्त्सुबहूनेताः पथभ्रष्टान् प्रभो मम ! ॥७९॥
योऽनुयायात् परं मान्तु भवेत् सत्यं ममैव सः । यो न तिष्ठेत्तु मे शिष्टे तदाऽपि त्वन्तु वर्त्तसे ॥८०॥
क्षमाशीलो महान् किञ्च दयावान् पुनरेव च । [37]प्रभो नः ! वासितास्तावन् मया नैजा हि केचन ॥८१॥
वंश्या उपत्यकाभूमावनर्ह्यां कृषेः क्वचित् । मान्यात् ते मन्दिरादारात् प्रभो नः ! येन ते पुनः ॥८२॥
पूजां प्रतिष्ठितां कुर्युः, तत् त्वं स्वान्तेषु वै नृणाम् । उत्पादय रुचिं तेभ्यो ह्यन्नाद्यं संप्रयच्छ च ॥८३॥
तेभ्यो येन कदाचित् ते दर्शयेयुः कृतज्ञताम् । [38]प्रभो नः ! त्वं समं वेत्सि ह्यस्माभिः काशितन्तु यत् ॥८४॥
निगूढं यच्च नो, ऽल्लाहान्निगूढं नैव तिष्ठति । धरित्र्यां यद् भवत्यत्र यदाकाशेऽथ च स्थितम् ॥८५॥
[39]स्तवो मे केवलायाऽस्मै किलाऽल्लाहाय वर्त्तते । अस्मयेडं यदिष्वासं वार्धक्येऽप्यददद् हि मे ॥८६॥
प्रभुर्मे वर्त्तते श्रोता स्तवस्यापीति निश्चितम् । [40]प्रभो मे ! मां नमस्यायास्त्वं प्रतिष्ठापकं कुरु ॥८७॥
सन्ततिञ्चापि मे, याच्ञां तथैव चोररीकुरु । [41]प्रभो नः ! श्रद्धरान् माञ्च मदीयौ पितरौ तथा ॥८८॥
कर्मलेखाश्रयत्वेन निर्णयस्याहनि क्षमाम् । प्रयच्छ; [42]एते पुनर्जाल्माः कर्म यत्त्वपि कुर्वते ॥८९॥
वित्थाऽल्लाहं ततो नैव त्वनभिज्ञं कथञ्चन । कालं व्याक्षिप्तमेतेषां अह्ने तस्मै करोत्यसौ ॥९०॥
सकृदुन्मिषितं शश्वत् स्थास्यत्युन्मिषितं यदा । [43]उपेष्यन्ति च ते त्रस्ताः शीर्षैरुत्तानितैर्निजैः ॥९१॥
दशनैस्ताननावृत्तैः, स्वान्तैर्वायुगतैरिव । [44]चेतयैतान् अमुष्याह्नो यातनाऽऽपतिता यदा ॥९२॥
तेषु; जाल्मास्तदानीञ्च क्रोक्ष्यन्तीत्थं हि “नः प्रभो ! । अस्मभ्यमवधिं यच्छ मुहूर्त्ताय, तथा वयम् ॥९३॥
मंस्यामहे तवाह्वानं, यास्यामो ऽनु च वाग्घरान् । (वक्ष्यन्ते ते) पुरेतः किं प्रतिज्ञा नाऽसकृत् कृता ॥९४॥
युष्माभिर्यदिमे नाऽतः पतिष्यामो वयं परम्” । [45]वासस्तेषाञ्च लोकानां लोकैर्युष्माभिरकृत ॥९५॥
वासतेयेषु, ये स्वेषु ह्यात्मना ऽत्याचरन् किल । प्रकाशं चैदिदं स्पष्टं यद् वद् युष्मासु तैस्समम् ॥९६॥
अवर्त्तामहि, दृष्टान्ता अनेके वर्णितास्तथा । युष्मभ्यं पुनरस्माभिः; [46]कूटैस्तैश्चेष्टितं स्वकैः ॥९७॥
कूटं तेषां स्थितं चाऽऽस्ते किलाल्लाहान्तिकं पुनः । शैलसञ्चालने ऽप्यासीत् कूटं तेषान्तु शक्तिमत् ॥९८॥
[47]वाग्घरेभ्यः प्रदत्तेभ्यो वचोभ्योऽपगमिष्यति । अल्लाहस्तदिदं तावत् यूयं मैव चिचिन्तत ॥९९॥
सशक्तः किल सोऽल्लाहो ध्रुवञ्च प्रतिशोधनः । [48]विनिमयो धरित्र्यास्तु यदाऽन्यया भविष्यति ॥१००॥
व्योम चाऽपि यदाऽन्येन व्योम्नाऽथ विनिमास्यते । यश्च कश्च समे चापि तस्याल्लाहस्य सम्मुखम् ॥१०१॥
यदोपेता भविष्यन्ति ह्येकः सन् यो महाप्रभुः । [49]सापराधान् पुनर्यूयं द्रक्ष्यथ निगडैर्धृतान् ॥१०२॥
[50]परिधानं तथा तेषां कोकिलद्रवनिर्मितम् । अग्निज्वालाभिरास्यानि संकीर्णानि तथैव च ॥१०३॥
[51]येनाऽल्लाहः पुरस्कारं प्रतिजीवं प्रयच्छतु । यद्यदर्जितमस्त्येभिः तस्य तस्यानुरूपतः ॥१०४॥
द्राग् हि लेखाकृदल्लाहो वर्त्तते नाऽत्र संशयः । [52]वाचिकं तदिदं नृभ्यो विशदं प्रहितं च यत् ॥१०५॥
चेतन्तु ते किलाऽनेन जानन्त्वेतच्च ते हि यत् । केवलश्चैककश्चैव स ईड्यो भवतीह तु ॥१०६॥
[53]ध्यायन्त्वथाऽपि खल्वत्रं ये भवन्ति हि पण्डिताः ।

योगः—१०६॥

CC-0. In Public Domain. Digitized by eGangotri

१५

सूक्तम्–हिज्र

(अल हिज्र)

(महाकालेऽवतीर्णा एकान्नशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]भवन्ति पुस्तकाऽऽयाता अलिफ० लाम० रा० इमे । प्रत्यक्षस्य कुराणस्य;

इति त्रयोदशं पारायणम्

अथ चतुर्दशं पारायणम्

[2]श्रद्‌विहीना जनाः किल ॥ १ ॥
एषिष्यन्ति कदाचित् तु ह्यभविष्याम चेद् वयम् । आत्मार्पका महद् भद्रमभविष्यत् ततस्तु (नः) ॥ २ ॥
[3]विसृष्टिः क्रियतामेषां स्वैरमश्नन्त्विमे तथा । सौख्यानि चोपभुञ्जन्तु तथाऽऽशा विस्मृताविमान् ॥ ३ ॥
स्थापयेत् सततम्, सद्यो भोत्स्यन्ते ते यथार्थकम् । [4]योऽपि वासस्तथा ऽस्माभिर्नाशितस्तत् कृतेऽभवत् ॥ ४ ॥
निश्चितो निर्णयः पूर्वम्; [5]गणो नैवाऽत्र कश्चन । निश्चितं स्वं पुनः कालं शक्तोत्येतुमथाऽपि वा ॥ ५ ॥
पश्चात् स्थातुं क्वचिच्छ्‌वतः; [6]भणन्त्येवञ्च ते जनाः । अये पुरुष ! यस्मिन् हि स्मारणं काशितं त्विदम् ॥ ६ ॥
स त्वं नैवाऽत्र सन्देहः सोन्मादो ह्येव वर्त्तसे । [7]सत्यसन्धोऽसि चेत् तत् किं पुरस्तान्न करोषि नः ॥ ७ ॥
दिव्यांस्त्वम्; [8]वित्त दिव्यांस्तु प्रेषयामो वयं किल । अधस्तात् सह सत्येन केवलम्, न च ते जनाः ॥ ८ ॥
शक्नुवन्ति तदा लब्धुं स्वल्पां कालकलामपि । [9]स्मारणं काशितं ह्येतत् त्वस्माभिर्नात्र संशयः ॥ ९ ॥
रक्षकाश्चाप्यसन्देहं वयमस्य स्थिताः किल । [10]प्रैषयाम वयं पूर्वमनेकेषु गणेषु च ॥ १० ॥
वाग्घरान्; [11]घटितं नैव परमित्थं कदाचन । वाग्घरान् प्राप्य यन्नो तेऽपहसेयुर्हि तान् (बत) ॥ ११ ॥
[12]समतिक्रामयामो हि मनोभ्यस्तद् वयं खलु । एवं कृत्वा तु तत् सत्यम्; [13]विश्वसिष्यन्ति नोपरम् ॥ १२ ॥
तदेते, पूर्वलोकानां दृष्टान्तेषु स्थितेष्वपि । [14]व्योम्नोऽथ कञ्चन द्वारमुद्घाटयेम चेद् वयम् ॥ १३ ॥
तेभ्यस्तेन समारोहं प्रारभेरंश्च ते यदि । [15]गदिष्यन्ति यदा ऽप्येते "सभ्रमे नयने हि नः ॥ १४ ॥
ततोऽप्युत्तरमेते स्मो मायाग्रस्ता वयं जनाः । [16]वयं दृश्यान्यनेकानि व्योम्न्यतनम, तथा च तत् ॥ १५ ॥
अकुर्माऽऽभूषितं तावद् द्रष्टृभ्यः पुनरेव च । [17]शातनेभ्योऽप्यरक्षाम सर्वेभ्यस्तद् वयञ्च ये ॥ १६ ॥
उपसृष्टा हि तिष्ठन्ति; [18]तं विहाय तु शातनम् । शृणुयाद् यो रहस्येव, कुर्वाणं तञ्च तादृशम् ॥ १७ ॥
प्रत्यक्षाग्निशिखाऽजस्रमनुयाति; [19]तता धरा । अस्माभिर्हि पुनस्तस्यां निर्विष्टाः पर्वता ध्रुवाः ॥ १८ ॥
मात्रयाऽखिलरूपाणि वस्तूनि जनितानि च । [20]सञ्चितास्तत्र संभारास्तववृत्तेस्तथैव च ॥ १९ ॥
तेभ्यश्चैव न येषां त्वमन्नदो ननु तिष्ठसि । [21]तन्न किंचिन्न यस्याऽस्ति कोशागारो ममान्तिके ॥ २० ॥
मात्रयैव परं तस्य मोक्षं कुर्मो वयन्त्विह । [22]ईरयामः समीरञ्च वार्षिकं त्रियतोऽथ च ॥ २१ ॥
वर्षयामो जलं तेन सिञ्चामस्त्वां पुनस्तथा । नाधिकारे परं कोशस्तवामुष्य तु वर्त्तते ॥ २२ ॥

CC-0. In Public Domain. Digitized by eGangotri

[२३]प्राणदा वयमेवाऽत्र मृत्युदा वयमेव च । सम्पदां वयमेवाऽत्र सर्वभाजस्तथा स्थिताः ॥२३॥
[२४]वयं विद्मश्च युष्माकं सोत्साहा अत्र ये जनाः । ये च मन्दक्रियास्तावत् विद्मस्तांश्चाप्यथो वयम् ॥२४॥
[२५]त्वत् प्रभुस्तान् ध्रुवं सर्वान् समवेतान् करिष्यति । तत्वदर्शी स वै किञ्च ध्रुवं ज्ञाता च वर्त्तते ॥२५॥
[२६]असृजाम वयं किञ्च पंकात् कालाद्धि मानवम् । शुष्कमृदः; [२७]ततश्च प्रागसृजाम वयं किल ॥२६॥
जिन्नान् ज्वलनकीलेभ्यः; [२८]स्मर्यताञ्च पुनर्यदा । त्वत् प्रभुः प्राह वै देवान् पंकात् कालाद्धि मानवम् ॥२७॥
शुष्कमृदः किल स्रष्टुं भवाम्येष समुद्यतः । [२९]मयि सृष्टे तथाऽमुष्मिन् स्वात्मना प्राणिते मयि ॥२८॥
प्रणिपातपरा यूयं नमतैनं हि सम्मुखात् । [३०]प्रणिपातपरा देवास्ततस्ते ह्यभवन्त्समे ॥२९॥
[३१]इमालीनं विहायासौ प्रणिपातपरान् जनान् । न्यषेधत् समवेतुं हि; [३२]प्राह "किं कारणं हि यत् ॥३०॥
समवेतो न जातस्त्वमिभालीन ! नतान् जनान् ? । [३३]प्रत्यवादीदसौ "कस्मात् प्रणिपातपरो ह्यहम् ॥३१॥
भवेयं सम्मुखं तस्य सृष्टो यो मानवस्त्वया । पंकात् कालान्मृदोऽमुष्याः; [३४]तमाहाऽपेहि खल्वितः ॥३२॥
धिक्कृतं त्वं निजं विद्धि"; [३५]वेत्स्यसेऽथ च धिक्कृतः । निश्चितं त्वं यदा यावन्निर्णयाऽह्नोऽभ्युपैति हि" ॥३३॥
[३६]असावाह "प्रभो ! मह्यं देहि कालावधिं यदा । यावत्तेषां न जायेत पुनरुत्थापन नृणाम्" ॥३४॥
[३७]प्राह "तावत् प्रसीद त्वं, दत्तस्तुभ्यं मयाऽवधिः । [३८]तद्दिनं यावदत्राऽऽस्ते यस्य कालस्य निश्चयः ॥३५॥
[३९]प्राह "यद् वत् प्रभो ! मां त्वं पथभ्रष्टमिहाकरोः । पथोऽहञ्चापि तान् सर्वान् भ्रंशयिष्यामि खल्विह ॥३६॥
धरित्र्यां कापथं कृत्वा हृदयावर्जकं परम् । [४०]बन्धकांस्तान् विहायाऽत्र त्वद् भक्ति ये समाश्रिताः ॥३७॥
[४१]प्राह "पन्थास्त्वयं ह्येव सरलो गमकश्च मे । [४२]असन्देहमशक्तस्त्वं तेषु ये वन्धका मम ॥३८॥
तं विहायाऽनुसर्त्ता यः पथभ्रष्टेषु ते भवेत् । [४३]निश्चितं नरकस्तेभ्यः प्रतिज्ञातं तथाऽऽस्पदम् ॥३९॥
[४४]सप्तद्वाराणि चैवाऽस्य, प्रतिद्वारञ्च वर्त्तते । निश्चितोंऽकविभागो हि जनेभ्योऽमीभ्य एव च ॥४०॥
[४५]ध्रुवं वत्स्यन्ति ते लोका ये हि तावद् भयन्धराः । अन्तरे स्रोतसां किञ्चाप्युद्यानानामथाऽपि च ॥४१॥
[४६](वक्ष्यन्ते चैव ते) शान्त्या हित्वा चिन्तां तथैव च । प्रवेशं यात खल्वत्र; [४७]वैमनस्यञ्च यद् हृदि ॥४२॥
तेषां तिष्ठति तद् दूरे करिष्यामो वयं किल । भ्रातृभावमुपेतास्ते चान्योन्याभिमुखं तदा ॥४३॥
पटलेषु समासीनास्तत्र स्थास्यन्त्यसंशयम् । [४८]श्रमो वाधिष्यते कश्चिन्नैव तांस्तत्र नाऽपि वा ॥४४॥
करिष्यन्ते बहिस्तावत् ततस्तेऽथ कदाचन । [४९]वन्धकान् त्सूचय त्वं मे भवामि यदहं ध्रुवम् ॥४५॥
क्षमावान् सुमहान् किं च दयावानपि खल्वथ । [५०]यातना चाऽथ मेऽत्यन्तं कृच्छ्रदा यातना मता ॥४६॥
[५१]ब्रूहि तान् "प्राघुर्णयत्तु पुराऽब्रह्मस्य चाघटत् । [५२]यदा ते प्राप्नुवन् तं हि प्राहुः 'शांतिः', स चाऽऽह तान् ॥४७॥
"भयम्मे वर्त्तते युष्मत्"; [५३]त आहुः "न भयं कुरु । वृत्तं भद्रं वयं तुभ्यं प्रदद्मः सुधियः शिशोः ॥४८॥
[५४]प्राह "जाते मयि वृद्धे भद्रं वृत्तं ममास्तु किम् ? । कीदृशं दीयते वृत्तं भद्रं तत्साम्प्रतं पुनः ? ॥४९॥
[५५]त आहुः "सत्यमेव त्वां दद्मो वृत्तं शुभं वयम् । मा भवस्त्वं ततस्तेषां नैराश्यं यान्ति ये जनाः ॥५०॥
[५६]सोऽवदत् "प्रविहायैतान् पथभ्रंष्टांस्तु कोऽपरः । स्यान्निराशः प्रभोः स्वस्य दयाया मानवो भवे ॥५१॥
[५७]सोऽवदत् "प्रेषिता यूयं वाग्घराः ! वक्थ मामिदम् । किमुद्दिश्याऽत्र सम्प्राप्ता यूयम्; [५८]प्रत्यवदश्च ते ॥५२॥
दोषापूर्णं गणं त्वेकं प्रेषिताः स्मो वयं प्रति । [५९]लूतकौटुम्विकांस्त्यक्त्वा; रक्षिष्यामोऽपरान् समान् ॥५३॥
[६०]योषितं तस्य सन्त्यज्य यदर्थं नोऽस्ति निर्णयः । पश्चात् स्थायिषु खल्वेका साऽपि सत्यं भविष्यति ॥५४॥
[६१]प्रेषिता वाग्घराश्चायन् यदा लूतस्य गृह्यकान् । [६२]सोऽवदत् "न हि मेऽभिज्ञा यूयं लोकाः कथञ्चन ॥५५॥
[६३]तेऽब्रवदन् "न हि तत्; यस्मिन् तन्मनो व्यचिकित्सत । तदेवादाय युष्माकं वयं पार्श्वमुपस्थिताः" ॥५६॥
[६४]समं सत्येन युष्माकं वयं पार्श्वमुपस्थिताः । नाऽत्र कश्चिच्च सन्देहः सत्यवाचो वयं ननु ॥५७॥
[६५]साम्प्रतं स पुनस्त्वञ्च गृहीत्वा गृह्यकान् निजान् । कस्मिंश्चित् प्रहरे रात्रेर्गृहान्निर्याहि, चात्मना ॥५८॥
पृष्ठतो याहि तेषां त्वं, न पश्चाच्चावलोकताम् । कोऽपि युष्मासु मर्त्येषु, येयं ह्येव च सन्ततम् ॥५९॥
तां दिशं यद् वदादिष्टा यूयमत्र तु तिष्ठथ । [६६]निर्णयः स्वस्तथाऽस्माभिस्तस्मै संप्रेषितोऽभवत् ॥६०॥
मूलं कृत्तं यथा तेषां भवितोषस्युपागते । [६७]एतस्मिन्नन्तरे पौराः प्रायंस्तत्रातिहर्षिताः ॥६१॥
[६८]स आह "प्राघुणा एते मम, तेन कथञ्चन । तथा नैव प्रवर्त्तध्वं विगीतः स्यामहं यथा ॥६२॥

CC-0. In Public Domain. Digitized by eGangotri

[६९]बिभीत स्व प्रभोर्नो मां कुरुध्वं च गतत्रपम् । [७०]तेऽवदन् "किन्न रुद्धस्त्वं जातोऽस्माभिः पुरा यथा ।।६३।।
मा मनोरञ्जनं कार्षीः यस्य कस्याविवेकतः । [७१]सोऽवदत् "कर्त्तुकामाश्चेदेव यूयमिह स्थिताः ।।६४।।
तदेताः सम्मुखं वो मे पश्यतोपस्थिताः सुताः । [७२]जीवनेन शपेऽहन्ते (हे मुहम्मद) ते जनाः ।।६५।।
प्रवृद्धे स्वमदे मग्नाः (सत्य) मासन्; [७३]ततोऽथ च । उषस्येव समाक्रन्दः कश्चित्तान् संवृतान् व्यधात् ।।६६।।
[७४]वासतेयं तदस्माभिः नाशितं ह्येव सर्वथा । वर्षितास्तेषु पाषाणा वह्निदग्धमृदः पुनः ।।६७।।
[७५]ध्रुवं नैमित्तिकेभ्योऽत्र चिन्हानि सुबहूनि हि । [७६]अदः सन्तिष्ठतेऽद्यापि चाऽलुप्तं सरलाऽध्वनि ।।६८।।
[७७]श्रद्धरेभ्यो ध्रुवं चात्र प्रमाणानि बहूनि हि । [७८]दोषवन्तो ध्रुवञ्चासन् येऽभवन् वनवासिनः ।।६९।।
[७९]प्रतिशोधस्तदस्माभिस्तेषु चाऽपि कृतोऽभवत् । स्थितं स्थानद्वयञ्चैतत् वर्त्तते सरलाऽध्वनि ।।७०।।
[८०]वासिनो ये च हिज्रस्य न्यषेधंस्तेऽपि वाग्धरान् । [८१]अस्माभिस्तेभ्य आयाता निजा दत्तास्तथापि ते ।।७१।।
अतिष्ठन् सर्वथोदास्ताः; [८२]कृत्वा कृत्वा च पर्वतान् । अकुर्वन् ते गृहान् स्वीयान् गतचिन्तास्तथाऽवसन् ।।७२।।
[८३]उषस्येव तदाऽऽक्रन्दः कश्चित्तान् संवृतान् व्यधात् । [८४]रक्षणे न समर्थञ्च बभूव तैर्यदर्जितम् ।।७३।।
[८५]असृजाम च सत्येन वियतश्च धरां तथा । अन्तरा ते च यत्त्वाऽऽस्ते, समागन्तैव तत्क्षणम् ।।७४।।
क्षमया तेन वर्त्तस्व श्रीलया त्वं (मुहम्मद !) । [८६]ध्रुवं तेऽसौ प्रभुः स्रष्टा मनीषी चापि वर्त्तते ।।७५।।
[८७]प्रदत्ताः पुनरावर्त्याः सप्ताऽऽयाताश्च ते मया । तथाऽस्माभिः प्रदत्तन्ते कुराणं यदिदं महत् ।।७६।।
[८८]प्रदत्तः सुखसम्भारो योऽप्यस्माभिस्तु वर्त्तते । जनेभ्यो विविधेभ्योऽत्र मा द्राक्षीस्तं कदाचन ।।७७।।
गृध्नुना चक्षुषा; नाऽथ विषादं याहि कञ्चन । (दु)र्दशां प्रसमीक्ष्यैषां आनय स्वं भुजं तथा ।।७८।।
श्रद्धरेभ्यो जनेभ्यो हि; [८९]तदिदं चाप्युदीरय । विशदश्चेतकस्तावद् भवाम्येष तु खल्वहम् ।।७९।।
[९०](काशितं पुस्तकं ह्येतत् त्वयि तद् वद् यथा पुरा) । खण्डयितृषु संजातं काशितम्; [९१]खण्डशो व्यधुः ।।८०।।
ये कुराणम्; [९२]शपामो वै प्रभुणा ते, भवन्ति हि । प्रष्टव्याः खलु ते लोकाः किलास्माभिरसंशयम् ।।८१।।
[९३]अधिकृत्य तु तद् यत्ते कर्माऽकार्षुर्हि किञ्चन । [९४]तन्निशामय सुस्पष्टं यत्त्वमादिश्यसेऽथ च ।।८२।।
दूरं तेभ्यस्तथा याहि ये जना मूर्त्तिपूजकाः । [९५]रक्षितारो वयं ते च तेभ्यो ये तेऽपहासकाः ।।८३।।
[९६]अल्लाहस्य प्रतिम्नो ये घटयन्त्यपरानिह । वेत्स्यन्त्येतेऽचिरादेव परम्; [९७]विद्मो वयं हि तत् ।।८४।।
यत् कृतं तावदेतेषां मानसं प्रदुनोति ते । [९८]स्वप्रभोः सततं त्वन्तु तद्रमस्व स्तुतौ किल ।।८५।।
तिष्ठ चैषु पुनस्त्वञ्च प्रणिपातपरा हि ये । [९९]स्वप्रभोरारमस्व त्वं सततं चैव पूजने ।।८६।।
यावत् समक्षमभ्येति परिहार्यं हि नास्ति यत् ।

योगः—८६।।

CC-0. In Public Domain. Digitized by eGangotri

१६

सूक्तम्—मधु मक्षिका

(अन-नह्य)

(महाकालेऽवतीर्णाः अष्टाविंशत्युत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]समादेशः किलाऽऽल्लाहः प्राप्तुमेवोद्यतस्ततः । शैघ्र्यं मैव कुरुध्वं, स महश्चोच्चैश्च वर्त्तते ॥ १ ॥
प्रतिमभ्यस्तु वै तेभ्यो यानि मे घटयन्ति हि । [२]समादेशात्मना स्वेन बन्धकानामयं किल ॥ २ ॥
देवान् काशयतीष्टेषु बन्धकेष्वेव केवलम् । चेतयेयुर्यथा ते वै पूज्यो नान्यो विहाय माम् ॥ ३ ॥
तेन मत्तो विभेतव्यम्; [३]असौ सत्येन चासृजत् । धरित्रीञ्च तथाऽऽकाशान्, स चात्युच्चै र्हि वर्त्तते ॥ ४ ॥
प्रतिमभ्यस्तु वै तेभ्यो यानि मे घटयन्ति हि । [४]सोऽसृजद् विन्दुना मर्त्यं परं पश्यत खल्वसौ ॥ ५ ॥
प्रत्यक्षं विकृतो जातो विवादी किल विद्यते । [५]सोऽसृजच्च पशून् यत्र युष्मभ्यं संस्थितो ननु ॥ ६ ॥
उष्णताऽऽदानसम्भारो लाभास्तेभ्यस्तथेतरे । तेषामेव पुनः केचिद् युष्माकं भोजनान्यपि ॥ ७ ॥
[६]तत्र शोभा च युष्मभ्यं सन्ध्ययोरुभयोर्यदा । बहिर्वाहयथाप्येतान् गृहमानयथाऽपि च ॥ ८ ॥
[७]वहन्तो यान्ति ते भारं युष्मभ्यं तेषु धामसु । किञ्च यत्र न वै यूयं प्राप्तुं शक्ताः श्रमाद् विना ॥९॥
स्वेदसंद्रावणात्, सत्यं प्रभुर्वः करुणामयः । दयावांश्चापि; [८]किं चासावसृजद् गर्दभानपि ॥१०॥
हयानश्वतरांश्चैव युष्मदारोहणाय वै । शोभाऽभिवृद्धये चापि, सृजत्येष च किञ्चन ॥११॥
यन्न वो विदितं त्वस्ति; [९]पन्थाश्चैवास्त्यसावृजुः । अल्लाहं प्रति यो याति तिर्यञ्चश्चापि केचन ॥१२॥
ऐषिष्यच्चेदसौ सर्वाननेष्यद् वोऽयनाद् ऋजोः । [१०]स एवाऽसाववर्षद् यो जलं व्योम्नो यतः किल ॥१३॥
पेयसिद्धिर्हि युष्माकं वानस्पत्यं यतोऽथ च । चार्यन्ते पशवो यत्र युष्माभिः क्षुत् प्रशान्तये ॥१४॥
[११]तेन चैवेष सस्यानि युष्मभ्यं भावयत्यथ । द्राक्षाफलानि खर्जूरान् जयतूनांस्तथैव च ॥१५॥
फलान्यन्यविधानीह चापि, नैव तु संशयः । चिन्हान्यत्र निगूढ़ानि तेभ्यो ये हि मनीषिणः ॥१६॥
[१२]सूर्याचन्द्रमसौ तेन दिनञ्चैव निशाऽपि च । नियुक्ता, सर्व एवाऽपि युष्मान् संसेवितुं पुनः ॥१७॥
भारताश्च समादेशात् तारका अस्य संततम् । मनीषिभ्यो ध्रुवञ्चाऽत्र प्रमाणानि बहूनि हि ॥१८॥
[१३]द्रव्याणि बहुवर्णानि यान्यसावसृजत्तथा । धरित्र्यां युष्मदर्थं हि, प्रमाणं ध्रुवमत्र च ॥१९॥
तिष्ठत्येकं मनीषिभ्यो महनीयं तथैव च । [१४]स एवाऽसौ समुद्रं यो सेवाकार्यपरं व्यधात् ॥२०॥
येन यूयं हि सद्योजं लब्ध्वाऽश्नीतामिषं ततः । बहिष्कुर्यात किञ्चाऽतो भूषणानि हि यानि वै ॥२१॥
परिधत्थ पुनर्यूयं, पश्यथेदं सदैव यत् । विलिखन्ति वहन्त्यस्मिन् खलु यानानि येन हि ॥२२॥
मार्गयेत किलाऽमुष्यानुग्रहं पुनरेव च । कार्त्तज्ञदर्शने यूयं तत्परा अपि तिष्ठत ॥२३॥
[१५]महीध्रानचलांश्चैव भुव्यसौ समवेशयत् । येन युष्मांत्समादाय न सा भूमिः क्वचित् स्खलेत् ॥२४॥
अध्वनश्च नदांश्चापि स व्यधादयनं यथा । सौकर्येण भवेल्लब्धं युष्माभिः सकलैरपि ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[६९]बिभीत स्व प्रभोर्नो मां कुरुध्वं च गतत्रपम् । [७०]तेऽवदन् "किन्न रुद्धस्त्वं जातोऽस्माभिः पुरा यथा ।।६३।।
मा मनोरञ्जनं कार्षीः यस्य कस्याविवेकतः । [७१]सोऽवदत् "कर्त्तुकामाश्चेदेव यूयमिह स्थिताः ।।६४।।
तदेताः सम्मुखं वो मे पश्यतोपस्थिताः सुताः । [७२]जीवनेन शपेऽहन्ते (हे मुहम्मद) ते जनाः ।।६५।।
प्रवृद्धे स्वमदे मग्नाः (सत्य) मासन्; [७३]ततोऽथ च । उषस्येव समाक्रन्दः कश्चित्तान् संवृतान् व्यधात् ।।६६।।
[७४]वासतेयं तदस्माभिः नाशितं ह्येव सर्वथा । वर्षितास्तेषु पाषाणा वह्निदग्धमृदः पुनः ।।६७।।
[७५]ध्रुवं नैमित्तिकेभ्योऽत्र चिन्हानि सुबहूनि हि । [७६]अदः सन्तिष्ठतेऽद्यापि चाऽलुप्तं सरलाऽध्वनि ।।६८।।
[७७]श्रद्धरेभ्यो ध्रुवं चात्र प्रमाणानि बहूनि हि । [७८]दोषवन्तो ध्रुवञ्चासन् येऽभवन् वनवासिनः ।।६९।।
[७९]प्रतिशोधस्तदस्माभिस्तेषु चाऽपि कृतोऽभवत् । स्थितं स्थानद्वयञ्चैतत् वर्त्तते सरलाऽध्वनि ।।७०।।
[८०]वासिनो ये च हिज्रस्य न्यषेधंस्तेऽपि वाग्घरान् । [८१]अस्माभिस्तेभ्य आयाता निजा दत्तास्तथापि ते ।।७१।।
अतिष्ठन् सर्वथोदास्ताः; [८२]कृत्वा कृत्वा च पर्वतान् । अकुर्वन् ते गृहान् स्वीयान् गतचिन्तास्तथाऽवसन् ।।७२।।
[८३]उषस्येव तदाऽऽक्रन्दः कश्चित्तान् संवृतान् व्यधात् । [८४]रक्षणे न समर्थञ्च बभूव तैर्यदर्जितम् ।।७३।।
[८५]असृजाम च सत्येन वियतश्च धरां तथा । अन्तरा ते च यत्त्वाऽऽस्ते, समागन्तैव तत्क्षणम् ।।७४।।
क्षमया तेन वर्त्तस्व श्रीलया त्वं (मुहम्मद !) । [८६]ध्रुवं तेऽसौ प्रभुः स्रष्टा मनीषी चापि वर्त्तते ।।७५।।
[८७]प्रदत्ताः पुनरावर्त्याः सप्ताऽऽयाताश्च ते मया । तथाऽस्माभिः प्रदत्तन्ते कुराणं यदिदं महत् ।।७६।।
[८८]प्रदत्तः सुखसम्भारो योऽप्यस्माभिस्तु वर्त्तते । जनेभ्यो विविधेभ्योऽत्र मा द्राक्षीस्तं कदाचन ।।७७।।
गृध्नुना चक्षुषा; नाऽथ विषादं याहि कञ्चन । (दु)र्दशां प्रसमीक्ष्यैषां आनय स्वं भुजं तथा ।।७८।।
श्रद्धरेभ्यो जनेभ्यो हि; [८९]तदिदं चाप्युदीरय । विशदश्चेतकस्तावद् भवाम्येष तु खल्वहम् ।।७९।।
[९०](काशितं पुस्तकं ह्येतत् त्वयि तद् वद् यथा पुरा) । खण्डयितृषु संजातं काशितम्; [९१]खण्डशो व्यधुः ।।८०।।
ये कुराणम्; [९२]शपामो वै प्रभुणा ते, भवन्ति हि । प्रष्टव्याः खलु ते लोकाः किलास्माभिरसंशयम् ।।८१।।
[९३]अधिकृत्य तु तद् यत्ते कर्माऽकार्षुर्हि किञ्चन । [९४]तन्निशामय सुस्पष्टं यत्त्वमादिश्यसेऽथ च ।।८२।।
दूरं तेभ्यस्तथा याहि ये जना मूर्त्तिपूजकाः । [९५]रक्षितारो वयं ते च तेभ्यो ये तेऽपहासकाः ।।८३।।
[९६]अल्लाहस्य प्रतिम्नो ये घटयन्त्यपरानिह । वेत्स्यन्त्येतेऽचिरादेव परम्; [९७]विद्मो वयं हि तत् ।।८४।।
यत् कृतं तावदेतेषां मानसं प्रदुनोति ते । [९८]स्वप्रभोः सततं त्वन्तु तद्रमस्व स्तुतौ किल ।।८५।।
तिष्ठ चैषु पुनस्त्वञ्च प्रणिपातपरा हि ये । [९९]स्वप्रभोरारमस्व त्वं सततं चैव पूजने ।।८६।।
यावत् समक्षमभ्येति परिहार्यं हि नास्ति यत् ।

योगः—८६।।

CC-0. In Public Domain. Digitized by eGangotri

१६

सूक्तम्—मधु मक्षिका

(अन-नह्ल)

(महाकालेऽवतीर्णाः अष्टाविंशत्युत्तरैकशततमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]समादेशः किलाऽऽल्लाहः प्राप्तुमेवोद्यतस्ततः । शैघ्र्यं मैव कुरुध्वं, स महश्चोच्चैश्च वर्त्तते ॥ १ ॥
प्रतिमभ्यस्तु वै तेभ्यो यानि मे घटयन्ति हि । [२]समादेशात्मना स्वेन बन्धकानामयं किल ॥ २ ॥
देवान् काशयतीष्टेपु बन्धकेष्वेव केवलम् । चेतयेयुर्यथा ते वै पूज्यो नान्यो विहाय माम् ॥ ३ ॥
तेन मत्तो विभेतव्यम्; [३]असौ सत्येन चासृजत् । धरित्रीञ्च तथाऽऽकाशान्, स चात्युच्चै हि वर्त्तते ॥ ४ ॥
प्रतिमभ्यस्तु वै तेभ्यो यानि मे घटयन्ति हि । [४]सोऽसृजद् विन्दुना मर्त्यं परं पश्यत खल्वसौ ॥ ५ ॥
प्रत्यक्षं विकृतो जातो विवादी किल विद्यते । [५]सोऽसृजच्च पशून् यत्र युष्मभ्यं संस्थितो ननु ॥ ६ ॥
उष्णताऽऽदानसम्भारो लाभास्तेभ्यस्तथेतरे । तेषामेव पुनः केचिद् युष्माकं भोजनान्यपि ॥ ७ ॥
[६]तत्र शोभा च युष्मभ्यं सन्ध्ययोरुभयोर्यदा । बहिर्वाहयथाप्येतान् गृहमानयथाऽपि च ॥ ८ ॥
[७]वहन्तो यान्ति ते भारं युष्मभ्यं तेषु धामसु । किञ्च यत्र न वै यूयं प्राप्तुं शक्ताः श्रमाद् विना ॥९॥
स्वेदसंद्रावणात्, सत्यं प्रभुर्वः करुणामयः । दयावांश्चापि; [८]किं चासावसृजद् गर्दभानपि ॥१०॥
हयानश्वतरांश्चैव युष्मदारोहणाय वै । शोभाऽभिवृद्धये चापि, सृजत्येष च किञ्चन ॥११॥
यन्न वो विदितं त्वस्ति; [९]पन्थाश्चैवास्त्यसावृजुः । अल्लाहं प्रति यो याति तिर्यञ्चश्चापि केचन ॥१२॥
ऐषिष्यच्चेदसौ सर्वाननेष्यद् वोऽयनाद् ऋजोः । [१०]स एवाऽसाववर्षद् यो जलं व्योम्नो यतः किल ॥१३॥
पेयसिद्धिर्हि युष्माकं वानस्पत्यं यतोऽथ च । चार्यन्ते पशवो यत्र युष्माभिः क्षुत् प्रशान्तये ॥१४॥
[११]तेन चैवेष सस्यानि युष्मभ्यं भावयत्यथ । द्राक्षाफलानि खर्जूरान् जयतूनांस्तथैव च ॥१५॥
फलान्यन्यविधानीह चापि, नैव तु संशयः । चिन्हान्यत्र निगूढ़ानि तेभ्यो ये हि मनीषिणः ॥१६॥
[१२]सूर्याचन्द्रमसौ तेन दिनञ्चैव निशाऽपि च । नियुक्ता, सर्व एवाऽपि युष्मान् संसेवितुं पुनः ॥१७॥
भारताश्च समादेशात् तारका अस्य संततम् । मनीषिभ्यो ध्रुवञ्चाऽत्र प्रमाणानि बहूनि हि ॥१८॥
[१३]द्रव्याणि बहुवर्णानि यान्यसावसृजत्तथा । धरित्र्यां युष्मदर्थं हि, प्रमाणं ध्रुवमत्र च ॥१९॥
तिष्ठत्येकं मनीषिभ्यो महनीयं तथैव च । [१४]स एवाऽसौ समुद्रं यो सेवाकार्यपरं व्यधात् ॥२०॥
येन यूयं हि सद्योजं लब्ध्वाऽश्नीतामिषं ततः । बहिष्कुर्यात किञ्चाऽतो भूषणानि हि यानि वै ॥२१॥
परिधत्थ पुनर्यूयं, पश्यथेदं सदैव यत् । विलिखन्ति वहन्त्यस्मिन् खलु यानानि येन हि ॥२२॥
मार्गयेत किलाऽमुष्यानुग्रहं पुनरेव च । कार्त्तज्ञदर्शने यूयं तत्परा अपि तिष्ठत ॥२३॥
[१५]महीध्रानचलांश्चैव भुव्यसौ समवेशयत् । येन युष्मांत्समादाय न सा भूमिः क्वचित् स्खलेत् ॥२४॥
अध्वनश्च नदांश्चापि स व्यधादयनं यथा । सौकर्येण भवेल्लब्धं युष्माभिः सकलैरपि ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[१६]असृजत् किञ्च चिन्हानि, लोकास्तारैस्तथापि च । विन्दन्ते पुनरध्वानम्; [१७]किं ततो योऽस्ति सर्जकः ॥२६॥
तुलां काञ्चन तेनैति सर्वथा ये न सर्जकाः ? । किन्न चिन्तापरा यूयं अत्र तावद् भविष्यथ ? ॥२७॥
[१८]यथावद् गणनाऽशक्या गणनामानसेष्वपि । सत्सु युष्मासु दत्तस्याल्लाहेन विभवस्य तु ॥२८॥
क्षमावान् वर्त्तते ऽल्लाहः सदयश्चाप्यसंशयम् । [१९]व्यक्तं ते गोपितं यच्च वेत्त्यल्लाहः समं हि तत् ॥२९॥
[२०]आह्वयन्ति च यांस्तेऽथ ह्यल्लाहमन्तरेण वै । ते न किञ्चित् सृजन्त्यत्र सृज्यन्ते परमत्र ते ॥३०॥
[२१]गतप्राणा न सप्राणाः, नाऽथ जानन्ति ते कदा । उत्थापिता भविष्यामः; [२२]प्रतीष्टो वः प्रभुः खलु ॥३१॥
एक एव भवत्येष, न मन्यन्ते परन्तु ये । परं लोकं निषेधन्ति तेषां तद् हृदयानि वै ॥३२॥
साहंकारा यतस्ते हि; [२३]वेत्त्यल्लाहः समं हि तत् । तेषां व्यक्तं निगूढञ्च ध्रुवं नैतादृशा जनाः ॥३३॥
तदिष्टाः साभिमाना ये तिष्ठन्त्यत्रात्मना किल । [२४]यदैते चाऽथ पृच्छयन्ते-प्रभुर्वः किमकाशयत् ? ॥३४॥
वदन्त्येते-गतासूनामाख्यानानि हि (तानि तु) । [२५]वहेयुस्ते यथा भारं पुनरुत्थापनाऽहनि ॥३५॥
स्वञ्च तेषाञ्च मोहाद् यान् पथभ्रष्टान् व्यधुर्हि ते । दुष्ठु वै वर्त्तते भारो यं वहन्ति जनास्तु ते ॥३६॥
[२६]आचरन् प्राग्भुवश्चापि कूटं, तेषाञ्च वेश्मनः । तेनाऽल्लाहस्तु वै मूलमहन् तानुपरिच्छदिः ॥३७॥
प्रापतत् चोपरिष्टात्तु यातनाऽऽपतिताऽथ च । तेषु तस्या दिशो यस्यास्तेषां नो कल्पनाऽपि तु ॥३८॥
[२७]ततोऽल्लाहश्च तान् लोकान् पुनरुत्थापनाऽहनि । अपगास्यति किञ्चैवं पुनर्वक्ष्यति—"कुत्र ते ॥३९॥
समकक्षा अतिष्ठन् ये मम, येषां कृतेऽथ च । निषेद्धारस्स्थिता यूयम् ? तेषां येभ्यस्त्वदीयत ॥४०॥
ज्ञानं ते तु वदिष्यन्ति-किलाऽद्य वर्त्तते ध्रुवम् । अपगानञ्च पापञ्च तेभ्यो ये श्रद्धरा न हि ॥४१॥
[२८]यान् ग्रसन्त्यथ दिव्याश्च यदा ते स्वत आत्मनि । रतास्तिष्ठन्ति पापेषु, प्रणिपत्य पुनश्च ते ॥४२॥
विनयेन हि भाषन्ते, "नाभूम पापिनो वयम्" । "न कस्माद्" ? वेत्ति सोऽल्लाहः सम्यगत्र न संशयः ॥४३॥
तत्तद् यत् यत् सदा यूयं प्रकुर्वाणा बभूव हि । [२९]नारकान् विशत द्वारान् तदिदानीं; ध्रुवञ्च वः ॥४४॥
तत्र वासो, विगीतोऽसौ चैव वासः प्रकीर्त्तितः । तेषां ये हि जना अत्र महादर्पसमुद्धताः ॥४५॥
[३०]भयंमन्याश्च पृच्छ्यन्ते जनाः-भो ! काशितं नु किम् । प्रभुणाऽस्ति हि युष्माकम् ? 'सूत्तमम्' ते वदन्ति च ॥४६॥
भवेऽपि भद्रमेवैभ्यो ये हि भद्रकृतोऽभवन् । परलोके गृहन्त्वेभ्यो भद्राद् भद्रतरं परम् ॥४७॥
महाभद्रं हि तद् गेहं तेभ्यो ये ह्यत्र भीधराः । [३१]अदनस्य किलारामा यत्र वेक्ष्यन्ति ते ह्यधः ॥४८॥
वहन्त्यश्च भविष्यति निम्नगास्तानथैव च । एषिष्यन्ति हि यत् तद् वै लप्स्यन्ते तेऽखिलं ततः ॥४९॥
ईदृशं हि पुरस्कारं तेभ्योऽल्लाहः प्रयच्छति । भीधरा ये जना अत्र; [३२]दिव्याश्चैवाऽपि यान् जनान् ॥५०॥
ग्रसन्ति कुर्वतो ह्येव भद्रकार्याणि सर्वशः । तान् वचन्त्यवतारोऽस्तु शान्ते र्युष्मासु यत् पुनः ॥५१॥
किञ्चिद् यूयं विचेष्टध्वे तत्पुरस्काररूपतः । प्रवेष्टव्यं हि युष्माभिः स्वारामे; "[३३]किन्विमे जनाः ॥५२॥
प्रतीक्षन्तेऽधुना "दिव्या इमानायान्तु" वाऽपि ते । प्रतीक्षन्ते "समादेशः प्रभोस्ते ह्येव वाऽप्नुयात्" ? ॥५३॥
तेऽप्यचेष्टन्त खल्वित्थं अजायन्त पुरा हि ये । जाल्मोऽल्लाहस्तु नो तेषु बभूव हि कथञ्चन ॥५४॥
आत्मनाऽऽत्मनि जाल्मास्तु तेऽभवन्नेव सर्वथा । [३४]कर्मणां दुष्फलान्येतान् ततोऽच्छिन्दन्, तथैव च ॥५५॥
संवृतानकरोदेतान् सैते यां खल्वपाहसन् । [३५]भणन्तीत्थञ्च ते लोका अत्र मूर्त्यभिपूजकाः ॥५६॥
"ऐषिष्यद् यदि सोऽल्लाहो वयं नैवाऽन्तरेण तम् । अस्तोष्यामेतरं कंचिन्नास्मदीयाश्च पूर्वजाः ॥५७॥
नाऽमंस्यामहि किञ्चिच्च निषिद्धं खल्वमुष्य च । यावन्नैव नियोगस्तु; समजायन्त ये पुरा ॥५८॥
तेऽप्यचेष्टन्त खल्वित्थम्; विशदात् प्रापणादृते । किमन्यच्चापि कर्त्तव्यं वाग्घरेभ्योऽत्र वर्त्तते ? ॥५९॥
[३६]वाग्वरान् प्रैषयामैव गणात्तावद् वयं गणम् । (शिक्षया) यूयमल्लाहं स्तुवीध्वं च परेत च ॥६०॥
असत्येभ्यस्तु देवेभ्यस्ततः कांश्चित्त्व [illegible] । मार्गं तेषां किला ऽल्लाहः, तेषामन्येष्वथो पुनः ॥६१॥
साग्रहो दोष एवाऽस्थात्; विहृत्य तत् [illegible]पश्यत । दुरन्तः कीदृशो लोके तेषां ये ऽश्रद्धरा इह ॥६२॥
[३७]कामना तेऽस्ति चेन्नेतुं तान्सुमार्गं प्रभुस्ततः । भ्रशयेद् यं पथो नाऽथ पन्थानं दर्शयत्यमुम् ॥६३॥
नाऽपि कश्चित् सहायश्च कदाचित्तस्य जायते । [३८]अल्लाहवचनाच्चैते प्रतिजानन्ति सुस्थिरम् ॥६४॥
"मृतं मर्त्यन्तु नाल्लाहः पुनरुत्थापयेत् किल" । कथं नैतत् ?; भवत्येषा प्रतिज्ञा त्वेव सर्वथा ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

अनिवार्यतमा यस्याः पूर्तिस्तेन च मन्यते । परं नैतद् विजानन्ति प्रायशोऽत्राधिका जनाः ॥६६॥
[३९](अत्यपेक्ष्यं) यथाऽल्लाहस्तेषु कुर्यात् प्रकाशितम् । भेदधीविषये यस्मिन् आस्त तेषां तथैव च ॥६७॥
श्रद्विहीना विजानीयुरतिष्ठन् तेऽसदाऽऽश्रिताः । [४०]वचोऽस्माकमधिकृत्य द्रव्यं किञ्चिदपीह तु ॥६८॥
उत्केष्वस्मासु जातेषु वर्त्तते केवलं न्विदम् । यद् वयं तत् प्रति ब्रूमः भव त्वं, तद् भवत्यथ ॥६९॥
[४१]अत्याचारान् सहित्वा ये मार्गे ऽल्लाहस्य खल्वयुः । देशत्यागेन, दास्यामस्तेभ्यो वासं शुभं वयम् ॥७०॥
भवेऽस्मिन् वर्त्तते तेभ्यः पुरस्कारो महत्तरः । परस्मिंस्तु पुनर्लोके, चेदवेत्स्यन्निदं हि ते ॥७१॥
हृद्यं किलाऽभविष्यत्तत्; [४२]तादृशास्सन्ति ते जनाः । धैर्यमालम्ब्य येऽकुर्वन् कृतीर्ये विश्वसन्ति च ॥७२॥
प्रभौ स्वस्मिन्; [४३]नरो ह्येव प्रविधाय तु वाग्धरः । प्रषितोऽभूत् पुरा त्वच्च किलाऽस्माभिः, तथैव सः ॥७३॥
प्रेरितः सन्ततं चाऽभूत् न यूयं वित्थं चेत् ततः । पृच्छ्यतां ते त्वया येऽत्र स्मारकस्यानुयायिनः ॥७४॥
[४४]प्रमाणै विशदैः सार्धं, सार्धं लेखैस्तथैव च; । त्वय्यनुस्मारकस्याऽऽस्तेऽवतारोऽस्माभिरत्र यत् ॥७५॥
वर्णयेर्विशदं नृभ्यस्तेभ्यो यस्यावतारणा । किञ्च चिन्तापरास्ते स्युः; [४५]मन्यन्तेऽथ कृतान् नु किम् ॥७६॥
रक्षितान् स्वान् यदल्लाहो धरित्र्यां तान्निवेशितान् । कारयिष्यति नो, नाऽपि यातनैष्वापतिष्यति ॥७७॥
अदृष्टाया दिशायाश्च ?; [४६]न वा तान् निग्रहीष्यति । याताऽऽयातपरान् लोकान् रक्षा काचिन्न वै यदा ? ॥७८॥
[४७]निग्रहीष्यति नो वा तान् भीतास्ते सततं यदा ? । प्रभुस्ते सदयः किञ्च ध्रुवं स करुणामयः ॥७९॥
[४८]किन्न ते दृष्टवन्तस्तद् यदल्लाहोऽत्र सृष्टवान् । प्रतिच्छाया नमन्त्येषां प्रणिपातसमारताः ॥८०॥
अल्लाहं पार्श्वयोस्तावद् वामदक्षिणयोर्ननु । तत् प्रपद्य तु वै रूपं "नम्रतायाः प्रदर्शकम् ॥८१॥
[४९]धरित्र्यां प्राणिनो ये तु प्राणिनो ये वियत्सु च । प्रणिपातपराःसर्वे ऽल्लाहं दिव्याश्च तं प्रति ॥८२॥
नाऽथ दिव्या अहंकारं भजन्ते; [५०]ते च विभ्यति । उद्गतात् स्वप्रभोस्तेषु, यच्च तेभ्योऽनुशिष्यते ॥८३॥
पालयन्ति च ते तद् वै; [५१]ह्यल्लाहो दिष्टवानिदम् । अभीष्टद्वयमेष्टव्यं न युष्माभिः कदाचन ॥८४॥
एक एवाऽस्त्यभीष्टो ऽसौ केवलस्तद् विभीत भोः ! । केवलान्मत्त एवाऽत्र; [५२]यद् धरित्र्यां यदप्यथ ॥८५॥
किञ्चनाऽपि वियत्स्वस्ति समं तस्यैव वर्त्तते । प्रणाली किञ्च तस्यैव भवत्यत्र सदातना ॥८६॥
भेष्यथाऽतः किमल्लाहादन्यस्मादपि वस्तुनः ? । [५३]अधिकारे च युष्माकं सौख्यं यच्चापि वर्त्तते ॥८७॥
तत्समं विद्यते ऽल्लाहात्, ततः कष्टं यदाऽपि च । यूयं याथ ततो ऽल्लाहं ह्येव साह्याय याथ तु ॥८८॥
[५४]आपदं संहरत्येष परं युष्मत् यदैव तु । प्रपश्यामो गणो ह्येको युष्माकं त्वितरानपि ॥८९॥
प्रतिघ्नः कुरुते तावत् स्वप्रभोश्चाति सर्वशः । [५५]येन यत् किंचनाप्येभ्योऽस्माभिर्दत्तं हि वर्त्तते ॥९०॥
तेन सर्वेण खल्वेते दर्शयेयुः कृतघ्नताम् । अस्तु भो ! भुज्यतां सौख्यं जीवनस्य मनाक् क्षणम् ॥९१॥
अचिराच्च पुनर्यूयं (वेत्तव्यं) वेत्स्यथैव तु । [५६]अस्माभिर्दत्त एभ्यश्च य आहार इमे ततः ॥९२॥
सेवन्तेंऽशेन तान्नो यान् विदन्त्येते कदाचन । प्रमाणाद् ध्रुवमल्लाहादनृतं यद्धि घट्यते ॥९३॥
त्वया त्वं विषयेऽमुष्यानुयुक्तो हि भविष्यसि । [५७]अल्लाहस्येति च कृत्वा स्वसुता विनियुञ्जते ॥९४॥
महिम्नां स किलाऽऽवासः य इष्टस्तं तथाऽऽत्मना । [५८]एषां कश्चिद् यदाऽऽप्नोति वार्त्तां तु प्रसवस्य च ॥९५॥
शुभामेषां गृहे पुत्र्यास्तस्याऽस्यं म्लायते ततः । अन्तरा सततं चासौ संक्रुद्धश्चापि तिष्ठति ॥९६॥
[५९]शुभा वार्त्ताऽऽहिता तस्मिन् जायते सर्वथाऽहिता । प्रेरितस्तेन चात्मानं जनेभ्यः स निगूहति ॥९७॥
रीढां स्वीकृत्य रक्षेत् तां कुर्याद् वा भूमिसादमूम् । दुष्ठु वै निर्णयो यन्नु यान्ति तावदिमे जनाः ॥९८॥
[६०]श्रद्धरा येन वै लोका परलोके भवन्ति तु । उपमा ह्यवरा तेषां अल्लाहस्य तु साऽपरा ॥९९॥
प्रभुत्वाच्छालते किञ्च तत्वदर्शी स वर्त्तते । [६१]दोषहेतोस्तु लोकानामल्लाहश्चेदुपक्रमेत् ॥१००॥
निग्रहाय; ततो नैकं प्राणिनञ्चाप्यसौ त्यजेत् । धरित्र्यां, तान् परन्त्वेष यावद् दिष्टावधि किल ॥१०१॥
उपेक्षतेऽथ तत्पश्चात् उपेते निश्चिते क्षणे । न होरामात्रमग्रे तं पश्चाद् वा नेतुमप्यलम् ॥१०२॥
[६२]तत् प्रतिष्ठापयन्त्येते तथाऽल्लाहाय यन्न वै । रुच्यमेषां (स्वतो) ऽपि स्यात् वाच एषां तथैव च ॥१०३॥
अनृत ब्रुवते—"भद्रं तेभ्य एवाऽस्ति रक्षितम्" । नारकोऽग्निर्ध्रुवं तेभ्यः प्रहास्यन्ते च (तत्र) ते ॥१०४॥
[६३]प्रतिज्ञाय किलाल्लाहात्, पूर्वं त्वच्चाप्यथो वयम् । वाग्धरान् त्समुदायेषु प्रैषयाम बहुष्वपि ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

भव्यान्यरोचयत् तेभ्यस्तेषां कृत्यानि शातनः । परम्, संगी स एवाऽद्य चाप्यमीषां तु वर्त्तते ॥१०६॥
यातना तावदेतेभ्यः कृच्छ्रदा ह्यवतिष्ठते । [६४]काशितं पुस्तकञ्चास्मात् त्वयि, यत् त्वं प्रकाशयेः ॥१०७॥
तदधिकृत्य यस्मिन् हि खल्वेषां मतिभिन्नता । मार्गसन्दर्शनञ्चाऽस्ति श्रद्धरेभ्यो दयाऽपि च ॥१०८॥
[६५]अल्लाहोऽवर्षयद् वारि व्योम्नस्तेन तथैव च । गतप्राणां धरां पश्चात् प्राणैस्तावदयोजयत् ॥१०९॥
श्रोतृवर्गाय खल्वस्मिन् प्रमाणं सुमहद् धृतम् । [६६]चतुष्पत्सु पुनश्चैव युष्मभ्यं तिष्ठति ध्रुवम् ॥११०॥
शिक्षार्थं खलु सम्भारः यच्च तेषामथोदरे । पाययामः सुदुग्धं वस्ततो गोमयरक्तयोः ॥१११॥
मध्यतो यच्च पायिभ्योऽतिशयेन हितञ्जनम् । [६७]खर्जूराणां फलैश्चापि द्राक्षाणाञ्च फलैरपि ॥११२॥
सुनुध्वे ह्यासवं यूयं सुवृत्तिश्चापि तैस्तु वः । प्रमाणं सुमहत् त्वत्र सुधीभ्यो वर्त्तते ध्रुवम् ॥११३॥
[६८]प्रभुस्ते सरघां किञ्च प्रैरयद्—"वासमातनु । पर्वतेषु च वृक्षेषु (घटितेषु करणे च) ॥११४॥
नलवत्सुवितानेषु; [६९]विभिन्नं च रसं ततः । पुष्पाणाञ्च फलानाञ्च चूष तेषामन्तरम् ॥११५॥
अनुयाहि तथा मार्गं दिष्टन्ते प्रभुणा पुनः । तस्याः कुक्षेःसमुद्याति पेयमेकं विवर्णितम् ॥११६॥
यस्य चान्तर्हितं स्वास्थ्यं लोकेभ्यः खलु वर्त्तते । प्रमाणं वर्त्तते चाऽत्र सुधीभ्यः सुमहद् ध्रुवम् ॥११७॥
[७०]युष्मान्त्संसृजते ऽल्लाहः पश्चात् किञ्च ग्रसत्यपि । कांश्चिद् युष्माकमेषोऽथ प्रापयत्यपि तद् वयः ॥११८॥
यन्न हृद्यं तु कस्याऽपि येन ज्ञात्वाऽप्यनन्तरम् । नासौ किंचिद् विजानीयात् अल्लाहो न हि संशयः ॥११९॥
ज्ञाताऽपि वर्त्तते किञ्च सशक्तश्चापि वर्त्तते । [७१]अल्लाहकृपया केचित् परेभ्यो धनवत्तराः ॥१२०॥
परं नैवं विधास्ते तु सन्ति वै धनवत्तराः । यन्निजं विभवं तावद् दद्युस्तेभ्यो हि सन्ति ये ॥१२१॥
वशे तेषां गता दासाः समत्वं यन्तु येन ते । निषेधन्ति तदेते किं (हाऽ) ल्लाहीं हि दयां पुनः ॥१२२॥
[७२]युष्माकं चैव युष्मभ्यं गृहपत्नीः स चाऽकृत । असृजच्चाऽथ युष्मभ्यं पत्नीभ्यो वः पुनश्च सः ॥१२३॥
पुत्रान् पौत्रांश्च युष्मभ्यं भद्रां वृत्तिमदत्त च । तत् किमेते सविश्वासा निःसत्वे ह्येव, चाऽथ ते ॥१२४॥
निषेधन्ति दयां तां वै याऽल्लाही (तैरवाप्यते) ? । [७३]पूजयन्ति च तान्, नो ये साधिकाराः कथञ्चन ॥१२५॥
वियद्भ्यश्च धरित्र्याश्च वृत्तिदाने भवन्त्यपि । नाऽपि विभ्रति सामर्थ्यं किञ्चनाऽपि तथैव ये ॥१२६॥
[७४]नाऽल्लाहस्य प्रतिम्नस्तत् कुरुध्वं, ध्रुवमेव च । विजानाति हि सोऽल्लाहो यूयं जानीथ नो परम् ॥१२७॥
[७५]अल्लाहो घटयत्येकं तावदत्र निदर्शनम् । दास एको वशेऽन्यस्य सततं यो हि तिष्ठति ॥१२८॥
साधिकारोऽथ यो नास्ते कस्मिंश्चिच्चापि वस्तुनि । अन्य एकः शुभां वृत्ति यामदद्म वयं पुनः ॥१२९॥
व्ययं तस्या विधत्तेऽसौ समक्षं चाऽन्यथाऽपि च । तदेतौ समतां यातः किन्नु काञ्चित् परस्परम् ? ॥१३०॥
प्रशंसाऽर्हस्तु सोऽल्लाहः न जानन्त्यधिकाः परम् । [७६]अल्लाहो घटयत्येकमन्यदत्र निदर्शनम् ॥१३१॥
मानवौ द्वौ विजानीहि, मूक एकतरस्तयोः । तदाऽयत्तं न वै किंचित्, प्रभौ भारश्च केवलः ॥१३२॥
प्रेषितो यत्र चाप्यस्ति न भद्रं चाहरत्यसौ । परो यो दिशते न्यायं स्वतो योऽप्यनुयाति च ॥१३३॥
सर्वदेवर्जु पन्थानं किं न्वसौ तत्समः क्वचित् ? । [७७]धरित्र्यां निह्नुतं यत्तु निह्नुतं यद् वियत्सु च ॥१३४॥
अल्लाहो हि प्रभुस्तत्र, क्षणस्यामुष्य चोपमा । भवत्यक्ष्णोर्निमेषेण सर्वशो, वर्त्ततेऽथवा ॥१३५॥
तस्माच्चापि स नेदीयान्; सन्देहो नाऽत्र विद्यते । सर्वत्राऽपि हि सोऽल्लाहः सर्वसामर्थ्यभृत् किल ॥१३६॥
[७८]मातृगर्भात् तथा युष्मान् अल्लाहो ऽजनयत् पुनः । स्थिता अज्ञानिनो यूयम्, स युष्मभ्यमदत्त च ॥१३७॥
श्रवौ नेत्रे च हृच्चैव, कदाचिद् दर्शयेत यत् । यूयं तस्मै हि कार्तज्ञम्; [७९]किन्न चैभिर्विलोकिताः ॥१३८॥
आज्ञा ऽधीनास्स्थितास्तावत् पक्षिणो व्योममण्डले । धारयत्यन्तरेणैतानल्लाहं कोऽपि नेतरः ॥१३९॥
श्रद्धरेभ्योऽत्र तिष्ठन्ति प्रमाणानि बहूनि वै । [८०]गृहान् युष्माकमल्लाहो वासार्थं चाऽप्यकल्पयत् ॥१४०॥
सोऽजिनैरथ युष्मभ्यं वसतीश्चाप्यकल्पयत् । यानि यानाह्नि वै यूयं स्थितेरह्नि तथैव च ॥१४१॥
भजध्वे सुलघूनीति तेषामूर्णाभिरप्यसौ । लोमभिश्चैव बालैश्च संभारान् सुबहूनपि ॥१४२॥
भूषणानि प्रभूतानि नियतावधयेऽकरोत् । [८१]सृष्टैः स्वतस्तथा द्रव्यैः किञ्चाल्लाहेन वै कृतः ॥१४३॥
प्रबन्धः किल युष्मभ्यं छायायाः, सानुमत्सु च । कृतं स्थानं पुनस्तेन युष्माकं शरणाय च ॥१४४॥
दत्तवान्त्स च युष्मभ्यं परिधानं हि तादृशम् । तापात् त्रातुं तु यच्छक्तं युष्मांस्तावत् प्रजायते ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

परिधानं तथैवाऽन्यत् दत्तवान् यद्धि कल्पते । युष्मान् जन्ये परित्रातुमित्थं युष्मानसौ किल ।।१४६।।
पिपर्त्ति स्वीयया तावद् दययात्मसमर्पकाः । कदाचिद् येन वै यूयं तिष्ठतेह (सदा पुनः) ।।१४७।।
[८२]पराङ् आस्यास्ततोऽप्येते यदि तिष्ठन्ति मानवाः । प्रापणं विशदीकृत्य ह्येव कर्त्तव्यमस्ति ते ।।१४८।।
[८३]विदाङ्कुर्वन्ति खल्वेते ऽल्लाहस्य यद्यपि कृपाम् । निषेधन्ति ततोऽप्येते (हन्त) तामेषु चाधिकाः ।।१४९।।
ते जना येऽकृतज्ञा हि; [८४]यदा चैव वयं पुनः । एकैकस्माद् गणादेकं करिष्यामो हि साक्षिणम् ।।१५०।।
श्रद्विहीना जनास्तेषां न चैवानुमताः किल । भविष्यन्ति (प्रवक्तुं वा) प्रसादायास्य नापि वा ।।१५१।।
[८५]यदा द्रक्ष्यन्ति जाल्माश्च यातनास्तत्र नोनता । काचिद् विधास्यते नाऽथ कालक्षेपोऽनुमंस्यते ।।१५२।।
[८६]आत्मना घटितांश्चैव यदा द्रक्ष्यन्ति ते जनाः । प्रतिम्नः प्रतिमाभाजो वदिष्यन्ति तदा किल ।।१५३।।
"प्रभो नः ! घटिता एते प्रतिमानो भवन्ति हि । अस्माभिर्ये स्तुताश्चापि त्वां विहाय (निरन्तरम्) ।।१५४।।
क्षेप्स्यन्ति ते परं वादं वैपरीत्येन तेषु हि । (वदन्तः) सर्वथाऽसत्या ह्येव यूयन्तु तिष्ठथ" ।।१५५।।
[८७]तस्मिन् दिने च तेऽल्लाह-समक्षं पुनरानताः । भविष्यन्ति न चाप्येषां साधयिष्यति किंचन ।।१५६।।
असत्यं घटितं कार्यम्; [८८]श्रद्विहीना हि ये जनाः । वारयन्ति पथो येऽथ नृनाल्लाहात् तथैव च ।।१५७।।
उपर्युपरि कृच्छ्रेषु निर्वेक्ष्यामो हि तान् वयम् । कारणात् पुनरेतस्माद् विप्लवाद् जनिताद्धि तैः ।।१५८।।
[८९]दिने यस्मिन् वयञ्चैव करिष्यामो हि साक्षिणम् । एकैकस्माद् गणादेकं ते नामेवोत्थितं तथा ।।१५९।।
त्वां समक्षं पुनश्चैषां करिष्यामो हि साक्षिणम् । पुस्तकं काशितञ्चाऽय त्वय्यस्माभिस्तु तादृशम् ।।१६०।।
वर्णनं यत् करोतीह वैशद्यात् सर्ववस्तुनः । आत्मनश्चार्पकेभ्योऽस्ति शुभोदन्तप्रदं पुनः ।।१६१।।
मार्गसन्दर्शनं चाऽथ दया विग्रहवत्यपि । [९०]भद्राचारो नयाचारो दानं ज्ञातिभ्य एव च ।।१६२।।
समादेशोऽयमल्लाहो, वारणं दुरितात् पुनः । वञ्चनायास्तथाऽश्लीलात् कर्मणश्चैव विद्यते ।।१६३।।
स युष्मानादिशत्यस्मात् युष्माकं ध्यानमस्तु यत् । [९१]कृतं चेद् वचनं तावदल्लाहेन हि किंचन ।।१६४।।
यूयं पूरयतैवाऽदः भाक्तं मा वचनानि च । स्थिरीकृत्य पुनस्तानि कृतः प्राक् प्रतिभूर्यदा ।।१६५।।
युष्माभिः स्वेषु सोऽल्लाहोऽल्लाहस्तद् वेत्त्यसंशयम् । यूयं यद् यद् विचेष्टध्वे; [९२]न यूयं चरताऽपि च ।।१६६।।
स्त्रियं तामिव या खेदात् सूत्रीकरणमन्वनु । विसूत्रीकरणे चाऽपि संरता जायते पुनः ।।१६७।।
गणैकं त्वतिरिच्यान्यं वर्धेतेति च वै किल । साधनं छलनानान्तु कृद्वं वाचो हि मा मिथः ।।१६८।।
तेनाऽल्लाहो ध्रुवं युष्मान् त्सत्यमेव परीक्षते । भेदबुद्धिश्च युष्माकं यत्रासौ यद्धयसंशयम् ।।१६९।।
युष्मासु प्रकटीकर्त्ता पुनरुत्थापनाऽहनि । [९३]ऐषिष्यद् यदि सोऽल्लाहो युष्मानेकं पुनर्गणम् ।।१७०।।
व्यधास्यत् सकलानेव परं यं कांक्षते हि सः । अन्धकारायने ह्येव तं क्षिपत्यथ यं पुनः ।।१७१।।
कांक्षते सरलाऽध्वानं तं प्रदर्शति ध्रुवम् । यच्च किञ्चिद् विचेष्टध्वे यूयं तद् विषये ध्रुवम् ।।१७२।।
यूयं किलानुयोक्ष्यध्वे; [९४]कृद्वं मेव तथैव च । साधनं वञ्चनानां वै स्वशपनान्यथो मिथः ।।१७३।।
स्यात् कदाचिन्न खल्वेवं स्खलेत् पादः स्थिरः पुरा । दुःखं सोढव्यमेवाऽपि स्यान्न युष्माभिरप्यथ ।।१७४।।
अल्लाहमार्गतो रोधादुद्भिन्नाघस्य कारणात् । कदाचिन्न च तिष्ठेत कृच्छ्रभाजो हि सर्वथा ।।१७५।।
[९५]अल्लाहेन प्रतिज्ञातं न विक्रीणीत खल्वथ । तदर्थं यदकिञ्चिद्धि वर्त्ततेऽत्र न संशयः ।।१७६।।
अल्लाहस्य समीपं यत् किंचिद् युष्मभ्यमस्ति तत् । हृद्यमत्यवबुद्धं चेद् युष्माभिः स्यात्तु का कथा ? ।।१७७।।
[९६]सकाशे यत्तु युष्माकं तद् विलुप्तं भविष्यति । अल्लाहस्य सकाशे तु यत्तत् चैवावशेक्ष्यति ।।१७८।।
धैर्याद् ये तु प्रवर्त्तन्ते तेभ्योऽवश्यं पुरस्क्रियाम् । प्रदास्यामो वयं, तेषां पुरस्कारः सुकर्मणाम् ।।१७९।।
[९७]पुमान् वा स्यादथो स्त्री वा योऽपि भद्रे त्ववर्त्तत । श्रद्दधानो यदि स्यात् स वयं तस्मै न संशयः ।।१८०।।
शुभां वृत्तिं प्रदास्यामस्तत्सुकर्म पुरस्क्रियाम् । [९८]आरभेध्वं यदा यूयं कुराणस्य च वाचनम् ।।१८१।।
शातनादात्मनस्त्रातुं अल्लाहं शरणं स्तुत । [९९]श्रद्दधानेषु विश्वासं कुर्वत्सु स्वप्रभौ तथा ।।१८२।।
मनाक् चाऽपि प्रभुर्नासौ भवतीति विनिश्चितम् । [१००]तिष्ठते प्रभविष्णुस्तु तेषु तावज्जनेष्वसौ ।।१८३।।
शातनेन समं यान्ति मैत्र्यं ये ये तथैव च । प्रतिम्नो घटयन्त्यत्र (तस्याल्लाहस्य वा पुनः) ।।१८४।।
[१०१]आयातस्य यदा स्थाने पुरो दध्मो वयं किल । आयातेतरमल्लाहो वेत्ति सम्यक् तथैव च ।।१८५।।

CC-0. In Public Domain. Digitized by eGangotri

यद्धि काशयते चासौ, तदामी प्रवदन्ति च । "स्वतो वै घटकस्त्वन्तु भवस्येषां," परन्न तत् ॥१८६॥
तेषां नैवाधिका (हन्त !) परं त्वेतद् विदन्ति तु । [१०२]ब्रूहि तान्—तत्तु शुद्धात्मा समं सत्येन ते प्रभोः ॥१८७॥
पार्श्वतोऽकाशयद् यत् स्युः श्रद्धरा रक्षिता दृढाः । आत्मनश्चार्पकेभ्यः स्तां शुभवृताध्वदर्शने ॥१८८॥
[१०३]वयञ्चैतद् विजानीमस्ते वदन्तीदृशं हि यत् । "कश्चिदेको जनस्तावत्तं तु शिक्षयतीह वै" ॥१८९॥
वस्तुतो यस्त्वभिप्रेतो भवत्येषां जनोऽस्य तु । वाग् विदेशस्य वाक्चेयमाख्या विशदा पुनः ॥१९०॥
[१०४]सत्यं त्वेतद् जना ये नोऽल्लाहायातेषु सर्वथा । श्रद्धराः, दर्शयत्येव तान्नाऽल्लाहोऽयनं किल ॥१९१॥
दुःखदा यातना त्वाऽऽस्ते परं तेषां कृते ध्रुवम् । [१०५]असत्यघटकास्ते हि ये न श्रद्दधते जनाः ॥१९२॥
आयातेषु प्रभोस्तावन् मृषावादास्त एव च । [१०६]श्रद्धाया उत्तरं यस्तु गतश्रद्धः प्रभौ जनः ॥१९३॥
तं विहाय "पराधीनः सन्न श्रद्धां हि यो गतः । परं श्रद्धामना ह्येव यस्तु तेनाऽपि तिष्ठति" ॥१९४॥
अविश्वासपरिष्वंगे व्यूढोरस्को हि यो ऽर्थतः । ईदृशेभ्योऽस्ति लोकेभ्यो ऽल्लाहकोपो, ऽतियातना ॥१९५॥
तथा सन्तिष्ठते तेषां प्रतीक्षायां निरन्तरम् । [१०७]तदेतस्मात् प्रतीष्टं यत् तेषामैहिकजीवनम् ॥१९६॥
परलोकव्यपेक्षायां, तस्माच्चापि यतो न वै । दर्शयत्ययनं तावदल्लाहोऽश्रद्धरान् जनान् ॥१९७॥
[१०८]इमे ते हि जना येषामल्लाहः खल्वमुद्रयत् । श्रवान् स्वान्तानि नेत्राणि त एते च पुनर्जनाः ॥१९८॥
सर्वथैव प्रमत्ता ये; [१०९]निश्चितं चैत एव ते । हानिं यास्यन्ति ये तावत् लोकेऽन्यस्मिन्नतः परम् ॥१९९॥
[११०]निश्चितं ते प्रभुस्तेभ्यः कृच्छ्राणि त्वनुभूय ये । अकुर्वन् वसतित्यागमयुध्यन्त पुनस्तथा ॥२००॥
आहितं यैस्तथा धैर्यं निश्चितं ते प्रभुस्ततः । तेभ्योऽत्यर्थं क्षमाशीलो दयावांश्चापि वर्त्तते ॥२०१॥
[१११]दिने यस्मिन् किलैकैको ह्यात्मनां विवदिष्यते । आत्मनेऽथ तथैकैकस्तत्तत् कर्मानुरूपतः ॥२०२॥
पूर्णतश्च पुरस्कारं लप्स्यते, न तथैव च । अत्याचारं जनः कोऽपि तेषाञ्च गमयिष्यते ॥२०३॥
[११२]अल्लाहो घटयत्यत्र तावदेकं निदर्शनम् । लोकानां वसतिस्त्वेका निश्चिन्ता तुष्टिमागता ॥२०४॥
दिग्भ्यः सर्वाभ्य एवाऽस्या वृत्तिसम्पन्नता ऽभवत् । श्रद्विहीनास्ततो लोका जाता अस्या हि सर्वथा ॥२०५॥
अल्लाहानुग्रहेष्वेव, ह्यल्लाहस्तान् जनांस्ततः । तदारम्भफलत्वेन दुष्कालमन्वभावयत् ॥२०६॥
भयस्य परिधानञ्च तानसौ पर्यधापयत् । [११३]तेषामेव पुनर्मध्यात् उपेतस्तदनन्तरम् ॥२०७॥
वाग्घरः किलतानैकस्ते परं तं न्यषेधयन् । यातना तांस्ततो लोकान् पापाचारेषु संरतान् ॥२०८॥
परिजग्राह; [११४]तद् यूयमल्लाहाद् वैधमुत्तमम् । भोज्यं यत् किञ्चनादत्थ तदेव खादताऽथ च ॥२०९॥
अल्लाहस्य महादानाद् धन्यवादञ्च गायत । भजध्वे यदि तं यूयम्; [११५]निषिद्धं खल्विदन्तु वः ॥२१०॥
मृतो रक्तञ्च मांसञ्च शूकरस्यान्तरेण च । अल्लाहं पुनरन्यस्य नामोच्चारात्तु योऽर्पितः ॥२११॥
अवशस्तु परं नीतस्तत्र यो, यो गतस्पृहः । मर्यादाभंजको नाऽपि तत्राल्लाहो हि वर्त्तते ॥२१२॥
क्षमाशीलो महान् किञ्च दयावानपि खल्वसौ । [११६]स्ववाग्भिर्वर्णिताऽलीकमाधारीकृत्य नाऽपि च ॥२१३॥
भाषध्वं - तदिदं वैधमवैधं तददः पुनः । अल्लाहाश्रयलाभेन घटयेताऽनृतं क्वचित् ॥२१४॥
अल्लाहाश्रयलाभेन घटयन्त्यनृतं तु ये । सिद्धिं ते नैव विन्दन्ति; [११७]सुखन्तु क्षणभंगुरम् ॥२१५॥
यातना कृच्छ्रदा चाऽथ तेभ्यो वै वर्त्तते (ध्रुवम्) । [११८]याहूदाहाश्च ये लोकास्तेभ्योऽवैधं च तत् कृतम् ॥२१६॥
पूर्वमस्माद् यदप्यत्रावर्णयाम वयं किल । जाल्मा नैव वयं तेषु बभूविम कथञ्चन ॥२१७॥
आत्मनाऽऽत्मनि जाल्मास्तु तेऽभवन्नेव सर्वथा । [११९]प्रभुस्ते नाऽत्र सन्देहस्तेभ्यो ये दुष्कृतोऽभवन् ॥२१८॥
मोहात्, ततोऽनुतप्ताश्च सुधारं ये ततो गताः । प्रभुस्ते नाऽत्र सन्देहस्ततस्तेभ्यो महादयी ॥२१९॥
तिष्ठति च क्षमाशीलः; [१२०]निश्चितं तदिदञ्च यत् । अब्रह्मस्त्वतिभक्तोऽभूदल्लाहञ्चाऽनतः सदा ॥२२०॥
गणस्य प्रमुखो नाऽथ मूर्त्तिसंपूजकेष्वसौ । [१२१]कार्त्तज्ञं स गतस्तस्य दयायाः कारणात् (प्रभोः) ॥२२१॥
वृतोऽसौ तेन, मार्गश्च सरलोऽस्मै प्रदर्शितः । [१२२]जिहाने भद्रमस्माभिस्ततं तस्मायथो स हि ॥२२२॥
भद्रेष्वन्यतमो भावी परलोके जनेषु च । [१२३]प्रेरणा च ततो ऽस्माभिः कृता तुभ्यं-विहाय यत् ॥२२३॥
सर्वान् याहि त्वमध्वानमब्रह्मस्य तु (केवलम्) । न चासावभवत्तेषां येऽभवन् मूर्त्तिपूजकाः ॥२२४॥
[१२४]शनैश्चरस्य घस्रस्य कृतोऽभून्नियमस्तथा । अस्माभिः केवलं तेभ्यो येषु तद्भेदधीरभूत् ॥२२५॥

CC-0. In Public Domain. Digitized by eGangotri

प्रभुस्ते निश्चितं कर्त्ता पुनरुत्थापनाहनि । न्यायं तद्विषये तेभ्यस्तेषां यत्राऽऽस्तभेदधीः ॥२२६॥
[१२५]आह्वय त्वं प्रभोः स्वस्य प्रतिमार्गं जनान् धिया । सता चैवोपदेशेन, तैः समं विवदस्व च ॥२२७॥
भद्रया ह्येव रीतया तु, प्रभुस्ते नाऽत्र संशयः । मार्गात्तस्य परिभ्रष्टं तस्य मार्गानुयायिनम् ॥२२८॥
चापि सम्यग् विजानाति; [१२६]प्रति त्वं कुरुषेऽथ चेत् । प्राप्तकष्टस्य मानेन ह्येव स्यात्ते प्रतिक्रिया ॥२२९॥
सन्तोषं सेवसेऽथो चेत् सन्तोषिभ्यस्तदुत्तमम् । [१२७]सन्तोषं भज सन्तोषश्चासौ शक्यो भवेत् त्वया ॥२३०॥
सर्वथाऽल्लाहसाहाय्याद्दुद्विजस्व ततश्च नो । कृतैः कूटैरमीभिस्तु मनो मोद्वेगमानय ॥२३१॥
[१२८]ध्रुवन्तेषां सहायोऽसावल्लाहो ये जना इह । रमन्ते भद्रकार्येषु ये च कर्त्तव्यबुद्धयः ॥२३२॥

योगः—२३२

CC-0. In Public Domain. Digitized by eGangotri

१७

सूक्तम्–बनीश्वरालीनाः

(बनी इस्रायील)

(महाकालेऽवतीर्णा एकादशोत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

अथ पञ्चदशं पारायणम्

[1]काशतां हि महिम्नाऽसौ योऽनयद् बन्धकं निजम् । निशायामेव पूजायाः स्थानात्तावदनिन्दितात् ॥ १ ॥

विप्रकृष्टस्थितं धाम पूजायाः, हि वयं किल । वरदानमयच्छाम यस्मै क्षेत्राय सर्वशः ॥ २ ॥

दर्शयेम वयं येन ह्यात्मचिह्नानि तत् पुनः । स त्वेवाऽस्ति ध्रुवं श्रोता द्रष्टा चैवाऽपि केवलः ॥ ३ ॥

[2]मूषायाऽदद्म शास्त्रञ्चाऽकार्ष्म तन्मार्गदर्शकम् । ईश्वरालीनसन्तत्यै बोधयन्तो हि "नेतरम् ॥ ४ ॥

मां विहाय कमप्यन्यं विधत्त कार्य-साधकम्" । [3]ते च तेषामपत्यानि किलासन् यान् वयं पुरा ॥ ५ ॥

अनया मोदयानेन नहुषेण समम्, ध्रुवम् । कृतज्ञिद् बन्धकोऽभूत् सः; [4]शास्त्रेण विशदं वयम् ॥ ६ ॥

ईश्वरालीनसन्तानं किञ्चावोचाम यत् क्षितौ । वारद्वयं पुनर्यूयं कलिं तावद् विधास्यथ ॥ ७ ॥

नग्नं प्रदर्शनञ्चैव जाल्मतायाः करिष्यथ । [5]तयोः पूर्वतरस्मिंस्तु समुपेते वयं ततः ॥ ८ ॥

साम्मुख्याय तु युष्माकमतीव प्रबलानथ । बन्धकान् स्वान् समुत्साह्य प्रैरयाम, ततश्च ते ॥ ९ ॥

पर्यकिरन् प्रविश्यान्तो विष्वङ् वासेषु सर्वतः । प्रतिज्ञाऽथ पुनश्चेयं पूरणीया ह्यवर्त्तत ॥१०॥

[6]ततस्तत् तुलनायाञ्चायच्छामाऽथ हि वो वयम् । पारीमेकां पुनश्चैव साह्यं प्रादद्म खल्वथ ॥११॥

पुत्रैर्वित्तैश्च युष्मभ्यं, भूरिसेना च वः कृता । [7]भद्रं युष्मत् कृतं तावत् युष्माकं ह्येव कल्पते ॥१२॥

भद्राय, दुरितञ्चापि कृतं युष्मभ्यमेव तु । ततश्चान्यतरस्याऽथ प्राप्ते दिष्टे (वयं ततः) ॥१३॥

साम्मुख्याय तु युष्माकं बन्धकानपरान् पुनः । प्रैरयाम समुद्ध्वस्तान् युष्मान् कुर्युर्यथैव ते ॥१४॥

यथापूर्वं विशेयुश्च मन्दिरं, यच्च किञ्चन । तेषां हस्तगतं स्यात्तत् ध्वंसयेयुरशेषतः ॥१५॥

[8]कदाचिद् वः प्रभुर्युष्मान् दयेताऽपि, परं यदि । प्रागारब्धः पुनर्दोषः पुनरावृत्त एव तु ॥१६॥

स्यात्तदा सह युष्माभिः प्राक्तनं ह्येव सर्वथा । व्यवहारं करिष्यामो वयञ्चापि; कृतोऽथ च ॥१७॥

श्रद्‌विहीनजनेभ्योऽस्ति नरको बन्धनालयः । [9]कुराणं वस्तुतोऽदस्तु वर्त्म दर्शयतीह यत् ॥१८॥

वर्त्मनां सरलं वर्त्म, सुकृतः श्रद्धरानथ । शुभदेशि "महांस्तेभ्यः पुरस्कारो हि तिष्ठति" ॥१९॥

[10]इदञ्चापि परस्मिन् ये लोके न श्रद्धराः किल । कृच्छ्रदा यातना तेभ्यश्चास्माभिः सज्जिता ध्रुवम् ॥२०॥

[11]याचते दुरितं तावन्मनुष्योऽत्र यथैव सः । याचते भद्रमेवाऽपि; प्रकृत्या सत्वरो जनः ॥२१॥

[12]लक्ष्मणी द्वे व्यधामाऽथ वयं रात्रिमहस्तथा । सान्धकारं च निड्लक्ष्म दिनलक्ष्म पुनः कृतम् ॥२२॥

सालोकं, स्वप्रभोर्येनानुग्रहं यूयमिच्छत । समानां गणनाञ्चैव येन यूयं प्रबोधत ॥२३॥

यच्च किञ्चिद् भवत्यत्र विविक्तं विशदीकृतम् । वर्त्तते तत्तदस्माभिः; [13]सर्वस्याऽपि जनस्य च ॥२४॥

CC-0. In Public Domain. Digitized by eGangotri

शकुनं तस्य तस्याऽऽस्ते बद्धं तावत् छिरोधिया । पुस्तकञ्चाऽथ खल्वेकं तस्य तस्य कृते वयम् ॥२५॥
प्रमोक्ष्यामस्त्वसंदेहं पुनरुत्त्थापनाऽह्नि । यत् समुद्घाटितं चाक्ष्णोरीक्षिताऽसौ पुरस्तदा ॥२६॥
[14](वक्ष्यतेऽसौ च) त्वं तावत् स्वकीयं पठ पुस्तकम् । आत्मनश्चात्मनाऽलं त्वं प्रसंगे गणितस्य वै ॥२७॥
[15]योऽपि स्वध्वनि यात्यत्र स्वभद्रायैव यात्यसौ । कापथं त्वथ यो याति तस्मायेवास्य दुष्फलम् ॥२८॥
न कश्चित् कस्यचिद् भारं चात्र वोढुं क्षमो भवेत् । क्लिश्नीमश्च न वै कञ्चित् न यावत् कोऽपि वाग्घरः ॥२९॥
प्रेषितः स्यात् (किलैतेषां नृणामुद्बोधनाय तु) । [16]भवामो ध्वंसकामाश्च कस्याश्चिद् वसतेर्यदा ॥३०॥
ऐश्वर्यभोगिनस्तस्याः प्रदिशामो वयं ततः । अवज्ञाकृतयस्ते वै जायन्ते, तदनन्तरम् ॥३१॥
तां वयं मूलतो ह्येव प्रोच्छिन्द्मोऽशेषतः खलु । [17]नाशिताश्च पुनर्वंश्या अनेके नहुषादनु ॥३२॥
अस्माभिः, ते प्रभुश्चासौ समर्थः खलु विद्यते । ज्ञानेऽथ दर्शने चाऽपि स्वीयबन्धकपाप्मनाम् ॥३३॥
[18]अनायासोपलभ्यं यो वस्तु किञ्चिदिहेच्छति । दातुकामा वयं यस्मै तत्तस्मै तूर्णदा वयम् ॥३४॥
ततस्तस्मै कृतऽसज्जोऽस्माभिस्तिष्ठति नारकः । धिक्कृतोऽपाकृतश्चैव, यं किलासौ प्रवेक्ष्यति ॥३५॥
[19]यः पुनः परलोकेच्छुर्यतमानश्च वर्त्तते । यथार्थं, तत्कृते किञ्च श्रद्धरश्चापि तिष्ठति ॥३६॥
यत्नाः सभाजयिष्यन्ते तद्विधैस्तु जनैः कृताः । [20]वैभवात् त्वत्प्रभोरेते सततं संप्रदायिनः ॥३७॥
भवामो वयमेतेभ्यस्तेभ्यः सर्वेभ्य एव च । प्रदानस्य प्रभोस्ते च नाऽवसानः कदाचन ॥३८॥
[21]पश्य, चित्रं कृतं किंचित् त्वस्माभिश्चोत्तरोत्तरम् । गुणवत्, परलोकश्च गुणैरुत्तम एव तु ॥३९॥
मानेऽतिरिच्य खल्वेष सर्वानप्यत्र तिष्ठति । [22]अल्लाहस्य तुलायां त्वं नैवेष्टं त्वितरं कुरु ॥४०॥
धिक्कृतोऽप्यसहायोऽपि त्वन्यथा ह्यवसत्स्यसि । [23]प्रभुणा ते समादिष्टम्—"तं विहाय तु नेतरम् ॥४१॥
पूजय त्वम्, सदाचारः पितृभ्यां त्वं तथा भव । तयोरन्यतरो वोभौ भवेतां पश्यति त्वयि ॥४२॥
यदि जीर्णौ न तत् कुर्याः व्याहृतम् 'धिगिति' क्वचित् । भर्त्सनाप्यथ नो कार्या, वक्तव्यं श्लक्ष्णमुत्तमम् ॥४३॥
[24]तत् पुरः सारय त्वञ्च दयया नम्रता-भुजम् । ब्रूहि चाऽथ-प्रभो ! यद् वत् मामपालयतामिमौ ॥४४॥
शैशवे तद्वदेव त्वमिमौ चापि दयस्व भोः ! । [25]यद् हृदिस्थन्तु ते सम्यग् वेत्ति तत्ते प्रभुः (ध्रुवम्) ॥४५॥
भद्राचारी यदीह त्वं क्षमाशीलो महानसौ । ध्रुवन्तेभ्यो मनो येषां तस्मिन्नेवारतं भवेत् ॥४६॥
[26]दायभागं प्रयच्छाऽथ वान्धवायाऽथ यात्रिणे । पराश्रिताय चैवाऽपि, व्ययं व्यर्थञ्च मा कुरु ॥४७॥
[27]व्यर्थव्यया असन्देहं शातनस्य हि बान्धवाः । शातनः स्वप्रभौ किञ्च कृतघ्नो ह्यथ तिष्ठति ॥४८॥
[28]इच्छुकाः खलु सन्तश्चेद् दयायाः स्वप्रभोरथ । साशा यद् विषये यूयं सत्यमत्र च तिष्ठथ ॥४९॥
अवशास्तान् विहातुञ्चेद् भवेतैव ततोऽपि तु । वदताऽऽमधुरां वाचम् तैः; [29]स्वकीयं न वा करम् ॥५०॥
स्वीयया ग्रीवया सार्धं बद्धं रक्षत, नाऽपि तम् । कुरुध्वं सर्वथा स्वैरं येन याताऽत्र गर्हणाम् ॥५१॥
असहायास्तथा भूत्वा यूयं येन न तिष्ठत । [30]प्रभुस्ते प्रकिरत्यत्र वृत्त्यौदार्यं तु तत् कृते ॥५२॥
यः प्रतीष्टोऽस्य, यस्याऽर्थे तथाऽसौ पुनरिच्छति । तां स संकुचिताञ्चापि करोत्येव, न संशयः ॥५३॥
आत्मनो बन्धकानां स द्रष्टा ज्ञाता च सर्वदा । [31]अर्थाभावभयात् स्वीयां सन्ततिं न विशंसत ॥५४॥
वयं वृत्तिं प्रयच्छामस्तेभ्यो युष्मभ्यमप्यथ । वस्तुतश्शंसनं तेषां अपराधो महानयम् ॥५५॥
[32]मा गमः सन्निकर्षञ्च व्यभिचारस्य, कर्म तत् । अभद्रं, कापथश्चासौ; [33]वधिष्ट प्राणिनं च मा ॥५६॥
अवैधोऽल्लाहतो यस्तु, वैधो यस्तं विहाय तु । अन्यायेन हतो यस्तु तस्य वंश्याः कृता इह ॥५७॥
साधिकाराः प्रतीकारे, परं नो वधकर्मणि । मर्यादातिक्रमस्तस्मै प्रतीष्टो, ध्रुवमेव च ॥५८॥
साह्यं विधास्यते तस्य; [34]सन्निकर्षश्च सम्पदः । अनाथस्य न वै कार्यो विना रीतिन्तु सूत्तमाम् ॥५९॥
यावन्न यौवनोपेतो भवत्येष तु सर्वथा । पूरणीया प्रतिज्ञा च कृता, यूयं भविष्यथ ॥६०॥
प्रतिज्ञाविषये पृष्टाः; [35]यदोन्मानः कृतो भवेत् । पूर्णो ह्येव स कर्त्तव्यस्तुलया समयैव च ॥६१॥
तोलनीयम्, भवत्येतत् शुभोदर्कञ्च सूत्तमम् । [36]नाऽनुवर्त्यञ्च तद् यूयं यस्मिन्नज्ञा हि तिष्ठथ ॥६२॥
कर्णौ नेत्रे तथा स्वान्तमधिकृत्यानुयोक्ष्यते । सर्वो जनस्त्विदं सर्वं, सन्देहो नाऽत्र कश्चन ॥६३॥
[37]उद्दामदर्पिता नाऽथ चलतेह क्षितौ, न वै । क्षितिं भेत्तुमलं यूयं, पर्वतोत्सेधमेव वा ॥६४॥

CC-0. In Public Domain. Digitized by eGangotri

नाप्युपेतुमलं तावत्; [३८]अशेषं दुरितं त्विदम् । अप्रियं वर्त्तते ऽमुष्य दृष्ट्या तावत् प्रभोस्तु ते ।।६५।।
[३९]तत्त्वज्ञानमिदं यद्धि प्रभुस्ते त्वय्यकाशयत् । अल्लाहमन्तरेणाऽथ प्रतीष्टो ऽन्यो न घट्यताम् ।।६६।।
अन्यथा क्षेप्स्यसे त्वं हि नारके प्रविनिन्दितः । जात्या बहिष्कृतश्चापि; [४०](प्रतिमापूजकाः! नु किम्) ।।६७।।
प्रभुर्वः सविशेषं वः पुत्रानेवाचिनोदथ । दिव्येभ्यञ्चात्मने दिव्याः पुत्रीरेवाऽचिनोत् पुनः ? ।।६८।।
इदं वो भाषितं सत्यं घोरमेव हि वर्त्तते । [४१]ज्ञापितं पुनरस्माभिऽ कुराणेऽस्मिंश्च वर्त्तते ।।६९।।
विविधाभिर्हि शैलीभिर्येन चेतन्तु ते खलु । परन्त्वेतेन खल्वेषु वैपरीत्यं हि वर्धते ।।७०।।
[४२]ब्रूहि—यद्यभविष्यन् हि प्रतीष्टास्तत्समे परे । वचन्त्येते यथा, ततेऽमार्गयिष्यन् ध्रुवं पथम् ।।७१।।
प्रापकं तस्य योऽमुष्मिन् स्थितः सिंहासने प्रभुः । [४३]महोऽसावुन्नतश्चासौ ततोऽप्याहुरिमे तु यत् ।।७२।।
[४४]सप्ताऽऽकाशाधरित्री च तत्र यच्चाधितिष्ठति । सर्वे तमेव शंसन्ति तन्न यत्तन्न शंसति ।।७३।।
शंसनन्तु परं तेषां (हन्त !) त्वं नैव बुध्यसे । क्षमाशीलस्सदैवाऽसौ दयावान् ध्रुवमेव च ।।७४।।
[४५]यदा पाठपरस्त्वञ्च कुराणस्य हि तिष्ठसि । व्यवधानपट तावच्चक्षुर्भ्यां यो न गृह्यते ।।७५।।
तं क्षिपामोऽन्तरे तेषां तव चैव वयं पुनः । [४६]क्षिप्तान्येषां तथा हृत्सु व्यवधानानि येन ते ।।७६।।
शक्नुयुस्तन्न वै बोद्धुं बाधिर्यं श्रवणेषु च । स्वप्रभोः केवलस्यैव कुराणे वर्णनं त्वयि ।।७७।।
कुर्वतीमे च जायन्तेऽसूयया हि पराङ्मुखाः । [४७]सम्यग् विद्मो यदैते च दत्तकर्णा भवन्ति हि ।।७८।।
युष्माकं भाषणे यच्च श्रोतुकामा भवन्ति ते । रहस्यं मन्त्रयन्तेऽथ यदा ते हि परस्परम् ।।७९।।
यदाहुश्चैव ते जाल्माः—यूयमन्विथ केवलम् । मायाग्रस्तं जनं तावत्; [४८]उपमाः किंविधा इमे ।।८०।।
घटयन्त्यधिकृत्य त्वाम् परिभ्रष्टा अमी जनाः । लभन्ते नाऽयनञ्चैव; [४९]ते तथैवानुयुञ्जते ।।८१।।
"खण्डशोऽस्थ्यवशेषाश्च भविष्यामो यदा वयम् । नवे सर्गे पुनः सृष्ट्योज्जीवयिष्यामहे नु किम्" ? ।।८२।।
[५०]ब्रूहि तान्—यूयमश्मानो भवताऽयोऽथवा पुनः । [५१]किञ्चिद् वाऽन्यन् महद् यद्धि युष्माभिरथवा मतम्! ।।८३।।
प्रक्ष्यन्ति ते पुनः—कोऽस्मान् परावर्त्य हि (जीवने) । प्रत्यानेष्यति?; तद् ब्रूहि—स एव प्राग्घि योऽसृजत् ।।८४।।
युष्मान्; वक्ष्यन्ति ते पश्चात् तवाग्रे चलमस्तकाः । "अस्त्विदं तत् कदा भावि?", ब्रूहि—'क्षिप्रं कदाचन' ।।८५।।
[५२]यदा युष्मानसौ ह्वाता श्रुत्वैवाह्वानमस्य च । प्रशंसन्तो ह्यमुं यूयं यातुं सज्जा भविष्यथ ।।८६।।
बोधिष्यथाऽथ यद् यूयं मनागेव चिरं स्थिताः । एतादृश्यां दशायान्तु; [५३]बन्धकान् ब्रूहि चैव मे ।।८७।।
"तदेव तैस्तु वक्तव्यम् यद् भवेदुत्तमं वचः" । शातनो जनयत्येषु मतिभेदं, न संशयः ।।८८।।
शातनो मानवानान्तु विशदोऽरिर्हि वर्त्तते । [५४]प्रभुस्ते त्वां विजानाति सम्यक्, किञ्चाऽथ कामतः ।।८९।।
त्वां दयेताऽथवा कष्टं पातयेत् त्वयि कामतः । प्रेषितस्त्वं न चाऽस्माभिर्विधायैषान्तु रक्षकः ।।९०।।
[५५]प्रभुस्ते तद् विजानाति सम्यग् यत्तत्र वर्त्तते । आकाशेषु धरित्र्याञ्च; वाग्घरा अथ केचन ।।९१।।
वैशिष्ट्यं गमितास्तेषु वाग्घरा इतरे हि ये । दान्यूधाय च सामानि दत्तान्यस्माभिरप्यथ ।।९२।।
[५६]ब्रूहि—युष्माकमेते ये मता देवास्तु तत् पृथक् । तान् समाहूय वेत्तव्यमपाकर्त्तुं तु काञ्चन ।।९३।।
व्यथां ना प्रभवन्त्येते परिवर्त्तयितुञ्च वा । [५७]आह्वयन्ति च यानेते मार्गयन्ति स्वतोऽपि ते ।।९४।।
स्वप्रभोःप्रापकं मार्गं स्पर्द्धमानाः परस्परम् । "को नु नेदिष्ठ एषां स्यात्" दयामाशासते च ते ।।९५।।
तस्य बिभ्यति चैवास्य यातनाया निरन्तरम् । वस्तुतस्ते प्रभोरापद् भयस्य विषयः किल ।।९६।।
[५८]वासतेयं न वै तद् यत् त्वस्माभिर्नाशितं हि नो । भवेत् कृच्छ्रेऽथवाक्षिप्तं पुनरुद्बोधनात् पुरा ।।९७।।
अंकितं पुनरेतच्च पुस्तके पूर्वतोऽस्ति हि । [५९]प्रेषणाल्लक्ष्मणां चैव नास्मान् किञ्चिदवारयत् ।।९८।।
ऋते तेषां निषेधात्तु पूर्वजैर्विहितात् किल । अदद्मौष्ट्रीं वयं ह्येकां समुद्गाय बभूव या ।।९९।।
लक्ष्म स्पष्टं, परन्ते तु जाल्मास्तस्यां हि जज्ञिरे । वयं लोकभयायैव प्रहिण्मो लक्ष्मजालकम् ।।१००।।
[६०]बुध्यतां त्वं यदा चोक्तोऽस्माभिर्यत्ते प्रभुस्त्विमान् । लोकान् पर्यावृणोद् यच्च दृश्यं तुभ्यं प्रदर्शितम् ।।१०१।।
अस्माभिस्तत् कृतं ह्येभ्यः परीक्षायाश्च कारणम् । असौ वृक्षोऽपि, धिक्कारं कुराणे गमितोऽस्ति यः ।।१०२।।
भीषयामो वयन्त्वेतान्, परमेतेन वर्धते । जाल्मतैव किलैतेषु दुर्निवाराऽथ या पुनः ।।१०३।।
[६१]यदा चैव वयम् देवानूचिम—"स्मर्यतामिदम् । प्रणिपातपरा यूयं नमतेह किलाऽऽदिमम्" ।।१०४।।

CC-0. In Public Domain. Digitized by eGangotri

प्रणिपातपरा देवास्ततस्ते ह्यभवन्तसमे । इभालीनं विहायासौ प्रत्यवादी“दहं कथम् ॥१०५॥
भवेयं प्रणतस्तं तु त्वया सृष्टो हि यो मृदा” । [६२]प्रत्यवादीच्च—“किं तावल्लोकसे तं हि यस्त्वया ॥१०६॥
मानितो मां समुल्लंघ्य ? पुनरुत्थापनादिनम् । यावद् दत्तावधिश्चेत् स्यां त्वयाऽमुष्य हि सन्ततिम् ॥१०७॥
कांश्चिदेव विहायाऽहं कुर्यामात्मवशीकृताम्” । [६३]अवोचद् “याहि, यञ्चैषां कोऽपि त्वामनुयास्यति ॥१०८॥
पुरस्कारः समेभ्योऽपि निरयो हि भविष्यति । प्रपूर्णोऽसौ पुरस्कारः”; [६४]यस्मिन् कस्मिंश्चिदप्यथ ॥१०९॥
भवेत्ते प्रभुता वाचा भीषयेस्तम्. तथा ह्यम् । पदातिञ्चात्मनोऽमीषां प्रेरयेः गाहनाय वै ॥११०॥
धनेषु सन्ततौ चैषामंशभाक्त्वं भजेस्तथा । एभिः कुर्याः प्रतिज्ञाश्च; प्रतिजानाति शातनः ॥१११॥
यद् यत् तत् तत् समं नान्यत् त्वभिसन्धिमृते भवेत् । [६५]बन्धका आत्मनीना ये मे तु त्वं तेषु न प्रभुः ॥११२॥
प्रभुस्ते रक्षकत्वेन तेषां, सामर्थ्यभृत् तथा । [६६]प्रभुर्वः स हि यो नावोऽकूपारे सुहिताय वः ॥११३॥
चालयत्यस्य यद् यूयं मार्गयेत त्वनुग्रहम् । दयावान् त्स हि युष्मासु वर्त्तते नाऽत्र संशयः ॥११४॥
[६७]आपद् युष्मानुपाभ्येति समुद्रेषु यदैव च । तं विहायेतरे सर्वे यान् यूयं तत्र तु स्तुथ ॥११५॥
प्रणश्यन्ति परं युष्मान् यदाऽसौ त्रायतेऽथ च । पारं प्रापयते यूयं पराङ् आस्या हि तिष्ठथ ॥११६॥
कृतघ्नोऽयं मनुष्यो वै; [६८]मन्यध्वे स्वं नु रक्षिताः ? । अस्य प्रेरणया यन्नो पातुकोऽव्यस्तु कश्चन ॥११७॥
अलं संग्रसितुं खण्डो युष्मान्, वातमथाऽपि वा । संकुलं शर्करालैस्तु प्रभवेत् प्रेषणाय नो ? ॥११८॥
तद् दशा न च वै यूयमवितारमवाप्स्यथ । [६९]मन्यध्वे रक्षितं स्वं किम् यन्नायं पुनरेव च ॥११९॥
युष्मान् नेष्यति कष्टेऽथ, शर्करालैः समाकुलम् । चालयिष्यति वातं वा न पुनः, मज्जयिष्यति ॥१२०॥
युष्मान् कृतघ्नता हेतोर्नापि वा; न च कञ्चन । लप्स्यध्वे प्रतिशोधार्थम् यूयमस्मद्विरोधिनम् ॥१२१॥
[७०]आदिमस्य तथा वंश्या अस्माभिरर्हतां गताः । कल्पितानि च यानानि तेभ्यो भूमौ च वारिधौ ॥१२२॥
मेध्यानामथ भोज्यानां तेभ्यो वृत्तिरदीयत । वरीयांसः कृताश्चाथ बहून्त्सृष्टानुपेक्ष्य ते ॥१२३॥
[७१]दिने तस्मिन् यदा लोकान् समस्तांश्च पुनर्वयम् । कर्मणां लेखसूचीभिराह्वयिष्याम एव तु ॥१२४॥
दक्षिणे हि करे यस्मै दास्यामस्तस्य पुस्तकम् । वाचयिष्यति सो ऽसौ तु तदा स्वं स्वं हि पुस्तकम् ॥१२५॥
न चाऽत्याचरितास्तेऽथ भविष्यन्ति मनागपि । [७२]येन त्वन्धायितं तावज्जनेनेह निरन्तरम् ॥१२६॥
परस्मिंश्चाप्यसौ लोके त्वन्धस्येवाचरिष्यति । परिभ्रष्टोऽयनाच्चैव सुदूरं स्थास्यति ध्रुवम् ॥१२७॥
[७३]एभिर्निरन्तरं यत्नः कृतोऽभूद् भ्रंशनाय ते । ततो यत् काशितं तावत् त्वय्यस्माभिस्ततोऽपरम् ॥१२८॥
येन किञ्चित् त्वया सृष्टं भवेदस्मद् विरोधनम् । त्वयेत्थं विहिते मित्रं त्वां व्यधास्यन्ननुत्तमम् ॥१२९॥
[७४]सुधृतं न वयं त्वाञ्चेदकरिष्याम एव तु । अभविष्यः कदाचित् त्वं तान् प्रतीतो हि किञ्चन ॥१३०॥
[७५]त्वां ततोऽस्वादयिष्याम जीवन्तं चापि वै रसम् । द्वैगुण्येन, मृतञ्चापि द्वैगुण्येन तथैव च ॥१३१॥
प्राप्स्योऽथ रक्षकं नापि साम्मुख्ये मम कञ्चन । [७६]भुवश्चास्मिन् इमे भागे सदाऽचेष्टन्त ते पुनः ॥१३२॥
त्वन्मनः कर्त्तुमुद्विग्नं सारणाय हि ते त्वतः । तवोर्ध्वं त्वत्र ते चाऽपि स्युः क्षणायैव वासिनः ॥१३३॥
[७७]प्रेषिता वाग्घराः प्राक्ते येऽस्माभिस्तेषु चाप्यथ । अतिष्ठद् रीतिरस्माकं त्वीदृशी ह्येव, नापि च ॥१३४॥
परीवर्त्तं कमप्यत्र कथञ्चित्त्वमवाप्स्यसि । [७८]सूर्ये चास्तमिते यूयं पूजां रात्रिमुखे किल ॥१३५॥
प्रतिष्ठितां कुरुध्वं वै, कुराणं प्रातरेव च । ध्रुवं प्रातः कुराणस्य साक्षात्कारो हि दृश्यते ॥१३६॥
[७९]कञ्चित् कालमनेनाऽथ समं जागृत खल्वपि । युष्मभ्यमुपहारोऽयं, सम्भवं चाऽथ वः प्रभुः ॥१३७॥
युष्मानुच्चैः पदायाऽपि कदाचित्तून्नयेदपि । [८०]ब्रूहि चैव—प्रभो मे ! त्वं यत्र कुत्रापि चेन्नयेः ॥१३८॥
सत्येनैव नयेर्मान्तु सारयेश्चेद् यतः कुतः । सारयेर्मामृतेनैव, स्वतो मामथ यच्छ च ॥१३९॥
स्थिरयित्रीं पुनः शक्तिम्; [८१]ब्रूहि सत्यं तथोदितम् । असत्यन्त्वपयातञ्चासत्यं चैवापयायि वै ॥१४०॥
[८२]काशयामः कुराणञ्च श्रद्धरेभ्यो हि भेषजम् । दयाञ्चैव; परन्तेभ्यो ये तु जाल्मा जना इह ॥१४१॥
हानिरेव मता तेषां तावदेनेन (सन्ततम्) । [८३]मानवाय प्रयच्छामो यदा सौख्यं वयं तदा ॥१४२॥
पराङ् आस्यो भवत्येष विरुद्धचिन्तनस्तथा । कष्टं याति यदा चासौ निराशो जायते तदा ॥१४३॥
[८४]ब्रूहि—सर्वे रमन्तेऽत्र स्वरीत्यैव तु कर्मसु । प्रभुस्ते चाऽथ जानाति सम्यक् कस्कोऽत्र तिष्ठति ॥१४४॥

CC-0. In Public Domain. Digitized by eGangotri

स्वकीये सरले मार्गे; [८५]पृच्छन्त्येतेऽधिकृत्य च । आत्मानं त्वाम्, इमान् ब्रूहि—ह्यन्वादेशं मम प्रभोः ॥१४५॥
सदाऽऽत्मा वर्त्तते तावद्, युष्मभ्यं दत्तमस्ति च । स्तोकमेव पुनर्ज्ञानम्; [८६]इष्टमस्माकमस्तु चेत् ॥१४६॥
काशितं त्वयि यच्चापि किलास्माभिस्तु वर्त्तते । तत्समं स्यात् पराकृष्टं, साम्मुख्याय च नस्ततः ॥१४७॥
रक्षकं कञ्चनाऽपि त्वं न स्वकीयमवाप्स्यसि । [८७]केवलोऽनुग्रहो ह्येव प्रभोस्ते सततं स्थितः ॥१४८॥
अपारोऽनुग्रहः सत्यं त्वयि तस्य हि वर्त्तते । [८८]"ब्रूहि—जिन्ना मनुष्याश्च यदि स्युः संगता अपि ॥१४९॥
समकक्षं कुराणस्य किञ्चित् कर्त्तुं, ततोऽपि ते । अनेन सदृशं किञ्चित् स्रष्टुं शक्ष्यन्ति नैव तु ॥१५०॥
भवेयुश्चापि तेऽन्योन्यं साह्यहेतोस्तु संगताः । [८९]कुराणेऽस्मिंस्तथाऽस्माभिर्दृष्टान्ताश्च निरूपिताः ॥१५१॥
सर्वरूपाः, अमान्यन्तु परं यद् यत्त्विहाऽभवत् । लोकेभ्यो बहुसंख्येभ्यो ह्यतिष्ठत् तत्तदेव तु ॥१५२॥
अश्रद्धां केवलं हित्वा; [९०]तेऽवदन्नित्थमप्यथ । "सश्रद्धास्त्वयि शक्ष्यामो भवितुं न वयं जनाः ॥१५३॥
यावत् प्रवाहयेस्त्वं नोऽस्मभ्यं स्रोतः क्षितेरिह । [९१]खर्जूराणां वनं स्यात्ते द्राक्षाणाञ्चैव तत्र च ॥१५४॥
यावत् प्रवाहयेः किञ्च सरितस्त्वं न वाऽप्यथ । [९२]अस्मासु पातयेर्याविन्न च वा व्योम खण्डशः ॥१५५॥
यथा तेऽस्ति प्रतिज्ञा च, यावद् दिव्यानथाऽपि वा । अल्लाहञ्च पुरस्तान्नो नैवोपस्थापयेरपि ॥१५६॥
[९३]सौवर्णम्वा गृहं ते स्यादारोहेर्व्योम वा पुनः । वयं मंस्यामहे किञ्च तवारोहं ततोऽपि नो ॥१५७॥
न यावत् पठितुं शक्यं त्वस्मदर्थेऽवतारयेः । त्वमेकं पुस्तकं तावद्"; ब्रूह्यसावस्ति मे प्रभुः ॥१५८॥
शाडमानो महिम्ना हि; किं भवामीतरोऽपि तु । मानवात् कश्चनाहं च वाग्घरो यश्च तिष्ठति ? ॥१५९॥
[९४]यदाऽपि मानवांस्तावत् समुपैत् मार्गदर्शनम् । नाऽरुणत् तान् किमप्यन्यत् श्रद्धायाः, प्रविहाय तु ॥१६०॥
तदेतत् तेऽवदन् यद् वै—प्रैषयन् मर्त्यमेव किम् । अल्लाहो वाग्घरं कृत्वा?; [९५]ब्रूह्यवेत्स्यन्त चेद् भुवि ॥१६१॥
दिव्या विचेष्टमानास्तु तत्तेभ्यो वियतो वयम् । प्रैषयिष्याम कृत्वाऽत्र दिव्यं कञ्चन वाग्घरम् ॥१६२॥
[९६]ब्रूहि—मेऽथ च युष्माकं मध्येऽल्लाहो हि केवलम् । पर्याप्तः साक्षिरूपेण, बन्धकानामसौ ध्रुवम् ॥१६३॥
स्वीयानां वर्त्तते द्रष्टा ज्ञाता चैवापि वर्त्तते । [९७]दर्शयेन् मार्गमल्लाहो यमेव स्वयनो हि सः ॥१६४॥
पथभ्रष्टन्तु यं कुर्यात् तादृशेभ्यो न शक्यते । त्वया लब्धुं सखा त्राता तं विहायेतरोऽपरः ॥१६५॥
आक्रक्ष्यामो वयं तांश्च पुनरुत्थापनाऽह्नि । अवाङ् आस्यांस्तथा मूकानेडानन्धान् पुनर्जनान् ॥१६६॥
नारको वसतिस्तेषां, मन्दार्चिश्च भविष्यति । यदाप्येभ्यो वयं तन्तु धक्ष्यामोऽतितरां पुनः ॥१६७॥
[९८]पुरस्कारोऽयमेतेभ्योऽश्रद्धां यत्ते त्वदर्शयन् । आयातैः सममस्माकम् प्रावदंश्चापि—"किं वयम् ॥१६८॥
अस्थिशेषा भविष्यामो यदा चैवातिचूर्णिताः । नवे सर्गे पुनः सृष्ट्वा करिष्यामह उद्गताः" ? ॥१६९॥
[९९]किन्न बुद्धममीभिस्तु व्योमानि च धराञ्च यो । अल्लाहः सृष्टवान् त्स्रष्टुं शक्नोति तद् विधानपि ॥१७०॥
असौ तेभ्योऽवधिञ्चैकं निश्चितं न्वकरोद्, ध्रुवम् । परं जाल्मास्तु ये लोकास्तेभ्यो ऽश्रद्धां विहाय हि ॥१७१॥
अमान्यं वर्त्तते तावन्निःशेषं यदपीह तु । [१००]ब्रूहि चेदभविष्यद् वो दयाकोशेऽधिकारिता ॥१७२॥
प्रभोर्मे व्ययसंविग्ना यूयं तं समरोत्स्यत । संकीर्णहृदयस्तावद् भवत्येष तु मानवः ॥१७३॥
[१०१]मूषकाय च लक्ष्माणि विशदानि वयं नव । अयच्छाम, पुनर्यूयमीश्वरालीनसन्ततिम् ॥१७४॥
पृच्छतैतद्, उपैतेतान् यदाऽसौ तमभाषत । प्रिययौनः-अये मूष ! मन्ये त्वां माययाऽऽहतम् ॥१७५॥
*मूषकस्य तु दण्डस्य सर्पता, तत्करस्य च । कक्षादुद्गतिमायाते भानुवद् भासमानता ॥ १ ॥
मायिनामथ मायाया विफलीकार एव च । घोषणामनु देशस्य दुर्भिक्षेण विपीडनम् ॥ २ ॥
शलभानामथाऽऽपातः कृमिकीटभयं पुनः । मण्डूकानां प्रभूतत्वं रक्ताऽऽपत्तिर्नवेति तत्* ॥ ३ ॥
[१०२]प्राह-सत्येन वेत्सि त्वं व्योम्नामुर्व्यास्तथैव च । प्रभुं विहाय नैवान्यो लक्ष्माण्येतानि कश्चन ॥१७६॥
प्रैषयत् तदहं मन्ये त्वां नष्टं प्रिययौन हे ! । [१०३]असावैच्छत् ततश्चामून् द्रावयेत् यत्ततो भुवः ॥१७७॥
परं तेन समं सार्थास्तस्यास्माभिस्तु मज्जिताः । [१०४]अभ्यधाम वयं पश्चादीश्वरालीनसन्ततिम् ॥१७८॥
"वसताऽत्र तु वासं (भोः!) धरित्र्याम्", तदनन्तरम् । प्रतिज्ञासमयोऽभ्येति परलोकस्य वै यदा ॥१७९॥
युष्मान्त्सर्वान् करिष्यामः संहृत्योपस्थितान् किल । [१०५]समं सत्येन खल्वेतत् त्वस्माभिर्ह्यवतारितम् ॥१८०॥

*नव लक्ष्माणि त्विमानि

CC-0. In Public Domain. Digitized by eGangotri

अवतीर्णमिदञ्चापि समं सत्येन वर्त्तते । प्रेषितस्त्वं तथाऽस्माभिर्वर्तसे (हे मुहम्मद !) ॥१८१॥
शुभवृत्तप्रदः कृत्वा कृत्वा चेतक एव च । [१०६]विभक्तं पुनरस्माभिः कुराणं तदिदं यथा ॥१८२॥
वाचयेस्त्वमिदं नृणां समक्षं सुविरामतः । संभाज्योत्तमरीत्या चास्माभिरेतत् प्रकाशितम् ॥१८३॥
[१०७]ब्रूहि—श्रद्धत्त, नो वाऽपि, पूर्वमस्माददीयत । ज्ञानं येभ्यस्त्विदं तेभ्यो वाचयामो यदैव तु ॥१८४॥
अवाङ् आस्या नमन्तस्ते प्रपतन्ति हि भूतले । [१०८]इदञ्च ब्रुवते ऽकस्मात्—"प्रभुर्नः सुमहानसौ ॥१८५॥
अस्माकं प्रभुणा यच्च प्रतिज्ञातं हि वर्त्तते । अनिवार्यतया तस्य पूरणञ्च भविष्यति ॥१८६॥
[१०९]स्रवदस्रेक्षणास्ते च स्वास्येषु प्रपतन्त्यधः । नम्रतायाममीषाञ्च मात्रावृद्धिं करोत्यदः ॥१८७॥
[११०]ब्रूह्यल्लाहस्य नाम्ना वा दयालुसंज्ञयाऽथवा । स्तुवीध्वं तं पुनर्यूयं, नाम्ना येनाऽपि केनचित् ॥१८८॥
नामानि तस्य सर्वाणि रससिक्तानि सर्वशः । तारस्वरेण नैवाऽपि नाऽपि मन्दस्वरेण च ॥१८९॥
स्तुतिवाचाऽस्य वक्तव्या, श्रेयान् वै मध्यमः स्वरः । [१११]ब्रूहि चाऽथ-प्रशंसान्तु ह्यल्लाहो ऽर्हति केवलः ॥१९०॥
यश्चकार न वै कञ्चित् चात्मनः पुत्रमेव तु । शासने यस्य नाप्यस्ति कोऽपि खल्वंशभागथ ॥१९१॥
परापेक्षीति हेतोश्च यस्य नाप्यस्ति कश्चन । रक्षकः सुसखा चाऽपि, स्तुवीध्वं तं महत् ततः ॥१९२॥

योगः—१९२

CC-0. In Public Domain. Digitized by eGangotri

१८

सूक्तम्–गह्वरम्

(अल-कह्‌फ)

(महाकालेऽवतीर्णा दशोत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अल्लाहाय प्रशंसाऽस्ति, यो हि तावत् स्वबन्धके । ऽकाशयत् पुस्तकं ह्येतत् वक्रताञ्चात्र नादधौ ॥ १ ॥
[२]सरलं यच्च, येनेदं चेतयेन्मानुषांस्ततो । यातनायाः कठोराया आपतन्त्या अथो ततः ॥ २ ॥
श्रद्धरानन‍ुकूलानि कर्माणि कुर्वतस्तथा । बोधयेद् यच्छुभं वृत्तं भद्रा तेभ्यः पुरस्क्रिया ॥ ३ ॥
[३]यत्र वत्स्यन्ति ते शश्वत्; [४]तांस्तथैव च चेतयेत् । ये वदन्ति कृतः पुत्रः किलाऽल्लाहेन वर्त्तते ॥ ४ ॥
[५]नेदं जानन्ति ते नाऽथाऽजानंस्तेषां च पूर्वजाः । इयं घोरा पुनर्वाचा यैषामास्याद् विनिर्गता ॥ ५ ॥
इदं स्पष्टमसत्यं हि यदेते प्रवदन्ति तु । [६]विश्वासं ते न चेत् कुर्युः कथनेऽस्मिन् तदा पुनः ॥ ६ ॥
कदाचित् प्रविषण्णस्त्वं तेन तेषु विनाशयेः । आत्मनैवात्मनः प्राणान्; [७]ध्रुवं सृष्टं धरातले ॥ ७ ॥
तत्समं भूषणं तस्याः, परीक्षेमहि यद् वयम् । तेषां कस्को भवत्यत्र कर्मदृष्ट्या हि सूत्तमः ॥ ८ ॥
[८]यच्च किंचित् स्थितं तत्र व्यवस्येम च तद् वयम् । नेतुं हि बन्ध्यतां सर्वम्; [९]किन्नु यूयं प्रवोधथ ॥ ९ ॥
गुहास्थाः पर्वतस्थाश्च लोका अप्यभवन् हि यत् । लक्ष्मणामद्भुतानां नो केचिदेकतरा इति ॥१०॥
[१०]युवानस्ते गुहोपेता भूत्वा चैवाऽवदन् यदा । "प्रभोनः ! देहि नः स्वस्मात् दयामस्यां तथाऽपदि ॥११॥
ध्रुवं सत्यायनं चैव प्रदिशास्मांस्तथैव च" । [११]वयं तेषां श्रवान् पश्चादमुद्रयाम चैव हि ॥१२॥
हायनेभ्यः कतिभ्यश्चित् गुहामाश्रित्य तिष्ठताम् । [१२]पश्चादुन्मेषितास्ते च ज्ञातुमेतत् तयोस्तु कः ॥१३॥
गणयोः स्मृतवांस्तावत् सम्यक् कालावधिं हि तम् । यावत्तत्र स्थितास्ते हि; [१३]श्रावयामो वयं हि ते ॥१४॥
सत्यं तेषां किलाख्यानं वयस्याः कतिचिद् हि ते । श्रद्धराः स्वप्रभावासन्, अवर्धयाम तान् वयम् ॥१५॥
मार्गदर्शनदृष्ट्याऽन्यत्; [१४]हृदयानि दृढ़ानि च । अकृष्महि वयं तेषां, उद्बुद्धास्ते ततोऽवदन् ॥१६॥
व्योम्नां चैव धरित्र्याश्च प्रभुर्नो वर्त्तते प्रभुः । तं विहाय कमप्यन्यं करिष्यामो न वै वयम् ॥१७॥
प्रतीष्टमन्यथा कृत्वा त्वतिवादो भवेद्धि नः । [१५]अस्माकं ज्ञातयो ह्येतास्तं विहायेतरानपि ॥१८॥
प्रतीष्टान् खल्वमन्यन्त, प्रमाणं विशदं न किम् । तानधिकृत्य कुर्वन्ति तावदेता उपस्थितम् ॥१९॥
कोऽन्यो जाल्मतरस्तस्माद् भवेद् यो घटयेदिह । असत्यं, संगतो भूत्वा ह्यल्लाहेन समं पुरा ॥२०॥
[१६]तटस्था यूयमेतेभ्यो यदा जाता अथो ततः । अन्तरेणेष्टमल्लाहं मन्यन्ते यं त्विमे जनाः ॥२१॥
प्रयाय गह्वरं यूयं शरणायोपयात तत् । स्वां दयां वः प्रभुस्तावद् युष्मभ्यं प्रतनिष्यति ॥२२॥
कर्मणाञ्चैव संसिद्धिं सौकर्यञ्चाहरिष्यति । [१७]सूर्यं तमीक्षसे त्वञ्च यदासावेति होदयम् ॥२३॥
गह्वरात् स पुनस्तस्मात् याति दक्षिणतस्सरन् । यदाऽस्तं चैत्यसौ याति तेषां वामाद् विशंकितः ॥२४॥
ते च तत्रैकतो रन्ध्रं निर्विष्टास् स्थिरमासते । लक्ष्मणाञ्चेदमप्येकमल्लाहस्य हि वर्त्तते ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

अल्लाहो दर्शयेन् मार्गं यं स एवाऽस्य वेदनः । यं त्वसौ भ्रंशयेत्तस्मात् तदर्थं त्वं न कञ्चन ॥२६॥
लब्धुं शक्नोषि वै मित्रमध्वनो हि प्रदर्शकम् । [18](तान् विलोक्य तु)युष्माभिस्स्यादिदं प्रविचारितम् ॥२७॥
यत्ते जाग्रति, सुप्तास्ते त्वभवंस्तत्वतः परम् । वयं तेषामकुर्माऽथ पार्श्वयोः परिवर्त्तनम् ॥२८॥
वामतोऽवामतश्चापि, द्वारि तेषाञ्च कुक्कुरः । प्रसार्याऽस्थान्निजौ तावदग्रपादौ (सुखेन हि) ॥२९॥
ऐक्षिष्यध्वं तु चेद् यूयं तांस्ततः सत्यमेव तु । पलायिष्यध्वमेव द्राक् ततः, तेषां पुनर्भयम् ॥३०॥
व्याप्स्यद् हृत्स्वथ युष्माकम्; [19]तानजागरयाम च । इत्थंकारं वयम्, येन ते हि तावत् परस्परम् ॥३१॥
पृच्छेयुः, प्रश्नकस्तत्र तेषामेकोऽवदत् पुनः । "कियज्जातं चिरन्त्वत्र वासं युष्मानुपेयुषः" ॥३२॥
तेऽवदन् "वासरं किम्वा वासरांशमिहोषिताः" । अन्य आहुः चिरं यावद् यूयमत्रोषितास्तु तत् ॥३३॥
सम्यग् जानाति युष्माकं प्रभुरेव तु सर्वथा । साम्प्रतं प्रेष्यतां कश्चिद् युष्माकं नगरान्तरे ॥३४॥
रूप्यमुद्रां प्रदायेमां पश्येद् गत्वा ततश्च सः । कतरद् भोजनं तत्र शुद्धमास्ते ततश्च सः ॥३५॥
भोज्यसंभारमादाय कञ्चनोपैतु वः पुनः । चातुर्येण प्रवर्त्तेत कार्येऽसौ विनयेन च ॥३६॥
रहस्यं स च गोपायेद् युष्माकं विषये समम् । [20]विदांकुर्वत्सु वै तेषु युष्मांस्तेऽश्मप्रवर्षणात् ॥३७॥
हनिष्यन्त्यथवा युष्मान् नेष्यन्ति ते निजाध्वना । नाऽथ यूयञ्च साफल्यं प्राप्स्यथेह कदाचन ॥३८॥
[21]तदित्थं तावदस्माभिर्वृत्तं तेषान्तु सूचितम् । पौरेभ्यो येन जानीयुस्ते-भवत्यति सत्यवाक् ॥३९॥
अल्लाहो न च सन्देहः (पुनरुत्थापनाऽहनि) । अमुष्मिन् वर्त्तते काले; यदा पौराः परस्परम् ॥४०॥
विवदन्ते स्म यत् किंचित् त्वधिकृत्याऽवदन् हि ते । "केतनं कुरुतैष्वेकं तानधिकृत्य तत्प्रभुः ॥४१॥
सर्वं सम्यग् विदानोऽस्ति;" वाक्प्रभुत्वात् सुशंसिताः । येऽभवंस्तेऽवदन् तेषु पूजाया हि गृहं वयम् ॥४२॥
निर्मितं प्रविधास्यामः;" [22]वदिष्यन्ति हि केचन । "त्रयस्ते कुक्कुरस्तेषां चतुर्थश्चाऽभवत् पुनः" ॥४३॥
ततोऽन्ये कथयिष्यन्ति "पंच तेऽथ च कुक्कुरः । तेषां षष्ठो" निराधारः कल्पनाप्रसवो ह्ययम् ॥४४॥
वदिष्यन्ति ततश्चान्ये "सप्त ते श्वा तथाऽष्टमः" । ब्रूहि "संख्यां विदानोऽस्ति तेषां सम्यक् प्रभुर्हि मे ॥४५॥
केचनैव विदन्त्यत्र ये तु तान् पूरुषा जनान् । तानधिकृत्य तद् यूयं विवदध्वं न किञ्चन ॥४६॥
बाह्येषु विषयेष्वेव, नाऽथ प्रश्नं च पृच्छत । तानधिकृत्य तेष्वेव कञ्चनाऽपि तु (सर्वथा)" ॥४७॥
[23]कार्यस्य विषये चाऽथ न वै ब्रूत कदाचन । "श्वोऽहं कर्त्ताऽस्य कार्यस्य; [24]कामयेत प्रभुस्तु चेत् ॥४८॥
विस्मृतिं यातवद्भिश्च स्मर्त्तव्यस्स्वप्रभुः किल । वक्तव्यञ्च "भवेदेतत् सम्भवं ज्ञापयेत् स माम् ॥४९॥
प्रभुर्मे ह्ययनं तद् वै सत्याभ्यग्रतरं तु यत् । [25]गह्वरे तेऽवसन् किं चाऽप्यब्दानां त्रिशतावधिम् ॥५०॥
योजयेत्तेषु (वर्षाणि) नव चान्यानि खल्वपि । [26]वेत्ति सम्यग् वदाऽल्लाहो यावत् कालं स्थिता हि ते ॥५१॥
वियत्सु यद् धरित्र्याञ्चाप्रत्यक्षं ननु तिष्ठति । अल्लाहस्यैव तत् सर्वम्, श्रोता द्रष्टाऽद्भुतो ह्यसौ ॥५२॥
न तेषां रक्षको मित्रं तं विहायेतरोऽपरः । शासने नांशभाजञ्च कुरुतेऽन्यं स चाऽपरम् ॥५३॥
[27]पुस्तकं स्वप्रभोर्यच्च त्वयि तावत् प्रकाशितम् । श्रावयैनत्, समर्थश्च शब्दानस्य न कश्चन ॥५४॥
परिवर्त्तयितुं तावत्, शरण्यं नान्तरेण तम् । लप्स्यसे कञ्चनान्यं त्वम्, (संशयो नेह विद्यते) ॥५५॥
[28]मनांसि स्तम्भनीयानि किञ्च साधं जनैर्हि तैः । प्रातस्सायं प्रभुं ये स्वं संस्तुवन्तीह (सन्ततम्) ॥५६॥
तन्मुखापेक्षिभिर्भूत्वा, भवस्य भूतिकाम्यया । युष्माकञ्च दृशस्तान्नोपेक्ष्य यान्त्वग्रतः क्वचित् ॥५७॥
माऽनुयात च तं मर्त्यं हृदयं खल्वकुर्म हि । वयं मूढं पुनर्यस्य त्वस्माकं स्मरणादथ ॥५८॥
कामचारश्च यो भूत्वा विषयाऽऽलीन एव तु । यश्च सीमामतीत्यैव कर्मसु प्रणिमज्जति ॥५९॥
[29]ब्रूहि "सत्यमिदं किं च युष्माकं पार्श्वतः प्रभोः । श्रद्दधात्विच्छया कोऽपि नेच्छया न दधात्वथ ॥६०॥
जाल्मेभ्यो ह्यनलस्सज्जः कृतोऽस्माभिश्च तिष्ठति । परिवेषोऽस्य संवृत्य तान् जनानथ तिष्ठति ॥६१॥
प्रार्थिष्यन्ते तृषाहेतोर्यदि ते तद् वयं पुनः । परिष्यामोऽर्थनां तेषां गलितताम्रसन्निभैः ॥६२॥
अत्यन्तोष्णैर्जलैर्यानि धक्ष्यन्त्यास्यानि सर्वशः । विगीतं तन्महत् पेयं विश्राम धाम चापि तत् ॥६३॥
[30]श्रद्धरा येऽनुकूलानि कर्माणि कुर्वतेऽथ च । पुरस्कारो ध्रुवं तस्य मर्त्यस्य निष्फलो न वै ॥६४॥
यो ध्रुवं ह्यनुकूलेषु कर्मस्वत्राऽस्ति संरतः । [31]तादृशेभ्योऽस्ति लोकेभ्यस्सदा सौरभमव्ययम् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

यत्र तेभ्यो वहन्त्यस्स्युर्नद्योऽधस्तात् पुनश्च ते । यत्र संभूषयिष्यन्ते सौवर्णैर्वलयैः किल ।।६६।।
कौशेयोत्तमवासांसि हारित्यं प्रगतानि च । सूचीकर्मातिचित्राणि धारयिष्यन्ति यत्र च ।।६७।।
सोपधानानि पीठानि जुष्टास्स्थास्यन्ति यत्र च । पुरस्कारोऽति काम्योऽयं काम्यं विश्रामधाम च ।।६८।।
[३२]स्थापयाऽग्रे पुनस्तेषां दृष्टान्तं तादृशोर्द्वयोः । नरोर्ययोः किलैकस्मै प्रादद्मोपवनद्वयम् ।।६९।।
द्राक्षावल्लीभिरापूर्णं खर्जूरैः परितो वृतम् । कृष्याभूमिश्च तन्मध्ये हिताऽस्माभिरवर्त्तत ।।७०।।
[३३]फलाढ्यं पूर्णतो जातं तत् किलोपवनद्वयम् । वैभवं न च किं चाऽपि ताभ्यां निह्नुतमात्मनः ।।७१।।
तन्मध्ये पुनरस्माभिर्नदश्चैकः प्रवाहितः । [३४]फलानां सुहितश्चासौ बभूव प्रावदच्च तम् ।।७२।।
स्वं वयस्यं प्रसंगेन वार्त्तायाः "धनवत्तरः । त्वद् भवामि, बलीयांश्च जनानामपि कारणात्" ।।७३।।
[३५]आत्मनेत्थं सदोषः स विवेशोद्यानमात्मनः । आह चैव "न मन्येऽहं नंक्ष्यत्येतत् कदाचन ।।७४।।
[३६]नाऽपि मन्येऽथ कालोऽसौ कदाचिद्वाऽऽपतिष्यति । निश्चितं यदि पार्श्वे च मत् प्रभोर्वर्त्त एव तु ।।७५।।
परावृत्तोऽनिवार्यं तद् वरीयो धाम खल्वितः । लप्स्ये तावदहम्; [३७]तस्य वयस्यो वाद आरतः ।।७६।।
तमुवाच "विहाय त्वं श्रद्धां तावत् प्रवर्त्तसे । समं तेनाऽसृजद् यस्त्वां मृत्स्नाया वीर्यतोऽथ च ।।७७।।
ततस्त्वां घटयित्वा च सर्वांगैरकरोन्नरम् ? । [३८]अहं तिष्ठाम्यसावेव त्वल्लाहो मे प्रभुः किल ।।७८।।
न कुर्वे सहभाजञ्च कञ्चनाऽहं निजप्रभोः । [३९]प्राविशश्च यदोद्यानं त्वं निजं नाऽवदः कथम् ।।७९।।
अल्लाहेच्छैव गुर्व्यत्र, नाऽल्लाहमन्तरेण च । काऽप्यन्या वर्त्तते शक्तिः, हीनं मां चेद् विलोकसे ।।८०।।
धनेन चाऽप्यपत्येन; [४०]संभाव्यं हि भविष्यति । प्रभुर्मे सत्तरोद्यानं त्वन्मे यच्छेदथापि च ।।८१।।
पातयेदापदं कांचित् व्योम्नस्तस्मिन्, भवेच्च तत् । कदाचिद् भूमिसादेव; [४१]सलिलं तत्स्थमेव वा ।।८२।।
सर्वथोर्व्यां विलीयेत तदमार्ग्यं भवेच्च ते । [४२](तथा च घटितं) तस्य फलं सर्वमनाश्यत ।।८३।।
तदर्थं विनियुक्तेऽर्थे करयोस्तलपीडनात् । ऋते नाऽतिष्ठदन्यत्तु तद् यदाऽधः परापतत् ।।८४।।
स्वेष्वाधारेष्ववोचत्सोऽभविष्यत् सुभगं यदि । नाकरिष्यमहं कंचित् सहभाजं निजप्रभोः" ।।८५।।
[४३]अल्लाहमन्तरेणास्य निकायो न सहायकः । कश्चिदासीदशक्नोत् स्वं रक्षितुं न स वाऽऽत्मना ।।८६।।
[४४]सुरक्षाऽल्लाहतो ह्येव सत्यरूपाद् विजायते । ईदृशेष्वभियोगेषु, सूत्तमः स हि वर्त्तते ।।८७।।
तोषकत्वेन दृष्टोऽथ दृष्ट्योदर्कस्य च (ध्रुवम्) । [४५]जीवनस्येहलोकस्य बोधयामूंस्तथोपमाः ।।८८।।
जलं यद् वत् प्रवृष्टं यद् व्योम्नोऽस्माभिः, वनस्पतिः । तेन स्यात् प्रगुणीभूतो धरित्र्यां, परिणामतः ।।८९।।
बुसमेव भवेत् तच्च वायुनीतं दिशो दिशम् । अल्लाहः प्रभवत्यत्र सर्वथा सर्ववस्तुषु ।।९०।।
[४६]जीवनस्येह लोकस्य भूषा रायस्तथा प्रजाः । ततोऽपराणि भद्राणि प्रभोस्ते कलनादपि ।।९१।।
फलदृष्ट्याऽपि साधूनि दृष्ट्याऽऽशाया अथापि च । [४७]चिन्त्यतां (तद्दिनं) गोत्रान् वयमेते यदा किल ।।९२।।
चालयिष्याम एवाऽपि, यूयं द्रक्ष्यथ च क्षितिम् । प्रभिन्नां, परिवृत्याऽथ समवेतान् यदा वयम् ।।९३।।
करिष्यामो हि तानेषां त्यक्ष्यामो नाऽथ कञ्चन । [४८]ततिमध्ये च ते तेषां करिष्यन्त उपस्थिताः ।।९४।।
प्रभोः पार्श्वे (ऽथवक्ष्यन्ते) इहास्मान् यूयमागताः । सृष्टवन्तो वयं युष्मान् प्रागेव, (हन्तभोः) परम् ।।९५।।
यूयमित्थमवबुध्यध्वम् "युष्मभ्यं न हि कांचन । प्रतिज्ञां स्थापयिष्यामो वयं तावत्तु सर्वथा" ।।९६।।
[४९]कर्मपत्रं पुनश्चैव समक्षं स्थापयिष्यते । प्रत्यक्षं द्रक्ष्यसि त्वञ्च पाप्मनः सभयांस्ततः ।।९७।।
यद् यत्तत्रांकितं किंचित्, ते च क्रोक्ष्यन्ति-कीदृशम् । कर्मपत्रमिदं यन्नो लघु यद् विजहाति तत् ।।९८।।
गुरु वाऽपि जहात्येव न वै, सर्वमशेषतः । परमंकयते तावत्, यद् यत्तैरप्यनुष्ठितम् ।।९९।।
तत्स्थं सर्वं हि लप्स्यन्ते, नात्याचारी च ते प्रभुः । कस्मिंश्चिच्चापि (सप्राणे); [५०]ज्ञायताञ्च यदा वयम् ।।१००।।
अवादिष्म तथा दिव्यान्, "नमत सर्व आदिमम्" । इभालीनं विहायान्ये प्राणमन्त्सर्वं एव तु ।।१०१।।
जिन्नेष्वन्यतमो ह्यास्त खल्वसौ तत एव च । समुल्लंघितवानाज्ञां स्वप्रभोः, मां विहाय तत् ।।१०२।।
तञ्च तत्सन्ततिञ्चैव साम्प्रतं केन रक्षकम् । सखायञ्चापि मन्यध्वे शात्रवं तेषु वो यदा ।।१०३।।
निन्दनीयाऽति जाल्मेभ्यो जनेभ्यस्तु पुरस्क्रिया । [५१]व्योम्नां चैव धरित्र्याश्च सर्गकाले न खल्वहम् ।।१०४।।
आह्वयं तान्, न वा तेषां सर्गकालेऽपि तानहम् । भ्रंशकानध्वनस्तावदकुर्वं स्वसहायकान् ।।१०५।।

CC-0. In Public Domain. Digitized by eGangotri

नेदृशी मे मनोवृत्तिः; [52]स्मर्यतां तद्दिनं तथा । यदा वक्ष्यति सो (ऽल्लाहः) प्रतिम्नो ह्याह्वयेत मे ॥१०६॥
येषु मानो हि युष्माकं, आह्वास्यन्ति च तानिमे । परन्ते मानयिष्यन्ति तेषां त्वाह्वानमेव नो ॥१०७॥
व्यवधानं विधास्यामो वयं तेषाञ्च मध्यतः । [53]द्रक्ष्यन्त्यग्निं ततः पापा भोत्स्यन्ते चापि यद् वयम् ॥१०८॥
पातुका हि भवामोऽस्मिन्, मार्गं प्राप्स्यन्ति नाऽथ ते । त्राणायाऽन्यन्त्र यानाय; [54]दृष्टान्ता विविधा इह ॥१०९॥
अस्माभिर्वर्णिता नृभ्यः कुराणे सन्त्यनेकशः । कलिप्रियः परं मर्त्यः सर्वमप्यतियाय तु ॥११०॥
[55]न किंचिच् चारुधल्लोकान् उपेते मार्गदर्शने । श्रत्प्रतिष्ठापनात् किम्वा क्षमाया याचनात् प्रभोः ॥१११॥
विहायाऽस्याः (प्रतीक्षायाः) यद् यथाऽऽचरितं पुरा । पूर्वजैस्तद्वदेभिश्च समं स्याच्चरितं पुनः ॥११२॥
यातना वाऽथ प्रत्यक्षं तानसावुपयातु च । [56]शुभवृत्तप्रदान् कृत्वा चेतयितुं स्तथैव च ॥११३॥
वाग्घरान् प्रैषयामेहाऽश्रद्दधानास्तु ये परम् । उपजीव्यानृतां वाचमारभन्ते कलिं हि ते ॥११४॥
च्यावयेयुर्यतस्तेन निजात् स्थानादृतं किल । ते मदीयान् किलायातान् भयं यद् दर्शितं तथा ॥११५॥
विषयं परिहासस्य कृतवन्तो हि (निश्चितम्) । [57]जालमः कोऽन्यस्ततो मर्त्यात् चेतितोऽप्यभवत् तु यः ॥११६॥
आयातेषु प्रभोस्तस्य पराङ् आस्यस्ततोऽप्यभूत् । व्यस्मरच्च करौ तस्य प्रैषयतां यदर्जितम् ॥११७॥
ध्रुवं स्वान्तेष्वमीषान्तु व्यवधानं किलाऽऽहितम् । मुद्रितावथ कर्णौ चास्माभिस्तेषामथापि चेत् ॥११८॥
ऋजुं मार्गं प्रयातुं तान् आह्वयेस्त्वं कदापि ते । नेदृशं मार्गमागन्तुं सं प्रयास्यन्ति सिद्धताम् ॥११९॥
[58]क्षमाशीलो दयालुश्च परन्ते तु प्रभुः किल । निग्रहं प्रापयिष्यच्चेत् स तेषामर्जितानु ॥१२०॥
तांस्ततोऽपातयिष्यद्वै द्रागेव तेषु यातनाः । निश्चितोऽस्ति परं तेभ्यो दत्तः कालावधिर्हि यम् ॥१२१॥
व्यतिक्रम्योत्सहिष्यन्ते गन्तुं नैवान्यवर्त्मना । [59]एते चाऽवसथाः ! पापं यदा तैश्चरितं; तदा ॥१२२॥
ध्वस्ता अस्माभिरासंश्च निश्चितश्च कृतोऽभवत् । अस्माभिस्तद् विनाशाय कालस्यैकः किलावधिः ॥१२३॥
[60]आत्मनः सेवकं मूषो यदा चाऽह न खल्वहम् । तावत् कालं विरंस्यामि यावन्नद्योर्न संगमम् ॥१२४॥
प्राप्स्यामि, दीर्घकालाय स्थास्यामि गतिमानथ । [61]तावुभौ च यदाऽऽयातौ नद्योः संगमनस्थलम् ॥१२५॥
अभूतां विस्मृतौ मीनमात्मनोस्स च कामतः । मार्गं चित्वाऽप्सु लीलाभिरयासीदयनं निजम् ॥१२६॥
[62]यातयोः कंश्चिद्ध्वानं भृत्यं स्वं सोऽवदत्तदा । आहराहारमस्मभ्यं श्रान्तं तावद् वपुर्हि नः ॥१२७॥
प्रसंगेनेह यात्रायास्संशयो नेह कश्चन । [63]प्राह सः "विदितं तावद् भवता स्याच्छिलातले ॥१२८॥
यदा व्यश्राम्यतामावां मीनस्य व्यस्मरंन्वहम् । वर्णनाविस्मृतौ चास्य शातनस्यैव हेतुता ॥१२९॥
आस्त, स्वेष्टां दिशञ्चासौ प्रयातोऽद्भुतचंक्रमः । [64]स आहेदं तदेवाऽभूदस्माकं यत् परीप्सितम् ॥१३०॥
निवृत्तौ पदचिन्हानि पश्यन्तौ स्वानि तौ पुनः । [65]प्राप्नुतां तौ ततोऽस्माकं कञ्चनैकं हि बन्धकम् ॥१३१॥
[66]अयच्छाम दयां यस्मै स्वतो ज्ञानं तथा वयम् । मूषः पप्रच्छ तञ्चाऽथ "सहवासं व्रजानि किम् ॥१३२॥
त्वया सार्धमहं येन विनयं प्रापयेर्नु माम् । ज्ञाने शिष्टे तथाऽऽचारे यस्मिंस्त्वं विनयं गतः ॥१३३॥
[67]असावाह "मया कर्त्तुं समं वासं न शक्ष्यसि । [68]बुद्ध्याऽगम्यञ्च यत्ते स्यात् सहचारो भवेदपि ॥१३४॥
तेन सार्धं कथं तेऽथ; [69]स आहाऽल्लाह इच्छति । धैर्यावलम्बिनं तावत् त्वं निरूपयिताऽसि माम् ॥१३५॥
कस्यचित्ते निदेशस्य भविता न च भञ्जकः । [70]स आह "अस्तु, मया सार्धं त्वया वासे तु कल्पिते ॥१३६॥
मान्तु प्राक्षीर्न किंचित् त्वं यावन्नैवाहमात्मना । वर्णनस्य समारम्भं भवेयं कर्त्तुमुद्यतः ॥१३७॥
[71]उभौ तौ प्रस्थितौ पश्चात् जलयानान्तरे तथा । आरोहं संप्रयातौ च; छिद्रमेकं व्यधाच्च सः ॥१३८॥
यानस्यान्तः, तमाहासौ "किन्नुच्छिद्रं व्यधा यथा । तत्स्था अप्सु निमग्नाः स्युः ? कृतवानसि भीषणम् ॥१३९॥
इदं कृत्यं किलैष त्वम्; [72]प्रत्यवादीत् पुनः स तम् । मया किं नोपदिष्टोऽभूः पुरा तावदिदं वचः ॥१४०॥
"त्वन्तु तावन्मया कर्त्तुं समं वासं न शक्ष्यसि" । [73]प्राह "मे स्खलितेषु त्वं निग्रहाय न याहि मे ॥१४१॥
कार्कश्यञ्च ममारम्भैर्मयि नाऽप्यथ धारय" । [74]अयातां तौ ततो यावत् प्राप्नुतामेकमर्भकम् ॥१४२॥
अहंस्तञ्च किलासौ यत्, तदान्यः प्राह किन्विदम् । निर्दोषं प्राणिनं तावद् हतवानसि, यो न वै ॥१४३॥
कञ्चनाऽन्यं पुरा जीवं हतवान्, कृतवानसि । कर्म क्रूरं विगीतं त्वम्;

इति पंचदशं पारायणम्

इति यमुनानगरवास्तव्यश्रीसत्यदेववर्मकृतौ सांस्कृते कुराणे पारायणपंचदशकम् ।

CC-0. In Public Domain. Digitized by eGangotri

अथ षोडशं पारायणम्

[७५]प्रत्यवादीत् पुनस्स तम् ।।१४४।।
मया किं नोपदिष्टोऽभूः पुरा तावदिदं वचः । "त्वन्नु तावन्मया कर्त्तुं समं वासं न शक्ष्यसि" ।।१४५।।
[७६]प्राह "पृच्छेयमूर्ध्वं चेदतस्त्वां किञ्चनाऽप्यहम् । जह्यास्त्वं सहवासान्मां, वचोभिर्मम साम्प्रतम् ।।१४६।।
जातस्तावत् त्वमाक्षेप्ता (निश्चयेन) प्रतिष्ठितः । [७७]प्रस्थितौ तौ ततः प्राप्तावेकस्या वसतेर्जनान् ।।१४७।।
अयाचिष्टां तथाऽऽहारं तान् जनान् ते परं जनाः । मन्तुमभ्यागतान् तान् वै न्यषेधन्नेव सर्वथा ।।१४८।।
तयोर्भित्तिः पुनश्चैका याऽभवत् पतनोन्मुखी । प्राप्ता दृष्टिपथं तत्र, तां च साधितवानसौ ।।१४९।।
प्राह (मूषः) त्वमैषिष्यो यद्यस्याः (साधनात्ततः) । [७८]अशक्यः शुल्कमादातुम्; तदासौ तमभाषत ।।१५०।।
आवयोरुभयोरेष वियोगस्य क्षणः किल । त्वामिदं बोधयाम्येष तोषस्ते येन नाऽभवत् ।।१५१।।
[७९]जलस्य या तु सा नौका दरिद्राणां हि साऽभवत् । व्यवसायपरा आसन्नद्यां ये, ऽहं तदेष्टवान् ।।१५२।।
सच्छिद्रां हि विधातुं ताम् परस्तात् कोऽपि भूपतिः । तेषां यतोऽत्रसद् यस्तु बलादाहर्त्तुमुद्यतः ।।१५३।।
यस्य कस्यापि यानस्य सक्रमोऽस्थात् प्रतिक्षणम् । [८०]इदानीं तस्य बालस्यामुष्य माता पितापि च १५४।।
खलूभौ श्रद्धरावास्तां, वयं संशयमागताः । श्रद्धाऽभावात्तथा चैवाऽशृंखलत्वान्न तावसौ ।।१५५।।
[८१]कदाचित् पातयेत् कष्टे-ऐच्छाम च ततो वयम् । तत्प्रभुस्तस्य (वत्सस्य) स्थाने वत्सान्तरं पुनः ।।१५६।।
ताभ्यां दद्याद् भवेद् यो हि तस्मात् शुद्धतरोऽथ च । दयावानपि तस्माच्च; [८२]कुड्यस्य विषये पुनः ।।१५७।।
बालयोः स्वाम्यमत्राऽस्ति द्वयोस्तावदनाथयोः । निवासिनोः पुरस्यास्य, तयोः कोषश्च निह्नुतः ।।१५८।।
एनां तिष्ठति चैवाधः पवित्रात्मा तयोरभूत् । तातो, युष्माकमैच्छद् हि प्रभुर्यत्तावुभावपि ।।१५९।।
यायातां यौवनं किञ्च कोषं तत्स्थं निजं च ते । ततो निष्कासयेतां वै, दयायाः कारणात् प्रभोः ।।१६०।।
युष्माकं घटितञ्चैतत्, वृत्तं नेदं मनागपि । स्वाधिकारान्मया तावत्, याथार्थ्यं तस्य खल्विदम् ।।१६१।।
यस्य तेऽभून्न सन्तोषः; [८३]युगश्रृंगधरं प्रति (जुलकरनैन)। त्वान्ते पृच्छन्ति, तान् ब्रूहि "तमधिकृत्य किञ्चन ।।१६२।।
वर्णनं खल्वहं कुर्वे; [८४]धरित्र्यां स प्रभुः कृतः । तस्मै दत्तोऽखिलोऽस्माभिः सुखसंभार एव च ।।१६३।।
[८५]स चैष पश्चिमाशायां मार्गमेकं न्यरूपयत् । [८६]यावदेषोऽथ सम्प्राप्तस्सूर्यस्यास्तमनस्थलम् ।।१६४।।
अयन्तं चास्तमेनं सोऽपश्यद् वै कृष्णसागरे । गणैकं दृष्टवांश्चायं तस्य पार्श्वेऽब्रुवाम हे ! ।।१६५।।
युगश्रृंगधर ! त्वं हि तुदेरेतान् अथापि वा । भद्रेण व्यवहारेण तावदेतान् सभाजयेः ।।।१६६।।
[८७]सोऽवदत् "दण्डयिष्यामो वयमेषान्तु तं हि यो । रंस्यते पापकार्येषु स्वं प्रभुं प्रत्यसौ ततः ।।१६७।।
परावर्तिष्यते चैव, योऽस्मिन् कृच्छ्रा हि यातनाः । पातयिष्यति; [८८]यश्चापि श्रद्दधानो भवेदिह ।।१६८।।
पुरस्कारः शुभस्तस्मायनुकूलकृते पुनः । अमुष्मै पेशलं चैव शासनं नो भविष्यति ।।१६९।।
[८९]ततोऽसावेकमध्वानं प्रायाद् अन्यन्तु (पूर्वतः) । [९०]यावदेषोऽथ सम्प्राप्तस्सूर्यस्योदयनस्थलम् ।।१७०।।
उदयन्तमपश्यत्तं गणे तस्मिन् न यत्कृते । सृष्टमावरणं त्वाऽऽस्त ततोऽस्माभिर्हि किञ्चन ।।१७१।।
[९१]इत्थमेतद् विदानाश्चाभूम तद् विषये समम् । [९२]ततोऽसावेकमध्वानं प्रायादन्यम्; [९३]अवाप सः ।।१७२।।
द्वयोः पर्वतयोर्मध्यं यावत्तावद् व्यलोकत । गणमेकं न यः किंचिद् भाषितं खल्ववुध्यत ।।१७३।।
[९४]युगश्रृंगधराऽऽहुस्ते "यज्ञजा मद्यजाश्च ये । जनयन्ति कलिं भूमौ, प्राभृतं ते नु किं वयम् ।।१७४।।
दद्यामाऽस्मात् त्वमस्मांश्चाप्यन्तरा तांस्तथैव च । वृतिं कल्पयितास्येकाम् ?" [९५]स आह "दत्तवान् हि मे ।।१७५।।
सामर्थ्यं तुच्छमप्यत्र यत् प्रभुर्मे तदुत्तमम् । केवलेन बलनैव यूयमार्यसहायताम् ।।१७६।।
कुरुध्वं मम, कर्त्ताऽस्मि वृतिञ्चाप्यन्तरा ह्युभौ । [९६]अयः खण्डान् पुनर्यूयं प्रापयेत मदन्तिके ।।१७७।।
तावद् यावद् द्वयोर्मध्या भूमिर्वै प्रोच्चतां गता । ततोऽवादीच्च "दग्धव्यम्!" तावद् यावद्धि तत्समम् ।।१७८।।
जातमग्निमयं त्वेव, प्रावदत् पुनरेव च । "अग्निना गलितं ताम्रं यूयं भोः ! प्रापयेत माम् ।।१७९।।
उत्क्षिपेयं हि तद् येन तत्र तावत्"; [९७]ततश्च तौ । तदारोढुं न वै शक्तौ नान्तर्भेत्तुमथापि वा ।।१८०।।
[९८]स आह "मे प्रभोरेषा विद्यते हि दयालुता । प्रभोर्मे वचनं तद् वै परं पूर्त्तिं समेष्यति ।।१८१।।
यदैव भूमिसात्तद् वै तदानीं प्रविधास्यति । सदा सत्यं प्रभोर्मे च वचनं बोभवीति हि ।।१८२।।

CC-0. In Public Domain. Digitized by eGangotri

[९९]दिने तस्मिन् वयञ्चैव मिथः संघटनाय तान् । करिष्यामः किलोन्मुक्तान्, शंखो ध्मातो भविष्यति ॥१८३॥
किं च, सर्वान् करिष्यामस्समवेतान् वयं पुनः । [१००]दिने तस्मिन् वयञ्चाऽथ करिष्यामो ह्युपस्थितम् ॥१८४॥
श्रद्विहीनजनानां वै समक्षं निरयं पुनः । [१०१]स्मारकं प्रत्यतिष्ठन् हि येषां नेत्राणि नः किल ॥१८५॥
पिहितानि, न ये चापि श्रोतुं वाऽशक्नुवन्नपि । [१०२]चिन्तयन्ति किमेते हि श्रद्विहीना जनाः किल ॥१८६॥
बन्धकान् मम शक्ष्यन्ति कर्त्तुं स्वान् रक्षकांस्तु माम् । प्रविहाय, कृतः सज्जः खल्वस्माभिर्हि नारकः ॥१८७॥
स्वागताय तु वै तेषां श्रद्विहीना हि ये जनाः । [१०३]ब्रूहि "किन्नु वदामैते वयं युष्मान् जना हि के ॥१८८॥
अतियायाऽपरान् सर्वान् यास्यन्ति कर्मभिः क्षतिम् ? । [१०४]लौकिके जीवने येषां श्रमो यात्यफलात् पथः ॥१८९॥
"सुकृतोवयम्" इत्येव ये ततोऽपि तु मन्वते । [१०५]इमे ते हि जना ये नो विश्वसन्ति निजप्रभोः ॥१९०॥
आयातेषु न तस्याऽथ साहचर्ये कदाचन । यद् यत्तेषां कृतं तत्तन्मोघमेव हि तिष्ठति ॥१९१॥
नो वयं गौरवेणाऽमून् पुनरुत्थापनाऽहनि । कथञ्चिन्मानयिष्यामः; [१०६]पुरस्कारोऽयमेव तु ॥१९२॥
विद्यते नारकस्तेभ्यः श्रद्धाहानेस्तथैव च । वाग्घराणां परीहासादायातानाञ्च नः कृतात् ॥१९३॥
[१०७]श्रद्धरा येऽनुकूलानि कर्माणि कुर्वतेऽथ च । स्वर्गारामाः पुनस्तेभ्यो भविष्यन्ति सुनिश्चितम् ॥१९४॥
[१०८]तेषां शाश्वतिको वासस्तत्र चैव भविष्यति । ततस्तेन भविष्यन्ति गन्तुकामास्तथैव च ॥१९५॥
[१०९]ब्रूहि कज्जलभाण्डत्वं व्रजेच्चेत् सागरः क्वचित् । प्रभोर्मे लेखनस्यार्थे वाचां, शून्योऽब्धिरेव तु ॥१९६॥
भवेत् पूर्वं, न तासान्तु भवेदन्तः कदाचन । तत्तुल्योऽप्युपनीतस्स्यात् सहायोऽन्योऽपि चेदिह ॥१९७॥
[११०]ब्रूहि "युष्मन्निभो मर्त्यस्त्वेव तावद् भवाम्यहम् । काशितं क्रियतेऽन्तर्मे यत्पूज्यस्तेऽस्ति केवलः ॥१९८॥
स एवेशः, ततो यस्य संगमाशाऽन्तरे भवेत् । प्रभुणा स्वेन तेनाऽत्र शुभाचारेण भूयताम् ॥१९९॥
स्वप्रभोः संस्तुतावन्यस्तत्तुल्यो नाऽपि मन्यताम् ।

योगः—१९९॥

CC-0. In Public Domain. Digitized by eGangotri

१९

सूक्तम्–मर्यमा

(मरियम)

(महाकालेऽवतीर्णा अष्टनवतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]काफ्०हा०यै०न०सादा०(वै किल व्याहृतयोऽभवन्) । [2]दयाया वर्णनं तावत् प्रभोस्ते यां जयक्रिये ॥ १ ॥
आत्मनो बन्धकेऽसौ हि दर्शयामास (निश्चितम्) । [3]मन्दं मन्दं यदाऽसौ स्वं प्रभुमाकारयत् खलु ॥ २ ॥
[4]आह स मे प्रभो ! ऽस्थीनि निर्बलान्यभवन् हि मे । वार्द्धक्याच्च शिरोजातमाक्रान्तं पलितैः कचैः ॥ ३ ॥
प्रभो मे ! त्वां स्तुवन्नेष न जातोऽस्म्यफलस्तुतिः । [5]दायादेभ्यो बिभेम्येष जीवनोर्ध्वं, तथा च मे ॥ ४ ॥
भार्याऽवकेशिनी; तन्मे त्वमेकं समुपाहर । स्वपार्श्वात् आर्यति कञ्चित्; [6]याप्यकूपकुलस्य यः ॥ ५ ॥
रिक्थांशभाक् तथा मेऽपि भवेत् तञ्च पुनः कुरु । प्रभो मे ! मनसाऽभीष्टम्; [7](तदाऽसाविदमौच्यत ॥ ६ ॥
शुभोदन्तं वदामस्तेऽर्भकस्यैकस्य तस्य तु । अयोहयाभिधानस्य ततः पूर्वं न कस्यचित् ॥ ७ ॥
नाम तत् कृतमस्माभिः; [8]स आह "हे मम प्रभो ! । बन्ध्यायां मम भार्यायां कुतो मे सन्ततिर्भवेत् ॥ ८ ॥
अहञ्चाप्यन्तिमां प्राप्तो वृद्धावस्थाम्' यदाऽथ च । [9]आह "तद् भवितैवेत्थम्" प्रभुस्तेऽदः समादिशत् ॥ ९ ॥
लीलासाध्यमिदं मेऽस्ति त्वाञ्चास्राक्षमहं पुरा । यदा त्वं नाऽभवः किञ्चित्; [10]स आह "मत्कृते प्रभो! ॥१०॥
स्थिरं लक्ष्म कुरुष्वैकं" प्राह स 'लक्ष्म वर्त्तते । त्वदर्थे तावदेतद् यत् सुस्थस्तिष्ठन्नपीह तु ॥११॥
त्रिरात्रं त्वं जनैस्सार्धं भाषितुं नैव शक्ष्यसि" । [11]एकान्तात् शरणात् पश्चान्निस्सृत्योपेत्य बान्धवान् ॥१२॥
स्वानुवाच स संकेतैः 'यूयं तावन्निजं प्रभुम् । सन्ध्ययोरुभयोरेव स्तुवीध्वम्; [12](किं च तत्सुतः ॥१३॥
औच्यतैतत्) दृढं हस्ते धेहि शास्त्रमयोहय ! । बाल्यादेव पुनर्बुद्धिस्तस्मायस्माभिरार्प्यत ॥१४॥
[13]दयापावनते चाऽपि दत्तेऽस्माभिस्स्वपार्श्वतः । भक्तिमान्त्सोऽभवत् किं च; [14]पित्रोराज्ञापरः पुनः ॥१५॥
नाभिमानी तथाऽऽसीत् स नावज्ञाकार्यपि क्वचित् । [15]शमेतु तम्, दिने यस्मिन् प्रसूतोऽसौ मृतश्च सः ॥१६॥
दिने यस्मिन्, प्रजीव्याऽथोद्भोत्स्यते च यदा दिने । [16]मर्यमावर्णनं चाऽत्र यूयं कुरुत पुस्तके ॥१७॥
वियुक्ता बान्धवेभ्यस्सा यदैत् प्राच्ययनं क्वचित् । [17]विप्रयोगं गता तेभ्यस्ततस्सा; तदनन्तरम् ॥१८॥
प्रैषयाम वयं तस्याः पार्श्वे स्वात्मानमेव तु । रूपं पूर्णस्य मर्त्यस्य तदग्रेऽधारयत् स च ॥१९॥
[18]मर्यमा प्राह तम् 'चेत्त्वं मन्यसे स्वप्रभोर्भयम् । कामयेऽहन्ततस्त्वद्धि शरणं ह्यार्यसंश्रितम् ॥२०॥
[19]प्राह सः 'प्रेषितोऽस्म्येष खल्वेकान्तं तव प्रभोः । येन तुभ्यमहं दद्यां पावनात्मानमर्भकम्' ॥२१॥
[20]आह 'केन प्रसोष्येऽहं पुत्रमेकं न वै यतः । परामृष्टाऽस्मि केनाऽपि मर्त्येनाद्यापि नाऽथ च ॥२२॥
भवाम्येषा किलाऽपास्ता सच्चारित्र्यात् कदाचन' ? । [21]आह 'तद् भवितैवेत्थम्, प्रभुस्तेऽदस्समादिशत् ॥२३॥
लीलासाध्यमिदम्मेऽस्ति, किं चैतस्मात्तथैव च । यथाऽसावर्भको लक्ष्म कृतो नृभ्यो भवेदिह ॥२४॥
अस्मद् दयालुता चैवा, ऽनुज्ञातं खल्विदं पुनः । [22]सत्वाऽऽपन्ना च सा जाता तमादाय च धाम सा ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

विप्रकृष्टं ययौ क्वाऽपि; [२३]प्रसवस्य व्यथा ततः । खर्जूरस्य प्रकाण्डाधस्तां निनायाऽऽह चात्मना ॥२६॥
'अहञ्चेदमरिष्ये प्रागभविष्यन् महद्वरम् । सर्वथैव तथा लोकैरभविष्यञ्च विस्मृता ॥२७॥
[२४]आह्वयत् तां ततो नीचैर्वृक्षस्य (नवजशिशुः) । चिन्तां मास्म गमः, स्रोतः प्रवहत् त्वामधः कृतम् ॥२८॥
प्रभुणा ते किलाऽस्त्येकम्; [२५]त्वं कराभ्याञ्च कम्पय । खर्जूरस्कन्धमेतद् वै वर्षिष्यन्ति ततस्त्वयि ॥२९॥
फलानि सरसान्युच्चैः [२६]तदेवं पिब खाद च । समाश्वासं तथा याहि, मर्त्यं कंचिदथापि चेत् ॥३०॥
पश्येस्त्वं ब्रूहि तम् 'तस्य दयालोर्नामकीर्त्तनाद् । औपवस्तं प्रतिज्ञाय स्थिताऽतो न हि केनचित् ॥३१॥
संलपिष्यामि मर्त्येन तावदस्मिन् दिने (ध्रुवम्) । [२७]बान्धवान्त्स्वानुपैत् पश्चात् तमादाय हि सा, च ते ॥३२॥
आहुस्ताम् 'मर्यमे ! कृत्यमद्भुतं कृतवत्यसि' । [२८]हारदून कुलोत्पन्ने ! नाऽभद्रस्ते पिताऽभवत् ॥३३॥
नाऽथ ते जननी चैव पुंश्चली काऽपि वाऽभवत् । [२९]तं ततश्चेंगितेनाऽसौ जनानज्ञपयच्च ते ॥३४॥
प्राहु 'र्दोलास्थ एषोऽस्ति शिशुश्चैवाऽस्ति तत्कथम् । संलपेम वयन्तेन; [३०]जातवाक् स ततोऽवदत् ॥३५॥
अल्लाहबन्धकोऽस्म्येष, पुस्तकं मेऽददादसौ । वाग्घरञ्चाकरोन्मां सः; [३१]सौभाग्यं मयि किं च सः ॥३६॥
अवर्षत् सर्वदेशीनमादिशन्मे तथैव सः । यावज्जीवमहं कुर्यां दानञ्च स्तुतिमेव च ॥३७॥
[३२]मातरि कृतवान् साधुं, नाकरोदथ मां स च । दौर्भाग्यग्रस्तमेवाऽपि दर्पोद्धतमथाऽपि वा ॥३८॥
[३३]शमेतु मां, दिने यस्मिन् प्रसूतोऽहं म्रियेऽथ च । दिने यस्मिन् प्रजीव्याऽथोद्बोध्येय च यदा दिने ॥३९॥
[३४]ईदृशोऽभूत् किलेशोऽसौ मर्यमायास्सुतः खलु । सत्यन्त्वेतत् परन्त्वत्र चापि मुह्यन्ति ते जनाः ॥४०॥
[३५]नानुरूपमिदं तस्य त्वल्लाहस्य हि वर्त्तते । पुत्ररूपेण मन्येत यदसौ कञ्चनाऽपि तु ॥४१॥
महिम्ना शालतेऽसौ हि, निश्चिनोति यदैव च । कस्यचिद् विषयेऽथो तद् दिशत्येव भवेति हि ॥४२॥
तत्क्षणं जायते तच्च; [३६](वाग्घरश्चेत्थमावदत् । प्रभुर्मे वर्त्ततेऽल्लाहः प्रभुर्युष्माकमप्यथ) ॥४३॥
तमेव तत् स्तुवीध्वं भोः ! ऋजुर्मार्गोऽयमेव तु । [३७]गणास्तेषां पुनः केचिद् विमतिं खल्वदर्शयन् ॥४४॥
परं तेषामविश्वासं ये हि तावददर्शयन् । घोरस्याह्नस्तु साम्मुख्यान्नाशस्तेषां भविष्यति ॥४५॥
[३८]यदाऽस्मान्त्समुपेतास्तु ते भविष्यन्ति तांस्तदा । शृणुष्व चाऽवलोकस्व, परं जाल्मा हि साम्प्रतम् ॥४६॥
स्पष्टतो दोषमापन्नास्तिष्ठन्त्येव निरन्तरम् । [३९]पश्चात्तापदिनात्तस्माद् भीषयेस्तान् यदा किल ॥४७॥
दास्यते निर्णयस्तावदभियोगचयस्य हि । परं तेषामवस्थेयं मोहग्रस्ता हि ते स्थिताः ॥४८॥
श्रद्दधाना न किं चैव; [४०]रिक्थस्यांशहरा वयम् । भविष्यामो धरित्र्याश्च यच्च तत्राऽस्ति किंचन ॥४९॥
परावृत्ताः करिष्यन्ते ते चाप्यस्मान् प्रति ध्रुवम् । [४१]अब्रह्मस्य तथा चर्चा कार्याऽस्मिन् पुस्तके किल ॥५०॥
महान्त्साधुरसावाऽऽस्त, वाग्घरश्चैव किं च सः । [४२]यदाऽसावात्मनस्तातमुवाच 'तात मे ! भवान् ॥५१॥
श्रोतुं द्रष्टुं न यश्शक्तः पूजयत्यत्र तं कथम् । नोपयोगञ्च यो याति कथञ्चिद् भवतस्तथा ? ॥५२॥
[४३]पितर्मे काशितं ज्ञानं मयि तावत्तथाविधम् । काशितं त्वयि नो जातमद्य यावद् यथाविधम् ॥५३॥
भवान् मामनुगच्छेत्तद् दर्शयिष्यामि खल्वहम् । भवन्तं सरलाध्वानम्; [४४]तात! मा स्तुहि शातनम् ॥५४॥
अवज्ञापर एवाऽस्ति शातनस्तु दयावति । [४५]भयम्मे सततं तात ! यातनातो दयावतः ॥५५॥
कदाचित् त्वां परापत्य निगृह्णीयान्न सर्वशः । शातनस्य पुनर्भूत्वा तिष्ठेस्त्वं सार्थ एव नो ॥५६॥
[४६]स आह 'अब्रह्म भोः! किं त्वं निषेद्धा जातवानसि । प्रतीष्टानां हि मे, त्वं चेद् विरतो न भविष्यसि ॥५७॥
खण्डनव्यवसायात् तत् क्षेप्स्याम्यश्मान्यहं त्वयि । विप्रयोगं तथा याहि दीर्घकालकृते मम ॥५८॥
[४७]स आह 'शं हि ते भूयात्, प्रार्थयिष्ये निजं प्रभुम् । क्षमार्थं तुभ्यमेषोऽहम्, कृपावान्त्स मयि ध्रुवम् ॥५९॥
[४८]विसृज्य वः प्रयाम्येष त्वल्लाहमन्तरेण च । स्तुवीध्वे यान् पुनर्यूयम्, स्तोष्येऽहं स्वं प्रभुं तथा ॥६०॥
मन्ये स्तुत्वा प्रभुम्मेऽहं सौभाग्येन न वञ्चितः । भविष्यामि; [४९]अथ विसृज्य त्वल्लाहमन्तरेण च ॥६१॥
अस्तुवन् यान्हि ते तांश्च यदाऽसावेकतोऽभवत् । अयच्छाम वयं तस्मै तदेष्वासं तथैव च ॥६२॥
याप्यकूपं (सुतावेतौ) तौ कृतावथ वाग्घरौ । [५०]दयाया आत्मनश्चैवाप्यंशभाजौ कृतावुभौ ॥६३॥
यशः प्रांशु च सत्यं चाप्ययच्छामोभयोः कृते । [५१]मूषस्याऽपि तथा चर्चा कार्याऽस्मिन् पुस्तके किल ॥६४॥
असन्देहमसावासीदत्यर्थं तस्य सम्मतः । वाग्घरोऽपि च देवोऽपि स तस्याभूत् (सुपूजितः) ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

[५२]दक्षिणेन वयं तूरमाह्वयाम तु तं, स च । सन्निकर्षमथो नीतस्संलापस्य हि हेतुना ॥६६॥
[५३]स्वीयया दयया चैव वयं तस्यैव वान्धवम् । हारदूनमयच्छाम कृत्वा तस्मै वचोहरम् ॥६७॥
[५४]अस्मयेडस्य चर्चाऽपि कार्याऽस्मिन् पुस्तके किल । सत्यसन्धो ह्यसावाऽऽस्त, देवोऽपि वाग्घरोऽपि च ॥६८॥
[५५]आदिशत् स्वानसौ लोकान् दानपूजेऽभवत्तथा । सम्मतः स्वप्रभोर्ह्येष; [५६]चर्चा कार्या तथैव च ॥६९॥
शास्त्रेऽस्मिन्निन्द्रियेशस्य देवो यो साधुरेव च । [५७]प्रापितस्स किलाऽस्माभिः पदमुच्चैर्बभूव ह ॥७०॥
[५८]त एते सन्ति वै देवाः कृपां येष्वतनोत् प्रभुः । आदिमस्य हि सन्तत्याः, जनेभ्यस्तेभ्य एव च ॥७१॥
नहुषेण समं (याने) ऽस्माभिरारोपिताश्च ये । अब्रह्मस्य च सन्तत्या ईश्वरालीन (सन्ततेः) ॥७२॥
तेषां सन्दर्शितो येभ्यस्तथाऽध्वा, ये च सम्मताः । तत्समक्षं यदाऽऽयाता अस्माकं वाचितास्तदा ॥७३॥
अश्रुपूर्णेक्षणास्ते वै नमस्यन्तोऽपतन् भुवि । [५९]हीना आयतयस्तेषामजायन्त ततो हि ये ॥७४॥
कामानेवान्वयुस्तावत् पथभ्रंशोऽचिरं परम् । फलिष्यत्यग्रतस्तेषाम्; [६०]तं विहाय तु योऽभवत् ॥७५॥
पश्चात्तापपरश्चैव, श्रद्धरः कृतवानथ । कर्माण्यत्रानुकूलानि, सुखारामं किलेदृशाः ॥७६॥
जनास्तावत् प्रवेक्ष्यन्ति, नात्याचारस्तथैव च । करिष्यते पुनस्तेषु; [६१]सदारामाः परोक्षतः ॥७७॥
बन्धकेभ्यः प्रतिज्ञातास्तेन ये हि दयालुना । प्रतिज्ञातं किलैतस्य पूर्त्तिं सत्यमपेक्षते ॥७८॥
[६२]अन्तरेण च ते शान्ति श्रोष्यन्ति वाक्कलिं न हि । सञ्चितं तत्र तेभ्योऽन्नं प्रातस्सायं भविष्यति ॥७९॥
[६३]तदेष वै सुखारामो वयं यस्यार्यति किल । बन्धकानां विधास्यामस्तं हि यो भक्तिमत्तमः ॥८०॥
[६४]नावतारस्तथाऽस्माकं त्वत् प्रभोस् (सद्) विधिं विना । यत्तदग्रे च पश्चाच्च किलास्माकं यदप्यथ ॥८१॥
एतयोरुभयोर्मध्ये तत्तस्यैवाखिलं, न च । वर्त्तते विस्मृतिप्रायः प्रभुस्तेऽथ कदाचन ॥८२॥
[६५]व्योम्नां चैव धरित्र्याश्च स प्रभुर्यच्च मध्यगम् । तयोस्तस्य तथा चैव स्तुवीध्वं तत्तमेव तु ॥८३॥
स्थैर्यं तस्य स्तुतावेव किं च यात, नु वित्थ किम् । सनामानं कमप्यन्यं तस्य यूयम् ?; [६६]अथापि च ॥८४॥
मनुष्यो वक्ति 'किं न्वेष मृतस्सन् तदनन्तरम् । जीवयित्वोद्धरिष्येऽहम् ?; [६७]स्मृतिं याति न किं नरः ॥८५॥
सृष्टोऽसौ प्राक् किला ऽस्माभिर्यदासीन्न स किञ्चन ? । [६८]शपनन्ते प्रभोरेते वयन्तान् सुविनिश्चितम् ॥८६॥
शातनांश्चापि सम्पीड्याऽऽहरिष्याम, स्तथैव च । नारकं परितः कृत्वा जानूस्थान् तत्प्रदक्षिणाम् ॥८७॥
कारयिष्याम एवाऽपि; [६९]गणेभ्यस्तदनन्तरम् । तमाकृष्य हरिष्यामोऽभवद् यो हि दयावतो ॥८८॥
विरुद्धाचरणेऽत्यर्थं मर्त्यस्तावद् दुराग्रहः । [७०]तांश्च सम्यग् वयं विद्मो (नारकाग्नौ तु) ये जनाः ॥८९॥
दग्धुमर्हा अतीत्यान्यान्; [७१]न युष्मास्वस्ति कश्चन । न तद् यस्याऽस्ति गन्तव्यम्, प्रभोस्ते तदिदं ध्रुवम् ॥९०॥
अहार्यं शासनन्तावत्; [७२]कर्त्तव्यबुद्धयस्तु ये । अतिष्ठन्, रक्षितारो वै वयन्तेषां, परन्तु ये ॥९१॥
पाप्मानस्तांस्तु कर्त्तारो वयं जानूगतीन् ध्रुवम् । [७३]वाच्यन्ते तु यदाऽऽयातास्तदग्रेऽस्माकमर्जुनाः ॥९२॥
श्रद्धरान् श्रद्विहीना हि परिपृच्छन्ति मानवाः । वैभवेनावयोरस्ति द्रढीयान् दलयोस्तु कः ॥९३॥
दर्शनेनाऽथ को भव्यः; [७४]ततः प्राक् सुबहून् वयम् । वंशाननाशयामैव, वैभवेन तु यद्यपि ॥९४॥
वरीयांसो ह्यभूवंस्ते दर्शनेन च मोदनाः । [७५]ब्रूहि 'येऽत्र पथभ्रष्टास्तदायुष्यं दयामयः ॥९५॥
सन्तनोत्यनिशं यावत् पश्येयुस्ते जना हि तत् । प्रतिज्ञातमभूत् तैर्यत् स्यान्नाम यातना हि सा ॥९६॥
भीषणो ह्येव कालो वा, वेत्स्यन्त्येव तु तेऽत्र कः । परिक्षीणदशः कश्च दलत्वेन हतप्रभः ॥९७॥
[७६]ज्ञातमार्गास्तु ये लोका अल्लाहस्तत् पुरोऽधिकम् । अपावृणोति पन्थान, मवशिष्टा हि सुकृतः ॥९८॥
अधीशं सूत्तमास्तावत् फलत्वेन हि कर्मणाम् । सूत्तमाः परिणामस्य दृष्ट्या चैवाऽपि ते मताः ॥९९॥
[७७]किन्नु दृष्टस्त्वयाऽसौ यश्श्रद्विहीनो जनोऽभवत् । आयातेष्वस्मदीयेषु, यश्चाहाहमसंशयम् ॥१००॥
पूजितो हि भविष्यामि सन्तत्या च धनेन च ? । [७८]दृष्टं तेन परोक्षं किं दृष्ट्या तावत्समग्रया ॥१०१॥
दयावान् वा कृतस्तेन बद्धो हि वचनेन किम् ? । [७९]न वै; कुर्मो वयं तत्तत् लेखात्तं यत् प्रवक्त्यसौ ॥१०२॥
यातनावृद्धिमस्मै च विधास्यामो निरन्तरम् । [८०]सम्पद्भाजो भविष्यामो वयं तस्य यदाह सः ॥१०३॥
एकाक्येव च खल्वस्मानुपेतस्स भविष्यति । [८१]प्रतीष्टास्तैः कृता अन्येऽप्यल्लाहमन्तरेण तु ॥१०४॥
कल्पन्तां हि यथैतेषां तेऽपि शक्त्यभिवृद्धये । [८२]न तच्छक्यं, विरोधाय पूजाया ह्येव ते स्वतः ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

तेषां सिद्धा भविष्यन्ति; [८३]युष्माभिर्न निशामितम् । शातनाश्श्रद्विहीनेषु मुक्ता अस्माभिरासते ॥१०६॥
येऽनिशं खल्विमांल्लोकान् प्रेरयन्त्यशुभायने ? । [८४]तत्त्वरां मा व्रजेंतेषु वयमेषां (कुकर्मणाम्) ॥१०७॥
संख्यानमनसस्तावत् तिष्ठामः; [८५]तद्दिने वयम् । कर्त्तव्यमानसांल्लोकान् स्तुताऽऽवेशिकवत् किल ॥१०८॥
समवेतान् करिष्यामस्सन्निकृष्टं दयावतः । [८६]पाप्मनश्च करिष्यामो द्रावितान् निरयादनु ॥१०९॥
संहितानथ खिन्नांश्च; [८७]न तेषाञ्च भविष्यति । प्राशंसनाधिकारोऽपि तं विहाय तु यः किल ॥११०॥
स्वेन वै प्रभुणा जातो वाचाबद्धः कदाचन । [८८]तेऽवदंश्चात्मनः पुत्रं दयावान् कञ्चिदकृत ॥१११॥
[८९]महद्घोरमिदं किंचिद् युष्माभिर्घटितन्तु यत् । [९०]सम्भवोऽनेन वाक्येन नाका भिन्दन्त्वथो धरा ॥११२॥
खण्डशो हि विजायेत भिन्ना भूत्वा तथाऽद्रयः । पापतन्तु; [९१]सपुत्रोऽसौ दयावानिति भाषणात् ॥११३॥
[९२]यद्यप्येतत्तु मानस्य तस्य तावद् दयावतः । विरुद्धं कुरुते यत्स सुतं कञ्चिदिहात्मनः ॥११४॥
[९३]धरायां नाऽत्र कोऽप्यस्ति वियत्सु वाऽपि कश्चन । दासभावमुपाश्रित्य नोपेयात्तं तु यः किल ॥११५॥
[९४]परिवृत्य स्थितस्तान्सः, स्थितस्संख्याय चैव तान् । [९५]तेषां प्रत्येकमस्याग्रे पुनरुत्थापनाऽह्नि ॥११६॥
एकाक्युपस्थितो भावी; [९६]संशयो नेह कश्चन । श्रद्धरा येऽनुकूलानि कर्माण्यत्राऽऽचरंस्तथा ॥११७॥
दयावानचिरात्तेभ्योऽनुरागं जनयिष्यति । [९७]अथेदं तावदस्माभिस्तव वाचा सुगं कृतम् ॥११८॥
अनया केवलं बुद्ध्या चेतयेस्त्वं यथैव तान् । मन्वतेऽस्या भयं ये वै चेतयेस्तांस्तथैव च ॥११९॥
साग्रहास्सविवादाश्च तिष्ठन्तीह हि ये जनाः । [९८]प्रभूता नाशिता वंशा अस्माभिः प्रागितः किल ॥१२०॥
लोकसे किन्नु कंचित् त्वं तेषां, किम्वा श्रृणोष्यपि । स्तोकमात्रं रवञ्चापि तेषां (ये नाशिताः पुरा) ॥१२१॥

योगः—१२१

CC-0. In Public Domain. Digitized by eGangotri

२०

सूक्तम्–ता० हा०

(ता० हा०)

(महाकालेऽवतीर्णाः पञ्चत्रिंशदुत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]ता० हा०; [२]कुराणकं तावत् काशितं त्वयि, नो भवेः । त्वं कथञ्चिद् विपन्नो यत्; [३]स्मारकन्त्वेव केवलम् ॥ १ ॥
वर्त्ततेऽदस्तु वै तस्मै भयं यः खलु मन्यते । [४]प्रकाशोऽयन्तु वै तस्मादसृजद् यो वसुन्धराम् ॥ २ ॥
प्रांशूनभ्रान् पुनश्चैव; [५]दयावान् यो व्यराजत । सिंहासने; [६]विहायस्सु धरित्र्यां यच्च तिष्ठति ॥ ३ ॥
तयोश्चाप्युभयोर्मध्ये यदधो मृत्तिकां तथा । स एव तेषु सर्वेषु प्रभुः; [७]त्वं यद्युदीरयेः ॥ ४ ॥
उच्चैस्स्वरेण चैवाऽपि, गुह्यज्ञोऽसौ तथैव च । स जानाति परं गुह्यञ्चापि यत्त्वत्र वर्त्तते ॥ ५ ॥
[८]अल्लाहः ! तं विना नान्यः प्रभुः कश्चिदिहास्य च । शुभान्येवाभिधानानि; [९]युष्माभिर्विदितं नु किम् ॥ ६ ॥
वृत्तं मूषस्य; [१०]कालेऽसौ, यस्मिन् वह्निं व्यलोकत । आह स्वान् गृह्यकांश्चैव 'क्षणाय तु विरम्यताम् ॥ ७ ॥
कृशानुं दृष्टवानस्मि ततोंऽगारमुपानयेः । कदाचिद् युष्मदर्थेऽहं लभेयाऽयनमेव वा ॥ ८ ॥
अहं तस्मिन्; [११]यदा चासौ तत्स्थानं प्राप्तवांस्तदा । आहूयत भगो मूष !; [१२]अहं ह्येव तव प्रभुः ॥ ९ ॥
पादत्रेऽपाकुरु त्वं स्वे, पावनायां हि वर्त्तसे । स्तवस्योपत्यकायां त्वम्; [१३]त्वां तथा चितवानहम् ॥१०॥
शृणुष्वावहितस्तत्त्वं मया यत् काश्यते त्वयि । [१४]निस्सन्देहमहं ह्येव वर्त्तेऽल्लाहो न चाऽपरः ॥११॥
मां विना तु प्रतीष्टोऽत्र, मामतः केवलं स्तुहि । स्मृतिहेतोस्तथा मे त्वं कुरु पूजां प्रतिष्ठिताम् ॥१२॥
[१५]असन्देहमुपागन्ता कालोऽसौ, तं परन्त्वहम् । निह्नूयैव तु वर्त्तिष्ये येन सर्वोऽपि चेतनः ॥१३॥
तत्तत् चेष्टाऽनुरूपेण फलेन स्यात् पुरस्कृतः । [१६]श्रद्दधानस्तु तद् यो नो तस्मिन्, कामानुगश्च यः ॥१४॥
कदाचित् त्वां न वै रुन्ध्यात् तस्माद् येन त्वमन्यथा । नाशं गन्तास्यसंदेहम्; [१७]दक्षिणेऽथ च ते करे ॥१५॥
किन्विदं वर्त्तते मूष !; [१८]प्राह 'तद् यष्टिका हि मे । आश्रयो मे ययाऽहं हि छदांश्छित्वाऽजकाय तु ॥१६॥
अधस्तात् पातयाम्येष, सिध्यन्त्यस्याः पराण्यपि । मम त्वन्यानि कार्याणि; [१९]प्राह 'तां मूष हे ! क्षिप ॥१७॥
[२०]क्षिप्तवांश्च ततोऽसौ ताम्, विचित्रं घटितञ्च यत् । सर्पणस्सर्प एवाऽसावचिरं समजायत ॥१८॥
[२१]प्राह 'मास्म गमो भीतिं, पाणिभ्यां संगृहाण तम् । प्रापयामो वयन्त्वेनं पूर्वमिव दशां पुनः ॥१९॥
[२२]नयैकञ्चात्मनः पाणिं बाहुमूले निजे तथा । अक्षतो भासमानश्च ततोऽसौ निर्गमिष्यति ॥२०॥
इदं लक्ष्माऽपरं किञ्च; [२३]दर्शयेम वयं यथा । लक्ष्माण्यन्यानि तावत् त्वामितोऽपि सुमहान्ति वै ॥२१॥
[२४]प्रिययौनमुपेहि त्वम्, समतीत्य स वर्त्तते । सदाचारक्रमांस्तावत् ! [२५]मूष आह 'प्रभो नु मे ! ॥२२॥
हृदयं नय वैशद्यम्; [२६]कृत्यम्मे च सुगं कुरु । मदर्थे; [२७]मद्गिरां ग्रन्थिं शिथिलाञ्च पुनः कुरु ॥२३॥
[२८]मदुक्तं येन विज्ञातुं जायतां तेषु सिद्धता । [२९]वान्धवानाञ्च मे कञ्चित् त्वमेकं सहयोगिनम् ॥२४॥
कुरुष्व मम; [१०]यो मेऽसौ हारदूनोऽस्ति बान्धवः । [३१]बलं तत् कारणाच्चै वमयि धेहि; [३२]कुरुष्व च ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

तं मयाऽऽरभ्यमाणेषु कार्येषु संगतं तथा । [33]आवां येन भवेवात्र महिम्नान्तेऽतिगायकौ ॥२६॥
[34]स्मृतौ ते बहुमग्नौ च तिष्ठेव; [35]त्वमसंशयम् । अस्माकं सततं द्रष्टा; [36]प्राह 'तद् दीयते हि ते ॥२७॥
त्वया यत् प्रार्थितं मूष !; [37]पूर्वमस्मादपि त्वयि । दर्शितोऽनुग्रहोऽस्माभिर्वारमेकन्तु वर्त्तते ॥२८॥
[38]यदाऽभूत् प्रेरिताऽस्माभिर्जननी तेन ते हि यत् । प्रेरणाऽहं भवत्यत्र; [39]भणन् 'एनं हि पेटके ॥२९॥
पिधेहि, क्षिप सिन्धौ च, सिन्धुरेनञ्च नेष्यति । तटोपान्ते, ततश्चैनं शत्रुर्मे शत्रुरस्य च ॥३०॥
नेष्यत्युत्तोल्य, त्वन्तावन् मया स्नेहात् समाजितः । पोषणं येन यायास्त्वं ममाक्षणोः पुरतः किल ॥३१॥
[40]प्रयान्ती भगिनी किञ्च यदा तेऽकथयच्च 'यत् । त्वां वदानि किमेनं यो वालमेनं हि पोषणम् ॥३२॥
प्रापयिष्यति ! तेन त्वं प्रापितश्च स्वमातरम् । तावदस्माभिरासीर्यत् चक्षुष्यस्या हि शीतले ॥३३॥
भवेताम्, दुःखमापन्ना न चासौ स्यादथापि च । अहंस्त्वं जनमेकं वै, मोचितस्त्वमभूस्तथा ॥३४॥
चिन्तायास्सुमहत्याश्च गमितोऽभूस्तथैव च । असंख्यातपरीक्षाभ्यः, ततस्त्वं न्यवसस्समाः ॥३५॥
काश्चित्तावद् जनैस्सार्धं मदयानैस्ततश्च भोः । मूष ! प्राप्तस्त्वमद्याऽसि निश्चिताऽऽयतनं निजन् ॥३६॥
[41]अस्माभिस्त्वं चितश्चैव वर्त्तसे खल्विहात्मने । [42]त्वञ्च भ्राता च ते यातं सहैव मम लक्ष्मभिः ॥३७॥
प्रमाद्येतां न चैवाऽपि युवाम्मे स्मरणे क्वचित् । [43]उभावेव युवां यातं प्रिययौनस्य सन्निधौ ॥३८॥
मर्यादां समतिक्रम्य सत्यमेव स वर्त्तते । [44]वचोऽसौ मृदु वक्तव्योऽवदध्यात् स कदाचन ॥३९॥
भयं वाप्यथ मन्येत; [45]आहतुस्तौ 'प्रभो हि नौ । बिभीव आवयोर्नासावतियायाऽऽचरेत् क्वचित् ॥४०॥
न पापात्मा भवेद् वाऽपि; [46]प्राह 'नो कुरुतं भयम् । युवाभ्यां सार्द्धमेषोऽहम्, पश्यामि च शृणोमि च ॥४१॥
[47]तद् युवामुपतिष्ठेथां तं तथा वदतञ्च तम् । वाग्घरौ ते प्रभोरावाम्, ईश्वरालीनसन्ततिम् ॥४२॥
प्रेषयेस्सममावाभ्यां तान्तुदेर्न कदाचन । लक्ष्मभिस्ते प्रभोस्सार्द्धमावां त्वां समुपागतौ ॥४३॥
शान्तिभाक् स हि यस्त्वत्र सरलायनगो जनः । [48]आवयोः काशितञ्चैतत् तदर्थे यातनेह तु ॥४४॥
यो निषेद्धा पराङ्मुखश्चापि तिष्ठेत् पुमान् किल । [49]आह (तौ प्रिययौनश्च) 'भगोमूष ! प्रभुर्हि कः ॥४५॥
युवयोरुभयोस्तावत्; [50]स आह 'प्रभुरावयोः । स वै यो दत्तवानत्र प्रतिवस्त्वाकृतिं, ततः ॥४६॥
तानि चादर्शयन् मार्गं (मतं नैसर्गिकं) खलु । [51]स आह 'का दशा तेषां वंश्यानां ये पुराऽभवन्'? ॥४७॥
[52]अवादीत् 'मे प्रभोः पार्श्वे एकस्मिन् पुस्तकेऽस्य तु । आहितं वर्त्तते ज्ञानम्; [53]स एवाऽसौ हि यो ऽकरोत् ॥४८॥
धरां शय्यान्तु युष्मभ्यं, सृतीस्तत्र तथाऽकरोत् । युष्मदर्थे, जलं व्योम्नश्चैवावर्षद् वनस्पतीन् ॥४९॥
विविधांश्च समुद्भूतान् अकरोत्तेन यः किल । [54]भणन् 'अत्त स्वयं किं च पशूनादयताऽपि च ॥५०॥
लक्ष्माण्यत्र मनीषिभ्यस्सन्त्यनेकान्यसंशयम् । [55]सृष्टा अस्याः किलास्माभिर्यूयञ्च तदनन्तरम् ॥५१॥
अस्यामेव परावृत्ताः करिष्यध्वेऽत एव च । पुनस्सृष्टाः करिष्यध्वे; [56]लक्ष्माणि दर्शितानि च ॥५२॥
तस्मै सर्वाण्यथास्माभिस्स्वानि तान्यप्यसौ परम् । असत्यापयदेवाऽथ न्यषेधत् पुनरेव च ॥५३॥
[57]असावाह 'भगोमूष ! स्वीयया मायया नु किम् । द्रावणायास्मदीयाया भूमेरस्मांस्त्वमागतः ? ॥५४॥
[58]सृजामो वयमप्यस्तु मायां त्वत्सदृशीमिह । स्यात् प्रतिज्ञावयोर्मध्ये विरोधं न तथाऽऽचरेत् ॥५५॥
आवयोः पक्षयोः कोऽपि तस्यास्सुप्रतते स्थले । [59]महानुद्धर्षकालोऽयं त्वत् प्रतीक्षाक्षणस्तु यः ॥५६॥
कामये समवेतास्स्युर्लोका दृष्टेऽरुणेऽथ च । [60]निवृत्तः प्रिययौनोऽभूत् समाहर्तुं बलं ततः ॥५७॥
समाहृत्य बलं पश्चात् (साम्मुख्याय) मतश्च सः । [61]मूषस्तानाह 'धिग् युष्मान्, अनृतारोपणं न वै ॥५८॥
कुरुध्वं तावदल्लाहे, नाशयेदन्यथा स वः । यातनाभिरसत्यन्तु योऽपि तस्मिन्नरोपयत् ॥५९॥
अभूदेवाऽफलस्तावत् कामिते स निजे जनः । [62]तेविवादपरा जाता अन्योन्यं तदनन्तरम् ॥६०॥
रहस्यमन्त्रणायाञ्चाऽप्यभूवन् मग्नमानसाः । [63]प्रावदन् 'मायिनावेतौ द्रावणे कृतमानसौ ॥६१॥
भूम्या हि युष्मदीयाया युष्मान्, नाशाय तत्परौ । किंचाऽऽदर्शप्रतिष्ठानां प्राप्तानां क्रमतस्तथा ॥६२॥
[64]योजना साधनानान्तत् स्वकीयानां विधीयताम् । क्रमसिद्धास्ततो भूत्वा तिष्ठताग्रे, स वै जयी ॥६३॥
अद्य योऽस्ति गरीयान् वै; [65]प्राहुर्मूषभगो ! क्षिप । पूर्वं त्वमेव, किम्वैते क्षिपेम प्रथमं वयम् ? ॥६४॥
[66](मूषः) प्रत्याह 'नो, पूर्वं यूयमेव क्षिपेत तु । तदाऽकस्मात्तदीया ये गुणा दण्डाश्च येऽभवन् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

अमीषां मायया तान्स प्रत्यैत्तावद् विसर्पतः । [६७]भयेन ग्रस्तमात्मानं तेन मूषोऽप्यमन्यत ॥६६॥
[६८]अवादिष्म 'गमो मा त्वं भयं त्वं हि गुरुर्मतः' । [६९]क्षिप्यतां दक्षिणे हस्ते यत्ते, यत्तेऽसृजंस्तथा ॥६७॥
निगरिष्यत्यदस्तद् वै छद्म केवलमेव तत् । सृष्टं मायाविभिर्यत्तैः, मायावी फलवान्न च ॥६८॥
जायते कर्मकौशल्यं विन्दंश्चैवाऽप्यनुत्तमम् । [७०]ततो मायाविनोऽभूवन् प्रणिपातपरा अथो ॥६९॥
प्राहुः 'वयं प्रभौ तस्मिन् श्रद्दध्मो यो हि वर्त्तते । हारदूनस्य मूषस्य चैव तावत् प्रभुः किल ॥७०॥
[७१]प्रिययौनोऽवदद् 'हन्त ! श्रद्दध्वे यूयमत्र हि । ममाज्ञामनपेक्ष्यैव, युष्माकं गुरुरस्त्यसौ ॥७१॥
मायायां व्यनयद् युष्मान् यो हि, तत् साम्प्रतं ध्रुवम् । व्यत्यस्य कर्त्तयिष्यामि चरणे च करौ च वः ॥७२॥
शूलौ चारोपयिष्यामि खर्जूरस्कन्धबन्धनात् । आवयोर्यातना कस्य स्थेयसी कष्टदाऽधिकम् ॥७३॥
वेत्स्यथ सर्वमप्येतद् यूयं ते नैव निश्चितम् । [७२]त आहुर्मुख्यता ते तु कदाचिन्न हि सम्भवा ॥७४॥
विशदानां प्रमाणानां प्रत्यक्षाणामपेक्षया । योऽसृजत् पुनरस्मांश्च तस्य चैव व्यपेक्षया ॥७५॥
यद् यत् कर्त्तुमना अत्र तत्तत् त्वं स्वैरमाकुरु । संक्षयं जीवनस्यास्य लौकिकस्यैव केवलम् ॥७६॥
कर्त्तुं शक्नोषि तावत्त्वम्, [७३]श्रद्धरास्स्वप्रभौ ध्रुवम् । वयं जाताः क्षमेतासावस्मद् दोषान् यतोऽथ च ॥७७॥
तां च मायां वयं यस्यां त्वया हि विवशीकृताः । सूत्तमो वर्त्तते ऽल्लाहस्स्थायी सर्वाधिकस्तथा ॥७८॥
[७४]उपेतस्सापराधो यस्स्वं प्रभुं तत्कृते भवेत् । नारको म्रियते यत्र न वा जीवति यत्र सः ॥७९॥
[७५]श्रद्धरस्तु पुनर्भूत्वाऽनुकूलकर्मकृत् तथा । तमुपेष्यति यस्तस्मै महोच्चैर्धाम वर्त्तते ॥८०॥
[७६]शाश्वताश्च सदारामा वहन्ति यदधो नदाः । तत्र वत्स्यन्ति ते शश्वत्, पुरस्कारोऽयमीदृशः ॥८१॥
तस्मै शुद्धात्मना येन विकासस्यायनं गतम् । [७७]प्रेरितश्चाऽभवन् मूषोऽप्यस्माभिर्यत्स वै निशि ॥८२॥
मदीयैर्बन्धकैस्सार्धमध्वानं समुपाश्रयेत् । ततस्तेभ्योऽब्धि मध्ये च कुर्यात् शुष्कां हि पद्धतिम् ॥८३॥
भयं त्वापातजं प्रास्येत् प्रास्येद् (वारि) भयन्तथा । [७८]प्रिययौनो ययौ पश्चादाकर्षन्त्स्वां हि वाहिनीम् ॥८४॥
संवृतांस्तांश्च सामुद्रं चकाराऽऽव्रियतैव यत् । [७९]प्रिययौनः पथभ्रष्टान् व्यधात् तावत् स्वबान्धवान् ॥८५॥
अदर्शयच्च नाऽध्वानम्; [८०]ईश्वरालीनवंशजाः । मोचिता यूयमस्माभिः प्रद्विषः, दक्षिणेन च ॥८६॥
तूरं तावत् प्रतिज्ञातं साल्वामन्नौ न्यगायितौ । [८१]वस्तूनि यानि युष्मभ्यं दत्तानि पुनरेव च ॥८७॥
भुज्यन्तां तानि, चैवाऽपि कार्यो नाऽतिक्रमस्तथा । अन्यथा तु प्रकोपो मे युष्मास्वेवापतिष्यति ॥८८॥
कोपापाताच्च मे सर्वो नष्ट एवाऽभवद् ध्रुवम् । [८२]विप्रतीसारिणे किं चाऽप्यनुकूलकृते पुनः ॥८९॥
श्रद्धराय च सन्मार्गं यायिने तु भवाम्यहम् । क्षमावान् ध्रुवमत्यर्थम्; [८३]भगोमूष ! किमास्त तत् ॥९०॥
बान्धवेभ्यः पुरा यद् वै त्वां हि तत्राऽऽनयत् किल ? । [८४]स आह 'तेऽनुयान्त्येव मां, मया त्वरितं पुनः ॥९१॥
प्रभो मे ! त्वां समुद्दिश्य त्वां प्रसादयितुं किल' । [८५]प्राह 'ते तावदस्माभिः कृच्छ्रमापादिता अथो ॥९२॥
परोक्षं बान्धवास्ते हि, पथभ्रष्टाश्च ते कृताः । तेन सामरिकेणैते; [८६]ततो मूषो न्यवर्त्तत ॥९३॥
बान्धवान्त्स्वानति क्रुद्धो विषादम्लानमानसः । प्राह 'मे ज्ञातयः ! किन्नो प्रतिज्ञामकृत प्रभुः ॥९४॥
सूत्तमां किल युष्माभिः, किम्वा यातोऽधिकोऽवधिः । युष्मदर्थेऽथवेष्टं वः प्रभोर्वोऽवतरेद् ध्रुवम् ॥९५॥
कोपो युष्मासु मे वाचो विरुद्धाचरणाद् हि वः ? । [८७]तेऽवदन् 'चरितन्नो ते विरुद्धाचरणं क्वचित् ॥९६॥
आत्मनैव किलास्माभिः, परं दूनाः कृता वयम् । भारात्लोकविभूषाणां क्षिप्तास्ता (अनले) पुनः ॥९७॥
इत्थं सामरिकेणासीत् समक्षं प्रस्तुतं (यतः) । [८८]निर्ममे स ततस्तेभ्यो गोवत्समेक (मुत्तमम्) ॥९८॥
केसराभं, ध्वनिर्यस्माद् वत्सस्येवोदजायत । तेऽवदन्नयमेवेष्टो युष्माकमयमेव च ॥९९॥
मूषस्य चापि खल्विष्टः, प्रमत्तोऽत्र परन्त्वसौ । [८९]पश्यन्ति किन्न ते नासावनुयुक्तोऽपि जल्पति ॥१००॥
तान्, न वा कल्पते तेषां हितायाऽप्यहिताय वा । [९०]हारदूनस्तु तानस्मात् पुरैवेदमबोधयत् ॥१०१॥
यूयमस्माद् भगोलोकाः ! काठिन्यं समुपागताः । दयावान् वः प्रभुस्तेन यूयं मामनुयात वै ॥१०२॥
यश्च मेऽस्ति समादेशस्तं यूयं कुरुतेह च । [९१]तेऽवदन् 'नोपयात्यस्मान् मूषो यावन्निवृत्य हि ॥१०३॥
श्रद्दधानाः किलामुष्मिन् तावदेते वयं ध्रुवम् । [९२]आह (मूषस्त्वये बन्धो) हारदून ! यदा त्वया ॥१०४॥
दृष्टमेते तु विभ्रष्टाः पथो जातास्तदा नु किम् । अरुणत्त्वाम्; [९३]मदादेशं यन्न त्वं पालय क्वचित् ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

तिरस्कृतो ममादेशः किं त्वया; ? [९४]प्राह खल्वसौ । भगो पुत्रक मे मातुः ! त्वं गृहाण न मामिह ॥१०६॥
कूर्चेषु वाऽथ केशेषु, भयम्मे खल्वजायत । त्वं कदाचिद् वदेर्नैतत् 'ईश्वरालीनसन्ततौ ॥१०७॥
त्वयाऽऽस्ते जनितो भेदो मदुक्तं चाप्युपेक्षितम् । [९५]प्राह 'सामरिक! अस्त्यत्र वक्तव्यं किन्नु ते खलु'? ॥१०८॥
[९६]स आह 'दृष्टवानस्मि यद् दृष्टं नापरैरहम् । पद्धतेर्वाग्घरस्याऽथ समादत्तं मया पुनः ॥१०९॥
मुष्टिमेयं, ततः क्षिप्तं तदेव, प्रेरितोऽभवम् । आत्मनो मानसेनैव तदस्मिन् (नापरेण तु) ॥११०॥
[९७]आह मूषोऽस्तु, याहि त्वं, सावशेषे हि जीवने । त्वयैतदेव वक्तव्यम् 'मां स्पृशेन्न हि कश्चन' ॥१११॥
प्रतिज्ञातं त्वया सार्धं ध्रुवं यच्च न तच्च वै । अतियापयितुं शक्यं कदाचित् त्वं प्रपश्य च ॥११२॥
इष्टं देवं निजं येन संगतोऽस्थाश्चिरात् किल । निश्चितं तं प्रधक्ष्यामस्संचूर्याप्सु ततो ,व॰म् ॥११३॥
वाहयिष्याम एवाऽपि; [९८]केवलोऽल्लाह एव तु । प्रभुर्वो वर्त्तते सत्यं नान्तरेण तथाऽस्ति तम् ॥११४॥
प्रतीष्टस्त्वपरः कोऽपि, स्वेन ज्ञानेन चाऽखिलम् । स्थितोऽसौ समभिव्याप्य; [९९]तदित्थं त्वां वयं किल ॥११५॥
श्रावयामः पुरा वृत्तम्, स्वतस्तुभ्यमदद्म च । अनुस्मारकम्; [१००]अस्माद् यः पराङास्यो भविष्यति ॥११६॥
ध्रुवं भारमसौ वोढ़ा पुनरुत्थापनाऽहनि । [१०१]स्थास्यन्त्यस्यां दशायाञ्च तद्विधास्सततं जनाः ॥११७॥
दुर्वहो ननु भारोऽयं पुनरुत्थापनाऽहनि । [१०२]यदा किंचाऽथ तत्तूर्यं नादितं हि भविष्यति ॥११८॥
समवेतान् करिष्यामस्सापराधान् वयन्तदा । पीताक्षीन् किल; [१०३]तेऽन्योन्यं व्याहरिष्यन्त्यथैव च ॥११९॥
दशाह त्वेव युष्माकं स्थितिरत्र व्यजायत । [१०४]वयं विद्मो यदप्येते व्याहरिष्यन्ति वाङ्मयम् ॥१२०॥
सच्चारित्र्यो यदा तेषां तानिदं व्याहरिष्यति । एकाऽहं त्वेव युष्माकं स्थितिरत्र व्यजायत ॥१२१॥
[१०५]प्रक्ष्यन्ति पर्वतानान्ते विषये त्वां ततो वद । उड्डायिष्यति तांस्तावत् संचूर्य मे प्रभुः किल ॥१२२॥
[१०६]महीं शून्यं महीतानं कृत्वा संत्यक्ष्यते च सः । [१०७]वेल्लितां वलिताञ्चापि द्रक्ष्यसि त्वं न तामथ ॥१२३॥
[१०८]तदाऽऽह्वातुस्समाह्वाने समवेता जनास्तथा । भविष्यन्ति, न कोऽपि स्यात् स्तब्धतादर्शनेत्वलम् ॥१२४॥
घोषा मन्दा भविष्यन्ति दयालोरग्रतः पुनः । मन्दं स्वनं विहायान्यत् श्रोतुं यूय न शक्ष्यथ ॥१२५॥
[१०९]नाभिशंसा दिने तस्मिन् तथा चैव फलिष्यति । अनुज्ञातो भवेत् कश्चिद् यदि तेन दयालुना ॥१२६॥
अभीष्टञ्च वचो यस्य तस्मै तं प्रविहाय तु । [११०]तदग्रे यच्च तत्पश्चात् तदसौ वेत्ति पूर्णतः ॥१२७॥
न ते ज्ञानेन तन्तावत् परिवेष्टुमल तथा । [१११]नतान्यास्यानि तस्याग्रे भविष्यन्ति तथैव च ॥१२८॥
सप्राणस्य किलामुष्य स्थायिनश्शश्वदेव च । पापभारस्य वोढा तु भवेद् वै विफलश्रमः ॥१२९॥
[११२]अत्याचारभय किम्वा लभ्यमानफलस्य च । हानेर्वापि भयं तस्य कदाचिन्न भविष्यति ॥१३०॥
भद्रकर्मरतो यस्तु श्रद्दधानस्तथैव च । [११३]अर्वाणां भाषयाऽस्माभिः कुराणं काशितं न्विदम् ॥१३१॥
ज्ञापित वर्त्तते चाऽत्र विविधं, ते कदाचन । परास्तं दुरितं कुर्युः, कल्पत चिन्तनाय वा ॥१३२॥
[११४]सर्वोच्चैर्वर्त्ततेऽल्लाहस्सत्यो राजा च वर्त्तते । वाचनेऽस्य कुराणस्य शीघ्रताम्मा गमस्तथा ॥१३३॥
काशितं पूर्णतो यावत् त्वयि तन्न हि जायते । प्रार्थयस्व प्रभोर्मे ! च मज्ज्ञानं वर्धयाऽधिकम् ॥१३४॥
[११५]पूर्वमस्मात् किलास्माभिश्चादिमो ग्राहितः किल । प्रतिज्ञां तावदेकां स, विस्मृतिं स परं ययौ ॥१३५॥
स्थैर्यं दृष्टन्न चैवाऽपि तत्रास्माभिस्तु किंचन । [११६]प्रेरिताश्च यदास्माभिर्देवाः 'यूयं किलाऽऽदिमम् ॥१३६॥
प्रणिपत्यापतिष्ठध्वम्' ते तथा चाऽऽचरन्, परम् । विहाय तमिभालीनं सर्वथाऽसौ न्यषेधयत् ॥१३७॥
[११७]अवोचाम तमतेन पत्न्यास्तेऽरिस्तवाऽपि च । निश्चितं वर्त्ततेऽयन्तु, सुखाऽऽरामात्ततो युवाम् ॥१३८॥
कदाचिद् भ्रंशयेन्नासौ दौर्भाग्यञ्च न वां ग्रसेत् । [११८]क्षुधार्त्तौ नापि नग्नौ च तिष्ठेतां हि युवामिह ॥१३९॥
युवाभ्यां दिष्टमेतद् वै; [११९]तृषार्त्तौ च युवामिह । सूर्यतापात् प्रखिन्नौ च तिष्ठेतां न पुनर्युवाम् ॥१४०॥
[१२०]अध्वनो भ्रंशनायैनं शातनस्त्ववदत् परम् । भगो आदिम ! किन्तेऽहं वदानि तमनोकहम् ॥१४१।
यो भवत्यमरो वृक्षस्तद्राज्यं यदनाशि च ? । [१२१]अश्नीतां तौ ततस्तस्याऽवित्तां लिंगानि चात्मनः ।१४२॥
सुखारामाच्च पर्णानि तावुभौ स्वशरीरयोः । संवृतिं मुहुरासज्याऽरप्साताम् कर्त्तुमेव च ॥१४३॥
आदिमस्स्वप्रभोराज्ञां विलघ्य प्राक्रमीत्ततः । अभ्रशच्चाध्वनस्तेन; [१२२]प्रभुस्तस्य च तं ततः ॥१४४॥
अवृणोत्, अभवत्तस्मिन् दयालुरयनञ्च तम् । दर्शयामास, [१२३]तावाह 'युवां तावदुभावपि ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

स्थानादस्मादधो यातम्, युवां शत्रू परस्परम् । मार्गसन्दर्शनं मत्तो युवां प्रत्येति चेदथ ॥१४६॥
योऽनुयाता भवेत्तस्य विषीदेन्न स किंचन । दौर्भाग्येण परीतोऽपि न चैवासौ भविष्यति ॥१४७॥
[१२४]मत्स्मृतेर्यः पराङास्यः परन्तावद् भविष्यति । जीवस्संकुचितस्तस्य तेन चैव भविष्यति ॥१४८॥
तमन्धं बोधयिष्यामः पुनरुत्थापनाऽहनि । [१२५]स चाख्यास्यति 'केनाऽहं गत दृष्टि विबोधितः ॥१४९॥
प्रभो मे ! ऽहन्तु खल्वासं नेत्रदृष्ट्या समन्वितः ? । [१२६]असौ वक्ष्यति 'खल्वित्थमेव त्वामाययुः पुनः ॥१५०॥
अस्मदीयाः किलाऽऽयाताः व्यस्मरस्त्वं हि यानथ । विस्मृतिं नीयसे ह्यद्य त्वञ्चापि तद्वदेव तु ॥१५१॥
[१२७]ईदृशो हि पुरस्कारस्तस्मै नो वर्त्तते तु यः । मर्यादां समतीतोऽस्ति श्रद्धरो न च वर्त्तते ॥१५२॥
आयातेषु प्रभोस्स्वस्य परलोकस्य यातना । वर्त्तते कृच्छ्रदाऽतीव स्थायिनी चाधिकम्मता ॥१५३॥
[१२८]एतान् दर्शयितुं मार्गं किन्नैतत् चाप्यसिद्ध्यत । नाशिता यत् पुराऽस्माभिरनेके कुलजा गणाः ॥१५४॥
येषामेते विगाहन्ते वासधामानि सन्ततम् । तिष्ठन्त्यत्र प्रमाणानि मनीषिभ्यस्त्वसंशयम् ॥१५५॥
[१२९]अथ चेत्ते प्रभोः पार्श्वात् अभविष्यन्न निश्चितः । विधिरेकोऽभविष्यच्च नाऽपि वा नियतावधिः ॥१५६॥
सत्यं पर्यावृतानेतानकरिष्यद्धि यातना । [१३०]प्रलपन्ति यदप्येते सहस्व त्वमतस्समम् ॥१५७॥
गाय स्तोत्राणि चैवाऽपि स्वप्रभोर्नियतन्तथा । सूर्योदयात् पुरा किञ्च सूर्यस्यास्तमनात् पुरा ॥१५८॥
निशानाञ्चापि होरासु कासुचिद् गाय तं पुनः । प्रान्तभागेषु चाप्यह्नां, प्रसीदेत् स क्वचित् त्वयि ॥१५९॥
[१३१]चक्षुषोर्विषयं नाऽथ चाकचक्यन्तु तत् कुरु । विकीर्णं भाविकं यत्तु द्वन्द्वेभ्योऽस्माभिरत्र तु ॥१६०॥
परीक्षा हेतुनैतेषां, दीयमाना च सम्पदा । सूत्तमा स्थायिनी चापि त्वत् प्रभोरेव वर्त्तते ॥१६१॥
[१३२]नमस्यायास्समादेशं स्वजनेभ्यः कुरुष्व च । स्थिरस्तिष्ठ च तत्र त्वम्, त्वान्न याचामहे वयम् ॥१६२॥
कामपि सम्पदां तावत्, प्रदद्मो वयमेव तु । सम्पदो युष्मदर्थे वै, भीतिरीशस्य यत् फलम् ॥१६३॥
[१३३]वचन्त्येते 'कथन्नायं स्वप्रभोर्लक्ष्म पार्श्वतः । किंचिदादाय खल्वस्मान् जायते समुपस्थितः ॥१६४॥
प्रमाणं नोपयातं किं तानमुष्याखिलस्य तु । प्राचीनेषु हि शास्त्रेषु यदन्तर्विश्य वर्त्तते ॥१६५॥
[१३४]नाशितानकरिष्याम कष्टेन केनचिद् यदि । तान् वयं तूदयात्तस्य पुरैव तदिमे ततः ॥१६६॥
आक्रोक्ष्यन्-वाग्घरः कोऽपि प्रत्यस्मान् प्रेषितोऽभवत् । प्रभो नः ! किं त्वया नैव यथाऽऽयातान् वयं किल ॥१६७॥
आचरिष्याम तत्वेन मानहानेः पुरा यथा । दोषापातात् पुरा चैव; [१३५]ब्रूहि ''सर्वोऽपि खल्विह ॥१६८॥
वर्त्तते हि प्रतीक्षायां प्रतीक्षस्व त्वमप्यथ । शीघ्रं ज्ञास्यसि किञ्चैतत् कोऽत्र वै ऋजुमार्गगः ॥१६९॥
सत्यस्य कश्च पन्थानं प्राप्तवानत्र वर्त्तते ।

इति षोडशं पारायणम् ।

योगः—१६९॥

CC-0. In Public Domain. Digitized by eGangotri

२१

सूक्तम्–देवाः

(अल–अम्बिया)

(महाकालेऽवतीर्णा द्वादशोत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

अथ सप्तदशं पारायणम्

[१]कर्मलेखाक्षणश्चैव लोकानां नेद आगतः । परन्ते तद्विधा ये हि प्रमादाद् हि पराङ्मुखाः ॥ १ ॥
[२]अनुस्मारकमप्येतान् प्रभोरेषामुपैति यत् । नूत्नं श्रृण्वन्ति तच्चापि क्रीडासंसक्तमानसाः ॥ २ ॥
[३]समाहितानि नैवैषां हृदयानि भवन्ति च । उपांश्वेते च जल्पन्ति पाप्मानो मानवो ह्ययम् ॥ ३ ॥
तद्विधो यद् विधस्त्वं, वै नान्तरं तत्र विद्यते । ज्ञात्वा चैवापि तत् केन जायध्वे कूटमोहिताः ॥ ४ ॥
[४]स आह "यद् धरित्र्याञ्च यद् वियत्सु च जल्प्यते । प्रविजानाति तत्सर्वं प्रभुर्मे, स हि वर्त्तते ॥ ५ ॥
श्रोता ज्ञाता तथा चैव; [५]केवलं नेदमेव च । ते भणन्ति-भवत्येतत् स्वप्नसन्दर्शनं पुनः ॥ ६ ॥
ततोऽप्यूर्ध्वं, स्वतोऽनेन सृष्टमेतद् धिया स्वया । इतोऽप्यूर्ध्वमयन्त्वस्ति कविरेको, ह्यपेक्ष्यते ॥ ७ ॥
किंचिल् लक्ष्म समादाय वाग्घरान् प्राग्भवानिव । अयं चाप्युपयात्वस्मान्; [६]वस्त्यानि यानि प्रागितः ॥ ८ ॥
नाशितानि किलास्माभिरुदैत् श्रद्धा न तेष्वपि । कारणं किं भविष्यन्ति यदेते श्रद्धरास्ततः ? ॥ ९ ॥
[७]पुराऽपि मानवानेव विधाय वाग्घरान् वयम् । प्रैषयाम, वयं येषु ज्ञानं चाऽऽकाशयाम हि ॥१०॥
वित्थ चेन्नैव यूयं तत् पृच्छतैतान् जनान् किल । बिभ्रति ये किल ज्ञानं शास्त्रीयं नाम (तत्वतः) ॥११॥
[८]विग्रहो न कृतश्चैषां तादृशो यन्न सर्वथा । अदन्त्वन्नं हि ते, नाऽपि चाऽमरा ह्येव ते कृताः ॥१२॥
[९]कृतं तैश्चरितार्थं च यदस्माभिः प्रतिश्रुतम् । रक्षितास्ते तथाऽन्ये च प्रतीष्टा येऽभवन् हि नः ॥१३॥
नाशिताः परमस्माभिर्मर्यादोल्लंघिनो जनाः । [१०]काशितं पुनरस्माभिर्युष्मास्वेकं हि पुस्तकम् ॥१४॥
स्मारकं वर्त्तते यद् वश्चेतथ किं ततोऽपि नो । [११]चूर्णितानि प्रभूतानि वस्त्यानि पंकिलानि च ॥१५॥
उच्छ्रिताः पुनरन्ये च लोका अस्माभिरप्यथ । [१२]यातनाऽनुभवश्चाऽथ यदा तेषामजायत ॥१६॥
ते ह्यपक्रमणं तस्या आरभन्त ततो जनाः । [१३]अभूवन् भाषितास्ते च 'माऽपयानं विधत्त भोः ! ॥१७॥
निवर्त्तध्वन्तु वस्त्यानि भोगानां शरणानि च । प्रश्नैस्संभावितास्तावद् यूयं स्यात कदाचन ॥१८॥
[१४]आक्रोशंस्ते धिगेवास्मान्, पाप्मानो वयमास्म हि । [१५]अतिष्ठंस्ते च साक्रोशा एतस्मिंश्चान्तरे वयम् ॥१९॥
तानकार्ष्म कृषिः कृत्ता शान्तोऽगारो यथैव च । [१६]धरित्री व्योम किं चैव यत्तयोर्मध्यगं पुनः ॥२०॥
अस्माभिर्न हि तत् सृष्टं क्रीडेत्येव मनीषया । [१७]क्रीडा द्रव्याणि चेत् स्रष्टुं नोऽभविष्यन्मतिः क्वचित् ॥२१॥
अस्रक्ष्याम वयं तानि स्वपार्श्वादेव सर्वशः । समुद्भूतोऽभविष्यच्चेत् संकल्पोऽस्मासु तादृशः ॥२२॥
[१८]सत्येनासत्यमाहन्मो वयन्तु, तच्च तच्छिरः । क्षिणोति, पुनरित्थं तन् नाशमेवैति सर्वथा ॥२३॥
विनाशो ह्येव युष्माकं निश्चयेन भविष्यति । गुणानां तद्विधानां वै कल्पनाद् विषयेऽस्य तु ॥२४॥
[१९]योऽपि कोऽपि धरित्र्यां वा वर्त्तते गगनेषु वा । स वै तस्यैव, ये चाऽथ वसन्ति समया तु तम् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

‘महीयांसो वयम्’ नैतत् कृत्वा तस्य स्तुतेः क्वचित् । पराङ्गास्या भवन्तीह श्राम्यन्ति नाऽथवाऽपि ते ॥२६॥
[२०]गरिमाणन्तु गायन्तस्तिष्ठन्ति ते दिवाऽनिशम् । विश्राम्यन्ति न चैवाऽपि; [२१]प्रतीष्टाः किन्नु देवताः ॥२७॥
धराया घटिता एभिर्ये करिष्यन्ति वै मृतान् । उत्त्थितान्प्राणितान्कृत्वा; [२२]अभविष्यन्नितरेऽपि चेत् ॥२८॥
प्रभवः पृथगल्लाहादेनयोस्सत्यमेनयोः । व्यवस्था ह्यव्यवस्थायां पर्यणंस्यद् ध्रुवं तदा ॥२९॥
कीर्तयन्ति गुणानस्य यान् हि ते ऽननुकूलताम् । यान्ति ते तन्महिम्नस्तु ह्यल्लाहस्याऽस्ति यः प्रभुः ॥३०॥
तस्य सिंहासनस्यैव; [२३]नानुयोज्यो भवेच्च सः । तस्मिन् यच् चेष्टते चासौ भविष्यन्त्येव ते परम् ॥३१॥
अनुयुक्ताः; [२४]उपेक्ष्यैनमितरे किन्नु तैः कृताः । प्रतीष्टाः ? ब्रूहि तान् ‘यूयं सप्रमाणमुपेत (भोः!) ॥३२॥
अनुस्मारकमेतद् वै पूर्वजानां हि वर्त्तते । समसामयिकानाञ्च नृणां मेऽप्यथ वर्त्तते ॥३३॥
प्रभूताः परमेतेषां नैव सत्यविदो जनाः । कारणञ्चेदमेवाऽस्ति यत्ते सत्यात् पराङ्मुखाः ॥३४॥
[२५]प्रेषितो वाग्घरश्चैव योऽपि त्वत् प्रागभूत् किल । काशितं समभूत्तस्मिन्निदमेव ‘न हीतरः ॥३५॥
अन्तरेण प्रतीष्टो मामतो मामेव संस्तुहि । [२६]तथाऽऽहुस्ते ‘दयालु र्वै सूनुभृत्, काशते हि सः ॥३६॥
महिम्ना पर (मेते तु सूनून् यानपि मन्वते) । बन्धकास्ते हि पूजार्हाः, [२७]वाचि तं नातियान्ति ते ॥३७॥
तदादेशानुरोधेन प्रवर्त्तन्ते क्रियासु च । [२८]वेत्त्यसौ यत् पुरस्तेषां पृष्ठतो यच्च तिष्ठति ॥३८॥
नाभिशंसन्ति ते चैव तं विहाय तु यो भवेत् । मतस्तस्य भयादस्य वेपन्ते ते च सर्वदा ॥३९॥
[२९]यस्तु कश्चित् पुनस्तेषामभिमन्येत खल्विदम् । अल्लाहात् पृथगेषोऽहं देव एको भवामि हि ॥४०॥
स एवाऽसौ पुरस्कृत्यो योऽस्माभिर्नारकेण वै । ईदृशी ह्येव जाल्मेभ्यो वर्त्ततेऽस्मत् पुरस्क्रिया ॥४१॥
[३०]अश्रद्धाः किल जानन्ति यदाऽऽकाशा धरा तथा । प्रागभिन्नाः किलाऽतिष्ठन् परतो ह्येव ते पुनः ॥४२॥
व्यभज्यन्त किलाऽस्माभिः, सप्राणं सर्वमेव च । वारिणाऽभूत्तथा सृष्टं, विश्वसिष्यन्ति तन्न किम् ॥४३॥
ते ततोऽपि; [३१]धरायाञ्चाप्यद्रयो विनिवेशिताः । कदाचिद् येन साऽऽदाय लोकान्नैवैकतस्स्खलेत् ॥४४॥
दरास्तत्र कृताश्चैव मार्गकार्यप्रसिद्धये । लोका येनोपयुञ्जीरन् मार्गान् (सौकर्यतः पुनः) ॥४५॥
[३२]रक्षितेवच्छदिस्सृष्टोऽस्माभिराकाश एव च । परं ते तादृशा लोका लक्ष्मभ्यो ये पराङ्मुखाः ॥४६॥
तदीयेभ्यो हि तिष्ठन्ति; [३३]स चैवासावहर्निशम् । योऽसृजच् चन्द्रमर्कञ्च कक्षे नक्षन्त्यमी स्वके ॥४७॥
[३४]पुरा चाप्यथ कस्मिंश्चिन्नामृतत्वं निवेशितम् । अस्माभिर्मानवे तावत् किन्तत्स्यात्ते मृतिर्यदि ॥४८॥
किमेते धारयिष्यन्ति प्राणानत्र हि सन्ततम् ? । [३५]येन केनाऽपि जीवेन भोक्तव्यो ह्येव वर्त्तते ॥४९॥
रसो मृत्योः, वयञ्चाऽथ युष्मान् सर्वानपीह तु । भद्रे क्षिप्त्वाऽप्यभद्रे च प्रपरीक्षामहे किल ॥५०॥
परावृत्योपगम्याश्च युष्माभिर्वयमेव तु । [३६]श्रद्विहीनाश्च ये लोकास्त्वां प्रपश्यन्ति ते यदा ॥५१॥
रमन्ते ते परीहासे (प्रजल्पन्ति च) ‘किं न्वयम् । स एव त्वत् प्रतीष्टानां वर्णनं कुरुते हि यः’ ॥५२॥
तादृशास्ते दयालोर्ये निषेधन्त्येव वर्णनम् । [३७]त्वराकारितया सृष्टो वर्त्तते किल मानवः ॥५३॥
सत्वरं दर्शयामि त्वां स्वानि लक्ष्माण्यहं पुनः । त्वरया मा प्रवर्तस्व; [३८]ते तथेत्थं वदन्ति च ॥५४॥
‘प्रतिज्ञातमिदं याता चरितार्थं कदा ननु । तिष्ठसि सत्यसन्धश्चेत्’; [३९]अभविष्यदतीव च ॥५५॥
भद्रमेतदवेत्स्यंश्चेच् छ्रद्विहीनास्तु तं क्षणम् । (आपतन्तम्) यदा तेऽग्निं निजास्येभ्यो न चाऽथवा ॥५६॥
प्रतीकर्त्तुं हि शक्ष्यन्ति पृष्ठेभ्यस्स्वेभ्य एव च । नैव शक्ष्यन्ति ते किञ्च लब्धुमेव सहायताम् ॥५७॥
[४०]अकस्मात् प्रत्युतैतान् स समान् पर्यावरिष्यति । मोहयिष्यति किञ्चैतान् शक्ष्यन्त्येते न तं तदा ॥५८॥
अपाकर्त्तुं; न लभ्यस्स्यात् एषां कालावधिस्तथा । [४१]लम्भिताः परिहासञ्च वाग्घरा बहवः पुरा ॥५९॥
जन्मनस्ते, परं लोका ये हि तानहसन् किल । पर्यावृणोत् स एवाऽमून् यमेते त्वहसन्नरम् ॥६०॥
[४२]प्रविहाय दयालुं तं, ब्रूहि कस्त्वितरो हि यः । युष्मानहर्निशं तावत् रक्षतीहाऽऽत्मनः प्रभोः ॥६१॥
वर्तते तु पराङ्गास्या ह्येव तिष्ठन्ति संस्तवात् । [४३]विहायास्मान् प्रतीष्टाः किं तेषां तिष्ठन्ति ये पुनः ॥६२॥
रक्षणं ददते चाऽमून् ! नात्मना शक्नुवन्ति ते । आत्मानं रक्षितुञ्चापि, साम्मुख्ये नस्समागते ॥६३॥
नाऽपि ते रक्षितुं शक्या भवन्तीह कदाचन । [४४]दत्तश्चामुष्य संभारस्तेभ्यः प्राग्भूभ्य एव च ॥६४॥
तावन्मात्रो यदायुर्वै तेभ्यो दैर्घ्यं समातनोत् । किन्नु ते नैव पश्यन्ति भूभ्याः प्रान्ताननारतम् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

वयं दामः; किमेते तज् जेतुं शक्ताः कथञ्चन ? । [४५]ब्रूहि 'अहं चेतयाम्येष काशितैरेव केवलम् ।।६६।।

श्रृणोत्येव न चाह्वानं बधिरश्चेतितोऽपि सन् । [४६]त्वत् प्रभोर्यातनायास्तु समीरांशोऽपि चेत् स्पृशेत् ।।६७।।

अमूंस्ते तद् ध्रुवं तावत् क्रोक्ष्यन्त्येवं 'धिगस्तु नः । अत्र कश्चिन्न सन्देहो ह्यतिष्ठाम सकिल्विषाः ।।६८।।

[४७]धारयिष्याम एवाऽपि पुनरुत्थापनाऽह्नि । तुलां न्यायस्य तत् कोऽपि स्तोकमात्रमथाऽपि च ।।६९।।

नाऽयुक्तवर्त्तनं तावत् तेन स गमयिष्यते । राजिकाकणमात्रञ्च कृतं यत् स्यात् स्थितं क्वचित् ।।७०।।

विवृतं किल तच्चापि करिष्यामो वयं ध्रुवम् । लेखासुसाधने किं च सिद्धास्स्म एकला अपि ।।७१।।

[४८]हारदूनाय मूषाय भयंमन्येभ्य एव च । प्रकाशञ्च कषञ्चैव तथाऽनुस्मारकं वयम् ।।७२।।

प्राददम; [४९]ये विभीताश्च स्वप्रभोरन्तरात्मना । अमुष्माद् ये क्षणाच्चैव मन्वते सततं भयम् ।।७३।।

[५०]अनुस्मारकमेतद् वै सौभाग्यस्यावहं मतम् । अस्माभिः काशितम्; तत् किं यूयमेतन्निषेत्स्यथ ? ।।७४।।

[५१]अदद्म प्रागितश्चैव किलाऽब्रह्माय चेतनाम् । तदीयां वयमेते वै, सम्यक् चाविद्म तं वयम् ।।७५।।

[५२]यदा चासावुवाचेदं स्वतातं स्वांश्च बान्धवान् । 'मूर्त्तयः का भवन्त्येता यूयं याभिर्हि संगताः ।।७६।।

[५३]त आहुः 'पूर्वजा दृष्टास्स्तुवन्तोऽस्माभिरात्मनः । अमूः; [५४]आह स 'तद् यूयं युष्माकं चैव पूर्वजाः ।।७७।।

स्पष्टतो वर्त्मनो भ्रष्टास्स्थितास्तावदनारतम् । [५५]तेऽवदन् 'सत्यमादाय समुपेतोऽसि किन्नु नः ।।७८।।

किम्वा विदूषकाणान्त्वं कश्चिदायातवानिह' ? । [५६]सोऽवदत् 'न हि, याथार्थ्यात् प्रभुर्वः प्रभुरेव सः ।।७९।।

आकाशानां धरित्र्याश्च यानसावसृजद् ध्रुवम् । अहमस्य पुनस्साक्ष्यं धारयाम्यग्रतश्च ते ।।८०।।

[५७]शपेऽल्लाहेन चैवाऽहं युष्मासु गतवत्स्वितः । पृष्ठतः खलु युष्माकं यौष्माकीणाभिरेव तु ।।८१।।

मूर्त्तिभिर्वञ्चनां तावत् करिष्यामि (सुनिश्चितम्) । [५८]अथाऽतोऽसौ विभेद्यैताः खण्डशः खण्डशोऽकरोत् ।।८२।।

विहायाऽऽसां महागुर्वीमिकां यत्ते कदाचन । संश्रयायाभियातुं तां भवेयुर्भावसंकुलाः ।।८३।।

[५९]तेऽवदन् 'कोन्वयन्तावदस्माकं मूर्त्तिभिस्समम् । प्रवृत्तो वर्त्तनेऽभूद्धि ? पापात्माऽसौ न संशयः ।।८४।।

[६०](केऽपि) चाऽऽहुः 'अधिकृत्य किलेमा वादतत्परम् । युवानं श्रुतवन्तस्स्म वयमेकं, वदन्ति यम् ।।८५।।

अब्रह्मेत्यभिधानेन; [६१]तदाऽऽहुस्तेप्यनन्तरम् । 'लोकप्रत्यक्षमानेयस्स वै सर्वेक्षणाय तत्' ।।८६।।

[६२]तेऽपृच्छन् 'नन्वयेऽब्रह्म ! अस्माकं देवैस्सह त्वया । चरितं कर्म खल्वेतत् ?; [६३]प्रत्युवाच 'गुरुर्ह्ययम् ।।८७।।

एषामकृत कर्मैतत्, पृच्छतैतान् इमे यदि । वाग् व्यापारे समर्थास्स्युः; [६४]पार्श्वतस्ते ततोऽभवन् ।।८८।।

मिथश्चामन्त्रयन् 'सत्यं पाप्मानो यूयमेव तु' । [६५]विमूढास्तेऽभवन् पश्चात् आहुरेवञ्च तं पुनः ।८९।।

'त्वन्तु वेत्स्येव नैवैते शक्ता वक्तुं कथञ्चन' । [६६]तदाऽऽह 'यूयमल्लाहाद् भिन्नस्य तत् कथं (भगो !) ।।९०।।

पूजने तत्परास्तस्य सिद्धये नाऽप्यसिद्धये । यस्समर्थः कथञ्चिद् वः; [६७]धिग्युष्मांस्तांश्च धिक् पुनः ।।९१।।

पूजने तत्परा यूयं येषान्तेऽल्लाहतः पृथक् । किन्न तावद् धिया यूयं चेष्टध्वे कृत्यकर्मसु ? ।।९२।।

[६८]तेऽवदन् 'दहताऽमुं वै, स्वदेवाननुयात च । किञ्चित् कर्त्तुं मतिश्चेद् वः; [६९]आदिशाम वयं पुनः ।।९३।।

शैत्यमग्ने ! प्रयाहि त्वं अब्रह्मे तनुताच्च शम् । [७०]कूटमाचरितुं तेन सकामा अभवन् हि ते ।।९४।।

एजनैः परमस्माकं परां हानिं तु ते गताः । [७१]स चैव स च लूतश्च ह्यस्माभिस्सारितौ ततः ।।९५।।

तं प्रदेशमनीयेतां यस्सौभाग्यकरो नृणाम् । कृतोऽस्माभिस्समृद्ध्याऽऽस्ते; [७२]इष्वासं तमदद्म च ।।९६।।

याप्यकूपं तथाऽदद्म तस्मै तत् पौत्ररूपिणम् । आविष्टौ भद्रभावेन तावकुर्म तथैव च ।।९७।।

[७३]अकुर्म तान् वयं नेतॄन् ये किलाऽस्माकमाज्ञया । दर्शितारो ऽध्वनो जाता अस्माभिः प्रेरिताश्च ते ।।९८।।

भद्रकार्याणि वै कर्त्तुं प्रतिष्ठापयितुं तथा । पूजां, दातुं पुनर्दानं अस्माकं ह्येव ते स्थिताः ।।९९।।

[७४]लूतायादद्म विज्ञानं विवेकं पुनरेव च । मोचितश्च गणात्तस्मात् दुरितैस्संकुलादसौ ।।१००।।

वस्तुतोऽतिजघन्यास्ते वृत्तहीनास्तथाऽभवन् । [७५]स्वकीयायां दयायां स वेशितोऽस्माभिरास्त च ।।१०१।।

भद्रेष्वन्यतमस्तावत् लोकेष्वास्त स निश्चितम् । [७६]अथासौ नहुषस्तावत्, यदाक्रन्ददसौ पुरा ।।१०२।।

आकर्णितं तदाऽऽह्वानमस्माभिस्तस्य बान्धवा । स चाऽपि मोचितोऽभूच्च कृच्छ्रात्तस्मादरुन्तुदात् ।।१०३।।

[७७]रक्षितोऽस्माभिरासीच्च नृभ्यस्तेभ्यो हि ये (बत) । न्यषेधन्नस्मदायातान् वस्तुतः पामरा हि ते ।।१०४।।

लोका आसन्, अतश्चैव तेऽस्माभिरप्सु मज्जिताः । [७८]दान्यूधोऽथ शिलामानो निर्णये तत्परौ यदा ।।१०५।।

CC-0. In Public Domain. Digitized by eGangotri

अभूतां तावुभौ तावदधिकृत्य कृषिं किल । यदाऽजा निशि केषाञ्चित् तद्विगाहनतत्पराः ॥१०६॥
आसत, साक्ष्यमापन्ना निर्णयस्य ततो वयम् । [७९]शिलामानाय चाददम ज्ञानशक्तिममुष्य हि ॥१०७॥
अदद्म निर्णयञ्चैव ज्ञानं प्रत्येकमेव च । दान्यूधेन समं तस्य स्तुतिं कुर्युर्यथैव ते ॥१०८॥
पर्वताः पक्षिणश्चैव तथा प्रह्वीकृता हि ते । सूत्रधारास्समस्यास्य वयं ह्येवास्म खल्वथ ॥१०९॥
[८०]शिक्षितस्स तथाऽस्माभिस्सन्नाहस्य हि निर्मितौ । त्रायेदाक्रमणाद् येन त्वामसौ तु भविष्यतः ॥११०॥
किन्नु कार्त्तज्ञभावं तद् धारयस्यन्तरात्मनि ? । [८१]कृतोऽस्माभिस्तथा वायुश्शिलामानवशंवदः ॥१११॥
योऽवात् तदाज्ञया ह्येव तां भुवं प्रति यां वयम् । व्यधाम सुभगां तावत्; वयं सर्वविदो ननु ॥११२॥
[८२]शातनांश्च बहूनन्यान् (अकुर्म तद्वशंवदान्) । अभूवंस्तस्य हेतोर्ये तावदप्स्वात्मडेपनाः ॥११३॥
कर्माण्यन्यानि चैवाऽपि विविधान्यथ ये व्यधुः । अतिष्ठाम वयं ह्येव तेषां संरक्षकाः पुनः ॥११४॥
[८३]किञ्चायेभः समाक्रन्दत् यदासौ स्वं प्रभुं त्वहो । विपन्नोऽहम्, त्वमेवासि सूत्तमश्च दयावताम् ॥११५॥
[८४]तदाऽऽह्वानं किलाऽश्रौष्म व्यथाऽमुष्याप्यपाकृता । अदद्म तत् कुटुम्बञ्च तस्मै यच्चेतरत् पुनः ॥११६॥
अनुरूपमभूत् तैश्च स्वकोषादनुकम्पया । स्मारकं स्यादिति ध्यात्वा पूजकेभ्योऽप्यदद्म च ॥११७॥
[८५]इन्द्रियेशे ऽस्मयेडे च (दया नो) भाग्यरक्षिते । एते सर्वेऽचला आसन्; [८६]समे चैते प्रवेशिताः ॥११८॥
दयायामात्मनोऽस्माभिरुत्तमानामिमे ध्रुवम् । [८७]जुननूने (दया) किञ्च, यदासावति कोपनः ॥११९॥
अपाऽयात् खल्वजानाच्च वयं तस्य न निग्रहम् । करिष्यामस्तदासौ वै समाक्रन्दत् तमस्सु हि ॥१२०॥
'प्रतीष्टो नेतरो मे तु त्वां विहाय, महोऽस्तु ते । असन्देहमहं ह्येव भवामि पाप्मनां नृणाम्' ॥१२१॥
[८८]अश्रृणम वयमाक्रन्दं तस्य मोक्षममुष्य च । कृच्छ्रादकारयामाऽपि तदित्थं श्रद्धरान् वयम् ॥१२२॥
गोपयामः (सदा) तावत्; [८९]कृपा किच्च जयक्रिये । (अभून्नः) स्वं प्रभुं चैव यदाऽसावाह्वयत् पुनः ॥१२३॥
'प्रभो मे ! मास्म मां त्याक्षीर्निरपत्यं, यथार्थतः । आयतीनां त्वमेवाऽसि सर्वेषां किल सूत्तमः' ॥१२४॥
[९०]अश्रृणम वयमाक्रन्दं तस्य तस्मा अदद्म च । अयोह्यं, समर्थाञ्चाकुर्म तस्मै हि तद् वधूम् ॥१२५॥
अस्पर्द्धेतामुभावेव भद्रकृत्येष्वसंशयम् । अस्तुतामुत्सुकौ चाऽस्मान् भयंमन्यावथापि च ॥१२६॥
विनयं हृदि चाऽऽधायाऽवर्त्तेतां तौ पुरोऽथ नः । [९१]सत्यापन्ना च सा योषित् तस्यां संप्राणितोऽभवत् ॥१२७॥
आत्माऽस्माभिस्ततस्सा च तदपत्यं तथैव च । कृतौ लक्ष्म हि सर्वस्मै आसेतां जगते किल ॥१२८॥
[९२]युष्मदीयो गणोऽस्त्येष ध्रुवमेको ह्यसौ गणः । युष्मदीयः, प्रभुश्चाऽहं, यूयमस्मात् स्तुवीत माम् ॥१२९॥
[९३]परस्परेण लोकस्तु बिभिदे ह्यात्मनः कृतैः । वयमेवोपगन्तव्याः परावृत्य परन्तु तैः ॥१३०॥
[९४]श्रद्धरो योऽनुकूलस्य कर्त्ता चैवाऽपि कर्मणः । उपेक्षां लप्स्यते नाऽस्य प्रयासोऽनेन चेष्टितः ॥१३१॥
लेखायत्तः कृतश्चैव तावदेष भविष्यति । [९५]निषेधाज्ञा तथाऽस्माकं तस्मै तस्मै गणाय तु ॥१३२॥
नाशितोऽस्माभिरासीद् यो नाऽसाऽऽवावर्त्तकोऽभवत् । [९६]यज्जजो मद्यजश्चापि हृतवन्धो भविष्यति ॥१३३॥
यदा चैव, यदा चैव वप्राद् वप्रात् समुन्नतात् । आविस्ते हि भविष्यन्ति; [९७]सत्या सन्धा यदैव च ॥१३४॥
आपतिष्यति नेदोऽथ, श्रद्विहीनास्तु येऽभवन् । तेषां नेत्राणि दैर्घ्येण स्थास्यन्त्युन्मिषितानि वै ॥१३५॥
(ते क्रोक्ष्यन्ति) हता एते वयं स्मो विषयेऽत्र तु । सप्रमादा अतिष्ठाम, पाप्मानो वयमेव च ॥१३६॥
[९८]ध्रुवं यूयं तथा ऽसौ च युष्माभिः पूजितो हि यः । अन्तरेण किलाऽल्लाहं निरयस्येन्धनानि वै ॥१३७॥
युष्माकं भविता तत्राऽवतारो ध्रुवमेव च । [९९]अभविष्यन्नमी देवा यदि तत्र न ते क्वचित् ॥१३८॥
अगमिष्यन् सदैवैते तत्र वत्स्यन्त्यसंशयम् । [१००]कृच्छ्रमेव पुनस्तत्र तेषामंशो हि वर्त्तते ॥१३९॥
तत्र श्रोतुं न शक्ष्यन्ति तथा कर्णगतं च ते । [१०१]दया येषां जनानान्तु कृते ऽस्मत् प्रसृता पुनः ॥१४०॥
ते ततः स्थापयिष्यन्ते विप्रकृष्टे स्थले किल । [१०२]रवं स्तोकमथाप्यस्य ते न श्रोष्यन्ति सर्वथा ॥१४१॥
काम्यैः परिवृता द्रव्यैस्तत्र वत्स्यन्ति तेऽनिशम् । [१०३]महती यातना चैतान् न खलूद्वेजयिष्यति ॥१४२॥
स्वागतं व्याहरिष्यन्ति देवा एतानुपेत्य च । 'इदं तद् वै दिनं त्वास्ते प्रतिज्ञातमभूद् हि यत् ॥१४३॥
[१०४]दिनं तद् वयमाकाशान् करिष्यामो हि पिण्डितान् । यदैव, लेखको यद् वद् दीर्घं लेखं करोति ह ॥१४४॥
यद् वत् कृतस्समारम्भस्सर्गस्य प्रथमस्य तु । पुनरावर्त्तनन्तावद् विधास्यामो ह्यमुष्य तत् ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

प्रतिज्ञेयं किलाऽस्माभिः पूरणीयैव वर्त्तते । कर्त्तव्यं हीदमस्माभिस्संशयो नाऽत्र कश्चन ॥१४६॥
[105]अनुस्मारकतश्चोर्ध्वं अस्माभिश्शास्त्रमन्तरा । लेखो निवेशितश्चायम् 'भद्रा मे बन्धकाः किल ॥१४७॥
आयतित्वं गमिष्यन्ति धरित्र्याः खलु सर्वशः । [106]अत्र नैवाऽस्ति सन्देहः, सन्देशो ननु तिष्ठते ॥१४८॥
हृद्ग्राही तु पुनस्तेभ्यो भक्तिमन्तो हि ये जनाः । [107]दयामूर्त्तिविधाय त्वं प्रेषितोऽस्माभिरेव च ॥१४९॥
सकलायापि लोकाय; [108]ब्रूहि मे प्रेरणैव तु । अन्तरे वर्त्तते जाता यत् प्रभुस्ते हि केवलः ॥१५०॥
वर्त्तते प्रभुरेको वै, तत् किं यूयं भविष्यथ । आत्मनामर्पकास्तावत्; [109]पराङ्मुखास्तु ते यदि ॥१५१॥
भवेयु र्ब्रूहि तानेतत् 'यूयं स्पष्टं मया किल । सूचिताः, न पुनर्जाने स दूरे वाऽथवाऽन्तिके ॥१५२॥
प्रतिज्ञातः पुरस्ताद् वः पूर्वतो यो हि वर्त्तते । [110]निश्चितं विवृतं तूक्तं स वै जानाति, यत्तथा ॥१५३॥
युष्माभिस्संवृतं किंचित् स वै तच्चापि वेत्त्यलम् । [111]को नु जानाति युष्मभ्यं परीक्षैवेयमस्ति चेत् ॥१५४॥
नियतावधिकः किं च जीवानन्दस्तथैव च । [112]अवादीत् 'मे प्रभो ! त्वं वै सत्येन निर्णयं कुरु ॥१५५॥
प्रभुर्नस्सदयो यस्मात् साह्यं तावत् प्रयाच्यते । विरोद्धुं तद्धि युष्माभिस्तस्मिन्नारोप्यते हि यत् ॥१५६॥

योगः—१५६

CC-0. In Public Domain. Digitized by eGangotri

२२

सूक्तम्—तीर्थयात्रा

(अलहज्ज)

(महाकालेऽवतीर्णा अष्टसप्ततिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]स्वप्रभोर्वै जना यूयं भय धारयताऽऽत्मनि । तस्य कालस्य भूकम्पो भीषणस्स हि वर्त्तते ॥ १ ॥
[2]द्रक्षस्येनं यदा च त्वं धात्री माता तदैव तु । स्तनन्धये निजे तावत् प्रमत्ता हि भविष्यति ॥ २ ॥
गर्भपातस्सगर्भाणां किञ्च तावद् भविष्यति । मत्तस्येव जनस्सर्वस्तदा दृष्टो भविष्यति ॥ ३ ॥
वस्तुतो न हि मत्तोऽपि; यातनैवाऽति कर्कशा । प्रत्युतैषु तु लोकेषु ह्यल्लाहस्याऽऽपतिष्यति ॥ ४ ॥
[3]तादृशोऽप्यस्ति लोकेषु योऽज्ञानात् सततं किल । अल्लाहविषये तावत् सविवादो हि तिष्ठति ॥ ५ ॥
दुर्दान्तं शातनञ्चैवानुयाति सततं तथा । [4]तस्मै दिष्टमिदञ्चापि जनयिष्यति तेन यः ॥ ६ ॥
मित्रताम् अध्वनो भ्रष्टं तं स सत्यं करिष्यति । अमुं नेष्यति चाध्वानं नारकाग्निशिखामयम् ॥ ७ ॥
[5]पुनरुज्जीवने लोकाः ! सन्देहो नो भवेद् यदि । (ज्ञायतां) भाविता यूयं मृदो वीर्यादनन्तरम् ॥ ८ ॥
उल्वात् पश्चात् ततश्चैव मांसपिण्डेन तेन च । निरूपेण सरूपेण चापि, युष्मत्कृते यथा ॥ ९ ॥
कृतं स्याद् विशदं ह्येतत्, यद् वयं कामयामहे । निश्चितं समयं यावत् स्थिरं कुर्मो वयं हि तत् ॥१०॥
गर्भाशयेषु, तत्पश्चात् शिशुरूपान् वयं खलु । जनयामः पुनर्युष्मान् (विदध्मः पालनञ्च वः) ॥११॥
पुनः येन युवावस्थामुपेता भवतेह तु । अकाले चापि ग्रस्यन्ते केचिन्नीयन्त एव च ॥१२॥
अवगीतमथायुस्तद् यत्र ज्ञानोत्तरं पुनः । जायते ह्येव नो ज्ञानं, यूयं भूमिञ्च पश्यथ ॥१३॥
वर्त्तते सा विना सस्यं, वर्षयामः परं यदा । जलं तत्र वयं नूत्ना सैषा सद्यो विजायते ॥१४॥
उद्भूता सा पुनर्भूत्वा सूते शोभाकरं समम् । [6]इदञ्चास्माद् यतोऽल्लाहो ह्येव सत्यं स एव च ॥१५॥
मृतोज्जीवक एवाऽपि सर्वसामर्थ्यभृत्तथा । [7]क्षणश्चासाविदं किञ्चोपेयिवानेव वर्त्तते ॥१६॥
संशयो नाऽत्र चाऽल्लाहस्तान् सर्वानुद्धरिष्यति । कवरेषु शयाना ये; [8]लोकानामस्ति तादृशः ॥१७॥
यो विवादपरोऽस्त्यत्राल्लाहस्य विषये विना । मार्गसन्दर्शनं, किञ्च विना ज्ञानं तथैव च ॥१८॥
स प्रकाशं विना शास्त्रं चाऽपि; [9]यो गर्वकारणात् । पृष्ठसन्दर्शनस्तावत् पथभ्रंशाय चेष्टते ॥१९॥
अल्लाहस्याऽध्वनः, तस्मै लोकेऽस्त्येव विमानना । वयं प्रत्याययिष्यामः पुनरुत्थापनाऽह्नि ॥२०॥
स्वादं तं यातनायास्तु दहनाज्जायते हि या । [10](वक्ष्यते) ऽयं पुरस्कारस्तस्य यत् प्रेषितं पुरा ॥२१॥
उभाभ्यामपि पाणिभ्यां युष्माकं; न कदाचन । जाल्मोऽल्लाहो भवत्यत्र बन्धकेषु निजेषु तु ॥२२॥
[11]तादृशश्चाऽपि लोकेषु वर्त्तते कोऽपि मानवः । ताटस्थ्यं गतवान् यो हि किलाऽल्लाहं तु वन्दते ॥२३॥
लाभचुञ्चुः प्रसन्नोऽसौ जायते, ऽथ विषीदति । हानिचुञ्चुरसौ मर्त्यः तस्य नष्टं तथोभयम् ॥२४॥
परश्चाऽयं च वै लोकः, हानिरेषैव केवला । [12]असावाह्वयते ऽल्लाहं विहायान्यं हि तं न यः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

नाऽपि लाभं न वा हानिं तस्य कर्त्तुं भवेत् क्षमः । अध्वनोऽदर्शनस्येत्थं पराकाष्ठा ध्रुवं मता ॥२६॥
[१३]स तेनाऽऽकार्यते यस्य हानिर्नेदीयसी भवेत् । लाभात्तस्य, ध्रुवं नीचः स वै मित्रं च रक्षकः ॥२७॥
सहायोऽतीव दुष्टोऽसौ; [१४]अल्लाहो निश्चितं हि तान् । श्रद्धरान् अनुकूलानि कर्माणि कुर्वतस्तथा ॥२८॥
वेशयिष्यति तादृक्षूद्यानेषु यदधो नदाः । प्रवहन्तो भविष्यन्ति सन्देहो नाऽत्र विद्यते ॥२९॥
तत्करः स किलाऽल्लाहो यत् स कामयते ननु । [१५]मन्यते यो यदल्लाहो. लोकयोरुभयोरपि ॥३०॥
नो करिष्यति साहाय्यं कदाचित् किञ्चनाऽपि मे । लम्बयेद् रज्जुकां तावदसौ छद्यामियात्तथा ॥३१॥
पाशयन्नात्मनो मृत्युं, ततः पश्येत्तथात्मना । तस्योपायोऽपहर्तुं चेत् क्रोधोद्वेगौ यदर्हति ॥३२॥
[१६]वतारोऽस्य कृतोऽस्माभिरित्थं स्पष्टा ऽऽयताकृतिः । यं स कामयतेऽल्लाहः तं स दर्शयतेऽयनम् ॥३३॥
[१७]अतिष्ठन् श्रद्धरा ये तु याहुदाहाश्च ये जनाः । ईशंमन्याः सहायाश्च, मञ्जूषा येऽथवा पुनः ॥३४॥
प्रतिमापूजका लोकाः किञ्च सर्वेष्वमीषु हि । कर्त्ता निर्णयमल्लाहः पुनरुत्थापनाऽहनि ॥३५॥
प्रत्यक्षमीक्षतेऽल्लाहस्सर्वमप्यत्र निश्चितम् । [१८]किन्न दृष्टं त्वयाऽल्लाहं ह्येव तावन्नमन्त्यमी ॥३६॥
येऽपि तिष्ठन्ति नाकेषु धरित्र्यां वाऽपि सन्ति ये । सूर्याचन्द्रमसौ ताराः पर्वताश्चाऽप्यनोकहाः ॥३७॥
मृगाश्चैव मनुष्याश्च प्रभूता, अथ चेतरे । तादृशाश्चापि येष्वास्ते यातना सुप्रमाणिता ॥३८॥
यं तिरस्कुरुतेऽल्लाहस्तं न चार्चितुमस्त्यलम् । कोऽपि, वष्टि यदल्लाहो ध्रुवं तत्कुरुते हि सः ॥३९॥
[१९](श्रद्धराः श्रद्विहीनाश्च) ह्युभौ वादपराविमौ । अधिकृत्य प्रभुं स्वञ्च विवादो वर्त्ततेऽनयोः ॥४०॥
श्रद्विहीनास्तु ये लोकास्तेभ्यो वाह्नेयमत्र वै । परिधानं स्थितं कृत्तं उद्बलत् सलिलं तथा ॥४१॥
येन शीर्षाभिषेको वै कृतश्चैषां भविष्यति । [२०]यत् स्थितं जठरे तेषां तेन तद् विगलिष्यति ॥४२॥
त्वचश्चैव पुनस्तेषां विगलिष्यन्ति चाऽमुना । [२१]लोहभारकृता एभ्यो भविष्यन्ति गदा अपि ॥४३॥
[२२]दुःखहेतोर्यदा चास्मात्ते वशिष्यन्ति सारणम् । करिष्यन्ते परावृत्तास्तमेव (वाचयाऽमुया) ॥४४॥
"यातनायाः प्रदाहस्य समानन्दोऽनुभूयताम्" । [२३]श्रद्धराननुकूलानि कर्माणि कुर्वतः प्रभुः ॥४५॥
वेशयिष्यति तादृक्षूद्यानेषु यदधो नदाः । प्रवहन्तो भविष्यन्ति ध्रुवं नैवाऽत्र संशयः ॥४६॥
सौवर्णैः वलयैस्तत्र मुक्ताभिश्चैव सत्कृताः । भविष्यन्त्यथ किञ्चैते कौशेयपरिधानकाः ॥४७॥
[२४]भद्रां वाचं प्रणीतास्ते, यः प्रशंसां तथाऽर्हति । दर्शितस्तस्य चाऽप्यध्वा तेभ्यः; [२५]नैवाऽत्र संशयः ॥४८॥
श्रद्विहीनास्तु ये लोका अल्लाहमार्गवारणाः । वारणाश्चापि पूजायाः स्थानात्तस्मात् प्रतिष्ठितात् ॥४९॥
तदन्तर्वासिशीलो वा बाह्यात् किम्वाऽप्युपागतः । योऽपि वक्राऽयनाद् यायी सात्याचारो भविष्यति ॥५०॥
स्वादमास्वादयिष्यामः खरकृच्छ्रस्य तं वयम् । [२६](स्मर्यतां) भवनस्यास्य धाम यस्मिन् दिने वयम् ॥५१॥
अब्रह्मस्योपयोगायाकुर्म (सत्येन) निश्चितम् । (प्रेरयन्तः) न मन्यस्व मया तुल्यन्तु कञ्चन ॥५२॥
धाम मे शोधनाच्चैव पालय त्वं सदा पुनः । नृभ्यः परिक्रमद्भयोऽथ स्थितेभ्योऽर्चितुमेव च ॥५३॥
नमद्भ्यः प्रणिपाताय तत्परेभ्यस्तथैव च । [२७]घोष्यतां तीर्थयात्रा च मानवेषूपयान्तु यत् ॥५४॥
पद्भिस्तेऽथ महांगेषु कृशांगेषु तथैव च । याश्च द्रोणीभुवो यत्र ताभ्यश्चैवोपयन्तु ते ॥५५॥
[२८]यथा पश्यन्तु ते लाभांस्तेभ्यस्तावत् सुरक्षितान् । निश्चितेषु तथाऽहस्सु चतुष्पत्सु च तेन वै ॥५६॥
तेभ्यो दत्तेषु गृह्णीयुर्नामाऽल्लाहस्य खल्वथ । स्वयमत्त ततस्तस्मात् मन्दभाग्यांस्तथा जनान् ॥५७॥
भोजयत दरिद्रांश्च; [२९]मलं स्वं नाशयन्तु च । स्वीकृतं मनसा यच्च पिपुरत्वथ तच्च ते ॥५८॥
क्रमन्तु परितश्चैनद् धाम तावत् पुरातनम् । [३०]अयन्तावत् (समादेशः); यो ह्यल्लाहमतानि तु ॥५९॥
पावनान्यादृणात्यत्र तदेतत् प्रशुभाय वै । कल्पिष्यते किलाऽमुष्य धाम्नि तस्य प्रभोर्ननु ॥६०॥
वैधाश्चतुष्पदस्तावद् युष्मभ्यं तान् विहाय तु । ये प्रदिष्टाः पुरस्ताद् वः; मूर्तीनां तन्मलान्निजान् ॥६१॥
रक्षत, या च मिथ्यावाक् ततोऽपि रक्षतात्मनः । [३१]अल्लाहस्यैव तद् भूत्वा, प्रतिम्नो न तथाऽस्य च ॥६२॥
सम्भाव्य; मानवो यस्तु प्रतिम्नो घटयेदिह । अल्लाहस्य, स मन्तव्यो यथा स्यात् पतितोऽम्बरात् ॥६३॥
आपतत्य गरुत्मद्भिर्नीतो वा स्यात्, स वात्यया । विप्रकृष्टं क्वचित् स्थाने क्षिप्तो नीत्वाऽथवा भवेत् ॥६४॥
[३२]अन्यतावत् (समादेशः), यश्चाल्लाहस्य लक्ष्मणाम् । कुर्यान्मानं तदेतच्च हृत्प्रामाण्यप्रकाशनम् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

[33]तत्र लाभाश्च युष्मभ्यं निश्चितावधये स्थिताः । प्रणेयास्ते भवन्त्येव परस्तात् प्रत्नधामनि ।।६६।।
[34]गणशो बलिभेदस्य कृतवन्तो विधिं वयम् । यथा तेभ्यः प्रदत्तेषु चतुष्पत्सु किलाऽमुना ।।६७।।
अल्लाहनामगृह्णीयुस्ते वैः; पूज्योऽस्ति केवलः । एक एव स युष्माकं प्रभुः, तेनात्मनो हि तम् ।।६८।।
अर्पितान् (पूर्णभावेन) कुरुष्वेह, तथैव च । विनयानतलोकेभ्यः शुभं सन्देशमाहर ।।६९।।
[35]हृत्कम्पो जायते येषां यदाऽल्लाहो हि कीर्त्यते । ये सन्तोषधराश्चैव विपत्याप्यभिषेणिताः ।।७०।।
पूजां प्रतिष्ठितां ये च पुनः कुर्वन्ति, ये तथा । दत्तादस्माभिरन्नाद्यात् व्ययीकुर्वन्त्यपीह च ।।७१।।
[36]लक्ष्माऽल्लाहस्य चास्माभिर्महांगा विहिताः किल । निविष्टं तेषु वो भद्रं; पंक्तिबद्धान् विधाय तान् ।।७२।।
नामाल्लाहस्य गृह्णीत तद् यूयं तेष्वथो यदा । पार्श्वं भूम्या स्पृशेदेषां यूयं तानत्त, भिक्षुकान् ।।७३।।
याचमानान् जनांश्चैव यूयमादयताऽपि च । नियुक्ता आसते हीत्थं युष्मान् संसेवितुं हि ते ।।७४।।
प्रकाशयेत कार्तज्ञं यूयं येन कदाचन । [37]मांसं नाल्लाहमेत्येषां न वा रक्तमुपैति तु ।।७५।।
तं परं धर्मनिष्ठा व, स्तदित्थं समयोजयत् । स वै तान् युष्मदर्थेऽत्र कार्येषूदगायतैव यत् ।।७६।।
यूयं तं तावदल्लाहं, स वै युष्मानदर्शयत् । यतो मार्गमृजुं सर्वान्, शुभं ब्रूत तथोत्तमान् ।।७७।।
[38]श्रद्धरान् नून् किलाऽल्लाहस्त्रायते नात्र संशयः । नाऽल्लाहाय कृतघ्नस्तु रुच्यो विश्वासघातकः ।।७८।।
[39]अनुज्ञाता हि ते सन्ति युध्यन्ते ये तु मानवाः । अभूवन् गमिता यत्ते ह्यत्याचारान्न संशयः ।।७९।।
साह्यसामर्थ्यसम्पन्नोऽल्लाहस्तेभ्यस्तु वर्त्तते । [40]अन्यायेन हि ते लोकास्तद् गृहेभ्योऽतिवाहिताः ।।८०।।
एतस्मात् कारणादेव यतस्ते हीदमब्रुवन् । "प्रभुर्नः केवलोऽल्लाहो" ऽवारिष्यत् प्रभुर्न चेत् ।।८१।।
अन्योऽन्यस्मात् जनान् सत्यमाश्रमा गिरिजागृहाः । मज्जिता भक्तिधामानि यत्राल्लाहो विकीर्त्यते ।।८२।।
भूमिसादकरिष्यन्त; संशयो नाऽत्र कश्चन । अल्लाहस्तत्सहायोऽस्ति यः किलास्य सहायकृत् ।।८३।।
प्रभुत्वात् शालतेऽल्लाहो बलवांश्चाऽप्यसंशयम् । [41]लोकास्ते यदि चास्माभिस्साधिकाराः कृता भुवि ।।८४।।
भवेयुस्तत् प्रयच्छन्तु दानं पूजां तथैव च । कुर्युः प्रतिष्ठितां किञ्च भद्रायैवादिशन्त्वथ ।।८५।।
वारयन्त्वंहसश्चैव; परिणामोऽत्र तिष्ठति । यस्य कस्य समस्याऽपि ह्यध्यल्लाहं सुनिश्चितम् ।।८६।।
[42]त्वां न्यषेधन्नमी चेत् ते नहुषस्यापि बान्धवाः । प्राक् ततोऽथ गणा आदाः सामूदाश्चापि (वाग्घरान्) ।।८७।।
न्यषेधन्नेव; [43]लूतस्याब्रह्मस्य ज्ञातयोऽपि च । [44]ज्ञातयो मदयानस्य किञ्च, मूषस्तथैव च ।।८८।।
निषिद्धोऽभून्, मया तावत् श्रद्विहीना जनाः किल । कृता उपेक्षिताः पश्चान्निग्रहं गमिता अपि ।।८९।।
कीदृशी तदतिष्ठन्मे गर्हा तद्विषये पुनः । [45]अनेके पुनरस्माभिर्वासाश्चापि विनाशिताः ।।९०।।
सदोषास्ते यदा ह्यासन् स्थितास्तेऽप्यथ संप्रति । भग्नावशेषकल्पा हि कूपका बहवस्तथा ।।९१।।
जाता हीनोपयोगाश्च प्रासादाः सुदृढ़ाः पुनः । अनेके किञ्च; [46]किन्नैभिश्चेष्टितं भुवि वर्त्तते ? ।।९२।।
किन्नु संधारयन्त्येते हृन्दि संवेदनाय वै ? । श्रवान् श्रोतुमथो किम्वा; नाक्षिणी ये हि गच्छतः ।।९३।।
अन्धतां, तथ्यमेतत्तु तदेतद् हृदयं हि यत् । अन्धतां याति वत्सस्थम्; [47]शीघ्रायन्त इमे पुनः ।।९४।।
त्वत्पुरो यातनाभ्यस्तु; नाल्लाहश्च कदाचन । स्वां प्रतिज्ञां विरुध्याऽत्र प्रतीपं ह्याचरिष्यति ।।९५।।
अल्लाहस्य त्वदीयस्य दिनमेकं भवेत् समम् । सहस्रेण दिनानान्तु युष्माकं संख्यया किल ।।९६।।
[48]अनेके दोषिणो वासा अतिष्ठन् इह यद्यपि । दत्तस्तेभ्यस्ततोऽप्याऽऽस्त ह्यस्माभिस्समयावधिः ।।९७।।
ततस्ते निग्रहं नीताः; मय्येवान्ते निवर्त्तनम् । [49]ब्रूहि-लोकाः ! भवाम्येष वैशद्येन प्रचेतकः ।।९८।।
सर्वेभ्योऽपि हि युष्मभ्यम्; [50]ये जनास्तत आसत । श्रद्धराः अनुकूलानां कर्त्तारः कर्मणां तथा ।।९९।।
वृत्तिस्सम्मानिता तेभ्यः क्षमा तेभ्यश्च वर्त्तते । [51]चेष्टमाना अतिष्ठन् ये विरोधायैव सर्वदा ।।१००।।
अस्माकमायतानान्तु ज्वालाऽऽवासा मता हि ते । [52]वाग्घरा अथवा देवा प्रेषितास्त्वत् पुरा हि ये ।।१०१।।
अस्माभिश्शातनस्तेषां सत्येऽसत्यममिश्रयत् । शातनो मिश्रयत्यत्र परं यत् तत् प्रभुस्स्वयम् ।।१०२।।
नाशयत्येव तत्पश्चादल्लाहो द्रढयत्यलम् । आयातान्स्वान्, सुधीः किञ्च विज्ञोऽल्लाहो हि वर्त्तते ।।१०३।।
[53]येन यन्मिश्रयत्यत्र शातनस्तत् करोतु वै । परीक्षाकारणं तावत्तेभ्यो येषां रुजा हृदि ।।१०४।।
हृदयानि कठोराणि येषां किञ्च, न संशयः । विरुन्धन्तो गता जाल्माः विप्रकर्षमतीव हि ।।१०५।।

CC-0. In Public Domain. Digitized by eGangotri

[54]तेऽथ चैवापि बुध्येरन् येभ्यो ज्ञानमदीयत । यदेतत् सत्यमास्ते वै प्रभोस्ते पर्श्वतः किल ॥१०६॥
श्रद्दधत्वत्र तेऽथापि स्युस्तथा हृदयानताः । तत्समक्षञ्च तेऽल्लाहो वर्त्तते नात्र संशयः ॥१०७॥
मार्गसन्दर्शकस्तेषां श्रद्दधाना हि ये जनाः । [55]श्रद्विहीना जनास्तावत् संदिहाना हि सर्वदा ॥१०८॥
स्थास्यन्त्यतर्कितश्चाऽपि कालस्तेष्वथ चाऽपतेत् । आपतेद् यातना किम्वा दुष्टस्याह्नोऽपि तेषु च ॥१०९॥
[56]सर्वेणत्वं दिने तस्मिन् अल्लाहस्य भविष्यति । निर्णेष्यति स तन्मध्ये माध्यस्थ्यं संविधारयन् ॥११०॥
अभूवन् श्रद्धरा ये तु ह्यनुकूलकृतस्तथा । आरामेषु हि वत्स्यन्ति किञ्च सौख्यकरेषु ते ॥१११॥
[57]यातना सावमाना च तेभ्यस्तावद् भविष्यति । आयातान्नो निषेधन्ति श्रद्विहीनाश्च ये स्थिताः ॥११२॥
[58]त्यक्तवासा जना ये तु किलाल्ललाहायने ऽथ च । मृता वा मारिताः किम्वा, वृत्ति तेभ्यो हि सूत्तमाम् ॥११३॥
अल्लाहो दास्यते ऽवश्यमल्लाहो नाऽत्र संशयः । प्रदातोत्तमवृत्तेर्वै; [59]वेशयिष्यति खल्वमून् ॥११४॥
असौ तत्र भविष्यन्ति यत्र ते मुदिताः किल । क्षमाशीलश्च विज्ञश्चाल्लाहोऽसौ वर्त्तते ध्रुवम् ॥११५॥
[60]तदित्थम्; यः पुनर्मर्त्यः प्रतीकारं करोत्विह । परेषामानुरूप्येण व्यवहारस्य; योऽथ च ॥११६॥
एकवारं पुनस्तिष्ठेत् कृताभिसन्धिरेव च । साह्यं तस्य ध्रुवं कर्त्ता ऽल्लाहो ऽल्लाहो न संशयः ॥११७॥
सौम्योऽतीव क्षमाशीलः सुमहांश्चैव वर्त्तते । [61]इदं तस्माद् यतोऽल्लाहो निशामह्न्यथ खल्वहः ॥११८॥
निशायां वेशयन्नास्ते, यतश्चासौ किल प्रभुः । द्रष्टाऽपि वर्त्तते किञ्च श्रोता चैवाऽपि वर्त्तते ॥११९॥
[62]इदञ्चास्माद् यदल्लाहो ह्येव सत्यं तु विद्यते । तमृते यं स्तुवन्त्येते तत्पुनर्विद्यतेऽनृतम् ॥१२०॥
[63]किन्न यूयं विलोकध्वे व्योम्नोऽल्लाहो हि जीवनम् । नीचैर्नयत्यतस्तेन धरित्री सस्यश्यामला ॥१२१॥
जायते ? सूक्ष्मदर्शी च सावधानस्तथैव सः । [64]धरित्र्यां वर्त्तते यद्वै वर्त्तते यद् वियत्सु च ॥१२२॥
तस्यैव तत्समं चापि, न सन्देहोऽत्र कश्चन । अनपेक्षः किलाल्लाहः प्रशंसाऽर्हस्तथैव च ॥१२३॥
[65]लोकितं किन्न युष्माभिः यद् धरित्र्यां हि किञ्चन । अल्लाहेन नियुक्तं तत् सेवनाय तु वोऽखिलम् ॥१२४॥
नियुक्ता नौस्तथा चैव प्लवते सलिले हि या । तदादेशानुरोधेन वियत्तेन च धारितम् ॥१२५॥
धरित्र्यां मा पतेद् येन, कथाऽन्याऽसौ दिशेद् यदि । दयावान् ध्रुवमल्लाहो नरेषु सकृपोऽथ च ॥१२६॥
[66]स एव जीवनं योऽदाद् युष्मभ्यं तदनन्तरम् । मृत्युं ददाति युष्मभ्यं ततो दास्यति जीवनम् ॥१२७॥
कृतघ्नोऽस्ति ध्रुवं मर्त्यः; [67]निश्चितो गणशः पुनः । पूजाया विधिरस्माभिरनुयन्ति हि तेऽथ यम् ॥१२८॥
तेन तद् विषये त्वस्मिन् विवदन्तां त्वया समम् । त्वं समाह्वय तांस्तावत् स्वप्रभोरयनं प्रति ॥१२९॥
श्रितोऽसि सत्यमध्वानं सन्देहो नाऽत्र कश्चन । [68]विवदन्तां त्वया ते चेद् ब्रूहि "अल्लाहः प्रवेत्ति तत् ॥१३०॥
चेष्टध्वे यत् पुनर्यूयम्; [69]पुनरुत्थापनाऽहनि । निर्णयं तस्य कर्त्ताऽस्ति ह्यल्लाहो भेदधीर्हि वः ॥१३१॥
स्थिताऽभूद् विषये यस्मिन्; [70]वित्थ यूयं न किंन्विदम् । धरित्र्यां वर्त्तते यद् वै वर्त्तते गगने च यत् ॥१३२॥
तदल्लाहो विजानाति पुस्तकेंऽकितमस्ति च । तदेतद् ध्रुवम्, एतच्चाऽल्लाहाय सुकरं पुनः ॥१३३॥
[71]अल्लाहमन्तरेणामी तं हि तावदुपासते । यदर्थे प्रेषितं तेन प्रमाणं नैव किञ्चन ॥१३४॥
नाऽपि ते विषये तस्य किञ्चिज्ज्ञानं हि बिभ्रति । सहायो नैव जाल्मानां वर्त्ततेऽत्र तु कश्चन ॥१३५॥
[72]प्रत्यक्षमस्मदायाता भवन्ति तत्पुरो यदा । श्राविताश्च तदा त्वं वै तेषां वक्त्रेषु पश्यसि ॥१३६॥
अप्रसादं, यथा तूर्णमापतिष्यन्ति तेष्वमी । श्रावयन्त्यस्मदायातान् ये वै, ब्रूहि "वदानि किम् ॥१३७॥
ततोऽप्युग्रतरं किंचित्" असावग्निः ! हि ये जनाः । श्रद्विहीनाः किलाऽल्लाहस्तं तेभ्यः प्रत्यपादयत् ॥१३८॥
स वासोऽतीव निकृष्टो वर्त्तते पुनरेव च । [73]मनुष्याः ! श्रृणुताऽथाऽत्र दृष्टान्तमवधाय तु ॥१३९॥
अल्लाहादतिरिक्तान् यान् यूयमाह्वयथेह तु । न ते शक्ता अपि स्रष्टुं समवेत्याऽपि मक्षिकाम् ॥१४०॥
तेषां किञ्चिद् हरेत् किम्वा मक्षिका न हि तच्च ते । प्रत्यावर्त्तयितुं शक्ताः, हीनौ तावदुभावपि ॥१४१॥
यस्तु काम्यो भवत्यत्र यश्च कामयिता पुनः । [74]अल्लाहस्य तु यो मानः सत्येनाऽस्ति प्रतिष्ठितः ॥१४२॥
विदन्ति तन्न, तेऽल्लाहो बली चाऽथ महाप्रभुः । [75]अल्लाहोऽवचिनोत्यत्र वाग्धरान् मानुषेष्वपि ॥१४३॥
तथा दिव्येषु चैवाऽपि, श्रोता द्रष्टाऽप्यसौ ध्रुवम् । [76]पुरस्ताद् यदमीषान्तु यच्चामीषां परोक्षगम् ॥१४४॥
स वै जानाति तत् सर्वं प्रत्यावर्त्यस्तथैव च । अल्लाहस्त्वेव सर्वेण; [77]श्रद्दधाना हि मानवाः ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

नमत प्रणिपातञ्चाऽ (ल्लाहस्याग्रे) विधत्त भोः । स्तुवीध्वं स्वं प्रभुं चैव, भद्राणि कुरुताऽथ च ।।१४६।।
साफल्यं येन वै यूयं प्रयायात कदाचन । "युध्यध्वञ्च मनोहत्याल्लाह (मार्गे) प्रमाणितम् ।।१४७।।
चितवान् स पुनर्युष्मान्, नानौ दार्यञ्च किञ्चन । मतेऽस्मिन् अथ चास्माभिर्युष्मभ्यं सन्निवेशितम् ।।१४८।।
अब्रह्मस्य पितुर्वंश्च यस्तु पन्थाः (स वस्तथा) । प्राक् तथेहाप्यसौ नाम युष्माकं तावदक्रुत ।।१४९।।
"आत्मार्पकाः" इतीदं वै, वाग्घरः साक्षितां व्रजेत् । येन युष्मासु, यूयञ्च स्यात लोकेषु साक्षिणः ।।१५०।।
नमो वाचं ततो यूयं कुरुतेह प्रतिष्ठिताम् । दत्त दानं प्रभुं किञ्चावलम्बध्वमतिस्थिरम् ।।१५१।।
युष्मासु स्वामिताऽस्यैव, मित्रं संरक्षकोऽप्यसौ । अबर्ण्यो रक्षकोऽसौ वै तथा चैव सहायकः ।।१५२।।

इति सप्तदशं पारायणम्

योगः—१५२

CC-0. In Public Domain. Digitized by eGangotri

२३

सूक्तम्–श्रद्धराः (मन्मनसः)

(अल–मोमिनून)

(महाकालेऽवतीर्णा अष्टादशोत्तरमेकशतमायाताः)

साल्लाहुनामजापं योऽल्लाहो दयी हितैष्यपि

अथाऽष्टादशं पारायणम

[१]श्रद्धरा अत्र साफल्यमायन् एतत्सुनिश्चितम् । [२]विनम्रा आत्मनीनासु प्रार्थनासु च ये जनाः ।। १ ।।
[३]पराङ् तिष्ठन्ति वादेभ्यो ये निरर्थेभ्य एव च । [४]प्रदातारस्तथाऽर्थिभ्यो ये च दानस्य मानवाः ।। २ ।।
[५]धारयन्तीन्द्रियाणां ये गुह्यानां संयमं तथा, । [६]निजाः पत्नीर्विहायाऽथ बन्धक्यस्तद् वशंगताः ।। ३ ।।
निन्दनीया न तावद् या भवन्ति; [७]ये परन्त्विह । कामयन्ते किमप्यन्यत् इतोऽप्यूर्ध्वं, तदीदृशाः ।। ४ ।।
ह्येव सीमामतिवृत्य चेष्टना मनुजा मताः । [८]प्रतिज्ञाः पालयन्ति स्वाः, निक्षेपान् स्वांस्तथैव च ।। ५ ।।
येऽथ रक्षन्ति; [९]ये किं च स्वनमस्याऽभिरक्षकाः । [१०]त एवैते जनास्तावन्मता आयतयः किल ।। ६ ।।
[११]साधिकारा भविष्यन्ति स्वर्गस्योत्तरतश्च ते । तत्र वत्स्यन्ति ते शश्वत्; [१२]असृजाम मृदो वयम् ।। ७ ।।
तत्वेन मानुषं सत्यम्; [१३]न्यधाम तदनन्तरम् । गुप्तधामनि चैकस्मिन् बिन्दुरूपेण सम्भृतम् ।। ८ ।।
[१४]बिन्दुनोल्वं कृतं पश्चादुल्वं मांसञ्च पिण्डितम् । ततोऽस्थीनि हि सृष्टानि तेषु मांसञ्च रोपितम् ।। ९ ।।
ततः सृष्ट्यन्तरं कृत्वा तत्समं प्रतिबोधितम् । सौभाग्यस्यालयोऽल्लाहः सर्गकृच्चैवमुत्तमः ।।१०।।
[१५]ध्रुवो मृत्युर्हि युष्माकमितश्चोर्ध्वं तु विद्यते । [१६]पुनर्जीवनमेवाऽपि पुनरुत्थापनाऽह्नि ।।११।।
निश्चितं ह्येव वस्तावत्; [१७]युष्मदूर्ध्वं तथैव च । सप्तमार्गाः किलाऽस्माभिः कृताः, नैव वयं तथा ।।१२।।
सृष्टिकार्ये प्रमादेन सम्प्रवर्त्तामहे क्वचित् । [१८]समं मानेन चाऽऽकाशाद् अस्माभिः सलिलं तथा ।।१३।।
अवतारितमुर्व्याञ्च तत्पुनर्विनिवेशितम् । तस्य लोपस्य सामर्थ्यं चापि दध्मो वयं किल ।।१४।।
[१९]ताभिरद्भिश्च युष्मभ्यं खर्जूरांगूरसम्भृताः । आरामा (बहवः) सृष्टाः युष्मभ्यं सन्ति तत्र च ।।१५।।
स्वादिष्ठानि प्रभूतानि फलान्यत्थ यतः पुनः । [२०]असौ किञ्च तरुर्योऽद्रेः (सु) षेणादुपजायते ।।१६।।
तैलसभ्भृतमुद्याति जिघत्सूनां रुचीन्धनः । [२१]निश्चयेनाऽथ युष्मभ्यं चतुष्पत्स्वस्ति शिक्षणम् ।।१७।।
तेषां तुन्देषु यच्चाऽऽस्ते पाययामस्ततो वयम् । पेयं किञ्चित् पुनर्युष्मान् प्रभूताश्चोपयोगिताः ।।१८।।
युष्मभ्यं तेषु वर्त्तन्ते, यूयमश्नीथ चैव तान् । [२२]तेषु, किञ्चैव नौकासु वाह्यध्वे पुनरेव च ।।१९।।
[२३]नहुषं प्रैषयामाऽथ वयं तद् बांधवान् प्रति । सोऽवदद्-ज्ञातयो मे भोः! स्तुताऽल्लाहं, न चेतरः ।।२०।।
तं विना वः प्रतीष्टः, किं न मन्यध्वे पुनर्भयम् ? । [२४]ज्ञातिमुख्या अथैतस्मिन् गतश्रद्धा अमुष्य हि ।।२१।।
प्राहुः "पुमानयं तावद् युष्मादृक्षो हि तिष्ठति । अस्य काम्या बरीयस्त्वं यातुं युष्मासु वर्त्तते ।।२२।।
ऐषिष्यत् क्वचिदल्लाहस्तदा दिव्यानसौ किल । प्रैषयिष्यत्, न पूर्व्येषु श्रुतपूर्वोऽयमस्ति च ।।२३।।
[२५]केवलो मानवो ह्येष ततोऽन्यन्न च किञ्चन । चला धीर्यस्य सोऽयं तत् कञ्चित् कालं समीक्ष्यताम् ।।२४।।

CC-0. In Public Domain. Digitized by eGangotri

[२६]सोऽब्रवीत्-मे प्रभो! न्वेते निषेधन्ति हि मां जनाः । हेतुनाऽनेन तावत्त्वं सहायो भव (मे प्रभो !) ॥२५॥
[२७]ततोऽसौ प्रेरितोऽस्माभिरभूत् यत् पश्यतां हि नः । प्रेरणां नोऽनुयायाऽथ नौकामेकां कुरुष्व हि ॥२६॥
समादेशो यदाऽस्माकं भवेत् किञ्च यदैव सा । उद्वमेत् सलिलं तूरवा सर्वेषां प्राणिनामपि ॥२७॥
युग्यमेकैकमादाय निवेश्यं सलिलान्तरे । गृह्यका आत्मनीनाश्च, तं विहाय तु केवलम् ॥२८॥
निषिद्धो यः कृतो वाचा प्रागेव, ये च दोषिणः । तानभिप्रेत्य नो वादं मया सार्धं समाचर ॥२९॥
संशयो न मनाक् ते वै जले मंक्ष्यन्ति सर्वथा । [२८]समारूढः युनर्नावि यदा त्वञ्च भवेस्तदा ॥३०॥
सहायैः सममेवाऽपि वाचमेनामुदीरय । रक्षिता येन जालमेभ्यो वयं जाता हि सोऽर्हति ॥३१॥
प्रशंसां तावदल्लाहः"; [२९]पुनर्ब्रूहि तथैव च । प्रभो मे ! ह्यवतारं मे तत्र तावत् कुरुष्व (भोः!) ॥३२॥
स्थलं यत् सुभगं, त्वं वै सूत्तमश्चावतारकः । [३०]प्रमाणानि बहून्यत्र ध्रुवं तिष्ठन्त्यथापि च ॥३३॥
वयं परीक्षकत्वेन तिष्ठामः पुनरेव च । [३१]समुन्नीतो गणश्चान्योऽस्माभिरूर्ध्वं ततोऽभवत् ॥३४॥
[३२]वाग्घरस्तत्सनाभिश्च प्रेषितस्तेष्वभूत्तथा । वाचया ह्यनया यूयमल्लाहं स्तुत, विद्यते ॥३५॥
अन्तरेण प्रतीष्टो नो युष्माकं कोऽपि चेतरः । बिभीथ किन्न तद् यूयं ? [३३]ज्ञातिमुख्याश्च तस्य ये ॥३६॥
श्रद्धिहीना अभूवन् ये न्यषेधन् संगमेव च । परस्याऽप्यथ लोकस्य, वितीर्णं सुखमेव च ॥३७॥
लौकिके जीवने येभ्योऽस्माभिस्ते तावदब्रुवन् । "ध्रुवं पुमानयं तावद् युष्मादृक्षो हि तिष्ठति ॥३८॥
यद्यद् यूयं किलाऽश्नीथ तत्तदेवाऽयमप्यथ । पानं यद्यच्च युष्माकं तत्तदेवाऽस्य चापि ह ॥३९॥
[३४]युष्मादृक्षस्य मर्त्यस्य यदि यूयं विधिव्रताः । भविष्यथ ततो नूनं हानिमेव गमिष्यथ ॥४०॥
[३५]किन्त्वयं प्रतिजानाति मृत्वा यूयं यदा पुनः । अस्थिमृद्रूपतां याताः (कबरेभ्य) स्ततो नु किम् ॥४१॥
भविष्यथोद्धृताश्चापि ?; [३६]दूरं दूरमतीव तत् । यत् प्रतिज्ञायते तावद् युष्माकं पुरतः खलु ॥४२॥
[३७]जीवनं त्विदमेवाऽस्ति यदेतल्लौकिकं मतम् । मृतिश्चैव जनिश्चैव किलाऽस्माकं, वयं च नो ॥४३॥
उद्बोधं गमयिष्यामः पुनश्चैव कदाचन । [३८]अयं वै तादृशो मर्त्यो योऽल्लाहविषये ध्रुवम् ॥४४॥
असत्यं (सततं) सूते, नाऽयं मान्यो भवेच्च नः । [३९]सोऽब्रवीत्—"मे प्रभो! न्वेते निषेधन्ति हि मां जनाः ॥४५॥
हेतुनाऽनेन तावत्त्वं सहायो भव मे (प्रभो !)" । [४०]सोऽब्रवीत्—"विप्रतीसारं गमिष्यन्त्यचिराद्धि ते" ॥४६॥
[४१]पर्याव्रियन्त ते लोका एकेनाकस्मिकेन वै । चीत्कारेण वयं तांश्च तथा लोकानकृष्महि ॥४७॥
संकरानिव; जालमेभ्यो दवीयस्त्वं हि विद्यते । [४२]समुन्नीतो गणश्चाऽन्योऽस्माभिरूर्ध्वं ततोऽभवत् ॥४८॥
[४३]निश्चितात् स्वाऽवधेः पश्चात्पुरस्तात्कोऽपि वा गणः । स्थातुं नैवाऽपि शक्नोति; [४४]प्रैषयाम वयं ततः ॥४९॥
वाग्घरान्त्सततं स्वीयान्, गणस्यैव च वाग्घरः । यदा तं ह्यैत् तदा (लोकाः) न्यषेधंस्तं हि वाग्घरम् ॥५०॥
सानुक्रमांस्ततस्तान् वै (विनाशाय) व्यधाम च । कथामात्राऽवशेषांश्चाकृष्महि तान् वयं जनान् ॥५१॥
श्रद्विहीनजनेभ्यस्तु दवीयस्त्वं हि विद्यते । [४५]प्रैषयाम वयं मूषं ततस्तस्य च सोदरम् ॥५२॥
हारदूनं निजैश्चिह्नैः प्रमाणैश्च स्फुटैः समम् । [४६]समया प्रिययौनं हि तस्य मुख्यांस्तथैव च ॥५३॥
सावमानाः परन्तेषु ते त्वतिष्ठन् पुनस्तथा । तेऽभवन् दुर्विनीताश्च; [४७]तेऽब्रुवन् "किन्नु वै वयम् ॥५४॥
भवेम श्रद्दधाना हि तावदस्मादृशोर्द्वयोः । अनयोर्मर्त्ययोः यद् वै दासा एषां सनाभयः ॥५५॥
तिष्ठन्त्यद्यापि पार्श्वे नः, [४८]तदित्थं ते न्यषेधयन् । तावुभौ, नश्यतां तेऽपि तथैके चाऽभवंस्ततः ॥५६॥
[४९]अयच्छाम च मूषाय वयं शास्त्रं यथैव ते । कदाचित् प्राप्नुयुर्मार्गम्; [५०]लक्ष्माकुर्म वयन्तथा ॥५७॥
मर्यमां तदपत्यञ्च, भुवोभागे ऽथ चोच्छ्रिते । तावरक्षाम यत्राऽऽसीत् स्रोतो वस्स्थानमेव च ॥५८॥
[५१]वाग्घराः ! पावनान्येव यूयमश्नीत सर्वदा । कर्मसु चाऽनुकूलेषु रमध्वं पुनरेव च ॥५९॥
चेष्टितानि च युष्माकं वेद्म्यहं नाऽत्र संशयः । [५२]गणोऽयं किञ्च युष्माकं ध्रुवमेको हि केवलः ॥६०॥
प्रभुश्चैवाऽस्मि युष्माकं, मदेव तद् बिभीत तु । [५३]स्वकृतैर्गतवान् भेदं परं लोको भवत्ययम् ॥६१॥
गणशस्तत्र जुष्टश्च तत्वज्ञानं यदस्य तु । [५४]उपेक्षस्व तदेतांस्त्वमपेतानवधानतः ॥६२॥
कञ्चित् कालावधि यावत्; [५५]मन्यन्ते किन्नु ते हि यत् । साह्यं द्रव्यैरपत्यैश्च कुर्म एषां तु यद् वयम् ॥६३॥
[५६]तदेषां भद्रतास्वस्ति काऽपि नश् शीघ्रकारिता ? । नहीदं, न हि बुद्धिन्ते धारयन्ति कथञ्चन ॥६४॥

CC-0. In Public Domain. Digitized by eGangotri

[५७]भयाद् बिभ्यति ये लोकाः स्वप्रभोः, नेह संशयः । [५८]श्रद्धराः स्वप्रभोः किञ्चाप्यायातेषु भवन्ति ये ॥६५॥
[५९]प्रतिम्नः स्वप्रभोर्नाऽथ घटयन्ति च ये जनाः । [६०]"परावृत्योपगन्तव्यः प्रभुस्तेषां हि विद्यते" ॥६६॥
इदं यत्वा भृशं हृत्सु कम्पमानेषु येभयात् । अवदानपरास्सन्तो ह्येव सर्वं ददत्यथ ॥६७॥
[६१]ईदृशा ह्येव ते लोका शुभेषु येऽतिसत्वराः । सर्वेषामग्रगाश्चैव प्रतियोगितया पुनः ॥६८॥
[६२]वाहयामो न भारञ्च सामर्थ्यमतिरिच्य तु । कञ्चनापि वयं, किञ्च पार्श्वस्थं वर्त्तते हि नः ॥६९॥
शास्त्रमेकमृतं यद् वै व्याहरत्यथ ते च नो । दोषेण योजयिष्यन्ते मुधैव; [६३]हृदयानि हि ॥७०॥
अमीषां सप्रमादानि तिष्ठन्त्यस्मिन्, तथा क्रियाः । प्रवर्त्तन्ते विरुध्यैनत्, प्रवर्त्तिष्यन्त एव च ॥७१॥
ते तु तेष्वेव कृत्येषु; [६४]तावद् यावत् प्रणिग्रहम् । समं कष्टेन नेष्यामस्तेषां ये भोगभोगिनः ॥७२॥
भवन्त्येषां, ततस्ते च क्रोक्ष्यन्ति विनयाऽऽनताः । [६५](वक्ष्यन्ते) क्रोशनेनाऽलं बन्धनेनाऽञ्जलेस्तथा ॥७३॥
अद्य तावत्, न लप्स्यध्वे साह्यमस्मच्च किञ्चन । [६६]अश्राव्यध्वं यदाऽऽयाता मामकाः सर्व एव हि ॥७४॥
यूयं तदा न्यवर्तध्वं प्रतीपनिहितांघ्रिभिः । [६७]सावमाना स्स्थतास्तस्मिन् "व्यर्थवादपरो ह्ययम्" ॥७५॥
इदं कृत्वा पुनश्चायं विसृष्टोऽप्यभवत् किल । [६८]विषयश्चिन्तनस्येदं कृतं वाक्यं न किं हि तैः ॥७६॥
अपूर्वं वाऽथ तैर्लब्धं, लब्धं तेषां न पूर्वजैः । [६९]वाग्घरेण समं किम्वा तेषां नैवाऽऽस्त संस्तवः ॥७७॥
प्रत्यादिष्टस्ततो ह्येव सोऽभवत्तैर्हि मानवैः ? । [७०]'असावुन्मादपूर्णोऽस्ति' किमेतत्ते वदन्ति वा ? ॥७८॥
नहीदं; सत्यमादाय स वै तानस्त्युपस्थितः । रोचते नाप्यनेकेभ्यस्सत्यमेषां तथैव च ॥७९॥
[७१]अन्वयास्यदमीषाञ्चेत् सत्यं क्षुद्रास्तु कामनाः । व्योम्नामुर्व्यास्तथा तेषामन्तरे यद्धि तिष्ठति ॥८०॥
व्यवस्थामुष्य सर्वस्यागमिष्यत् प्रविकारताम् । नहीदम्, तावदस्माभिरनुस्मारकमस्ति यत् ॥८१॥
तेषां, तद् गमितं तेभ्यः परन्ते तु जनास्ततः । पराङ्भूत्वैव तिष्ठन्ति; [७२]त्वमेतान् किन्तु याचसे ॥८२॥
कञ्चित् शुल्कम् ? प्रदत्तं ते प्रभुणैवास्त्यनुत्तमम् । वृत्तिदानां मतश्चासौ सर्वेषामपि सूत्तमः ॥८३॥
[७३]समाह्वानञ्च ते तेषां वर्त्तते सरलाध्वने । [७४]श्रद्दधाना न ये तावत् परलोके तु वै जनाः ॥८४॥
शंकितास्ते हि तिष्ठन्ति विषयेऽस्याध्वनस्सदा । [७५]दर्शिताऽपि दयाऽस्माभिस्स्यादमीषु तथैव च ॥८५॥
आपदापतिताप्येषां नाशिता स्यात् क्वचिद् यदि । तदप्येते हि रंस्यन्ते धृष्टताऽऽचरणे निजे ॥८६॥
[७६]यातना ऋकचेऽमी वै निगृहीतास्तु यद्यपि । अस्माभिर्न ततोऽप्येते विनयं खल्वदर्शयन् ॥८७॥
समक्षं स्वप्रभोर्नापि प्रार्थयन्त च तं किल । [७७]यस्मिंश्चापि पुनः काले प्रतीहारोऽति कृच्छ्रकृत् ॥८८॥
उद्घाटितस्तदेभ्यः स्यात् स्थास्यन्त्येते गतप्रभाः । [७८]स एव योऽसृजत् कर्णौ चक्षुषी हृत्तथैव च ॥८९॥
युष्मभ्यं, विरलं ह्येव कार्त्तज्ञदर्शनं तु वः । [७९]स एवाऽसारयद् युष्मान् धरायां यः पुनस्तथा ॥९०॥
तस्मिन् एव समे यूयं करिष्यध्वे च संयुताः । [८०]स एव यो जनेर्दाता मृत्योर्दाता तथैव च ॥९१॥
अह्नो रात्रेश्च भेदस्य कर्त्ता चैवाप्यसौ मतः । किन्न यूयं प्रवर्त्तध्वे धिया तावत् ततोऽपि च ? ॥९२॥
[८१]नहीदं तद् वदन्त्येते यदेषां पितरोऽवदन् । [८२]वदन्त्येतेऽ "स्थिमृद्रूपा भविष्यामो मृता यदा ॥९३॥
उद्धृता नु भविष्यामो वयं किं पुनरेव च ?" । [८३]प्रतिज्ञातमिदं पूर्व्यैरस्माभिश्चैव मानुषैः ॥९४॥
समं वै सततं; हन्ताऽऽख्यायिका हि समा इमाः । पूर्वजानान्तु वर्त्तन्ते; [८४]ब्रूत तावद् "इयं धरा ॥९५॥
यदन्तर्वर्तते चास्याः कस्य तज्ज्ञायते यदि ? । [८५]वक्ष्यन्त्यमी-समग्रं तत्त्वल्लाहस्यैव तिष्ठति ॥९६॥
ब्रूत "तेनापि किं यूयं नैव बोधं तु गच्छथ ?" । [८६]ब्रूत "को नु प्रभुस्तेषां सप्तव्योम्नाममुष्य च ॥९७॥
महतस्सिंहपीठस्य प्रभुः कोऽथ च वर्त्तते" ? । [८७]वक्ष्यन्त्यमी-समग्रं तत्त्वल्लाहस्यैव तिष्ठति ॥९८॥
ब्रूत "तेनाऽपि किं यूयं भयं नैवाऽपि गच्छथ" ? । [८८]ब्रूत—कस्य पुनर्हस्ते वर्त्तते लोकशासनम् ? ॥९९॥
शरण्यो यः, शरण्यश्च यत्तुल्यो न जनोऽपरः । ब्रूत जानीथ चेद् यूयम्; [८९]ते वदिष्यन्ति तत्समम् ॥१००॥
अल्लाहायैव, तद् ब्रूत—कुतो युष्मासु जायते । प्रभावो हीन्द्रजालस्य; [९०]न तावत् तान् वयं परम् ॥१०१॥
उपेतास्सत्यमादाय, ध्रुवन्तेऽनृतवादिनः । [९१]कञ्चनाऽप्यकरोत् पुत्रं नाऽल्लाहस्तु स्वकं किल ॥१०२॥
तस्मान्नैवा ऽपरः कोऽपि प्रतीष्टश्चैव विद्यते । अभविष्यत्तथा चेत्तत् योऽपि कोऽपि पुनः प्रभुः ॥१०३॥
सृष्टान्स्स्वान्स्स्वान्नुपादायाऽधारयिष्यद् विभिन्नताम् । प्रभवस्ते तथाऽन्योऽन्यमभ्ययास्यन् स्वसेनया ॥१०४॥

CC-0. In Public Domain. Digitized by eGangotri

अल्लाहस्य महिम्नो हि विरुद्धं सममेव तत् । कीर्त्तयन्ति यद्प्येते तमालम्ब्य; [९२]स वर्त्तते ॥१०५॥
वेदनः संवृतस्याऽपि विवृतस्य तथैव च । उत्तरोऽसौ ततो यांस्ते प्रतिम्नो घटयन्ति हि ।१०६॥
[९३]ब्रूहि तावत् "प्रभो मे ! चेद् दर्शयेस्त्वं तु मामपि । प्रतिज्ञातं त्वयैभिर्यत् तदेव; [९४]तत् प्रभो हि मे ॥१०७॥
मैव कार्षीस्त्वमेतेषु निविष्टं मां कदाचन । [९५]प्रतिज्ञातममीभिश्च किलाऽस्माभिरमुष्य ते ॥१०८॥
दर्शनस्य तु सामर्थ्यं धारयामो ध्रुवं वयम् । [९६]सूत्तमो यो विधिस्तेन किलाऽभद्रं परास्यत ॥१०९॥
यान् गुणान् कीर्त्तयन्त्येते विद्मस्तान् पूर्णतो वयम् । [९७]ब्रूहिचैव—प्रभोमे ! ऽहं शरणन्ते तथाऽर्थये ॥११०॥
शातनेन कृतेभ्यो वै प्रस्तावेभ्यः पुरो मम । [९८]अस्माच्चैव प्रभो मे ! ऽहं शरणन्ते तथाऽर्थये ॥१११॥
ते हि यत् संगताः स्युर्माम्; [९९]तेषां कश्चिद् यदाऽथ च । मृत्युमभ्येति कालेऽसौ तस्मिन्नेव तु वक्ष्यति ॥११२॥
प्रभो मे ! मे परावृत्तिं त्वं कुरुष्व (भवे पुनः) । [१००]येन त्यक्त्वा समायातो (भवं) तस्मिन्नहं पुनः :॥११३॥
चरेयमनुकूलानि तावत् कर्माणि (सर्वशः) । नहीत्थम्; वाद एवाऽयं केवलो यं ब्रवीत्यसौ ॥११४॥
पृष्ठतः प्रतिसीरैका तेषां कीर्णा हि तिष्ठति । यावदभ्येति तत्तावत् पुनरुत्थापनादिनम् ॥११५॥
[१०१]ततश्चैव यदा चैव तूर्यघोषः करिष्यते । बन्धुताऽन्योन्यगा तेषां विनाशं खलु यास्यति ॥११६॥
नाऽनुयोगञ्च तेऽन्योन्यं करिष्यन्ति तथा पुनः । [१०२]ततो यस्य तुलाशिक्यं भारवत्तु भविष्यति ॥११७॥
तादृशा ह्येव साफल्यं गमिष्यन्ति जनाः किल । [१०३]अथो यस्य तुलाशिक्यं लाघवं तु गमिष्यति ॥११८॥
तादृशा ह्येव ये हानिं यास्यन्ति तावदात्मनः । नारकाऽग्नौ सदा ते च वासं यास्यन्ति पूरुषाः ॥११९॥
[१०४]मुखान्येषां तथैवाऽग्निर्धक्ष्यति तेन तत्र ते । वैरूप्यञ्च प्रयास्यन्ति; [१०५](वक्ष्यन्ते ते तथैव च) ॥१२०॥
श्राव्यध्वेस्म मदायाताः किन्न यूयं ? तदा पुनः । सर्वदा खण्डनं तेषां युष्माभिश्च कृतं किल ॥१२१॥
[१०६]ते वदिष्यन्ति दुर्भाग्यमस्मान्-पर्यावृणोद्धि नः । पथो भ्रष्टा वयं लोका अभूम पुनरेव च ॥१२२॥
[१०७]प्रभो नः! उद्धरेतोऽस्मान्—करिष्यामो भृशं यदि । तदित्थं तद् भविष्यामो ध्रुवं जाल्मा वयं जनाः ॥१२३॥
[१०८]स भणिष्यति-धिक्कारं गमिता यत्र तिष्ठथ । तत्रैव कुरुत स्थानं, वादिष्ट मां तथा च मा ॥१२४॥
[१०९]बन्धकानां किलाऽस्माकं तादृशा अभवन्नपि । येऽवदन्-नः प्रभो !जाताः श्रद्दधाना वयं पुनः ॥१२५॥
क्षमस्व त्वं ततो ह्यस्मान्, दयस्वाऽस्मान्स्त्वमेव तु । सूत्तमो वर्त्तसे तेषां दयावन्तो भवन्ति ये ॥१२६॥
[११०]परीहासं परं ते तु युष्माभिर्गमिताः खलु । तेषां द्वेषाद् वयञ्चापि, युष्माभिर्विस्मृताः पुनः ॥१२७॥
परिहासरताश्चैव यूयं नित्यमतिष्ठत । [१११]सन्तोषात् पुनरेतेषामद्य दत्ता पुरस्क्रिया ॥१२८॥
मया तावदियं तेभ्यो यत्ते साफल्यमागमन् । [११२]स वै प्रक्ष्यति वर्षाणि कियन्ति किल संख्यया ॥१२९॥
भूमावत्र स्थिता यूयम्; [११३]वदिष्यन्ति च ते-दिनम् । दिनांशं वाऽपि, युष्माभिः प्रष्टव्या ये हि सांख्यिकाः ॥१३०॥
[११४]स वदिष्यति कालाय स्तोकायैव स्थिता इह । यूयम्, अज्ञास्यतेदं चेत् अभविष्यदिदं वरम् ॥१३१॥
[११५]युष्माभिः किन्विदं तावद् बुद्धमासीद् वृथैव यत् । यूयं सृष्टाः किलाऽस्माभिर्युष्माभिर्न च सर्वथा ॥१३२॥
उपगम्या भवामोऽथ परावृत्य वयं पुनः । [११६]सर्वोच्चैः स किलाऽल्लाहः, सत्योऽसौ शासकस्तथा ॥१३३॥
नान्तरेण प्रतीष्टस्तं कश्चनान्यः, स वै प्रभुः । महिमशालिनस्तस्य सिंहासनस्य वर्त्तते ॥१३४॥
[११७]अल्लाहेन समं यस्तु प्रभुमन्यं समाह्वयेत् । प्रमाणेन विनैवाऽसौ स्वपक्षसिद्धये भवेत् ॥१३५॥
तस्य लेखा प्रभोस्तस्य स्थिता पार्श्वे हि विद्यते । ईदृशाःश्रद्विहीनाश्च सिद्धिं नैष्यन्ति सर्वथा ॥१३६॥
[११८]ब्रूहि तावत् "प्रभो मे ! त्वं क्षमस्व च दयस्व च । सूत्तमो वर्त्तसे त्वञ्च सर्वेषां वै दयावताम् ॥१३७॥

योगः—१३७

CC-0. In Public Domain. Digitized by eGangotri

२४

सूक्तम्—अनूरः (अरुणः)

(अन–नूर)

(मदहीनेऽवतीर्णाः चतुष्षष्टिरायाताः)

साल्लाहृनामजापं योऽल्लाहो दयी हितैष्यपि

[1]सूक्तमेतदिहास्तेऽथ त्वस्माभिः किञ्च काशितम् । अनिवार्यं तथास्माभिरेतत्, कृत्वा प्रतिष्ठितम् ॥ १ ॥
अत्र वै विशदास्तावदायाताश्चावतारिताः । अस्माभिर्येन वै यूयं चेतेतैव कदाचन ॥ २ ॥
[2]व्यभिचारपरो यस्तु या तथा व्यभिचारिणी । कशाघातशतं दण्डं तयोः प्रत्येकमर्हति ॥ ३ ॥
दयाभावोद्भवस्ताभ्यां युष्मान् रुन्ध्यान्न चाऽप्यथ । अल्लाहृस्य विधेस्तावत् पालनाद् वै कदाचन ॥ ४ ॥
अल्लाहे चरमाहे च श्रद्धा युष्माकमस्ति चेत् । श्रद्धराणां गणश्चैकः पश्येद् दण्डक्रियां तदा ॥ ५ ॥
[3]परिणेष्यति नो स्वैरी स्वैरिण्यास्तु पृथक् पराम् । प्रतिमपूजिकां किम्वा विहायाऽन्यां, तथैव च ॥ ६ ॥
परिणेष्यति नाप्यन्यं स्वैरिणं प्रविहाय तु । स्वैरिणी प्रविहायाऽथ किम्वाऽन्यं मूर्त्तिपूजकम् ॥ ७ ॥
श्रद्धरेभ्यः परन्त्वेतद् अवैधं सममेव हि । [4]ये तु शीलवतीष्वत्राऽऽरोपयन्ति हि दुष्कृतम् ॥ ८ ॥
साक्षिणश्चतुरश्चापि नैवोपस्थापयन्त्यथ । कशाऽऽघाताः किलाऽशीतिर्दण्डस्तेभ्यस्तु विद्यते ॥ ९ ॥
साक्षिता न च मन्येत पश्चात् तेषां कदाचन । अवज्ञाकारिणस्ते हि मन्यन्तेऽत्र यथार्थतः ॥१०॥
[5]तान् विहाय जनान् ये वै पश्चात्तापं गताः पुनः । गुणाऽऽपन्नास्तथा जाताः, संशयो नाऽत्र विद्यते ॥११॥
क्षमावान्सदयश्चापि किलाऽल्लाहः स वर्त्तते । [6]स्वैरितां निजपत्नीषु जना आरोपयन्ति ये ॥१२॥
तानन्तरेण साक्षी नो भवेत्तेषां यदाऽपरः । चतुर्वारं तदाऽसौ तु किलाऽल्लाह-प्रमाणतः ॥१३॥
व्याहरेद् वाक्य "मेषोऽहं सत्यमेतद् वदामि हि" । [7]व्याहरेत् पञ्चम वारं चैवाऽ "ल्लाहाद् धिगस्तु माम् ॥१४॥
मृषावादरतस्तावद् भवेयं चेदहं क्वचित्" । [8]दण्डाद्रक्षितुमात्मानं जाया शक्नोति तस्य च ॥१५॥
विधिनाऽनेन सा ब्रूयात् किलाऽल्लाह-प्रमाणतः । चतुर्वारमसन्दिग्ध "मृषावाक् पुरुषो ह्ययम्" ॥१६॥
[9]व्याहरेत् पञ्चमं वारं चैवा "ऽल्लाहाद् धिगस्तु माम् । सत्यवादरतस्तावद् भवेच्चेत् पूरुषस्त्वयम्" ॥१७॥
[10]न प्रसादो ऽभविष्यच्चेत् त्वयि चैव दया प्रभोः । (आपतिष्यस्त्वमापत्तौ) अल्लाहो नाऽत्र संशयः ॥१८॥
दयावान् सुमहान् किञ्च तत्वदर्शी भवत्यसौ । [11]गणो युष्माकमेवाऽसौ कश्चनाऽऽस्ते हि ये जनाः ॥१९॥
कलंकोद्भावकास्तावत्, मन्यध्वं नाशुभञ्च तत् । युष्मभ्यं, शुभमेवैतद् युष्मभ्यं, यः किलार्ऽजितः ॥२०॥
व्यक्तिशस्तत्र तैर्लोकैः पापाद् भागस्तथैव च । तस्य तस्मै पुरस्कारश्चापि तावद् भविष्यति ॥२१॥
यस्य भागः पुनस्तस्माद् भविता सुमहत्तमः । यातना महती तस्मै पुनरेव भविष्यति ॥२२॥
[12]श्रद्धराः पुरुषा यूयं ! श्रद्धराः स्त्रिय एव च । तन्निशम्य तदा किन्नो स्वीयानां भद्रकाम्यया ॥२३॥
अशेषा उक्तवन्तो हि—"स्पष्टमेतन्मृषावचः । [13]साक्षिणो ऽप्यथ चत्वारः कथं तैर्न पुरस्कृताः ॥२४॥
साक्षिणामपुरस्कारात् अल्लाहृदर्शनाद्धि ते । असत्यालम्बिनस्सर्वे; [14]युष्मासु मानवेषु च ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

परत्राऽस्मिंस्तथा लोके नाभविष्यत् क्वचिद् यदि । अल्लाहस्य प्रसादश्च दयाऽमुष्य तथैव च ।।२६।।
युष्मान् पर्यावरिष्यत्तद् यातना महती ध्रुवम् । व्यापृता हि धियो यत्र युष्माभिस्तस्य कारणात् ।।२७।।
[१५]"इदं साधारणं किञ्चित्" युष्माभिस्तन्मतं यदा । आदृतं जिह्वया किञ्च व्याहृतं स्वमुखेन च ।।२८।।
नाभवद् विषये यस्य किञ्चिज्ज्ञानन्तु वः पुनः । दृष्ट्याऽल्लाहस्य तत्त्वासीत् परं घोरं हि यद्यपि ।।२९।।
[१६]अश्रौष्ट तद् यदा यूयं कथन्नेदमवोचत । युज्यते नैतदस्मभ्यं वदेम यत् किलेदृशम् ।।३०।।
महिम्ना शालसे त्वं भोः महद् घोरमिदं बत । कलङ्कं वर्त्तते गाढम्; [१७]अल्लाहश्शास्ति वः पुनः ।।३१।।
"श्रद्धरा अथ चेद् यूयं भवथ मा कदाचन । ईदृशं कार्यजातं वै (विस्मृत्याप्यनुतिष्ठत) ।।३२।।
[१८]अल्लाहस्स निजाऽऽयातान् वैशद्येन हि वः पुरः । वर्णयत्यत्र, सोऽल्लाहो विज्ञाताऽपि सुधीरपि ।।३३।।
[१९]अभीष्टन्तु पुनर्येषां श्रद्धरानधिकृत्य हि । परीवादप्रसारःस्यात्, सत्यं तेभ्यो भविष्यति ।।३४।।
परत्राऽस्मिंस्तथा लोके दुःखदा यातना किल । अल्लाहस्तु विजानाति, यूयं जानीथ नो परम् ।।३५।।
[२०]न प्रसादोऽभविष्यच्चेत् त्वयि चैव दया प्रभोः । (आपतिष्यस्त्वमापत्तौ) अल्लाहो नाऽत्र संशयः ।।३६।।
दयावान् वर्त्तते किञ्च करुणामय एव च । [२१]श्रद्धरा हे जनाः ! यूयं पद्धतिं माऽनुयात भोः ।।३७।।
शातनस्य; ततो ऽप्यत्र शातनस्य हि पद्धतिम् । योऽनुयास्यत्यसौ तं वै दुष्टमेवोपदेक्ष्यति ।।३८।।
अभद्रं किञ्च; नाल्लाही त्वभविष्यद् दया त्वयि । यद्यनुग्रह एवाऽपि युष्माकं नैव कश्चन ।।३९।।
अभविष्यत् शुचिस्तावत् कदाचिच्चापि; यं परम् । अभीष्टं मन्यते ऽल्लाहस्तं करोति स पावनम् ।।४०।।
अल्लाहो वर्त्तते श्रोता ज्ञाता चैवाऽपि वर्त्तते । [२२]युष्माकं ये जनाः श्रेष्ठाः समर्था अपि सन्ति च ।।४१।।
शपथेन वचोबद्धा भवेयुस्ते न केनचित् । यद्वयं न हि दास्यामः स्ववन्धुभ्यस्तथैव च ।।४२।।
सापेक्षेभ्यस्तथा तेभ्यस्त्यक्तावासा भवन्ति ये । अल्लाहाध्वनि; तेभ्यस्तु किलेदं ह्युपपद्यते ।।४३।।
यत् क्षमन्तामुपेक्षन्ताञ्चैव ते तान्; किमिच्छथ । नैव यूयं यदल्लाहो युष्मांस्तावत् क्षमेत (भोः) ।।४४।।
अल्लाहो ऽति क्षमाशीलो दयावांश्चापि वर्त्तते । [२३]श्रद्धरा ये स्त्रियस्सत्या अनपेक्षास्तथैव च ।।४५।।
योजयन्ति मृषा दोषैः धिक्तानत्र परत्र च । यातना महती तांश्च पालयन्ती प्रति स्थिता ।।४६।।
[२४](विस्मरेयुर्न ते) ऽहस्तद् यदा तेषान्तु पाणयः । पादा वाचश्च तत्सर्वं यत्ते ऽकुर्वन् विरुध्य वै ।।४७।।
प्रमाणितं करिष्यन्ति; [२५]दिने तस्मिंस्तथैव च । यथावत् पूर्णरूपेण तेभ्योऽल्लाहः प्रदास्यति ।।४८।।
प्रतीदानं भवत्यत्र युक्तरूपं यदेव तु । स्पष्टं सत्यं किलाल्लाहो ह्येव वेत्स्यन्ति तेऽपि च ।।४९।।
[२६]दुर्गता दुर्गतेभ्यो वै पुंभ्यस्तिष्ठन्ति योषितः । पुमांसो दुर्गताः किञ्च दुर्गताभ्यस्तथैव च ।।५०।।
भद्राः भद्रजनेभ्यस्तु साध्वीभ्यस्साधवोऽथ च । तिष्ठन्त्येत उदासीनास्तस्माद् यत्ते वदन्ति हि ।।५१।।
मानार्हा वृत्तिरस्त्येभ्यः क्षमा किञ्चापि वर्त्तते । [२७]श्रद्धरा हे जनाः ! यूयमितरेषां गृहेषु तु ।।५२।।
अलब्ध्वाऽऽज्ञां प्रवेशस्यानुच्चार्य शं वचस्तथा । कार्ष्टमेव प्रवेशं (भोः !) युक्तमेतन्मतं हि वः ।।५३।।
मन्ये यूयं भवेताऽत्र विषयेऽवहिताः किल । [२८]लभध्वे यदि नैवाऽपि तत्र कञ्चन तत् पुनः ।।५४।।
कार्ष्टमेव प्रवेशं (भोः !) यावदाज्ञोपयातु नो । निवर्त्तध्वं पुनर्यूयं स्यातोक्ताश्चेन्निवर्तितुम् ।।५५।।
अतिपावनमेतद् वो वेत्त्यल्लाहस्तु तत्समम् । यद् यद् यूयं विचेष्टध्वे; [२९]नास्मिन् दोषस्तु विद्यते ।।५६।।
प्रविष्टास्स्यात् चेद् यूयं गृहेषु तादृशेषु वै । यत्र वासो न कस्यापि यत्र भद्रं परन्तु वः ।।५७।।
विवृतं संवृतं चापि वेत्त्यल्लाहोऽखिलं हि वः । [३०]श्रद्धरान् ब्रूहि तिष्ठन्तु ह्यधोदृष्टय एव ते ।।५८।।
गुह्याङ्गानि पुनस्स्वानि रक्षन्तु सततं किल । अतिपावनमेतद् वै तेभ्यस्तावदसंशयम् ।।५९।।
[३१]श्रद्धरा ब्रूहि तिष्ठन्तु ह्यधोदृष्टय एव ताः । गुह्यांगानि पुनस्स्वानि रक्षन्तु सततं किल ।।६०।।
श्रृंगारं स्वं न चैवैता दर्शयेयुर्विहाय तत् । प्रोद्भिन्नं यद् भवेत्तासां, वक्षस्संवृणुयुस्तथा ।।६१।।
यद् यत्ते तु विचेष्टन्ते वेत्त्यल्लाहस्तु तत्समम् । स्वोत्तरीयेण वस्त्रेण श्रृङ्गारं नात्मनस्तथा ।।६२।।
व्यञ्जयन्तु च कस्मिंश्चित् प्रविहाय निजं पतिम् । पितरं स्वं, तथा पत्युः पितरं स्वानथो सुतान् ।।६३।।
पत्युस्सुतान्, निजान् भ्रातॄन्, किम्वा भ्रातृसुतानपि । भागिनेयान् ततश्चैव योषितस्स्वा अथापि च ।।६४।।
बन्धकानात्मनीनांश्च पुंसः सेवापरांस्तथा । बलहीनांश्च, वत्सांश्च बाह्यान् कामस्य कौतुकात् ।।६५।।

CC-0. In Public Domain. Digitized by eGangotri

नाऽथ भूमौ पदेयुस्ताः व्यञ्जयन्तीस्स्वसंवृतम् । लोकेभ्यो निजशृङ्गारं, श्रद्धरा हे जना ! अथ ॥६६॥
समवेत्य समे यूयं निवर्त्तध्वं निजं प्रभुम् । साफल्याधिगमो येन भवेद् युष्मान् कदाचन ॥६७॥
[32]अनुष्ठेयो विवाहश्च तेषां ये वो हि बन्धकाः । एकाकिनोऽथ बन्धक्य एकाकिन्यः परं शुभाः ॥६८॥
दरिद्रा यदि ते ऽल्लाहोऽनुग्रहादात्मनो हि तान् । वर्धयिष्यति रिक्थेन, सर्वैरेवापि साधनैः ॥६९॥
सम्पन्नस्तावदल्लाहः प्रविच्चैवाऽपि वर्त्तते । [33]विवाहावसरो यावन्नाभ्येति यांश्च ते पुनः ॥७०॥
आत्मनः किल रक्षन्तु शुचीन् यावदनुग्रहात् । आत्मनस्तावदल्लाहः कुरुते तान् विमोक्षितान् ॥७१॥
साधिकाराश्च येऽवाऽऽध्वे यदि ते मोक्षहेतुना । पत्राचारं भवन्त्यत्र कर्त्तुकामास्तु तैस्सह ॥७२॥
पत्राचारोऽपि कर्त्तव्यो भन्यते यदि सन्ति ते । भद्रभावसमापूर्णाः, तेभ्यो दानश्च दीयताम् ॥७३॥
तस्माददाद् यदल्लाहो युष्माभ्यं न तथैव च । कर्त्तव्या विवशास्तावद् बन्धक्यस्स्वाः कथञ्चन ॥७४॥
पुंश्चलीत्वाय, यावत्तास्सस्पृहास्साधुजीवने । भौमजीवनलाभाय केवलं तावदात्मनः ॥७५॥
कश्चिन्नेष्यति वैवश्यं यदि ताः नात्र संशयः । वैवश्यादनु सोऽल्लाहः क्षन्ताऽपि दयिताऽपि च ॥७६॥
[34]युष्मदर्थमथाऽस्माभिश्चायाता अवतारिताः । विशदा, अपि दृष्टान्तास्तेषां त्वत् प्राग् हि येऽभवन् ॥७७॥
भयं ये धारयन्त्यत्र तेभ्यश्चैकानुशासनम् । [35]प्रकाशो ध्रुवमल्लाहो व्योम्नामुर्व्यास्तथैव च ॥७८॥
प्रकाशस्य तथामुष्य वर्त्तते च निदर्शनम् । छिद्रकं, यत्र दीपं स्यात् दीपं काचेऽथ च स्थितम् ॥७९॥
काचो यत्र तुलाञ्चैति भास्वता तारकेण वै । सौभाग्यशालिना यश्च जयतन्वा हि शाखिना ॥८०॥
इध्यते, नाऽपि यः पूर्वे पश्चिमे नाऽपि तिष्ठति । अग्निस्पर्शमलब्ध्वाऽपि यत्तैलमिन्धनोन्मनाः ॥८१॥
प्रकाशोऽनु प्रकाशं यत्; यमल्लाहस्तु वाच्छति । स्वप्रकाशायतनं तं वै दर्शयत्यथ वै प्रभुः ॥८२॥
वर्णयत्यत्र दृष्टान्तान् मर्त्येभ्यः; सर्ववित् किल । वर्त्तते तावदल्लाहः; [36]सन्ध्ययोरुभयोरथ ॥८३॥
तेषु वेश्मसु तस्यैव स्तुतिं कुर्वन्ति, यानि वै । समुन्नेतुं किलाल्लाहो दिष्टवान्, नाम चात्मनः ॥८४॥
दिष्टवान् कीर्तिनायाऽथ; [37]पुमांसस्तद्विधा हि यान् । अल्लाहस्मरणाच्चापि प्रतिदानात्तथैव च ॥८५॥
प्रार्थनायां तथा स्थैर्यात् व्यापारो न हि बाधते । पण्याचारोऽथ नैवाऽपि; ये चैवाऽह्नः प्रबिभ्यति ॥८६॥
तस्माद् यदा क्लितैषामक्षीणि हृदयानि च । गमिष्यन्ति विपर्यासम्; [38]येनाऽल्लाहः प्रयच्छतु ॥८७॥
शुभानां कर्मणां तेषां पुरस्कारं शुभं तथा । यच्छेत् पूर्वाधिकं तेभ्यः स्वौदार्य कोषतः पुनः ॥८८॥
यस्मिन्ननुग्रहस्तस्मै त्वमेयवृत्तिदः प्रभुः । [39]श्रद्विहीनजनानाञ्च कर्मणां स्यान्निदर्शनम् ॥८९॥
सैकते हि महीताने स्याद् यथैव मरीचिका । तर्षवान् "सलिलं तद् वै" मत्वा यावदुपैति ताम् ॥९०॥
तत्र नो लभते किञ्चित् अल्लाहं समया परम् । आत्मानं लभते तावत्, तत्कृतस्यानुरूपतः ॥९१॥
फलं यच्छति यश्चैव पूर्णतः, शीघ्रमेव च । अल्लाहः कुरुते लेखाम्; [40]गम्भीरे ऽब्धौ यथैव वा ॥९२॥
अन्धकारवितानस्स्याद् यमावृत्य हि तिष्ठति । भंग एकस्तदूर्ध्वञ्च भवेद् भंगान्तरं पुनः ॥९३॥
धनश्चोर्ध्वं भवेत्तस्य, प्रावारा बहवः पुनः । भवेयुश्चान्धकाराणामुपर्युपरि खल्वमून् ॥९४॥
यच्च निष्कासयेत् पाणिं निजं कोऽपि जनस्तदा । तन्न द्रष्टुं समर्थः स्यात् ज्योतिर्यं गमयेन्न सः ॥९५॥
अल्लाहो न भवेत्तस्मै ज्योतिर्लाभस्तु कश्चन । [41]किन्न दृष्टं त्वया खेषु यद् धरित्र्याञ्च वर्त्तते ॥९६॥
स्तवीत्यल्लाहमेवाऽदः प्रोद्भिन्नगरुतस्तथा । पक्षिणश्चापि सर्वश्च स्वपूजास्तवनप्रवित् ॥९७॥
वेत्ति तत् सर्वमल्लाहश्चेष्टन्ते यत्त्वमी पुनः । [42]व्योम्नां राज्यं धरित्र्याश्च ह्यल्लाहस्यैव केवलम् ॥९८॥
परावृत्योपगन्तव्यस्स एव किल वर्त्तते । [43]किन्न दृष्टं त्वयाऽल्लाहो वाहयत्यत्र वार्दलान् ॥९९॥
तान् युनक्ति पुनस्तेषां प्रावारान् प्रकरोति च । उपर्युपरि तत्पश्चात् द्रक्ष्यसि त्वं तदन्तरात् ॥१००॥
वर्षाः कारयते तावत् करकान् पातयत्यथ । पर्वतेभ्यो हि विद्यन्ते व्योम्नि ये, तदनन्तरम् ॥१०१॥
वर्षाः कारयते यत्र मतिस्तस्योपजायते । जायते न मतिर्यत्र ततस्तान् द्रावयत्यपि ॥१०२॥
वैद्युतास्तस्य भासश्च नेत्रज्योतीहरा अपि । [44]चक्रवद् भ्रामयत्येष किलाऽल्लाहो निशं तथा ॥१०३॥
अहश्चात्र भवेच्छिक्षा द्रष्टृभ्यो नाऽत्र संशयः । [45]जीवनात् सृष्टवान्त्सर्वान् अल्लाहः प्राणिनः किल ॥१०४॥
गतिमन्तः पुनस्तेषां जठरेण तु केचन । द्वाभ्यां गच्छन्ति जंघाभ्यां परे, केचन चापरे ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

जंघाचतुष्टयेनाथ गतिमन्तो भवन्ति च । कामतस्सृजतेऽल्लाहः सर्वसामर्थ्यभृद् ध्रुवम् ॥१०६॥
वर्त्तते तावदल्लाहः [46]विशदा अवतारिताः । आयातास्तावदस्माभिः, वष्ट्यल्लाहोऽथ यं स तम् ॥१०७॥
ऋजुना नयते तावत् पथा; [47]तेऽथ वदन्ति च । श्रद्दधाना भवामो वै वाग्घरेऽल्लाह एव च ॥१०८॥
विधेया अथ तिष्ठामो वयन्तेषां तथैव च । परस्ताच्च पुनस्तेषां गणो ह्येको विजायते ॥१०९॥
पराङास्यो, भवन्तीमे श्रद्धरा न कथञ्चन । [48]मध्यस्थं पुनरेते च यदाऽल्लाहं च वाग्घरम् ॥११०॥
याचन्तेऽथ गणस्तेषामेकस्तान् विरुणद्धि हि । [49]तेषां पक्षेऽभविष्यच्चेत् निर्णयस्ते तदा पुनः ॥१११॥
तदाज्ञावर्तिनो भूत्वा ह्यचेष्टिष्यन्त सर्वथा । [50]किन्नु काचिद्रुजा तेषां हृदिस्था तेऽथवा पुनः ॥११२॥
सन्दिहाना दरो वैषामल्लाहोऽस्य च वाग्घरः । अत्याचारान् क्वचित् तेषु कर्त्ता नेदन्तु सर्वथा ॥११३॥
जाल्मास्त एव वै लोकाः; [51]श्रद्धराणान्तु साम्प्रतम् । इदमेव यदल्लाहं वाग्घरं तस्य चैव ते ॥११४॥
उपयन्ति हि माध्यस्थ्याल् लब्धुं तेषां हि निर्णयम् । ते वदेयुस्तदास्माभिश्श्रुतं चैव मतञ्च तत् ॥११५॥
ईदृशा एव कल्पन्ते साफल्याय तु वै जनाः । [52]आज्ञासु यः पुनस्तिष्ठेदल्लाहस्य तथैव च ॥११६॥
वाग्घरस्यास्य यश्चैव बिभ्येदल्लाहतः पुनः । तिष्ठेत् कर्त्तव्यधीश्चैव तेषु ते हि जनास्तु ये ॥११७॥
कामलाभाय कल्पन्ते; [53]अल्लाहेनैते शपन्ति च । दृढं 'तच्छासनं स्याच्चेत् प्रमाणं ननु ते तदा ॥११८॥
करिष्यन्ति ध्रुवम्, तत्त्वं तानिदं किल बोधय । 'शपनेभ्यो विरन्तव्यमथाज्ञापालनं च वः ॥११९॥
ज्ञातपूर्वम्, ध्रुवं यद् वै यूयमत्रानुतिष्ठथ । अल्लाहो वेत्ति तत् सर्वम्; [54]ब्रूहि—शासनमन्वित ॥१२०॥
अल्लाहस्य तथा चैव वाग्घरस्यापि शासनम् । पराङास्या अथो यूयं यदि स्यात स एव तु ॥१२१॥
भजेतोत्तरदायित्वं तस्य भारस्य यः पुनः । क्षिप्तस्तस्मिन्नथो त्वन्तु भजेरुत्तरदायिताम् ॥१२२॥
तस्य भारस्य यः क्षिप्तस्स्कन्धयोस्ते हि वर्त्तते । लप्स्यसे त्वं किलाऽध्वानं तद् विधिं मन्यसे यदि ॥१२३॥
केवलं वाग्घरस्येदं कर्त्तव्यं वर्त्तते हि यत् । युक्तयुक्तं स (सन्देशं) प्रापयेन् (नेतरत् पुनः) ॥१२४॥
[55]अल्लाहः प्रत्यजानाद्धि श्रद्धरा मानुषेषु ये । भद्रकर्मकृतश्चैव तेभ्यो यत्ते ध्रुवं भुवि ॥१२५॥
शासका अभिषेक्ष्यन्ते प्राग्भुवस्सोऽकरोद् यथा । असौ यच्च मतं तेभ्यस्स्वीकृतं कृतवानथ ॥१२६॥
ध्रुवं तेषां मतञ्चासौ कर्त्ता तावत् प्रतिष्ठितम् । भयादूर्ध्वमसौ तेषां दशायां परिवर्त्तनम् ॥१२७॥
कुर्वन् विधास्यते चाऽमून् निश्चिन्तान् पुनरेव च । पूजयिष्यन्ति ते मां वै, मत्तुलामपरं न च ॥१२८॥
समानेष्यन्ति ते कञ्चित्, श्रद्विहीनास्ततोऽपि चेत् । तेषां तिष्ठन्ति केऽप्यत्र तेऽवज्ञाकारिणो ध्रुवम् ॥१२९॥
[56]पूजां प्रतिष्ठितां यूयं कुरुध्वं दानमप्यथ । दत्त, सन्देशहर्त्तुश्चानुयात शासनं पुनः ॥१३०॥
दया युष्मासु येनाऽथ भवेत् तावत् प्रदर्शिता । [57]रक्षिष्यन्ते परागत्य श्रद्विहीना जना इह ॥१३१॥
आत्मनो मैव मन्यध्वं यूयमित्थं कदाचन । वासो वह्निः किलामीषां धिग्वासो वर्त्तते हि सः ॥१३२॥
[58]श्रद्धरा हे जनाः ! ये वै युष्माकं सन्ति बन्धकाः । अप्राप्तयौवना ये च त्रिकृत्वार्हन्ति ते किल ॥१३३॥
युष्माकं शासनं प्राप्तुं (युष्माकं दर्शनात् पुरा) । उषस्युपासनायाः प्राक् परिधानमपास्य च ॥१३४॥
मध्याह्नेऽनन्तरञ्चैवोपासनायाः पुनर्निशि । इमे तावत् त्रयः काला एकान्तस्थितये हि वः ॥१३५॥
अमीभ्यो व्यतिरिक्तेषु कालेषु न हि किञ्चन । भवेद् दोषकरं तेषां कृते युष्माकमेव च ॥१३६॥
अन्योन्योपगमस्तावत् भवत्येव स्वभावतः । स्वायातान् वर्णयत्येवमल्लाहो हेतुना हि वः ॥१३७॥
अल्लाहो वर्त्तते तावत् तत्वदर्शी सुधीस्तथा । [59]अर्भका ये च युष्माकं जायन्ते प्राप्तयौवनाः ॥१३८॥
यथापूर्वंजनास्तद्वल्लभन्तां तेऽपि शासनम् । युष्माकं दर्शनात् पूर्वं युष्माकं (सुविनिश्चितम्) ॥१३९॥
स्वायातान् वर्णयत्येवमल्लाहो हेतुना हि वः । अल्लाहो वर्त्तते तावत् तत्वदर्शी सुधीस्तथा ॥१४०॥
[60]यौवनं लंघयित्वा या उदास्तास्सन्ति योषितः । निराशा या निजोद्वाहाद् भूत्वाऽऽयुः क्षपयन्ति च ॥१४१॥
न वै दोषकरं ताभ्योऽपास्य वस्त्राणि ता यदि । तिष्ठन्त्यदर्शयन्त्यस्स्वं श्रृंगारं रचनामथ ॥१४२॥
रक्षेयुरात्मनश्चेत् ताः अस्मात् तत् स्यात् ततो वरम् । अल्लाहो वर्त्तते तावत् तत्वदर्शी सुधीस्तथा ॥१४३॥
[61]कल्पते न हि दोषायाऽचक्षुषः श्रोणकस्य च । नाऽपि दोषाय रुग्णस्य न युष्माकं तथैव च ॥१४४॥
भोजनं गृह्यतेऽत्तुं चेत् स्वावासेभ्योऽथवा पुनः । पितृणामात्मनोऽम्वानां भ्रातृणामात्मनोऽथवा ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

आत्मनो भगिनीनां वा पितृव्यानामथात्मनः । स्वसॄणामात्मपितॄणां वासेभ्यः पुनरेव च ॥१४६॥
मातुलानां गृहेभ्यो वा स्वसॄणां मातुरेव वा । अमुष्माद् वेश्मनः किम्वा तिष्ठन्ति यस्य तालिकाः ॥१४७॥
अधिकारे हि युष्माकं मित्रवेश्मभ्य एव वा । नाऽपि दोषोऽस्ति भुक्तं स्यात् समवेत्याथवा पृथक् ॥१४८॥
वेश्मप्रवेशकाले तु किलान्योन्याभिवादनम् । कर्त्तव्यं खलु युष्माभिरल्लाहात् स्वागतं हि तत् ॥१४९॥
सौभाग्यशालिनः किंच तस्मात् श्रेष्ठात् तथैव च । स्वायातान् वर्णयत्येवमल्लाहो हेतुना हि वः ॥१५०॥
प्रवर्त्तध्वं यथा यूयं बुद्धयैवाखिलकर्मसु । [६२]त एव श्रद्धरा लोका अल्लाहे वाग्घरेऽपि च ॥१५१॥
श्रद्धरा ये, ऽथ कार्येषु खलु सामाजिकेषु च । पार्श्वगास्तस्य भूत्वा ते तस्मात् स्थानात् प्रयान्ति नो ॥१५२॥
अनुज्ञा नाऽऽप्नुता यावद् भवेत् तस्याऽथ ये जनाः । अनुज्ञाप्रेप्सवस्तावत् त एव श्रद्धराः किल ॥१५३॥
अल्लाहे वाग्घरे चास्य; ह्यनुज्ञाप्रेप्सवो यदि । भवन्त्येते स्वकार्याणां केषाञ्चिद् हेतुना ततः ॥१५४॥
भवेद् यश्चापि तेऽभीष्टस्तस्मा आज्ञा प्रदीयताम् । प्रार्थनीयः क्षमाहेतोस्तेभ्योऽल्लाहस्तथैव च ॥१५५॥
क्षमाशीलो दयालुश्च किलाल्लाहो ध्रुवं महान् । [६३]वाग्घरस्य समाह्वानमन्योन्याह्वानकक्षताम् ॥१५६॥
नैष्ट मा(श्रद्धराः!);तान् वै वेत्त्यल्लाहो जनान् हि ये । प्रद्रवन्ति शनैर्मध्यात्; सावहेला हि ये जनाः ॥१५७॥
तदादेशानुयानेषु भेत्तव्यं तैरसंशयम् । दण्डादाकस्मिकात् किम्वा यातनाऽऽपातसाध्वसात् ॥१५८॥
[६४]ध्रुवं व्योमसु यच्चोर्व्यामल्लाहस्यैव तत् समम् । वेत्त्यसौ यत्परा यूयं, भविष्यन्ति च बोधिताः ॥१५९॥
अशेषं यदकुर्वंस्ते करिष्यन्ते यदैव ते । तत्समक्षं परावृत्ताः, अल्लाहस्सर्ववित् किल ॥१६०॥

योगः—१६०

CC-0. In Public Domain. Digitized by eGangotri

२५

सूक्तम्—विवेकः

(अल–फुरकान)

(महाकालेऽवतीर्णास्सप्तसप्ततिरायाताः)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[1]महैश्वर्यः किलाऽसौ यो बन्धकेषु निजेषु वै । प्रकाशमकरोत् तावद् विवेकस्य, यथा भवेद् ॥ १ ॥
अयं सर्वस्य लोकस्य चेतकः किल सर्वथा । [2]व्योम्नां चैव धरित्र्याश्च राज्यस्य खलु यः प्रभुः ॥ २ ॥
पुत्ररूपेण नैवाऽसौ स्वीचकार तु कञ्चन । अंशभाक् न च कोऽप्यत्र तस्य राज्ये भवत्यपि ॥ ३ ॥
सृष्टवान् सर्वमेवासौ युक्त्याऽमिमीत चाखिलम् । [3]तं विहायेतरान् पूज्यानमन्यन्त जनाः हि ये ॥ ४ ॥
सृज्यन्ते, न पुनस्तावत् स्रष्टुं शक्तास्तु किंचन । आत्मनोऽपकृतौ नो ते प्रभवन्ति स्वतो न च ॥ ५ ॥
प्रभवन्ति निजे भद्रे न मृत्यौ न च जीवने । प्रभवन्ति न चैवाऽमी किलोत्थाने पुनर्निजे ॥ ६ ॥
[4]श्रद्विहीना जनास्त्वेवं वदन्तीदं तु केवलम् । कल्पनासूतमेवाऽस्ति ह्यनेन घटितं स्वतः ॥ ७ ॥
साह्यमस्मिंस्तथा कार्ये कृतमस्याऽपरैरपि । अत्याचारमसत्यञ्चाभ्युद्यताः कर्त्तुमेतके ॥ ८ ॥
[5]वदन्त्येवं कथाश्चैताः पूर्वजानां हि या अयम् । लेखे न्यवेशयत्, ताश्च सन्ध्ययोरुभयोरयम् ॥ ९ ॥
श्राव्यते किञ्च; [6]वक्तव्यास्ते त्वयाऽसौ प्रवेत्ति यः । व्योम्नामुर्व्या रहस्यानि स एवाकाशयत्त्वमुम् ॥१०॥
क्षमाशीलो दयालुश्च किलासौ नाऽत्र संशयः । [7]वदन्त्येवञ्च ते 'सोऽयं वाग्धरः कीदृशो हि यः ॥११॥
अन्नभुक् पण्यवीथ्याञ्च चंक्रमीति निरन्तरम् । केन देवावतारो नो कृतोऽनेन समं हि यस् ॥१२॥
तिष्ठन्त्सार्धमनेनैव भर्त्सयेत् (प्रविनिन्दकान्) । [8]निधानं केन वा किञ्चित् न चैवाऽस्यावतारितम् ॥१३॥
किम्वाऽऽरामो न वै दत्तः कोऽप्यस्मै येन खल्वयम् । भोजनं साधयेत् तस्मात्, जाल्मा इत्थं वदन्ति च ॥१४॥
'अनुयानपरा यूयं त्वमुष्य किल तिष्ठथ । मायाजालहतवृत्तिर्यो जनो ननु वर्त्तते ॥१५॥
[9]कीदृशान् त्सुविचित्रांश्च दृष्टान्तान् त्वत्कृते च ते । घटयन्ति गता एते विपरीतायनं ततः ॥१६॥
शक्नुवन्ति न ते लब्धुं सन्मार्गन्तु कदाचन । [10]असौ सौभाग्यशाली यः कामतो दातुमर्हति ॥१७॥
अस्मादप्युत्तरं दानं युष्मभ्यं सुबहूनपि । आरामान् पार्श्वतो येषामुपनद्यो वहन्ति वै ॥१८॥
अनेकान्यथ हर्म्याणि चैवासौ दातुमर्हति । [11]नहीदम्, ते तु कालस्य तस्य (खल्वागमिष्यतः) ॥१९॥
निषेद्धारो हि तिष्ठन्ति, निषेद्धारो भवन्ति च । तस्य कालस्य यस्तेभ्योऽस्माभिश्च सज्जितक्रमः ॥२०॥
दहन्नग्निः कृतस्त्वास्ते; [12]यदा द्रक्ष्यत्यसावमून् । पृष्ठतस्ते तदाऽमुष्य कोपोत्थन्तु किलाऽऽरवम् ॥२१॥
श्रोष्यन्ति च चटच्छब्दं; [13]धाम्नि तस्य यदा च ते । संकीर्णे कुत्रचिद् बद्धाः क्षेप्स्यन्ते संगताः पुनः ॥२२॥
आह्वास्यन्ति विनाशं वै; [14](वक्ष्यन्ते तेऽद्य तत्पुनः) । 'आह्वयध्वं विनाशान् वै विनाशं नैकमेव तु ॥२३॥
[15]ब्रूहि 'युक्तमिदं किम्वाऽऽरामोऽसावमृतं हि यः । प्रतिज्ञातोऽभवत् तेभ्यो भयंमन्या हि ये जनाः ॥२४॥
अयं तेभ्यः पुरस्कारो वासश्चैव भविष्यति । [16]वसद्भ्यस्तत्र शश्वच्च तत्तत् सर्वं भविष्यति ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

तेभ्यो यस्मै स्पृहा तेषां, प्रतिज्ञेयं प्रभोश्च वः । पूर्त्तिर्यस्या विनाशांकां भविष्यत्यति निश्चितम् ॥२६॥
[१७]दिने यस्मिन्नसौ किञ्च समवेत्योपनेष्यति । तांश्च तांश्चैव यांस्ते वै विहायाल्लाहमेव तु ॥२७॥
अस्तुवन्, प्रक्ष्यतीत्थं स 'युष्माभिरेव किन्विमे । कृतास्तावत् पथभ्रष्टा आहोस्वित् स्वयमेव ते ॥२८॥
पथभ्रष्टा अजायन्त', [१८]ते वदिष्यन्ति तत्पुनः । 'महिम्नामुच्चयस्त्वं वै, नोपपन्नं कदाचन ॥२९॥
आसीदसमभ्यमेतद् यत् त्वां विहायाऽपरान् वयम् । निजान् गोप्तॄंश्च मित्राणि प्रकुर्याम कदाचन ॥३०॥
परन्तेभ्यश्च तेषाञ्च पूर्वजेभ्यस्त्वया किल । प्रदत्तसुखसंभारो येन ते व्यस्मरन् ननु ॥३१॥
अनुस्मारक, मेते च पतितानां हि केचन' । [१९]तदित्थं त्वद् वचोऽसत्यं तैरेव तु प्रमाणितम् ॥३२॥
व्याक्षेप्तुं यातना नाऽपि शक्यते नाऽथ शक्यते । लब्धुं साह्यं त्वया वाऽपि; जाल्मो; युष्मासु योऽपि च ॥३३॥
स्याद् वयं गमयिष्यामस्तमाभीलरसं घनम् । [२०]प्रेषिता अथ चास्माभिर्वाग्घरा येऽपि केचन ॥३४॥
त्वत् प्राक् तेऽपि न सन्देहस्सर्वे आदन् तथैव च । व्यहरन् पण्यवीथीषु, परीक्षाधाम वै कृताः ॥३५॥
अन्योन्यस्मै ध्रुवं यूयमस्माभिः, किन्तु धार्यते । सन्तोषः खलु युष्माभिः ? प्रभुर्द्रष्टाऽस्ति वोऽनिशम् ॥३६॥

इति अष्टादशं पारायणम्

अथैकान्नविंशं पारायणम्

[२१]उत्सुका ये च नो द्रष्टुं किलाऽस्मांस्ते भणन्ति च । 'केन नो प्रेषिता देवा अधस्तात् पार्श्वतो हि नः ॥३७॥
केन नैव च पश्यामः प्रभुं स्वं हि वयं जनाः । आत्मनात्मानमेते तु महतो ह्यति मन्वते ॥३८॥
मर्यादां समतिक्रम्य साभिमाना भवन्ति च । [२२]दिव्यान् द्रक्ष्यन्ति चैवैते दिने यस्मिन् न वै तदा ॥३९॥
शुभं वृत्तं भवेत् तेभ्यः पाप्मानस्सन्ति ये जनाः । ते वदिष्यन्ति काचित् स्याद् वृत्तिस्तेभ्यो हि रक्षिणी ॥४०॥
[२३]कृतं प्रत्यथ तेषाञ्चाऽऽवर्त्तनं तदनन्तरम् । कर्त्तास्मो हि वयं तच्च कर्त्तास्मः कीर्णपांसुकम् ॥४१॥
[२४]अवस्थातुमवस्थानं भविता पुनरुत्तमम् । तेभ्यो यैरर्जितास्तावत् सुखारामा भवन्ति च ॥४२॥
विश्रामाय च मध्याह्ने भविता स्थानमुत्तमम् । [२५]विभिन्नं व्योम चैवाऽपि घटाभिर्भविता समम् ॥४३॥
दिने तस्मिंश्च दिव्यानामवतारः करिष्यते । [२६]शासनञ्च दिने तस्मिन् वस्तुतोऽथ भविष्यति ॥४४॥
कृपालो, रथसाऽऽयासं तद्दिनञ्च भविष्यति । तेभ्यो जाल्मा हि ये लोकाः, [२७]दिने तस्मिंस्तथैव च ॥४५॥
चर्वन् स्वकौ करौ जाल्मो वक्ष्यतीत्थं क्वचिद् यदि । वाग्घरस्यायनं ह्येवाऽभविष्यत् स्वीकृतं मया ॥४६॥
सूत्तममभविष्यद् वै; [२८]दौर्भाग्यं हन्त ! मे न चेत् । अकरिष्यं हि तं मित्रं सूत्तमं समपत्स्यत ॥४७॥
[२९]असावकृत मां भ्रष्टं किलानुस्मारकात्तदा । यदाऽदस्समनु प्राप्तं ह्येव मामभवत् किल ॥४८॥
कृच्छ्रे आपतिते साह्यं शातनो विजहाति वै । [३०]वाग्घरो वक्ष्यतीत्थञ्च 'प्रभो मे ! ज्ञातयो मम ॥४९॥
कुराणमिदमेवैता हास्यतामनयन् खलु । [३१]अकुर्म वयमित्थञ्च सापराधान्समान् रिपून् ॥५०॥
प्रत्येकं वाग्घरं यावत् प्रभुस्तेऽलञ्च वर्त्तते । दर्शनायाध्वनः किं च साह्यहेतोस्तथैव च ॥५१॥
[३२]श्रद्विहीनाश्च पृच्छन्ति 'कुराणं पूर्वमेव तु । नास्मिन् प्रकाशितं केन ह्येकवारम्' इदं त्वतः ॥५२॥
यथाऽनेन कृतं स्यात्ते हृदयं सुदृढं क्रमात् । अरक्षाम वयञ्चैतत् सुक्रमांकं विधाय वै ॥५३॥
[३३]चित्रया च यदा वाचा भजन्ते त्वां हि ते तदा । युक्तरूपं यदप्यस्ति काशयामो वयं त्वयि ॥५४॥
वर्णयामश्च वैशद्यात् सर्वं सम्यग् वयं त्वयि । [३४]करिष्यन्ते परावृत्ता ये तथा चाभिनारकम् ॥५५॥
अवाङास्यैर्विसर्पन्तस्त एव ये तथाऽर्जनाः । दुष्ठु स्थानस्य, मार्गाच्च येऽपयाता भवन्त्यति ॥५६॥
[३५]अयच्छाम वयं मूषं पुस्तकं, खल्वकुर्म च । सोदरं हारदूनं वै सहायत्वेन तस्य च ॥५७॥
[३६]अवोचाम ततश्चैव 'युवां यातन्तु ताञ्जनान् । न्यषेधन् येऽस्मदायातान्, तांस्ततश्च वयं (ध्रुवम्) ॥५८॥
अनाशयाम नाशोऽसौ पूर्ण एवाऽभवत् तथा । [३७]नाहुषा बान्धवाश्चैव न्यषेधन् वाग्घरान् यदा ॥५९॥
ते वै, तदा निमग्नाश्च कृता अस्माभिरासत । लक्ष्म तेऽप्यथ लोकार्थं कृताः, एका हि यातना ॥६०॥
दुःखदा सज्जिताऽस्माभिस्तेभ्यो जाल्मा जनास्तु ये । [३८]अथाऽऽदा अर्यरासाश्च समुद्गाश्च गणास्तथा ॥६१॥
तेषामन्तभुँवश्चैव प्रभूता जातयो ऽपि च । [३९]दृष्टान्ता बहवोऽस्माभिर्वर्णिताश्चेतनाय वै ॥६२॥
यस्य कस्यापि सर्वस्य, तेषां सर्वस्तथैव च । गमितोऽन्त्यं पुनर्नाशम् [४०]अतिक्रम्य गता इमे ॥६३॥

CC-0. In Public Domain. Digitized by eGangotri

भवेयुर्वासतेयं तद् यत्र वृष्टिः कृताऽभवत् । नाशना, किन्न तद् दृष्टं भवेदेभिः कदाचन ? ॥६४॥
नहीत्थम्, परमेते तु पुनरुत्थापनाक्रमे । नैव साशा हि तिष्ठन्ति; [४१]पश्यन्ति त्वां यदा च ते ॥६५॥
परिहासपरा ह्येव भवन्ति (कथयन्ति च) । अयमेव किमल्लाहोऽसौ यं कृत्वा तु वाग्घरम् ॥६६॥
प्रैषयत् ?; [४२]ध्रुवमेषोऽस्मान् गताऽऽस्थानकरिष्यत । आत्मनीनेषु देवेषु, पथभ्रष्टान् विधाय वै ॥६७॥
धृताऽऽस्था नाभविष्याम वयं चेत् तेषु साग्रहम् । शीघ्रमेते हि भोत्स्यन्ते यातनाऽऽलोकनात्तु कः ॥६८॥
मार्गभ्रष्टो बभूवाऽत्र किलास्माकमतीव हि । [४३]किन्नु दृष्टस्त्वयाऽसौ यः काममेवाकरोन्निजम् ॥६९॥
देवतामात्मनीनां वै ? रक्षकत्वेन किन्नु तन् । मन्यसे त्वं प्रभुस्तस्मिन् शक्नोषि भवितुं क्वचित् ॥७०॥
[४४]मन्यसे किं यदेतेषां सबोधास्सश्रवा अपि । अनेके हि भवन्त्यत्र ? चतुष्पद्भिस्समा इमे ॥७१॥
भवन्ति केवलं तावत्; नहीदम्, तेऽतिरिच्य वै । तानपि वर्त्मनो भ्रष्टास्तिष्ठन्त्यत्र (न संशयः) ॥७२॥
[४५]किन्न दृष्टस्त्वया तावत् प्रभुस्स्वः किरतीह यः । छायां विचित्ररूपेण, यद्यैषिष्यदसौ तदा ॥७३॥
स्थिरां नामकरिष्यद्धि, कर्णिकं तदनन्तरम् । तस्यास्सूर्यमकुर्माऽपि वयं किं च (मयूखिनम्) ॥७४॥
[४६]ततश्छायां वय ताञ्च शनैर्गत्या प्रकुर्महे । पिण्डितानात्मनः पार्श्वे; [४७]स एव यश्च निर्ममे ॥७५॥
युष्मदर्थे निशं तावत् प्रावारं, शयनं पुनः । विश्रामं, वासरञ्चैव पुनरुत्थानमेव च ॥७६॥
[४८]स एव स्वदयां यश्च पुरस्कृत्य समीरणम् । शुभोदन्तवहत्वेन प्रेषयत्यथ वै वयम् ॥७७॥
प्रेषयामस्तथाऽवस्तात् व्योम्नो वार्यति पावनम् । [४९]सजीवा येन निर्जीवा कृता भूस्स्यादथापि च ॥७८॥
सृष्टांश्चतुष्पदो नॄंश्च स्वान् वयं पाययेम तत् । [५०]वयं तद विविधाकारं कुर्मस्तावदुपस्थितम् ॥७९॥
तत्समक्षं यथा ते वै चेतन्तु परमत्र तु । साधिका जनसंख्यैवाऽमान्यं सर्वं हि मन्यते ॥८०॥
विहाय खलु कार्त्तघ्नम्; [५१]ऐषिष्याम क्वचिद् यदि । चेतकं वयमेकैकं वसतिं वसतिं प्रति ॥८१॥
समुदभावयिष्याम; [५२]तन्न यूयं कदाचन । श्रद्धत्थ श्रद्विहीनानां वाक्येषु, तैरथाऽपि च ॥८२॥
युध्यध्वं पुनरेतेन घोरं यूयन्तु योधनम् । [५३]स एव द्वावकूपारौ मिश्रितौ यस्तथा व्यधात् ॥८३॥
मधुरस्स्वादुरेकोऽन्यः क्षारश्चाऽथ कटुः पुनः । तयोर्मध्ये विभेदार्थं निरोधाऽर्थं तथैव च ॥८४॥
व्यवधानं विधायैकं रोधनं कृतवानसौ । [५४]स एवोद्भावयामास जनमेकं जलेन यः ॥८५॥
कुल्यं विवाहसम्बन्धात् धर्मसम्बन्धिभिर्युतम् । चकार यञ्च तत्पश्चात्; समर्थोऽति प्रभुस्तु ते ॥८६॥
[५५]विहायाल्लाहमेतं च पूजयन्ति हि तं न यः । लाभायैषां तु कल्पेत कल्पेत हानये न वा ॥८७॥
श्रद्विहीनो भवत्यत्र पृष्ठसंपोषकस्सदा । विरुद्धानां विरोधे वै स्वप्रभोः (सुदयावतः) ॥८८॥
[५६]प्रेषितो भवसि त्वन्तु विधाय किल सूचकः । यच्छुभं तस्य, कृत्वा च लोकसंचेतकः किल ॥८९॥
[५७]ब्रूहि 'नास्य पुरस्कार युष्मत् किंचित्तु कामये । विहायेदन्तु योऽप्यर्थी वर्त्ततेऽत्र हि कश्चन ॥९०॥
स्व प्रभु याति यो मार्गस्तमंगीकुरुताद्धि सः । [५८]तिष्ठताच्च सविश्वासस्त्वं तस्मिन् वर्त्तते तु यः ॥९१॥
सजीवश्चामृतश्चैव प्रशंसां तस्य गायतात् । सममृग्भिः स विज्ञाता किलाऽघानां हि वर्त्तते ॥९२॥
निजानां बन्धकानां वै सुतराम्; [५९]यस्तथाऽसृजत् । षट्त्स्वहस्सु धरित्रीञ्च वियतो यच्च तिष्ठति ॥९३॥
तथा मध्यगत सर्वम्, राज्यसिंहासनं पुनः । विरराज तथा यश्च, दयावान्त्स हि, पृच्छ (भोः) ॥९४॥
तमुद्दिश्य किलाऽऽस्ते यो ज्ञाता तद्विषयेऽधिकम् । [६०]प्रेर्यन्ते पुनरेते च यदा स्तोतुं दयाकरम् ॥९५॥
ते वदन्ति किमेतद् यद् दयावानिति ? किं वयम् । तं स्तुवीमहि यं कञ्चित् प्राभिशंससि नः पुरः ॥९६॥
वैमुख्यं वर्धते तेषामनन सुतरां खलु । [६१]महान्त्सौभाग्यशाल्येष गगने यो विनिर्ममे ॥९७॥
तारकाणां हि सद्मानि तत्र चाऽस्थापयत् पुनः । दीपमेकं बृहत्, किंच भासमानं निशापतिम् ॥९८॥
[६२]स एव चक्रवद्यायि सृष्टवान् यो दिवानिशम् । कृतज्ञत्वार्थिने तस्मै किम्वाऽथो चेतनार्थिने ॥९९॥
[६३]त एव बन्धकास्तस्य दयालोः (सुप्रमाणिताः) । विनयावनता भूमौ ये विहारं प्रकुर्वते ॥१००॥
यदा चाऽज्ञानिनो लोका भाषन्ते तैस्समं तदा । ये वदन्ति 'भवेच्छम्वः'; [६४]निशो ये यापयन्ति च ॥१०१॥
प्रणिपातपरा अग्रे स्वप्रभोरुत्थितास्स्थिताः । [६५]ये वदन्ति प्रभोऽस्माकं ! नारकां किल यातनाम् ॥१०२॥
अपयापय खल्वस्मत्, निश्चितं तस्य यातना । घनं सम्पृच्यते ह्येव; [६६]स चाऽवस्थानरूपतः ॥१०३॥

CC-0. In Public Domain. Digitized by eGangotri

रूपतश्चैव वासस्योभयतो गर्ह्य एव तु । [६७]व्ययं नापव्ययं ये च किल कुर्वन्ति मानवाः ॥१०४॥
संकोचान्न च वर्त्तन्ते, मध्यमार्गं श्रिताश्च ये । एनयोरुभयोर्मध्ये; [६८]नाल्लाहेन समं च ये ॥१०५॥
आह्वयन्तीतरं कञ्चित् प्रतीष्टं, यः कृतस्तथा । अल्लाहेन किलाऽवैधस्तं न शंसन्ति ये पुनः ॥१०६॥
धर्माचारविचारं तु परिहाय, न चाऽथ ये । स्वैरितां कामतो यान्ति; योऽपि कोऽपीत्थमाचरेत् ॥१०७॥
दण्डभाग् भविताऽसौ वै तत्कृतैः किल्विषैः किल । [६९]द्वैगुण्यं यातना तस्य पुनरुत्थापनाऽह्नि ॥१०८॥
यास्यति, तत्र शश्वच्च गर्हितोऽसौ प्रवत्स्यति । [७०]तं विहाय तु योऽल्लाहं ·प्रतियाति, तथैव च ॥१०९॥
श्रद्दधात्यनुकूलानि कर्माणि कुरुतेऽथ च । ईदृशानां हि लोकानामभद्रं भद्ररूपताम् ॥११०॥
नयत्यल्लाहः, एषोऽस्ति क्षमी शश्वद् दयी तथा । [७१]पश्चात्तापं व्रजित्वा यो भद्रेषु रमते स वै ॥१११॥
याथार्थ्येन किलाल्लाहं प्रतियाति; [७२]अथबन्धकाः । तस्य ये पार्श्वदृश्वानोऽनृतस्य न भवन्ति ते ॥११२॥
पार्श्वतो गर्ह्यचेष्टानां यदा चैव प्रयान्ति ते । सज्जनस्येव धैर्येण ततस्तेऽति क्रमन्ति वै ॥११३॥
[७३]ते च ये खलु चेत्यन्ते यदाऽऽयातैस्तु तत्प्रभोः । अन्धायन्ते न वै तेषु बधिरन्ति न तेषु वा ॥११४॥
[७४]ये वदन्ति-प्रभोनस्त्वं चक्षुर्भ्यश्शीतमाहर । पत्नीभिरात्मनीनाभिस्स्वसन्तत्या तथैव च ॥११५॥
नायकांश्च कुरुष्वास्मान् तेषां ये हि भयन्धराः । [७५]इमे ते हि जना ये वै निजस्थैर्यात् पुरस्कृताः ॥११६॥
प्रांशुहर्म्याणि लप्स्यन्ते यत्र तेषां भविष्यति । स्वागतं, यत्र वक्ष्यन्ते ते तथा "शं भवेद्धि वः" ॥११७॥
[७६]तत्र वत्स्यन्ति ते शश्वत्, सूत्तमं धाम तत् किल । अवस्थानकृते किञ्च वासाय पुनरेव च ॥११८॥
[७७]ब्रूह्यसावनपेक्षो मे प्रभुर्यूयं न चेदपि । तं स्तुवीध्वमिदानीं यन् निषिद्धं कृतमेव तत् ॥११९॥
युष्माभिस्तूर्णमेवाऽस्मात् घोरो दण्डो भविष्यति ।

योगः—११९॥

CC-0. In Public Domain. Digitized by eGangotri

२६

सूक्तम्—शुक्राः

(अश–शु–अरा)

(महाकालेऽवतीर्णास्सप्तविंशत्युत्तरद्विशतमायाताः)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[१]ता० सीन० मीम०; [२]सन्तीमे विशदपुस्तकायताः । [३]कदाचिद् ध्यात्मनाऽऽत्मानं त्वं न तावद् विनाशयेः ॥ १ ॥
यस्मादेते न वै लोकाश्श्रद्दधाना भवन्ति हि । [४]कामितं नो भवेच्चेत्तद् लक्ष्म व्योम्नः किमप्यधः ॥ २ ॥
सारयेम वयम्, येन तदग्रे प्रणमन्तु वै । अमीषां कन्धराः; [५]एताननुस्मारकमेति यत् ॥ ३ ॥
नूत्नं चापि कृपाशीलात् भवन्त्येते ततोऽपि च । पराङ्मुखाः; [६]निषिद्धं यत् (सत्यं) एभिस्तु साम्प्रतम् ॥ ४ ॥
शीघ्रमेते गमिष्यन्ति सत्यार्थप्रत्ययं किल । अवहासपरा यस्य खल्वभूवन्निमे सदा ॥ ५ ॥
[७]अपश्यंस्ते धरां किन्नो यस्या उद्भावितं खलु । वानस्पत्यमनन्तं वै पुनरस्माभिः ?; [८]अत्र च ॥ ६ ॥
प्रमाणं निश्चयेनाऽस्ति, नाऽनेके परमत्र तु । भवन्त्येवास्य मन्तारः; [९]प्रभुस्ते ह्येव केवलम् ॥ ७ ॥
दयावान् वर्त्तते किं च प्रभुत्वाच्छालते ध्रुवम् । [१०]मूषं समाह्वयच्चैव प्रभुस्तेऽथ यदा स च ॥ ८ ॥
प्राह तं 'याहि जाल्मांस्त्वम्; [११]प्रिययौनस्य बान्धवान् । किन्न तेषां भयं किञ्चित्?; [१२]स आह मे प्रभो ! मम ॥ ९ ॥
शंकते हि मनो यत्ते मां निषेत्स्यन्ति सर्वथा । [१३]उरस्संकोच एवाऽपि वर्धते मे न वाक् च मे ॥१०॥
जल्पनं कुरुते किंचित्, त्वं समाह्वय तेन (भोः!) । हारदूनं समीपे मे साह्याय मम (सर्वशः) ॥११॥
[१४]सापराधो भवाम्येष किं च तेषामहं ततः । बिभेम्येष कदाचित्ते वधं कुर्युर्न मे क्वचित् ॥१२॥
[१५]सोऽवदत् 'न कदापीत्थम्, युवां यातमुभौ पुनः । लक्ष्मास्माकमुपादाय, पार्श्वगो युवयोरहम् ॥१३॥
श्रोष्यामि सततञ्चैव; [१६]प्रिययौनमुभावथ । युवां यातमिदञ्चैव वदतम् 'जगतो हि यः ॥१४॥
प्रभुस्सर्वस्य तेनावां भवावः प्रेषितौ किल । [१७](उपेतौ विनयार्थञ्चा) पीश्वरालीनसन्ततिम् ॥१५॥
प्रेषय त्वं किलावाभ्यां समम् ? [१८]प्रत्यवदच्च सः । पालितस्त्वं किमासीर्नो निजे धामनि बालवत् ॥१६॥
मध्येऽस्माकमनेकानि वत्सराण्यपयापयः । [१९]कृतवानसि तच्च त्वं कृतवानेव यत् खलु ॥१७॥
कृतघ्नेषु भवस्येष त्वमनन्यसमः पुनः । [२०]सोऽवदत् 'तन्मया तावत्कृतमासीदितः पुरा ॥१८॥
विषण्णस्तेन चाऽद्याऽहं भवामि (सुतरां पुनः) । [२१]यदा युष्मद्भयञ्चाहं प्रपन्नोऽहं पलायितः ॥१९॥
युष्मत् पार्श्वात् प्रभुर्मे च ततो मामदिशत्, स च । वाग्घराणां गणेऽकार्षीन्निविष्टं किल मामपि ॥२०॥
[२२]अयञ्चैवोपकारो यं व्यनक्षि त्वं पुनर्मयि । ईश्वरालीनवंश्या यत् कृता दासास्त्वया किल ॥२१॥
[२३]प्रिययौनोऽवदत् 'किम्वा समेषां जगतामयम् । ईश्वरो वर्त्तते नाम' ?; [२४]ह्यसौ प्रत्यवदत् प्रभुः ॥२२॥
व्योम्नाञ्चैव धरित्र्याश्च तयोर्यन्मध्यगञ्च यत् । तस्य चैवाऽपि ; चेच्छ्रद्धा हृदन्तस्तेऽवतिष्ठते ॥२३॥
[२५]स आह तांस्ततो लोकान् परितस्तमवस्थितान् । 'शृणुथ किन्न वै यूयम्'; [२६]स आह स हि वः प्रभुः ॥२४॥
पूर्वजानां तथा चैव युष्माकमपि च प्रभुः । [२७]स आह 'वाग्घरोऽयं वो युष्माकं मध्य ईरितः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

निश्चितं सर्वथैवाऽऽस्ते सोन्मादो (न हि संशयः) । [२८]स आह 'स प्रभुस्तावत् पूर्वपश्चिमयोर्दिशोः ॥२६॥
यच्च तन्मध्यगं तस्य, प्रवर्त्तध्वे धिया यदि । [२९]स आह 'मां विहायाऽन्यः प्रतीष्टश्चेत् त्वया कृतः ॥२७॥
कारावद्धेषु लोकेषु करिष्ये त्वां निवेशितम् । [३०]स आह 'पुरतस्ते चेद् विशदं वस्तु किंचन ॥२८॥
स्यादुपस्थापितं किन्नु ततोऽपि ?, [३१]स तदाऽवदत् । अस्तु, त्वं सत्यसन्धानां भवस्यन्यतमो यदि ॥२९॥
तत् कुरूपस्थितं तावत्तच्चाऽप्यत्र पुरो मम । [३२]ततोऽसावक्षिपद् यष्टिं निजां (भूमौ) हि याऽभवत् ॥३०॥
चमत्काराय द्रष्टॄणां अजगरोऽहिरेव तु । [३३]ततोऽसावक्षिपद्धस्तं बहिरंकाच्च योऽभवत् ॥३१॥
चमत्काराय द्रष्टॄणां भासमानो मरीचिभिः । [३४]स आह ज्ञातिमुख्यांश्च परितस्तमवस्थितान् ॥३२॥
महानेषोऽस्ति मायावी सिद्धो विज्ञो न संशयः । [३५]स्वदेशाद् वो वहिष्कर्त्तुं मनीषाऽस्य हि वर्त्तते ॥३३॥
मायया स्वीयया, तत् किम् मन्यध्वेऽत्र हि साम्प्रतम् । [३६]तेऽवदंस् 'त्वमिमं तावत् सोदरञ्चाऽस्य रक्षतात् ॥३४॥
प्रतीक्षायां मुहूर्त्ताय, पूष्पु संप्रेषयाऽथ च । संहर्त्तुं न्हि जनान्(शीघ्रम्); [३७]यत्ते मायाविनोऽखिलान् ॥३५॥
अभिज्ञानिह संहृत्य त्वामुपस्थापयन्तु वै । [३८]निश्चितेऽह्नि तथा काले निश्चिते तदनन्तरम् ॥३६॥
समेता अक्रियन्ताऽथ किलाऽशेषा हि मायिनः । [३९]लोकाश्चैवाऽप्यथोच्यन्त 'किन्नु यूयं जना अपि ॥३७॥
यास्यथ गणतां तावत् ?; [४०](तेऽवदन्) जयिनो यदि । भवेयुर्मायिनस्तेषां भवेमाऽनुव्रता वयम् ॥३८॥
[४१]ततो मायाविनस्ते वै प्रिययौनमुपागताः । अवोचन् 'यदि जेष्यामो भविष्यामः पुरस्कृताः ? ॥३९॥
[४२]प्रत्युवाच 'अस्तु, किं चाऽपि यूयं तावद् भविष्यथ । ममान्तरंगलोकानां ह्यन्यतमास्सुनिश्चितम् ॥४०॥
[४३]मूष आह च तान् 'यद् वै क्षेप्तव्यं क्षिप्यतां हि तत् । [४४]रज्जुका यष्टिकाश्चैवाऽक्षिपंस्ते पुनरब्रुवन् ॥४१॥
'प्रिययौनप्रतापेन वयं तावच् छपामहे । विजयो निश्चितस्तावदस्माकं ह्येव वर्त्तते ॥४२॥
[४५]अक्षिपद् यष्टिकां मूष आश्चर्यं चाऽप्यजायत । अमीषां कृत्रिमां मायां (अंजसा) साऽगिरत् किल ॥४३॥
[४६]मायिनो ह्यभवंस्तेन प्रणिपातपरा अधः । [४७]आक्रोशन् 'श्रद्धरा जाता वयं विश्वप्रभौ किल ॥४४॥
[४८]हारदूनस्य मूषस्य यो हि, तस्मिन् ध्रुवं प्रभौ । [४९](प्रिययौनो) ऽवदत् 'यूयं ममादेशात् पुरैव यत् ॥४५॥
श्रद्धरास्तत्र संजाता ध्रुवं स प्रमुखो हि वः । शिक्षिता येन मायायां यूयं शीघ्रं प्रवेत्स्यथ ॥४६॥
अहं वो हस्तयोश्चैव पादयोश्चैव कर्त्तनम् । पार्श्वाभ्यां विपरीताभ्यां कारयिष्यामि किं च वः ॥४७॥
शूलारोपणमप्यूर्ध्वं कारयिष्यामि (मृत्युदम्) । [५०]तेऽवदन् 'नाऽत्र चिन्ता नो, गन्तुमुन्मनसो वयम् ॥४८॥
नाऽत्र कश्चिच्च सन्देहः प्रभुं स्वं ध्रुवमास्थिताः । [५१]आशया चानया पूर्णा वयं वर्त्तामहे स यत् ॥४९॥
क्षंस्यते नो हि पापानि भवामः प्रथमे यतः । श्रद्धराणां वयं ह्येव; [५२]प्रेरितोऽस्माभिरप्यथ ॥५०॥
मूषो निश्येव यायात्स दूरमादाय बन्धकान् । मामकीनान्, ध्रुवं यस्मात् अन्वेतारो हि तं तु ते ॥५१॥
[५३]संहर्त्तुन् प्रिययौनश्च पूष्पु वै प्रैषयत्ततः । [५४](इदं प्रासारयच्चैव) लघुकायमिदं दलम् ॥५२॥
[५५]कोपमुद्भावयन्त्येते तथाऽस्माकम्; [५६]वयं गणे । शक्ता रक्षितुमात्मानम्; [५७]तदित्थं सारिता हि ते ॥५३॥
अस्माभिस्सलिलोद्गेभ्य आरामेभ्यस्तथैव च । [५८]कोशवेश्मभ्य एवाऽपि प्रांशुधामभ्य एव च ॥५४॥
[५९]तदित्थं (तैस्समं जातम्), ईश्वरालीनसन्ततिः । आयतित्वेन तेषाञ्चास्माभिरक्रियतोत्तरम् ॥५५॥
[६०]उपेते चोषसि द्राक् तान् तेऽन्वयुम्समया पुनः । [६१]अपश्यतां यदाऽन्योन्यं गणौ तौ स्वर्धिनौ मिथः ॥५६॥
मूषसार्थास्तमाहुः 'हा ! निग्रहं हि गता वयम् । [६२]स आह 'न कदापीत्थम्, असन्देहं मम प्रभुः ॥५७॥
वर्त्ततेऽसौ मया सार्धम्, स चैव दर्शयिष्यति । पन्थानं माम्; [६३]ततो मूषः प्रेरितोऽस्माभिरप्यथ ॥५८॥
यत् स आहन्त्वकूपारं स्वेन दण्डेन सर्वशः । ततोऽसौ गतवान् भेदं, सर्वे खण्डा अमुष्य च ॥५९॥
महान्तः पर्वताकारा अजायन्त तथैव च । [६४]परीयाः पुनरस्माभिस्तेषां वै पार्श्वगाः कृताः ॥६०॥
[६५]रक्षिताः पुनरस्माभिर्मूषस्सार्था अमुष्य च । [६६]ततोऽन्ये मज्जिताश्चैव; [६७]प्रमाणं ध्रुवमत्र तु ॥६१॥
परं लोकाः किलाऽनेके श्रद्धाना भवन्ति नो । [६८]प्रभुत्वाच् छालते सत्यं प्रभुस्ते स दयी तथा ॥६२॥
[६९]इमान् श्रावय वृत्तान्तमब्रह्मस्य तथैव च । [७०]यदाऽसौ बान्धवान्त्स्वीयान् पितरं स्वं जगाद च ॥६३॥
'पूज्यते को नु युष्माभिः ?; [७१]तेऽवदन् 'मूर्त्तिपूजकाः । वयं तावद् भवामोऽथ तासु चैव रमामहे' ॥६४॥
[७२]सोऽवदत्ताः किमाहूता युष्मान् शृण्वन्ति; [७३]अथो हि ताः । साधयन्ति हितं किम्वा युष्माकं, नाशयन्ति वा ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

[७४]तेऽवदन् 'न हि तत्; दृष्टा अस्माभिस्त्वात्मपूर्वजाः । आचरन्तस्तथारूपम्; [७५]सोऽवदत् 'किं कदाचन ॥६६॥
साक्ष्युन्मेषं हि युष्माभिः दृष्टाश्चापि स्वपूजिताः ? । [७६]यूयं सर्वेऽथ युष्माकं सकलाः पूर्वजा अपि ॥६७॥
[७७]ममैते शत्रवस्सर्वे तं विहाय परं स यः । प्रभुर्वै जगतामस्ति; [७८]योऽसृजन् मामथो पुनः ॥६८॥
दर्शयत्ययनं चापि माम्; [७९]तथा भोजयत्यपि । पाययत्यपि यो वै माम्; [८०]यदा रुग्णो भवामि च ॥६९॥
मां चिकित्सति किं चापि; [८१]मारयत्यपि यस्तथा । जीवनेन पुनर्यो वै योजयत्यपि खल्वथ ॥७०॥
[८२]यश्च मे क्षंस्यते दोषमाशासे निर्णयाहनि । [८३]प्रभो मे ! मे धियन्देहि, साधुषु च निवेशय ॥७१॥
[८४]आयतिष्वथ मे देहि ख्यातिं तावदनुत्तमाम् । [८५]मां निवेशय किं चाऽथ सुखाऽऽरामऽऽयतिष्वपि ॥७२॥
[८६]क्षमस्व जनकम्मेऽथ पथभ्रष्टेष्वसावपि । भवत्यन्यतमस्तावत्; [८७]पुनरुत्थापनाऽहनि ॥७३॥
मैव त्वं मां च निन्दस्व; [८८]नोपयोगो भविष्यति । वैभवस्य यदा कश्चित् न चापि कोऽपि सन्ततेः ॥७४॥
[८९]तं विहायोपसर्पेद् योऽल्लाहं वै शुचिना हृदा । [९०]यदा चैव सुखाऽऽरामस्तान् जनानुपनेष्यते ॥७५॥
भयं ये मन्वते लोकाः; [९१]नारको दहनोऽथ च । समक्षं पाप्मनां नृणामथाप्युद्भावयिष्यते ॥७६॥
[९२]प्रक्ष्यन्ते ते जनाश्चैव 'प्रतीष्टाः कुत्र ते हि वः ? । [९३]अल्लाहादितरे, किन्ते साह्याय प्रभवन्ति वः ? ॥७७॥
किम्वा रक्षितुमात्मानं शक्नुवन्ति हि ते स्वयम् ? । [९४]ततस्तेऽथ पथभ्रष्टाश्चापि लोकास्समेऽपि ते ॥७८॥
अवक्षिप्ता भविष्यन्ति तावत्तस्मिन्नुपर्यधः । [९५]इभालीशस्य चम्वश्च समवेतास्समं हि ताः ॥७९॥
[९६]आक्रोक्ष्यन्ति भविष्यन्ति सविवादा मिथो यदा । [९७]स्पष्टमेव पथभ्रष्टा वयं त्वा ऽऽस्माऽथ वर्त्तते ॥८०॥
साक्षीभूतोऽत्र सोऽल्लाहः; [९८]प्रभुणा जगतां यदा । नीतवन्तो वयं युष्मान् किलैव समकक्षताम् ॥८१॥
[९९]अमीभिरेव दुष्टैश्च पथभ्रष्टाः कृता वयम् । [१००]इदानीं न निजं कञ्चित् पश्यामः प्राभिशंसकम् ॥८२॥
[१०१]नास्त्यभिन्नस्सखा चापि; [१०२]ह्यभविष्यदनुत्तमम् । पर्यावृत्तिर्जिहाने चेदभविष्यत् क्वचित्पुनः ॥८३॥
वयञ्चाप्यभविष्याम तेषु ये श्रद्धरा जनाः । [१०३]प्रमाणं निश्चयेनाऽस्ति, नाऽनेके परमत्र तु ॥८४॥
भवन्त्येवाऽस्य मन्तारः; [१०४]प्रभुस्ते स दयीतथा । प्रभुत्वाच्छालते सत्यम्; [१०५]बान्धवा नहुषस्य च ॥८५॥
न्यषेधन् वाग्घरांस्तावत्; [१०६]यदाऽमीषां च बान्धवः । जगाद नहुषस्तान् वै "किन्न यूयं भयन्धराः ? ॥८६॥
[१०७]विश्वासार्हो भवाम्येष निश्चितं वस्तु वाग्घरः । [१०८]बिभीत यूयमल्लाहात्तस्माद् यच्चाऽस्ति मे वचः ॥८७॥
कुरुध्वं तत् पुनर्यूयम्; [१०९]पुरस्कारममुष्य च । हेतुनाऽनेन नो याचे युष्मान् कञ्चित्, स एव तु ॥८८॥
प्रभुर्वै जगतां यस्य विषयो मे पुरस्कृतिः । [११०]बिभीत यूयमल्लाहात्तस्माद्, यच्चाऽस्ति मे वचः ॥८९॥
कुरुध्वं तत्पुनर्यूयम्; [१११]अवोचंस्ते ततः 'नु किम् । श्रद्दधाना वयं स्याम त्वयि यत् क्षुद्रका अपि ॥९०॥
पूर्वतस्तेऽनुयातारः ?; [११२]सोऽवदत् 'तत्कथं न्वहम् । बोधेयं यदकुर्वंस्ते पुरा; [११३]मे प्रभुरेव तु ॥९१॥
तस्य सर्वस्य विज्ञाता; भवेत् किन्न वरं यदि । युष्माभिर्ज्ञातमेतत् स्यात्;[११४]श्रद्धराणां न चाप्यहम् ॥९२॥
अनुत्साहकरस्तावत्; [११५]भवाम्येष तु केवलम् । चेतको विशदो ह्येव; [११६]ततः प्रत्यवदंश्च ते ॥९३॥
धिक्कृतानां हि लोकानां स्यास्त्वमन्यतमो यदि । नास्माद् विरंस्यसे तावद् व्यापारान्नहुषार्य भोः ॥९४॥
[११७]सोऽवदत् 'बान्धवा एते प्रभो मे ! मन्निषेधकाः । [११८]कुर्विदानीं विवेकं त्वं तेषु चास्मासु; मां तथा ॥९५॥
श्रद्धरान् मे सहायांश्च रक्ष किं चापि साम्प्रतम् । [११९]अथासौ तत् सहायाश्च ते सर्वे रक्षिताः पुनः ॥९६॥
भारवत्या समं नावा किलाऽस्माभिः; [१२०]ततस्तु ये । अतिष्ठन्नवशिष्टा वै मज्जितास्तेऽखिला अपि ॥९७॥
[१२१]वर्त्तते निश्चयेनाऽत्र लक्ष्मैकं, तेषु नो परम् । प्रभूताश्श्रद्धरास्सन्ति; [१२२]प्रभुस्ते वर्त्तते ध्रुवम् ॥९८॥
दयालुः प्रभुताशाली किं च; [१२३]ते (ऽल्लाह) वाग्घरान् । न्यषेधन्नथ चैवाऽऽदाः; [१२४]सूदस्तेषां यदैव च ॥९९॥
बान्धवो ह्यभ्यधात्तान्वै 'किन्नो यूयं भयन्धराः । [१२५]विश्वासार्हो भवाम्येष निश्चितं वस्तु वाग्घरः ॥१००॥
[१२६]बिभीत यूयमल्लाहात्तस्याद् यच्चास्ति मे वचः । कुरुध्वं तत् पुनर्यूयम्; [१२७]पुरस्कारममुष्य च ॥१०१॥
हेतुनाऽनेन नो याचे युष्मान् कञ्चित्, स एव तु । प्रभुर्वै जगतां यस्य विषयो मे पुरस्कृतिः ॥१०२॥
[१२८]प्रांशुभूमौ च सर्वत्र किमेतद् व्यर्थमेव तु । स्मारकं रच्यते तावद् युष्माभिरुत्तरोत्तरम् ? ॥१०३॥
[१२९]विशालानाञ्च हर्म्याणां निर्माणः क्रियते पुनः । अभिमत्य किमेतद् यद् यूयं शश्वद्धि वत्स्यथ ? ॥१०४॥
[१३०]शक्त्या प्रवर्त्तमानाश्च प्रवर्त्स्यन्ते यथा किल । घोरः कश्चिदभवेत्, क्रूरः; [१३१]तस्माद् सत्यमिदं मे वचः ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

कुरुध्वं तत् पुनर्यूयमल्लाहात् प्रबिभीत च । [१३२]यूयं तस्माद् बिभीतैव युष्मभ्यं योऽददात् किल ॥१०६॥

यद् यत्तद् स्वतो यूयं जानीथैव तु सर्वशः । [१३३]अयच्छत् स हि युष्मभ्यं सूनूंश्चैव चतुष्पदः ॥१०७॥

[१३४]आरामांश्च जलोद्गांश्च; [१३५]भयम्मे त्रिषये तव । वर्त्तते यातनायास्तु घोरे तावद्धि वासरे ॥१०८॥

[१३६]तेऽवदन् 'प्रविजानीमस्समभेत्र वयं यदि । उपदेष्टा भवेर्नो वोपदेष्टॄणामथो भवेः ॥१०९॥

[१३७]पूर्वजानां कथैवैषा केवलम्; [१३८]न पुनर्वयम् । यातनायां भविष्यामो ग्रस्यमानाः कथञ्चन ॥११०॥

[१३९]न्यषेधंस्तमतस्ते वै, वयञ्चानाशयाम तान् । वर्त्तते निश्चयेनाऽत्र लक्ष्मैकं, तेषु नो परम् ॥१११॥

प्रभूताश्श्रद्धरास्सन्ति; [१४०]प्रभुस्ते वर्त्तते ध्रुवम् । दयालुः प्रभुताशाली किं च; [१४१]तेऽल्लाहवाग्घरान् ॥११२॥

न्यषेधन् ये समुद्गा वै; [१४२]तेषां भ्राता यदाऽथ च । शालेभो ह्यभ्यधात्तान् वै 'किन्न यूयं भयन्धराः? ॥११३॥

[१४३]विश्वासार्हो भवाम्येष निश्चितं वस्तु वाग्घरः । [१४४]बिभीत यूयमल्लाहात्तस्माद्, यच्चाऽस्ति मे वचः ॥११४॥

कुरुध्वं तत् पुनर्यूयम्; [१४५]पुरस्कारममुष्य च । हेतुनाऽनेन नो याचे युष्मान् कञ्चित्, स एव तु ॥११५॥

प्रभुर्वै जगतां यस्य विषयो मे पुरस्कृतिः । [१४६]किन्नु द्रव्येषु यान्यत्र विद्यन्ते मध्यगा इव ॥११६॥

भूत्वा तेषान्तु निश्शंकं स्थातुं यूयं भविष्यथ । समाज्ञप्ताः; [१४७]जलोद्गेषु सुखारामेषु खल्वथ ॥११७॥

[१४८]क्षेत्रेषु गाढनद्धेषु खर्जूरीणां द्रुमेष्वपि ? । [१४९]पर्वतानथ यूयञ्च कर्त्तित्वा कौशलाद् भृशम् ॥११८॥

निर्माणाय गृहाणां वै प्रवर्त्तध्वे (सचेतसः) । [१५०]बिभीत यूयमल्लाहात्तस्माद्, यच्चास्ति मे वचः ॥११९॥

कुरुध्वं तत् पुनर्यूयम्; [१५१]कुरुध्वं न च तद् वचः । निर्मर्यादा हि ये लोकाः; [१५२]तथा चोद्भावयन्ति ये ॥१२०॥

धरायां विकृतिं ह्येव परिष्कारकृतश्च नो । [१५३]तेऽवदन् 'वर्त्तसे त्वन्तु तेषां ये माययाऽऽहताः ॥१२१॥

[१५४]अस्माभिस्सम एवं त्वं वर्त्तसे केवलो नरः । भद्राणामसि चेद् कश्चित् लक्ष्म किंचिदुपानय ॥१२२॥

[१५५]आह शालेभ 'उष्ट्रीयं तावदेकाऽत्र तिष्ठति । जलपानस्य पर्यायो निश्चितोऽस्या हि तिष्ठति ॥१२३॥

युष्माकं जलपानस्य निश्चितोऽन्यश्च वासरः । [१५६]कष्टापन्नामिमां कर्त्तुं यतध्वं न कदाचन ॥१२४॥

आपतिष्यति युष्मासूग्रस्याह्नो यातनाऽन्यथा । [१५७]शिराणां कर्त्तनेनाऽमी परन्त्वघ्नन् हि तां, ततः ॥१२५॥

सानुतापा अभूवंश्च; [१५८]तांस्ततः परितोऽवृणोत् । यातना, निश्चयेनाऽत्र खल्वेकं लक्ष्म तिष्ठति ॥१२६॥

श्रद्धरा न परन्तेषां भवन्तीहाधिका जनाः । [१५९]दयालुश्च विभुश्चैव ध्रुवन्ते वर्त्तते प्रभुः ॥१२७॥

[१६०]गणा लूतस्य किं चाऽपि न्यषेधन्नथ वाग्घरान् । [१६१]लूतो यदाऽभ्यधात्तान् वै तेषां भ्राता 'भयन्धराः ॥१२८॥

वर्त्तध्वे न हि किं यूयम्?; [१६२]विश्वासार्हो हि वाग्घरः । भवामि निश्चयेनाऽहम्; [१६३]धत्ताऽल्लाहभयं, तथा ॥१२९॥

कुरुध्वं मदवचो यूयम्; [१६४]पुरस्कारममुष्य च । हेतुनाऽनेन नो याचे युष्मान् कञ्चित्, स एव तु ॥१३०॥

प्रभुर्वै जगतां यस्य विषयो मे पुरस्कृतिः । [१६५]यूयं सांसारिकाणां किं जनानां समुपेथ भोः ! ॥१३१॥

पूरूषान्; [१६६]प्रजहीथाऽथ निजा भार्याः प्रभुर्हि वः । असृजद् यास्तु युष्मभ्यम् ? यूयं सीमातिवर्त्तनाः ॥१३२॥

भवथेह परं लोकाः; [१६७]उपसृष्टेषु तेऽवदन् । त्वं भविष्यसि भो लूत ! यदि त्वन्न विरंस्यसि ॥१३३॥

[१६८]सोऽवदद् 'ये विनिन्दन्ति युष्मत् कृत्यानि तेष्वहम् । त्वत्र सत्येन तिष्ठामि; [१६९]प्रभो मे! मामकान् जनान् ॥१३४॥

माञ्च पाहि पुनस्तस्माद् यत्ते कुर्वन्ति मानवाः । [१७०]अरक्षाम वयञ्चाऽतस्तञ्च तस्य च बान्धवान् ॥१३५॥

[१७१]वृद्धां विहाय खल्वेकां तेषां याऽस्थात्तु पृष्ठतः । [१७२]अनाशयाम तत्पश्चाद् वयमन्यांस्तु मानवान् ॥१३६॥

[१७३]वृष्टयश्च कृतास्तेषु किलास्माभिर्हि, वृष्टयः । भायितेभ्यस्तु लोकेभ्योऽतिघोरा अभवन् पुनः ॥१३७॥

[१७४]वर्त्तते निश्चयेनाऽत्र लक्ष्मैकं, तेषु मो परम् । प्रभूताश्श्रद्धरास्सन्ति; [१७५]प्रभुस्ते वर्त्तते ध्रुवम् ॥१३८॥

दयालुः प्रभुताशाली किं च; [१७६]तेऽल्लाहवाग्घरान् । न्यषेधन् अल-ऐकस्था अभवन् ये पुनर्जनाः ॥१३९॥

[१७७]शुभेभो ह्यभ्यधात्तान् वै 'किन्न यूयं भयन्धराः ? । [१७८]विश्वासार्हो भवाम्येष निश्चितं वस्तु वाग्घरः ॥१४०॥

[१७९]बिभीत यूयमल्लाहात्तस्माद्, यच्चाऽस्ति मे वचः । कुरुध्वं तत् पुनर्यूयम्; [१८०]पुरस्कारममुष्य च ॥१४१॥

हेतुनाऽनेन नो याचे युष्मान् कञ्चित्, स एव तु । प्रभुर्वै जगतां यस्य विषयो मे पुरस्कृतिः ॥१४२॥

[१८१]दत्त मानं पुनः पूर्णं, भवत नोनदायिषु । [१८२]तयैव या तुलर्ज्वी च तोलनं क्रियतां किल ॥१४३॥

[१८३]नोनं मानञ्च द्रव्येषु लोकैस्सार्धं विधत्त भोः ! । विप्लवं सारयन्तश्च धरायां खलु नाऽजत ॥१४४॥

[१८४]तस्माद् विभीत यूयञ्च युष्मान् यस्तावदसृजत् । असृजत् पूर्वजातांश्च वृद्धवंश्यानथाऽपि यः ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

[१८५]तेऽवदन् 'वर्त्तसे तावत्तेषां ये माययाऽऽहृताः । [१८६]अस्माभिरसम एव त्वं वर्त्तसे केवलो नरः ॥१४६॥
व्याहरन्त्यनृतं ये त्वां तेषां मन्यामहे वयम् । [१८७]सत्यवाचां भवेश्चेत्त्वं कोऽप्यस्मासु निपातय ॥१४७॥
खण्डं व्योम्नः कमप्येकम्; [१८८]स आह 'स प्रभुर्हि मे । विदांकरोति तत् सम्यक् कुरुध्वे यूयमत्र यत् ॥१४८॥
[१८९]न्यषेधंस्ते तु तम्, तेन यातना किल तान् जनान् । पर्यावृणोन् महोग्रस्य म्लानस्याह्नो, ध्रुवं हि सा ॥१४९॥
यातनाऽऽसीन् महोग्रस्य दिनस्य (न हि संशयः) । [१९०]वर्त्तते निश्चयेनाऽत्र लक्ष्मैकं, तेषु नो परम् ॥१५०॥
प्रभूताश्श्रद्धरास्सन्ति; [१९१]प्रभुस्ते वर्त्तते ध्रुवम् । दयालुः प्रभुताशाली किं च; [१९२]यो जगतां प्रभुः ॥१५१॥
असन्देहमिदं तेन ह्येव खल्ववतारितम् । [१९३]सत्य आत्मा यदादाय नीचैर्भूमिमुपागतः ॥१५२॥
[१९४]चेतकानां भवेस्त्वं यद् हृदयं ते (ह्युपागतम्) । [१९५]अर्वाणां भाषया तावद् वैशद्यं गतया समम् ॥१५३॥
[१९६]पुस्तकेषु च पौर्व्याणामपीदं खलु तिष्ठति । [१९७]लक्ष्म नैतत् किमेतेभ्यो, विद्वांसोऽपि विदन्ति यत् ॥१५४॥
वनिनामीश्वरालीनसन्ततीनामिदं किल ? । [१९८]अर्वाणां प्रविहायाऽथ पुमांसं यदि खल्विदम् ॥१५५॥
पुंसि देशान्तरस्यापि काशितं ह्यकरिष्यत । [१९९]असौ चाऽश्रावयिष्यत्तान् इदं नैते ततोऽपि च ॥१५६॥
श्रदधास्यन् किलाऽस्मिंस्तु; [२००]स्वान्तेष्वित्थं वयं पुनः । इदं कुर्मो हि संक्रान्तं मानुषाणान्तु पाप्मनाम् ॥१५७॥
[२०१]दुःखदां यातनां यावन्न ते पश्यन्ति नैव ते । श्रद्दधत्यत्र; [२०२]सा चैवाऽकस्मादेवापतिष्यति ॥१५८॥
अविजानत्सु वै तेषु यदा; [२०३]वक्ष्यन्ति ते तदा । किन्नु लब्धुं वयं शक्ताः कञ्चित् कालावधिं खलु? ॥१५९॥
[२०४]शीघ्रायन्ते किमेतेऽस्मद् यातनायै पुनर्जनाः ? । [२०५]किन्नु दृष्टं त्वयाऽस्माभिरेभ्यो दत्तो भवेद् यदि ॥१६०॥
सुखानां किल संभारो वत्सरेभ्यो निरन्तरम् । [२०६]साऽऽपतेत् पुनरेतेषु चेद् यस्यास्तान् वयं किल ॥१६१॥
भाययामः; [२०७]न वै तर्हि भोगभुक्ताः कथञ्चन । कल्पिष्यन्ते किलामीषां कार्याणान्तु प्रसिद्धये ॥१६२॥
[२०८]नाशिता वसतिः काऽपि न चास्माभिः कदाचन । चेतका अभवन् यत्र; [२०९]चेतितुम्, न वयन्तथा ।१६३॥
जाल्मास्तावदतिष्ठाम कदाचिच्चापि वै ध्रुवम् । [२१०]शातना इदमादाय नावतीर्णास्तथैव च ॥१६४॥
[२११]नानुकूल्यमिदन्तेषां भजते, न भवन्ति च । समर्थाः पुनरस्मिंस्ते; [२१२]दवीयस्स्थापिताश्च ते ॥१६५॥
व्यापाराच् छ्रवणस्यापि तथाऽस्य; [२१३]अस्मात्तु कारणात् । अल्लाहेन समं नान्यानाह्वय त्वं सुपूजितान् ॥१६६॥
अन्यथा यातना भाजां त्वमप्यन्यो भविष्यसि । [२१४]बान्धवान्स्व समीपस्थांस्तथा त्वञ्च विबोधय ॥१६७॥
[२१५]श्रद्धरा ये पुनर्जाता युष्माकमनुयायिनः । तेभ्यस्स्वकं भुजं यूयं नमयत; [२१६]पुनर्यदि ॥१६८॥
स्वान्ते जना वजानन्ति ब्रूहि तान् 'विरतस्त्वहम् । तस्मात्तिष्ठामि यद् यूयं कुरुध्वे; [२१७]कुरुताथ च ॥१६९॥
दयालौ किल विश्वासं तस्मिंश्च प्रभुतामये । [२१८]यो विपश्यति वै युष्मान् उत्थानाय कृतक्रमान् ॥१७०॥
[२१९](यो विपश्यति) किं चाऽथ प्रणिपातपरेषु हि । सर्वाश्चेष्टाश्च युष्माकम्; [२२०]विज्ञश्श्रोता ध्रुवं हि सः ॥१७१॥
[२२१]केषु खल्ववतारोऽत्र शातनानां वदानि किम् ? । [२२२]तेषां किलावतारोऽत्र वर्त्तते तेषु पाप्मसु ॥१७२॥
ये प्रपञ्चान् वितन्वन्ति; [२२३]श्रृण्वन्ति ह्युत्सुकास्तथा । असत्या हि परं तेषामनेके सन्ति मानवाः ॥१७३॥
[२२४]शुक्रास्तावदथैते हि, भ्रान्ता एवानुयन्ति तान् । [२२५]किन्न दृष्टं त्वया ते वै सततं चंक्रमन्ति हि ॥१७४॥
पर्वताभ्याशलग्नासु यत्र तत्रापि भूमिषु । [२२६]ते वदन्ति भृशं तच्च नानुतिष्ठन्ति यत् किल ॥१७५॥
[२२७]तान् विहाय तु ये सन्ति श्रद्धराः, कुर्वतेऽथ च । अनुकूलानि कर्माणि तथाऽभीक्ष्णं स्मरन्ति च ॥१७६॥
अल्लाहं, प्रतिषेधन्ति तैः कृतातिक्रमञ्च ये । सात्याचारा हि ये लोका वेत्स्यन्ति तेऽचिरं हि यत् ॥१७७॥
पर्यस्ताः केन पार्श्वेण क्रियन्ते ते हि मानवाः ।

योगः—१७७॥

CC-0. In Public Domain. Digitized by eGangotri

२७

सूक्तम्—पिपीलिकाः

(अन-नम्ल)

(महाकालेऽवतीर्णास्त्रिनवतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]ता० सीन० वै कुराणस्य सन्त्यायाता इमे हि यत् । पुस्तकं विशदन्तावत्; [२]अध्वनो दर्शनञ्च यत् ॥ १ ॥
श्रद्धरेभ्यश्च लोकेभ्यश्शुभस्य सूचकं परम् । [३]नमस्यां ये च कुर्वन्ति सुस्थितां, ददते पुनः ॥ २ ॥
दानं ये च दरिद्रेभ्यो विश्वसन्त्यपि ये तथा । परलोकं पुनश्चैव; [४]श्रद्धरा न भवन्ति ये ॥ ३ ॥
परलोके ध्रुवन्तेभ्यः कर्माण्येव कृतानि तु । मोहनानि किलामीषामस्माभिस्ते च मानवाः ॥ ४ ॥
अटाट्यामेव कुर्वन्तो भ्रमन्त्यत्र च तत्र च । [५]त एवैते तु येभ्योऽस्ति घोरं दण्डमिमे हि ते ॥ ५ ॥
किंच ये परलोकेऽथ हानिमेष्यन्ति दारुणाम् । [६]कुराणं त्वमिदं तावदवाप्नोषि ततो हि यः ॥ ६ ॥
विज्ञाता वर्त्तते किंच तत्वदर्शी च वर्त्तते । [७]गृह्यकान्तस्वान्यदावोचत् किंच मूषः 'अस्मि दृष्टवान् ॥ ७ ॥
अग्निमेकमहं युष्मानिदानीमेव खल्वथ । वार्त्तामिकामुपादाय किलोपैम्यथवा पुनः ॥ ८ ॥
सुदीप्तं कंचिदंगारं प्राप्य युष्मानुपैमि हि । येन यूयं जनास्तावत् सोष्माणस्स्यात तेन वै ॥ ९ ॥
[८]यदाऽसौ प्राप्तवांस्तञ्च तदाऽऽहूयत खल्वसौ । स वै सौभाग्यवान् योऽत्र वर्त्ततेऽग्नौ तथैव च ॥१०॥
वर्त्तते परिवेशेऽस्य, समेषां जगतां प्रभुः । महिम्ना शोभतेऽल्लाहः; [९]भगोमूष ! स एष तु ॥११॥
बोभवीम्यहमल्लाहश्शक्तिमान् त्सुमहान् त्सुधीः । [१०]'यष्टिकां स्वां क्षिपाऽयं त्वं', मूषोऽपश्यद् यदाऽथ च ॥१२॥
यष्टिकां सर्पवत् तावत् परीतां कुञ्चनैरति । पृष्ठं कृत्वा निजं स्थानादसौ तस्मात् पलायितः ॥१३॥
परावर्त्य मुखं नैव पश्यन् किंचिद्धि पृष्ठतः । (औच्यताऽसौ) भगो मूष ! मा विभीहि, न वाग्धराः ॥१४॥
उपेतास्सन्निधिम्मे तु भयं कुर्वन्ति कर्हिचित् । [११]भवेत्सातिक्रमो यस्तु परं पूर्वं ततश्च यः ॥१५॥
उपकृत्यापकारस्य विनिमयञ्च गच्छति । निश्चयेन क्षमाशीलो दयावांश्च महानहम् ॥१६॥
[१२]आत्मनीनं करं त्वञ्च नयेतो निजवक्षसि । भासमानस्य तस्य स्यात् ततः प्रत्यागतिर्ध्रुवम् ॥१७॥
मलस्य लेशमात्रञ्च न सम्पृच्येत तेन च । तदेतल्लक्ष्म खल्वेकं नवानां लक्ष्मणां भवेत् ॥१८॥
उपेतुं प्रिययौनञ्च तस्य चैवाऽपि वान्धवान् । संशयो न हि कोऽप्यत्र सावज्ञास्ते हि मानवाः ॥१९॥
[१३]आस्माकीनानि लक्ष्माणि स्पष्टान्यायन् यदा च तान् । तेऽवदन् 'वर्त्तते तावन् माया नग्नैव खल्वियम् ॥२०॥
[१४]दोषाद् दर्पाच्च ते तानि न्यषेधन्नथ यद्यपि । आत्मनाऽऽसत ते तावत्तेषु संप्रत्ययं गताः ॥२१॥
पश्य दोषकृतां घोरो ऽनुवन्धः कीदृशो ऽभवत् । [१५]अदद्म च वयं ज्ञानं शिलामानाय खल्वथ ॥२२॥
दान्यूधाय च तौ पश्चादाहतु 'नौं प्रशंसनम् । अल्लाहाय हि यस्तावन्महीयांसौ किलाऽकरोत् ॥२३॥
आवां स्वश्रद्दधानेषु बन्धकेषु बहुष्वपि । [१६]शिलामानोऽभवत् पश्चाद् दान्यूधस्यायतिः किल ॥२४॥
सोऽवदत् 'शिक्षितास्तावद् भवामो भो जना ! वयम् । पक्षिणां हि विरावेषु, भवामश्चार्पिता वयम् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

द्रव्याणि सर्वरूपाणि प्रभूतान्यपि खल्वथ । वर्त्ततेऽनुग्रहस्तावद् विशदोऽयमसंशयम् ॥२६॥
[17]शिलामानस्य चम्वश्च यास्वभूवन्हि मानवाः । जिन्नाश्चैव वयश्चैव क्रमाच्चैव नियोजिताः ॥२७॥
संग्रहं गमितास्तस्मै; [18]यदोपेतास्तथा च ते । सर्वे पिपीलिकावासं तावदेकामुपत्यकाम् ॥२८॥
तदा पिपीलिकैकाऽऽह 'यूयं तावत् पिपीलिकाः । विलानि विशत स्वानि चम्वो युष्मान् कदाचन ॥२९॥
शिलामानस्स्वयञ्चापि पद्भिर्नाऽऽघ्नन्तु सर्वशः । अविज्ञाताश्च तिष्ठेयुर्नाऽथ ते तत्परा अपि ॥३०॥
[19]सस्मयस्सो ऽहसत्तस्यास्तस्यां वाच्यवदत्तथा । 'प्रभो मे ! दर्शयेयं वै कार्त्तज्ञं त्वामहं सदा ॥३१॥
त्वत् कृपाहेतुना पित्रोर्मयि या दर्शिता (पुरा) । दर्शिता मयि किं चाऽपि कृपा, कुर्यामहन्तथा ॥३२॥
अनुकूलानि कर्माणि तव रुच्यानि सर्वथा । वन्धकेषूत्तमेषु त्वं मां तथैव प्रवेशय ॥३३॥
[20]वीनसौ पर्यपश्यच्च पुनरित्थमुवाच च । हुद् हुदं न हि पश्यामि, विलोपं किमसौ गतः ॥३४॥
[21]कठोरं दण्डयिष्यामि हनिष्याम्यथवा पुनः । किम्वाऽऽदाय प्रमाणं स स्पष्टमेष्यति मामथ ॥३५॥
[22]नाधिकञ्च कृतं तेन चिरं यावदुपेत्य सः । आह 'ज्ञातम्मया तद्वै ज्ञातं यन्न त्वया खलु ॥३६॥
निश्चितं वृत्तमादाय सवात् त्वामस्म्युपस्थितः । [23]योषितं दृष्टवानस्मि शासतीं तेषु, साऽथ च ॥३७॥
तिष्ठति प्रसरं प्राप्य सर्वद्रव्येष्वथो वृहत् । राजसिंहासनं तस्याः; [24]अपश्यं तामहं पुनः ॥३८॥
प्रजास्तस्याश्च सूर्यस्य प्राणिपातपराः समाः । त्यक्त्वा ऽल्लाहस्तवं तावत्, तेषां कर्माणि शातनः ॥३९॥
शोभितान्यकरोत्तेभ्यस्ते ऽध्वनश्चैव वारिताः । लभन्ते नैव ते मार्गं जनास्तेनैव (सम्प्रति) ॥४०॥
[25]स्तुवीरन्न यथाऽल्लाहं ते जना (वारिता अतः) । य खलूद्भावयत्यत्र व्योमसूर्व्याञ्च यत् स्थितम् ॥४१॥
संवृतं विवृतं यच्च युष्माभिर्वेत्ति योऽखिलम् । [26]यं विना न प्रतोष्टोऽन्यः किलाल्लाहस्स वै प्रभुः ॥४२॥
राज्यसिंहांसनस्याऽऽस्ते विशालस्य (न संशयः) । [27]सोऽवदत् च (शिलामानः) साम्प्रतं ह्येव तद् वयम् ॥४३॥
पश्यामो भाषसे सत्यं किम्वाऽस्यनृतवादिषु । [28]एतेन लेखपत्रेण मामकेन प्रयाहि तान् ॥४४॥
क्षिपैनत्तानभि त्वञ्च निवर्त्तस्व ततः पुनः । पश्य प्रत्युत्तरं तस्य किन्नु ते ददते पुनः ॥४५॥
[29](शासिका) साऽवदत् पश्चात्-श्रीधरा हे जना मम ! । मामभि मान्यमेकं वै क्षिप्तं पत्रं हि विद्यते ॥४६॥
[30]तत् शिलामानतः प्राप्तं स्मृत्वा नाम च लिख्यते । अल्लाहस्य हितैषी यो दयावांश्चापि वर्त्तते ॥४७॥
[31]नात्मानमभिमन्यस्व सन्निधौ त्वं तु मेऽथ च । अर्पयित्वा तथाऽऽत्मानं त्वमुपास्स्व ततश्च माम् ॥४८॥
[32]साऽवदत्-श्रीधरा लोकाः ! कालेऽस्मिन्त्समुपस्थिते । ब्रूत किम्मेऽस्ति कर्त्तव्यम् ? निर्णयं याम्यहन्तु नो ॥४९॥
अभियोगस्य कस्याऽपि यावद् यूयम् न पार्श्वगाः । [33]तेऽवदन्—शक्तिमन्तो वै भवामः पुनरेव च ॥५०॥
युयुधाना महद् घोरं, निर्णये चास्यतः परम् । प्रभ्वी त्वमेव, विद्धि त्वं नियोगस्ते हि को मतः ॥५१॥
[34]साऽवदत् 'नगरं कञ्चित् प्रविशन्ति नृपा यदा । ध्वंसयन्ति हि तं, तस्य जनांश्चाति सुपूजितान् ॥५२॥
तिरस्कुर्वन्ति, खल्वित्थं ह्येव ते त्वाचरन्ति तत् । [35]प्रेषयाम्यहमेषा तान् तावदेकमुपायनम् ॥५३॥
किमादाय निवर्त्तन्ते दूता द्रक्ष्याम्यहं पुनः । [36]दूते प्राप्ते शिलामानं प्रत्युवाच स तं ततः ॥५४॥
'धनेन मम साह्यं त्वं कर्त्तुमिच्छसि किम् ? स वै । अल्लाहो यददान्मह्यं वर्त्तते तत उत्तरम् ॥५५॥
यत् स तुभ्यमदाद् रिक्थं, त्वमेव स्वेन गच्छ च । प्राभृतेन प्रसादन्तु; [37]तान् निवर्त्तस्व (साम्प्रतम्) ॥५६॥
तानभिषेणयिष्यामस्तथा नो सम्भवेद् यथा । कोऽप्यस्माकं प्रतीरोधः; सापमानञ्च ते ततः ॥५७॥
द्राविता हि भविष्यन्ति भूत्वा मानविवर्जिताः । ह्येव वत्स्यन्ति ते तत्र किंच; [38]तान्सोऽवदत् पुनः ॥५८॥
श्रीधराः ! को नु युष्माकं मामुपैत्युपनीय तु । तस्यास्सिंहासनं यावद् भूत्वा ते मे वंशवदाः ॥५९॥
यान्ति मां सकला ह्येव ? [39]जिन्नेष्वन्यतमस्ततः । बलिष्ठः प्राह 'ते स्वस्मादुत्थानादासनात् पुरा ॥६०॥
ह्येवोपस्थापयिष्यामि तत्तु त्वां शक्तिरस्ति मे । तस्य, किंच भवाम्येष विश्वासार्हस्तथैव च ॥६१॥
[40]आसीद् येन भृतं ज्ञानं पौस्तकं पुनराह सः । पक्ष्मोन्मेषादहं पूर्वं तामानेष्यामि ते किल ॥६२॥
यदा चासावपश्यत्तां निकषाऽऽत्मानमेष तु । प्राह सो''ऽनुग्रहोऽयम्मे प्रभोस्तावत् हि विद्यते ॥६३॥
परीक्षेत यथाऽसौ मां कृतज्ञोऽहं भवामि वा । अकृतज्ञः पुनः किम्वा; दर्शयेद् यः कृतज्ञताम् ॥६४॥
आत्मने ह्येव तत् सर्वम् कार्त्तज्ञं मन्यतामथो । कार्तघ्नं दर्शयेद् यस्तु प्रभुर्मे न हि संशयः ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

अनपेक्षो भवत्येष महौदार्यस्तथैव च । [४१](शिलामानोऽ) वदत्—तस्या: राजसिंहानं किल ॥६६॥
उपस्थापयताऽग्रे मे तया यावन्न दृश्यते । पश्यामो यदि साऽध्वानं लभते, वर्त्तते ऽथवा ॥६७॥
लोकानां न लभन्ते ये ह्यध्वानं सर्वथैव तु । [४२]यदा सोपस्थिता जाता तदासावौच्यताऽथ च ॥६८॥
"वर्त्तते किमिदंरूपं ह्येव सिंहासनं नु ते ? । साऽवदत्—सत्यमेतत्तु तदेवेति मतिर्मम" ॥६९॥
(सोऽवदत्)—तावदस्माभिरलम्भि पूर्वमेव तु । ज्ञानमस्या: वयञ्चाऽथाऽभवामात्मसमर्पका: ॥७०॥
[४३]अल्लाहादितरं यं साऽपूजयत् तां स एव हि । अरुणन् निश्चितं साऽसीत् श्रद्विहीननृणां खलु ॥७१॥
[४४]औच्यताऽसौ प्रवेशं त्वं हर्म्ये तावत् कुरुष्व (भो:!) । हर्म्यं यावदपश्यत् सा तदबोधज्जलाशयम् ॥७२॥
अकृताऽसौ निजे जंघे नग्ने, प्राह ततश्च स: । (शिलामान:) "इदं त्वस्ति हर्म्यं तावद् विनिर्मितम् ॥७३॥
काचेन", प्राह सा पश्चात्—"प्रभो मे ! कृतवत्यहम् । आत्मनैवात्मनि त्वंह:, साम्प्रतं चार्पयाम्यहम् ॥७४॥
शिलामानेन सार्धं वै खल्वात्मान (मसंशयम्) । अल्लाहाग्रे, प्रभुर्योऽस्ति सर्वेषां जगतां पुन: ॥७५॥
[४५]प्रैषयाम वयञ्चाथ समुद्गं प्रत्यमुष्य च । शालेभं भ्रातरं यत्तेऽल्लाहं तावत् स्तुवन्तु वै ॥७६॥
व्यवदन्त परं हन्त ! ते विभक्ता दलद्वये । [४६]सोऽवदत् 'ज्ञातयो मे भो: ! युष्माभि: किं त्वरायते ॥७७॥
भद्रात् पूर्वमभद्राय, नाल्लाहं किं च याचथ । क्षमां ? स्याद् दर्शिता नाम दया युष्मान् कदाचन ॥७८॥
[४७]तेऽवदन् 'त्वां च सार्थांश्च तवाऽपशकुनस्य हि । वयं विद्म: प्रतीकान् वै, सोऽवदत् 'प्रभुरेव तु ॥७९॥
अधितिष्ठति तत्सर्वं यद् वो ऽपशकुनं किल । परीक्षाचक्र आक्षिप्ता: परं यूयं तु तिष्ठथ ॥८०॥
[४८]दलं पुर्यां अथो तस्यां नवानामेकमास्त च । नोपकाराय लोकानां विप्लवाय परन्तु ते ॥८१॥
शश्वदेवाप्यचेष्टन्त; [४९]ते चाऽन्योन्यममन्त्रयन् । प्रमाणीकुरुता ऽल्लाहं मिथोऽवश्यं वयं हि यत् ॥८२॥
निशायामाक्रमिष्यामस्तञ्च तस्य च गृह्यकान् । सखायं तस्य तत्पश्चात् वदिष्यामो हि यद् वयम् ॥८३॥
नास्म नाशस्य कालेऽस्य गृहस्योपस्थिता: किल । संशयो नाऽत्र किं चाऽथ सत्यवाचो वयं ध्रुवम् ॥८४॥
[५०]वंचनैका समारब्धा तैस्ततोऽस्माभिरप्यथ । समारब्धा परं नो ते तत्तु वेत्तुमशक्नुवन् ॥८५॥
[५१]दृश्यतां किमभूत्तेषां वंचनानां फलं पुन: । नाशितास्तावदस्माभिस्ते च तेषां च बान्धवा: ॥८६॥
[५२]गेहानीमानि तत्तेषामंहसां कारणात् किल । नाशं गतानि, लक्ष्मैकं विजानद्भ्योऽस्त्यसंशयम् ॥८७॥
[५३]रक्षितास्ते तथा ऽस्माभि: श्रद्धरा अभवंस्तु ये । ये ऽभवन् श्रीधराश्चापि; [५४]स लूतश्च यदाऽवदत् ॥८८॥
बान्धवान्स्वान्—विजानन्तश्चापि यूयं विधत्थ भो ! । कुत्सितानि हि कर्माणि ? [५५]योषित: प्रविहाय तु ॥८९॥
कामत: पुरुषान् यूयं याथ केन ? जना: पुन: । ते हि यूयं प्रवर्त्तन्ते ये ऽज्ञानात् किल कर्मसु ॥९०॥
[५६]ज्ञातयो या: परं तस्य न तासामास्त तूत्तरम् । व्यतिरिक्तमतोऽन्यत्तु यदाहुस्ते—"इमान्त्समान् ॥९१॥
सारयत स्ववासेभ्यो बहिर्द्रावियताऽपि च । बान्धवानस्य लूतस्य, शुद्धा:पूता इतीव ते ॥९२॥
आत्मन: पावनायन्ते; [५७]तदाऽस्माभिरसावथ । गृह्यकास्तस्य किञ्चैव रक्षिता: प्रविहाय तु ॥९३॥
तस्य भार्यां यतस्तस्या विषये ऽभूद् ध्रुवं मतम् । आस्माकीनमसौ यद्वै पृष्ठस्थानां भविष्यति ॥९४॥
[५८]वृष्टिस्तेषु कृताऽस्माभिर्घोरा, भीष्मा किलाभवत् । सा वृष्टिस्तेषु लोकेषु चेतिता ये ऽभवन् पुरा ॥९५॥
[५९](वाग्घरो!)—दीरय त्वं भो:! अल्लाहाय प्रशंसनम् । तेन येऽवचितास्तेभ्यो बन्धकेभ्योऽस्तु शं तथा ॥९६॥
वरोऽल्लाहो वरा: अस्य किम्वोक्ता: सहभागिन: ? ।

इति एकान्नविंशं पारायणम्

अथ विंशं पारायणम्

[६०]कोन्वसावसृजद् यो वै धरां व्योमानि खल्वथ ? ॥९७॥
युष्मदर्थे पुनर्व्योम्नो वार्यवर्षद्, वयं पुन: । तेनोद्यानानि हृद्यानि खलूदभावयाम च ॥९८॥
इदन्ते त्वाऽऽस्त कर्त्तव्यं नैव त्वं तस्य यत्तरून् । उद्भावये:, किमल्लाहात् प्रतीष्टोऽन्योऽपि विद्यते ? ॥९९॥
न वै, भ्रष्टा: परं मार्गादिमे ह्येव भवन्ति तु । [६१]कोन्वसौ यो धरां चक्रे स्थानं विश्रान्तिहेतवे ॥१००॥
अन्तरा सारयाञ्चक्रे तां पुनस्सरितोऽथ च । पर्वतान् सृष्टवानन्तस्तां, पुना रोधमाकरोत् ॥१०१॥
सिन्ध्वोर्मध्ये द्वयोश्चैव; पृथगल्लाहुतोऽस्ति वा । प्रतीष्टोऽन्योऽपि किं कश्चित्, न वै, तेषान्तु साधिका: ॥१०२॥

CC-0. In Public Domain. Digitized by eGangotri

विदन्त्येतत् परं (सत्यं); [६२]कोन्वसौ शृणुते च यः । दुःखितस्य समाक्रन्दं समाहूतो भवेद् यदा ॥१०३॥
व्यपोहत्यथ कष्टानि, युष्मान् भूमौ करोति च । अधिष्ठातॄन् पुनश्चैव, पृथगल्लाहतोऽस्ति वा ॥१०४॥
प्रतीष्टोऽन्योऽपि किं कश्चित् ? यूयं मन्दविमर्शिणः । [६३]कोन्वसावयनं युष्मान् दर्शयत्यत्र भूमिषु ॥१०५॥
अन्धकारेषु घोरेषु सत्सूदन्वत्सु खल्वथ । कोन्वसौ प्रेषयत्यग्रे शुभवृत्तप्रदानिव ॥१०६॥
कृत्वा वायून् दयायाश्च स्वकीयायास्तथैव च । प्रतीष्टः पृथगल्लाहाद् वर्त्ततेऽन्योऽपि किं खलु ? ॥१०७॥
उच्छ्रितः परमल्लाहस्तेभ्यस्सत्यं हि वर्त्तते । प्रतिम्नस्तस्य कुर्वन्ति यानिमे मानवा (बत) ॥१०८॥
[६४]कोन्वसौ सृजते सृष्टिं प्राक् पुनस्सृजते च यः ? । धरित्र्याः कश्च जीवातून् व्योमभ्यो वो ददात्यथ ? ॥१०९॥
प्रतीष्टः पृथगल्लाहात् वर्त्ततेऽन्योऽपि किं खलु ? । ब्रूत, स्थाऽथ च सत्याश्चेत् प्रमाणेनोपयात तु ॥११०॥
[६५]ब्रूहि—नो पृथगल्लाहात् परोक्षवृत्तवेदनः । व्योमसु वर्त्तते कोऽपि धरित्र्यां वाऽपि कश्चन ॥१११॥
विदन्ति गमयिष्यन्ते कदोत्थानं न तेऽथ च । [६६]विषये परलोकस्य परं नष्टं हि वर्त्तते ॥११२॥
ज्ञानं तेषा, मथो तत्र सन्दिहाना हि खल्वमी । अथो किञ्च गतैवेषां दृष्टिस्तद् विषयेऽखिला ॥११३॥
[६७]श्रद्विहीना जनास्त्वेवं भणन्तीह—"यदा वयम् । मृत्तिकासाद् भविष्यामः पूर्वजा नोऽभवन् यथा ॥११४॥
तत् तदाऽपि वयं सत्यं सारितास्स्याम किं बहिः ? । [६८]अभूदेतत् प्रतिज्ञातं, पुराप्यस्माभिरीदृशम् ॥११५॥
पूर्वजैरथ चास्माकं, सन्त्याख्यानानि केवलम् । पूर्वजानां किलैतानि; [६९]ब्रूहि "चंक्रमण भुवि ॥११६॥
विधत्थ पश्यताऽथाऽपि पाप्मनां का दशाऽभवत् । [७०](अशोच्यान्)मैव शोचस्त्वम् दुःखभाग् मा भवोऽथ च ॥११७॥
कुञ्चितां तद् गतिं दृष्ट्वा तेऽनुयन्त्यत्र यां भृशम् । [७१]ते भणन्ति कदा चेदं प्रतिज्ञातं (भविष्यति) ॥११८॥
(पूर्णितं) सत्यसन्धाश्चेद् यूयमत्र तु तिष्ठथ । [७२]ब्रूहि—शीघ्रायते यस्यै युष्माभिः सततं किल ॥११९॥
तस्याः कश्चिद् भवेद् भागः कदाचिन्निकषैव वः । [७३]लोकानुग्रहपूर्णो वै प्रभुस्ते न हि संशयः ॥१२०॥
दर्शयन्त्यत्र कार्त्तज्ञमनेके न पुनर्जनाः । [७४]वेत्ति सत्यं प्रभुस्ते च हृत्सु तेषामवस्थितम् ॥१२१॥
वेत्ति तच्चापि यत्ते च विवृण्वन्ति (क्षणात्क्षणम्) । [७५]धरित्र्यां व्योम्नि किञ्चैव संवृतं तन्न वर्त्तते ॥१२२॥
पुस्तके नांकितं यत् स्यात्; [७६]ईश्वरालीनसन्ततिम् । यत्र भिन्ना मतिस्तासामिदं तावदसंशयम् ॥१२३॥
वैपुल्येन कुराणं वै तदेव श्रावयत्यलम् । [७७]श्रद्धरेभ्यो ह्यसन्देहं दयैवैतत् तथैव च ॥१२४॥
दर्शकं त्वयनस्याऽपि; [७८]प्रभुस्ते स्वधिया ध्रुवम् । विवेकं तेषु कर्त्तैव सुधीश्चैव बली च सः ॥१२५॥
[७९]धेहि विश्वासमल्लाहे ततस्त्वं, ते भवत्यथ । स्फुटं सत्यमिहाऽऽधारः; [८०]पलायन्ते यदा च ते ॥१२६॥
परिवर्त्य निजं पृष्ठं निजोक्तं त्वं कथंचन । श्रावयितुं न शक्नोषि वधिरांश्च मृतांश्च नून् ॥१२७॥
[८१]नेत्रहीनान् न चैवाऽपि पथ्यारोपयितुं पुनः । शक्तोऽसि भ्रंशनादूर्ध्वं तेषां, श्रावयितुं ह्यलम् ॥१२८॥
त्वन्तु तानेव ये सन्ति श्रद्दधाना हि सर्वथा । आयातेषु किलाऽस्माकं भवन्त्यात्मार्पकास्तथा ॥१२९॥
[८२]पूर्त्तिकालः समभ्येति यदोक्तस्य वचस्तथा । आविर्भूतं करिष्यामः पशुञ्चैकं वयं तदा ॥१३०॥
धरित्र्याः, यो हि तान् सर्वान् प्रबोधं प्रापयिष्यति । अमन्यन्तैव नास्माकं त्वायातांस्ते जना यतः ॥१३१॥
[८३]दिने यस्मिन् वयञ्चाऽथ स्वाऽऽयातानां निषेधकान् । समवेतान् करिष्यामः समाहृत्य गणाद् गणम् ॥१३२॥
सक्रमं स्थायिनश्चामून् करिष्यामो ह्यसंशयम् । [८४]आभिमुख्यञ्च यास्यन्ति यदा ते (ऽसौ) वदिष्यति ॥१३३॥
"प्रत्याख्याता ममाऽऽयाता युष्माभिः किन्नु यद्यपि । नाऽतिचकर यूयं तान् स्वज्ञानेन कदाचन ॥१३४॥
यदीदं नाऽपरं तत् किं यूयं तावदकार्ष्ट (भोः !) । [८५]अस्मदुक्तं किलैतेषु सत्यं सत्यं भविष्यति ॥१३५॥
पाप्मानो येन ते, नापि वक्तुं शक्ष्यन्ति तेऽथ च । [८६]लोकितं किन्न तैस्सृष्टा यदस्माभिर्निशा यतः ॥१३६॥
लभन्तां ते सुखं तस्यां, काशमानं कृतं पुनः । दिनं, सन्त्यत्र लक्ष्माणि नृभ्यस्तेभ्यो ह्यसंशयम् ॥१३७॥
श्रद्दधानास्तु ये सन्ति; [८७]तूर्यमाध्मास्यतेऽथ च । यदैवोर्व्यां तु यद् यच्च व्योमसु तिष्ठते पुनः ॥१३८॥
क्षोभमेष्यति तत्सर्वं तं विहाय तु यं पुनः । मन्यते रुच्यमल्लाहः, तत्समक्षमुपस्थिताः ॥१३९॥
भविष्यन्त्यथ सर्वेऽपि नमन्तो विनयाऽऽनताः । [८८]पर्वतान् लोकसे त्वञ्च, मन्यसे सन्ति ते स्थिराः ॥१४०॥
यान्ति यद्यपि ते यद् वन् मेघा यान्ति, महत् किल । वर्त्तते हीदमाश्चर्यं येन सर्वं प्रसाधितम् ॥१४१॥
चेष्टितं वेत्त्यसौ सम्यक् युष्माकं सममेव तु । [८९]उपेयाद् भद्रमादाय यस्तु तस्मै भविष्यति ॥१४२॥

CC-0. In Public Domain. Digitized by eGangotri

वरीयान् हि पुरस्कारस्तस्माल्, लोका अपीदृशाः । क्षोभात्तस्माद् भविष्यन्ति तस्मिन्नह्यि गतव्यथाः ॥१४३॥
[१०]यस्त्वभद्रमुपादाय पुनरत्रोपयास्यति । लोका अवाङ्मुखा वह्नौ क्षेप्स्यन्ते तादृशा ध्रुवम् ॥१४४॥
यूयं यद् यत् प्रकुर्वाणा आध्वं तत्तद् विहाय किम् । ततोऽन्यस्मात् कृतस्यैव पुरस्कारमवाप्स्यथ ? ॥१४५॥
[११](ब्रूहि) अहन्तु प्रदिष्टोऽस्मि प्रभुं स्तोतुममुष्य हि । पुरस्य, कृतवानेनद् हर्म्यं यो हि (स्वयं) किल ॥१४६॥
सर्वं द्रव्यञ्च तस्यैव, दिष्टश्चैवास्म्यहं पुनः । संगच्छै तानहं लोकान् य आत्मार्पण-बुद्धयः ॥१४७॥
[१२]कुराणं श्रावयेयञ्च पठित्वेदं; य आगतः । भद्रं मार्गं निजायैव भद्रायासौ, परन्तु यः ॥१४८॥
भ्रश्यते हि पथो ब्रूहि तं—भवाम्येष केवलम् । चेतकानामहं त्वेव; [१३]ब्रूहि किञ्चैव खल्विदम् ॥१४९॥
अल्लाहाय प्रशंसाऽस्ति, युष्मान् शीघ्रमसौ तथा । दर्शयिष्यति लक्ष्माणि स्वानि, यूयञ्च तैस्समम् ॥१५०॥
परिचयं करिष्यध्वे, करुध्वे यद् यदत्र च । सप्रमादः प्रभुस् तस्मिन् किलासौ ते न तिष्ठति ॥१५१॥

योगः—१५१

CC-0. In Public Domain. Digitized by eGangotri

२८

सूक्तम्–कथ्यम्

(अल-कसस)

(महाकालेऽवतीर्णा अष्टाशीतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]ता०सीन०मीम०; [२]सन्तीमे आयातास्स्पष्टपुस्तकान् । [३]वर्णयामो वयं त्वान्तु वृत्तान्तं कञ्चनैव वै ॥ १ ॥
यथावत् प्रिययौनस्य किञ्च मूषस्य (साम्प्रतम्) । जनेभ्यः खलु तेभ्यस्तु श्रद्दधाना भवन्ति ये ॥ २ ॥
[४]धरित्र्यां प्रिययौनो हि गर्वेणाऽभूत् समुच्छ्रितः । गणेषु व्यभजच्चैव तत्रत्यान् वासिनोऽथ सः ॥ ३ ॥
प्रापयामास दौर्बल्यं गणेष्वन्यतमं तथा । पुत्रघातपरस्तेषां बभूवाऽसौ, किलाऽजहात् ॥ ४ ॥
जीविता योषितस्तेषां परं, सत्यमसौ स्थितः । तेषामन्यतमस्तत्र विप्लवं जनयन्ति ये ॥ ५ ॥
[५]ऐच्छाम वयमेतच्च तेषु वृष्टा दया भवेत् । आसत पीडिता ये ऽत्र धरित्र्यां; ते च नायकाः ॥ ६ ॥
कृतास्स्यु रायतित्वेन स्युः प्रतिष्ठापितास्तथा । [६]प्रदानञ्चाधिपत्यस्य कृतं तेभ्यो भवेत् पुनः ॥ ७ ॥
धरित्र्यां, दर्शयेमाऽथ प्रिययौनं तथैव च । सामानं हि चमूस्तस्य किञ्च तत्तद् यतोऽभवन् ॥ ८ ॥
त्रासाऽऽपन्नास्तु ते सर्वे; [७]प्रैरयाम वयन्तथा । मूषस्याऽम्वामसौ यत्तं स्तन्यं दद्यात्, पुनर्यदा ॥ ९ ॥
भीस्तदर्थे तु जायेत क्षिपेत्तं निम्नगाऽन्तरे । धारयेन्न भयं किञ्चित् दुःखिता स्यान्न वा पुनः ॥१०॥
निश्चितं स परावृत्तस्तामभि प्रविधास्यते । वाग्घरेषु पुनश्चासौ निविष्टो हि करिष्यते ॥११॥
[८]बान्धवाः प्रिय-यौनस्य तं बहिः खल्वसारयन् । असौ वैरी भवेद् येन तेषां स्याद् दुःखदोऽपि च ॥१२॥
घोर आस्ताऽविवेकोऽयं प्रिययौनस्य तस्य च । सामानस्य हि तेषाञ्च चमूनामप्यसंशयम् ॥१३॥
[९]प्रिययौनस्य भार्याऽऽह (तं)—भवेद् विश्रमस्थलम् । अर्भकोऽयन्तु मे ते च, मा वधीस्तत् कदाचन ॥१४॥
सूपयोगं व्रजेदेष किलास्माकं, भवेच्च वा । कृतोऽयं पुत्रको ऽस्माभिः फलन्ते नाऽविदुः खलु ॥१५॥
[१०]जनन्या अथ मूषस्य हृत्-क्षोभं समुपागमत् । रहस्यं विवृतं किञ्च तया खल्वकरिष्यत ॥१६॥
वयं नैवाऽकरिष्याम स्वान्तमस्या दृढं यदि । श्रद्धराणां स्थिता येन भवेत्सा पूर्णतः किल ॥१७॥
[११]आह सा भगिनीं चाऽस्य—"त्वमेनं समनुव्रज" । दूरतो ह्येव पश्यन्ती स्थिताऽभूत् सा तु (सोदरम्) ॥१८॥
न किञ्चिच्चाऽविदुस्तेऽस्य; [१२]किलाऽवैधमकुर्म च । पूर्वतो ह्येव धात्रीणां तस्मै स्तन्यं वयं पुनः ॥१९॥
प्राह सा—किं वदान्येषा धाम तेषां, प्रपोषणम् । ये करिष्यन्ति युष्मभ्यं त्वमुष्य (सोदरस्य मे) ॥२०॥
एषणा तद्धितस्याऽपि भवेद् येषाञ्च मानसे ? । [१३]तदित्थं स परावृत्तः कृतस्स्वां निकषाऽम्विकाम् ॥२१॥
अस्माभि, र्यत् समाश्वासं लभेताऽसौ, न च व्रजेत् । दुःखं विद्यात्तथा सत्यं प्रतिज्ञातं प्रभोः, परम् ॥२२॥
नाधिकास्तत्र बुध्यन्ते; [१४]यौवनं गतवांश्च सः । यदा पुष्टः पुन र्जातो धीर्हि तस्मिन् निवेशिता ॥२३॥
दत्तं ज्ञानं तथा तस्मै, वयं भद्रकृतो जनान् । पुरस्कुर्मः किलैवं हि; [१५]सोऽविशत् (चैकदा) पुरम् ॥२४॥
अतिष्ठन् सप्रमादा वै यदा पौरा, व्यलोकत । युध्यमानौ नरौ तत्र, तयोरेकोऽस्य बान्धवः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

शत्रुपक्षाद् द्वितीयश्च किलाऽसीत्, तस्य बान्धवः । आर्थयत्तस्य साहाय्यं विरोद्धुं परिपन्थिनाम् ॥२६॥
योऽभवत् तस्य विद्वेषी, ततो मुष्टिप्रहारतः । प्रापयामास पञ्चत्वं त्वं हि मूषस्तु (तत्क्षणम्) ॥२७॥
स आह—शातनस्येयं कृतिश्शत्रुरसौ ध्रुवम् । अध्वनो भ्रंशकारी च वर्त्ततेऽत्र न संशयः ॥२८॥
[१६]सोऽवदत्—मे प्रभो ! सत्यमात्मना दूषितो मया । आत्मैव (साम्प्रतं) तत् त्वं मां क्षमस्व, ततश्च सः ॥२९॥
क्षन्तवांस्तं क्षमाशीलो दयालुश्चाप्यसौ ध्रुवम् । [१७]सोऽवदत्—मे प्रभो ! यत्त्वं जायसे सदयो मयि ॥३०॥
कदाचित् पाप्मनां तेन नो भविष्यामि पोषकः । [१८]जागरूकस्सभीश्चैव प्रातरोपेतवानथ ॥३१॥
यदैवाऽसौ पुरं हन्त ! समपश्यदसौ तदा । तं तमेवाह्वयन्तन्तु पुरुषं, साह्यमाचिनोत् ॥३२॥
गते ह्येव दिने यस्तु तस्य, मूषस्तमाह च । "असन्देहं भवस्येष त्वन्तु संरम्भमानसः" ॥३३॥
[१९]यदाऽऽपातोन्मुखश्चासौ बभूव तत्र पूरुषे । द्वयोश्चापि तयोरासीद् वैरितां यो गतः किल ॥३४॥
स आह—मूष भोः ! किम्मे वधः काम्यो हि तेऽधुना । कृतवान् यद् वदेकस्य वधं त्वं गतवासरे ॥३५॥
अत्याचारीव किं देशे भूत्वा ते जीवितैषणा ? । नाऽथ किं कामितं ते यत् परिष्कर्त्तृषु खल्वहम् ॥३६॥
भवेयं तावदेकोऽत्र ?; [२०]धावन् कश्चिच् च पूरुषः । परान्तादागतस्तस्य पुरस्य प्राह खल्वथ ॥३७॥
मन्त्रणे तत्पराः सन्ति प्रमुखास्ते वधाय, तत् । "सरेतस्त्वमरं ह्येव, हितैषी ते भवाम्यहम्" ॥३८॥
[२१]जागरूकस्सभीश्चैव ततोऽसौ निरगात् ततः । आह चैव—"प्रभो मे ! माम् जाल्मेभ्यस्त्वं विमोचय" ॥३९॥
[२२]यदाऽसौ मदयानस्य चाऽभिमुख्यं जगाम ह । सोऽवदत्—खल्वहं मन्ये प्रभुर्मे ऽध्वनि साम्प्रते ॥४०॥
मां प्रणेष्यति; [२३]संप्राप्तोऽ यदाऽपां सन्निधिं पुनः । स तावद् मदयानस्य गणकं तद् व्यलोकत ॥४१॥
पूरूषाणां पशून् ये वै पाययन्ति स्म जीवनम् । ततोऽपश्यत् परान्ते च स्त्रियौ द्वे समवस्थिते ॥४२॥
पशून् रुद्ध्वा ऽऽत्मनीनान् हि, स आह—वदतं युवाम् । का नु वार्त्ता ?" तदोभे तेऽवदताम्—"न हि शक्नुवः ॥४३॥
जलं पाययितुं स्वीयान् वयं तावत् (पशून्) इमे । पशुभिर्न निवर्त्तेरन् जना यावदितः किल ॥४४॥
वर्षीयानति किञ्चाऽस्ति पिता नो पुनरेव च" । [२४]तयोस्सोऽपाययद् वारि (पशून्) पश्चात् ततोऽथ च ॥४५॥
वृक्षच्छायामधो यात्वा स्थितोऽभूदवदत्तथा । प्रभो मे ! सूत्तमं वस्तु ह्युपाहर्त्तुमना भवेः ॥४६॥
त्वन्तु यच्चापि तस्याऽहं स्थितोऽर्थी किल सर्वदा । [२५]तयोरेकतरा पश्चादुपैतं लज्जयाऽऽनता ॥४७॥
प्राह चेदं-पिता मे त्वामाह्वयति यथा हि सः । त्वां हि तस्मात् पुरस्कुर्याद् यस्मात्त्वं वार्यपाययः ॥४८॥
आस्माकीनान् पशूंस्तावत्; यदाऽसौ प्राप्तवांश्च तम् । उक्तवांश्चाखिलं कथ्यं सोऽवदत्—"त्वं विभीहि मा ॥४९॥
जाल्मेभ्यस्त्वं जनेभ्यो वै विमोक्षं लब्धवानसि । [२६]तयोरेकतरा प्राह—तात ! त्वं खल्विमं जनम् ॥५०॥
स्वीकुरु वृत्तिहेतोर्हि, वृत्त्यर्थं स्वीकृतो जनः । स एव भवता भद्रः प्रत्ययार्हो बली च यः ॥५१॥
[२७]अवोचत्—इष्टमेतन्मे दुहित्रोरनयोरहम् । कुर्यामेकां त्वया ह्यूढां मन्यसेऽष्टौ समा यदि ॥५२॥
ममोपान्ते किल स्थातुं सेवायास्त्वं प्रयोजनात् । स्वेच्छया दशवर्षाणि यदि तिष्ठेर्न मे भवेत् ॥५३॥
वैवश्यं त्वत् कृते किञ्चित्, तथा ऽल्लाहेच्छयाऽपि च । सूत्तमानां जनानां वै भोत्स्यसेऽन्यतरं हि माम् ॥५४॥
[२८]सोऽवदत्—निश्चयोऽयम्मे तव मध्ये तथा ऽभवत् । अवध्योरेतयोः कुर्यामहं यं कञ्चनाऽपि तु ॥५५॥
प्रार्थये नाऽतिचारस्स्यात् मयि कोऽपि कथञ्चन । वयं ब्रूमोऽथ यच्चापि साक्ष्यल्लाहो ह्यमुष्य तु ॥५६॥
[२९]पूरयित्वाऽवधिं मूषः प्रतस्थे च यदा स्वकैः । गृह्यकैः, दृष्टवान् दूरादग्निमेकमुवाच च ॥५७॥
गृह्यकान् स्वान्—"प्रतीक्षन्तां भवन्तोऽहन्तु दृष्टवान् । अग्निमेकं कदाचित्तद् वार्तां काञ्चिदवाप्य हि ॥५८॥
निवर्त्तेय ततोऽगारं किम्वा तापाय वः पुनः" । [३०]प्राप्तवांश्च यदा तत्र महीतानस्य दक्षिणात् ॥५९॥
सौभाग्यशालिनि क्षेत्रे वृक्षादाहूयताऽथ सः । "मूष ! अल्लाहस्त्वहं ह्येव प्रभुर्वै जगतां मतः ॥६०॥
[३१]यष्टिकामात्मनीनाञ्च क्षिप त्वं," तां व्यलोकत । तदाऽसौ बहुभंगैर्वै सरन्तीं सर्पवत्तदा ॥६१॥
पृष्ठं कृत्वा ततोऽधावत् आस्यं पर्यस्य नाऽथ च । दृष्टवान् पृष्ठतः किञ्चित् (औच्यताऽसौ च) "मूष हे ! ॥६२॥
सन्निधिं गच्छ, भैषीर्मा, रक्षितानामसि ध्रुवम् । [३२]नयोरस्यात्मनः पाणिमक्षतस्स ततः पुनः ॥६३॥
उज्ज्वलो ह्येव तावच्च बहिरेष्य (त्यसंशयम्) । भयेनात्मभुजञ्चैव संकोचं त्वमवापय ॥६४॥
प्रमाणद्वयमेतद् वै प्रभोस्ते खलु वर्त्तते । उपस्थापयितुं तावत् प्रिययौनस्य सम्मुखम् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

सम्मुखञ्च पुनस्तेषां तस्य मुख्या जनास्तु ये । अवज्ञाकारिणस्सत्यं जनास्ते निश्चयो ह्ययम् ।।६६।।
[३३]अहनं मे प्रभो ! तेषां व्यक्तिमेकामुवाच सः । बिभेमि ते हनिष्यन्ति माम्; [३४]मदीयः सहोदरः ।।६७।।
हारदूनोऽतिरिच्यैव वाग्मी तिष्ठति मां किल । सहायं तमतः कृत्वा प्रेषय त्वं समं मया ।।६८।।
मां समर्थयितुं, शंके ते निषेत्स्यन्ति मां ध्रुवम् । [३५]सोऽवदत्—"सबलं ते हि भ्रात्रा बाहुन्तु ते वयम् ।।६९।।
करिष्यामोऽथ दास्यामो युवाभ्यां तद् बलं पुनः । लक्ष्मणो हेंतुना ऽस्माकं युवां शक्ष्यन्ति नैव ते ।।७०।।
प्राप्तुमेव कथञ्चित्तु, विजेतारौ तथैव च । सानुयात्रौ युवां तत्र स्थास्यथो निर्विशंकितौ ।।७१।।
[३६]लक्ष्मभिर्विशदैः सार्धमास्माकीनैः पुनर्यदा । प्राप्तवान् तानसौ मूषस्तदा ते चेत्थमब्रुवन् ।।७२।।
कृत्रिमेयन्तु मायैव केवला, पूर्वजेष्वपि । कदाचिच् चापि नास्माभिः श्रुता स्वीयेष्वभूत् तथा ।।७३।।
[३७]मूषश्चाह "प्रभुर्मे तं जनं वेत्त्यविशंकितम् । मार्गसन्दर्शनं लब्ध्वा तस्माद् यः प्राप्तवानिह ।।७४।।
तं तथैव जनं यस्मै परिणामी गृहः (शुभे) । निश्चितं न हि साफल्यं जाल्मा यास्यन्ति सर्वथा ।।७५।।
[३८]अवोचत् प्रिययौनश्च "श्रीधराः ! वेद्म्यहन्तु नो । प्रतीष्टं कञ्चनाऽप्यन्यं युष्माकं प्रविहाय तु ।।७६।।
आत्मानं, तत् कृतेऽस्माकं सामान ! त्वं कुरुष्व भोः ! । मृत्तिकापाकमत्राग्नौ मदर्थे तदनन्तरम् ।।७७।।
प्रांशुं प्रासादमेकञ्च कारयाऽहं कदाचन । पश्येयं हि ततस्तावत् प्रेष्ठं मूषप्रभुं पुनः ।।७८।।
मृषावक्तृष्वहं त्वेनं मन्ये चान्यतमं किल । [३९]अधाद् दर्पं ससैन्योऽसौ विनाऽधिकारमेव च ।।७९।।
भुवि, तेन मतञ्चैव यत् तैर्नैव कदाचन । प्रत्यावृत्तिश्च कार्या स्यात् प्रत्यस्मान् पुनरेव च ।।८०।।
[४०]निग्रहं गमितास्तेन तत्सेनाः स तथैव च । अस्माभिः, ते ऽथ च क्षिप्ताः पारावारे ततः समे ।।८१।।
दृश्यतां कोऽभवत् तेषां परिणामो हि पाप्मनाम् । [४१]नायकत्वञ्च ते नीताः अस्माभिः, नारकानलम् ।।८२।।
प्रत्याह्वानं पुनर्येभ्यः प्रदिष्टं कार्यरूपतः । ते नो वेत्स्यन्ति साह्यञ्च पुनरुत्थापनाऽहनि ।।८३।।
[४२]अभिशापोऽनुसारी च कृतस्तेषां, तथा च ते । विवर्णानां भविष्यन्ति पुनरुत्थापनाऽहनि ।।८४।।
[४३]प्राक्तनानथ वंश्यांञ्च नाशयित्वा ततो वयम् । मूषायाऽदद्म वै शास्त्रं कृत्वोपकरणं हि तत् ।।८५।।
मार्गसन्दर्शनस्यापि दृष्टेरन्तस्तथैव च । दयाऽऽकारञ्च तत् कृत्वा चेतन्तां यत् कदाचन ।।८६।।
[४४]पश्चिमे प्रान्तभागे त्वं नाभवस्तु तदा यदा । कर्त्तव्यं कृतमस्माभिर्मूषस्य विषये समम् ।।८७।।
साक्षिणामभवस्त्वञ्च नापि (तस्मिन्स्तु वासरे) । [४५]उद्धृता बहवो वंश्यास्ततोऽस्माभिर्गतस्तथा ।।८८।।
महान् कालस्ततस्तूर्ध्वं तेषु जीवत्सु साम्प्रतम् । नाऽभूत्तावत् स्थितिस्ते च मदयानेषु यत् किल ।।८९।।
श्रावितास्स्युर्मदायातास्त्वया तेभ्यः कथञ्चन । वाग्घराः परमस्माभिः प्रेषिता हि निरन्तरम् ।।९०।।
[४६]समाहूतो यदा मूषः प्रान्तभागे गिरेर्मया । नाऽभवस्त्वं तदैषा च प्रभोस्ते तु दयैव यत् ।।९१।।
(ज्ञाप्यसे त्वमिदं) यत्त्वं चेतयेस्तान् जनान् हि ये । चेतकं नाऽलभन्तैव त्वत्तः पूर्वं तु कञ्चन ।।९२।।
कदाचिच्चेतनां तावल् लभेरन्नेव ते पुनः । [४७](एतदेतेन किञ्चैव) यदेतन्न परीणमेत् ।।९३।।
प्रेषितं ह्येव यत् पूर्वं करै, स्तेषां तु कारणात् । तस्मात् तेष्वापतेत् काचिद् यातना हि यदैव च ।।९४।।
क्रोशेयुस्ते तदा—"हन्त ! प्रभो नः ! कोऽपि वाग्घरः । प्रेषितः किं न प्रत्यस्मान् त्वयाऽभूत् येन वै वयम् ।।९५।।
पालयेम तवाऽऽयातान् भवेमाऽन्यतमे तथा । श्रद्धराणां हि लोकानाम्; [४८]"सत्यमस्मत् ततो यदा ।।९६।।
प्राप तांस्ते ऽवदन्—"केन दत्तमस्मै न वर्त्तते । तद्वदेव तु यत् किञ्चित् दत्तं मूषाय वर्त्तते ?" ।।९७।।
न्यषेधन् किन्न ते तद् यद् मूषाय प्रागदीयत । ते ऽवदन्—"द्वेऽप्यमू माये सहाये ये परस्परम्" ।।९८।।
आहुश्चैव—"वयं कुर्मः खण्डनं तूभयोरपि" । [४९]ब्रूहि अल्लाहसकाशात्तत् पुस्तकं मार्गदर्शनम् ।।९९।।
उभेऽतिक्रम्य खल्वेते यत् समाहरतेह तत् । येन तस्यानुसर्त्ताऽहं भवेयं, यदि तिष्ठथ ।।१००।।
यूयं सत्यधरास्तावत्; [५०]अथैते याचनान्तु ते । पूरयन्ति न चेद् विद्धि स्वैरिणो ह्येव तान् जनान् ।।१०१।।
ततो भ्रष्टतमः कोऽन्यस्स्वैरितामत्र याति यो । अल्लाहदर्शितं मार्गं निषेधन्त्सर्वथैव तु ।।१०२।।
दर्शयत्येव नाऽऽल्लाहो मार्गं जाल्मांस्तु वै जनान् । [५१]प्रेषितस्सततं शब्दस्तेषां पार्श्वे बभूव च ।।१०३।।
अस्माभिस्तदिदं मत्वा चेतन्तां ते कदाचन । [५२]अयच्छाम वयं येभ्यो लोकेभ्यः प्राग्घि पुस्तकम् ।।१०४।।
विश्वसन्ति हि ते त्वस्मिन्; [५३]श्राव्यन्ते ते त्विदं यदा । ते वदन्ति—"सविश्वासा भवामोऽस्मिन् वयं किल ।।१०५।।

CC-0. In Public Domain. Digitized by eGangotri

ध्रुवं सत्यमिदञ्चाऽथ प्रभो नोंऽतः पुरेव च । तिष्ठामो हि वयं भूत्वा तावदात्मसमर्पकाः ॥१०६॥
[५४]इमे ते हि जना ये वै भविष्यन्ति पुरस्कृताः । वारद्वयं, यतस्ते हि स्थिरा आसत, किं च ते ॥१०७॥
घ्नन्त्यभद्रं हि भद्रेण, दत्तं तेभ्योऽस्ति यत्तथा । व्ययीकुर्वन्ति तस्मात्ते; [५५]यदा शृण्वन्ति तेऽथ च ॥१०८॥
व्यर्थवादान् पुनस्तेषामामनन्तस्त्यजन्ति तान् । "कर्माण्यस्मभ्यमस्माकं युष्मभ्यं वस्तथैव च ॥१०९॥
शं भवेत् किल युष्मभ्यं, काम्या नाऽज्ञानिनस्तु नः" । [५६]त्वं न शक्नोषि सन्मार्गात् प्रणेतुं यमभीच्छसि ॥११०॥
अल्लाहस्तु यथाकामं यं कञ्चिन्नध्वनोरिह । वेद सम्यक् तथा चाऽसौ सन्मार्गगामिनो जनान् ॥१११॥
[५७]ते भणन्ति—"वयं चेद् वोऽन्वियाम मार्ग-दर्शनम् । भविष्यामो वयं भूमेस्स्वकीयाया बहिष्कृताः" ॥११२॥
अस्माभि र्न हि किं तेभ्यश्शान्तेरेकं निकेतनम् । प्रदत्तं, नीयते यत्र कृषीणां प्रसवस्समः ॥११३॥
वृत्तिश्चास्मत्तु सा, नैव विदन्ति बहवः परम् । [५८]वासतेयान्यनेकानि चानाशयाम, यानि हि ॥११४॥
वृत्तिसंभार-हेतो र्वै दर्पमत्यन्तमादधुः । वेश्मानि (पश्य) तत्तेषां तदूर्ध्वं तत्र कश्चन ॥११५॥
अवात्सीद् विरलो ह्येव, चान्ततो वयमेव तु । स्थिता आयतयस्तेषाम्; [५९]नाशनोऽथ न ते प्रभुः ॥११६॥
पुराणां, प्रेषयेन्नैव कञ्चिदेकन्तु वाग्घरम् । यावत्तेषां हि केन्द्रेषु योऽस्मदीयान् किलाऽऽयतान् ॥११७॥
श्रावयेत्तान्, पुराणां वै नाशना हि वयन्तु नो । दशायां केवलं तस्यां जाल्मास्तेषां जना यदा ॥११८॥
[६०]यदप्यस्तीह वो दत्तं सुखसंभार एव सः । मण्डनं जीवनस्यास्य लौकिकस्य च वर्त्तते ॥११९॥
उत्तमं स्थास्नु किं चापि वर्त्तते यत्तु तिष्ठति । अल्लाहस्य हि सान्निध्ये, चरथ तद् धिया न किम्? ॥१२०॥
[६१]कदाचित्तुल्यतां यायाज् जनः किं वचनं कृतम् । मया येन समं तावद् भद्रलाभाय वर्त्तते ॥१२१॥
सद्योऽमुष्य च यो लब्धा, मनुष्येण तु तेन वै । यस्मै दत्ता किलाऽस्माभिर्लौकिकस्य हि वर्त्तते ॥१२२॥
सामग्री सुखदा त्वस्य जीवनस्य, ततश्च यः । भविताऽन्यतमस्तेषां पुनरुत्थापनाऽहनि ॥१२३॥
उपस्थिताः करिष्यन्ते ये जना (दण्डहेतुना) ? । [६२]दिने यस्मिन्नसौ किञ्च तदाह्वानपरो भवन् ॥१२४॥
आह्वास्यति नु ते कुत्र सन्ति मे सहयोगिनः । येषान्तु कारणाद् यूयं सदर्पाः खल्वतिष्ठत ॥१२५॥
[६३]विषये चाऽथ ते येषामुक्तिस्ससत्या किला ऽभवत् । वदिष्यन्ति—प्रभो ऽस्माकं ! त एवैते जना हि ये ॥१२६॥
च्याविता वर्त्मनोस्माभि र्यथा भ्रष्टा वयं स्थिताः । तथैते भ्रंशिताश्चैव, घोषयामस्तवाग्रतः ॥१२७॥
मुक्तदोषा हि तिष्ठामस्तदद्य, न कदाचन । अवन्दन्त किलैतेऽस्मान्; [६४]भविष्यन्त्यथ ते पुनः ॥१२८॥
उक्ताः 'यूयं प्रतिम्नः स्वानिहाकारयता ऽधुना' । तांस्त आकारयिष्यन्ति प्रतिवाचं परन्न ते ॥१२९॥
दास्यन्ति काञ्चिदप्येभ्यो, द्रक्ष्यन्त्येते च यातनाम् । अभविष्यद् वरं चेत्ते ह्यलप्स्यन्त क्वचित् सृतिम् ॥१३०॥
[६५]दिने यस्मिन् पुनस्तेषां स आह्वानं करिष्यति । वदिष्यत्यथ चापीत्थम्—"वाग्घरा अभवन् हि ये ॥१३१॥
प्रेषितास्तावदस्माभिस्त उक्ता अभवन् हि किम्" ? । [६६]दिने तस्मिन् न मस्तिष्के तेषां किंचित् स्फुरिष्यति ॥१३२॥
नाऽपि प्रक्ष्यन्ति ते ऽन्योन्यम्; [६७]योऽपि तेषां तदा परम् । यास्यति विप्रतीसारं श्रद्दधानो भविष्यति ॥१३३॥
भद्रकर्मकृदप्येषां साफल्यं गच्छतामसौ । भवेदन्यतमस्तावदित्थमाशास्यते खलु ॥१३४॥
[६८]प्रभुस्ते हि यथाकामं सृजत्यत्र चिनोति च । चयस्येदं न सामर्थ्यं तदधीनन्तु वर्त्तते ॥१३५॥
महिम्ना शालतेऽल्लाहस्तथोच्चैरपि तिष्ठति । अमुष्माच्च प्रतिम्नो यं घटयन्ति जना इमे ॥१३६॥
[६९]वेत्ति सर्वं प्रभुस्ते च संवृतं हृदि तिष्ठति । विवृतं यत्तथा तेषां; [७०]अल्लाहस्स तथैव च ॥१३७॥
प्रतीष्टो नेतरस्तस्मात्, अमुत्रेह किलोभयोः । लोकयोश्चापि तस्यैव श्लोकस्तस्यैव शासनम् ॥१३८॥
परावृत्योपगन्तव्यो युष्माभिस्स तथैव च । [७१]ब्रूत —किं चिन्तितं तावद् युष्माभिस्स प्रभुर्यदि ॥१३९॥
युष्मासु केवलां रात्रिं ह्येव तन्वीत सन्ततम् । यावन्नोपैति खल्वत्र पुनरुत्थापनादिनम् ॥१४०॥
प्रतीष्टो हीतरो ऽल्लाहात् तत् को युष्मानवापयेत् । प्रकाशम् ? केन तद् यूयं श्रवणाय न तत्पराः ? ॥१४१॥
[७२]ब्रूत—किं चिन्तितं तावद् युष्माभिस्स प्रभुर्यदि । युष्मासु केवलं वस्त्रं ह्येव तन्वीत सन्ततम् ॥१४२॥
यावन्नोपैति खल्वत्र पुनरुत्थापना-दिनम् । प्रतीष्टो हीतरोऽल्लाहात् तत् को युष्मानवापयेत् ॥१४३॥
निशां यां यूयमाश्रित्य सौख्यमाविशथ ध्रुवम् । (हन्त !) तत् केन भो! यूयं दर्शनाय न तत्पराः? ॥१४४॥
[७३]ससर्जाहश्च रात्रिञ्च दयया स्वीयया हि सः । युष्मभ्यं येन वै यूयं मार्गयेतात्मनः प्रभोः ॥१४५॥

CC-0. In Public Domain. Digitized by eGangotri

तस्मिन्ननुग्रहं किञ्च तस्यां विश्राममेव च । भवेत् किन्न वरं यूयं कार्त्तज्ञं दर्शयेत चेत् ॥१४६॥
[७४]दिने यस्मिन् पुनस्तेषां स आह्वानं करिष्यति । वदिष्यत्यथ चापीत्थम्—"प्रतिमानो हि कुत्र ते ॥१४७॥
ममाधिकृत्य युष्मासु यानहंभावताऽऽगता ? । [७५]साक्षिणं वयमेकैकमाहरिष्याम एव तत् ॥१४८॥
प्रतिगणं च वक्ष्यामः—स्वप्रमाणैरुपेत भोः ! । तदा ते बोधमेष्यन्ति प्रभौ सत्यं, यदनृतम् ॥१४९॥
तैः पुनर्घटितं तद् वै ततो लोपं प्रयास्यति । [७६]बान्धवानां हि मूषस्य कार्यदूनोऽप्यजायत ॥१५०॥
तेष्वसावभवत्तावत् सात्याचारो वयं पुनः । तस्मा अदद्म कोषाणि किलामेयानि यानि हि ॥१५१॥
शक्तिधोऽपि गणस्तस्य श्राम्येदूढ्वा तु सर्वथा । यदा तद् बान्धवा आहुस्तं 'न दर्पं भजस्व भोः ॥१५२॥
दर्पिणो नहि रोचन्ते त्वल्लाहाय कदाचन" । [७७]यदल्लाहेन ते दत्तं तेन त्वं तदिहाऽऽचर ॥१५३॥
येन वासो भवेल्लब्धः परत्रात्र तथैव च । विस्मार्षी र्मा स्म भागं स्वं, दयावान् भवतात्तथा ॥१५४॥
दयावानभवद् यद्वत्त्वय्यल्लाहो न च क्षितौ । एषणा कलहाय स्यात् कदाचित्ते, कदाचन ॥१५५॥
नैवाऽल्लाहाय रोचन्ते ते हि ये कलहप्रियाः" । [७८]सोऽवदत् "यन्मया लब्धं, ज्ञानं मे तत्र कारणम्" ॥१५६॥
किन्न जानात्यसौ तस्मात् पुराऽपि सुबहून् गणान्" । नाशयाञ्चक्र अल्लाहो जनांस्तान् समतीत्य ये ॥१५७॥
बलाढ्या अभवंस्तं वै गणाढ्या अपि चाभवन् । सापराधा न पृच्छ्यन्ते तेषां दोषाः कदाचन ॥१५८॥
[७९]ततोऽसौ वैभवोद्भिन्नः कदाचिन्निजबान्धवान् । उपेतो; भौतिकं ये च चाकचक्यमुपाश्रिताः ॥१५९॥
तेऽवदन् "इष्टमस्माकमसेत्स्यत् कार्यदूनवत् । वैभवं चेदिहास्माभिश्चापि तावदलप्स्यत ॥१६०॥
राजते वैभवेनाऽयं सौभाग्यमीयिवान् ध्रुवम् । [८०]ज्ञानदानन्तु येभ्योऽभूत् तेऽवदन् "धिग् भवेत्तु वः ॥१६१॥
श्रद्दधानाय लोकाय भद्रकर्मकृते तथा । अल्लाहस्य प्रतीदानं सूत्तमं किल वर्त्तते ॥१६२॥
सन्तोषमास्थिता ह्येव लभन्ते पुनरीदृशम्" । [८१]धरित्र्यां धर्षितः पश्चात् कृतोऽसौ तस्य वेश्म च ॥१६३॥
अस्माभि, र्न गणोऽप्यन्यस्सन्नद्धः समजायत । विरुध्य तावदल्लाहं तस्य संरक्षणाय तु ॥१६४॥
आत्मनाऽपि न शक्तोऽभूदात्मानं रक्षितुं च सः । [८२]अथैते चैव ये लोकाः परेद्युर्लोभमन्विताः ॥१६५॥
तत्तुलावाप्तये ह्युक्त्वा इदानीमित्थमावदन् । "अघो ! सत्यं त्विदं तावदल्लाहाय हि रोचते ॥१६६॥
बन्धकानान्तु यस्तस्मै महौदार्यं तनोत्यसौ । प्रदत्ते (परमन्येभ्यः) मानोन्मानपुरस्सरम् ॥१६७॥
सकृपो नाऽभविष्यच् चेत् अल्लाहोऽस्मासु तत् पुनः । धर्षिता अभविष्याम वयञ्चापि (न संशयः) ॥१६८॥
अघो ! सत्यं त्विदं ह्यत्र श्रद्विहीनाः फलन्ति नो" । [८३]निश्चितं च करिष्यामो धाम तत् पारलौकिकम् ॥१६९॥
जनेभ्यस्तादृशेभ्यो ये यशस्कामा भवन्ति नो । धरित्र्यां दोषकामाश्च, फलं चान्त्यं तु वर्त्तते ॥१७०॥
पुंभ्यस्तेभ्यो हि ये तावत् तिष्ठन्त्यत्र भयन्धराः । [८४]समं भद्रेण यस्त्वत्र किलोपेतो भविष्यति ॥१७१॥
लप्स्यते ह्युत्तमं तस्मादसौ, यश्च भविष्यति । अभद्रेण किलोपेतो ये जना दुरितायनाः ॥१७२॥
यत्कृतं तत्पुरस्कारं तं ह्यवाप्स्यन्ति ते ध्रुवम् । [८५]योऽददात् तुभ्यमेतस्य कुराणस्य विहायितम् ॥१७३॥
प्रत्यावर्त्तयिताऽसौ त्वां शुभोदर्कं प्रति (ध्रुवम्) । ब्रूहि "तं वेत्ति सम्यङ् मे प्रभुर्योऽत्र समागतः ॥१७४॥
मार्गसन्दर्शनं प्राप्य, यश्च मग्नः स्थिरे तमे" । [८६]तव त्वाशाऽपि नाऽऽस्ताऽस्य यत् त्वयि प्रविधास्यते ॥१७५॥
अवतारो हि शास्त्रस्य, दयैवैषा तव प्रभोः । मा गमः पृष्ठपोषत्व मश्रद्धानां हि तत् क्वचित् ॥१७६॥
[८७]सावधानश्च तिष्ठेस्त्वम्, विप्रकृष्टं न ते क्वचित् । आयातेभ्यो विदध्युस्त्वामल्लाहस्य, यदा हि ते ॥१७७॥
जाताः कृतावताराः स्युस्त्वयि, त्वं स्वं प्रभुं प्रति । आह्वयाऽथ न मन्तॄणां प्रतिम्नां त्वं भवेः क्वचित् ॥१७८॥
[८८]"नाल्लाहेन समं त्वन्यं प्रतीष्टं त्वञ्च गायतात् । प्रतीष्टो नेतरस्तस्मात्, नाशवत् सममेव च ॥१७९॥
विहायाऽमुष्य रूपन्तु, तदीयञ्चैव शासनम् । परावृत्योपगन्तव्यः स एव विद्यते च ते ॥१८०॥

योगः—१८०

CC-0. In Public Domain. Digitized by eGangotri

२९

सूक्तम्–अणकलूता

(अल–अनकबूत)

(महाकालेऽवतीर्णा एकान्नसप्ततिरायाताः)

सालल्लाहनामजाप योऽल्लाहो दयी हितैष्यपि

[1]अलिफ० लाम० मीमेति; [2]मन्वते किन्नु ते जनाः । "श्रद् वयं दध्म" इत्येवं वचस्सु तेषु केवलम् ॥ १ ॥
विमुक्तास्ते करिष्यन्ते परं नैव परीक्षिताः ? । [3]परीक्षां गमिता एषां पुराजा अपि यद्यपि ॥ २ ॥
अस्माभिः स किलाऽल्लाहो वेत्ति तान् ये ऋतम्भराः । वेत्ति तांश्चैव ये त्वत्रासत्यमेवाऽश्रिताः सदा ॥ ३ ॥
[4]किन्विदं ते ऽभिमन्यन्ते दुष्टकार्येषु ये रताः । "अस्मान् यत्तेऽतियास्यन्ति" तदेनो ह्यभिमन्वते ॥ ४ ॥
[5]अल्लाहेन समं यस्तु संगाशः सन् हि तिष्ठति । अल्लाहस्य (स जानीयात्) कालोऽभ्येत्येव निश्चितः ॥ ५ ॥
असौ श्रोताऽस्ति किञ्चाऽपि विज्ञाताऽसौ हि तिष्ठति । [6]यः श्रमं कुरुते चाऽत्र निजार्थे कुरुते हि सः ॥ ६ ॥
सर्वेभ्योऽप्यनपेक्षोऽथ भूत्वाऽल्लाहस्तु तिष्ठति । [7]श्रद्धराः येऽभवन् लोका भद्रकर्मकृतस्तथा ॥ ७ ॥
तेभ्यस्तेषां वयं दोषानपासिष्याम एव तु । पुरस्कर्तास्महे तांश्च तेषां सत्कार्य-कारणात् ॥ ८ ॥
[8]प्रेरितो मानवोऽस्माभिः सद्धर्मेण प्रवर्तितुम् । निजाभ्यां पितृमातृभ्यां समं, तौ तु परं यदि ॥ ९ ॥
वैवश्यं प्रापयेतां त्वां ममौपम्यगतस्य हि । घटनाय किलान्यस्य वेत्सि त्वं यन्न सर्वथा ॥१०॥
तयोस्तन्न वचः कार्यम्; परावृत्त्याऽहमेव हि । युष्माकं तूपगम्योऽस्मि, तदा बोधयिताऽस्म्यहम् ॥११॥
यद् यद् यूयमचेष्टध्वम्; [9]श्रद्धरा अभवंस्तु ये । तान्निवेशयिता चाऽहं भद्रेषु सुकृतस्तथा ॥१२॥
[10]कश्चनैवंविधोप्यत्र लोकानां भाषते हि यः । "श्रद्धरा वयमल्लाहे" परन्त्वल्लाहहेतुना ॥१३॥
क्लेशितो यावदेवाऽसौ भ्रान्तबुद्धिरमन्यत । अल्लाहादेव तं क्लेशं लोकक्लेशम्, अथो यदि ॥१४॥
प्रभोस्ते पार्श्वतो लब्धं साह्यं, तत् स वदिष्यति । "त्वयैव संगतास्तावद् वयं त्वास्म" न वेत्ति किम् ॥१५॥
अल्लाहो लौकिकानां यद् हृत्सु सम्यङ् निलीयते ? । [11]अल्लाहस्तान् जनान् वेत्ति श्रद्धरा ये, तथा च ये ॥१६॥
अत्र पाषण्डिनो लोका वेत्ति सम्यक् पुनश्च तान् । [12]श्रद्विहीनास्तु येऽभूवन् श्रद्धरांस्ते ऽवदन्—"ननु ॥१७॥
अन्वित यूयमध्वानमस्माकं हि ततो वयम् । युष्माकं दुरितं सर्वं वक्ष्यामो ह्यात्मनैव तु" ॥१८॥
वस्तुतस्ते न वै तेषां वोढारः पाप्मनां मनाक् । संशयो न हि ते सर्वे सर्वथाऽनृतवादिनः ॥१९॥
[13]सशंयो नापि वक्ष्यन्ति स्वेन ते भारमात्मनः । तत्समं पुनरन्येषां चाप्यसंदिग्धमेव तु ॥२०॥
तेऽनुयुक्ता भविष्यन्ति पुनरुत्थापना ऽहनि । अधिकृत्यानृतं यत्ते सर्वथाऽघटयन्नथ ॥२१॥
[14]नहुषं प्रैषयामाऽथ वयं तद् वान्धवान् प्रति । उवास चोनपञ्चाशत् सहस्राब्दं स तेष्वथ ॥२२॥
पर्यावृणोज्जलौघस्तान् यतो जाल्मास्त आसत । [15]अरक्षाम वयं पश्चात् तञ्च नौकावतश्च तान् ॥२३॥
कृतोऽसौ लक्ष्म चाप्येकं लौकिकेभ्यो बभूव ह । [16](प्रैषयाम) तथा ऽब्रह्मं, स्वबन्धूंस्स यदाऽह वै ॥२४॥
स्तुवीध्वं यूयमल्लाहं बिभीत च ततः पुनः । इदं श्रेयोवहं वोऽस्ति वित्थ यूयमिदं यदि" ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[17]"विहाय यूयमल्लाहं मूर्त्तीनामेव केवलम् । पूजने निरता वोऽदस्त्वनृतस्यैव सर्जनम् ॥२६॥
विहाय यूयमल्लाहं यासां पूजासु संरताः । तत्वतस्ता अधिष्ठात्र्यो वृत्तेर्वो नो भवन्ति हि ॥२७॥
वृत्तिं यूयं तदल्लाहे ह्येव तावत् प्रतीच्छत । स्तुवीध्वं किञ्च तं ह्येव कार्तज्ञं तत्र यात च ॥२८॥
परावृत्योपगन्तव्यः स एव च स्थितः पुनः । [18]अथेदं प्रतिषिद्धञ्चेद् युष्माभिः क्रियते, पुरा ॥२९॥
अनेकेऽपि गणा युष्मत् प्रतिषेधं समाचरन् । वाग्घरस्य न कर्त्तव्यं विशदख्यापनात् परम् ॥३०॥
[19]किन्नाऽपश्यन्निमे लोकाः सर्गोऽल्लाहेन किंविधः, । किञ्च तत् पुनरावृत्तिं कुरुतेऽसौ हि किंविधाम् ॥३१॥
निश्चितं (बाल) लीलैव किलाल्लाहाय खल्विदम् । [20]ब्रूहि—यूयं धरित्र्यूर्ध्वं यात किञ्चाऽथ पश्यत ॥३२॥
चकार सर्गमेतं सः किम्वत् पश्चादिमं तथा । पुनः स्रक्ष्यति चाऽल्लाहः सर्वसामर्थ्यभृद् ध्रुवम् ॥३३॥
[21]कामचारात् स यं कञ्चित् दयेत पीडयेच्च वा । प्रत्यावृत्योपगन्तव्यो युष्माभिः स हि वर्त्तते ॥३४॥
[22]धरित्र्यां रक्षितुं शक्यो नात्मा नैवाऽपि चाम्बरे । युष्माभि, र्न तथाऽल्लाहमन्तरेण सखाऽस्ति वः ॥३५॥
सहायः कोऽपि वा कश्चित्; [23]न्यषेधन्नथ ये जनाः । अल्लाहस्य किलाऽऽयातान् तेन संगमथाऽपि वा ॥३६॥
ते निराशा दयाया मे, तेभ्यः कृच्छ्रमतीव च । [24]उत्तरं तस्य वंश्यानामितोऽन्यन्नाभवत्तु यत् ॥३७॥
ते ह्यवोचन्—इमं हिंस्त दहतैनमथाऽपि वा । अरक्षत्तं ततोऽल्लाहो दहनाद्, अत्र निश्चितम् ॥३८॥
सन्ति लक्ष्मणि वै तेभ्यः श्रद्दधाना हि ये जनाः । [25]स चाऽह यूयमल्लाहं विहाय केललं श्रिताः ॥३९॥
प्रतिम्नो मित्रताहेतोः मिथो लौकिकजीवने । अन्योऽन्यस्माद् विरंक्ष्यध्वे पुनरुत्थापनादिने ॥४०॥
यूयं परं, धिगन्योऽन्यं किञ्च यूयं प्रवक्ष्यथ । अनलो धाम युष्माकं, सहायो न च कश्चन ॥४१॥
[26]विशश्वास हि तं लूतस्तं तथा प्राह—खल्वहम् । प्रयामि स्वं प्रभुं, सत्यं सुधीश्चासौ प्रभुश्च सः ॥४२॥
[27]इष्वासयाप्यकूपौ चाऽदद्म तस्मै वयं पुनः । वाग्घरत्वञ्च शास्त्रञ्च तद् वंश्ययेषु प्रतिष्ठितम् ॥४३॥
अयच्छाम पुरस्कारं किञ्च तस्मै भवे किल । निश्चितं भद्रलोकेषु भवितैकः परत्र सः ॥४४॥
[28]तथा लूतस्स चाप्याह स्ववन्धून्—"ग्राम्यकर्मसु । अकृतेषु हि केनाऽपि पुराऽऽस्ते हन्त ! वो रतिः ॥४५॥
[29]किन्नु (भोगाय वै) पुंसो याथ यूयमथाऽपि च । दस्युतां याथ (मार्गेषु), कुरुध्वे ग्राम्य-कर्म च ॥४६॥
सभासु," तस्य वंश्यानां नेतोऽन्यत्तूत्तरं ह्यभूत् । ते ह्यवोचन्—"किलाऽल्लाहीं यातनां त्वं निपातय ॥४७॥
तावदस्मासु चेत्त्वं (भोः !) सत्यवागिह तिष्ठसि" । [30]स आह—हे प्रभो ! त्वं मे साह्यमद्य समाचर ॥४८॥
उत्त्थितेष्वेषु लोकेषु मम साम्मुख्यहेतवे । [31]प्रेषिताश्च यदाऽस्माभिर्वाग्घराः समुपास्थिताः ॥४९॥
शुभं वृत्तमुपादाय किलाऽब्रह्मं त आवदन् । "अमुष्य वासतेयस्य लोकान् संहर्त्तुमुद्यताः ॥५०॥
वयम् तावद् यतो ह्येते जाल्मा लोका असंशयम् । [32]स आह—"तत्र तु स्थित्या लूतस्तावद् विराजते" ॥५१॥
तेऽवदन्—"योऽपि कोप्यस्ति तत्र तत्-सुविदो वयम् । रक्षितारो वयं तस्य तस्य कौटुम्बिकस्य च ॥५२॥
विहाय तस्य जायान्तु पृष्ठगा या स्वभावतः" । [33]वाग्घराः प्रेषिताः प्रापुरस्माभिस्तु यदा पुनः ॥५३॥
सन्निर्धि तस्य लूतस्य तेन सोऽम्लायतैव तु । रक्षितुं तेभ्य आत्मानं न समर्थमबुध्यत ॥५४॥
तेऽवदन्—"मा बिभेहि त्वम्, नापि दुःखं प्रयाहि च । रक्षितारो वयं ते हि तव कौटुम्बिकस्य च ॥५५॥
विहाय तव जायान्तु पृष्ठगा या स्वभावतः । [34]"उद्यताः पातनाय स्मो वासतेयजनेषु वै ॥५६॥
आपदो वियतो यत्ते खल्ववज्ञाकृतो जनाः । [35]लक्ष्म तच्च पुनः कृत्वा विशदं निहितं खलु ॥५७॥
तेभ्यस्तावन् मनुष्येभ्यो धिया ये विचरन्ति हि । [36]मदयानान्तिके तस्य शुभेभो बन्धुरीरितः ॥५८॥
स आह—ज्ञातयो मे भोः! अल्लाहं स्तुत, किञ्च(भोः)। प्रतीक्षध्वं दिनं ह्यन्तं, क्षोभयन्तो धरां तथा ॥५९॥
चंक्रमिष्ट च मा तत्र; [37]न्यषेधंस्तं परन्तु ते । पर्यावृणोत् प्रचण्डस्तान् धराकम्पस्ततोऽथ च ॥६०॥
अतिष्ठन् पतिताः स्वेषु ते हि वेश्मस्ववाङ्मुखाः । [38]समुद्गानां तथाऽऽदानां गणाश्चापि (विनाशिताः) ॥६१॥
तदेतद् विशदं तेषां वोऽस्तु नष्टैर्गृहैः किल । भूषितान्यकरोत्तेषां कर्माणि शातनो भृशम् ॥६२॥
अरौत्सीच्चापि तान् मार्गात् सुविवेकास्तु यद्यपि । [39]कार्यदूनञ्च सामानं ततः फारोहमप्यथ ॥६३॥
(अनाशयाम) मूषो ऽसौ तान् ययौ स्पष्टलक्ष्मभिः । आवहंस्ते परं दर्पं धरित्र्यां, न हि तेऽभवन् ॥६४॥
जिष्णवस्तु परम्; [40]ह्रीत्थमस्माभिर्निग्रहं गतः । योऽपि कोऽपि कृतात् पापात् आत्मना; तदनन्तरम् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

अन्धवात्या किलाऽस्माभिरभिलक्ष्य तु कञ्चन । प्रेषिताऽभूदथो तेषां चण्डस्फोटेन चेतरः ॥६६॥
संविग्नः, कोऽपि चैतेषामुर्व्यामस्माभिरीरितः । कश्चनाऽन्योऽप्सु चैवैषां मज्जितो, न कथञ्चन ॥६७॥
अल्लाहो जालमधीस्ते तु जाल्माः स्वेषु स्वतोऽभवन् । [४१]आरोहन्ति तुलां ते वै विहायाऽल्लाहमत्र ये ॥६८॥
मित्राणि कुर्वतेऽन्यांस्तु तया ह्यणकलूतया । यया स्याद् वयितं वेश्म; लूता-वेश्म च निश्चितम् ॥६९॥
वेश्मनामपि सर्वेषां वेश्म हीनबलं मतम् । सूत्तमं ह्यभविष्यच्चेदज्ञास्यन् खल्विदन्तु ते ॥७०॥
[४२]वेत्त्यल्लाहो ह्यसन्देहं तं विहाय जना इमे । यं स्तुवन्ति, सुधीः किञ्च प्रभुत्वाच्छालते स वै ॥७१॥
[४३]भवन्ति प्रस्तुता एता अस्माभिरुपमा यथा । लोको बुध्येत, बुध्यन्ते प्राज्ञा एव परत्विमाः ॥७२॥
[४४]सत्येन ससृजेऽल्लाहो धरित्रीं वियतस्तथा । श्रद्धरेभ्यो ध्रुवञ्चास्ते लक्ष्मैकं तदवस्थितम् ॥७३॥

इति विंशं पारायणम्

इति श्रीसत्यदेववर्मकृतौ सांस्कृते कुराणे पारायणविंशकम् ।

अथैकविंशं पारायणम्

[४५]अधीष्व पुस्तकं तद् यत् जायते त्वयि काशितम् । पूजां प्रतिष्ठितां चैव कुरु, पूजा ह्यसंशयम् ॥७४॥
ग्राम्यतावारणा, किञ्च, वारयेद् दुरितादपि । अल्लाहस्मरणं तावद् गुणकार्यति चोत्तमम् ॥७५॥
वेत्ति तत्सर्वमल्लाहश्चेष्टध्वे यूयमत्र यत् । [४६]शास्त्रविद्भिर्विवादश्च न कार्यः, क्रियतेऽथ चेत् ॥७६॥
उत्तमां पद्धतिं श्रित्वा, तान् विहाय तु ये जनाः । अत्याचार परास्तावद्, ब्रूहि चैवास्ति काशितम् ॥७७॥
अस्मासु यच्च युष्मासु तत्र श्रद्धापरा वयम् । प्रतीष्टो यः किलाऽस्माकं युष्माकञ्चापि वर्त्तते ॥७८॥
समोऽसावुभयोरेव, तद् विधेयास्तथा वयम् । [४७]पुस्तकं त्वयि चाऽस्माभिस्तद् वदेवाऽस्ति काशितम् ॥७९॥
जनास्तत् पुस्तकं येभ्योऽस्माभिर्दत्तमभूत् पुरा । श्रद्दधाना भवन्त्यस्मिन्, एषाञ्चैवाऽपि सन्ति ये ॥८०॥
श्रद्दधाना भवन्त्यस्मिन्, आयातानां भवन्ति नः । श्रद्विहीना जना ह्येव किञ्च तावन्निषेधकाः ॥८१॥
[४८]न चाऽतः प्राक् त्वया किञ्चित् पुस्तकं पठितं, न वा । लिखितं स्वेन हस्तेन, सति तस्मिन् जनाः किल ॥८२॥
मिथ्यावादरताः स्युर्वै सन्दिहाना (असंशयम्) । [४९]स्पष्टानि तानि लक्ष्माणि हृत्सु तेषां, अदीयत ॥८३॥
येभ्यस्तावज् जनेभ्यो ऽत्र ज्ञानं, किञ्च निषेधकाः । आयातानामथो ऽस्माकं त एव ये हि पापिनः ॥८४॥
[५०]लक्ष्मणां, ते च पृच्छन्ति, केन नाऽत्राऽवतारणा । अस्य तावत् प्रभोः ? ब्रूहि—लक्ष्माण्यल्लाहसन्निधौ ॥८५॥
एव तिष्ठन्ति, अहं त्वस्मि विशदो ह्येव चेतकः । [५१]किन्न्विदं ह्येव पर्याप्तं नैतेभ्यस्त्वयि काशितम् ॥८६॥
पुस्तकं वाचयित्वाऽदः श्राव्यन्ते यज्जना इमे । दयाऽत्र खलु निर्विष्टाह्यनुस्मारकमप्यदः ॥८७॥
जनेभ्यस्तादृशेभ्यो ये श्रद्दधाना भवन्ति हि । [५२]ब्रूहि'—खल्वन्तरे मे च युष्माकमन्तरेऽपि च ॥८८॥
अल्लाहसाक्षितैवाऽस्ति पर्याप्ता, वेत्त्यसौ च यत् । धरित्र्यां वर्त्तते विष्टं विहायस्स्वथ यत् पुनः ॥८९॥
गता हानिं हि ते लोकाः श्रद्दधाना भवन्ति ये । मिथ्यात्वे, गत-विश्वासा अल्लाहे ये तथैव च ॥९०॥
[५३]आमनन्ति जनास्त्वां हि कृच्छ्रशैघ्र्याय खल्विमे । निश्चितो वाऽभविष्यच्चेत् समयो (यातनाकृते) ॥९१॥
आपतिष्यदसावेषु, साऽकस्मादापतिष्यति । एषु, नैते भविष्यन्ति तज्ज्ञाः किञ्च कथञ्चन ॥९२॥
[५४]आमनन्ति जनास्त्वां हि कृच्छ्रशैघ्र्याय खल्विमे । पर्यावरिष्यते सत्यं नारकोऽश्रद्धरानिह ॥९३॥
[५५]दिने तस्मिन् यदा ह्येतान् यातना संवरिष्यते । अवस्तात् पादयोरूर्ध्वं चैव, वक्ष्यत्यसौ पुनः ॥९४॥
"आस्वदेत फलं तस्य यदकार्ष्ट किलेह तु" । [५६]बन्धका मम भो यूयं भवथ श्रद्धरा हि ये ॥९५॥
धरित्री मे विशालाऽतो मामेव केवलं स्तुत । [५७]मृत्योः स्वादोऽनुभव्योऽत्र प्रतिजीवं, ततोऽथ च ॥९६॥
प्रत्यावृत्योपगन्तव्या युष्माभिर्वयमेव तु । [५८]श्रद्धरा येऽभवन्नत्र भद्रकर्मकृतस्तथा ॥९७॥
तान् वयं वासयिष्यामः स्वर्गवेश्मसु, यान्यधः । निम्नगाः सुवहन्त्यो वै भविष्यन्ति हि, यत्र ते ॥९८॥
वत्स्यन्ति सर्वदा, सत्यं पुरस्कारो ह्यनुत्तमः । भद्रकृद्भ्यः; [५९]अतपन् ये, ऽथ सविश्वासा निजप्रभौ॥९९॥
[६०]प्राणिनः खल्वसंख्याता अत्र ये धारयन्ति नो । प्राणधारणसामग्रीमात्मनैव, स एव तु ॥१००॥
दत्ते तेभ्यो हि तां तावद् युष्मभ्यं पुनरेव च । श्रोता स वर्त्तते किञ्च विज्ञाता चाऽपि वर्त्तते ॥१०१॥
[६१]अनुयुंक्ष्व त्वमेतान्—को धरित्रीं वियतस्तथा । सृष्टवान्, कर्मयुक्तौ कः सोमसूर्यौ तथाऽकरोत् ॥१०२॥

CC-0. In Public Domain. Digitized by eGangotri

तेऽनिवार्यं प्रवक्ष्यन्ति—ह्यल्लाहः सृष्टवानिमान् । तत्ते केनाऽनुयन्त्यत्र विपरीताऽयनं पुनः ? ॥१०३॥
[६२]यस्तु (सत्यं त्विदं तावद्) अल्लाहाय हि रोचते । बन्धकानां ततस्तस्मै महौदार्यं तनोत्यसौ ॥१०४॥
प्रदत्ते परमन्येभ्यो मानोन्मानपुरस्सरम् । संशयो न हि सोऽल्लाहः सर्व विद् वर्त्तते किल ॥१०५॥
[६३]पृच्छ्रेश्चेत् त्वमिमान् कस्कमवर्षद् गगनात्ततः । तेन कोऽजीवयद्भुवुर्वीमवसन्नां पुरा पुनः ॥१०६॥
तेऽनिवार्यं वदिष्यन्ति—"ह्यल्लाहः" ब्रूहि—वर्त्तते । अल्लाहाय प्रशंसा वै, नानेके तद्विदः परम् ॥१०७॥
[६४]रञ्जनं मनसो ह्येव केवलं भवजीवनम् । क्रीडा च, वेश्म याथार्थ्याज् जीवनं पारलौकिकम् ॥१०८॥
अहो भद्रं विदानाश्चेद् भवन्तीदमिमे जनाः । [६५]यदा नावोऽधितिष्ठन्ति जना आकारयन्त्यमी ॥१०९॥
तदाल्लाहं विधायाऽस्मै विश्वासमच्छमात्मनः । यदा चासौ प्ररक्ष्यैतांस्तटं प्रत्यानयत्यमी ॥११०॥
प्रतिम्नः कुर्वते ह्यस्य; [६६]येनाऽस्माभिरदीयत । एभ्यो यत् काशयेयुस्ते तत्राऽविश्वास (मग्रतः) ॥१११॥
(अथेत्थं) ते च भुञ्जीरन् सुखान्यस्त्वचिरादमी । विज्ञास्यन्ति; [६७]किमेभिर्नो दृष्टं सृष्टं यदस्ति हि ॥११२॥
अस्माभि धर्मि शं पूर्णं तावदेकं तु, यद्यपि । उत्साद्यन्ते किलाऽमीषां समन्तात् मानुषाः, अथो ॥११३॥
मिथ्यात्वमिष्टमेषां किम् ? साऽविश्वासा अमी तथा । अल्लाहस्य महौदार्ये; [६८]तस्माज्जालमो भवेच्च कः ॥११४॥
भूत्वाऽल्लाहेन सम्बद्धो घटयेदनृतं हि यः । निषेधेत् किञ्च यः सत्यं जालमग्रे प्रतिष्ठितम् ॥११५॥
नारके किल वासो वै जालमा ये खलु पूरुषाः । [६९]येऽसहन्ताऽत्र कष्टानि किलाऽस्मभ्यं वयं हि तान् ॥११६॥
दर्शयिष्याम आत्मीयान् मार्गास्तावदसंशयम् । पक्षपात्यस्ति सोऽल्लाहो भद्रकर्मकृतां (सदा) ॥११७॥

योगः—११७

CC-0. In Public Domain. Digitized by eGangotri

३०

सूक्तम्–रौमाः

(अर-रूम)

(महाकालेऽवतीर्णाः षष्टिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ० लाम० मीमेति; [२]रौमा जाताः पराजिताः, । [३]आरादेव प्रदेशे तु; तथोर्ध्वं स्वपराजयात् ॥ १ ॥
ते भविष्यन्ति जेतारः; [४]हायनेषु हि केषुचित् । पूर्वस्मिन्नुत्तरस्मिश्च किलाल्लाहो हि वै प्रभुः ॥ २ ॥
श्रद्धराश्च दिने तस्मिन् प्रसत्स्यन्ति; [५]सहायताम् । लब्ध्वाल्लाहस्य (किञ्चैव), साहाय्यं स च यच्छति ॥ ३ ॥
यं स कामयते तस्मै, बली चासौ दयी तथा । [६]अल्लाहस्य प्रतिज्ञेयं, प्रतिज्ञां न विरुध्यते ॥ ४ ॥
आत्मनीनां तथाऽल्लाहः, नानेके तद्विदः परम् । [७]जीवनस्यैहिकस्येते विदन्ति बाह्यमेव च ॥ ५ ॥
रूपं, ते च प्रमाद्यन्ति परलोकात्तु सर्वथा । [८]नात्मना चिन्तितं किन्नु भवत्येभिः कदाचन ? ॥ ६ ॥
धरित्रीं वियतश्चैव तेऽन्तरा यच्च तिष्ठति । सृष्टवांस्तत् किलाल्लाहः समं सत्येन, खल्वथ ॥ ७ ॥
निश्चितावधये ह्येव, नानेके तु जनाः परम् । आत्मनः प्रभुणा संगे सविश्वासा भवन्ति हि ॥ ८ ॥
[९]किन्न चंक्रमणं चैभिः कृतं लोकैरिह क्षितौ । दृष्टं च कीदृशो जातोऽनुबन्धः प्राग्भुवां नृणाम् ॥ ९ ॥
एभ्यः, इमानतीत्यैव बले ते खल्विहासत । तैः कृता महती क्रान्तिर्धरित्र्यां, सा च वासिता ॥१०॥
बह्वतीत्य हि तान् यावद् वासिता विहिता तु तैः । लक्ष्मभिः विशदैस्तांश्च वाग्घराः समुपस्थिताः ॥११॥
नाऽल्लाहो जालमधीस्तेषु जालमाः स्वेषु स्वतस्तु ते । [१०]अभद्रः परिणामोऽथ जातोऽभद्रकृतां पुनः ॥१२॥
न्यषेधंस्तावदायातानल्लाहस्य यतो हि ते । परिहासरताश्चैव तानधिकृत्य तेऽभवन् ॥१३॥
[११]सर्गञ्च कुरुतेऽल्लाहः पुनरावर्त्तयत्यथ । स एव चाऽथ युष्माभिः प्रत्यावर्त्यो ध्रुवं ततः ॥१४॥
[१२]यदा कालोदयस्तस्य मुहूर्त्तस्य भविष्यति । सापराधा अवाचो हि भविष्यन्ति निराशया ॥१५॥
[१३]नाभिशंसक एवाऽपि तत्कृतेभ्यो भविष्यति । प्रतिमभ्यश्च कोऽप्येषां, खण्डनाश्च तथैव ते ॥१६॥
स्वकृतानां भविष्यन्ति प्रतिम्नां (पुनरेव च) । [१४]यदा कालोदयस्तस्य मुहूर्त्तस्य भविष्यति ॥१७॥
विकरिष्यन्ति सर्वेऽपि मानवाश्च तदा पुनः । [१५]श्रद्धरा येऽनूकूलानि व्यधुः कर्माण्यथैव च ॥१८॥
प्रसन्ना वासयिष्यन्ते एकत्रोपवने हि ते । [१६]श्रद्विहीनास्तु येऽस्माकमायातानां निषेधकाः ॥१९॥
अवाप्तेः परलोकस्य चैव, ते यातनास्वलम् । करिष्यन्ते हि निर्विष्टाः; [१७]स्तुत्योऽल्लाहो भवत्यतः ॥२०॥
जायते वो यदा सायं प्रातर्वो जायतेऽथ च । [१८]प्रशंसा स्यात् पुनस्तस्मै ह्येवोर्व्यां गगनेष्वपि ॥२१॥
तृतीये किल यामे च मध्याह्ने पुनरेव च । [१९]सजीवं गतजीवात्तु सजीवाच्च तथेतरम् ॥२२॥
असौ भावयते, दत्ते धरित्रीं जीवनं पुनः । मृत्योरूर्ध्वं, प्रसोष्यध्वे यूयं चापीत्थमेव तु ॥२३॥
[२०]लक्ष्मणां तस्य किञ्चैतत्-मृदोऽसौ सृष्टवान् हि वः । ततो युष्मांश्च पश्यामश्चंक्रमं कुर्वतो नरान् ॥२४॥
[२१]लक्ष्मणां तस्य किञ्चैतद्-युष्मभ्यं तावदसृजत् । द्वन्द्वानि युष्मदेवाऽसौ स्वतो यूयमवाप्नुत ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

येन सौख्यञ्च शञ्चैव तेभ्य एव; दयामथो । स्नेहमारोपयच्चैव युष्माकमन्तरे हि सः ॥२६॥
अत्र लक्ष्माण्यनेकानि ध्रुवं तेभ्यः समासते । ये जनाः सविवेका हि भवन्त्यत्र (भवे किल) ॥२७॥
[२२]लक्ष्मणां तस्य किञ्चापि सृष्टिरुर्व्या दिवां तथा । रागाणां भिन्नता, वाचां भिन्नता चाऽपि तिष्ठति ॥२८॥
अत्र लक्ष्माण्यनेकानि ज्ञानवद्भ्यः सुनिश्चितम् । [२३]लक्ष्मणां तस्य किञ्चापि—निद्रा वो निशि चाहनि ॥२९॥
आग्रहोऽनुग्रहायास्य चैव; लक्ष्माणि सन्ति हि । अत्राऽनेकान्यसंदेहं नृभ्यो धातृभ्य एव तु ॥३०॥
[२४]लक्ष्मणां तस्य किञ्चेदम्:—आशायै च भयाय च । असौ दर्शयते युष्मान् विद्युतम्, वर्षयत्यथ ॥३१॥
जलं व्योम्नो, धरित्रीञ्च दत्तै तेन हि जीवनम् । मृत्योरूर्ध्वं पुनस्तस्या अत्र लक्ष्माणि सन्ति हि ॥३२॥
खल्वनेकान्यसंदेहं बुद्धिजीविभ्य एव तु । [२५]लक्ष्मणां तस्य किञ्चेदं चाप्युर्वीवियतस्तथा ॥३३॥
भवन्ति सुस्थितास्तस्य किलाऽऽदेशानुसारतः । युष्मांस्ततो यदा चाऽपि तस्या ऽऽहूति विजायते ॥३४॥
उर्व्यास्तदैव युष्माकमयनं भविता बहिः । [२६]तस्यैव योऽपि कोऽप्यत्र भवत्युर्व्यां वियत्सु च ॥३५॥
विधेयास्तस्य तिष्ठन्ति सर्व एव तथैव च । [२७]स चैव कुरुते यस्तु सर्गमावर्त्तयत्यथ ॥३६॥
सुगमं तावदत्यर्थमिदं तस्य कृते किल । अद्वितीयं तदौपम्यं धरित्र्यां गगनेषु च ॥३७॥
प्रभुत्वात् शालते चासौ तत्वदर्शी च वर्त्तते । [२८]औपम्यं युष्मदेवाऽसौ युष्मभ्यं सृजति स्वतः ॥३८॥
किन्विदम्—स्वामिनो यूयं येषां, तेषां हि केचन । समांशभागिनः साम्याद् युष्माभिर्विहितास्ततः ॥३९॥
(सम्पदो) या अयच्छाम वयं वः, तद् भयं पुनः । युष्मासु युष्मदीयानां यथा तिष्ठति किं तथा ? ॥४०॥
वर्णयामो वयं हीत्थमायातान् विशदं खलु । ये हि बुद्धया प्रवर्त्तन्ते तेभ्यो लोकेभ्य एव तु ॥४१॥
[२९]न तावद्; ये पुनर्जाल्माः कामाश्वारोहिणो हि ते । विना ज्ञानं; ततो मार्गं को नु सन्दर्शयेत्तु तम् ॥४२॥
अल्लाहो ह्येव यं तावद् भ्रंशयेद् वर्त्मनः पुनः । सहायश्चापि नो कश्चित् तद् विधानां नृणां ततः ॥४३॥
[३०]अतः संहृत्य सर्वेभ्यो द्रव्येभ्योऽपि निजं मनः । अस्मिन्नेव समाधेहि धर्मे, ऽसौ प्रकृतिः प्रभोः ॥४४॥
मानवं सोऽसृजद् यत्र, परिवर्त्या न वर्त्तते । अल्लाहस्य पुनः सृष्टिः, अयञ्चैवोपपद्यते ॥४५॥
धर्मः; परन्तु बुध्यन्ते नाऽनेके तु जना इह । [३१]प्रवृत्तिमनु तं तावद्; अमुष्मात् प्रविभीत च ॥४६॥
पूजां प्रतिष्ठितां किञ्च कुरुध्वं, मा स्म भूत च । तेषां तस्य प्रतिम्नो ये घटयन्ति जना इह ॥४७॥
[३२]ये मतं स्वं पृथक् कृत्वा किञ्च तिष्ठन्ति मानवाः । दलेषु प्रविभक्ता ये चैव, यद् यस्य तिष्ठति ॥४८॥
सम्प्रदायस्य पार्श्वेऽथ रममाणः स तत्र हि । [३३]आह्वयन्ति प्रभुं स्वं वै यन्ति दुःखं यदा नराः ॥४९॥
दर्शयन्तः प्रवृत्तिं स्वां तमभि, स पुनर्यदा । स्वदयारसमेतान् हि स्वादयत्येव तत्तदा ॥५०॥
केचनैषां प्रतिम्नोऽस्य घटयन्ति निजप्रभोः । [३४]काशयेयुरविश्वासमस्मद्दत्तेन ते यथा ॥५१॥
अस्तु, यूयं प्रभुञ्जीध्वं सुखानि, त्वचिरात् पुनः । वेत्स्यथैव; [३५]किमस्माभिर्लक्ष्म किंचित् प्रकाशितम् ॥५२॥
तेषु, यत् पक्षपातेन प्रतिम्नां ब्रुवते हि ते । यानि मे घटयन्तीह तत्तुलायाञ्च सर्वथा ? ॥५३॥
[३६]स्वादयामो रसं लोकान् दयायाश्च यथा वयम् । तस्मिंस्तेऽतीव हृष्यन्ति, प्रेषितं चाग्रतः करैः ॥५४॥
यत्तदीयैस्ततस्तेषु विपच्चेदापतेत् क्वचित् । निराशास्ते हि जायन्ते; [३७]किन्न पश्यन्ति खल्विमे ॥५५॥
अल्लाहो (यमभिप्रैति) महोदार्यं तनोत्यथ । मानोन्मानेन किञ्चैव परस्मै स प्रयच्छति ॥५६॥
अत्र लक्ष्माण्यऽनेकानि तेभ्यो ये श्रद्धयाऽन्विताः । [३८]बान्धवाय ततस्तस्य धर्म्यांशो दीयतामथो ॥५७॥
परापेक्षिजनायाऽपि पान्थाय पुनरेव च । सूत्तमं तदिदं तेभ्यो ये भवन्त्यभिलाषुकाः ॥५८॥
अल्लाहस्य प्रसादस्य, त एव सफला अपि । [३९]यत् कुसीदं पुनर्यूयं दत्थ वृद्धिर्यतो भवेत् ॥५९॥
परेषां मिश्रितं भूत्वा धने, तन्न हि वर्धते । दृष्ट्याऽल्लाहस्य, यद् यूयं दत्थ दानं विधाय तु ॥६०॥
अल्लाहस्य मुखाऽऽकांक्षां, तादृशाः किल मानवाः । प्राप्तारो बहुकृत्वस्तत्; [४०]स खल्वल्लाह एव तु ॥६१॥
युष्मांत्ससर्ज यः, किञ्च पुनर्वृत्तिमदादथ । मृत्युमाययते पश्चाज् जीवयिष्यति चैव यः ॥६२॥
अस्ति किं कर्मणामेषां कर्म किञ्चित् करोतु यः । प्रतिम्नां घटितानां वै युष्माभिः कोऽपि सर्वथा ? ॥६३॥
महिम्ना राजतेऽसौ च किलोच्चैरतियाय च । प्रतिम्नो, घटयन्तीमे यान् जनास्तस्य खल्विह ॥६४॥
[४१]जले चैव स्थले चैव विकृतिः प्रासरत् पुनः । पाणिभिर्मानुपाणान्तु कृतात् पर्यर्जनात् किल ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

कृतानां कर्मणां यत्तैः स्वादमास्वादयेत् स तान् । कदाचित्ते हि गच्छेयुर्विरामम्; [४२]ब्रूहि-पश्यत ॥६६॥
चंक्रमन्तो धरायां हि किमुदर्कास्तु तेऽभवन् । पूर्वजा ये तवाऽभूवन् अनेके तेष्विहासत ॥६७॥
पूजकाः प्रतिमानां वै; [४३]प्रवृत्तिमात्मनस्ततः । ऋजौ धर्मे विधत्तेह दिनात्तस्मात् पुरैव यत् ॥६८॥
आपाति नो निवर्त्यञ्च तथाऽल्लाहादुपैति यत् । संविभक्ता दिने तस्मिन् भविष्यन्ति मिथो जनाः ॥६९॥
[४४]श्रद्विहीनास्तु ये तेषामश्रद्धाऽपि तथैव च । फलिष्यति किलाऽमीभ्यो, भद्रकर्मकृतोऽथ ये ॥७०॥
तेषामेव च भद्राय भद्रता फलिता भवेत् । [४५]श्रद्धरान् वै जनान् येन भद्रकर्मकृतस्तथा ॥७१॥
स्वौदार्येण पुरस्कुर्यादसौ, नास्य रुचिञ्जनाः । श्रद्विहीना जनास्तावद्, वर्त्तते नाऽत्र संशयः ॥७२॥
[४६]लक्ष्मणां तस्य किञ्चेदं शुभवृत्तप्रदाऽनिलान् । असावीरयते येन दयाया आत्मनः स वः ॥७३॥
कारयेद् वै रसास्वादं, तथाऽमुष्य च शासनान् । नावश्चलन्तु, यूयञ्च मार्गयेताऽऽत्मवर्त्तनम् ॥७४॥
कार्त्तज्ञं दर्शयेताऽथ; [४७]त्वत् पुरा प्रेषिता अथो । वाग्घरा बहवोऽस्माभिर्गणांस्तेषां किल प्रति ॥७५॥
उपातिष्ठन्त ते चैव प्रमाणैर्विशदै हि तान् । सापराधास्ततोऽभूवन् तेषां ये तेषु तद् वयम् ॥७६॥
प्रतिशोधपरा जाताः; श्रद्धराणां पुनर्वयम् । साहाय्यकरणं धर्मं तावन्मन्यामहे ध्रुवम् ॥७७॥
[४८]अल्लाहस्त्वेव यो वायूनीरयत्यत्र, ते पुनः । उद्भावयन्ति मेघान् वै व्योम्नि तान् विकिरत्यथ ॥७८॥
यथाकामं ततश्चैव खण्डशः कुरुते स तान् । ततो वर्षकणास्तेभ्यो निर्यायाऽऽयान्ति बाह्यतः ॥७९॥
पश्यसीदं त्वमप्यत्र; स्वप्रतीष्टेषु तांस्ततः । बन्धकेषु यदाऽमी च मोदन्ते स हि वर्षति ॥८०॥
[४९]आसत ते निराशा हि प्रेषणादस्य यद्यपि । पुरा यावदिदानीन्तु; दया-लक्ष्माणि पश्य तु ॥८१॥
त्वमल्लाहस्य हन्तैतत् त्वाश्चर्यं विद्यते महत् । मृत्योरूर्ध्वं धरित्र्यै स जीवनं संप्रयच्छति ॥८२॥
मृतानां जीवकस्तावद् वर्त्ततेऽसौ ध्रुवं, स वै । सर्वं सामर्थ्यभृत् किञ्च; [५१]प्रेषयेम कदाचन ॥८३॥
वातमेकं वयं चेत्, ते पीतिमानं गताञ्च ताम् (कृषिम्) । पश्येयुर्यदि तेनाऽपि स्थास्यन्त्यश्रद्धरा अमी ॥८४॥
[५२]समर्थः श्रावणे नाऽसि मृतानां त्वं कथञ्चन । न चैडानां समर्थोऽसि शब्दानां श्रावणे पुनः ॥८५॥
पराङ् आस्या यदा भूत्वा निवर्त्तन्ते हि ते खलु । [५३]न चैवान्धान् पथोभ्रंशात् त्वं मार्गालम्भने क्षमः ॥८६॥
समर्थः श्रावणे त्वन्तु तेषामेव हि केवलम् । आयातेषु किलाऽस्माकं श्रद्दधाना भवन्ति ये ॥८७॥
भवन्ति ते जनाश्चैव किलात्राऽऽत्मसमर्पकाः । [५४]अल्लाहस्त्वेव युष्मान् यः ससर्ज निर्बलान् पुरा ॥८८॥
शक्तिमाधाच् च नैर्बल्यादूर्ध्वं, शक्तेरनन्तरम् । नैर्बल्यं वृद्धताञ्चैव ततो युष्मास्ववेशयत् ॥८९॥
यत्कामोऽदः सृजत्येष, विज्ञः सामर्थ्यभृच्च सः । [५५]दिने यस्मिंश्च कालोऽसौ समभ्येष्यति पापिनः ॥९०॥
ते वदिष्यन्ति शप्त्वेदम्—स्थिता नैव कथञ्चन । एकस्या घटिकाया वै वयन्तूर्ध्वं (सुनिश्चितम्) ॥९१॥
इतीत्थं सर्वदैवैते वञ्चिता हि स्थिता जनाः । [५६]येभ्यो ज्ञानञ्च श्रद्धा च परं तावददीयत ॥९२॥
ते वदिष्यन्ति—यूयं वै पुनरुत्थापनादिनम् । यावत् सत्यं स्थिता एव खल्वल्लाहस्य शासनात् ॥९३॥
इदं सन्तिष्ठते सत्यं पुनरुत्थापना-दिनम् । अजानन्तः परं यूयं तावदेनच्चिरात् स्थिताः ॥९४॥
[५७]आचरन् ये जनाः पापं दिने तस्मिन् कथञ्चन । मिषाणि तत्कृतानीह नो फलिष्यन्ति सर्वथा ॥९५॥
न वाऽऽज्ञप्ता भविष्यन्ति निष्कृतिं कर्त्तुमेव ते । [५८]कुराणेऽस्मिन्नथा ऽस्माभिरशेषा उपमाः किल ॥९६॥
निबद्धाः, अथ चेत् त्वं (भोः) उपेयाः खल्विमान् जनान् । लक्ष्माऽऽदायाऽपि यत् किंचित् श्रद्विहीनास्तु मानुषाः ॥९७॥
इदमेव वदिष्यन्ति—"पाषण्ड्येव तु वर्त्तसे" । [५९]ह्रन्यज्ञानां किलाल्लाहो मुद्रयत्येवमेव तु ॥९८॥
[६०]याहि तोषमतस्त्वं (भोः !); प्रतिज्ञा वर्त्तते सती । अल्लाहस्य ध्रुवम्, ये च श्रद्विहीनास्तु मानवाः ॥९९॥
पश्य ते न हि पश्येयुर्लघिमानं क्वचित् त्वयि ।

योगः—९९॥

CC-0. In Public Domain. Digitized by eGangotri

३१

सूक्तम्–लुक्मानः

(लुकमानः)

(महाकालेऽवतीर्णाः चतुस्त्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अलिफ० लाम० मीमेति; [2]ग्रन्थाऽऽयाता इमे किल । तत्त्वस्य दर्शिनस्तावत्, [3]मार्ग सन्दर्शकाः, दया ॥ १ ॥

किञ्च तेभ्यो जनेभ्यो ये भद्रकर्मस्विहारताः । [4]पूजां प्रतिष्ठितां ये च कुर्वन्ति प्रददन्ति च ॥ २ ॥

दानं कुर्वन्ति विश्वासं परलोके तथैव च । [5]एत एव लभन्ते ये स्वप्रभोर्मार्गदर्शनम् ॥ ३ ॥

एत एव च साफल्यं गन्तारो ये पुनर्जनाः । [6]ईदृशश्चापि लोकानां यस्तु पण्यरमो जनः ॥ ४ ॥

पुष्पितानां हि वाचानाम्, भ्रंशयेद् वर्त्मनो यथा । अल्लाहस्य, बिना ज्ञानमिमांश्चापहसेत् पुनः ॥ ५ ॥

यातना सापमानाऽऽस्ते तद्विधेभ्यस्सुनिश्चितम् । [7]आयातान् श्राव्यतेऽसौ च तथाऽस्माकं यदैव तु ॥ ६ ॥

पराङ् आस्यो हि गर्वेण स भवेत् न हि सर्वथा । यथेव ते श्रुतास्तेन भवेयु; पुनरेव च ॥ ७ ॥

यथेव कर्णयोस्तस्य पिधानं स्यात् समाहितम् । अस्त्वसौ सूच्यतामेका यातनाऽतीव कृच्छ्रकृत् ॥ ८ ॥

अभ्युपेतुंपरा ह्येव; [8]श्रद्धरा ये पुनर्जनाः । भद्रकर्मकृतस्तेभ्योऽनाविलोपवनानि तु ॥ ९ ॥

[9]यत्र वत्स्यन्ति ते शश्वत्, प्रतिज्ञेयं सती किल । अल्लाहस्य, सुधीश्चैव प्रभुत्वाच्छालते च सः ॥१०॥

[10]व्योमानि ससृजेऽसौ च विनैवाश्रयमेव तु । ईक्षसे त्वं यथा, किञ्च धरायां समवेशयत् ॥११॥

पर्वतान्, सा न कम्पेत युष्माभिस्तु समं यथा । तस्यां सर्वविधान् जीवानकिरत् पुनरेव च ॥१२॥

अवर्षद् वारि चाऽकाशात्, तस्याः किञ्चोदपादयत् । सर्वमप्युत्तमं द्रव्यम्; [11]सर्गोऽल्लाहस्य खल्वयम् ॥१३॥

साम्प्रतं दर्शय त्वम्मे यत्तदन्यै विनिर्मितम् । न तावत् विशदं ह्येते जाल्मा भ्रष्टाऽयनाः किल ॥१४॥

[12]लुकमानमयच्छाम धियञ्चैव वयं पुनः । शंसन्तो यत् पुरोऽल्लाहं कार्त्तज्ञं स्वं प्रदर्शय ॥१५॥

दर्शयिष्यति कार्त्तज्ञं यः स तत्त्वेव चात्मने । दर्शयिष्यति कार्तघ्नं यश्च (जानात्वसौ पुनः) ॥१६॥

अनपेक्षः स्वतोऽल्लाहः प्रशंसा-भूमिरेव च । [13]लुकमानः स्वसूनुञ्च यदाऽह तं विबोधयन् ॥१७॥

प्रिय पुत्रक ! मे त्वं भोः ! घटयेर्न कदाचन । अल्लाहस्य प्रतिम्नो वै, प्रतिम्नां घटनं ध्रुवम् ॥१८॥

वर्त्तते हि महत् पापम्; [14]दिष्टोऽस्माभिश्च मानवः । विषयेऽमुष्य पित्रोर्वै गर्भ आधाय तत्प्रसूः ॥१९॥

यापयामास सा कालं कष्टमापद्य सन्ततम् । विहीनं क्षीरपानस्य द्व्यब्दादूर्ध्वममुष्य च ॥२०॥

पित्रोर्ममाऽथ कार्त्तज्ञं त्वं व्रजाऽन्तेऽहमेव च । युष्माभिस्त्वस्म्यवाप्तव्यः; [15]पारवश्यं पुनर्यदि ॥२१॥

गमयेयुः क्वचित् त्वान्ते घटनाय तु कञ्चन । सहभाजं हि मे, यस्य न ते ज्ञानं च किञ्चन ॥२२॥

मा कृथा वचनं तेषां, तानुपेहि भवे पुनः । सदैव भद्रभावेन, मार्गं तस्याऽनुयाहि च ॥२३॥

यो जनस्संगतः सार्धं मया तिष्ठति संततम् । परावृत्योपगन्तव्यो युष्माभिस्त्वहमेव हि ॥२४॥

तदाऽहं बोधयिष्यामि यूयं यद् यदकार्ष्ट वै । [16]पुत्र वत्सल मे ! गुप्तं शिलायां खेपु वा भवेत् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

धरित्र्यां वाऽपि यत् किञ्चित् सर्षपस्य कणैः समम् । प्रकाशं भावयत्येव तदल्लाहः सुनिश्चितम् ॥२६॥
सूक्ष्मदर्शी किलाल्लाहो विज्ञः किंचापि वर्त्तते । [१७]पुत्र वत्सल मे ! पूजां प्रतिष्ठितां कुरुष्व च ॥२७॥
भद्राय प्रेरयाऽथाऽपि दुरितात् किल वारय । यातना चाऽपतेद् याऽपि तस्यां धैर्यं विधारय ॥२८॥
निश्चितं साहसेनैव सर्वमेतत् प्रसिध्यति । [१८]तिरश्चीनं पुनर्वक्त्रं मा कृथास्स्वं तथैव च ॥२९॥
दृप्तो भूत्वा न वा भूमौ कुरुष्व गतिमप्यथ । नाऽल्लाहायात्मनः शंसी रोचते तु विकत्थनः ॥३०॥
[१९]त्वं सदागतिको भूयाः मन्दवाक् पुनरेव च । वाचानां त्विह सर्वासां गार्दभीवाङ् मताऽशुभा ॥३१॥
[२०]किन्न दृष्टं त्वयाऽल्लाहो धरित्र्यां स्वेषु यत्तथा । तत्समं सेवितुं युष्मान्तसत्येन व्ययुनक् किल ॥३२॥
विवृतं संवृतं यच्च युष्मासु विवृतं समम् । तेनाऽप्येषां स चाप्येकस्सविवादस्तु तिष्ठति ॥३३॥
अल्लाहविषये योऽत्र विना ज्ञानं हि किञ्चन । मार्गसन्दर्शकं वाऽपि भास्वत् पुस्तकमेव वा ॥३४॥
[२१]उच्यन्ते पुनरेते च यदाल्लाहाऽवतारितम् । यत्तदेवाऽनुवर्त्तध्वं ते वदन्ति—"न वै क्वचित् ॥३५॥
अन्वेष्यामो वयन्त्वेते तदेव यत्र पूर्वजान् । प्राप्नुवाम वयं तावत्; किन्विदम्-हन्त ! ताञ्जनान् ॥३६॥
आह्वयेच्छातनश्चापि दहद्वह्निं यदि प्रति । [२२]अर्पयेत्तावदात्मानं यस्त्वल्लाहाय योऽथ च ॥३७॥
शुभकर्मा भवेल् लब्धो ध्रुवं तेन स आश्रयः । विश्वास—वृंहितो यो हि, प्रत्यावृत्तिः समस्य च ॥३८॥
तमेव तावदल्लाहं प्रत्यत्र वर्त्तते सदा । [२३]यस्त्वविश्वासमेवैति नाऽविश्वासो दुनोत्वथ ॥३९॥
कथञ्चिच्चापि तस्य त्वाम्, भवामो वयमेव तु । प्रत्यावृत्योपगन्तव्यास्तैः, वयं ताञ्जनांस्तदा ॥४०॥
बोधयिष्याम एवाऽत्र यत्तेऽचेष्टन्त (संततम्) । हृत्स्थं चारि विजानाति ह्यल्लाहो नाऽत्र संशयः ॥४१॥
[२४]ईषदेव प्रयच्छामस्सौख्यं तेभ्यो वयं ततः । आहरामो हि तांस्तावद् यातनां कृच्छ्रदामभि ॥४२॥
[२५]युष्माभिश्चानुयुक्तास्ते यदि सन्तु कदाचन । कोऽसृजद् धरणीञ्चैव व्योमानि पुनरेव च ॥४३॥
ते वदिष्यन्ति "सोऽल्लाहः" ब्रूह्यल्लाहाय संस्तवः । विदन्ति न परं तेषामनेके तु जना इह ॥४४॥
[२६]अल्लाहस्यैव तत् सर्वं धरित्र्यां खेष्वथापि यत् । अनपेक्षस्स्वतोऽल्लाहः प्रशंसाऽर्हो ध्रुवं तथा ॥४५॥
[२७]तरवो लेखनीयन्ते धरित्र्यां सकला यदि । समुद्रोऽयञ्च यस्यान्ये सहायास्सप्तसिन्धवः ॥४६॥
(स्यान्मसिः) न ततोऽप्यन्तोऽल्लाहस्य कीर्त्तनस्य तु । प्रभुत्वाच्छालते ऽल्लाहस्सुधीश्चैवाप्यसौ ध्रुवम् ॥४७॥
[२८]युष्माकं सर्जनं किञ्च पुनरुत्थापनं ततः । साम्यं बिभर्ति जीवस्य सर्गेणोत्थापनेन च ॥४८॥
अल्लाहो वर्त्तते श्रोता द्रष्टा चैव न संशयः । [२९]किन्न दृष्टं त्वया ऽल्लाहो निशं संक्रामयन् दिने ॥४९॥
प्रापयत्यथ सोमार्कौ कर्मयुक्तौ करोति च । चरत्येकैक एवाऽत्र नियतावधिमेव च ॥५०॥
अथैतद् यत् किलाल्लाहो वेत्ति यच्चेष्टितं हि वः । [३०]इदञ्चैतेन सत्योऽस्ति यदल्लाहो हि केवलम् ॥५१॥
असौ मिथ्याऽथ तं त्यक्त्वाऽऽकारयन्ति च यन्त्विमे । स एवोच्चैः किलाल्लाहो महांश्चैव स वर्त्तते ॥५२॥
[३१]किन्न दृष्टं त्वया नौका समुद्रे प्लवते हि यत् । अल्लाहानुग्रहेणैव यथा युष्मान्तस दर्शयेत् ॥५३॥
कानिचित् स्वानि लक्ष्माणि ? लक्ष्माण्यत्र भवन्ति च । ध्रुवं तस्मै स्थिरो योऽत्र कृतज्ञो यश्च वर्त्तते ॥५४॥
[३२]यदा भंगस्तरंगाणामाच्छादयति किञ्च तान् । छत्र-रूपेण खल्वेते तदानीमाह्वयन्ति हि ॥५५॥
अल्लाहं पावनीं धृत्वा श्रद्धां तस्मै तु केवलाम् । अवित्वाऽसौ यदा चैतान् त्स्थलञ्च प्रापयत्यलम् ॥५६॥
सुपन्थानं प्रयात्येव कश्चिदेपान्तु पूरुषः । लक्ष्मणां तावदस्माकं स एव कुरुते नरः ॥५७॥
निषेधं, यः कृतघ्नोऽत्र वाचां भंगे च यो रतः । [३३]हे जनाः ! यूयमल्लाहादात्मनो यात साध्वसम् ॥५८॥
अह्नस्तस्मात्, पिता चैव यदा नैव भविष्यति । पुत्रोपकारकः, किञ्च पुत्रश्चापि भविष्यति ॥५९॥
नोपकारी स्वतातस्य, सत्या वाचा हि वर्त्तते । अल्लाहस्य ध्रुवम्, तस्माद् भवस्येदन्तु जीवनम् ॥६०॥
पाशयेन्न कदाचिद् वो वञ्चनायां कथञ्चन । वञ्चकः प्रभवेन्नापि युष्मान् वञ्चयित्तुं पुनः ॥६१॥
अल्लाहविषये तावत्; [३४]विभर्त्यल्लाह एव च । ज्ञानं त्वमुष्य कालस्य, स एव वारिदं तथा ॥६२॥
वर्षयत्यथ गर्भेषु यत्तद् वेत्ति स एव तु । कोऽपि जीवो न वेत्त्येतत् किमसावर्जयिष्यति ॥६३॥
दिने ह्यागामिनि त्वत्र, न चेदं वेत्ति कुत्र सः । मृतिं यास्यति भूभागे, सन्देहो नाऽत्र विद्यते ॥६४॥
विज्ञो हि वर्त्तते ऽल्लाहस्सावधानश्च वर्त्तते ।

योगः—६४॥

CC-0. In Public Domain. Digitized by eGangotri

३२

सूक्तम्–प्रणिपातः

(अ्रस-सजदा)

(महाकालेऽवतीर्णास्त्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अलिफ० लाम० मीमेति; [२]ह्यवतरणमस्य तु । पुस्तकस्य प्रभोरस्ति जगताम्, नात्र संशयः ॥ १ ॥
[३]भणन्तीमे नु किं ह्येतद् घटितममुना स्वतः । न वै, सत्यमिदं त्वस्ति त्वत् प्रभोरेव सर्वथा ॥ २ ॥
चेतयेस्त्वं यतस्तान् हि लोकान् यान्न समागतः । चेतकः कोऽपि त्वत् पूर्वम्, विन्देयुस्तेऽयनं क्वचित् ॥ ३ ॥
[४]अल्लाहस्त्वेव यस्षट्त्सु सृष्टवान् वासरेषु वै । आकाशांश्च धरित्रीञ्च यत्तयोरन्तरेऽथ च ॥ ४ ॥
ततस्सिंहासनञ्चासावारुरोह, न तं विना । त्वस्ति संरक्षकं मित्रं युष्माकं कोऽपि, नो पुनः ॥ ५ ॥
प्राभिशंसी च, तेनापि चेतनां न किमेष्यथ ? । [५]असौ व्योम्नस्समादेशमीरयत्यर्वानि प्रति ॥ ६ ॥
दिनेनैकेन तत्पश्चादूर्ध्वमेष प्रयात्यमुम् । युष्मदब्दसहस्रेण समो यस्यावधिर्मतः ॥ ७ ॥
[६]स चैव वेत्ति प्रत्यक्षं परोक्षं यस्तथैव च । प्रभुत्वाच्छालते चासौ दयावांश्चापि वर्त्तते ॥ ८ ॥
[७]सृष्टवान् यस्तु यच्चापि भव्यमेव हि सृष्टवान् । मानवीयञ्च यस्सर्गमारेभेऽथ मृदः पुनः ॥ ९ ॥
[८]द्रवात् तुच्छात् तदेकस्मात् वीजं तस्य स निर्ममे । [९]व्यधात् तं साकृतिं पश्चात् स्वीयमात्मानमप्यथ ॥१०॥
तस्मिन् न्यवेशयच्चैव प्रादात् तुभ्यमथैव च । श्रवौ हृल्लोचने किं च परं यूयं जना (बत !) ॥११॥
दर्शयथ हि कार्त्तज्ञं हीनमानम्; [१०]इने जनाः । ब्रुवन्तीत्थम् 'भविष्यामो भूमिसाद्धि वयं यदा ॥१२॥
किं पुनर्नव सर्गोऽपि नन्वस्माकं भविष्यति ? । न तावत्, वस्तुतस्त्वेते विश्वसन्त्येव नो हि यत् ॥१३॥
स्वेनं वै प्रभुणा सार्धं संगोऽस्माकं भविष्यति । [११]ब्रूहि 'मृत्योस्स वै दूतो युष्मास्वायोजितो हि यः ॥१४॥
युष्मान् ग्रसत्यसौ पश्चात् प्रत्यावर्त्तध्व एव तु । स्वं प्रभुं प्रति यूयं हि; [१२]लोकितं स्यात् कदाचन ॥१५॥
यदि त्वया यदा प्येते पाप्मानोऽग्रे निजप्रभोः । मूर्ध्न आनम्य तिष्ठन्ति (क्रोशन्तीत्थं तथैव च) ॥१६॥
प्रभो नो ! दृष्टमस्माभिश्श्रुतमस्माभिरप्यथ । अस्मान्निवर्त्तयेदानीं, भद्रकर्मकृतो वयम् ॥१७॥
भविष्यामो, वयं जाता विश्वस्तास्साम्प्रतं किल । [१३]ते जना अथ (वक्ष्यन्ते) ऐषिष्याम वयं यदि ॥१८॥
अध्वनो दर्शनं तावददास्याम सुनिश्चितम् । तस्य तस्य हि जीवस्य तं तं जीवं, परन्त्विदम् ॥१९॥
मतम्मे घटितं सत्यं यदहं नारकं किल । पूरयिष्यामि मर्त्यैश्च जिन्नैश्चैव समैरपि ॥२०॥
[१४]इदानीं स्वद्यतां तावद् रसो येन हि विस्मृतः । वासरस्यास्य युष्माभिस्सर्वथैव समागमः ॥२१॥
स्वद्यतां शाश्वतिक्याश्च यातनायास्तथा रसः । कृतानां कर्मणां तावद् युष्माभिर्या पुरस्क्रिया ॥२२॥
[१५]आयातेषु किलास्माकं श्रद्दधानास्त एव हि । चेतिता ये जना एभिर्भवन्ति प्रणिपातिनः ॥२३॥
स्वं प्रभुं ये च शंसन्ति मन्त्रैर्येऽविभ्रमास्तथा । [१६]त्यक्तशय्यासना ये चाऽप्याह्वयन्ति निजं प्रभुम् ॥२४॥
भयेन चाशया सार्धं, कुर्वतेऽथ च ये व्ययम् । तस्मादेव वयं तेभ्यस्त्वयच्छामाऽत्र यत् पुनः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[33]अभणन् निन्दिताश्चैव कृतदर्पास्तु तान् जनान् । सर्वथा नो, ऽभिसन्धिर्वो दिवारात्रमयन्त्वभूत् ॥६६॥
वचतां सन्ततं ह्यस्मान् श्रद्विहीना भवेम यत् । अल्लाहादथ कुर्याम द्वन्द्वभाजोऽमुना सह ॥६७॥
यातनां दृष्टवन्तस्तु मनस्येवातपंश्च ते । पाशस्य वलयानेषां परितः कन्धरा वयम् ॥६८॥
क्षेप्तास्मो, यदचेष्टन्त तद्वदेव पुरस्क्रिया । [34]प्रैष्यत चेतकश्चापि वासतेयेषु येष्वपि ॥६९॥
सुखारामा जना ऊचुः—न वै श्रद्दध्महे वयम् । तत्,समादाय सम्प्राप्तो ऽस्मभ्यं यत्त्वं तु साम्प्रतम् ॥७०॥
[35]अवोचंस्तेऽतिशीयैव धनेऽपत्ये वयं स्थिताः । त्वां; न वा यातना गम्या चैवास्माकन्तु तिष्ठति ॥७१॥
[36]ब्रूह्यभीष्टः प्रभोर्मे यो वृत्त्यौदार्यं तनोत्यसौ । तस्मै, ददाति चान्यस्मै मानोन्मानेन सर्वथा ॥७२॥
नो विदन्ति परं त्वेतज् जनास्तावदिहाधिकाः । [37]यौष्माकीणान्यपत्यानि वसूनि खल्विमानि च ॥७३॥
युष्मत् सान्निध्यमस्माभिः शक्तान्यापयितुं न वै । परं ये श्रद्धराः किञ्चाप्यनुकूलकृतोऽभवन् ॥७४॥
वहुकृत्वः पुरस्कारं लप्स्यन्तेऽमुष्य ते किल । प्रांशुहर्म्येषु चैवाऽमी सदा वत्स्यन्त्यशंकिताः ॥७५॥
[38]चेष्टमानाः परं ये तु न्यग्भावायात्र सन्ततम् । आयातानां किलास्माकं कष्टे स्थास्यन्ति ते भृशम् ॥७६॥
[39]ब्रूह्यभीष्टः प्रभोर्मे यो वृत्त्यौदार्यं तनोत्यसौ । आत्मनो वन्धकानां वै तस्मै यं कामयेत सः ॥७७॥
तस्मै ददाति, चान्यस्मै मानोन्मानेन सर्वथा । कुरुध्वे यद् व्ययं यूयं स्थानापन्नममुष्य च ॥७८॥
करोत्यन्यदसौ किञ्च, सूत्तमो वृत्तिदो ह्यसौ । [40]सर्वान् लोकान् यदा चासौ समवेतान् करिष्यति ॥७९॥
तदा प्रक्ष्यति देवान्त्सः—युष्मांस्ते नु किमस्तुवन् ? । [41]ते वदिष्यन्ति—त्वं तावन् महिम्ना किल भाससे ॥८०॥
वयं सम्बन्धमापन्नास्त्वया नैभिः परं क्वचित् । सत्यमेतत् त्विमे जिन्नं ह्येव (सन्तत) मस्तुवन् ॥८१॥
अनेके श्रद्दधुश्चैषां तस्मिन्नेव तु (केवले) । [42]नोपकारापकाराभ्यां तदा यूयं परस्परम् ॥८२॥
शक्ष्यथ; ये च पाप्मानस्तेषां वक्ष्याम एव तान् । "यातना वेदनाऽऽस्वादं तदग्नेः यूयमेत (भोः!) ॥८३॥
यस्या निरन्तरं यूयमासत प्रतिषेधनाः" । [43]निशाम्यन्ते यदा चैते विशदा आयताः किल ॥८४॥
ते वदन्ति—"पुमानेष तादृक्षो हन्त ! केवलम् । अस्मान् निषेद्धुकामो यस्तस्माद् यत् खल्वपूजयन् ॥८५॥
पूर्वजास्तावदस्माकं," वदन्तीत्थं तथैव च । "तदेतत् त्वनृतं ह्येव घटितं केवलम्," पुनः ॥८६॥
श्रद्विहीनाश्च सत्यस्य विषयेऽप्यवदन् यदा । तानुपैत् तत्—"इदं तावन्मायैवाऽस्ति तु केवला" ॥८७॥
[44]वयं शास्त्राण्यदद्मैभ्यो न, पठेयुर्हि यानि ते । कोऽपि नो प्रेषितश्चैषु त्वत् पुरा चेतकोऽप्यथ ॥८८॥
[45]ततो ये चाऽभवन् पूर्वं न्यषेधंस्तेऽपि वै जनाः । नाप्नुवन् दशमं भागं चाऽपि ते तस्य यद् वयम् ॥८९॥
तेभ्यस्तावदयच्छाम, खण्डिता यद्धि वाग्धराः । अस्माकं तैस्ततो दण्डः प्रचण्डो मे कियानभूत् ॥९०॥
[46]ब्रूह्यहन्तु दिशाम्येतद्ध्येव युष्मांस्तु केवलम् । सन्नद्धा भवतोत्थाय द्विशश्चैकैकशोऽपि च ॥९१॥
ध्यातेदञ्च न सोन्मादो वः सहायो हि विद्यते । चेतकः स समेष्यन्त्या यातनाया हि केवलम् ॥९२॥
[47]ब्रूहि—याचे पुरस्कारं युष्मान् यन्तु स तिष्ठतात् । सन्निधावेव युष्माकम्, अहन्त्वल्लाहमाश्रये ॥९३॥
केवलं मां पुरस्कर्तुं, सर्वोपर्यस्य साक्षिता । [48]ब्रूहि—सत्यं प्रभुर्मेऽसाववस्तात् क्षिपतीह, सः ॥९४॥
अविज्ञातरहस्यानामपि ज्ञाता च तिष्ठति । [49]ब्रूहि सत्यमुपेतं (भोः !) नैवासत्येन सिध्यति ॥९५॥
साम्प्रतं किञ्चनाऽऽथो वा नैव पश्चात् प्रसेत्स्यति । [50]ब्रूहि 'चेन्मार्ग भ्रष्टोऽहं, भ्रष्टो मार्गात् स्वतो निजाम् ॥९६॥
प्रहानि जनयिष्यामि, लब्धमार्गोऽथ चेदहम् । कारणं काशितं तत्र प्रभुणा मेऽस्ति यन्मयि ॥९७॥
असौ श्रोताऽस्त्यसन्देहं नेदीयानथ वर्त्तते । [51]कदाचिद् दृष्टवन्तो हि स्यात यूयं यदि क्षणम् ॥९८॥
तं, यदा ते भयेनार्त्ता अगतिकास्तथाऽऽसत । निग्रहं सम्प्रयाताश्च किञ्च ते ह्यविदूरतः ॥९९॥
[52]तेऽवदन्—श्रद्दधाना वै वयं जाता इहाधुना । विप्रकर्षात् परं केन प्राप्यं तैस्तु भवेदिदम् ॥१००॥
[53]पूर्वतः खण्डयन्तस्ते ह्यवर्त्तन्त यदात्विदम् । दूरादनीक्षितञ्चापि शरव्यं ते व्यधुः पुनः ॥१०१॥
[54]यदा पूर्वैः जनैः सार्धं सार्धमेभिस्तथैव तु । अमीषामन्तराले चैवान्तरालेऽप्यमुष्य च ॥१०२॥
कृतोऽस्माभिर्निखातोऽस्ति तेषामिष्टमिहास्ति यत् । संशये ते स्थिता मग्ना आशाच्छेदान्विते ध्रुवम् ॥१०३॥

योगः—१०३

CC-0. In Public Domain. Digitized by eGangotri

३५

सूक्तम्–कर्त्ता (फ़ातिर)

अथवा–दिव्याः (फ़िरिश्ते)

(महाकालेऽवतीर्णाः पञ्चचत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अल्लाहाय प्रशंसाऽस्तु कर्त्ता व्योम्नामिहास्ति यो । धरित्र्याश्चापि; यो दिव्यान् द्विभुजांस्त्रिभुजानथ ॥ १ ॥
चतुर्भुजांश्च सन्दिष्टं नियुङ्क्ते वोढु (मग्रतः) । सर्गक्रमे यथाकामं स किञ्चिद् गुणयेदपि ॥ २ ॥
सर्वसामर्थ्यभृत् तावदल्लाहः खलु तिष्ठति । [२]विवृणोति यदौदार्यमल्लाहो लोकहेतवे ॥ ३ ॥
नैव कश्चित् समर्थोऽत्र तस्य तस्मात् प्रवारणे । संवृणोति पुनर्यच्च समर्थो न हि कश्चन ॥ ४ ॥
प्रेषणे तस्य, शक्त्याऽसौ शालते च सुधीश्च सः । [३]हे जनाः! यूयमाल्लाहीं कृपां युष्मास्ववस्थिताम् ॥ ५ ॥
स्मरताऽन्यः किमल्लाहात् स्रष्टा कश्चन विद्यते । धरित्र्याश्चैव व्योम्नश्च वृत्तिं यो वः प्रयच्छति ? ॥ ६ ॥
वरेण्यो न ततस्त्वन्यः, उत्पथं कुत्र याथ तत् ? । [४]विरुन्धन्त्यथ चेत् ते त्वाम् अनेकान् किल वाग्धरान् ॥ ७ ॥
त्वत्तः पूर्वमपीमे तु व्यरुन्धन्, यदपीह तु । समं ह्येव तदल्लाहं विपर्यस्योपयाति ह ॥ ८ ॥
[५]हे जनाः ! यत् प्रतिज्ञातमाल्लाहं सत्यमस्ति तत् । अतः प्रतारयेद् युष्मान् भौतिकं न हि जीवनम् ॥ ९ ॥
अल्लाहविषये वाऽपि वञ्चयेन्न स वञ्चकः । [६]शातनः शात्रवः सत्यं युष्माकम् शात्रवं हि तम् ॥१०॥
यूयञ्चापि विजानीत, स्वानुसर्तॄन् जनानसौ । तेनाकारयते येन ते स्युरग्नित्तहेतिगाः ॥११॥
[७]श्रद्विहीना अतिष्ठन् ये तेभ्यः कष्टमरुन्तुदम् । श्रद्दधानास्तु येऽकार्षुर्भद्रकर्मण्यथो पुनः ॥१२॥
क्षमा सन्तिष्ठते तेभ्यः पुरस्कारस्तथा महान् । [८]किन्वसौ मानुषो यस्य दुरितं कर्म तत्कृतम् ॥१३॥
शोभमानममुष्मै च कृतं, यो मनुते च तत् । सर्वथैव शुभं (स्याद् वै समो भद्रकृता क्वचित्)? ॥१४॥
यं स कामयतेऽल्लाहस्तथ्यमेतत्तु वर्त्तते । तं नयत्युत्पथेनाऽसौ यं स कामयतेऽथ च ॥१५॥
तं नयत्युत्तरेणाऽथ पथा, तन्मास्म ते द्रवन् । शोचतस्तानिमे प्राणाः अल्लाहो वेत्त्यसंशयम् ॥१६॥
तद्धि यत्ते विचेष्टन्ते; [९]ऽल्लाह एवाऽस्ति यः खलु । समीरानीरयत्यत्र, वारिवाहं पुनश्च ये ॥१७॥
उद्गतं ननु कुर्वन्ति, नयामस्तं ततो वयम् । मृतस्य भूमिखण्डस्य दिशायां तेन तं पुनः ॥१८॥
मृत्योरूर्ध्वं पुनश्चैव जीवयामो वयं किल । इतीत्थं पुनरुत्थानम्; [१०]यो बलैषीह वर्त्तते ॥१९॥
(ज्ञायता) ममुनेनत्वं वलेऽल्लाहस्य सर्वथा । तमेवोद्यन्ति सद्वाचः, सुकर्मोन्नयते च तान् ॥२०॥
तिर्यगञ्चन्ति ये त्वत्र ते महादुःखगामिनः । दम्भाचारः समश्चैषामवकेशी भविष्यति ॥२१॥
[११]सृष्टवान्त्स मृदो युष्मानल्लाहो वीर्यतस्ततः । युष्मान् द्वन्द्वेषु चक्रेऽथ, तस्य ज्ञानाद् विना न च ॥२२॥
गर्भधा जायते काऽपि, जायते न च वा प्रसूः । नायुषः कस्यचिल्लाभो भवत्यायुरुपेयुषः ॥२३॥
नाऽथवा जायते ह्रासस्तस्य, सर्वमिदं परम् । पुस्तकेंऽकितमेकस्मिन्, अल्लाहाय न संशयः ॥२४॥
लीलाखेलमिदं सर्वम्; [१२]समौ नाब्धी च तिष्ठतः । अयं माधुर्यसम्पन्नो मधुरोऽतीव वर्त्तते ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

पेयः प्रीत्या (परोऽ) यञ्च कटुः क्षारश्च तिष्ठति । आभ्यां यूयमुभाभ्याञ्च मांसं प्रत्यग्रमेव तु ॥२६॥
अत्थ चाऽऽहरताऽथापि भूषणानि हि यैः पुनः । यूयं वध्वे (शरीराणि), लोकध्वे तदिदं पुनः ॥२७॥
पोतो वक्षस्तयोः कर्षन् याति यूयममुष्य यत् । तिष्ठेताऽनुग्रहाकांक्षाः कार्त्तज्ञं दर्शयेत च ॥२८॥
[13]निशं संक्रामयत्यह्नि निश्यह्नोऽपि तथैव च । सूर्याचन्द्रमसौ चक्रे व्यापृतौ चैव कर्मणि ॥२९॥
प्रत्येकमनयोश्चैव व्यापृतो नियतावधिम् । स एवाऽयं किलाऽल्लाहः प्रभुर्वो वर्त्ततेऽथ च ॥३०॥
सर्वेणत्वममुष्यैव, यूयं तं प्रविहाय तु । स्तुवीथ यान् न चैवाऽपि तत् प्रभुत्वं तनु त्वचि ॥३१॥
[14]श्रोष्यन्ति न स्तुताश्चापि ते, न श्रुत्वाऽपि खल्वथ । भविष्यन्ति च सन्नद्धाः कामना पूरणाय तु ॥३२॥
ते निषेत्स्यन्ति सम्पर्कं युष्माभिः सममप्यथ । पुनरुत्थापनस्याह्नि, नास्ति कश्चिच्च बोधकः ॥३३॥
वोधनाय हि युष्माकं सावबोधो यथैव सः । [15]हे जनाः ! यूयमल्लाहे सापेक्षा ह्येव तिष्ठथ ॥३४॥
अल्लाहस्त्वनपेक्षोऽस्ति प्रशंसाऽर्हस्तथा स्वतः । [16]कामतो रचयेत् स्वर्गं नवं युष्मान् परास्य सः ॥३५॥
[17]न चेदं दुष्करं किञ्चित् किलाऽल्लाहस्य वर्त्तते । [18]वक्ष्यति कस्यचिद् भारं नेतरस्य च भारिकः ॥३६॥
भाराद् ह्रास्यति साह्याय भाराऽऽक्रान्तोऽथ चेन्नरः । वक्ष्यति न ततो भारं कञ्चन स्वोऽपि चेज्जनः ॥३७॥
चेतयस्येव तांस्त्वन्तु स्वप्रभोर्बिभ्यतीह ये । अपश्यन्तोऽपि, कुर्वन्ति किञ्च पूजां प्रतिष्ठिताम् ॥३८॥
धावते यः किलात्मानं आत्मने स हि धावते । यात्राऽल्लाहं प्रति त्वेव (यस्य कस्यापि) वर्त्तते ॥३९॥
[19]नाऽन्धे सचक्षुषि स्याच्च साम्यमत्र कदाचन, । [20]ध्वान्तप्रकाशयोर्नापि; [21]तपनच्छाययोश्च नो ॥४०॥
[22]सजीवानाऽथ निर्जीवाः साम्यं यान्त्यत्र किञ्चन । श्रोतुं शक्तान् यथाकाममल्लाहः कुरुते जनान् ॥४१॥
ध्रुवम्, श्रावयितु नाऽसि शक्तस्तान् ये कुवाऽऽवृताः । [23]चेतकः केवलं त्वन्तु तावदत्र हि वर्त्तसे ॥४२॥
[24]सत्येन साकमस्माभिः शुभवृत्तप्रदोऽथ च । चेतकोऽप्यथ कृत्वा च प्रेषितस्त्वं, न तत्र च ॥४३॥
तादृशः कोऽपि वर्गोऽस्ति चेतका यस्य नास्त्वितः । [25]तवैते खण्डना लोका यदि सन्ति पुराऽपि तु ॥४४॥
जाता हि खण्डना लोकाः, उपायन् ननु वाग्धराः । सामभिस्तान् प्रमाणैश्च विशदैर्दीव्यताऽथ च ॥४५॥
पुस्तकेन समं तावत्; [26]श्रद्विहीना नहं ततः । निगृहीतानकुर्वं वै, घोरो दण्डः कियान्त्स मे ! ॥४६॥
[27]किन्न दृष्टं त्वयाऽल्लाहो व्योम्नो वर्षयते ह्यपः । अजन्यन्त ततोऽस्माभिस्तेन तावत् फलानि च ॥४७॥
वर्णो येषां विभिन्नो वै, पर्वतेष्वपि राजयः । श्वेता रक्ताश्च दृश्यन्ते विवर्णाः, (अपरा पुनः) ॥४८॥
घनाःकालाः; [28]मनुष्याश्च, मृगा वन्यास्तथैव च । पालिताः पशवश्चाऽपि वर्णवैविध्यसंगताः ॥४९॥
बन्धकानाममुष्याऽथ ज्ञानवन्तो हि केवलम् । त्रस्यन्ति तावदल्लाहादल्लाहा वत्तत ध्रुवम् ॥५०॥
क्षमाशीलस्तथाचाऽसौ प्रभुत्वाद् राजते पुनः । [29]ये पठन्ति जनाः शास्त्रमल्लाहस्य, प्रतिष्ठिताम् ॥५१॥
पूजां पुनश्च कुर्वन्ति व्ययं कुर्वन्त्यथाऽपि च । विवृतं संवृतं दत्तादभ्योऽस्माभिर्धनादथ ॥५२॥
प्रतीक्षन्त हि त लाभमविनाश्यमुदङ्मुखाः । [30]कृताशा यदसावभ्यः पुरस्कारं प्रदास्यति ॥५३॥
पूर्णमेव, कृपां कृत्वा तांस्तथैवंधयिष्यति । क्षमाशीलो ध्रुवं किञ्च गुणग्राही भवत्यसौ ॥५४॥
[31]पुस्तकं काशितं यच्च त्वप्यस्माभिस्तदेव तु । सत्यञ्च पोषकञ्चैव तस्य यत् (काशितं) पुरा ॥५५॥
वस्तुतो वर्त्ततेऽल्लाहो द्रष्टा चाऽथ निरीक्षिता । बन्धकानां निजानां वै; [32]कृता आयतयस्ततः ॥५६॥
बन्धकानां निजानाञ्च पुस्तकस्यास्य ये चिताः । अस्माभिः, तदिदानीञ्च केचित् तेषां त्विदंविधाः ॥५७॥
आत्मनाऽऽत्मनि कुर्वन्ति ये ह्यभद्रमथापरे । मध्यमार्गमुपाश्रित्य वर्त्तमानास्ततोऽपरे ॥५८॥
ते च ये प्रमुखाः सन्ति भद्रकार्येषु शासनात् । अल्लाहस्य, भवत्येव महांस्तावदनुग्रहः ! ॥५९॥
[33]अदनस्य किलाऽऽरामाः ! यान् प्रवेक्ष्यन्ति ते पुनः । सौवर्णैर्वलयैर्भूषा मौक्तिकैर्यत् कृता भवेत् ॥६०॥
तेऽथ वत्स्यन्ति वासांसि कौशेयेन कृतानि च । [34]ते च वक्ष्यन्ति—कष्टानि योऽस्माकन्तु व्यपोहति ॥६१॥
प्रशंसा वर्त्तते तस्मै किलाऽल्लाहाय सर्वथा । प्रभुर्नोऽस्ति क्षमाशीलो गुणग्राह्यपि च ध्रुवम् ॥६२॥
[35]यो निजाऽनुग्रहेणास्मान् तस्मिन् वासयति स्थले । स्थित्यै यस्यानुकूलत्वं, श्रमो यत्र न जायते ॥६३॥
नाऽथ खेदोद्भवस्तावत्; [36]श्रद्विहीनास्तु ये जनाः । नारको दहनस्तेभ्यः, प्रभावस्तेष्वमुष्य च ॥६४॥
नापि पूर्णो, म्रियेरंस्ते यथैव, किञ्च नाऽप्यथ । लाघवं यातना तेषां कथञ्चिद् गमयिष्यते ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

श्रद्‌विहीनान्‌त्समानेव दण्डयामो वयं किल । [३७]तत्र क्रोक्ष्यन्ति ते चैव– प्रभो नः ! नः समुद्धर ॥६६॥
वयं भद्रं करिष्यामः प्राक्‌कृताद् विपरीततः । अदायि किन्न दीर्घायुरस्माभिर्वो यथैव सः ॥६७॥
चिन्तनश्चिन्तयेद् यस्मिन्, चेतकश्चाप्युपागमत् । युष्मांस्तावदिदानीन्तु रसास्वादो विधीयताम् ॥६८॥
सहायो नो भवत्येव जालमानामिह कश्चन । [३८]अल्लाहस्तु ध्रुवं वेत्ता निगूढस्यापि वर्त्तते ॥६९॥
व्योमसूर्व्याञ्च सर्वस्य, वेत्त्यसौ यद् हृदि स्थितम् । [३९]स एवाऽसौ धरित्र्यां यो युष्मान् शास्तॄन् विनिर्ममे ॥७०॥
अथेदानीन्तु यः कोऽपि श्रद्‌विहीनो भविष्यति । श्रद्‌विहानकृताऽऽपत् तत् तस्मिन्नेवाऽऽपतिष्यति ॥७१॥
श्रदन्तात् श्रद्‌विहीनाश्च स्वप्रभोः पार्श्वतो न वै । प्रकोपादितरं त्वन्यत् प्राप्स्यन्ति; ते च केवलम् ॥७२॥
श्रद्‌विहीना गमिष्यन्ति श्रदन्तात् हानिमेव तु । [४०]ब्रूहि—किन्वंशभाजस्ते देवा युष्माभिरीक्षिताः ॥७३॥
स्तुवीथ यानृतेऽल्लाहम् ? दर्शयत हि यत् पुनः । असृजंस्ते धरित्र्या वै, भजन्ते तेंऽशमेव वा ॥७४॥
व्योम्नां कञ्चन ? किम्वाऽथो तेभ्योऽदद्म वयं पुनः । पुस्तकं किञ्चनैते यत् तत् प्रमाणेन विस्थिताः ? ॥७५॥
न तावत्; प्रतिजानन्ति यदेते तु परं मिथः । जालमाः प्रवञ्चनैवाऽसौ भवतीति (न संशयः) ॥७६॥
[४१]ध्रुवं व्योमानि पृथ्वीञ्चाऽल्लाहो दाधार केवलः । येन ते विचलेयुर्नो, चलितेषु तु तेषु नो ॥७७॥
चाऽस्ति कश्चित् परस्तस्माद् येन धार्या भवन्तु ते । सहिष्णुः स महान् किञ्च क्षमाशीलश्च वर्त्तते ॥७८॥
[४२]तेऽशपन् सुमहच्चैव किलाऽल्लाहेन यद् वयम् । अतिक्रम्याऽखिलान् वर्गान् अस्थास्यामोत्तमाऽध्वनि ॥७९॥
चेतकः कोऽप्युपेतश्चेदभविष्यत् क्वचित्तु नः । यदैव परमेतांस्तु चेतकः समुपैत् तदा ॥८०॥
परायंस्ते ततो दूरम्; [४३]गर्वोत्ताना यथैव ते । धरित्र्यामत्र तिष्ठेयुः रमेरन् दुर्नयेषु च ॥८१॥
दुर्नयो हन्ति तानेव रमन्ते तत्र ये जनाः । प्रतीक्षन्ते किमेते तं विधिं योऽशाद्धि पूर्वजान् ॥८२॥
अल्लाहस्य विधिं यूयं परिवृत्तिं गतं क्वचित् । व्याक्षिप्तं न तथैवाऽमुमीक्षिष्यध्वे कदाचन ॥८३॥
[४४]किमेभिर्विहृतं भूमौ नैव दृष्टमथाऽपि च । पूर्वजानामभूत् को वै परिणामोऽभवन् हि ते ॥८४॥
तानतिक्रम्य वीर्येषु; व्योमसूर्व्यां तथैव च । तन्न यत्तावदल्लाहात् रक्षेदात्मान (मिच्छया) ॥८५॥
विदानोऽसौ ध्रुवं किञ्च सर्वसामर्थ्यवानपि । [४५]निगृहीतानिहाल्लाहो यदि लोकान् व्यधास्यत ॥८६॥
तत्कृतापेक्षया, भूमौ कञ्चनाऽपि न जीविनम् । ततोऽत्यक्ष्यदसौ; तान् वै मुक्तहस्तान् करोति हि ॥८७॥
नियतावधये तावत्, यदाऽसावापतिष्यति । निश्चितोऽवधिरेतेषु, ज्ञायतां तस्य बन्धकाः ॥८८॥
परिध्यन्तर्गतास्त्वेवाऽल्लाहदृष्ट्यां त आसते ।

योगः—८८॥

CC-0. In Public Domain. Digitized by eGangotri

३६

सूक्तम्–हयासीन

(या सीन)

(महाकालेऽवतीर्णास्त्रिरशीतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]हयासीन !; [2]शपेऽहं वै कुराणेन सुधीमता । [3]त्वं ध्रुवं वर्त्तसे तेषाम्; [4]सरलं मार्गमीयिवान् ॥ १ ॥
[5]काशितं वर्त्ततेऽमुष्य प्रभोश्चैव दयावतः । [6]चेतयेः वर्गमेकं त्वं यथा नृणां, न पूर्वजाः ॥ २ ॥
अभवंश्चेतिता येषामतस्तेऽनवधायिनः । [7]जातं प्रमाणितं तेषामनेकेषु वचस्त्विदम् ॥ ३ ॥
श्रद्दधाना यतस्ते नो; [8]पाशक्षेपः कृतोऽथ च । परितः कन्धरास्तेषां स्पृष्ट्वा तेषां चिबून् पुनः ॥ ४ ॥
उच्छिरस्काश्च ते जातास्तेन तिष्ठन्ति सर्वथा । [9]भित्तिस्तेषां पुरश्चैका पश्चाच्चैका कृता किल ॥ ५ ॥
संवृतास्ते तथाऽस्माभिः, नाऽथ पश्यन्ति किञ्चन । [10]समानं चोभयं तेभ्यश्चेतयेस्तान्न चेतयेः ॥ ६ ॥
वाऽपि, तिष्ठन्ति ते नैव श्रद्दधाना यतः किल । [11]त्वन्तु चेतयितुं शक्तस्तमेवाऽनुसरेत्तु यः ॥ ७ ॥
अनुस्मारक (मन्यच्च) विभीयाद् यो दयावतः । अदृष्टश्चापि खल्वन्यैः, तादृशं त्वं जनं पुनः ॥ ८ ॥
प्रापयेदं शुभं वृत्तं पुरस्कारक्षमात्मकम् । [12]निश्चितं वयमेवाऽमी मृतानुज्जीवयन्ति ये ॥ ९ ॥
वयं लेखाङ्कितं कुर्मः प्रैषयंस्ते तदग्रतः । यच्च पश्चादिहास्त्येषां, सर्वमप्यंकितं तथा ॥१०॥
पुस्तके विशदे तावत् कृतवन्तो वयं खलु । [13]वासतेयजनानग्रे स्थापयैषां निदर्शनम् ॥११॥
यदा तान् वाग्घराः प्राप्ताः; [14]द्वौ वयं प्रैषयाम तान् । व्यरुन्धंस्ते परं तौ द्वौ, तृतीयं प्रैषयाम तत् ॥१२॥
साह्यहेतोर्वयं, ते च प्राहुः 'युष्मानिमे वयम् । प्रेषिताः खलु तिष्ठामः;' [15]त आहुः 'यद्विधा वयम् ॥१३॥
तद्विधाः केवलं मर्त्या यूयमप्यत्र तिष्ठथ । नाऽवतारः कृतस्तेन कस्यचिच्च दयावता ॥१४॥
अनृते भाषणे यूयं रमध्वे केवले पुनः । [16]तेऽवदन्—"नः प्रभुर्वेत्ति यदेते प्रेषिता वयम् ॥१५॥
प्रति युष्मान् हि तिष्ठामः"; [17]प्रापणादितरञ्च नो । कर्त्तव्यं वर्त्ततेऽस्माकं (वाचिकस्य) यथाविधि ॥१६॥
[18](वासतेयजना) ऊचुः—दुर्निमित्तानिमान् वयम् । युष्मानीक्षामहे, यूयं यदि नैव विरंस्यथ ॥१७॥
दृषद्भिराहनिष्यामो वयं युष्मानवाप्स्यति । दुःखदा यातना युष्मान्निमित्तीकृत्य नस्तथा ॥१८॥
[19]तेऽवदन्—दुर्निमित्तं वो युष्माभिस्त्वेव तिष्ठतात् । किन्विदं तावदेतस्मात् यतो यूयं हि चेतिताः ? ॥१९॥
न वै तत्; गतमर्यादा यूयं लोकास्तु तिष्ठथ । [20]एतस्मिन्नन्तरे कोऽपि धावंस्तत्र समागतः ॥२०॥
नगरस्यान्तिमात् कोणादाह च—"ज्ञातयो मम ! । अनुगच्छत भोः ! यूयं तान् किल प्रेषिता हि ये" ॥२१॥
[21]अनुगच्छत तान् ये नो पुरस्कारस्य लिप्सवः । यैः श्रितं पुनरास्ते च सरलायनमेव तु ॥२२॥

इति द्वाविंशं पारायणम्

अथ त्रयोविंशं पारायणम्

[22]स्तुवीय न कथञ्चाऽहं तन्तु मां सृष्टवान् हि यः । प्रत्यावृत्योपगन्तव्यो युष्माभिश्च स एव तु ॥२३॥

CC-0. In Public Domain. Digitized by eGangotri

[२३]तं विहायेतरान् कुर्यां प्रतीष्टान् किमहम् ? यदि । दयावांस्तोत्तुमिच्छेन्मां केनचिन्न कथञ्चन ॥२४॥
प्राभिशंसा तु मे तेषां लाभाय स्यात् (कदाचन) । नाऽपि मां रक्षितुं शक्ता भविष्यन्ति च ते पुनः ॥२५॥
[२४]स्पष्टमेवं पथभ्रंशो भवेन्मे (चरतीदृशम्) । [२५]श्रद्दधे वः प्रभावेष शृणुत मामतो (ऽधुना) ॥२६॥
[२६]औच्यता(ऽसौ)—प्रवेशं त्वं कुरु स्वर्गेऽ" वदच्च सः । सुष्ठु खल्वभविष्यच्चेदज्ञास्यन् ज्ञातयो मम ॥२७॥
[२७]प्रभुर्मेऽक्षंस्त मां किञ्चाऽवेशयन्मानितेषु माम् । [२८]ज्ञातीस्तस्य वयं पश्चाद् विरोद्धुं प्रैषयाम नो ॥२८॥
कामपि पृतनां व्योम्नः, न तत्कामास्तथाऽऽस्महि । [२९]चीत्कृतिः केवला साऽऽस्त, शान्तास्तेऽहह चाऽभवन् ॥२९॥
[३०]शोच्या हि वन्धकाः; योऽपि वाग्घरस्तानुपागतः । पर्यहसंस्तमेवाऽमी सततम्; [३१]किन्न खल्वमी ॥३०॥
अपश्यन् नाशिताः पूर्वमस्माभिर्बहवो गणाः । परावृत्य न यद् यन्ति तानमी; [३२]सम्मुखञ्च नः ॥३१॥
ते उपस्थापयिष्यन्ते निश्शेषेणाऽखिला अपि । [३३]मृताभूमिरमीभ्यश्च लक्ष्मरूपेण तिष्ठति ॥३२॥
कृता सोज्जीविताऽस्माभिस्ततोऽन्नं चापि भावितम् । खायन्तीमे तु यत् सर्वे; [३४]तत्रारामाः कृता अथो ॥३३॥
अंगूरैरथ खर्जूरैः, कृतस्तस्यास्तथैव च । प्रोद्गमः स्रोतसां तावत्; [३५]अश्नुवन्तु यथैव ते ॥३४॥
तत्फलानि—न खल्वेषां पाणिभिर्विहितोऽस्य तु । निर्माणो—दर्शयिष्यन्ति कार्त्तज्ञं न ततोऽपि किम् ? ॥३५॥
[३६]महिम्नां खल्वसौ स्वामी सर्वरूपाणि योऽसृजत् । मिथुनानि, धरित्री यच्चोद्गतं कुरुते ततः ॥३६॥
स्वकीयाया अमीषाञ्च जातेस्तेभ्यस्तथैव च । येषां बिभ्रति नैवैते ज्ञानमात्रमथाऽपि च ॥३७॥
[३७]यामिनी चाप्यमीभ्योऽत्र लक्ष्मरूपेण तिष्ठति । परिक्षेपं वयं कुर्मस्तस्या अह्नस्ततः किल ॥३८॥
तमश्छादयतेऽमूनि; [३८]सूर्योऽभीक्ष्णं प्रयाति च । स्वकीयं शरणं तावत्, सुधियो बलिनस्त्वयम् ॥३९॥
विद्यते हि कृतो मानोऽ; [३९]ऽस्माभिश्चन्द्रमसे कृताः । निश्चिताः पुनरावासाः (येषु संक्रमणादनु) ॥४०॥
जीर्णखर्जूरपत्रेण सादृश्यं धारयत्यसौ । [४०]न सोमाऽतिक्रमं कर्त्तुमुत्सहेत रविः क्वचित् ॥४१॥
दिनं वा यामिनी किञ्च नोत्सहेत विलंघितुम् । एकैकं मार्गमाश्रित्य प्लवन्ते तत्र तेऽखिलाः ॥४२॥
[४१]इदं लक्ष्म तथा चैकममीभ्यो भवतीह वै । भाराक्रान्ते वयं पोतेऽपत्यान्येषामदध्महि ॥४३॥
[४२]कृतं तद्विधमस्माभिश्चान्यदप्यस्ति यत्तु ते । आरोहन्ति हि यानाय; [४३]कांक्षेमाऽथ वयं यदि ॥४४॥
तान् हि मग्नान् विदध्याम, ततः कश्चन विद्यते । श्रोता नैषान्तु दैन्यस्य, रक्षिता नाऽपि खल्वथ ॥४५॥
[४४]दयाऽस्माकं न यावत्तु क्षणं सौख्यस्य चाऽप्यणु । [४५]यदोच्यन्ते च ते—यूयं रक्षत तत आत्मनः ॥४६॥
पुरस्ताद् वर्त्तते यद् वः पृष्ठतो यच्च वर्त्तते । दर्शिता स्याद्धि युष्मासु दया तावत् कदाचन ॥४७॥
(नाऽवधानपरास्ते तु भवन्त्यत्र ततोऽपि च) । [४६]आयतानां प्रभोरेषामिमान् योऽप्युपतिष्ठते ॥४८॥
आयातस्तत् पराङ् आस्या ह्येव तिष्ठन्ति खल्वमी । [४७]यदोच्यन्ते च ते—यूयं युष्मभ्यं यददीयत ॥४९॥
अल्लाहेन ततस्तावत् कुरुध्वं (सततं) व्ययम् । श्रद्विहीना जनास्तद् ये श्रद्दधानान् वचन्ति हि ॥५०॥
"भोजयाम वयं किं तं यमैषिष्यत् क्वचिद् यदि । अल्लाहोऽभोजयिष्यत्तं तदाऽसौ स्वयमेव तु" ॥५१॥
पथभ्रंशत्वमापन्ना यूयं स्पष्टं हि तिष्ठथ । [४८]ते च पृच्छन्ति—पूर्णेयं प्रतिज्ञा भविता कदा ॥५२॥
सत्यसन्धाः क्वचिद् यूयं यदि तिष्ठथ (खल्विह) ? । [४९]ते तु चीत्कारमेवैकं सम्प्रतीक्ष्य स्थिता इह ॥५३॥
विवादेषु -रतान् यत् स इमान् पर्याविरिष्यति । [५०]अन्तिमेच्छां न चाप्येते वक्तुं शक्ष्यन्ति वै तदा ॥५४॥
परैतुं न च शक्ष्यन्ति स्वानिमे बान्धवानपि । [५१]तूर्यो ध्मातस्तथा जातो, हन्त ! ते धावनोन्मुखाः ॥५५॥
प्रभुं स्वं चाभियान्त्येव कद्धरेभ्यो विनिर्गताः, । [५२]क्रोक्ष्यन्त्यापन्महाघोराऽस्मासु ! केनाऽथ बोधिताः ॥५६॥
वयं सुप्ताः; तदेवेदं प्रतिज्ञातं दयावता । अवोचन् वाग्घराश्चापि सत्यमेवो; [५३]दभूदथ ॥५७॥
चीत्कारो हि महाघोरस्ते च सर्वेऽचिरात्तथा । समक्षं तावदस्माकमक्रियन्त ह्युपस्थिताः ॥५८॥
[५४]कोऽपि जीवो न खल्वद्य त्वत्याचारमयिष्यते । युष्मत् कृतानुरूपेण पुरस्कारः प्रदास्यते ॥५९॥
[५५]निश्चितं स्वर्गगा अद्याऽऽनन्दसंदोहमज्जिनः । [५६]सपत्नीका भवन्त्यद्य ते च च्छायामधः पुनः ॥६०॥
सोपधानेषु चाऽऽसीनाः पर्यंकेषु भवन्ति ते । [५७]अभीष्टं वस्तुजातञ्च तेभ्यस्तिष्ठति तत्र वै ॥६१॥
यथाकामञ्च ते सर्वं लभन्ते तत्र, [५८]"शंः" पुनः । शब्द (स्तेभ्यो भवत्येष) प्रभोस्तस्माद् दयावतः ॥६२॥
[५९]सापराधा जनाः ! यूयं दूरमद्याऽपयात तु । [६०]किन्न तावन् मयाऽऽदिष्टा यूयमादिमसूनवः ! ॥६३॥

CC-0. In Public Domain. Digitized by eGangotri

मा क्रुद्ध्वं वन्दनां यूयं शातनस्य, स निश्चितम् । अरिस्तिष्ठति युष्माकं स्पष्टमेव; [६१]तथैव च ॥६४॥
इदं यद् वन्दनीयोऽहम् त्वेव; पन्था ऋजु ह्ययम् । [६२]सुविशालं गणञ्चैकं पथभ्रष्टं विधाय सः ॥६५॥
तिष्ठते बत युष्माकम्; धिया युङ्ध्वे ततोऽपि नो ? । [६३]नारकश्च स एवाऽयं विषये यस्य भक्तिसंताः ॥६६॥
अभूत पूर्वतो यूयम्; [६४]अस्मिन्नद्य समिध्यत । श्रद्विहानकृताद् दोषात् तत् पुरस्काररूपतः ॥६७॥
[६५]मुद्रयामो मुखान्येषां अद्य तैश्चेष्टितञ्च यत् । आख्यास्यन्ति करा अस्मांस्तेषां तेषामथोंऽद्वयः ॥६८॥
स्थिताः साक्ष्ये भविष्यन्ति तस्य यत्तैर्विचेष्टितम् । [६६]नाशयेम वयं कामात् तेषां चक्षूंषि खल्वपि ॥६९॥
मार्गहेतोश्चरेयुस्ते ततश्चैव दिशो दिशम् । ते पुनर्द्रष्टुमर्हास्युः किञ्चनाऽपि कुतोऽपि किम् ? ॥७०॥
[६७]कामयेमहि चेदेतान् विदध्याम स्थिरान् वयम् । एतेषामासनेष्वेव कृत्वा ह्येतान् गतौजसः ॥७१॥
अशक्तानग्रतो यातुं पृष्ठतो यातुमप्यथ । [६८]वर्षीयांसं वयं कुर्मो यञ्च तस्याऽऽकृतिं वयम् ॥७२॥
सर्वथैव विपर्यस्तां विदध्मः, किन्ततोऽपि नो । शेमुषीं धारयन्तीमे ? [६९]नास्य काव्यञ्च शिक्षितम् ॥७३॥
अस्माभिः, न च शोभायास्तदस्यास्त्ययनं क्वचित् । अनुस्मारकमेवैतत् कुराणं विशदं स्थितम् ॥७४॥
[७०]चेतयेत् तां यथा व्यक्ति याऽत्र प्राणिति; ये जनाः । श्रद्विहीनाश्च तेष्वेतद् भवेत् सत्यं प्रमाणितम् ॥७५॥
[७१]तैर्जनैर्न हि दृष्टं किं वयं तेभ्यश्चतुष्पदः । सृष्टवन्तः कृता हस्तैः किलाऽस्माकं य आसत ॥७६॥
अमीषां साम्प्रतं यान्ति स्वामितां ये जनाः किल । [७२]ते च वश्याः कृतास्तेषां यानकार्यस्य साधकाः ॥७७॥
सन्ति केचन तेषान्तु भोजनाय स्थिताः परे ? । [७३]तेषु सन्त्युपयोगाश्च किलान्ये बह्वोऽथ च ॥७८॥
पेया लभ्याः पुनस्तेभ्यः, तथा सत्यपि किन्न ते । दर्शयिष्यन्ति कार्त्तज्ञम् ? [७४]घटिता अथ तैः पुनः ॥७९॥
अल्लाहाद् व्यतिरिक्तास्तु प्रतीष्टा देवता अपि । लभेरंस्ते ततो येन साहाय्यं वै कदाचन ॥८०॥
[७५]न ते तेषान्तु साह्याय सामर्थ्यं बिभ्रति क्वचित् । सेनारूपा इमे त्वेव सेवितुं ता उपस्थिताः ॥८१॥
मा कृत व्याकुलं तत् त्वाम् तद् वाग्; [७६]जानीमहे वयम् । संवृतं विवृतञ्चैषां यदप्यस्ति, न संशयः ॥८२॥
[७७]लोकितं किन्न मर्त्येन वीर्येण जनितो हि सः । अस्माभिरास्त, पश्चात्तु विरुन्धानो मुखेऽभवत् ॥८३॥
[७८]लब्धवानस्मदौपम्यं, व्यस्मरत् पुनरेव च । निजं जन्म, तथाचाऽऽह—को नु संजीवयिष्यति ॥८४॥
इमान्यस्थीनि यान्यद्य सर्वथा गलितानि हि ? । [७९]ब्रूहि—यः सृष्टवान् पूर्वं चापि तावत् स एव तु ॥८५॥
इमान्यस्थीनि खल्वद्य पुनः संजीवयिष्यति । सर्गं सर्गं तथा चाऽसौ विजाना (त्यविशंकितम्) ॥८६॥
[८०]स एव सरसाद् वृक्षाद् युष्मभ्यं योऽग्निमाकरोत् । अथेदानीं ततो वह्निं यूयं तावत् समिध्यथ ॥८७॥
[८१]किं स व्योमानि चोर्वीञ्च जनयन् क्षमते न वै । स्रष्टुमेवं विधांश्चापि, कथन्नो, सर्जको हि सः ॥८८॥
परिज्ञाता तथा चैव कुशलो वर्त्तते यदा । [८२]निश्चितस्तस्य संकल्पो यदा चैवोपजायते ॥८९॥
तस्य कार्यमिदं त्वेव यत् स वक्तु—"त्वमुद्भव" । जायते चोद्भवस्तस्य; [८३]स महिम्ना विराजते ॥९०॥
साधिकारः करो यस्य सर्वमप्यनुशास्ति वै । प्रत्यावृत्योपगन्तव्यो युष्माभिश्च स एव तु ॥९१॥

योगः—९१

CC-0. In Public Domain. Digitized by eGangotri

३७

सूक्तम्–पंक्तिगाः

(अस–साफ़्फ़ात)

(महाकालेऽवतीर्णा द्व्यशीत्युत्तरैकशतमायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शपे तैः पंक्तिगा येऽत्र भवन्ति; [२]द्रावयन्ति च । भर्त्सयन्तः परस्ताद् वै; [३]स्मारकञ्चाप्यधीयते ॥ १ ॥
[४]अद्वितीयःप्रतीष्टो वो वर्त्तते निश्चयेन हि । [५]वियतां यो धरित्र्याश्च यत्तयोरन्तरेऽपि च ॥ २ ॥
प्रभुः सर्वस्य, धाम्नाञ्च प्रभुर्यस्तूदयस्य च । [६]भूषितं भूषयाऽस्माभिरधोवर्त्ति वियत् पुनः ॥ ३ ॥
तारकैः; [७]रक्षितञ्चेत्थं तच्च सर्वेभ्य एव तु । हठिभ्यः शातनेभ्योऽपि; [८]महोच्चैः समवस्थितान् ॥ ४ ॥
प्रमुखान् शक्नुवन्तीमे नाऽपि श्रोतुं कदाचन । सर्वतो यदवाऽऽक्षेपैराहन्यन्तेऽसकृत् त्विमे ॥ ५ ॥
[९]वाहनीया (हि ते), तेभ्यस्स्थायिनी यातनाऽपि च । [१०]यस्तु तेषां समुद्गत्य हरेदाच्छिद्य किञ्चन ॥ ६ ॥
ज्वलद् वह्निशिखा वेगादेका धावति पश्च तम् । [११]अथैतान् पृच्छ—सर्गेण द्रढीयांसो भवन्त्यमी ॥ ७ ॥
तेऽथवा सृष्टवन्तो यान् वयं, सृष्टा इमे तु वै । मृदः श्लेषात्मनो ऽस्माभिः; [१२]तथ्य मेतत्तु—तिष्ठत ॥ ८ ॥
यूयमाश्चर्यमापन्नास्तेऽवहासपरा अथो । [१३]चेतिताश्चापि नैवैते चेतन्ते; [१४]लक्ष्म किञ्चन ॥ ९ ॥
यदा चैवाऽपि पश्यन्ति मुक्तहासं हसन्ति ते । [१५]वदन्तीदञ्च—मायैव विशदेयन्तु तिष्ठति ॥१०॥
[१६]प्रमीता यद् वयं जाता मृदस्थिशेषतां गताः । किमुज्जीवय्य तेनाऽपि तूत्थानं नः करिष्यते ॥११॥
[१७]पूर्वजानां तथाऽस्माकम्? [१८]ब्रूहि-सत्येन तत् स्थितम् । न्यग्भावं गमिताश्चैव यूयं तावद् भविष्यथ ॥१२॥
[१९]एक एव स चीत्कारः केवलञ्चोद्गमिष्यति । तत्र दत्तेक्षणास्ते च स्थास्यन्त्याश्चर्यनिर्भराः ॥१३॥
[२०]क्रोक्ष्यन्त्यथाऽपि "दौर्भाग्यं बताऽस्माक" मिदं त्वहः । निर्णयस्यास्त्य; [२१]हस्तद् वै निणयस्येदमस्ति तु ॥१४॥
आस्त यत् खण्डितं नित्यं युष्माभिः; [२२](गदिताश्च ते । भविष्यन्ति) समाहर्त्तुं तांस्तु जाल्मा य आसत ॥१५॥
सार्धन्तेषान्तु पत्नीभिः पूजिता ये च तैरपि । [२३]अल्लाहादितरे; पश्चाद् धुक्षतो जातवेदसः ॥१६॥
वर्त्म दर्शयता ऽप्येनान्; [२४]इमान् रुन्ध्यास्त्विह क्षणम् । प्रष्टुकामा वयं किञ्चित्; [२५]मिथस्साह्यं कथन्न(भोः)॥१७॥
कुरुथ यूयम्?; [२६]एते तु जायन्ते ऽभ्यात्मनोऽर्पकाः । सर्वभावेन; [२७]चान्योन्यमुपगत्य परस्परम् ॥१८॥
प्रश्नान् पृच्छन्ति; [२८]भाषन्ते—यूयमस्मानुपैत वै । प्रभविष्णुतया नित्यम्; [२९]तेऽवदन्—न हि सर्वथा ॥१९॥
यूयमाध्वं स्वतश्चैव श्रद्धरा न कथञ्चन । [३०]अप्रभावा अतिष्ठाम वयं युष्मासु सर्वथा ॥२०॥
यूयमाध्वं स्वतश्चैव जना अत्याग्रहं गताः । [३१]इदानीं नः प्रभोरुक्तिः सत्याऽस्मासु प्रमाणिता ॥२१॥
सद्य एवाऽधुना तेन रसितारो वयं रसम् । [३२]यूयमाध्वं तदस्माभिर्वाहिताः, स्वयमप्यथ ॥२२॥
भ्रष्टमार्गा अतिष्ठाम वयन्त्विव,—[३३]त्थं समेऽपि ते । भाजनानि भविष्यन्ति यातनांशे समं खलु ॥२३॥
[३४]आगस्कृद्भिः किलाऽस्माकं व्यवहारो ऽयमीदृशः । [३५]इमे ते हि तिरस्कारं ये सदाऽदर्शयन् यदा ॥२४॥
प्रतीष्टो नेतरोऽल्लाहादिदं प्रोक्ताः किलाऽभवन् । [३६]तेऽवदंश्चादरं धृत्वा कस्मैचित् कवये वयम् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

स्वान् हातुं शक्नुमो देवान् कृतोन्मादाय वा कथम् ? । [३७]न तावत्; सत्यमादाय त्वयं तावदुपस्थितः ॥२६॥
पूर्वसम्प्रेषितानाञ्च कृताऽनेन समर्थना । [३८]कृच्छ्रदां यातनां यूयं रसितास्था ऽचिरं ध्रुवम् ॥२७॥
[३९]चेष्टितस्यानुरूपञ्च फलं यूयमवाप्स्यथ । [४०]वन्धकानेकचित्तांस्तु त्यक्त्वाऽल्लाहस्य सर्वथा ॥२८॥
[४१]सुतरां किल विज्ञाता वृत्तिस्तेभ्यस्तु तिष्ठति । [४२]प्रतीष्टं भोजनम् ! ते च करिष्यन्तऽतिमानिताः ॥२९॥
[४३]सुखारामेषु; [४४]ते चाऽथ भविष्यन्ति स्थिता अपि । आभिमुख्येन वै तत्र पटलेषु कृतासनाः; ॥३०॥
[४५]तदग्रे भ्रामयिष्यन्ते चोच्छलत् स्रोतसः पुनः । मद्यपात्राणि; [४६]पायिभ्यो हृद्यास्वादं तथोज्ज्वलम् ॥३१॥
[४७]तत्र कश्चिद् विकारो नो, न तेषां तेन मत्तता । [४८]पार्श्ववत्यो भविष्यन्ति तथा तेषाञ्च योषितः ॥३२॥
विनीताक्ष्यो ह्यथो भव्यैर्नयनैरति भाविताः । [४९]तद् विधा यद् विधानि स्युः संवृतान्यण्डकानि हि ॥३३॥
[५०]प्रश्नान् पृच्छन्ति चान्योन्यं त उपेत्य परस्परम् । [५१]तेषामेकः पुनर्वक्ता प्राह—मेऽभूत् सहायकः ॥३४॥
कोऽपि [५२]योऽभीक्षणमप्राक्षीन्माम् 'व त्वञ्चापि तिष्ठसि । अमीषां किं भवन्त्यत्र जना ये हि समर्थनाः ? ॥३५॥
[५३]प्रमीता यद् वयं जाता मृदस्थिशेषतां गताः । किं प्रदास्यामहे सत्यं फलं कर्मानुरूपतः ? ॥३६॥
[५४]सोवदत्—किं समाहित्य द्रक्ष्यसि (त्वं)नु तं पुनः ? । [५५]समाहित्य ततोऽपश्यद् धिक्षदग्न्यन्तरेषु तम् ॥३७॥
[५६]शपेऽल्लाहेन चाहासौ—त्वन्तु तावद् वधाय मे । तत्परोऽचिरमेवाऽस्थाः; [५७]नाऽभविष्यत् कृपाऽथ चेत् ॥३८॥
प्रभोर्मे खल्वहं चाऽपि कृतस्तावदुपस्थितः । अभविष्यं किलामीषु ये उपस्थापिताः पुरा ॥३९॥
[५८]अस्तु, किन्नाधुनाऽस्माभिर्मर्तव्यं वर्त्तते क्वचित् ? । [५९]विहाय प्राक्तनं मृत्युम्, भवामो नाऽपि किं वयम् ॥४०॥
दण्डनीयाः ? [६०]महत् सत्यं साफल्यं वर्त्तते त्विदम् । [६१]रमन्तां कर्मिणस्तेन त्वीदृशायैव कर्मसु ॥४१॥
[६२]वरीयः स्वागतं वेदं जक्कूमस्य तरुः स वा ? । [६३]कृतोऽसौ यातनाऽस्माभि र्जाल्मेभ्यस्तिष्ठति ध्रुवम् ॥४२॥
[६४]तरुः सोऽयं दहद् वह्नेर्यस्स्फुटत्यन्तरालतः । [६५]शातनानां शिरांसीव तस्य तावन्नवोद्भिदः ॥४३॥
[६६]तदेवाऽमी किलात्स्यन्ति, भरिष्यन्त्युदराणि च । आत्मनीनानि तेनैव; [६७]ते पुनश्च क्वथज्जलम् ॥४४॥
पानहेतोरवाप्स्यन्ति तत ऊर्ध्वम्; [६८]ततश्च ते । धिक्षदग्निमभि त्वेव करिष्यन्ति निवर्त्तनम् ॥४५॥
[६९]निश्चितं पूर्वजान् स्वांस्ते पथभ्रष्टान् व्यलोकयन् । [७०]तेऽपि चानुययुः पश्चात् तेषामेव तु पद्धतिम् ॥४६॥
[७१]ततः प्रागपि चानेके पथोऽभ्रश्यन् हि मानवाः । [७२]आसत प्रेषितास्तेषु किलाऽस्माभिस्तु चेतकाः ॥४७॥
[७३]दृश्यतां कोऽनु वन्धोऽभूत् चेतितानां पुनस्तदा । [७४]बन्धकानेकचित्तांस्तु त्यक्त्वाऽल्लाहस्य सर्वथा ॥४८॥
[७५]अस्तवीन्नहुपश्चास्मान् अतिष्ठाम वयन्तथा । प्रगल्भाः प्रतिवाचासु (पश्य तावदिदं स्वयम्) ॥४९॥
[७६]अरक्षाम वयं कष्टाद् घोरात्तञ्च सवान्धवम् । [७७]वंश्यास्तस्यैव चास्माभी रक्षणेनाऽवशेषिताः ॥५०॥
[७८]आयतिष्वथ चामुष्य तदर्थमवशेषितम्ः । [७९]शं भवेन्नहुषा (याऽस्मै) लोकेष्वन्यतमो हि यः ॥५१॥
[८०]इत्थमेव पुरस्कुर्मो वयं भद्रकृतो ध्रुवम् । [८१]श्रद्धराणामभूदेको वन्धकानां स नो ध्रुवम् ॥५२॥
[८२]परस्तान् मज्जितास्त्वन्ये तदाऽस्माभिः; [८३]अभूदथ । तस्य वर्मानुसार्येव किलाऽब्रह्मस्तथैव च ॥५३॥
[८४]यदाऽसौ स्वं प्रभुं प्राप्तो हृदा शुद्धेन; [८५]खल्वथ । उवाचाऽसौ निजं तातम् वान्धवान् स्वांश्च "संस्तुथ ॥५४॥
यत्तु तत् किम्; [८६]किमल्लाहा दभिन्ना घटिताः स्वयम् । देवताः सन्ति वोऽभीष्टाः? [८७]युष्माभिः किं विचिन्त्यते ॥५५॥
अल्लाहविषये योऽस्ति समेषां जगतां प्रभुः"? । [८८]तारकेषु ततश्चासावात्मदृष्टिमुदक्षिपत् ॥५६॥
[८९]प्राहचा—"ऽहं सरुक्;" [९०]तेन तेऽपयाता विहाय तम् । [९१]ततस्तेषामसौ देवानुपैताऽपृच्छदप्यथ ॥५७॥
कुरुध्वे भोजनं नैव ? [९२]किन्तु कष्टम् ? न जल्पथ ! । [९३]तेष्वसौ पुनरात्मानं आक्षिपद्, दक्षिणेन च ॥५८॥
पाणिना प्राहरत् तान् वै; [९४]तमायंस्ते च रहसा । [९५]असावाह—स्वयं यूयं कृन्तथ घटनाय यत् ॥५९॥
तस्यैव पूजनं तावत् कुरुध्वे; [९६]सत्यमत्र च । यद्यपीदमसावेव सृष्टवान् घटितानपि ॥६०॥
युष्माभिस्त्वथ युष्मांश्च; [९७]त आहुः—(वह्नि) वेश्मनः । निर्माणं कुरुतैतस्मै, ततो धिक्षद्हुताशने ॥६१॥
क्षिपतैनम्; [९८]अभूवंस्ते छलनायास्य तत्पराः । न्यक् कृताः परमस्माभिः; [९९]स चाह—"प्रभुमेव तु ॥६२॥
याम्यहं स्वं, स एवाऽथ वर्त्म मां दर्शयिष्यति । [१००]प्रभो ! भद्रकृतां मह्यं कञ्चनैकमुपाहर ॥६३॥
[१०१]शुभं वृत्तं ततस्तस्मै भद्रस्यादच्च कस्यचित् । बालकस्य वयन्तावत्; [१०२]धावनोत्प्लवनाय च ॥६४॥
तस्मिंस्तेन समं सिद्धे जाते (ऽपत्यमुवाच सः । स्वप्नसन्दर्शनं जातं ममैतन् मम पुत्रक ! ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

हन्म्यहं त्वां वलिं कृत्वा, ध्याहि त्वं तेन साम्प्रतम् । किमत्र कथनन्तेऽस्ति, ? स आह—हे पितर्मम ! ॥६६॥
यथादिष्टोऽस्यनुष्ठातुं अनुतिष्ठ तथैव (भोः !) । अल्लाहस्य प्रसादेन स्थिराणां त्वं हि मामपि ॥६७॥
लप्स्यसेऽन्यतमं तावत्; [१०३]तदूर्ध्वं तावुभौ यदा । आत्मनोरर्पणौ जातौ, बालकं तमसावधः ॥६८॥
भूमिस्पर्शेण वक्त्रस्य पातयामास पूर्णतः । [१०४]समाहूतस्स चाऽस्माभिः "भगोऽब्रह्म! [१०५]कृतं त्वया ॥६९॥
स्वप्नसन्दर्शनं सत्यम्; ध्रुवं भद्रकृतो वयम् । इत्थमेव पुरस्कुर्मः; [१०६]परीक्षा विशदा ध्रुवम् ॥७०॥
इयन्त्वास्त; [१०७]वयञ्चाऽथ प्राणांस्तस्य विरक्षितुम् । वलिं त्वेकमयच्छाम महान्त(मतिविश्रुतम्) ॥७१॥
[१०८]आयतिष्वथ चामुष्य तदर्थमवशेषितम् । [१०९]अब्रह्माय हि शं तस्मै; [११०]वयं भद्रकृतो ध्रुवम् ॥७२॥
इत्थमेव पुरस्कुर्मः; [१११]वन्धकानां स नो ध्रुवम् । श्रद्धराणामभूदेकः; [११२]शुभं वृत्तमदद्म च ॥७३॥
इष्वासस्य वयन्तस्मै भद्रो यो वाग्घरेष्वभूत् । [११३]इष्वासाय च तस्मै च महौदार्यं व्यतन्म वै ॥७४॥
तयोर्वंश्येषु केचित्तु भद्रकर्मकृतोऽपरे । योजयन्त्यात्मनाऽऽत्मानमत्याचारैः प्रकाशतः ॥७५॥
[११४]दर्शितोऽनुग्रहोऽस्माभि र्हारदूनेऽथ मूषके । [११५]अरक्षाम वयं कष्टाद् घोरात्तौ वान्धवैः समम् ॥७६॥
[११६]कृतं साह्यं तयोर्येन तावभूतां जितावपि । [११७]ताभ्यामदद्म किञ्चैव विशदं पुस्तकं वयम् ॥७७॥
[११८]दर्शितश्चाप्यथो ताभ्यां सुगः पन्थास्तथैव च । [११९]आयतिष्वमुयोः किञ्च तदर्थमवशेषितम् ॥७८॥
[१२०]हारदूनाय मूषाय चैव शं तिष्ठतात् (सदा) । [१२१]इत्थमेव पुरस्कुर्मो वयं भद्रकृतो ध्रुवम् ॥७९॥
[१२२]श्रद्धराणां स्थितौ तौ द्वौ बन्धकानां हि नो ध्रुवम् । [१२३]प्रेषितानामथेड्याशो बभूवाऽन्यतमः; [१२४]यदा ॥८०॥
असौ स्वान् वान्धवानाह—न यूयं किं विभीथ भोः!? । [१२५]स्तुथ बालमुपेक्षध्वे सर्जकानाञ्च सूत्तमम् ॥८१॥
[१२६]अल्लाहं, पूर्वजानां यः प्रभुर्युष्माकमेव च । [१२७]व्यरुन्धंस्ते परं तन्तु, तत एव च ते पुनः ॥८२॥
निश्चितं हि करिष्यन्ते (यातनार्थमुपस्थिताः) । [१२८]वन्धकानेकचित्तांस्तु त्यक्त्वाऽल्लाहस्य सर्वथा ॥८३॥
[१२९]आयतिष्वथ (चामुष्य) तदर्थमवशेषितम्ः । [१३०]ईड्यासीनाय शं तावत्; [१३१]वयं भद्रकृतो ध्रुवम् ॥८४॥
इत्थमेव पुरस्कुर्मः; [१३२]वन्धकानां स नो ध्रुवम् । श्रद्धराणामभूदेकः; [१३३]प्रेषितानामभूदथो ॥८५॥
लूतोऽप्यन्यतमः; [१३४]तञ्च तस्य कौटुम्बिकानथो । अरक्षाम वयं सर्वान् यदा चैव; [१३५]विहाय तु ॥८६॥
एकां वर्षीयसीं याऽस्थात् परस्तात्; च परान् वयम् । [१३६]अनाशयाम; [१३७](यद् वासान् विनष्टान्) प्रातरेव तु ॥८७॥
आहत्याऽऽहत्य पादैः स्वैः याथ तावत् किलाग्रतः । [१३८]सायञ्चैव; न किन्तेन यूयं युङ्ध्वे धिया पुनः ? ॥८८॥
[१३९]यौवनाशोऽप्यभूदेकःप्रेषितानामथो किल । [१४०]अधावत् स यदा नावमभिपूर्णां हि सर्वथा ॥८९॥
[१४१]ततो भाग्येक्षणं जातं पत्रैर्यत्तेन हारितम् । [१४२]ततो मत्स्योऽगिलत्तञ्च, सापराधोऽभवद्धि सः; ॥९०॥
[१४३]स्तोतॄणामभविष्यच्चेदसौ नान्यतमः क्वचित् । [१४४]अवत्स्यज्जठरे तस्य तदा यावदसौ यदा ॥९१॥
यावदुत्थापयिष्यन्ते मानवा जीवितादनु । [१४५]अक्षिपाम वयं पश्चात् तमस्वस्थदशां गतम् ॥९२॥
भूमिखण्डे किलैकस्मिन् वालुकाभिर्हि संकुले । [१४६]तदूर्ध्वं कारितश्चैको वीरुधावेष्टितस्तरुः ॥९३॥
उद्गतः; [१४७]प्रेषितश्चासावस्माभि (र्मानवेषु) ये । अतिष्ठन् लक्षसंख्याका अधिका अथवा (ततः) ॥९४॥
[१४८]श्रद्धरास्तेऽभवंश्चैव, तेभ्योऽयच्छाम खल्वथ । जीवनस्य वयं सौख्यं निश्चितावधये पुनः ॥९५॥
[१४९]इमांस्तत् साम्प्रतं पृच्छ—प्रभोर्वस्तु हि कन्यकाः । भवन्ति, सूनवश्चाऽथ युष्माकं पुनरेव तु ॥९६॥
[१५०]किं स्त्रीलिंगाः कृता देवा अस्माभिः पश्यतां हि वः? । [१५१]श्रूयताम्—वस्तुतस्तत्तु तेषां मिथ्यैव शंसनम् ॥९७॥
[१५२]यदल्लाहस्य चैवाऽभूदपत्यम्, ते सुनिश्चितम् । मृषावाचो जनास्तावत्; [१५३]रोचमाना नु किं कृताः ॥९८॥
आत्मने कन्यकास्तेन सूनूनप्यतिरिच्य तु ? । [१५४]किन्नु क्लिश्नाति युष्मान् (भोः) काविधाचिन्तनस्य वः? ॥९९॥
[१५५]सावधाना न किं यूयं जायध्वेऽथ ततोऽपि च ? । [१५६]सन्निधौ वोऽस्ति वा किञ्चित् प्रमाणं स्पष्टमप्यथ? ॥१००॥
[१५७]दर्शयतात्मनीनं तत् पुस्तकं यदि तिष्ठथ । सत्यसन्धाःक्वचिद् यूयम्; [१५८]अल्लाहजिन्नयोर्मिथः ॥१०१॥
गोत्रैक्यस्य च सम्बन्धं मन्वते खल्वमी जनाः । जिन्ना यद्यपि जानन्ति सम्यगेतत् तु यद्धि ते ॥१०२॥
उपस्थिताः करिष्यन्ते तत्समक्षम्; [१५९]यदप्यमी । वर्णयन्ति गुणांस्तस्य किलाल्लाहस्य तत्समम् ॥१०३॥
महिम्नां भजते तस्य प्रातिकूल्यं हि सर्वथा । [१६०]बन्धकानेकचित्तांस्तु त्यक्त्वाऽल्लाहस्य सर्वथा ॥१०४॥
[१६१]अतो यूयञ्च ते चैव यान् हि यूयं स्तुवीथ (भोः!) । [१६२]यूयं सर्वेऽपि नो तस्माच्छक्ता वाहयितुं क्वचित् ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

कञ्चनाऽपि तु; [१६३]तं त्यक्त्वा धिक्षदग्नौ समिध्यति । जनो यो हि; [१६४]तथाऽस्मासु योऽपि कश्चन तस्य वै ॥१०६॥
सम्यक् परिचितं स्थानं (पूर्वतो) ह्येव वर्त्तते । [१६५]वयन्ते चाऽथ ये ह्यत्र पंक्तिगाः (सर्वदा) स्थिताः ॥१०७॥
[१६६]भवामो हि वयन्त्वेते तस्य स्तोतार एव च । [१६७]तेसदाऽवादिषुश्चैवं ध्रुवम्; [१६८]नःसन्निधौ क्वचित्॥१०८॥
अनुस्मारकमस्थास्यत् प्राग्भुवां यदि; [१६९]तद् वयम् । एकचित्ताः किलाऽऽल्लाहा अभविष्याम बन्धकाः ॥१०९॥
[१७०]न्यषेधंस्ते त्वद (स्तस्मिन् संप्राप्ते) साम्प्रतञ्च ते । ज्ञास्यन्ति सद्य एवाऽस्य परिणाममथाऽपि च ॥११०॥
[१७१]निश्चिता वाक् तथाऽस्माकमभूत्तानधिकृत्य तु । प्रेषिताः पूर्वतस्त्वेव वाग्घरत्वेन ये जनाः ॥१११॥
[१७२]याथार्थ्येन किलाऽमीषां साहाय्यं यद् विधास्यते । [१७३]अनिवार्यतयाऽस्माकं दलञ्चाऽथ विजेष्यते ॥११२॥
[१७४]अतस्स्तोकाय कालाय त्वं निवर्त्तस्व (भोः) ततः । [१७५]अवधत्स्व तथा चाऽमून् द्राक् ते द्रक्ष्यन्ति खल्वथ ॥११३॥
[१७६]यातनां गन्तुकामास्तेऽस्माकमुन्मनसो नु किम् ? । [१७७]प्रांगणे तावदेतेषां तद् यदाऽवतरिष्यति ॥११४॥
चेतितेभ्यो हि लोकेभ्यः प्रातस्तद् दुर्वहं भवेत् । [१७८](अत)स्स्तोकाय कालाय त्वं निवर्त्तस्व(भोः)ततः ॥११५॥
[१७९]अवधत्स्व तथा चाऽमून्, द्राक्ते द्रक्ष्यन्ति खल्वथ । [१८०]वर्णयन्ति गुणानेते यत् प्रभोस्ते हि तत्समम् ॥११६॥
महिम्नां भजते तस्य प्रातिकूल्यं हि सर्वथा । प्रभोर्महोदयानां वै; [१८१]अमीभ्यः शं च तिष्ठतात् ॥११७॥
प्रेषिता वाग्घरत्वेन ये हि; [१८२]किञ्चाऽथ तिष्ठतात् । अल्लाहाय प्रशंसा वै यः प्रभुर्जगतां किल ॥११८॥

योगः—११८

३८

सूक्तम्—साँद

(महाकालेऽवतीर्णा अष्टाशीतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]साँद०, शपे कुराणेन शिक्षाभिराभृतेन वै । [2]न वै; श्रद्धाविहीनास्तु किलातिष्ठन् हि ये जनाः ॥ १ ॥
विरुन्धानो हि ते किञ्च साभिमानास्तथैव च । [3]नाशिताः पूर्वमस्माभिस्ततोऽनेके तथा गणाः ॥ २ ॥
क्रोष्टुमारब्धवन्तस्ते तदा, नासावभूत् परम् । कोऽपि रक्षोपयुक्तस्तु कालः; [4]ते चाऽप्यथासत ॥ ३ ॥
आश्चर्योपहताः सर्वे तेषामेव हि मध्यतः । चेतकस्तानुपेतो यत्; श्रद्विहीना अथाऽभणन् ॥ ४ ॥
इन्द्र एवास्त्ययं कश्चित् मृषावादी महांस्तथा । [5]प्रभून् संकोच्य किं न्वेष प्रभुमेकं करोति हि ? ॥ ५ ॥
महत् त्वाश्चर्यकार्यैतत्; [6]प्रधाना एषु खल्वथ । बहिर्निस्सृत्य यातास्तु प्रेरयन्तो जनान् हि यत् ॥ ६ ॥
स्थिरास्तिष्ठत (भोः) यूयं स्वेषु देवेषु, निश्चितम् । तदेतत् यत् त्व (तीवे) ष्टम्; [7]न चैवैतन् निशामितम् ॥ ७ ॥
सम्प्रदाये पुरा जाते किलाऽस्माभिः (कदाचन) । न खल्वेतत् किमप्यन्यद् ऋते तु कल्पना भुवः ॥ ८ ॥
[8]किं न्वनुस्मारकोऽस्माकं सर्वेषां तिष्ठतामिह । अवतारित एतस्मिन् एव तावत्तु मानुषे ? ॥ ९ ॥
न वै; सन्देहमापन्नाः सर्वं एते हि मामके । सन्त्यनुस्मारके; नैभिः, न वै, यावच्च साम्प्रतम् ॥१०॥
रसाऽऽस्वादः कृतस्तस्या यातनायास्तु वर्त्तते । [9]ध्रियन्ते किं न्वमी कोशान् दयायास्ते प्रभोर्हि यः ॥११॥
प्रभुत्वाद् राजते किञ्च प्रदाता वर्त्तते महान् ? । [10]स्वामिनः किन्नु राज्यस्य धरित्र्या वियतां तथा ॥१२॥
तयोर्यच्चान्तरालस्थममी तस्य ? ततोऽधुना । इमे यान्तु हि सोपानान् (प्रयातुं वियतं प्रति) ॥१३॥
[11]अनेकानि दलान्यत्र लब्धवन्ति पराजयम् । विरुन्धानो हि ये लोकास्तेषां तिष्ठन्ति च (ध्रुवम्) ॥१४॥
[12]नाहुषा ज्ञातयश्चैभ्यो व्यरुन्धन् प्रागथापि च । आदाः, प्रतिष्ठितः किञ्च प्रियथौनः; [13]समुद्गकाः ॥१५॥
ज्ञातयश्चापि लूतस्य विपिनस्य च वासिनः । एकः पक्षो भवत्येभिः; [14]व्यरुन्धन् वाग्घरानिमे ॥१६॥
योऽपि कोऽपि हि सर्वोऽपि, दण्डं मत्तोऽलभन्त च । [15]घोषमेकमिमे लोकाः प्रतीक्षन्ते च केवलम् ॥१७॥
ततस्तूर्ध्वं न लप्स्यन्ते तेऽवकाशं हि कञ्चन । [16]वचन्त्येते—प्रभो नस्त्वं निर्णयाह्वः पुरैव तु ॥१८॥
प्रयच्छाऽस्मान् द्रुतं देयो योऽस्मदंशोऽपि विद्यते । [17]त्वया तन्मृष्यतां यत्ते जना अत्र वदन्ति च ॥१९॥
दान्यूधोऽनेकपाणिश्च स्मर्यतां वन्धकः स नः । सर्वदाऽसावतिष्ठच्चा (ल्लाह) वृत्तिरसंशयम् ॥२०॥
[18]अकुर्मं पर्वतांश्चाऽथा ऽनुव्रतांस्तस्य यद्धि ते । स्तुवीरन् संध्ययोस्तं वै प्रातः सायं किलोभयोः ॥२१॥
[19]संहताः पक्षिणश्चापि तस्थुस्तद्वृत्तयो ऽखिलाः । [20]तस्य राज्यमकुर्माऽथ सुप्रतिष्ठं वयं पुनः ॥२२॥
तस्मै बुद्धि अदद्माऽथ निश्चितार्थकरीं गिरम् । [21]लब्धवृत्ता नु किं यूयं तावत् तेषां विवादिनाम् ॥२३॥
यदा ते प्राविशंस्तस्य भित्यारोहेण हर्म्यकम् । [22]उपासर्पंश्च दान्यूधं यदा ते विचचाल सः ॥२४॥
तेऽवदन्—मा बिभीहि त्वम्, द्वावावां स्वो विवादिनौ । आवयोरन्य एकस्मिन् सापराधो हि तिष्ठति ॥२५॥
निर्णयं ह्यावयोर्मध्ये कर्त्तुमर्हसि साम्प्रतम् । तेन त्वं सत्यसम्पूतं, माऽयुक्तमयनं गमः ॥२६॥
ऋजुं चैव पुनर्मार्गमावयोस्त्वं प्रदर्शय । [23]अयम्मे वर्त्तते भ्राता, सन्निधावस्य चैडकाः ॥२७॥

CC-0. In Public Domain. Digitized by eGangotri

नवोध्वं नवतिस्त्वे, का मम पार्श्वे च केवला । अयं मामाह—ताञ्चापि त्वं मे ह्यर्पय, वाच्यसौ ॥२८॥
तिष्ठते मां प्रभाव्यैव; [२४](दान्यूधः पुन) राह च । निश्चितं सापराधोऽयं प्रार्थनात् त्वयि तिष्ठति ॥२९॥
एडकाभिः स्वकीयाभिर्मेलनस्य तवाऽपि च । सत्यमेतत्तु संभूय वसन्तो वहवो जनाः ॥३०॥
मिथः कदर्थयन्त्यत्र, श्रद्धरान् प्रविहाय तु । भद्रकर्म कृतश्चैव, विरला ह्येव तेऽथ च ॥३१॥
ज्ञातवानथ दान्यूधो यत् सोऽस्माभिः परीक्षितः । स्वं प्रभुं स्वमसौ क्षन्तुं ततस्तावदयाचत ॥३२॥
प्रणिपातपरो जातो जातस्तद् वृत्तिरेव च । [२५]क्षमाऽस्माभिः पुनर्दत्ता तस्मै तस्मात्; समीपता ॥३३॥
शुभो वासश्च पार्श्वे नः तस्मै किञ्चाऽपि तिष्ठतः । [२६](असावुक्तस्तथाऽस्माभिः) दान्यूध! त्वं हि शासकः ॥३४॥
कृतोऽस्माभिर्धरित्र्यां वै, प्रजासु त्वमतः कुरु । शासनं सत्यमाधाय, नाऽथ कामानुगो भव ॥३५॥
भ्रंशयेत् त्वां कदाचित् स पथोऽल्लाहस्य (निश्चितम्) । पथोऽल्लाहस्य ये भ्रष्टास्तेभ्यो घोरा हि यातना ॥३६॥
वर्त्तते, निर्णयस्याहस्तैर्यतो विस्मृतं कृतम् । [२७]धरित्रीं वियतञ्चैव तयोर्यन्मध्यगं तथा ॥३७॥
तत्समं सृष्टमस्माभिरप्रयोजनमस्ति नो । तद्विधं चिन्तनं त्वस्ति तेषां नो श्रद्धरास्तु ये ॥३८॥
श्रद्विहीनाश्च ये तेषां वह्निनैव क्षयो मतः । [२८]किं वयं श्रद्धरान् लोकान् भद्रकर्मकृतस्तथा ॥३९॥
तैः समत्वं नु नेष्यामो विक्रिया जनका हि ये । धरायाम्, उत तान् लोकांस्त्रस्यतो वञ्चकैर्जनैः ॥४०॥
तैः समत्वं नु नेष्यामः; [२९]शास्त्रमेतद्धि तिष्ठति । कृतो यस्यावतारो ऽस्ति त्वय्यस्माभि, र्यदस्ति च ॥४१॥
आशिषा सम्भृतं तावल् लोका ध्यायन्तु यत् पुनः । आयातानस्य, लोकाश्च धियोपेताः सुशिक्षया ॥४२॥
अस्य, सम्भावनां कुर्युरात्मनः पुनरेव च । [३०]अयच्छाम शिलामानं दान्यूधाय वयं पुनः ॥४३॥
अतिष्ठद् बन्धको भव्यः स तावत् सुमहान् पुनः । सर्वदाऽसावतिष्ठच्चा (ल्लाह) वृत्तिरसंशयम् ॥४४॥
[३१]यदा सांध्ये क्षणे तस्य जंघाला घोटका अथो । समानीता अभूवंश्च पार्श्वे; [३२]ऽवादीदसौ ततः ॥४५॥
स्व प्रभोः स्मरणं त्यक्त्वा द्रव्याणां हारिणामहम् । प्रेमपाशेऽति मग्नोऽद्य यावन्नान्तर्हिता हि ते ॥४६॥
पृष्ठतः प्रति सीरायाः; [३३](उवाचाऽसौ तथैव च) । तान्निवर्त्तयताऽऽरान्मे; सप्रहारमनन्तरम् ॥४७॥
तेषां जंघाः शिरोधींश्च समारेभे स कर्त्तितुम् । [३४]शिलामानोऽपि चाऽस्माभिः परीक्षाऽ(ग्नौ)हुतोऽभवत् ॥४८॥
ध्रुवम्, चैकासनेऽमुष्य तनूः क्षिप्ता तथा ऽभवत् । प्रयातो विप्रतीसारं ततोऽसौ; [३५]प्राह खल्वथ ॥४९॥
त्वं क्षमस्व प्रभोर्मे ! माम्, मह्यं राज्यं प्रयच्छ च । तद्विधं नोत्तरेभ्यः स्याद् यद्विधं भव्यमेव तु ॥५०॥
प्रदाता त्वमसन्देहं महानेव विराजसे । [३६]अथो तस्य वशे वायुं कृतवन्तो वयं किल ॥५१॥
अवात् तस्यानुरोधेन विधेयो, यस्तथैव च । अवान्मन्दतया तस्यामऽयाद् यस्यां त्वसौ दिशि ॥५२॥
[३७]शातनांश्चैव निर्मातॄन् सर्वरुपानथापि च । मज्जनव्यवसायांश्च (कृतवन्तो वशंवदान्) ॥५३॥
[३८]ततोऽन्यान् शृंखलावन्धैश्चापि वद्धानथापि च । [३९](वचन्तो) दानमस्माकमिदन्तावदथाऽधुना ॥५४॥
प्रवर्त्तध्वं यथाकाममौदार्येणान्यथाऽथवा । नाऽत्र सन्तिष्ठते कश्चिन् नियमो; [४०]ऽथ समीपता ॥५५॥
शुभो वासश्च पार्श्वे नस्तस्मै सन्तिष्ठते ध्रुवम् । [४१]वर्ण्यतां वन्धकोऽ स्माकमयेभः, स यदैव तु ॥५६॥
आह्वयत् स्वं प्रभुं यन्मां शातनोऽति दुनोति हि । पातयत्यथ कृच्छ्रे, च; [४२](वयमूचिम तत्पुनः) ॥५७॥
आजहि स्वेन पादेन (भूमि) मम्भो लभस्व च । शीतलं शीतलं पेयं स्नानयोग्यं तथैव च ॥५८॥
[४३]कुटुम्वं तस्य किञ्चाऽथ (पुनः) तस्मै अदद्म वै । तद्विधानितरांश्चापि तैः समं यद् दया भवेत् ॥५९॥
तेषु नः प्रथिता किञ्च सुधिभ्यस्तिष्ठतात् स्मृतिः । [४४](अवोचाम वयं तञ्च) संहतानि तृणानि हि ॥६०॥
त्वं विधारय मुष्ट्यन्तस्तैः समाजहि किञ्च (भोः!) । प्रतिज्ञाखण्डनञ्चापि न तेन त्वं कुरुष्व च ॥६१॥
निश्चितं तोषणोऽस्माभिः स विज्ञातः (परीक्षया) । अतिष्ठद् बन्धको भव्यः स तावत् सुमहान् पुनः ॥६२॥
सर्वदाऽसावतिष्ठच्चा (ल्लाहवृत्तिरसंशयम्) । [४५]वर्ण्यन्तां वन्धका नस्ते इष्वासो याप्यकूपकः ॥६३॥
अब्रह्मोऽप्यक्षिमन्तस्ते करवन्तस्तथैव च । [४६]योजितास्ते तथा ऽस्माभिर्विशेषाऽनुग्रहेण च ॥६४॥
गृहस्याभीक्ष्णसंस्मृत्या; [४७]मतानां तेऽभवन् ध्रुवम् । अस्माभि र्भद्रभावानां जनानां केचनाऽपि हि ॥६५॥
[४८]वर्ण्यतामस्मयेडोऽथ भाग्यरक्षित एव च । असावर्यशनः सर्वे भद्राणामेव सम्मताः ॥६६॥
[४९]अनुस्मारकमस्त्येतद्, धाम चैवाऽस्ति सूत्तमम् । अमीभ्यो निश्चितं तावद् ये भवन्ति भयन्धराः ॥६७॥

CC-0. In Public Domain. Digitized by eGangotri

[50]स्वर्गाः शश्वन्निवासाय, येषां द्वारोऽप्य पावृताः । तेभ्यस्तिष्ठन्ति; [51]ते तत्र चोपधानैः समं स्थिताः ।।६८।।
भविष्यन्ति, प्रभूतानि खाद्यान्नानि तथैव च । पेयान्यानाययन्तश्च भविष्यन्त्यसकृत् पुनः ।।६९।।
[52]पार्श्ववर्त्यो भविष्यन्ति तथा तेषाञ्च योषितः । विनीताक्षा अथो भव्यैर्नयनैरतिभूषिताः ।।७०।।
[53]तदेतद् यस्य युष्माकं प्रतिज्ञा क्रियते पुरः । भाविनो निर्णयस्याह्नि; [54]दानं सत्यमिदञ्च नः ।।७१।।
यस्य नान्तः कदाप्यस्ति; [55]तिष्ठतीदं किलैकतः । हठिभ्यो वर्त्तते किञ्च ध्रुवं दुर्धाम चान्यतः ।।७२।।
[56]नारकः, यं प्रवेक्ष्यन्ति ते हि कद्धाम तद् ध्रुवम् । [57]स्वद्यतामेतदस्त्यत्र क्वथद् वारि तथैव च ।।७३।।
शोणितं पूयगन्धञ्च; [58]सहैवान्यदथापि च । सदृशं स्तोकमेतेन भिन्नभिन्नविधं तथा ।।७४।।
[59]अयं हन्त ! गणश्चैकः पूर्ण एवाऽऽविशत्यथ । समं युष्माभिरेवाऽत्र, तिष्ठतात् स्थानमत्र च ।।७५।।
नाऽपि किंचित् किलामीभ्यो, दग्धारोऽग्नाविमे ध्रुवम् । [60]तेऽवदन्—नो, ऽत्र युष्मभ्यं त्वेव स्थानं न तिष्ठतात् ।।७६।।
स्थापितं पुरतोऽस्माकं युष्माभिस्त्वेव खल्विदम् । घोरमेतद्धि दुर्धाम हन्त ! वासाय वर्त्तते ।।७७।।
[61]तेऽवदन्—नः प्रभो ! येन स्थापितं नः पुरस्त्विदम् । तं जनं नारके ह्यग्नौ द्विगुणां यच्छ यातनाम् ।।७८।।
[62]तेऽवदंश्चैव—किं न्वेतद् वयं नेक्षामहे तु तान् । वहून् लोकान् त्समाविष्टान् कृतान् कापुरुषेषु हि ।।७९।।
[63]परीहासस्य पात्राणि किमस्माभिर्हि ते कृताः ? । पश्यद्भिश्चापि वाऽस्माभिस्ते भवेयुर्न लक्षिताः ? ।।८०।।
[64]इदं भाव्येव नैवाऽत्र सन्देहः कोऽपि विद्यते । सन्ततं कलिरेतेषां अग्निभाजां परस्परम् ।।८१।।
[65]ब्रूह्यहं चेतको ह्येव केवलो, ऽल्लाहतः पृथक् । न प्रतीष्टोऽपरो, ऽसौ चाप्यद्वितीयः प्रभुस्तथा ।।८२।।
[66]धरित्र्या वियताञ्चैव यत्तयोरन्तरे तथा । प्रभुस्तस्याऽपि सर्वस्य, क्षमाशीलो वली पुनः ।।।८३।
[67]ब्रूहि—वृत्तं महत्वस्य तिष्ठतीदन्तु सर्वथा । [68]नावधानस्य दानेन त्वाद्रियध्वे हि यत् पुनः ।।८४।।
[69]विवदन्ते स्म चैवाऽमी महोच्चैः समवस्थिताः । यदा मेऽविदितं ह्येव तदतिष्ठत् (त्वसंशयम्) ।।८५।।
[70]प्रकाशं नीयते (तत्तु) मयि तेन यथा ह्यहम् । भवेयं हि गतस्तावद् वैशद्यं चेतकः किल ।।८६।।
[71]प्रभुस्ते देवता आह यदा चैव—मृदो ह्यहम् । मर्त्यमेकं विधास्यन् वै भवामि; [72]तदनन्तरम् ।।८७।।
सर्वाकारे कृते तस्मिन्, आत्मनि प्राणयत्यथ । मयि, तत्र ततः कार्यः प्रणिपातोऽस्य सम्मुखम् ।।८८।।
[73]प्रणिपातपरा देवास्ततोऽभूवन् त्समेऽपि ते । [74]इभालीनं विहायाऽमुं महान्तं स्वममन्यत ।।८९।।
यो हि, यश्चाभवत् तेषां श्रद्विहीनास्तु ये जनाः । [75]अथाऽऽह— भो इभालीन ! कराभ्यां सृष्टवानहम् ।।९०।।
यं हि त्वं वारितस्तस्मै प्रणिपातात्तु केन हि ? । महान्तं त्वं किमात्मानं मन्यसे, दर्पितोऽथवा ? ।।९१।।
[76]असावाह—वरीयान् वै भवाम्येष ततस्त्वहम् । सृष्टवानसि मां वह्नेः त्वम्, मृदस्तं त्वथो पुनः ।।९२।।
[77]स आहाऽपेह्यतस्त्वं (भोः!) पतितस्त्वं हि तिष्ठसि । [78]धिक् कृतस्स्थास्यसि त्वञ्च मया यावदुपैति नो ।।९३।।
निर्णयस्य दिनं तद् वै; [79]स चाऽह—हे मम प्रभो! । देहि कालावकाशम्मे पुनरुत्थापनादिनम् ।।९४।।
यावन्नाभ्येति लोकान् वै; [80]स आह—तुभ्यमस्तु तत् । [81]निश्चिताय हि कालाय; [82]स आहाऽहं शपे किल ।।९५।।
त्वत् प्रतापेन, तत् सर्वान् कर्त्तास्मि भ्रष्टवर्त्मनः । [83]वन्धकानेकचित्तांस्तु त्वदीयान् प्रविहाय हि ।।९६।।
[84]स आह—सत्यमेतद्धि, वच्म्यहं सत्यमेव च । [85]नारकं पूरयिष्यामि त्वयाऽहं तैस्तथाऽखिलैः ।।९७।।
येऽनुयान्ति जनास्तेषां त्वाञ्च; [86]ब्रूहि तथैव च । अपेक्षेऽहं पुरस्कारं नैव युष्मच्च कञ्चन ।।९८।।
नाऽपि पाषण्डिनां किञ्च तिष्ठाम्येष तु कश्चन । [87]अनुस्मारकमेवैतत् त्वस्ति लोकाय सर्वथा ।।९९।।
[88]सत्यमस्य पुनर्यूयं कालेन ज्ञास्यथैव च ।

योगः—९९।।

CC-0. In Public Domain. Digitized by eGangotri

३९

सूक्तम्—व्यूहा: (सरणशीला व्यूहा:)

(अज़-ज़ुमर)

(महाकालेऽवतीर्णा: पञ्चसप्ततिरायाता:)

सा ल्लाहनाम्जापं योऽल्लाहो दयी हितैष्यपि

[1]अल्लाहादवतारोऽस्य पुस्तकस्य हि वर्त्तते । प्रभुत्वाद् यो महान् किञ्च तत्त्वदर्श्यपि विद्यते ॥ १ ॥
[2]सत्येनैवावतारो ऽस्य कृतोऽस्माभि: किल त्वयि । त्वया वन्द्यस्ततो ऽल्लाह: केवलं, पावनं मतम् ॥ २ ॥
तदर्थं ध्रियमाणेन; [3]ज्ञायतां पावनं मतम् । अल्लाहायैव, यैश्चान्यैर्मित्राणि रक्षकाणि हि ॥ ३ ॥
निर्मितानि ततस्तावद् व्यतिरिक्तानि ते जना: । (आहुरित्थम्)—भजामस्तान् धिया केवलयाऽनया ॥ ४ ॥
ते यतोऽतितरां पार्श्वेऽल्लाहस्यास्मान् नयन्तु वै । निर्णयं सत्यमल्लाहस्तेषु तावदवाप्स्यति ॥ ५ ॥
यत्र भेदमतिस्तेषाम्, अल्लाहो न हि संशय: । दर्शयति न तं मार्गं यो ऽश्रद्धोऽसत्यवागथ ॥ ६ ॥
[4]तस्य कामो ऽभविष्यच्चेत् पुत्रं कर्त्तुं हि कञ्चन । सृष्टवान् यत् स वै तेभ्यो ह्यचेष्यत् कंचनेच्छया ॥ ७ ॥
राजते ऽसौ महिम्ना ऽसावल्लाहश्चैकलश्च स: । प्रभुत्वाच् छालते चासौ; [5]तेन सत्येन भाविता ॥ ८ ॥
धरित्री वियतश्चैव कारणादथ तस्य च । निशा वासरमन्वेति वासरो ऽन्वेत्यथो निशाम् ॥ ९ ॥
स एव सोममर्कञ्च नियुंक्ते (निज) कर्मणि । निश्चितावधये तौ च गत्यात्मानावुभौ स्थितौ ॥१०॥
बुध्यतां स क्षमाशील: प्रभु: किञ्च महानथ । [6]असृजत् त्वामसौ जीवादेकस्मात् पुनरेव च ॥११॥
कृतवान् मिथुनं तस्मात्तस्य, किंच चतुष्पदाम् । स्त्रिय: पुंसस्तथैवाष्टौ युष्मभ्यं कृतवानपि ॥१२॥
असृजच्चैव युष्मांत्स प्रसूर्गर्भेभ्य एव तु । उत्तरादुत्तरं किञ्च निधायाऽथ तमस्त्रये ॥१३॥
ईदृशस्त्वेव चाल्लाह: प्रभुर्वो राज्यमप्यथ । तदीयं त्वेव, नो तस्मात् प्रतीष्टोऽन्यश्च तिष्ठति ॥१४॥
तत् कुतो (भो:!)विचेष्टध्वे पराङ् आस्यतया पुन: ? । [7]कार्तघ्ने दर्शिते चाऽपि युष्माभिर्वर्तते ह्यसौ ॥१५॥
अनपेक्ष: किलाऽल्लाहो युष्मासु, न परन्तु स: । वन्धकैरात्मनीनैर्हि कार्तघ्नस्य प्रदर्शनात् ॥१६॥
प्रसन्नो जायते, ऽथो चेत् कार्तज्ञस्य प्रदर्शनम् । युष्माभि:क्रियते तेन युष्मभ्यं स प्रसीदति ॥१७॥
वक्ष्यत्यन्यस्य नो भारं वोढ़ा भारस्य कोऽपि च । परावृत्योपगन्तव्यो युष्माभिश्च प्रभुर्निज: ॥१८॥
बोधयिष्यति युष्मांश्च तदाऽसौ वो विचेष्टनम् । वेत्ति तावदसौ सर्वं हृत्स्थं यच्चापि तिष्ठति ॥१९॥
[8]कष्टमापद्यते किंचिन् मानवोऽथ यदा तदा । परावृत्याऽभि तं तावत्, तं समाह्वयते (ध्रुवम्) ॥२०॥
यदा चैवात्मनस्तस्मै वैभवं संप्रयच्छति । विस्मरत्येव यत् कृत्वा पूर्वमाहूतवान् हि तम् ॥२१॥
अल्लाहस्य प्रतिम्नश्च ततोऽसौ घटयत्यपि । तस्य यन्मार्गतो लोकान् कुर्याद् भ्रष्टान्, वदाऽ(थ च)॥२२॥
लाभं स्तोकं प्रविन्दस्व स्वकार्तघ्नस्य कारणात् । वर्त्तसे सत्यमेव त्वं ह्यग्निमन्तर्गमिष्यताम् ॥२३॥
[9](श्रद्विहीनेन किं साम्यं यात्य) सौ यो निरन्तरम् । वन्दनातत्परो, रात्रौ प्रणिपातपरस्तथा ॥२४॥
समुत्थानपरोऽजस्रं परलोकभयन्धर: । दयाया: स्वप्रभोस्तावत् साशश्चैवाऽपि तिष्ठति ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

ब्रूहि—कच्चिद् भवेत् साम्यं ज्ञाताऽज्ञात्रोः कदाचन? । त एव त्वत्र चेतन्ते ये धियः समुपासते ॥२६॥
[१०]ब्रूहि—मे बन्धका यूयं कृतश्रद्धा य आसते । विभीत स्वप्रभोर्यूयं, तेभ्यो भद्रं हि तिष्ठति ॥२७॥
येऽत्र भद्रकृतः, किञ्च धरित्री प्रथिता ह्यति । तस्याऽल्लाहस्य, ये किञ्च स्थिरा अत्र भवन्ति हि ॥२८॥
अमानं ते पुरस्कारं अवाप्स्यन्ति (न संशयः) । [११]ब्रूह्यहन्तु प्रदिष्टोऽस्मि स्तोतुमल्लाहमेव वै ॥२९॥
पावनं मतमास्थाय तदर्थम्; [१२]दिष्ट एव च । आत्मनोऽप्येऽर्पकास्तेषु प्रथमः स्यामहं पुनः ॥३०॥
[१३]ब्रूहि—कुर्यामवज्ञाञ्चेत् स्त्रप्रभोः भयमस्ति मे । यातनाया अमुष्याह्नो महाघोरं हि यत् स्थितम् ॥३१॥
[१४]स्तवीम्यल्लाहमेवाऽहं, ब्रूह्यमुष्मै विधाय वै । आत्मनीनं मतं पूतम्; [१५]यूयं तस्मादृते परम् ॥३२॥
स्तुवीताऽथ यथाकामम्; ब्रूहि तावत्—त एव तु । हानिभाजो यथार्थं ये पुनरुत्थापनाऽह्नि ॥३३॥
आत्मनोऽपि विहास्यन्ति स्वकीयांश्चापि बान्धवान् । मता सा चैव हानिस्तु हानिरत्र यथार्थतः ॥३४॥
[१६]ऊर्ध्वमेषां भविष्यन्ति वह्निच्छत्राण्यधोऽपि च । वेदिका ताव (दाग्नेयी), तदेतद् ध्येव तिष्ठति ॥३५॥
भीषयति यतोऽल्लाहः स्वकीयानत्र वान्धवान् । बन्धकास्तन्मदीया भोः ! भयं धारयताऽत्र मे ॥३६॥
[१७]ये त्वरक्षन् किलात्मानं मिथ्यादेवस्तुतेरथ । अल्लाहवृतयो जाताः वृतं तेभ्यः शुभं स्थितम् ॥३७॥
बन्धकेभ्यो मदीयेभ्यः शुभं वृतं प्रदेहि तत् । [१८]सक्षणा ये निशाम्यन्ति, सुष्ठु तेऽप्याचरन्ति च ॥३८॥
ते ह्यमी यान् किलाल्लाहो वर्त्म संदर्शयत्यथ । धिया युक्तास्तथैवाऽमी; [१९](रक्षितुं शक्यते नु किम् ॥३९॥
विषये निर्णयो यस्य यातनार्थं कृतो भवेत् ? । रक्षितुं किं त्वया शक्य स्स स वै यः पतितोऽनले? ॥४०॥
[२०]स्वप्रभोर्ये जनास्त्वत्र परं यान्ति भयं (ध्रुवम्) । प्रांशुर्हर्म्याणि वै तेभ्य उपर्युपरि सद्मभिः ॥४१॥
वहन्ति यदधः कुल्याः, अल्लाहस्येयमस्ति च । प्रतिज्ञा, न प्रतिज्ञाञ्चाल्लाहः स्वीयां प्रतीपयेत् ॥४२॥
[२१]नेक्षितं किं त्वयाऽऽकाशाद् अल्लाहोऽवर्षयज्जलम् । धरित्र्याः स्रोतसां पश्चादुद्गमस्तेन कारितः ॥४३॥
विरागान्यथ सस्यानि जनयत्यपि तेन सः । तानि शुष्यन्ति तत्पश्चात्, तानि त्वञ्च विलोकसे ॥४४॥
पीतिमानमुपेतानि, वुसं तेभ्यः करोति च । अनुस्मारकमत्राऽऽस्ते वुद्धिमद्भ्यो ह्यसंशयम् ॥४५॥
[२२]का कथा तस्य यस्याऽऽस्ते ह्यात्मनोऽर्पणहेतवे । उरोऽल्लाहेन संस्फीतम्, स्वप्रभोर्लब्धवान् हि सः ॥४६॥
प्रकाशम्; तद् विनाशोऽस्ति नृणां येषां मनांसि तु । अविश्वासेन शून्यत्वाज्जडिमानं गतानि हि ॥४७॥
वस्तुतस्ते तु तिष्ठन्ति मार्गाद् भ्रष्टा जना इह । [२३]सूत्तमस्यावतारोऽस्ति कृतोऽल्लाहेन—यत् पुनः ॥४८॥
पुस्तकम्, यस्य सर्वेऽपि भागाः संवादिनो मिथः । पुनरावृत्तिमन्तश्च; रोमहर्षोऽथ जायते ॥४९॥
तेन तेषां जनानां येऽल्लाहात् त्रस्यन्ति (सर्वदा) । ततस्तेषाञ्च हृत्काये नम्रतामाकलय्य वै ॥५०॥
अल्लाहस्मरणे त्वेव रारमीतो हि सर्वशः । मार्गदर्शनमस्त्येतद् यदल्लाहादुपागतम् ॥५१॥
येन मार्गं नयत्येष यत्कामः स हि तिष्ठति । यं परन्त्वयनाद् भ्रष्टं कुर्यादल्लाह एव तु ॥५२॥
मार्गसन्दर्शकस्तस्य वर्त्तते नाऽथ कश्चन । [२४]का (दशाऽमुष्य तावत् स्यात्) पुनरुत्थापनाऽह्नि ॥५३॥
रक्षितुं सप्रयत्नो यः कृच्छ्रादात्ममुखं भवेत् । जाल्मा लोकाश्च वक्ष्यन्ते—स्वादध्वमर्जितन्तु यत् ॥५४॥
[२५]पूर्वजाता जनाश्चापि न्यषेधन्नेव सर्वथा । यातनाऽऽपातिता तेषु चान्ततः स्थानकात्ततः ॥५५॥
अतिष्ठत्तैरविज्ञातं सर्वथैव तु यद् (ध्रुवम्) । [२६]तानास्वादयताऽल्लाहस्ततः संसारजीवने ॥५६॥
तिरस्कारमथाऽसौ तु परलोकस्य यातना । घोरीयसी किलात्यर्थमभोत्स्यन्त कदाचन ॥५७॥
ते यदीदं शुभं सत्यमभविष्यत् त्विदं परम् । [२७]कुराणे निहिता अत्राऽस्माभिः सर्वविधोपमाः ॥५८॥
सर्वेभ्योऽपि हि लोकेभ्यस्ते चेतन्तु कदाचन; । [२८]कुराणं चेदृशं (वाचि) यदर्वाणां, न यत्र च ॥५९॥
वैषम्यं वर्त्तते किञ्चित्, आत्मनोऽवन्तु ते क्वचित् । [२९]पुरः स्थापयतेऽल्लाहो दृष्टान्तमेक (मत्र) वै ॥६०॥
स एको वहवो यस्य त्वंशभाजस्तथैव च । सविवादाः, अथान्यस्तु स एको यस्य वर्त्तते ॥६१॥
कश्चिदेको जनः स्वामी केवलम्, किन्तु तावुभौ । एकतां विभ्रतः काञ्चित् ? स्तवोऽल्लाहाय वर्त्तते ॥६२॥
इदं प्रायेण बुध्यन्ते नो परन्त्वधिका जनाः । [३०]युष्माभिश्चापि मर्तव्यं मर्तव्यमेभिरप्यथ; ॥६३॥
[३१]स्थास्यथ सविवादाश्च पुनरुत्थापनाऽह्नि । समक्षं स्वप्रभोर्यूयं सर्वे तावद (संशयम्) ॥६४॥

इति त्रयोविंशं पारायणम्

CC-0. In Public Domain. Digitized by eGangotri

अथ चतुर्विशं पारायणम्

[३२]यस्त्वसत्यापयेत्तावदल्लाहं कस्तु तं भवेत् । जाल्मो घोरोऽतियायात्र, यश्च सत्यं निषेधयेत् ।।६५।।
पुरश्चाप्युपयातन्तु, धाम किन्नहि नारके । भविता खल्वमीषां ये श्रद्विहीना जना इह ? ।।६६।।
[३३]यस्तु सत्यमुपादाय प्राप्तवानथ तत्र च । श्रद्दधानस्त एवामी कर्त्तव्यबुद्धयो जनाः ।।६७।।
[३४]ते भविष्यन्ति यत् कामाः प्रभोस्तेषां हि सन्निधौ । तेभ्यस्तत्तदशेषेण, भद्रेभ्योऽसौ पुरस्कृतिः ।।६८।।
[३५]अपास्तं दुरितं कर्म तेभ्योऽल्लाहो हि तत्कृतम् । कर्त्ता, यदुत्तमञ्चैव तथाऽचेष्टन्त ते जनाः ।।६९।।
प्रदाता तस्य तेभ्यश्च पुरस्कारमथैव च । [३६]स्वकीयं वन्धकं किन्नोऽल्लाहः प्रपालयिष्यति ? ।।७०।।
ततोऽपि भीषयन्तीमे त्वामल्लाहात् पृथग् हि ये । भूत्वा तिष्ठन्ति वै तेभ्यः, विदध्यादयनाच्च्युतान् ।।७१।।
यानल्लाहो न तेषान्तु कोऽपि मार्गप्रदर्शकः । [३७]दर्शयेदयनं यञ्च किलाल्लाहो, न विद्यते ।।७२।।
अयनाद् भ्रंशकस्तस्य; नाल्लाहः किन्नु विद्यते । प्रभुता शाल्यथो चैव प्रतिशोधपरः पुनः ? ।।७३।।
[३८]पृच्छेताऽथ जनान् एतान् यूयम्—कस्तावदसृजत् । धरित्रीं वियतश्चैव ? वक्ष्यन्त्यल्लाह एव तु ।।७४।।
ब्रूहि—तल्लोक्यतां मां चेदल्लाहः कामयेत वै । प्रदातुं काञ्चनाप्यर्त्ति तत् किं ते यान् प्रतीच्छथ ।।७५।।
तत्कृतार्त्तिविनाशाय प्रभवन्ति कदाचन ? । अथो वा कामयेताऽसौ दयां दर्शयितुं मयि ।।७६।।
किन्नु ते प्रभविष्यन्ति तामपोढुं दयां क्वचित् ? । ब्रूहि—मे ऽल्लाह एवाऽस्ति सर्वस्वम्, ये जना इह ।।७७।।
प्रत्ययाश्रयिणस्तेषां तत्रैव प्रत्ययः सदा । [३९]ब्रूहि—मे ज्ञातयो ! यूयं कुरुत कृत्यमात्मना ।।७८।।
(आत्मनै) वाऽहमप्येष कृत्यमत्राऽऽचरामि हि । ज्ञास्यथाऽचिरमेवाऽथ; [४०]यातना साऽऽपतिष्यति ।।७९।।
कस्मिन् तिरस्कृतं या तं करिष्यत्य (विशंकितम्) । अथो चाऽऽपतिता कस्मिन् स्थैर्यभाक् सा हि यातना ।।८०।।
[४१]काशितं लोकलाभाय सत्येनेदन्तु पुस्तकम् । त्वय्यस्माभि, रथेदानीं भद्रं मार्गं प्रयास्यति ।।८१।।
यः स खल्वात्मने ह्येव, भ्रष्टो मार्गाद् भविष्यति । यश्च तज्जाऽखिलाऽप्यापत् तस्मिन्नेवाऽपतिष्यति ।।८२।।
नाभियुक्तोऽसि तद्धेतोस्त्वन्तु तावत् कदाचन । [४२]तेषां प्राणानथो ऽल्लाहो मृत्युकाले ह्युपस्थिते ।।८३।।
ग्रसत्यप्राप्तमृत्यूनां परं स्वापे समागते । निर्णयं कुरुते यस्य मृत्यवे च पुनस्स तम् ।।८४।।
रुणद्धि, मुञ्चति त्वन्यान् नियतावधये किल । अत्र लक्ष्माण्यनेकानि विवेकिभ्यः पुनर्ध्रुवम् ।।८५।।
[४३]विहायैते किमल्लाहं कृतवन्तोऽभिशंसिनः । परानेव ? (परं) ब्रूहि—किन्नु ? ते प्रभवोऽपि नो ।।८६।।
तिष्ठन्त्यत्र तु कस्मिंश्चिन् न सवोधाश्च यद्यपि ? । [४४]ब्रूहि—केवलमल्लाहः प्रभुः सर्वाभिशंसने ।।८७।।
तदीयञ्चैव तद् राज्यं धरित्र्या वियताञ्च यत् । परावृत्योपगन्तव्यो युष्माभिश्च स एव तु ।।८८।।
[४५]कीर्त्यते च यदाऽल्लाहः केवलं तत्र ये जनाः । मन्वते न परं लोकं संकोचन्ति तदा पुनः ।।८९।।
हृदयानि किलाऽमीषां, विकसन्ति परन्तु ते । तं विहाय यदा त्वन्ये कीर्त्यन्ते पुनरेव च ।।९०।।
[४६]ब्रूहि—अल्लाह ! धरित्र्याश्च वियतामथ सर्जक ! । प्रत्यक्षस्य परोक्षस्य किञ्च वेत्तः ! त्वमेव तु ।।९१।।
बन्धकानां हि ते यत्र भेदबुद्धि र्व्यतिष्ठत । निर्णयं तत्र वै कर्त्ता; [४७]त्वथाऽस्थास्यत् तदन्तिके ।।९२।।
ये हि जाल्मा जनाः सर्वं धरित्र्यां यत्तु वर्त्तते । तावदेवेतरं किञ्च, पुनरुत्थापनाऽह्नि ।।९३।।
अदास्यन् तत्समं ते वै कृच्छ्राद् रक्षितुमात्मनः । तर्कितञ्चापि यत्तैर्नो तदल्लाहादुपेष्यति ।।९४।।
तत्समक्षं पुनः सर्वम्; [४८]यच्च किंचित्तदर्जिम् । तस्य दोषा अथाप्येतानुपस्थास्यन्त्यऽत्राहसन् ।।९५।।
यच्च ते तदुपागत्य तान् हि पर्यावरिष्यति । [४९]कष्टं मर्त्यं यदोपैति तदाऽस्मानाह्वयत्यसौ ।।९६।।
ततःकिंचिदुपादेयं तस्मै दद्मो वयं यदा । असौ वक्ति—मम ज्ञातं पुरैवाऽसीदिदन्तु यत् ।।९७।।
मया लब्धम्, न खल्वेतत् त्वित्थ, मस्ति परीक्षणम् । तावदेतन्, न बुध्यन्ते परंत्वेषामिहाधिकाः ।।९८।।
[५०]पूर्वं जाता य एतेषां इत्थं ते चाप्यवादिषुः । नोपपन्नं परन्तेन यदकुर्वन्नपीह ते; ।।९९।।
[५१]तस्य दोषा अथैतेषु चाऽऽपतन् यत्त आर्जयन् । एषु चैवाऽपि ये जाल्मा दोषास्तेष्वापतिष्णवः ।।१००।।
कारणात्तत् कृतानां वै कर्मणाम्, न च ते पुनः । आत्मनो रक्षितुं शक्तास्तेभ्यस्तावत् कथञ्चन ।।१०१।।
[५२]इमे जानन्ति किं नैव रोचते यो जनस्त्विह । अल्लाहाय, महौदार्यं स तस्मै प्रतनोति हि ।।१०२।।
प्रवत्ते परमन्येभ्यो मानोन्मानपुरस्सरम् । अत्र लक्ष्माण्यनेकानि श्रद्धरेभ्यो भवन्ति हि ।।१०३।।
[५३]ब्रूहि—मे बन्धकाः यूयं सापराधा य आत्मभिः । निराशां प्रेत नो यूयमल्लाहस्य दयास्वधि ।।१०४।।

CC-0. In Public Domain. Digitized by eGangotri

क्षमते हि किलाल्लाहः सर्वपापान्यसंशयम् । क्षमाशीलो दयालुश्च वर्त्ततेऽसौ न संशयः ॥१०५॥
[५४]यातनाऽऽपातनात् पूर्वं निवर्त्तध्वं निजं प्रभुम् । अर्पयत तथाऽऽत्मानं तत्पुरस्तात्, अवाप्स्यथ ॥१०६॥
नैव साह्यं किमप्यूर्ध्वम्; [५५]यातनाऽऽपातनात् पुरा । अकस्मात्, नैव युष्मासु विदत्सु किंच, यत् किल ॥१०७॥
काशितं ननु युष्मासु वर्त्तते सूत्तमं तु तत् । यूयमन्वित; [५६]तन्नो स्यात् तदिदन्तु कदाचन ॥१०८॥
आरभेतैव यद् वक्तुं कोऽपि—हन्त ! विषाद्यहम् । अल्लाहं समुपेक्ष्यैव यत् स्थितोऽस्मि, तथैव च ॥१०९॥
परिहासपरेष्वेवाऽतिष्ठमन्यतमः पुनः । [५७]आरभेताऽथवा वक्तुम्—अभविष्यं हि खल्वहम् ॥११०॥
कर्त्तव्यतत्पराणाञ्चेत् अल्लाहोऽदर्शयिष्यत । मां हि मार्गम् ! [५८]स वा वक्तुमारभेतेक्षणादनु ॥१११॥
यातनाम्—सुमहद् भद्रं भवेत् स्याच्चेत् पुनः क्षणः । (यातुं लोकेऽ) थ तिष्ठेयमहं भद्रकृतामपि ॥११२॥
[५९](वक्ष्यतेऽसौ परन्त्वेतत्) कथन्नो ! त्वामुपागताः । अभूवन्नस्मदायाताः, खण्डितास्ते परं त्वया; ॥११३॥
साभिमानः स्थितोऽभूश्च, गतश्रद्धेष्वथापि च । [६०]ईक्षिष्यध्वे च यूयं तान् पुनरुत्थापनाऽह्नि ॥११४॥
अल्लाहविषयेऽसत्यमघटयन् हि ये जनाः । कालवर्णाऽऽननास्ते वै भविष्यन्ति तदा, न किम् ॥११५॥
नारकः साभिमानेभ्यो वासस्तावत् स तिष्ठति ? । [६१]भद्रकारितया तेषामल्लाहस्तानथाऽपि च ॥११६॥
कर्त्तव्यतत्परत्वेन रक्षितान् प्रविधास्यति । न ते कञ्चित् प्रयास्यन्ति दोषं दुःखमथाऽपि च ॥११७॥
[६२]स्रष्टाऽल्लाहो भवत्यत्र सर्वस्याऽपि तु वस्तुनः । पालकश्चाऽपि सर्वस्य तिष्ठत्यत्र स एव तु ॥११८॥
[६३]कुञ्जिकाश्च तदायत्ता धरित्र्या वियतामथ । हानिभाजश्च ते ह्येव विश्वसन्ति न ये जनाः॥११९॥
अल्लाहस्य किलाऽऽयातान्; [६४]ब्रूहीदानीमपीह किम् । शिष्ठ मां मूढतापन्नाः ! स्तुवीय यदहं परम् ॥१२०॥
अल्लाहाद् व्यतिरिक्तं हि ?; [६५]कृतं काशितमप्यथ । त्वयीदं तेषु ये चाऽपि पूर्वजास्ते—यदि क्वचित् ॥१२१॥
तत् प्रतिम्नो हि युष्माभिर्घटनं क्रियते ततः । अवकेशि कृतं वः स्याद् हानिभाजां तथैव च ॥१२२॥
तिष्ठेताऽपि पुनर्यूयम्; [६६]न तावत्, तं हि केवलम् । स्तुवीत यूयमल्लाहम्, कृतज्ञेष्वथ तिष्ठत ॥१२३॥
[६७]यादृशोऽस्त्यथ चाल्लाहस्तादृशस्य न कल्पनाम् । प्राभवन् कर्त्तुमेते तु, वर्त्तते स किलेदृशः ॥१२४॥
धरित्रीनिखिला चापि पुनरुत्थापनाहनि । मुष्टिमेया भवेत्तेन, दक्षिणेऽस्य करे पुनः ॥१२५॥
वियतश्च भविष्यन्ति संश्लिष्टानि परस्परम् । राजते स महिम्नाऽथ महोच्चैरपि तिष्ठति ॥१२६॥
तस्मात् सादृश्यमेतस्य घटयन्ति हि येन ते । [६८]तूर्याध्मानसमं सर्वं मूर्छितञ्चाभवत् पुनः ॥१२७॥
यदुर्व्यां यद् वियत्स्वाऽऽस्त प्रतीष्टं प्रविहाय तु । अल्लाहस्य; पुनस्तत्राऽक्रियताऽऽध्मानमप्यथ ॥१२८॥
ततः सर्वे समुत्थाय प्रतीक्षातत्पराः स्थिताः ! । [६९]भ्राजमाना वभूबोर्वी प्रकाशेन निजप्रभोः ! ॥१२९॥
शास्त्रमानीयताऽथाऽपि, समानीयन्त खल्वथ । वाग्धराः साक्षिणश्चैव, यथावन्निर्णयस्तथा ॥१३०॥
लोकेष्वक्रियतै, तेषु नात्याचारो भविष्यति । [७०]यद् यद् येन कृतं चासौ निरवशेष्य तत्कृतात् ॥१३१॥
पुरस्कृतः कृतोऽभूच्च, सम्यग् वेत्ति पुनश्च सः । अकुर्वन् यद् यदप्येते; [७१]श्रद्विहीना जना अथो ॥१३२॥
प्रणीता व्यूहशो ऽभूवन् नारकं प्रति, तेष्वथ । तत्र प्राप्तेषु तद् द्वारोऽपावृता अक्रियन्त च, ॥१३३॥
तद् द्वारस्थाश्च तानूचुः—युष्मास्वेव तु किन्नु वः । वाग्धरा ननु संप्राप्ताः श्रावणार्थं किलाऽऽयतान् ॥१३४॥
वाचयित्वा प्रभोर्वोऽथ चेतनार्थं तथैव वः । वत्सरस्यास्य सम्प्राप्तेः? ते वदिष्यन्ति 'किन्न(भोः!)॥१३५॥
निर्णीतैव परं जाताऽश्रद्धरेभ्यस्तु यातना । [७२]भणिष्यन्तेऽथ ते—यात नारकद्वास्सु, तिष्ठत ॥१३६॥
तत्र शश्वत्, सदर्पेभ्यो घोरं दुर्धाम तत् पुनः । [७३]प्रणीता व्यूहशोऽभूवन् श्रद्दधाना जना अथो ॥१३७॥
प्रत्याराममवाप्तेषु तद् द्वारोऽपावृतास्तथा । अक्रियन्त, पुनर्द्वास्स्थास्तांस्तथोचुः—शमस्तु वः ॥१३८॥
हन्त ! यूयं शुभोदर्काः, विशतैनमथाऽधुना । तिष्ठताऽत्र पुनः शश्वत्; [७४]ते ततः प्रत्यवादिषुः ॥१३९॥
स्तवोऽल्लाहाय योऽस्माकं पुरस्तात् समयं कृतम् । प्रतिपादितवान् सत्यम्, साधिकारांश्च नोऽकरोत् ॥१४०॥
अस्यामुर्व्यां चरेमाऽत्र कामतो यदितस्ततः । औदार्यसम्भृता तावद् भद्रकृद्भ्यः पुरस्कृतिः ॥१४१॥
[७५]द्रक्ष्यसि त्वं पुनर्दिव्यानासनं परितः स्थितान् । स्तुवतः स्वं प्रभुं किञ्च गुणानां वर्णनैः समम् ॥१४२॥
यथावन्निर्णयश्चापि लोकेष्वक्रियतोऽयत । किञ्च—यो हि प्रभुस्तावत् समेषां जगतामपि ॥१४३॥
स्तवोऽल्लाहाय खल्वस्ति तदर्थं (मविशंकितम् ।

योगः—१४३॥

CC-0. In Public Domain. Digitized by eGangotri

४०

सूक्तम्–मन्मनाः, क्षन्ता

(अलमोमिन, ग़ाफ़िर)

(महाकालेऽवतीर्णाः पञ्चाशीतिरायाताः)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[१]हा॰मीम॰; [२]अस्य हि शास्त्रस्यावतारोल्लाहतः किल । शालते यः प्रभुत्वेन सर्वविच्चापि तिष्ठति ॥ १ ॥
[३]अघक्षन्तोररीकर्त्ता पश्चात्तापस्य (खल्वथ) । उग्रदण्डः समर्थश्च, पूज्यस्तस्माच्च नेतरः ॥ २ ॥
परावृत्योपगन्तव्यः पुनश्चापि स एव तु । [४]अल्लाहस्य किलायातानधिकृत्य त एव तु ॥ ३ ॥
विवदन्ते जना येऽत्र श्रद्विहीना भवन्ति ह । मा ववञ्चत पूष्पु त्वामतस्तदृद्धदर्शनम् ॥ ४ ॥
[५]नाहुषा ज्ञातयश्चापि पश्चादन्येऽपि वर्गगाः । न्यषेधन् (वाग्घरान् त्स्वीयान्), निग्रहकृतबुद्धयः ॥ ५ ॥
वाग्घरेष्वात्मनीनेषु गणाः सर्वे तथा ऽभवन् । मिथ्यावादाऽधिकारेण वितण्डामारभन्त च ॥ ६ ॥
सत्यं निम्नयितु तेन, निगृहीतास्ततो ऽभवन् । ते मया, कीदृशो घोरो दण्डोऽसौ मामको ऽभवत् ! ॥ ७ ॥
[६]तदित्थं ते प्रभावाचा जाता त्वेव प्रमाणिता । श्रद्विहीनेषु यद् वह्नौ धिक्षिष्यन्तस्त आसते ॥ ८ ॥
[७]ते हि सिंहासनं ये तु ध्रियन्ते, परितश्च तत् । तिष्ठन्ति, स्वं प्रभुं चैव स्तुवन्ति स्तुतिभिः सह ॥ ९ ॥
श्रद्दधानाः पुनस्तस्मिन्, प्रार्थयन्ते यथैव च । श्रद्धरेभ्यः क्षमादान (वदन्तः)—त्वं हि नः प्रभो ! ॥१०॥
व्याप्नोषि सर्वमप्यत्र ज्ञानेन दयया तथा । तद्गता विप्रतीसारं अन्वयुस्ते ऽयनञ्च ये ॥११॥
तान् क्षमस्व तथा रक्ष धिक्षदग्नेर्हि कृच्छ्रतः । [८]आरामेषु प्रभो नस्त्वं तांस्तथैव प्रवेशय ॥१२॥
स्वप्रतिज्ञाऽनुसारेण तैः समं, तानथाऽपि च । ये हि भद्रकृतस्तेषां पत्न्योऽपत्यानि पूर्वजाः ॥१३॥
प्रभुत्वाच् छालसे सत्यं तत्वदर्शी च तिष्ठसि । [९]रक्ष तान् दुरितेभ्यश्च, तस्मिन्नहनि रक्षितो ॥१४॥
यस्त्वया दुरितेभ्यश्च दयितोऽसौ ध्रुव त्वया । महत् साफल्यमेतच्च वर्त्ततेऽथ मतं किल ॥१५॥
[१०]श्रद्विहीनाश्च वक्ष्यन्ते घोषणाभिः समं पुनः । तिष्ठतेऽन्योन्यमादाय या तिरस्कारभावना ॥१६॥
युष्माकं, तामतिक्रम्याऽल्लाहस्यासौ तु भावना । यदाऽऽहूताः किलाऽभूत प्रतिश्रद्धां ततोऽपि तु ॥१७॥
निषेधस्त्वेव वोऽतिष्ठद (धिश्रद्धं हि सन्ततम्) । [११]ते वक्ष्यन्ति—प्रभो नस्त्वं तावदस्मानमारयः ॥१८॥
वारद्वयं पुनश्चैव वारद्वयमजीवयः । इदानीं मन्यते ऽस्माभिः सापराधा हि यद् वयम् ॥१९॥
अस्ति कश्चित् ततो मार्गः किमितो यातुमन्यतः ? । [१२](ते पुनः कथयिष्यन्ते दुर्दशेयन्तु) हेतुना ॥२०॥
वर्त्तते ऽनेन वो यस्माद् यदाऽऽहूतो ऽभवत् किल । केवलस्त्वेव (सोऽ)ल्लाहो, युष्माभिः खण्डितं तदा ॥२१॥
तत्तुलो घटितश्चाभूद् यदा (कोऽपीतर) स्तदा । युष्माभिस्तन्मतं तावत्; अल्लाहस्यैव शासनम् ॥२२॥
केवलस्य महोच्चैर्यः (सर्वतः) सुमहानथ । [१३]स एव स्वानि लक्ष्माणि युष्मान् यो दर्शयत्यथ ॥२३॥
प्रेषयत्यपि यो व्योम्नो वृत्तिं युष्मत् कृते, परम् । यो हि तद् वृत्तिरत्राऽऽस्ते विविनक्ति स एव तु ॥२४॥
[१४]केवलो ऽल्लाह एवेड्यो युष्माभिः पावनं मतम् । तदर्थं ध्रियमाणैस्तु, भवेयुर्नाम यद्यपि ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

श्रद्विहीना जना अत्र विमनस्का (स्ततोऽपि किम्) । [१५]स वै सिंहासनस्वामी गतश्चोच्चैः पदान्यसौ ॥२६॥
बन्धकानां निजानाञ्च बन्धकं यं स वाञ्छति । प्रहिणोति निजादेशात्तस्मिन्नात्मानमेव तु ॥२७॥
साम्मुख्याह्वो यथा (लोका) श्चेतयेदापतिष्यतः । [१६]परोक्षं न तथा ऽल्लाहात् तेषां स्थास्यति किञ्चन ॥२८॥
समुत्थास्यन्ति ते सर्वे दिने यस्मिंस्तु; कस्य नु । वर्त्तते साम्प्रतं राज्यम् ? अल्लाहस्यैव यः पुनः ॥२९॥
अद्वितीयो भवत्यत्र प्रभुत्वाच्चापि शालते । [१७]कृतानां कर्मणामद्य पुरस्कारः प्रदास्यते ॥३०॥
प्रतिजीवं, न (कश्चिच्चाऽ) प्यत्याचारेण योक्ष्यते । अल्लाहोऽत्र न सन्देहो लेखाकार्येऽविलम्बकृत् ॥३१॥
[१८]चेतयैतान् जनानह्नस्तस्य नेद उपेष्यतः । भविष्यन्ति यदा कण्ठमेष्यन्ति हृदयानि वै ॥३२॥
स्तम्भितान्तः पुनर्लोको यदा चैव भविष्यति । तत्र मित्रन्न जाल्मानां कश्चनाऽपि भविष्यति ॥३३॥
प्राभिशंसो न कश्चिच्च श्रव्य यस्य वचो भवेत् । [१९]बुध्यते दृष्टिचौर्यं स निह्नुत हृत्सु यत्तथा ॥३४॥
[२०]अल्लाहः कुरुते किञ्च यथावन्निर्णयं, परम् । त विहायाह्वयन्तीमे यांस्तु ते शक्नुवन्ति नो ॥३५॥
कस्यचिन् निर्णय कर्तुं, सन्देहो नाऽत्र विद्यते । अल्लाहो वर्त्तते श्रोता द्रष्टा किं चापि वर्त्तते ॥३६॥
[२१]किं विहारः कृतो नाम धरित्र्यां प्रविलोकितुम् । पूर्वजानाममीषां कः परिणामस्त्वजायत ? ॥३७॥
अतोल्यामूनभूवस्ते भूमौ शक्तावथाऽपि च । चिन्हेषु (स्मृतिरूपेषु), निरगृह्णात् ततोऽपि च ॥३८॥
अल्लाहस्तत् कृतः पापैस्तान्, न चैवाऽऽस्ते कश्चन । त्रातोल्लाहात् किलामीषाम्; [२२]एतदस्माद्यतोहि तान् ॥३९॥
प्रमाणैर्विशदैस्तेषां, आयन् यद्यपि वाग्धराः । न्यषेधंस्ते परं तेन ह्यल्लाहस्तान्निरग्रहीत् ॥४०॥
उग्रदण्डो महाशक्तिस्तथाऽसौ तिष्ठति ध्रुवम् । [२३]प्रत्यक्षाणि प्रमाणानि स्वचिन्हानि प्रदाय च ॥४१॥
प्रेषयन् मूसकञ्चासौ; [२४]प्रियपोनस्य सन्निधौ । कायदूनस्य किञ्चापि सामानस्य तथैव च ॥४२॥
अवोचंस्ते परन्त्वेष मायी मिथ्याचरो महान् । [२५]सत्यमादाय संप्राप्तस्तान् स मत् सान्निध्यदा ॥४३॥
ते ऽवदन्—श्रद्धरा जाता ये ह्यमुष्मिस्तु तत्सुतान् । स्त्रियोऽमीषां विरक्षन्तो मृति प्रापयतो (ऽधुना) ॥४४॥
छलं श्रद्धाविहीनस्य लुप्त्वा मोघं भवेत् परम् । [२६]अवोचत् प्रियपोनश्च—मां विमुञ्चत यद् वधम् ॥४५॥
मूसस्याऽहं प्रकुर्याम्, स स्वं प्रभुं तावदाह्वयेत् । शंके कच्चिदसौ देशं क्रान्तिमुद्भावयेदथा ॥४६॥
मतमेव पुनः कच्चित् न वो ऽसौ परिवर्त्तयेत् । [२७]मूसा आह—प्रजाम्येष शरण्यं स्वं प्रभुं तथा ॥४७॥
प्रभुं युष्माकमेवाऽपि श्रद्धा यस्य न विद्यते । निर्णयस्याह्नि सर्वस्मादमुष्माद् दर्पधारिणः ॥४८॥
[२८]श्रद्धाना जनस्त्वेकः प्रियपोनकुटुम्बिनाम् । या ऽभवत् संवृता श्रद्धा यन चैवा ऽभवत् स वै ॥४९॥
आह—किं तावदेतस्माद् यूयं हन्तुं समुद्यताः । मर्त्यमेकं "ममाल्लाहः प्रभुः" यद् वक्त्यसौ, तथा ॥५०॥
स्पष्टैश्चिन्हैरुपेतो वः प्रभोर्युष्माकमास्ते च ? । यद्यसत्यपरः सोऽस्ति तस्यासत्यस्य दुष्फलम् ॥५१॥
तस्मिन् वै पतितो, ऽथो चेत् सत्यवान्त्स हि वर्त्तते । यदर्थं तर्जने वोऽस्ति कश्चनांशस्य दुष्फलम् ॥५२॥
युष्मासु पतितो तस्य, तद्विधं मानवं न वै । असत्यं हानिमयादे अल्लाहो वर्त्म दर्शयेत् ॥५३॥
[२९]ज्ञातयो मे ! ऽद्य युष्माकं शासनं वर्त्तते पुनः । स प्रभावोऽधिकारोऽस्ति देशे युष्माकमप्यथ ॥५४॥
यातनाऽऽपतिताऽस्मासु यद्यल्लाहो भवेत् क्वचित् । त्रास्यते ऽस्मान् पुनः कस्तु ?, प्रियपोनोऽवदत्ततः ॥५५॥
वदाम्येष तदेवाऽहं युष्मान् यन्मे धियाऽऽगतम् । यच्च युक्तं तदेवाऽहं अयनं दर्शयामि वः ॥५६॥
[३०]श्रद्दधानस्तु यो जातो ह्यभाणीत् स जनोऽथ च । ज्ञातयो मम ! शङ्केऽहं तन्न दुर्भाग्यमापतत् ॥५७॥
युष्मान् त्समापतद् यद् वै गणेष्वन्य (ष्वितः पुरा) । [३१]दुर्दशा सैव नो स्याद् या वश्यानां नहुषस्य च ॥५८॥
आदानाञ्च समुद्गानां आयतानामभूत् तथा । अल्लाहस्य किलाऽभीष्टो नात्याचारस्तु कश्चन ॥५९॥
तस्य ये वन्धकास्तेषु; [३२]ज्ञातयो मम ! किञ्च (भोः!) । शंके तावदहं तद् वै नैव युष्मास्वथापतत् ॥६०॥
आह्वानस्य दिनं कच्चित्; [३३]पृष्ठं सपरिवर्त्यं च । परायानपरा यूयं स्थास्यथ, भविता न च ॥६१॥
रक्षिता कोऽपि वोऽल्लाहाद्, भ्रंशयेद् वर्त्मनस्तु यम् । अल्लाहस्त्वेव तस्याऽऽस्ते न कश्चिन्मार्गदर्शकः ॥६२॥
[३४]ततः प्राग् यूसफश्चाऽसि प्रमाणैः विशदैः समम् । उपैद् युष्मांस्तदा चाऽपि यदाऽऽदाय स आगतः ॥६३॥
सन्देहो ऽवर्त्तताऽमुष्य विषये वः सदैव तु । अथा ऽस्मिन्नवसन्ने हि युष्माभिरौच्यतेदृशम् ॥६४॥
"तदूर्ध्वं वाग्वरं कञ्चिन् नाल्लाहः प्रेषयिष्यति" । सन्दिहानमथो हीनं मर्यादाया जनं किल ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

भ्रंशयत्ययनादित्थमल्लाहः; [३५]ये पुन जंनाः । अल्लाहस्य किलायातानधिकृत्य विवादिनः ॥६६॥
ये प्रमाणं विनोपेतास्तान् भवन्ति (ध्रुव) त्विदम् । श्रद्धराल्लाहयोर्दृष्ट्यां हीनमत्यन्तमेव तु ॥६७॥
हृदयानीत्थमल्लाहः खल्वहंकारधारिणः । दुर्विनीतस्य सर्वस्य मुद्रयत्येव (निश्चितम्) ॥६८॥
[३६]आदिशत् प्रिययौनश्च—सामान ! मे तु कारणात् । प्रांशुं हर्म्यं विधत्स्वैकं मार्गान् यायां कदाचन ॥६९॥
[३७]वियन्मार्गान्, गतञ्चर्ध्वं लोकेय मौषमीश्वरम् । अहं तन्तु परं मन्ये मृषावादिनमेव च ॥७०॥
तदित्थं शोभयोपेतं प्रिययौनस्य दुष्कृतम् । कृतं तावदिहास्माभिः रुद्धमार्गः कृतश्च सः ॥७१॥
निष्फलो दुर्नयो जातः प्रिययौनस्य खल्वथ । [३८]श्रद्दधानस्तु यो जातो ह्यभाणीत् स जनोऽथ च ॥७२॥
ज्ञातयो मम ! याताऽनु माम्, अहं प्रदिशामि वः । यस्तु सत्यः किलाऽध्वाऽस्ति; [३९]ज्ञातयो मम ! जीवनम् ॥७३॥
लौकिकं सुखसभारोऽस्थाय्येवाऽस्ति तु केवलम् । याथार्थ्येन परो लोको ह्येव शाश्वतिको गृहः ॥७४॥
[४०]दुष्कृतं यो ऽकरोत् तस्य तस्मै स्यात्तद्विधं फलम् । भद्रकृद् यः परम् स्त्री वा पुरुषो वाऽप्यसौ भवेत् ॥७५॥
श्रद्धरः स्यात्, सुखारामं प्रवेक्ष्यन्तीदृशाः जनाः । तत्र तेभ्यस्तथाऽमानं सर्वं किंचित् प्रदास्यते ॥७६॥
[४१]ज्ञातयो मम ! किञ्चैतद् युष्मानाकारयाम्यहम् । मुक्तये, वह्नये वस्तु सहूतिमंऽत्र जायते ॥७७॥
[४२]मां समाह्वयथैतस्माद् घटयेयमहं यथा । अल्लाहस्य प्रतिम्नो वै यज्ज्ञानं मे न सर्वथा ॥७८॥
दर्शयेयमविश्वास किञ्च तस्मिन्नह यथा । प्रभुत्वाच् छालत यस्तु क्षमाशालस्तथा महान् ॥७९॥
समाह्वानन्तु युष्माकं वर्त्तते मे च ते प्रति । [४३]असन्देहं ममाह्वानं यदर्थं तस्य सारता ॥८०॥
नाऽत्र नाऽथ परत्रापि; कर्त्तव्या वर्त्ततेऽथ च । निवृत्तिस्तावदस्माभिरल्लाहं त्वेव च प्रति ॥८१॥
किञ्च ये हानि-मर्यादास्ते एवाऽग्निप्रवेशनाः । [४४]वच्म्यहं यत् तदवाऽग्रे यूयमध्येष्यथाऽपि च ॥८२॥
अर्पयामि निजं पक्षमल्लाहायाऽखिलं त्वहम् । बन्धकाना ध्रुवं द्रष्टा ऽल्लाहस्तावत् स तिष्ठति ॥८३॥
[४५]अरक्षत् तत् तमल्लाहस्तः प्रवर्त्तितदुष्कृतात् । प्रिययौनजनान् घोरा यातना चाऽऽवृणोत् परि ॥८४॥
[४६]वह्निः, यस्य समक्षन्ते प्रातः सायञ्च कालयोः । क्रियन्ते प्रस्तुताः किञ्च यदाऽसौ काल एष्यति ॥८५॥
(वक्ष्यते) प्रिययौनस्य जनाः स्युस्तत्र वेशिताः । वर्त्तते या महाघोरा यातना (नारका ध्रुवम्) ॥८६॥
[४७]यदा ऽग्नौ च भविष्यन्ति सविवादा हि ते मिथः । दर्पयुक्तान् भाविष्यन्ति तदानीं निर्बला जनाः ॥८७॥
अनुव्रता हि युष्माकमतिष्ठाम वयं सदा । तदग्नेः कश्चिदंशः किं युष्माभिर्हि व्यपोहितुम् ॥८८॥
शक्यतेऽस्मत्कदाचिद् (भोः !); [४८]अहंभावान्वितास्तदा । वदिष्यन्ति 'वयं सर्वे भवामः पतिता इह ॥८९॥
निर्णयं गतवान् सत्यं अल्लाहो बन्धकेषु वै । [४९]ये भविष्यन्ति वह्न्यन्तस्ते वदिष्यन्त्यथैव च ॥९०॥
नारकस्य प्रतीहारान् स्वं प्रभुं ह्युपयाचितुम् । यत् कदाचित्त्वसौ कष्टं किञ्चित्तेभ्यः किलाल्पयेत् ॥९१॥
[५०]ते वदिष्यन्ति—किं युष्मान् प्रमाणैर्विशदैः समम् । वाग्धरा उपयाता नो? ते वक्ष्यन्ति—कथन्न (भोः !) ॥९२॥
ततो वक्ष्यन्ति ते 'तद् (भोः !) साम्प्रतं स्वत एव तु । विधत्त प्रार्थनां यूयं प्रार्थनाऽश्रद्धरैः कृता ॥९३॥
जायते निष्फला त्वेव यद्यपी—; [५१]हं न संशयः । श्रद्धराणां विदध्मोऽत्र वाग्धराणां तथा भवे ॥९४॥
वयं साह्यं तदा चाऽपि विधास्यामो दिने यदा । साक्षिणः (साक्ष्यदानाय) समुत्थास्यन्ति; [५२]नाऽथ च ॥९५॥
दिने यस्मिन् मिषः कोऽपि पाप्मनां कार्यसाधकः । भविष्यत्य, थ धिक् तान् व, तेभ्यो दुर्धाम तिष्ठति ॥९६॥
[५३]मूषाय दर्शितो मार्गस्तथाऽस्माभिरसंशयम् । वन्या अथेश्वरालीनाः शास्त्रस्यायतयः कृताः ॥९७॥
[५४](यत् त्) वनुस्मारकं किञ्च धीमद्भ्यो मार्गदर्शकम् । [५५]तद् विधारय सन्तोषं, सत्याल्लाहस्य वर्त्तते ॥९८॥
प्रतिज्ञा ऽसंशयं, किञ्च क्षमार्थं प्रार्थयस्व च । पाप्मनामात्मनो हेतोः, सन्ध्ययोरुभयोरथ ॥९९॥
स्तुवीहि स्वं प्रभुं तस्य महिमानमुदीरयन् । [५६]अल्लाहस्य किलायातानधिकृत्य तु ये जनाः ॥१००॥
प्रमाणं नाधिगम्याऽपि सविवादा इहासते । उरस्सु केवलं तेषामहंकारो हि तिष्ठति ॥१०१॥
नाऽधिगन्तुं समर्थास्तु भविष्यन्ति च यं त्वमी । अतस्त्वं तावदाल्लाहं शरणं गच्छ, खल्वसौ ॥१०२॥
असावेव पुनर्द्रष्टा श्रोता चैवाऽस्ति केवलम् । [५७]धरित्र्या वियताञ्चैव निर्माणोऽस्ति महत्तरः ॥१०३॥
निर्माणान् मर्त्यवंशस्य, विदन्ति नाधिकाः परम् । [५८]अचक्षुश्च सचक्षुश्च समौ नेमौ कदाचन ॥१०४॥
श्रद्दधाना जना ये च, ये च भद्रकृतस्तथा । नैव साम्यभूतस्ते वै दुरितकृद्भिरत्र तु ॥१०५॥

CC-0. In Public Domain. Digitized by eGangotri

परं तिष्ठथ यूयन्तु तावदल्पविचितकाः । “निश्चितं स क्षणः शीघ्रमागमिष्यन् हि वर्त्तते ।।१०६।।
नाधिकाः परमेतस्मिन् श्रद्दधानास्तु मानवाः । “प्रभुस्ते चोचिवानेवम्—मां समाह्वय, तत् पुनः ।।१०७।।
श्रोष्याम्यहं तवाऽह्वानम्, ये तु दर्पेण यन्त्रिताः । उपेक्षन्ते स्तवम्मे ते प्रवेक्ष्यन्ति तिरस्कृताः ।।१०८।।
नारका (ग्निं) झटित्येव सन्देहो नाऽत्र कश्चन । “अल्लाहस्त्वेव युष्मभ्यं निशां यो ऽरचयद् यथा ।।१०९।।
लभेध्वं तत्र विश्राममरचयद् दिनं तथा । भासमानं पुनश्चैव, महानुग्रहवान् किल ।।११०।।
लोकेभ्यो वर्त्तते ऽल्लाहो, दर्शयन्ति ततोऽपि नो । अनेकेऽत्र जनास्तस्मै (स्वं) कार्त्तज्ञं (कदाचन) ।।१११।।
“ईदृशस्तावदल्लाहः प्रभुर्वः, सर्वसर्जकः । तं विहायेतरः कश्चित् प्रतीष्टो न च वर्त्तते ।।११२।।
वाहिताः केन तद् यूयं सन्ततं खलु तिष्ठथ ? । “इत्थमेव तथा चाऽमी वाहिता अभवन् नराः ।।११३।।
अल्लाहस्य किलाऽऽयातान् ये न्यषेधन्; “धरामथो । अल्लाहस्त्वेव यो धाम युष्मद् वासाय निर्ममे ।।११४।।
निर्ममे च छर्दि व्योम, निर्ममे वस्तथाऽऽकृतिम् । मनोहारीणि रूपाणि युष्मभ्यं दत्तवानथ ।।११५।।
वृत्तिहेतोरयच्छच्च सारद्रव्यसमुच्चयम् । ईदृशस्तावदल्लाहः प्रभुर्वः; जगतां प्रभुः ।।११६।।
सौभाग्येन किला ऽल्लाहः शोभते ऽसौ महद् (ध्रुवम्) । “सजीवो ऽसौ, विना तस्मात् प्रतीष्टोऽन्यो न विद्यते ।।११७।।
अमुष्यैव तदाह्वानं विधाय पावनं मतम् । त्वं कुरुष्व, प्रशंसाऽस्तु किलाल्लाहाय, वर्त्तते ।।११८।।
प्रभुर्यो जगतां तावत्; “ब्रूह्यहं वारितोऽस्मि (भोः!) । स्तवात् तेषां विना ऽल्लाहाद् यूयं यांस्तु स्तुवीथ हि ।।११९।।
यतः स्पष्टानि लक्ष्माणि मयावाप्तानि मत्प्रभोः । अथात्मानं प्रदिष्टोऽहमर्पयितुं जगत्प्रभुम् ।।१२०।।
“स एव यो ऽसृजद् युष्मान् मृदो वीर्यात् तदुत्तरम् । उल्वात् पश्चात् ततो युष्मान् सारयत्यर्भकाकृतान् ।।१२१।।
यूनः पश्चात्तता युष्मान् जरतो विदधात्यसौ । पूर्वमेव ततः कांश्चिद् ग्रसते, निश्चितावाधिम् ।।१२२।।
यातुमन्यान् पुनः कालं दत्ते युष्माकमप्यथ । अर्थतद् येन चेतेध्वं यूयं तावत् कदाचन ।।१२३।।
“स एव जीवयत्यत्र मारयत्यत्र योऽथ च । समादिष्टं यदा किंचित् करोत्यत्र पुनश्च सः ।।१२४।।
वक्ति—“याह्युद्भवं” तच्च प्रादुर्भूतं विजायते । “दृष्टास्ते न त्वया किम्वा ह्यल्लाहस्याधिकृत्य ये ।।१२५।।
विवदन्ते किलाऽऽयातान्, कुतस्तावदमी जनाः । विपरीतायना जाताः ?; “त एते सन्ति मानवाः ।।१२६।।
पुस्तकं खण्डितं यै हि खण्डितं तदथापि च । यत् प्रदायात्मनीना वै प्रेषिता अभवन् (पुरा) ।।१२७।।
वाग्धरास्तावदस्माभिः, भोत्स्यन्तेऽमी परं (द्रुतम्) । “कन्धराः परितः पाशाः शृंखलानि पुनस्तथा ।।१२८।।
भविष्यन्ति यदा तेषां, भविष्यन्ति यदा च ते । नीयमानाः समाकृष्य; “क्वथद् वारिणि; ते जनाः ।।१२९।।
(नारका)ग्नौ ततश्चोर्ध्वं भविष्यन्त्यवपातिताः । “प्रक्ष्यन्तेऽथ पुनस्ते च—कुत्र ते घटिता हि ये ।।१३०।।
प्रतिमानस्तु युष्माभि; “रल्लाहं व्यतिरिच्य वै । ते वदिष्यन्ति—ते जाता अस्मदर्थे तु निष्फलाः ।।१३१।।
वस्तुतो न स्तुतः कोऽपि पुराऽस्माभिरिहास्त च । पथो भ्रंशयतेऽल्लाहोऽश्रद्धरानित्थमेव तु ।।१३२।।
“(इदञ्चेतेऽथ वक्ष्यन्ते)—इद त्वस्माद् यतः किल । भ्रान्तं मोघ तले ह्युर्व्यां युष्माभिः स्थितमेव च ।।१३३।।
धार्ष्ट्येन; “यात तद् यूयं नारकद्वारमन्तरे । शश्वद् वासाय, दर्पिभ्यो महद् दुर्धाम तत् किल ।।१३४।।
“धैर्यमाधेहि तत् त्वं (भोः!), सत्याल्लाहस्य वर्त्तते । प्रतिज्ञा, तर्जनाऽस्माकं यदधिकृत्य तिष्ठति ।।१३५।।
अमीषाम्, कश्चिदंशः (किम्) भवेत् ते दर्शितस्ततः । गमयेम मृतिं त्वां वा ? भवामो वयमेव तु ।।१३६।।
प्रत्यावृत्योपगन्तव्यास्तं रशेर्षेहि सर्वथा । “प्रेषिता आसता ऽनेके वाग्धरास्त्वत् पुराऽपि च ।।१३७।।
केचनैवंविधास्तेषां येषां वृत्तस्य वर्णनम् । तवाग्रे कृतमस्माभिर्नैवाऽन्येषां तथा कृतम् ।।१३८।।
वाग्धरस्य हि कस्याऽपि सामर्थ्यं ना ऽभवत् स यत् । विनाऽल्लाहसमादेशं लक्ष्म किंचिदुपानयेत् ।।१३९।।
यदाऽल्लाहसमादेशस्तूपयातोऽभवत् तदा । नीरक्षीरविवेकेन निर्णयोऽक्रियतैव च ।।१४०।।
हानिभाजो मृषावादास्तदाऽतिष्ठन् परन्तु ते । “अल्लाहस्त्वेव युष्मभ्यं यो ऽसृजच्च चतुष्पदः ।।१४१।।
अमीषां केषुचिद् यूयं कुरुताऽऽरोहणं यतः । आमिषञ्चाऽथ केषाञ्चिद् यूयमास्वादयेत (वै) ।।१४२।।
“तत्र लाभचयाः सन्ति युष्मभ्यमितरेऽपि च । आत्महृत्स्थान् यतः कामान् यूयं तेभ्यः पूणीत हि ।।१४३।।
लभ्यतेऽवसरस्तेषु तावदारोहणाय च । अथोऽप्यारोहणस्यार्थं वहित्रेषु (जलान्तरे) ।।१४४।।
“युष्मान् चिह्नानि नैजानि स तावद् दर्शयत्यथ । अल्लाहस्य ततो यूयं खण्डनं प्रविधास्यथ ।।१४५।।

CC-0. In Public Domain. Digitized by eGangotri

केषां केषां नु चिह्नानाम् ?; [८२]धरित्र्यां प्रविलोकितुम् । किं विहारः कृतो नैभिः परिणामस्त्वजायत ॥१४६॥
पूर्वजानाममीषां कः, भूमौ शक्तावथापि च । चिन्हेषु (स्मृतिरूपेषु) त्वतीत्याऽमूंस्त आसत ॥१४७॥
तन्न साह्यकरं जातं यत्ते ऽचेष्टन्त वै परम् । [८३]उपायन् वाग्धरास्तांश्च प्रमाणैर्विशदै र्यदा ॥१४८॥
स्वेन ज्ञानेन दर्पेण ते ह्यतिष्ठन् समुद्धताः । यातना सैव तान् सर्वान् तदा पर्यावृणोच्च याम् ॥१४९॥
सन्ततं ते हसन्ति स्म; [८४]दृष्टा ऽस्माकञ्च यातना । तैर्यदाऽवादिषुस्ते तत्—श्रद्दधाना वयं स्थिताः ॥१५०॥
केवले तावदल्लाहे, तुल्यकक्षश्च तेन यः । कृतोऽस्माभिस्स च त्यक्तः; [८५]परं श्रद्धा तु तद्धृता ॥१५१॥
साह्यहेतु र्न वै जाता दृष्टवन्तो यदा तु ते । यातनामस्मदीयां वै; रीतिरेषा पुरातनी ॥१५२॥
अल्लाहस्य, प्रवृत्ता या बन्धकेष्वस्य तिष्ठति । हानिभाजस्तदा ऽतिष्ठन् श्रद्विहीनास्तथैव च ॥१५३॥

योगः—१५३

CC-0. In Public Domain. Digitized by eGangotri

४१

सूक्तम्–संस्तुतिः, विशदीकृतम्

(हा० मीम० अस-सजदा, फ़ुस्सिलत)

(महाकालेऽवतीर्णाः चतुष्पंचाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]हा० मीम; [2]काशनं ह्येतत् कृपाशीलाद् दयावतः । [3]शास्त्रमेकं यदायाताः सुस्पष्टं विशदीकृताः ॥ १ ॥
कुराणं भाषयाऽर्वाणां, तेभ्यो ये ज्ञानिनो जनाः । [4]शुभवृत्तप्रदं किञ्च चेतकं वर्त्तते हि तत् ॥ २ ॥
अनेके परमेतेषां पराङ्आस्याः स्थितास्ततः । नैव शृण्वन्ति ते तच्च; [5](तदित्थं) प्रवदन्ति च ॥ ३ ॥
प्रतिसीरावृतान्येव हृन्द्यस्माकं ततः किल । लक्षयित्वा यदाह्वानं युष्माभिः क्रियते तु नः ॥ ४ ॥
कर्णयोश्चास्ति बाधिर्यं, युष्मानस्मांस्तथाऽन्तरा । तिष्ठति व्यवधानञ्च, तद् यूयं (स्वेषु) कर्मसु ॥ ५ ॥
तिष्ठत व्यापृताः; (स्वेषु) स्मो वयञ्चाप्यथाऽऽरताः । [6]ब्रूहि—युष्मद् विधो मर्त्यस्त्वेव तावद् भवाम्यहम् ॥ ६ ॥
मयीदं काश्यते—पूज्यो युष्माकं वर्त्तते तु यः । स एवैको (ध्रुवं) पूज्यो, यूयं तद् वृत्तयस्तथा ॥ ७ ॥
तिष्ठताऽथ क्षमा हेतोरमुं प्रार्थयताऽपि च । विनाशः केवलं तेभ्यश्चास्ति ये मूर्त्तिपूजकाः ॥ ८ ॥
[7]ये न दानं दरिद्रेभ्यो ददन्ति खण्डयन्ति च । परं लोकम्; [8]पुरस्कारोऽनिवार्यस्तिष्ठति (ध्रुवम्) ॥ ९ ॥
श्रद्दधानास्तु ये तेभ्यो भद्रकृद्भ्यस्तथैव च । [9]ब्रूहि—किं खण्डनं यूयं तस्यैव प्रविधत्थ यः ॥१०॥
धरित्रीमसृजत् तावत् द्वयोरह्नोर्हि केवलम् । तुल्यकक्षानमुष्याऽथ घटयत तथैव च ॥११॥
स एव जगतां तावत् प्रभुस्तिष्ठति (केवलम्) । [10]पर्वता वेशितास्तस्यामूर्ध्वदृश्याः, निवेशिताः ॥१२॥
सम्पदश्चापि तत्रैव तदाहाराः स्थिरीकृताः । चतुर्ष्वेव किलाहस्सु, भिक्षुभ्यस्तत्तथा समम् ॥१३॥
[11]ततोऽसावभ्रममालक्ष्य प्रवृत्तो धूम्रमेव यत् । अगादीत् तद् धरित्रीञ्च—स्वेच्छयाऽस्वेच्छयाऽपि वा ॥१४॥
युवां तावदुपेतं (माम्); अगादिष्टामुभौ तदा । उपेतौ तावदावां स्वः प्रेरितौ त्वां निजात्मना ॥१५॥
[12]द्वयोरह्नोस्ततः सप्त सोऽपृणाद् वियतोऽथ च । प्रत्यन्तरिक्षसम्प्रेष्यं प्रैषयच्चैव शासनम् ॥१६॥
सन्निकृष्टं वियत् किञ्च दीपकैः प्रविभूषितम् । अप्रवेश्यं कृतं चैव; स्थिरो मानोऽयमस्ति वै ॥१७॥
प्रभुत्वाच् छालते यस्तु तस्य यो ज्ञानवानथ । [13]भवन्त्येते पराङ्आस्यास्ततश्चेद् ब्रूहि तानिदम् ॥१८॥
"सावधानाः कृता यूयं वज्रपातान्मया, स च । तादृशो वज्रपातोऽभूद् यादृशस्तेषु खल्वथ ॥१९॥
आदेषु च समुद्गेषु; [14]तानुपायन् यदाऽथ च । वाग्घराः पृष्ठतः किञ्च पुरस्ताद् वाचयाऽनया ॥२०॥
अल्लाहात्तु पृथग् यूयं न स्तुवीध्वं किलाऽपरम् । ते ऽवदन्—नः प्रभुर्देवान् यद्यैषिष्यत् कदाचन ॥२१॥
प्रैषयिष्यत् किलाऽस्माकं सन्निकृष्टमसंशयम् । प्रेषिताः स्थ यदादाय मन्महे तन्न तद् वयम् ॥२२॥
[15]शक्तिदर्पा वृथा जाता आदा भूमावभाणिषुः । "कोऽतियाय वले त्वस्मान् वर्त्ततेऽत्र हि पूरुषः" ॥२३॥
किन्न दृष्टमिदं स्रष्टाऽल्लाहस्तेषां इहाऽस्ति यः । सोऽतियाय बले तावत् सत्यं तानत्र तिष्ठति ॥२४॥
परन्त्वस्माकमायातान् खण्डयन्तो हि ते स्थिताः । [16]प्रेषिता तेषु वात्याऽभूदशुभाहस्सु खल्वथ ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

अस्माभिः स्वादिता येन भाविकेऽस्मिन् हि जीवने । ते भवेयुर्महत् कृच्छ्रं तिरस्कारस्य, निश्चितम् ॥२६॥
घोरमेव तिरस्कर्तृं कृच्छ्रन्तु पारलौकिकम् । ईषदप्यथ साहाय्यं तेषां नैव करिष्यते ॥२७॥
[१७]दर्शितञ्चायनं तेभ्यः समुद्गा ये किलाऽऽसत । अस्माभिः, अन्धता तेषां प्रतीष्टाऽभूत् परं (वत!) ॥२८॥
उपेक्ष्य साधु-पन्थानम्, तेषाञ्चार्जितकारणात् । तिरस्कारस्य कृच्छ्रस्य वज्रं तेषु किलापतत् ॥२९॥
[१८]रक्षितास्ते त्वथोऽस्माभिः श्रद्दधाना य आसत । आसत ये पुनश्चैव तावत् कर्त्तव्यबुद्धयः ॥३०॥
[१९]दिनेऽल्लाहस्य यस्मिश्च शत्रवः संहृता अभि । करिष्यन्तेऽनलं, पश्चात् करिष्यन्ते क्रमस्थिताः ॥३१॥
[२०]अथाऽपि तेषु तं (वह्नि) मभि प्राप्तेषु यत्कृतम् । तैस्ततः प्रेरितान्येषां त्वगक्षिश्रवणानि वै ॥३२॥
सज्जानि साक्ष्यदानाय भविष्यन्ति विरुध्य तान् । [२१]त्वचः प्रक्ष्यन्ति ते स्वाश्च-कस्मादस्मान् विरुध्य तु ॥३३॥
साक्ष्यतां नु गता यूयम् ? प्रतिवक्ष्यन्ति तास्तदा । अकृतास्मान् किलाऽल्लाहः सवाचान्, यः करोति हि ॥३४॥
सवाचं सर्वमप्यत्र, स एव यो ऽसृजत् तथा । युष्मानादौ, स एवाऽथ प्रत्यावृत्य च वर्त्तते ॥३५॥
युष्माभिस्तूपगन्तव्यः; [२२]युष्माभिर्निह्नवः कृतः । न चैतस्माद् यतःकर्णौ चक्षुषी त्वगथापि च ॥३६॥
साक्ष्यं युष्माकमेष्यन्ति (संविदोऽस्याः) परन्तु यत् । वेत्त्यल्लाहो न युष्माकं वहूनां कृतकर्मणाम् ॥३७॥
[२३]मतञ्चाल्लाहसम्बन्धे युष्माभि धृतमस्ति यत् । तद् गतं वः क्षयायाऽस्ति, हानिभाजां तथैव च ॥३८॥
यूयं सर्वे स्थिता (अद्य); [२४]साम्प्रतं त्यागवृत्तिताम् । ते व्रजन्त्यथ चेत् तेषां धाम वह्निस्तथापि वै ॥३९॥
अथो चेत् प्रार्थयेयुस्ते तत्कृपां न ततोऽपि ते । दर्शितास्तु भविष्यन्ति कृपां कांचन सर्वथा ॥४०॥
[२५]नियुक्तास्तत् सहायाश्च पुनरस्माभिरीदृशाः । वर्त्तमानञ्च भूतञ्च भव्यं तेभ्यो व्यधुर्हि ये ॥४१॥
पुरावर्त्तिगणै नृणां जिन्नानाञ्च समं गणैः । वचस्तेष्वपि संजातं सर्वथैव प्रमाणितम् ॥४२॥
हानिभाजामतिष्ठंस्ते सत्यमन्यतमा जनाः । [२६]खण्डनाश्चावदन् एतत्—"कुराणं शृणुताऽपि नो ॥४३॥
अशान्तिञ्चान्तरापाठं विधध्वं पुनरस्य तु । समर्था दमने यूयं भवेताऽस्य कदाचन ॥४४॥
[२७]अवश्यं स्वादयिष्यामो यातनाया वयं रसम् । श्रद्विहीनान् जनान्, सत्यं यच्चाचेष्टन्त कर्म ते ॥४५॥
तस्य तेभ्यः प्रदास्यामो महद्घोरं वयं फलम् । [२८]वर्त्ततेऽयं प्रतीकारोऽनलो ऽल्लाहस्य वैरिणाम् ॥४६॥
धाम शश्वदयं तेषां प्रतिदानं तदस्य यत् । ते सदा खण्डना आसन् आयातानां हि नः किल ॥४७॥
[२९]खण्डनाश्चाऽवदन् लोकाः—प्रभो नः! दर्शयाऽत्र नः । मानुषाणाञ्च जिन्नानां तानकुर्वन् हि ये तु नः ।४८॥
पथभ्रष्टान् यथा वै तान् अभितिष्ठेम सर्वथा । येन ते सन्तु तेषां ये नीचान्नीचैर्गतास्तलम् ॥४९॥
[३०]ये तु तेषामवोचन्—"नः प्रभुस्त्वल्लाह एव (सः) । अतिष्ठन् सुस्थिराश्चैव तेषु देवाऽवतारणा ॥५०॥
ते वदन्ति च—भैषिष्ट मैव, दुःखं न यात च । प्रत्युताऽमुष्य नाकस्य प्रतिज्ञातस्य पूर्वतः ॥५१॥
युष्मभ्यम्, सुखदं वृत्तम् तावज्जानीत (साम्प्रतम्) । [३१]रक्षितारः सखायो वो भवामो वयमत्र च ॥५२॥
परत्राऽपि च, युष्मभ्यं तत्र तत्तत् च तिष्ठति । यद् यद् युष्माकमिष्टं स्यात्, तत्र तत्तत् हि तिष्ठति ॥५३॥
युष्मभ्यम्, यस्य कस्यापि याच्ञां यूयं विधास्यथ । [३२]आतिथेयी क्रिया चेयं क्षमाशीलाद् दयावतः ॥५४॥
[३३]सूत्तमः कस्ततो वाचि प्रार्थनो यः प्रभोस्स्थितः । भद्रकृच्चाऽथ वक्त्येवम्—ये किलात्मसमर्पकाः ॥५५॥
अहन्तेषां भवाम्येष तावदन्यतमो ध्रुवम् । [३४]भद्रताऽभद्रता चैव समत्वं नार्हतः क्वचित् ॥५६॥
भद्रमस्ति हि यत्तेन खल्वभद्रं परास्यत । ततो हन्ता ! ऽभवद् येन शात्रवं वो, भविष्यति ॥५७॥
स तथा कश्चिदात्मीयः सखा तावद् यथा भवेत् । [३५]स्थैर्यभाजो हि ये तेषामेव खल्वेतदुद्भवेत् ॥५८॥
स एवैतच्च संयाति नियत्या यो ऽनुकम्पितः । [३६]शातनोत्साहनेनाऽस्तु समुत्साहोद्भवस्त्वयि ॥५९॥
यद्यन्विच्छ किला ऽल्लाहं शरणं त्व, मसंशयम् । श्रोता भवत्यसौ किञ्च विज्ञाता चाऽपि तिष्ठति ॥६०॥
[३७]सूर्याचन्द्रमसौ तस्य लक्ष्मणां सदिवानिशम् । नैव सोमाय नार्काय स्तुतिं यूयं प्रयुंक्त (भोः!) ॥६१॥
अल्लाहाय प्रयुंक्ताऽमूं परं, यस्तावदसृजत् । सर्वनितान्, स एवाऽस्ति युष्मत् स्तुत्यः परं यदि ॥६२॥
[३८]तेऽथ गर्वोद्भृताश्चेत् स्युः त्वत् प्रभोः पार्श्ववर्त्तिनः । ये भवन्ति स्तुवन्त्येनं ते दिवारात्रमश्रमाः ॥६३॥
[३९]लक्ष्मणामस्य किञ्चेदं यूयमुर्वीं प्रपश्यथ । शून्यरुपा हि सा, तस्या अस्माभिः सेचने कृते ॥६४॥
सद्य एव पुनः (सस्यैः) सुमहद् हरितायते । निश्चितं जीवनो योऽस्याः स एव मृतजीवनः ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

सर्वसामर्थ्यभृत् तावत् तिष्ठते ऽसौ न संशयः । [४०]अधिकृत्यास्मदायातानंगीकुर्वन्ति ये जनाः ॥६६॥
वक्रनीतिं परोक्षास्ते नाऽस्मत् तावत् कथञ्चन । किं वरीयान् भवेद् वह्नौ यस्तु क्षिप्तः, सुरक्षितः ॥६७॥
निः सरेद् यो ऽथवा मर्त्यः पुनरुत्थापनाऽहनि ? । स्वेष्टमन्वित; यद् यूयं कुरुध्वे परमत्र तत् ॥६८॥
सर्वं पश्यत्यसौ नेह संशयः कोऽपि वर्त्तते । [४१]यैरनुस्मारकं प्राप्तं यदा ते तद्व्यखण्डयन् ॥६९॥
तत् (सदोषा जनास्ते वै) तद्धि शास्त्रं सुनिश्चितम् । तिष्ठतीहानतिक्रम्यम्; [४२]पृष्ठतः पुरतश्च तत्, ॥७०॥
नानृतं समुपागन्तुं शक्तं तावत् कथञ्चन । काशनं खल्वमुष्माद् यः तत्वदर्शी स्वतस्तथा ॥७१॥
प्रशंसामर्हति स्वीयाम्; [४३]त्वं तदेव तथोच्यसे । वाग्धरास्त्वत् पुरा जाता यदुक्ता अभवन् किल ॥७२॥
"क्षमाशीलः प्रभुस्तेऽथ घोरदण्डप्रदो ध्रुवम्" । [४४]अकरिष्याम यद्येतत् कुराणं भाषयाऽन्यया ॥७३॥
अवक्ष्यंस्ते—किमायाता व्याख्याताः स्पष्टमस्य नो । युक्तं किम्-एकतस्त्ववर्स्तेभ्यो भाषान्तरं पुनः ? ॥७४॥
ब्रूहि—ये श्रद्धरास्तेभ्यो वर्त्तते ऽयनदर्शकम् । पथ्यमेतच्च, ये (त्वन्ये) श्रद्दधाना भवन्ति नो ॥७५॥
पिधानं तच्छ्रवाणान्तु चक्षुषामन्धताऽपि च । आहूयन्ते सुदूराद् ये (तादृशास्ते) जना मताः ॥७६॥
[४५]वयं मूषाय सत्येन शास्त्रं तावददद्म च । तत्र भेदमतिः पश्चात् परं (सत्य) मजायत ॥७७॥
अभविष्यत् कृतस्तेषु निर्णयश्चेत् कदाचन । प्रभुणा ते पुरा कोऽपि निश्चयो नाऽकरिष्यत ॥७८॥
ध्रुवन्ते संशयापन्ना मनोवैकल्यसंकुलाः । [४६]यस्तु भद्रं करोत्यत्र स करोत्यात्मने हि तत् ॥७९॥
कृतस्याभद्रकृत्यस्य तदर्थं त्वेव दुष्फलम् । बन्धकेष्वात्मनीनेषु जालमस्तावन्न ते प्रभुः ॥८०॥

इति चतुर्विंशं पारायणम्

अथ पंचविंशं पारायणम्

[४७]तस्य कालस्य विज्ञानं तस्मिन्नेवाऽस्ति सीमितम् । आत्मनो नैव कोशाद् वै फलन्त्वाविर्विजायते ॥८१॥
गर्भधा जननी वाऽपि स्त्री न काचिच्च जायते । विना तस्य प्रविज्ञानम्; यदा प्रक्ष्यत्यमूंश्च सः ॥८२॥
तुल्यकक्षाः कृता ये मे कुत्र तिष्ठन्ति तेऽधुना ? । ते वदिष्यन्ति—नाऽस्मासु तस्य साक्ष्ये तु कश्चन ॥८३॥
वयं त्वां वोधयामो हि; [४८]यानिमे चाह्वयन् पुरा । तेन किंचित्करास्तेभ्यः; शरण्यं धाम किञ्चन ॥८४॥
नैव सन्तिष्ठते तेभ्यः, इदं वेत्स्यन्ति तेऽथ च । [४९]खेदं न मन्यते मर्त्यः कल्याणयाचनापरः ॥८५॥
आपतेत् त्वस्य कष्टञ्चेन्निराशः स हि जायते । उद्यमाज्जायतेऽपास्तः सर्वथाऽसौ तथैव च ॥८६॥
[५०]अथासौ तावदस्माभिः स्वादितः स्याद् दयारसः । तस्मिन्नापतितात् कष्टादूर्ध्वं चेत् स वदिष्यति ॥८७॥
"अयं लब्धव्य एवाऽसीन् मया, मन्ये तथैव यत् । उपेष्यत्येव नासौ च क्षणस्तावत् कथञ्चन ॥८८॥
अथाऽहं चेत् प्रणीतः स्याम् परावर्त्य स्वकं प्रभुम् । भद्रमेव ततश्चापि लप्स्येऽहमविशंकितम्" ॥८९॥
श्रद्विहीनान् परं लोकान् यत्ते ऽकुर्वन् ध्रुवं वयम् । वोधयिष्याम एवाऽमून् तत्तत् सर्वं, तथैव च ॥९०॥
वयं तान् स्वादयिष्यामो घोरं कष्टरसं पुनः । [५१]वर्षयामो दयां मर्त्ये वयं यस्मिन् क्षणे, तदा ॥९१॥
तटस्थो जायतेऽसौ वै पराङ्आस्यश्च तिष्ठति । यदाऽऽभीलस्य पातश्च जायते तदनन्तरम् ॥९२॥
याचना तत्परश्चासौ जायते हि पुनः पुनः । [५२]ब्रूहि—पश्यत यद्येतद् वर्त्तते ऽल्लाहतोऽथ च ॥९३॥
निषिध्येत च युष्माभिः पथभ्रष्टस्तु को भवेत् । यो विरुध्येत (तं) साक्षादतिरिच्य हि तं जनम् ॥९४॥
[५३]बाह्ये लोके स्वलक्ष्माणि तावदेतान् जनान् वयम् । अन्तरात्मनि किञ्चैषां दर्शयिष्याम एव यत् ॥९५॥
काशितं स्यात् किलैतेषु "सत्यमेतद्धि वर्त्तते" । त्वत् प्रभोरेव किन्नैतत् पर्याप्तं तावदत्र यत् ॥९६॥
यस्य कस्याऽपि सर्वस्य साक्षितायां स तिष्ठति । [५४]त्वं विजानीहि-तिष्ठन्ति जना एते विशंकिताः ॥९७॥
स्वप्रभोर्योगमाश्रित्य, त्वं विजानीहि स ध्रुवम् । पर्यावृत्याखिलं किञ्चित् तिष्ठत्यत्र (निरन्तरम्) ॥९८॥

योगः— ९८

CC-0. In Public Domain. Digitized by eGangotri

४२

सूक्तम्–मन्त्रणा

(अश–शूरा)

(महाकालेऽवतीर्णाः त्रिपंचाशदायाताः)

साल्लाहन्नामजापं योऽल्लाहो दयी हितैष्यपि

[१]हा० मीम० [२]ऐन० सीन्० काफ० [३]बलीयांस्तत्वदर्श्यपि । त्वदन्तस्तावदल्लाहः प्रकाशं कुरुते तथा ॥ १ ॥
अकार्षीत् स यथा तेषु पूर्वजा ये तवाऽभवन् । [४]अमुष्यैवाऽस्ति तत् सर्वं धरित्र्यां यद् वियत्सु च ॥ २ ॥
सर्वेषूच्चैस्स एवाऽस्ति महिमाशल्यतीत्य च । [५]अथो सम्भाव्यते व्योम भवेद्भिन्नं तथोपरि ॥ ३ ॥
ते च देवाः प्रभुं नैजं शंसमानास्स्तुवन्ति तम् । धरावासिजनेभ्यश्च वियाचन्ते क्षमामपि ॥ ४ ॥
बुध्यतां खलु सोऽल्लाहो दयी चैव क्षमी तथा । [६]तं विहाय च ये त्वन्यान् घटयन्त्यत्र वै जनाः ॥ ५ ॥
रक्षकत्वेन मित्राणि तानल्लाहो निरीक्षते । तत्कृतोत्तरदायित्वं त्वयि नैव च तिष्ठति ॥ ६ ॥
[७]इतीत्थं भाषयाऽर्वाणां कुराणं काशितं त्वयि । अस्माभिर्येन गुल्मस्थं चेतयेस्त्वं पुरं, तथा ॥ ७ ॥
वासतेयानि चान्यानि स्थितानि परितो हि तत् । चेतयेर्विषयेऽमुष्य दिनस्य विषयेऽथ च ॥ ८ ॥
असन्देहं यदा सर्वे भविष्यन्ति हि संहताः । एको वर्गस्सुखारामं, दहन्नग्नि परस्तथा ॥ ९ ॥
तेषां वेक्ष्यति; [८]तान् सर्वानकरिष्यत् समुच्चितान् । ऐषिष्यदित्थमल्लाहो यदि तावत्, परन्त्वसौ ॥१०॥
यं हि कामयते तं वै दयायां वेशयत्यलम्, । निजायां; ये पुनर्जालिमा लोकास्तेषां न तिष्ठति ॥११॥
कोऽपि संरक्षको मित्रं नाऽथ कश्चित् सहायकः । [९]रक्षकानपरानेते ततोऽथ किमकुर्वत ॥१२॥
मित्राणि, रक्षको मित्रं त्वास्तेऽल्लाहो हि केवलम् । प्रमीतोज्जीवकश्चासौ सर्वसामर्थ्यभृत् तथा ॥१३॥
[१०]विरोधश्चाऽथ युष्माकं यदधिकृत्य तिष्ठति । तत्राऽल्लाहो हि निर्णेता, प्रभुर्मे तिष्ठतीदृशः ॥१४॥
यत्र मे प्रत्ययो यं च प्रत्यावृत्तो भवाम्यहम् । [११]व्योम्नाञ्चैव धरित्र्याश्च सर्जकोऽसौ, स एव च ॥१५॥
स्वयं द्वन्द्वानि युष्मभ्यं युष्मदेव चकार वै । ये चतुश्चरणास्तेषां चापि द्वन्द्वान्य, सौ किल ॥१६॥
युष्मदाप्यायनं हीत्थं कुरुते, न च तत्समम् । किञ्चनाऽन्यत्, स वै श्रोता किं च द्रष्टाऽपि तिष्ठति ॥१७॥
[१२]तस्य पार्श्वे हि तिष्ठन्ति धरित्रीव्योमकुञ्जिकाः । महौदार्यं तनोत्येव स तस्मै रोचनस्तु यः ॥१८॥
प्रदत्ते परमन्येभ्यो मानोन्मानपुरस्सरम् । असावत्र न सन्देहस्सर्वविद् वर्त्तते किल ॥१९॥
[१३]मतं तुभ्यं तदेवाऽस्ति तेन निर्धारितं, स वै । दिष्टवान् नहुषं यद्धि, प्रेरितस्त्वञ्च यत् प्रति ॥२०॥
वर्त्तसे तावदस्माभिः, प्रदिष्टौ पुनरेव च । यदधिकृत्य मूषेशौ पुनरब्रह्म एव च ॥२१॥
यन्मतं सुप्रतिष्ठं हि रक्षतेदं, पुनर्न च । अत्र भेदं प्रकुर्यात, तद्धि घोरं (सुनिश्चितम्) ॥२२॥
पूजकेभ्यस्तु मूर्त्तीनां आहूतिर्वोऽस्ति यत्कृते । यं स कामयतेऽल्लाहस्तावदात्मीयताकृते ॥२३॥
विचिनोति हि तम्, यश्च तमभि संप्रवर्त्तते । आत्मनः प्रापणं तस्मै दर्शयत्ययनं पुनः ॥२४॥
[१४]प्राप्ते ज्ञानेऽनु ते तस्मिन् विभेदं चक्रिरे किल । अन्योऽन्यस्य विरोधाय, निर्णयश्चाकरिष्यत ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

तेषु, ते प्रभुणा पूर्वं, निश्चितावधये यदि । निश्चयः कश्चिदप्यत्र न तावदकरिष्यत ॥२६॥
ये तदायतयो जाताः पुस्तकस्य तथा जनाः । संशयं ते गतास्तस्मिन् मनोवैकल्यसंकुलाः ॥२७॥
[१५]इदं प्रत्येव तत् (तेषां) समाह्वानं विधत्स्व (भोः!) । स्थिरस्तिष्ठ यथादेशं चैव, तेषाञ्च कामनाः ॥२८॥
माऽनुयासीस्, तथा ब्रूहि—काशितं पुस्तकन्तु यत् । अल्लाहेन भवाम्येष तत्र श्रद्धापरः किल ॥२९॥
न्यायाचाराय युष्मासु प्रदिष्टोऽहं तथैव च । प्रभुर्मे वर्त्ततेऽल्लाहः प्रभुर्युष्माकमप्यथ ॥३०॥
कर्माण्यस्माकमस्मभ्यं युष्माकं सन्ति वः पुनः । अन्तराऽस्मान् कलिश्चैव कोऽपि नो वर्त्तते किल ॥३१॥
अल्लाहस्संहतांस्तावत् सर्वानस्मान् करिष्यति । प्रत्यावृत्योपगन्तव्यस् (सर्वस्याऽस्ति) स एव च ॥३२॥
[१६]आरभन्ते विवादं ये त्वल्लाहविषये जनाः । सम्मतो वर्त्तते चाऽपि यदाऽसौ, न कथञ्चन ॥३३॥
महत्वमावहत्येषां विवादोऽल्लाहलोचने । क्रोधो जृम्भायते तेषु यातना कृच्छ्रदाऽप्यति ॥३४॥
[१७]अल्लाहस्त्वेव सत्येन पुस्तकं यो ह्यकाशयत् । तुलाञ्चैव; कथं न्वेदं ज्ञातं युष्माभिरस्तु च ॥३५॥
कदाचिन् (निर्णयस्या) सावारादेव क्षणो भवेत् । [१८]आसते ये न विश्वस्तास्तस्मिन् ते त्वेव मानुषाः ॥३६॥
शीघ्रायन्ते तदर्थं वै, तत्र ये श्रद्धराः परम् । तस्माद्विभ्यति ते किञ्च 'तत् सत्यम्' प्रवदन्ति च ॥३७॥
बुध्यतां सविवादा येऽधिकृत्य तं क्षणं जनाः । प्रविष्टास्ते तमो घोरम्; [१९]बन्धकानामपेक्षितम् ॥३८॥
क्षुद्रमप्यथ सोऽल्लाहः सततं पालयन्त्स्थितः । यं स कामयते तस्मै वृत्ति किञ्च प्रयच्छति ॥३९॥
प्रभुत्वाच्छालते तावत् सबलस्स च तिष्ठति । [२०]परलोकस्य यो मर्त्यस्त्वन्नाद्यं कामयिष्यते ॥४०॥
तस्मिंस्तस्मै प्रदास्यामश्चतुर्दिग्वर्धनं वयम् । भाविकं यः परं मर्त्यस्त्वन्नाद्यं कामयिष्यते ॥४१॥
तस्मै ततः प्रदास्यामो, नांशभाक्स्यात् परत्र तु । [२१]नृणामेषां भवन्तीह तुल्यकक्षा नु केऽपि किम् ॥४२॥
यैरमीभ्यो मतं तद् वै वर्त्तते सम्प्रधारितम् । अनुज्ञातं किलाऽल्लाहाद् वर्त्तते यन्न सर्वथा ? ॥४३॥
निर्णयश्चाभविष्यत्तु सत्यमेतेष्वथो यदि । निश्चयः कश्चिदप्यत्र न तावदकरिष्यत ॥४४॥
विद्यते किञ्च जाल्मेभ्यो यातना दुःखदा ध्रुवम् । [२२]द्रक्ष्यसीमान् पुनर्जाल्मान् संततं साध्वसातुरान् ॥४५॥
कारणात् स्वार्जितानां वै, तच्चामीष्वापतिष्यति । अनिवार्यतया, येऽथ श्रद्धरास्सुकृतस्तथा ॥४६॥
फुल्लितेषु हि वत्स्यन्ति स्वर्गारामेषु ते पुनः । यत्तदिष्टञ्च लप्स्यन्ते तत्ते पार्श्वान्निजप्रभोः ॥४७॥
एष एव भवत्यस्य महांस्तावदनुग्रहः । [२३]इदमेव शुभं वृत्तं यदल्लाहः प्रयच्छति ॥४८॥
बन्धकेभ्यो निजेभ्यो ये सुकृतश्श्रद्धरास्तथा । ब्रूह्यहं नो पुरस्कारं युष्मदिच्छामि कञ्चन ॥४९॥
एतदर्थमथेच्छामि यदि किंचिदिदं हि तत् । "बन्धुतारागभावं वै", भद्रं योऽत्रार्जयिष्यति ॥५०॥
तत्र वृद्धि करिष्यामस्तदर्थं हि वयं ध्रुवम् । क्षमावांस्तावदल्लाहो गुणग्राहक एव च ॥५१॥
[२४]वदन्त्येतेऽथ वा लोका अल्लाहविषये त्वयम् । अघटयत् किलाऽसत्यम् ? अल्लाहो कामयेत चेत् ॥५२॥
मुद्रयेद् हृदयं ते वै, स करोति प्रतिष्ठितम् । सत्यमुन्मूलनं किञ्चाऽप्यसत्यस्य करोत्यसौ ॥५३॥
अल्लाहस्स्वैः पुनः शब्दैः; विदानस्स हि वर्त्तते । संशयो न हि तस्याऽपि हृदिस्थं यत्तु तिष्ठति ॥५४॥
[२५]असावेव च यस्तावत् किलांगीकरणः पुनः । बन्धकानां निजानां वै पश्चात्तापस्य तिष्ठति, ॥५५॥
क्षमते दुष्कृतौघञ्च, त्वत् कृतं वेत्त्यसौ समम् । [२६]सुकृतां श्रद्धराणाञ्च, खल्वंगीकरणस्स वै ॥५६॥
अनुगृह्णाति तांश्चैव तथात्यर्थम्, अथो तु ये । श्रद्विहीना जनास्तेभ्यो भीषणा यातना पुनः ॥५७॥
[२७]बन्धकेभ्यो निजेभ्यश्चेदल्लाहो व्यतनिष्यत । वृत्तिमत्यर्थमौदार्यात्, तेऽभव्रिष्यन्नसंशयम् ॥५८॥
घोरा जाल्मा धरित्र्यां वै, परं सम्प्रेषयत्यसौ । यत् स कामयते तत्तत् मानोन्मानपुरस्सरम् ॥५९॥
बन्धकानां स्वकीयानां ज्ञाता द्रष्टा स तु ध्रुवम् । [२८]स एव किञ्च यो लोके निराशा (ककचं) गते ॥६०॥
अपो वर्षयते, कीर्णां स्वदयां कुरुतेऽथ च । स एव रक्षको मित्रं, प्रशंसाऽर्हस्तथैव च ॥६१॥
[२९]व्योम्नाश्चैव धरित्र्याश्च सर्गास्तत्र च जन्तवः । उभयोर्ये ततास्तस्य लक्ष्मणां सन्ति (कानिचित्) ॥६२॥
कामतस्तान् समाहर्त्तुं स प्रभुश्चैव तिष्ठति । [३०]याऽपि चाऽपतिताऽऽपत् ते कारणं तत्र वर्त्तते ॥६३॥
अर्जितं यत् त्वया स्वाभ्यां कराभ्यां ननु वर्त्तते । दुष्कृतानामनेकेषां क्षमणस्स भवत्यपि ॥६४॥
[३१]पलाय्य यूयमात्मानं नोर्व्यां शक्ताश्च रक्षितुम् । नाल्लाहाद् व्यतिरिक्तश्च सहायो वस्तथैव च ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

रक्षको नाऽपि मित्रञ्च वर्त्तते कश्चनेह तु । [३२]लक्ष्मणां तस्य पोताश्च गाहमानास्सरित्पतौ ॥६६॥
दृश्यमानाः प्रभासन्ते ये शिलोच्चयसन्निभाः । [३३]कामतः प्रतिबध्नीयादसौ किञ्च समीरणम् ॥६७॥
ते च तत् पृष्ठमारूढास् स्थितास्स्युस्तत्र चित्रिताः । अत्र लक्ष्माण्यनेकानि सन्ति धैर्यवतेऽथ च ॥६८॥
तस्मै कृतज्ञतां यो वै दर्शयेन्, नात्र संशयः । [३४]नाशयेत् तानसौ किञ्च (कामतोऽ) थ क्षमेत च ॥६९॥
अनेकान्, तत्कृतैः कृत्यैः; [३५]ये तु लोका द्विषन्त्यथ । आयातेभ्यः किलास्माकं बोधन्त्वेतत्तु ते—न वै ॥७०॥
शरणं किञ्चिदाप्स्यन्ति रक्षणायात्मनस्त्विह । [३६]अथैतद् यद्धि युष्मभ्यं प्रदत्तं किंचनाऽत्र, सः ॥७१॥
अल्पकालाय सौख्यस्य संभारो भाविको मतः । उत्तमं स्थायि चातीव यत्त्वल्लाहस्य सन्निधौ ॥७२॥
तेभ्यस्तच्च प्रभौ स्वीये ये हि विश्वासधारिणः । श्रद्धरा ये पुनश्चैव; [३७]रक्षणा आत्मनाञ्च ये ॥७३॥
किल्विषेभ्यो ऽतिघोरेभ्यो ग्राम्यदोषेभ्य एव च । क्रोधोद्विग्नाश्च भूत्वाऽपि क्षमन्ते ये जनाः परान् ॥७४॥
[३८]ये च शृण्वन्त्यथाऽऽह्वानं स्वप्रभोः कुर्वते पुनः । पूजां प्रतिष्ठितां, ये च मन्त्रणाभिः क्रियास्सदा ॥७५॥
व्ययं कुर्वन्ति ये किञ्च दानादस्मत् कृतात् तथा, । [३९]तादृशाः प्रतिरोधं ये त्वत्याचारस्य कुर्वते ॥७६॥
स यदाऽऽपात्यते तेषु; [४०]दुष्कृतस्य पुरस्क्रिया । दुष्कृतं तद् विधं त्वेव, यः परं क्षमतेऽथ च ॥७७॥
तत् प्रमार्ष्टि, पुरस्कारोऽल्लाहपार्श्वे ह्यमुष्य तु । नैव जाल्मा मतास्तस्य, सन्देहो नाऽत्र कश्चन ॥७८॥
[४१]आत्मनो रक्षणस्यार्थं चेष्टते यस्तु मानवः । अत्याचारात् कृतादूर्ध्वं ना (क्षेप्तुं) वर्त्ततेऽयनम् ॥७९॥
तांस्तु कोऽपि जनांस्तावत्; [४२]सात्याचाराः परन्तु ये । वर्त्तते खल्वमीषान्तु विरोधायायनं पुनः, ॥८०॥
ये धरित्र्यां कलिं किञ्च व्यर्थमुद्भावयन्त्यथ । एत एव तु येभ्योऽस्ति यातनाऽतीव दुःखदा ॥८१॥
[४३]तुष्येद् यस्तु क्षमेताऽपि तदेतद् वर्त्तते परम् । स्थैर्यभाग् हृदयानां वै कर्म किंचिदलौकिकम् ॥८२॥
[४४]भ्रंशयेत् स्वत एवाऽत्र त्वल्लाहो यं जनं पुनः । अमुष्य रक्षको मित्रं नो भवत्येव कश्चन ॥८३॥
द्रक्ष्यसि त्वं पुनर्जाल्मान् द्रक्ष्यन्ति यातनां यदा । ते वदिष्यन्ति "किं कश्चिन् मार्गोऽस्त्यत्र निर्वर्त्तितुम्? ॥८४॥
[४५]तिरस्कारैर्नतान् किञ्च चक्षुर्भिः पश्यतः पुनः । मुकुलितैर्हि तान् यूयं द्रक्ष्यथाऽभ्यग्नि वाहितान् ॥८५॥
श्रद्धराश्च वदिष्यन्ति—हानिभाजस्त एव ये । हानिभाजं किलाऽकुर्वन् आत्मनात्मानमेव तु ॥८६॥
पुनः कौटुम्बिकान् सर्वान् पुनरुत्थापनाहनि । शाश्वतीं यातनां हन्त! जाल्मा यास्यन्ति निश्चितम् ॥८७॥
[४६]नाऽथ तेषां भविष्यन्ति मित्राणि रक्षकास्तथा । साहाय्याय पुनः कोऽपि तावदल्लाहतः पृथक् ॥८८॥
भ्रंशयेद् यं स्वतोऽल्लाहस्तस्य पन्था न कश्चन । [४७]यद् दिनं न परापात्यं, पुरस्त्वापाति यत् परम् ॥८९॥
अल्लाहात्, तत एव प्राक् कुरुध्वं स्वप्रभोर्वचः । दिने तस्मिन्न लभ्यं स्यात् धाम किंचन रक्षणम् ॥९०॥
शक्ष्यथाऽथाऽपि नो यूयं ताराक्रोशेन जल्पितुम्! । [४८]ततोऽप्येते तु तिष्ठन्ति पराङ् आस्याः क्वचिद् यदि ॥९१॥
प्रेषितस्त्वं न वै कृत्वाऽस्माभिरेषान्तु रक्षिता । वाचिकाऽऽहरणं त्वेव दिष्टं कर्त्तव्यमस्ति ते ॥९२॥
स्वदयाया रसास्वादं कारयामो वयं यदा । मानवं, जायते तस्य हर्षोद्रेको, यदाऽथ च ॥९३॥
विपत् तानापतेत् काचित् तत्करैरग्रतो हि यत् । प्रेषितं कारणात् तस्मात् (भजन्त्येते निराशताम्) ॥९४॥
मानवोऽति कृतघ्नोऽयं सन्देहो नाऽत्र कश्चन । [४९]शासनेऽधिकृतोऽल्लाहस्त्वेव व्योम्नां हि वर्त्तते ॥९५॥
धरित्र्याश्चैव, यत् कामस्तदेव सृजते च सः । यत्र तस्य रुचिस्तस्मायसौ पुत्रीः प्रयच्छति ॥९६॥
अथो यत्र रुचिस्तत्र पुत्रान् किञ्च प्रयच्छति । [५०]अथो यच्छति तेभ्योऽसौ पुत्रीः पुत्रानुभावपि ॥९७॥
यं च कामयतेऽसौ तां कुरुतेऽप्यवकेशिनीम् । ज्ञानवान् स समर्थश्च महानत्र व संशयः ॥९८॥
[५१]मानवस्तादृशः कश्चिन्न चाऽल्लाहस्तु संवदेत् । समं येना (भिमुख्येन, संभवेदपि) तत् परम् ॥९९॥
प्रकाशात् स्वत एवाऽपि पटपृष्ठादथाऽपि वा । प्रेषयेद् वाग्घरं किम्वा कञ्चनाऽपि प्रकाशयेत् ॥१००॥
तदादेशात् स यत् किंचित्, सर्वोच्चैस्स सुधीर्ध्रुवम् । [५२]काशितोऽस्माभिरित्थं वै निजात्मा त्वयि वर्त्तते ॥१०१॥
आत्मनो हि समादेशात्; श्रद्धा का, किं च पुस्तकम् । त्वया ज्ञातमिदं नासीत्, प्रकाशस्तत् परं कृतम् ॥१०२॥
अस्माभिः, दर्शयामश्च तथाऽनेन किलाऽयनम् । बन्धकानान्तु तं मर्त्यं यं वयं कामयामहे ॥१०३॥
अध्वनस्त्वमृजोस्सत्यं दर्शको ननु तिष्ठसि । [५३]तस्याल्लाहस्य मार्गो ऽसौ यस्य सर्वाधिकारिता ॥१०४॥
तत्र यत् खेषु, किं चैव धरित्र्यां पुनरेव च । किन्न यात्यन्ततस्सर्वमल्लाहं त्वेव (केवलम्) ? ॥१०५॥

योगः—१०५

CC-0. In Public Domain. Digitized by eGangotri

४३

सूक्तम्—रुक्मरंजनम्

(अज़–ज़ुखरुफ़)

(महाकालेऽवतीर्णा: नवोत्तराशीतिरायता:)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]हा० मीमा०ऽ; [2]नेन शास्त्रेण शपनं विशदेन वै । [3]कुराणमिदमस्माभिरकार्यर्वगिरा ध्रुवम् ।। १ ।।

त्वयेदं बुध्यतां येन; [4]मूले शास्त्रे यदत्र च । अस्मदीयेऽस्ति तद्ध्युच्चैर्वर्तते च धियान्वितम् ।। २ ।।

[5]तत् किमेभ्यो वयं युष्मदपाकर्त्तास्महे न्विदम् । अनुस्मारकचक्षुर्यद् यूयं संस्थाविघातिन: ? ।। ३ ।।

[6]प्रेषिता वाग्घरा: किञ्च कियन्त: प्राक्तनेष्वपि ! । [7]वाग्घरो योऽपि यातस्तांस्ते परं तं त्वपाहसन् ।। ४ ।।

[8]नाशिता: परमस्माभिरेभ्योऽपि वलवत्तरा: । प्राक्तनानाञ्च दृष्टान्तस्तदग्रे किल तिष्ठति ।। ५ ।।

[9]अथो पृच्छेरिमांस्त्वञ्चेद्-व्योमान्युर्वीञ्च कोऽसृजत् । ध्रुवं वक्ष्यन्ति ते-ह्येषां स्रष्टाऽसावेव वर्त्तते ।। ६[1] ।।

प्रभुत्वाच् छालते यो वै ज्ञाता यश्चैव वर्त्तते । [10]असावेव धरित्रीं यो व्यधात् प्रेंखोलनञ्च व: ।। ७[1] ।।

मार्गानकृत युष्मभ्यं तत्र, यूयं यथा तत: । लभेध्वं किञ्च मार्गान् वै (पश्यन्तो हि) कदाचन ।। ८ ।।

[11]असावेव बनं व्योम्नो मानेनाऽवर्षयच्च य: । जीवितस्तेन निर्जीवोऽस्माभिर्भागो भुवस्तथा ।। ९ ।।

इत्थमेवोद्धृता यूयं करिष्यध्वे तत: पुन: । [12]असृजद् य: पुनर्द्रव्यांस्तथा सर्वविधानपि ।।१०।।

नावश्चतुष्पदश्चैव युष्मभ्यं विचकार च । येषु यूयमथाऽऽरोहं कुरुध्वे; [13]सुस्थिरा यत: ।।११।।

यूयं पृष्ठेषु तिष्ठेत तेषां, यस्मिन् क्षणेऽथ च । यूयं पृष्ठेषु तिष्ठेत तेषां यूयं स्मरेत वै ।।१२।।

प्रभोरनुग्रहं स्वस्य कृतं तावद् वदेत च । महिम्ना राजतेऽसौ य इमान् कर्मस्वयोजयत् ।।१३।।

अस्मदर्थे, वयन्त्वेतान् सर्वथाऽप्यशकाम नो । वशीकर्त्तुम्; [14]ध्रुवं किञ्च गन्तास्मस्त्वं प्रभुं वयम् ।।१४।।

[15]वन्धकानामिमे तस्य तदंशं चाप्यकुर्वत । कृतघ्नो मानवस्स्पष्टं वर्त्तते निश्चितं त्विदम् ।।१५।।

[16]किं न्वसौ चिनुते पुत्रीस्स्वस्मै सृष्टाद् भवात् स्वयम् । अथो पुत्रै: पुनस्सर्वैर्युष्मान् सम्मानयत्यसौ ।।१६।।

[17]यदैव कश्चिदेषाञ्च तदधिकृत्य सूच्यते । क्रियते यस्य सम्बन्धस्तावदेभिर्दयालुना ।।१७।।

आननं जायते श्याममीषां, सततञ्च स: । मृत्युनैवान्तरन्तश्च क्षोभमप्येत्यतर्कितम् ।।१८।।

[18](किं वहेत् समतां तेन) भूषणैर्लालिता हि या । या न वादेषु वक्तुञ्च प्रभवेद् विशदं पुन: ? ।।१९।।

[19]दयालोर्वन्धका एभिर्देवा: किञ्च स्त्रियो मता: । किन्ते सर्गक्षणे तेषामविद्यन्त कदाचन ? ।।२०।।

साक्ष्यमेषान्तु लेखात्तं (निश्चितं) प्रविधास्यते । अथोऽप्येते नियुक्ताश्च भविष्यन्ति पुन: खलु ।।२१।।

[20]ते वदन्ति—न चैषिष्यद् दयालुश्चेद् वयं न वै । देवानपूजयिष्याम तान्, न ते तद्विद: क्वचित् ।।२२।।

कल्पना डीयमानास्ते भवन्ति केवलं नर: । [21]अदद्मैभ्यो वयं किञ्चिच् छास्त्रं किम्वा पुराप्यत: ।।२३।।

यदेते सुदृढं तस्य धारणाग्रहिण: स्थिता: । [22]न वै; ते तु वचन्त्येतत्—पूर्वजातान् वयं निजान् ।।२४।।

पथो ह्येकस्य वै पान्थान द्राक्ष्म, वयमप्यथो । लब्धारस्सरलं मार्गमनुयाय हि तान् पुन: ।।२५।।

CC-0. In Public Domain. Digitized by eGangotri

[२३]वासतेयेषु यत्रापि कुत्रापि प्रेषितः पुरा । वाग्घरस्त्वत्, तदीया वै प्राहुरेतद्धि केवलम् ॥२६॥
सुखारामाजनाः—"दृष्टा अस्माभिस्त्वात्मपूर्वजाः । एकां पद्धतिमाश्रित्य चलन्तो वयमप्यथ ॥२७॥
तेषा मेवाऽनुयास्यामः पद्धतिं खल्वनारतम् । [२४](चेतकश्चाऽह)—"यद्येष मार्गदर्शनमुत्तरम् ॥२८॥
समादायोपयातोऽहं पूर्वजेभ्योऽपि वः क्वचित् । किं तदाऽपि?, त आहुस्तत्—नैव स्वीकर्त्तुमुद्यताः ॥२९॥
तद् वयं प्रेषितो दत्वा त्वं यदप्यत्र तिष्ठसि । [२५]तेष्वभूम वयं पश्चात् प्रतिशोधपराः, अथो ॥३०॥
दृश्यन्ताम् कीदृशोऽन्तोऽभूत् तेषां येऽत्र निषेधकाः । [२६]यदाऽब्रह्मः स्वकं तातं वान्धवान्त्स्वांस्तथाऽवदत् ॥३१॥
"उदास्तोऽहन्तु तस्मिन् यो विषयः पूजनस्य वः । [२७]तं विहायाऽ सृजद् यो मां, स एव दर्शयिष्यति ॥३२॥
मान्तु मार्गम्; [२८]तदेतच्च वचस्तेनोपरक्षितम् । स्वायतीनां कृते पश्चात्, निवर्त्तन्तां यथैव ताः ॥३३॥
[२९]न वै; दत्ता मया ह्येभ्यो जीवने सुखिताऽखिला । पूर्वजेभ्योऽपि चैवैषां, सत्यमैत् परतश्च तान् ॥३४॥
वाग्घरश्चापि वैशद्यं समालम्ब्योपजग्मिवान् । [३०]उपैत् सत्यं यदा चैतान् इदन्ते खल्ववादिषुः ॥३५॥
"इदन्तु केवला माया, नाऽत्र श्रद्दध्महे वयम्" । [३१]अवोचंस्ते च—"किन्नेदममुयोर्वासितेययोः ॥३६॥
कुराणं काशितं तावत् कस्मिंश्चित् सुमहत्तमे ? । [३२]वनन्त्येते दयां किम्वा स्वप्रभोः ?, भवजीवने ॥३७॥
कृतो वृत्तेर्हि सम्भाग एषामस्माभिरेषु वै । कृता अस्माभिरेषाञ्च विभवैः केचनोत्तराः ॥३८॥
प्रेरयेयुर्यथाऽन्यांस्ते श्रममुख्येषु कर्मसु । ते संगृह्णन्ति यत्तस्मात् त्वत् प्रभोरुत्तरा दया ॥३९॥
[३३]अथैतन्नाभविष्यच्चेत् यद् गणास्सर्व एव तु । समवेता भविष्यन्ति तद् ये नैवाऽपि मन्वते ॥४०॥
दयानिधि, वयं तेभ्यस्तेषां सद्मछदीरथ । राजतान्यकरिष्याम सद्माधिरोहणीरपि ॥४१॥
[३४](राजतानि) कपाटानि तेषां किञ्चैव सद्मनाम् । विश्रान्तुं सोपबर्हाणि पटलानि तथैव च ॥४२॥
[३५](अकरिष्याम किञ्चैभ्यः) प्रभूतं रुक्मरञ्जनम् । अशेषं परमेतत्तु भवजीवनहेतवे ॥४३॥
ह्येव सौख्यस्य संभारः केवलं विद्यते मतः । भयकृद्भ्यः परोलोकस्त्वत् प्रभोः पार्श्वतः परम् ॥४४॥
[३६]दयालोः कीर्त्तने यस्तु मर्त्यो मन्दायते पुनः, । नियुक्तं शातनं त्वेकं तस्मिन् कुर्मो वयं, स च ॥४५॥
सहायो जायते तस्य; [३७]वारयन्त्यथ ते च तान् । अध्वनस्तेऽपि बुध्यन्ते युक्तमार्गाश्रितान् निजान् ॥४६॥
[३८]यदाऽसावेति किञ्चाऽस्मान् (सहायं) भाषते हि सः । अभविष्यन् महद् भद्रं पूर्वपश्चिमयोर्यदि ॥४७॥
आवयोरन्तरं मध्ये खल्वस्थास्यत् क्वचित् (चिरात्) । गर्हितोऽत्यर्थमेषोऽस्ति सहायो ननु मे (बत !) ॥४८॥
[३९]नाऽद्यलाभकरं किञ्चिज् जल्पनं तदिदञ्च ते । "यातनां सार्धमन्यैर्यद् भजेऽहं," यदभूः पुरा ॥४९॥
त्वमपि सापराधस्तु; [४०]बधिरान् श्रावयिष्यसि । किन्नु ? किम्वाऽयनञ्चैव त्वं पुनर्दर्शयिष्यसि ॥५०॥
नेत्रहीनान्, जनान् किञ्च पथभ्रष्टं सुनिश्चितम् ? । [४१]उद्धृतस्त्वं भवेश्चाऽपि यद्यस्माभिस्तदापि तु ॥५१॥
प्रतिशोधपरा एषु भविष्यामो वयं ध्रुवम् । [४२]दर्शयेम वयं त्वां वा प्रतिज्ञां पूर्वमाकृताम् ॥५२॥
सार्धमेभिः, किलैतेषु प्रभवामो हि सर्वथा । [४३]सुदृढं तद् ग्रहीत्वा त्वं प्रक्त्तस्वाऽस्ति काशितम् ॥५३॥
त्वयि यत्, युक्तमध्वानं श्रितोऽसि (बोध) निश्चितम् । [४४]अनुस्मारकमेतच्च ध्रुवं तुभ्यं हि तिष्ठति ॥५४॥
सपिण्डेभ्यस्त्वदीयेभ्यः किञ्च, त्वञ्चानुयोक्ष्यसे । [४५]प्रष्टुमर्हसि किञ्च त्वं वाग्घरान् प्रेषितान् पुरा ॥५५॥
त्वत्, प्रतीष्टा कृता अन्ये दयालुं प्रविहाय किम् । खल्वस्माभिस्स्तुता यत्ते भवेयुश्चापि (पूजिताः) ? ॥५६॥
[४६]प्रैषयाम वयं मूषं प्रिययौनस्य सन्निधौ । तस्य मुख्यजनानाञ्च, स चाऽह—वाग्घरोऽस्म्यहम् ॥५७॥
जगतां यः प्रभुस्तस्मात्; [४७]यदैवासावुपैत् तथा । लक्ष्मणैस्सार्धमस्माकं तांस्तदैवारभन्त ते ॥५८॥
वहसितुं पुनस्तानि; [४८]लक्ष्मणं यद् यदप्यथ । दर्शितं तावदस्माभिर्धर्मणा तत्सहोदरम् ॥५९॥
व्यतिरिच्येतरत् तत्तत् त्वस्थात्, ते मज्जिता अथो । यातनायां यथा कच्चित् निवर्त्तेरन् हि ते पुनः ॥६०॥
[४९]तेऽवदन्—हे नरेन्द्र ! त्वं स्वं प्रभुं प्रार्थयाऽत्र नः । बुद्ध्वा सम्पर्कसूत्रं तां प्रतिज्ञां तत्कृतां त्वया ॥६१॥
युक्तं मार्गं प्रयास्यामो ध्रुवमेव वयं पुनः । [५०]यदैव यातनाऽपास्ता कृताऽस्माभिस्तदैव ते ॥६२॥
प्रतिज्ञाभंजनायैव खल्वभूवन् समुत्सुकाः । [५१]स्वज्ञातीः प्रिययौनश्च संबोध्य तास्वभाषत ॥६३॥
"ज्ञातयो मम ! किन्नेदं यन् मिश्रस्याधिपोऽस्म्यहम् । मामधो वावहन्त्येताः किञ्च नद्यो, न पश्यथ ? ॥६४॥
[५२]उत्तरश्च भवाम्यस्मात् किन्न, हीनो हि वर्त्तते । यश्च यस्सार्थकां वाचां चापि व्याहर्त्तुमप्रभुः ? ॥६५॥
[५३]अयं केन न केयूरैस्सौवर्णैः प्रेषितस्समम् ? । देवाः पार्श्वचराः कृत्वा प्रहिताः केन नाऽस्य वा ? ॥६६॥

CC-0. In Public Domain. Digitized by eGangotri

[५४]इतीत्थं स निजा जातीर्भ्रष्टबुद्धी र्व्यधाच्च ताः । अमन्यन्त वचस्तस्य, सावज्ञास्ते ध्रुवं जनाः ॥६७॥
[५५]यदाऽस्मान् गतसंमोदांस्ते व्यधुस्तदनन्तरम् । दण्डितास्ते किलाऽस्माभि र्मज्जितास्सर्व एव च ॥६८॥
[५६]भूतकालानुषक्ताश्चाऽस्माभिस्तावत् कृता हि ते । कृता उत्तरलोकेभ्यः पुनर्दृष्टान्तमेव च ॥६९॥
[५७]यदा च मर्यमापत्यं कृतं तेभ्यो निदर्शनम् । अवहासपरास्तत्ते ज्ञातयो ह्यभवंस्तदा ॥७०॥
[५८]तथाऽऽहुस्ते—किमस्माकं देवास्सन्त्युत्तमा अथो । स वा ? ऽऽपत्तिरियं तावद् वितण्डा हेतुनैव तु ॥७१॥
जनिता तैः, प्रकृत्यैव जनास्ते प्रविवादिनः । [५९]बन्धकः केवलोऽसौ तु, कृपा ऽस्माभिः प्रदर्शिता ॥७२॥
यत्राऽऽ, दर्शः कृतो यश्चापीश्वरालीनसन्ततेः । [६०]भवेदिष्टं तथा ऽस्माकं चेद् वयं घटयेम तत् ॥७३॥
देवान् युष्मासु ते चोर्व्यामयेरन् प्रभुतामपि । [६१]ध्रुवं चासावमुष्याऽऽस्ते क्षणस्य लक्ष्मण खलु ॥७४॥
त्वं ततो नैव सन्देहं तत्र कर्तुं किलार्हसि । सम्भावय मदुक्तञ्च, युक्तो मार्गोऽयमेव तु ॥७५॥
[६२]वारयेच् छातनस्त्वाञ्च न कदाचिद् (विवोध च) । प्रत्यक्षं शात्रवस्तेऽसौ; [६३]प्रमाणै र्विशदैस्समम् ॥७६॥
यदोपयातवांश्चेशः, स आह—अहं धियाऽन्वितः । भूत्वा युष्मानुपेतोऽस्मि, तथैतस्मात् क्वचित् क्वचित् ॥७७॥
भेदधीर्यत्र युष्माकं तत्तद् विवृणवै यथा । बिभीत यूयमल्लाहाद् वचो मे कुरुताऽपि च ॥७८॥
[६४]प्रभुर्मे ऽल्लाह एवाऽस्ति प्रभुर्वो ध्रुवमेव च । स्तवनीयस्स एवाऽतः ऋजुर्मार्गोऽयमेव तु ॥७९॥
[६५]सम्प्रदायाः पुनस्तेषां केचिद् भेदं वितेनिरे । धिक् ततस्तानभूवन् ये तावदत्र कृतागसः ॥८०॥
आभीलाय किलामुष्य दिनस्य कारणाकृतः । [६६]क्षणस्यामुष्य किं न्वेते प्रतीक्षा तत्परास्, स यत् ॥८१॥
आपतेदेष्वकस्माद्धि प्रमत्ता यावदेव ते ? । [६७]ये तु कर्त्तव्यशीलास्तान् प्रविहायेतरे तदा ॥८२॥
नर्ममित्राणि चैवाऽपि द्वेक्ष्यन्त्येव परस्परम् । [६८]बान्धवा मे ! दिने तस्मिन् साध्वसं नास्ति किंचन ॥८३॥
दुःखं नाऽथ च युष्मभ्यम्; [६९]श्रद्धरा आयतेषु ये । अतिष्ठंस्तावदस्माकं आत्मनश्चार्पणास्तथा ॥८४॥
[७०]सुखारामान्तराणीत यूयं युष्मत् स्त्रियोऽपि च । मोदाऽऽपूरैः; [७१]तदग्रे च रुक्मस्थाल्यस्तथैव च ॥८५॥
सततं पानपात्राणि क्रमिष्यन्ति हि लीलया । तत्तत् सर्वं तथा वस्तु तत्र तावद् भविष्यति ॥८६॥
आत्मनः कामितं यद् यत् स्निग्धमक्ष्णां यदप्यथ । शश्वच्चैव पुनस्तत्र तव वासो भविष्यति ॥८७॥
[७२]यच्च कर्म कृतं पूर्वं त्वया तत्कारणाद् (ध्रुवम्) । पुरस्कारस्य रूपेण सुखारामस्स एष वै ॥८८॥
उत्तरं यस्य दायित्वं त्वयि न्यस्तं हि तिष्ठति । [७३]फलान्यत्र प्रभूतानि सूपभोगाय तेऽथ च ॥८९॥
[७४]ये जनास्सापराधास्तु ते हि वत्स्यन्त्यनारतम् । दुर्गतेर्यातनायां वै; [७५]सा न चोनीकरिष्यते ॥९०॥
कदाचित्, तत्र मग्नाश्च ते स्थास्यन्ति निराशिताः । [७६]सात्याचारा न वै तेषु त्वभवाम वयं, परम् ॥९१॥
सात्याचारास्स्वतस्ते वै त्वतिष्ठन्; [७७]ते च (नारके) । क्रोक्ष्यन्तीत्थम्—भगोस्वामिन् ! प्रभुस्तेऽस्मानशेषतः ॥९२॥
अवसन्नान् (ध्रुवं) कुर्यात्, वक्ष्यत्येवमसौ पुनः । "यूयं तिष्ठत खल्वत्र यथेदानीं तथैव तु" ॥९३॥
[७८]निश्चितं सत्यमादाय वयं युष्मानुपस्थिताः । विरुद्धाचारिणोऽनेके परं युष्मासु वै जनाः ॥९४॥
[७९]सम्प्रधार्याऽत्र तिष्ठन्ति किमेते ननु किञ्चन ? । सम्प्रधार्य वयञ्चापि तत् तिष्ठामो हि किञ्चन ॥९५॥
[८०]किं न्विमे चिन्तयन्तीत्थममीषां गुप्तमन्त्रणाः । कर्णवाचस्तथा चैव वयं श्रृण्मो न सर्वथा ? ॥९६॥
कथन्नो ? ये किलास्माकं दूतास्ते पार्श्ववर्त्तिनः । भूत्वा ऽमीषां वचांस्येषां लेखितुं सन्ति तत्पराः ॥९७॥
[८१]ब्रूहि—किञ्चिदपत्यं नो दयालोस्तस्य तिष्ठति । पूजकानामहञ्चापि पूजकोऽन्यतमः किल ॥९८॥
[८२]महिम्नां तद् विसंवादी राजसिंहासनप्रभोः । व्योम्नां चैव धरित्र्याश्च प्रभोर्यत् कीर्तयन्ति ते ॥९९॥
[८३]साम्प्रतं विसृजैतांस्त्वं, रमन्तां ते जनाः पुनः । युक्तियुद्धे विलासे च क्षणो यावदुपैति सः ॥१००॥
एतान्, यस्य प्रतिज्ञाऽस्ति तावदेभिः कृता पुरा । [८४]स एव यः प्रतीष्टोऽस्ति व्योम्नि, किञ्चैव वर्त्तते ॥१०१॥
प्रतीष्टो यः पुनश्चोर्व्यां, सुधीर्ज्ञाता तथैव यः । [८५]सुभगोऽसौ च यस्यास्ति धराव्योम्नोर्हि शासनम् ॥१०२॥
अन्तरे यत् तयोश्चैव तस्य, ज्ञोऽसौ च केवलम् । तस्य किञ्च क्षणस्याऽपि, परावृत्य स एव च ॥१०३॥
युष्माभिस्तूपगन्तव्यः; [८६]यांस्तथैवाह्वयन्ति ते । तं विहाय न ते सन्ति चाभिशंसाधिकारिणः ॥१०४॥
सत्यसाक्ष्यप्रदानन्तु विहाय, ते विदन्ति च । [८७]त्वं तांश्चेदनुयुञ्जीथाः कोऽसृजत्तान्, सुनिश्चितम् ॥१०५॥
ते वक्ष्यन्ति "किलाऽल्लाहः", तत्कथन्ते पराङ्मुखाः? । [८८]वदेच्चेदिदमेषोऽथ—प्रभो मे ! ते न्विमे जनाः ॥१०६॥
श्रद्दधाना न ये सन्ति; [८९]तदेतांस्त्वन्तु मा शुचः । प्रत्युत ब्रूहि—शं वोऽस्तु, शीघ्रं ज्ञास्यन्ति खल्विमे ॥१०७॥

योगः—१०७

CC-0. In Public Domain. Digitized by eGangotri

४४

सूक्तम्–दुन्वानः

(अद्–दुखान)

(महाकालेऽवतीर्णा एकान्नषष्टिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]हा० मीम०; [२]अनेन शास्त्रेण शपे स्पष्टेन खल्वहम् । [३]असन्देहमकुर्मास्य सुभगायां तु वै निशि ॥ १ ॥
प्रकाशं वयमेकस्यां, ध्रुवमास्म च चेतकाः । [४]इदंरूपो धियोपेत , आदेशोऽस्यां प्रदीयते ॥ २ ॥
[५]प्रदत्तोऽस्माभिरादेशः ! प्रेषणाः सततं वयम् । निश्चितम्; [६]त्वत् प्रभोरेव दया, ऽसौचाऽविशंकितम् ॥ ३ ॥
श्रोताऽपि वर्त्तते किञ्च विज्ञाता पुनरेव च । [७]व्योम्नाञ्चैव धरित्र्याश्च यत्तयोरन्तरेऽथ च ॥ ४ ॥
प्रभुस्तस्याऽपि, कच्चित् स्याद् यदि वः प्रत्ययस्तथा । [८]तं विहायाऽपरः कश्चित् प्रतीष्टो न हि सर्वथा ॥ ५ ॥
प्राणयत्यपि किञ्चाऽथ स एव मारयत्यपि । प्रभुर्वोऽसौ पुनस्तेषां ये युष्माकञ्च पूर्वजाः ॥ ६ ॥
[९]न वै; सन्देहमाविष्टा एते लीलापरास् स्थिताः । [१०]अस्तु, तत् त्वं प्रतीक्षस्व दिनं व्योम यदा ध्रुवम् ॥ ७ ॥
प्रत्यक्षं किल दुन्वानं धूमं संजनयिष्यति । [११]पर्यावृत्य पुनर्लोकानसौ स्थास्यति, यातना ॥ ८ ॥
दुःखकृद् वर्त्तते ह्येषा; [१२](लोकाः क्रोक्ष्यन्ति ते पुनः) । प्रभो नः ! यातनामस्मत् त्वमपाकुर्वसंशयम् ॥ ९ ॥
श्रद्दधाना वयं मर्त्याः; [१३]चेतनामुपगामिनः । कुतोन्वेते भविष्यन्ति, वाग्घरः प्रागुपैद्धि तान् ॥१०॥
वैशद्येन; [१४]ततोऽप्येते स्थितास्तस्मात् पराङ्मुखाः । अवोचन् किञ्च—मत्तोऽयं शिक्षया दत्तया (ऽपरैः) ॥११॥
[१५]यातनां संहरामस्तु स्तोककालाय तद् वयम् । तस्मिन्नेव तु रंस्यध्वे परं यूयं जना भृशम् ॥१२॥
[१६]साग्रहञ्च ग्रहीष्यामो दिने यस्मिन् वयन्तु तान् । दण्डयिष्याम एवाऽमून्; [१७]ततः प्राग् ज्ञातयस्तथा ॥१३॥
परीक्षा (ग्नौ) परिक्षिप्ताः प्रिययौनस्य चाऽभवन् । तानुपैद् वाग्घरो ह्येको यदा भद्रः स्वभावतः ॥१४॥
[१८](अवोचत् स च) मद्धस्ते यूयमल्लाहबन्धकान् । न्यस्यत, प्रत्ययार्होऽहं युष्मभ्यं वाग्घरो ध्रुवम् ॥१५॥
[१९]अन्तरेण तथाऽल्लाहं साभिमाना न तिष्ठत । युष्मदग्रे प्रमाणञ्च विशदं स्थापयाम्यहम् ॥१६॥
[२०]रक्षणं लब्धवानस्मि स्वस्य युष्मत् प्रभोस्तथा । येन यूयं न हन्यात मां दृषद्भिः कदाचन ॥१७॥
[२१]श्रद्दधाना न चेद् यूयं मयि तिष्ठथ तत्पुनः । अनुजानीत मां गन्तुम्; [२२]आह्वयत् स्वं प्रभुं ततः ॥१८॥
"सापराधा इमे तावत्"; [२३](आदिशत् तत्प्रभुः) तदा । याहि यावन्निशा तावन् बन्धकैस्त्वं हि मे समम् ॥१९॥
(द्वेषणैस्तु) ध्रुवं यूयमनुयाता भविष्यथ । [२४]सागरञ्च पुनःपश्चाज् जहीहि स्तम्भमागतम् ॥२०॥
मज्जितो भविताऽयञ्च समग्रः पृतनाजनः । [२५]ते विहायाग्रतो यातास्सुखारामान् बहूनथ ॥२१॥
निर्झरांश्चैव; [२६]कृष्योर्वी रम्यधामनि यत्र ते । [२७]सौख्यदे चैव संभारे ह्यरमन्त दिवाऽनिशम् ॥२२॥
[२८]अघटत् त्वेतदित्थं वै ! अकुर्म तद् वयं पुनः । संभारस्यास्य सर्वस्य स्वामिनोऽन्यान् जनान् किल ॥२३॥
[२९]नैवाऽऽकाशान्न चाप्युर्व्या विलापः कोऽप्यजायत । तद् दयाभावितो, नाऽथ कश्चित् कालस्य चाऽवधिः ॥२४॥
तेभ्यो दत्तोऽभवत्; [१०]किञ्चापीश्वरालीनसन्ततिः । मोचिता तावदस्माभिर्यातनायास्तिरस्कृतः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[३१]प्रिययौनात्, स वै सत्यं दर्पादौद्धत्यमाश्रितः । मर्यादामतियायाऽथ चेष्टमानोऽभवत् स्थितः ॥२६॥
[३२]ते चाऽस्माभिः कृता वुद्ध्वा रुच्या अन्यव्यपेक्षया । [३३]तेभ्यः किञ्चैव दत्तानि तानि लक्ष्माणि यानि हि ॥२७॥
परीक्षैत्राऽभवन् स्पष्टम्; [३४]वदन्त्येते तु मानवाः । [३५]प्रथमो ह्यस्त्ययं मृत्युः किलाऽस्माकं, वयं न च ॥२८॥
पश्चादुत्त्थापितास्तावद् भविष्यामः कदाचन । [३६](प्राणयित्वा) भृशं यूयं पूर्वजान् प्रापयेत नः ॥२९॥
तिष्ठथेह तु चेद् यूयं सत्यसन्धाः क्वचिज्जनाः । [३७]उत्तमाः किं न्विमे किम्वा ते वै तुवरका गणाः ? ॥३०॥
पूर्वजाता जना ये वा तेभ्यः ? ते वै विनाशिताः । अस्माभिर्हि यतस्ते वै सापराधाः किलाऽऽसत ॥३१॥
[३८]लीलाखेलकृता नैव सन्त्यस्माभिर्विहायसः । धरित्री यत्तयोश्चान्तः; [३९]सृष्टास्सत्येन खल्विमे ॥३२॥
केवलेन ध्रुवम्, नैषां विदन्ति बहवः परम् । [४०]वासरो निर्णयस्यैषां निश्चितस्समयावधिः ॥३३॥
[४१]मित्रं साह्याय मित्रस्य समर्थं न भविष्यति । यदा, साह्यञ्च नाऽऽप्स्यन्ति ते कुतोऽपि च किंचन ॥३४॥
[४२]तं विहाय तु यस्मिन् स्याद् दयाऽल्लाहस्य सर्वथा । प्रभुत्वाच् छालते सत्यं दयावांश्चापि खल्वसौ ॥३५॥
[४३]ज़क्कूमपादपस्तावत् ! [४४]पाप्मनां तद्धि भोजनम् । [४५]यथैव गलितो धातुः क्वथन्तस्याज्जठरेष्वसौ ॥३६॥
[४६]यद् वद् वारि क्वथत्; [४७](किं च वक्ष्यते)गृह्यतामयम् । धुक्षदग्नौ समाकृष्य क्षिप्यताम्; [४८]पुनरेव च ॥३७॥
वृष्यन्तां शीर्ष एतस्य कारणाः क्वथदम्भसाम् । [४९](वक्ष्यते) त्वं रसाऽऽस्वादं कुरुष्व साम्प्रतं, महान् ॥३८॥
त्वमेव महिमाशाली प्रतापाढ्यस्तथाऽभवः । [५०]तदेवैतद् ध्रुवं यस्मिम् सन्देहस्ते सदाऽभवत् ॥३९॥
[५१]अल्लाहं प्रति कर्त्तव्यं ये चरन्त्यत्र ते ध्रुवम् । स्थास्यन्ति तादृशे स्थाने भयं यत्र न किञ्चन ॥४०॥
[५२]सुखारामेष्वमी किञ्च जलस्रोतोऽन्तरेष्वथ । [५३]कौशेयसूक्ष्मगाढानि वासांसि परिधाय च ॥४१॥
अन्योन्याभिमुखा भूत्वा तत्र स्थास्यन्ति (शाश्वतम्) । [५४]इतीत्थं भावि ! कर्त्तास्मो रूपाढ्याभिर्वयं पुनः ॥४२॥
सुन्दरायतनेत्राभिस्स्त्रीभिस्तत् पाणिपीडनम् । [५५]तत्र ते चोपलब्धारः फलं सर्वविधं पुनः ॥४३॥
निर्विशंकतया स्थित्वा; [५६]स्वदिष्यन्ते न तत्र ते । रसं मृत्योः पुनर्मृत्युं प्राग्जातं प्रविहाय तु ॥४४॥
असौ त्रास्यति तांश्चैव यातनाभ्योऽति दुर्गतेः, । [५७]त्वत् प्रभोरेतदौदार्यं समग्रं इदमेव च ॥४५॥
साफल्यं सुमहत् तावत्; [५८]तदस्माभिरिदं कृतम् । भाषया ते सुखज्ञानं, कदाचित् ते जना यथा ॥४६॥
अवधाय प्रवर्त्तेरन्; [५९]अधुनैतेऽपि मानवाः । प्रतीक्षन्ते, त्वमप्यत्र तत् प्रतीक्षापरो भव ॥४७॥

योगः—४७

CC-0. In Public Domain. Digitized by eGangotri

४५

सूक्तम्–जान्वासना:

(अल–जासिया)

(महाकालेऽवतीर्णाः सप्तत्रिंशदायाताः)

सा ल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[१]हा० मीम०; [२]अस्य हि शास्त्रस्य वतारोऽल्लाहतः किल । शालते यः प्रभुत्वेन सर्वविच्चापि तिष्ठति ॥ १ ॥
[३]श्रद्धरेभ्यो ध्रुवं तत्र व्योमसूर्व्यामथापि च । सन्ति लक्ष्माण्यनेकानि; [४]सर्गे युष्माकमप्यथ ॥ २ ॥
तेषु जीवेषु यांश्चैव धरायां विकिरत्यसौ । सन्ति लक्ष्माण्यनेकानि नृभ्यो ये श्रद्धरा इह ॥ ३ ॥
[५]अनुक्रमे दिवारात्र्योस्तस्यां याऽत्रावतारिता । दिवोऽल्लाहेन वृत्तिश्च, जीविता भूः पुनर्यया ॥ ४ ॥
अवसन्नैकवारन्तु, मरुताञ्च व्यतिक्रमे । सन्ति लक्ष्माणि तेभ्यो ये धिया सन्ति प्रचोदिताः ॥ ५ ॥
[६]अल्लाहस्य किलाऽऽयातान् सत्येन त्वां हि यान् वयम् । श्रावयामोऽधुनाऽल्लाहात् तस्यायातेभ्य एव च ॥ ६ ॥
परस्तात् किन्नु तद् यत्र श्रद्धास्यन्ति हि ते जनाः? । [७]धिक् पाप्मानं जनं सर्वमनृतोद्भाविनं किल ॥ ७ ॥
[८]श्राव्यमाणान् य आयातानल्लाहस्य शृणोत्यपि । ततोऽपि स्तब्ध एवाऽऽस्तेऽखर्वगर्वेण यो जनः ॥ ८ ॥
अश्रुतानिव तान् कृत्वा, सूच्यतां तादृशो जनः । दुःखदा कारणा तस्मै; [९]यदा किंचित् स वेत्ति च ॥ ९ ॥
आयातेष्वस्मदीयेषु तान् समारभतेऽथ सः । सततं घर्षितुं तावत्, सावमाना हि यातना ॥१०॥
वर्त्तते तादृशेभ्यो वै जनेभ्यस्त्व (विशंकितम्) । [१०]नारकं पार्श्वतस्तत्र तेषां, यत्तैस्तथार्जितम् ॥११॥
साधकं तन्न कार्यस्य तेषां किञ्च भविष्यति । (साधका नो भविष्यन्ति) ते प्रभुं चान्तरेण तैः ॥१२॥
रक्षकत्वान् मता ये हि; घोरा तेभ्योऽथ यातना । [११]मार्गसन्दर्शकं त्वेतत्, न्यषेधन् येऽथ मानवाः ॥१३॥
आयातान् स्वप्रभोस्तेभ्यो दुःखदा घोरयातना । [१२]असावल्लाह एवाऽस्ति युष्मत् सेवाकृते हि यः ॥१४॥
समुद्रमकरोद् युक्तं नावस्तत्र चलन्तु यत् । तस्यादेशात्, यथा चैव तस्य वृत्ति स्वहेतवे ॥१५॥
मार्गयेत पुनर्यूयम्, कार्तज्ञं दर्शयेत च । [१३]यदाकाशेषु यच्चोर्व्यां स्वतस्तेनाखिलं हि तत् ॥१६॥
युक्तं सेवासु युष्माकम्, लक्ष्माण्यत्र भवन्ति तत् । अमीभ्यो निश्चितं ये वै व्याप्रियन्ते हि बुद्धिभिः ॥१७॥
[१४]ब्रूहि तान् श्रद्दधानान्नून् 'क्षमन्तान्ते हि तान् जनान् । अल्लाहाहस्सु वीताशान् पुरस्कुर्याद् यतस्स तान् ॥१८॥'
तद्विधं यद्विधं त्वाऽऽस्त नृणां तेषामुपार्जितम् । [१५]भद्रकृत् कुरुते भद्रमात्मने त्वेव सर्वथा ॥१९॥
दुष्कृतञ्चाऽथ कुर्वाणोप्यात्मने कुरुते हि तत् । परावृत्योपगन्तव्यस्स्वप्रभुस्त्वेव वः पुनः ॥२०॥
[१६]ईश्वरालीनसन्तत्यै दत्तमस्माभिरप्यथ । पुस्तकं शासनं किञ्च वाग्धरत्वमथ ध्रुवम् ॥२१॥
वृत्तये विभवा भव्या माहात्म्यं चाप्यनुत्तमम् । [१७]आदेशा विशदाः किञ्च दत्तास्तेभ्यो, विभेदता ॥२२॥
तेषु याऽजायताऽसौ च लब्धज्ञानोर्ध्वमेव तु । वैमनस्यान् मिथो जातात्; पुनरुत्थापनाऽहनि ॥२३॥
प्रभुर्वः खल्वसन्देहं निर्णयं तत्र यास्यति । अधिकृत्य हि यद् वस्तु ते विभेदं किलाऽऽचरन् ॥२४॥
[१८]इदानीं विशदं मार्गमस्माभिर्गमितोऽसि, तत् । तमेवाश्रय मार्गं त्वम्, नाऽनुयाहि कदाचन ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

तेषामिष्टानि ये त्वत्र विदन्त्येव न सर्वथा । [१९]न तत् कार्यार्हिता काचिदल्लाहं समपेक्ष्य तु ।।२६।।
व्रजन्त्यन्योन्यसाहाय्यं जाल्मा लोकाः सुनिश्चितम् । मित्रं तेषां त्विहाल्लाहः परं ये ध्वस्तदुष्कृताः ।।२७।।
[२०]प्रत्युत्पन्नमतीदन्तु वचो लोकाय तिष्ठति । श्रद्धरा ये दया तेभ्यो दर्शनं चाऽध्वनः पुनः ।।२८।।
[२१]दुष्कृतो ये जनाः किन्ते बोधन्तीदं वयं हि तान् । करिष्यामो हि तत्तुल्यान् श्रद्धरा ये जना इह ।।२९।।
भद्रकर्मकृतश्चैव जीवने निधने समान् ? । अयुक्तो निर्णयस्तेषां धिया यन्त उपासते ।।३०।।
[२२]व्योमान्यसृजदल्लाहस्सत्येनोर्वीं तथैव च । अथाऽपि प्राणिमात्रं स्यात् तस्य कर्मानुरोधतः ।।३१।।
सम्यक् पुरस्कृतो येन, नाऽत्र कश्चिच्च मानवः । गमितो भविता किञ्चाप्यनर्थक्षुल्लकं पुनः ।।३२।।
[२३]जनं तन्दृष्टवांस्त्वं किम् कामं देवं हि यो व्यधात् । भ्रंशयत्ययनात्तञ्च ज्ञात्वाऽल्लाहोऽथ तस्य च ।।३३।।
श्रवो हृन्मुद्रितं किं च कुरुते संवृणोत्यथ । चक्षुषी तस्य, को वा तं पथा नेतुं भवेत् क्षमः ।।३४।।
उपरिष्टात् किलाल्लाहात्, भोत्स्यध्वे न ततोऽपि किम्? । [२४]मन्वते ते च—सर्वस्वं त्वैहिकं नोऽस्ति जीवनम् ।।३५।।
जीवनं संप्रयामोऽथ यामो मृत्युं वयं, तथा । केवलः काल एवाऽस्मान् नाशयत्यत्र यः पुनः ।।३६।।
तस्य ते धारयन्त्यत्र ज्ञानं नैवाऽपि किञ्चन । कल्पनालोक एवैते डीयमानास्तु मानवाः ।।३७।।
[२५]विशदाश्च यदाऽऽयाता आस्माकीनास्तदग्रतः । वाच्यन्ते तर्क एतेषां भवत्येष हि केवलः ।।३८।।
“यूयमाहरताऽस्माकं (जीवयित्वा) हि पूर्वजान् । (पुनः) तिष्ठथ चेद् यूयं सत्यसन्धा ध्रुवं नराः ।।३९।।
[२६]ब्रूहि—केवलमल्लाहो युष्माकं जीवनोऽथ च । स एव मारको, युष्मान्, पुनरुत्थापनाऽहनि ।।४०।।
निर्विशंके स एवाऽथ संहतांश्च विधास्यति । परं नैतत्तु बोधन्ति बहुसंख्या जना इह ।।४१।।
[२७]अल्लाहस्यैव तद् राज्यं व्योम्नामुर्व्यास्तथैव यत् । हानिभाजो भविष्यन्ति मिथ्याचारास्तदा यदा ।।४२।।
अभ्युपैष्यति कालोऽसौ; [२८]गणं जान्वासनं पुनः । प्रत्येकं द्रक्ष्यसि त्वञ्च, गणः प्रत्येकमात्मनः ।।४३।।
कर्मलेखां समुद्दिश्य चैवाऽऽहूतो भविष्यति । (वक्ष्यतेऽथ च)—यद् यूयमकृढ्वं खलु तद्विधम् ।।४४।।
प्रदानं प्रतिदानस्य तावदद्य विधास्यते । [२९]पुस्तकं ह्यस्मदीयं वः प्रतियोगित्वमाप्तवत् ।।४५।।
(अशेषं) घोषयत्यद्य याथातथ्येन वं (ध्रुवम्) । युष्माभिश्चरितं यद् यत् कर्म तत्तद (शेषतः) ।।४६।।
वयमलेखयामैव सततं नाऽत्र संशयः । [३०]श्रद्दधानाः परं ये तु भद्रकर्मकृतस्तथा ।।४७।।
वेशयिष्यति तांस्तावद् दयायां प्रभुरात्मनः । विशदमेतदेवाऽस्ति साफल्यम्; [३१]ये पुनर्जनाः ।।४८।।
श्रद्विहीनाः (प्रवक्ष्यन्ते ते च) नास्माकमायताः । अवाच्यन्त पुरस्तात् किं युष्माकम् ?, दर्पपूरिताः ।।४९।।
यूयमस्थात, यूयञ्च सापराधा अतिष्ठत । [३२]औच्यतेदं यदा चैव—सत्याऽल्लाहस्य वर्त्तते ।।५०।।
सन्धाऽ, सो चाप्यसन्दिग्धः क्षणः, यूयमवोचत । तदा—जानीमहे नैव कणो ऽसौ कीदृशो, वयम् ।।५१।।
नैव विश्वसिमोऽ, सो नः केवलं कल्पनाशयः । [३३]उपस्थास्यन्ति तांस्तेषामघानि कृतकर्मणाम् ।।५२।।
यत्तु तेऽवाहसन् नित्यं तद्धि पर्यावरिष्यति । तांश्च; [३४]ते चाऽथ वक्ष्यन्ते—विस्मरिष्याम एव तु ।।५३।।
अद्य युष्मान् वयं यद् वद् दिनस्यास्य हि संगतिम् । यूयं व्यस्मार्ष्ट, युष्माकं धाम वह्निश्च (नारकः) ।।५४।।
सहायो वर्त्तते नाऽथ युष्माकं तत्र कश्चन । [३५]इदञ्चास्माद् यतो यूयमल्लाहस्य किलायतान् ।।५५।।
अकुरुध्वं प्रसंगान् वै परिहासस्य (सर्वदा) । भाविकं जीवनं युष्मांस्तथैवाऽवञ्चयत् पुनः ।।५६।।
तदद्य नोद्धृतास्तस्माद् भविष्यन्ति हि तेऽनलात् । नाऽथ ते चैव लप्स्यन्ते समाधानाय वा क्षणम् ।।५७।।
[३६]अल्लाहाय स्तवस्तस्मात् प्रभवे वियतामथो । धरित्र्याः प्रभवे चैव जगतां प्रभवे पुनः ।।५८।।
[३७]आकाशेषु धरित्र्याञ्च महस्तस्यैव राजते । असावेव प्रभुत्वेन शालतेऽसौ सुधीरपि ।।५९।।

इति पंचविंशं पारायणम्

इति श्रीसत्यदेववर्मणः कृतौ सांस्कृते कुराणे पारायणपंचविंशकम् ।

योगः—५९

CC-0. In Public Domain. Digitized by eGangotri

४६

सूक्तम्—वहवक्रवालुकावप्रम्

(अल–अहकाफ)

(महाकालेऽवतीर्णाः पंचत्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

अथ षड्विंशं पारायणम्

[1]हा० मीम०; [2]अस्य हि शास्त्रस्य वतारोऽल्लाहतःकिल । शालते यः प्रभुत्वेन सर्वविच्चापि तिष्ठति ॥ १ ॥
[3]असृजाम वयं भूमिं वियतो यच्च तेऽन्तरा । केवलेन हि सत्येन नियतावधयेऽप्यथ ॥ २ ॥
अविश्वासः श्रितो यैस्तु यतोऽचेतयन्त ते जनाः । तत एव पराङ् आस्या जायन्ते (हन्त! साम्प्रतम्) ॥ ३ ॥
[4]ब्रूहि—दृष्टा नु युष्माभिर्यानल्लाहमुपेक्ष्य किम् । स्तुध्वे यूयम् ? धरित्र्याः को भागस्तैर्निर्मितोऽभवत् ॥ ४ ॥
दर्शयेत तु माम्, व्योम्नां सर्गेऽमीभिश्च किं कृतम् ? । निधत्त मत् पुरस्तावच् चेद् यूयं सत्यवादिनः ॥ ५ ॥
प्राक्तनं पुस्तकं किञ्चित् खल्वेतस्मादथो पुनः । प्रमोपेतं प्रमाणं वा (विश्वासार्थं) हि किञ्चन ॥ ६ ॥
[5]पथो भ्रष्टतमस्तस्मात् को वाऽप्यन्यस्स्तवीति यः । तानुपेक्ष्य किलाल्लाहं ये न तेषां स्तवं क्वचित् ॥ ७ ॥
श्रोतुमर्हन्त्यदो यावत् पुनरुत्थापनादिनम् । तेऽपि तेषां स्तवे शश्वदुपेक्षाबुद्धयो (ध्रुवम्) ॥ ८ ॥
[6]संहताश्च करिष्यन्ते यदा ते तद् विरोधिनः । भविष्यन्ति, निषेत्स्यन्ति तत्कृतानथ च स्तवान् ॥ ९ ॥
[7]वाच्यन्ते च यदैवाऽमूनस्माकं विशदायताः । श्रद्विहीनास्तु सत्यस्य विषये यदुपैद्धि तान् ॥१०॥
वदन्तीद "मिदन्त्वस्ति मायैव विशदा किल" । [8]किन्नु जल्पन्ति ते—ऽनेन घटितमिदमात्मना ? ॥११॥
ब्रूहि तत् त्वम्—"मयैवेदं घटितं चेदिहात्मना । अल्लाहस्याग्रतो यूयं तत् त्रातुं मां न शक्नुथ ॥१२॥
योऽयं जल्पोऽधिकृत्यैतद् युष्मासु च प्रवर्त्तते । तं स सम्यक्तया वेत्ति, साक्षित्वेन क्षमश्च सः ॥१३॥
अन्तरा माञ्च युष्मांश्च, दयी चासौ क्षमी च सः । [9]ब्रूहि—नैवास्म्यहं कश्चिन् नव्यस्तावत्तु वाग्धरः ॥१४॥
नाऽपि जाने मया सार्धं किंवद् व्यवहरिष्यते । नैव जाने च युष्माभिः किंवद् व्यवहरिष्यते ॥१५॥
तदेव त्वाश्रये वर्त्म काश्यते मयि यद् (ध्रुवम्) । केवलश्चेतकस्त्वेव वर्त्ते चाऽहमनाविलः ॥१६॥
[10]ब्रूहि किं चिन्तितं चाऽपि क्वचिद् युष्माभिरस्ति यत् । यदीदं वर्त्ततेऽल्लाहादेव, किञ्चाऽथ खण्डितम् ॥१७॥
इदं युष्माभिरेकश्चापीश्वरालीनसन्ततेः । इत्थं रूपे स्थितः साक्ष्ये, श्रद्दधानोऽभवच्च सः ॥१८॥
परं दर्पाऽऽहता यूयं स्थितास्तत्राऽपि, किन्तदा ? । मार्गं दर्शयतेऽल्लाहो नैव जाल्मान् कदाचन ॥१९॥
[11]श्रद्विहीनाश्च जल्पन्ति श्रद्दधानानिदं प्रति । "उत्तमं सत्यमस्थास्यद् यदीदं तन् न तेजनाः ॥२०॥
अभविष्यन् किलाऽस्माकं तावदग्रेसराः क्वचित्" । अथाऽमी नाऽस्यनेतृत्वमंगीकुर्वन्ति ते ततः ॥२१॥
एतदेव तु वक्ष्यन्ति साम्प्रतम्—हि सनातनः । प्रपञ्चो विलसत्येषः; [12]प्रागप्यस्थादतस्तथा ॥२२॥
मौषं पुस्तक, मासीत्तत् (साक्षान्) नेता दयाऽपि च । पुस्तकं वर्त्तते चेदमर्वाणां भाषया पुनः ॥२३॥
अनुमोदनकं तावत्, चेतयेद् येन जाल्मकान् । आहरेच्च शुभं वृत्तम् नृभ्यो भद्रकृतस्तु ये ॥२४॥

CC-0. In Public Domain. Digitized by eGangotri

[13]अवोचन् निश्चितं ये तु—प्रभुरल्लाह एव नः । स्थिता भद्रकृतश्चैव तन्न तेषां भविष्यति ॥२५॥
भयं किञ्चित्, भविष्यन्ति नाऽपि ते दुःखिनः पुनः । [14]सुखारामेषु वासाय त्वर्हंतैषु हि तिष्ठति ॥२६॥
तत्र वत्स्यन्ति ते शश्वत्, यत्तैः किञ्चाऽथ चेष्टितम् । तस्य सर्वस्य खल्वेष पुरस्कारो भविष्यति ॥२७॥
[15](अथेदं शाश्वतं सत्यम्) दिष्टोऽस्माभिश्च मानवः । वर्त्तितुं भद्रभावेन पितृभ्यामात्मनस् (सदा) ॥२८॥
प्रसूस्तस्य तमादाय याति कृच्छ्रमनारतम् । प्रसूते चाऽपि कृच्छ्रेण, मास्सु त्रिंशत्सु जायते ॥२९॥
स्तन्यत्यागोऽस्य गर्भस्य मध्येऽवस्थानमप्यथ । यौवनं यावदभ्येति स्वकीयं जायते च सः ॥३०॥
चत्वारिंशत्समीनोऽथ चायुषा, वक्ति—मे प्रभो ! । मां प्रणोदय शश्वत् त्वं, दर्शयेयमहं हि यत् ॥३१॥
कार्त्तज्ञं त्वत् कृपाहेतोस्त्वयि या हि त्वया कृता । पितरि मे प्रसौ मे च मयि किञ्च, पुनस्तथा ॥३२॥
तदेवाऽहं सदा कुर्याम् तुभ्यं रोचेत यत् किल । ममापत्येषु चैवाऽपि मह्यं भद्रं निवेशय ॥३३॥
विप्रतीसारपूर्णोऽहं त्वामुपैमि, भवामि च । अमीषां निश्चितं येऽत्र भवन्त्यात्मसमर्पकाः ॥३४॥
[16]इमे ते हि जना येषां ऊरीकर्त्तास्महे वयम् । तत्कृतान्यत्र भद्राणि तथा चोपेक्षितास्महे ॥३५॥
दुष्कृतानि पुनस्तेषां भवितारो हि तेऽथ च । तेषां येषां सुखारामो वासस्तावत् (सुनिश्चितः) ॥३६॥
प्रतिज्ञा सर्वथा सत्या विहिता या तु तैस्समम् । [17]स चाऽथ मानुषस्स्वीयौ पितरौ समुवाच यः ॥३७॥
"धिग् युवाम् ! प्रतिजानीथः किं युवां मयि यत् पुनः । जीवयिष्ये समुद्धृत्य खल्वहं मत्पुराऽपि च ॥३८॥
प्रयाता बहवो वंश्याः (उद्धृतास्ते परं न वै)" । स्तुवीतस्तावथाल्लाहमेवमाक्रोशतस्तथा ॥३९॥
विषादो नौ दशायान्ते, त्वं श्रद्धेहि, न संशयः । अल्लाहस्य वचस्सत्यम्," असौ वक्ति परन्त्विदम् ॥४०॥
एतान्याख्यानमात्राणि गतासूनां भवन्ति ह । [18]इमे ते हि जना येषु जिन्नेषु मानुषेषु च ॥४१॥
अमीषां पूर्वजातेषु सिद्धा जाताऽऽस्त कारणा । हानिभाजो भवन्तीमे संशयो नाऽत्र कश्चन ॥४२॥
[19]यथा कर्म तथा श्रेण्यो भविष्यन्ति जनं जनम् । यथाऽसौ तान् पुरस्कुर्यात् तेषां कर्मानुसारतः ॥४३॥
अन्यायश्चरितो नैव तैस्समञ्च भविष्यति । [20]श्रद्विहीना यदा चैव करिष्यन्तेऽभिपावकम् ॥४४॥
(तदानीन्ते हि वक्ष्यन्ते)—वस्तूनि सारवन्ति तु । नाशितानि हि युष्माभिर्भवस्य किल जीवने ॥४५॥
भोगा भुक्ताश्च तेभ्योऽथ, पुरस्कारस्य रूपतः । करिष्यध्वेऽधुना यूयं कारणाभागिनो ध्रुवम् ॥४६॥
यतो यूयमसत्येन धरित्र्यां खल्वतिष्ठत । आत्मम्मन्या अतश्चाऽपि यत् सावज्ञा अतिष्ठत ॥४७॥
[21]आदभ्राता च कीर्त्योऽथ वान्धवानात्मनो यदा । वालुकावप्रमध्येऽसौ चेतितवान् हि—चेतकाः ॥४८॥
ततः प्रागग्रतश्चापि चेतयन्तस्त्वयान् किल । स आह 'न विनाऽल्लाहं स्तुवीध्वं कञ्चनाऽपि तु ॥४९॥
युष्मभ्यं यातना भीतिर्घोरस्याह्नस्स्थिता मयि । [22]त आहुः—किं पराकर्त्तुं त्वमस्मानागतोऽसि नः ॥५०॥
अस्मदीयेष्टदेवेभ्यस् ?, तत् त्वमस्मासु पातय । तां यया त्रासयस्यस्मान्, सत्येष्वन्यतमो यदि ॥५१॥
[23]केवलं ज्ञानमल्लाहमधितिष्ठति, सोऽव्रदत् । प्रापयामि तथाऽहन्तु युष्मान् दत्वा यदेव तु ॥५२॥
प्रेषितोऽस्मि, परं जाने यूयं मौग्ध्यमुपाश्रिताः । [24]घटारूपेण पश्चात्ते तमायान्तं व्यलोकयन् ॥५३॥
यदैवोपत्यकां स्वां वै तेऽवदन्—उद्गता घटा । तिष्ठतीयं किलाऽस्मासु या (द्य) वर्षिष्यति (ध्रुवम्) ॥५४॥
न तावत्; सा त्वियं यस्याः कृते शीघ्रायितं (सदा) । युष्माभिरस्ति, वात्येयं कृच्छ्रकृद् यातनाऽनुगा ॥५५॥
[25]अभून्नाशपरा चाऽसौ सर्वस्यापि तु वस्तुनः । स्वप्रभोर्हि नियोगेन, तेऽभवन् विदशास्तथा ॥५६॥
यद् विहाय गृहांस्तेषां नान्यत् किंचिददृश्यत । सापराधान् जनानित्थं पुरस्कुर्मो वयं किल ॥५७॥
[26]यत् कृतं नैव युष्माकं तत्तत् तेषां कृतं वशे । तथाऽस्माभिः प्रदत्तानि तेभ्योऽक्षिहृच्छ्रत्राणि च ॥५८॥
सिद्धये न परं तेषामकल्पन्त कथञ्चन । चक्षुषी वा श्रवौ हृद् वा तेषां यत्ते निषेधकाः ॥५९॥
आयतानामतिष्ठन् हि खल्वल्लाहस्य (सर्वदा) । अथो पर्यावृणोत् तांस्तद् यत्तेऽ (जस्र) मवाहसन् ॥६०॥
[27]नाशितास्तेऽपि वासाश्च त्वां स्थिताः परितो हि ये । तेषामग्रे तथाऽस्माभिर्निजाश्चोपायनीकृताः ॥६१॥
आयाता यत् कदाचित्ते प्रत्यावृत्तिं भजेत हि । [28]तत् कथं तैर्न साहाय्यं कृतं तेषां य आसत ॥६२॥
मताः पूज्यतया यत्तेऽल्लाहपार्श्वेऽभिशंसनम् । चाऽपि शक्ष्यन्ति वै कर्त्तुम्, न तावत्, ते तु सर्वथा ॥६३॥
स्थिताः खल्वन्यथासिद्धाः; अयन्तेषामथाऽऽस्त च । प्रपञ्चः केवलम्, यच्च घटितं तैश्च तत्समम् ॥६४॥

CC-0. In Public Domain. Digitized by eGangotri

[29]यदाऽस्माभिरथो जिन्नाः केचित्तेऽभिमुखाः कृताः । निशाम्यन्तु कुराणन्ते कृत्वैतत्, तच्च ते गताः ।।६५।।
यदा, तेऽन्योन्यमाहुर्वे—"तूष्णीं तिष्ठत साम्प्रतम्" । यदा पाठश्च सम्पन्नो निवृत्तास्ते स्वबान्धवान् ।।६६।।
सचेतीकरणा भूत्वा; [30]त आहु; पुनरेव च । बान्धवा अस्मदीया भोः ! अस्माभिर्हि निशामितम् ।।६७।।
पुस्तकं तावदेकं यन् मूषादूर्ध्वमजायत । काशितं, वर्त्तते तस्य पुनश्चैव समर्थकम् ।।६८।।
यत् ततोऽभूत् पुरा यञ्च सत्यमृज्वयनं प्रति ।(लोकान्)नयति; [31]हे मर्त्या ज्ञातयो मे ! हि भाषितम् ।।६९।।
मन्यध्वे (निश्चितं) यूयमल्लाहाऽऽत्राहकस्य तु । श्रद्दध्वञ्च पुनस्तस्मिन्, पापानि क्षंस्यते हि सः ।।७०।।
युष्मत् कृतानि, युष्मांश्च पुनस्त्रास्यति (सर्वथा) । यातनाया ध्रुवं तस्याः कृच्छ्रदा वर्त्तते हि या ।।७१।।
[32]मंस्यते न पुनर्यो वायल्लाहाऽऽवाहकस्य तु । रक्षितुं तावदात्मानं धरित्र्यां न स शक्ष्यति ।।७२।।
अमुष्य रक्षको मित्रं तमृते न भविष्यति । एत एव जना येऽत्र स्पष्टं मार्गादवच्युताः ।।७३।।
[33]दृष्टवन्तो न ते किम्वाऽल्लाहो व्योमानि योऽसृजत् । धरित्रीञ्चैव यश्चाऽथ श्रान्तस्सृष्ट्वाऽपि तान्न वै ।।७४।।
धारयत्यपि सामर्थ्यं प्रमीतोज्जीवनाय च ? । कथन्नो, वर्त्ततेऽसौ वै सर्वसामर्थ्यभृद् ध्रुवम् ।।७५।।
[34]श्रद्विहीना यदा चैव करिष्यन्त उपस्थिताः । अभ्यग्नि (तेऽनुयोक्ष्यन्ते) किमेतत् सत्यमस्ति नो ? ।।७६।।
ते च वक्ष्यन्ति—कस्मान्नो, प्रमाणान् नःप्रभोः(ऋतम्) । असौ वक्ष्यति—नत्तस्य श्रद्विघातस्य साम्प्रतम् ।।७७।।
पुरस्कारस्य रूपेण स्वदध्वं यातनारसम् । [35]यथा धैर्यधनाः पूर्वं वाग्धरास्तद्वदेव तु ।।७८।।
धैर्यमाधाय चेष्टस्व, मा कृथाश्शीघ्रतां वृथा । मानवेभ्यः किलामीभ्यः, प्रतिज्ञातमभूदथो ।।७९।।
यत् समं तैस्तदेवाऽमी यदा द्रक्ष्यन्त्यथाऽपि च । (भविष्यतीदृशी तेपु प्रतीतिः) यद् वयं स्थिताः ।।८०।।
वासरे खल्विहैकस्मिन् घटीमेकां हि केवलाम् । हरणं वाचिकस्यैतत् (कर्त्तव्यं ते तु केवलम्) ।।८१।।
त एव नाशयिष्यन्ते येऽवज्ञाकारिणो जनाः ।

योगः—८१।।

CC-0. In Public Domain. Digitized by eGangotri

४७

सूक्तम्–मुहम्मदः

(मदहीनाऽवतीर्णा अष्टत्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अविश्वासकृतो येऽथावारुधन् (मानवान् पुनः) । अल्लाहद्वर्त्मनस्तेषामकृतार्थान्य(संशयम्) ॥ १ ॥
कृतानि तेन कर्माणि; [२]श्रद्धरा ये पुनर्जनाः । भद्रकर्मकृतस्, सन्ति श्रद्धरास्तत्र काशितम् ॥ २ ॥
यन्मुहम्मदमध्येऽस्ति—सर्वथा सत्यमेव तत् । तत्प्रभोः पार्श्वतस्तच्च, खल्वपाकुरुते हि सः ॥ ३ ॥
दुरितानि पुनस्तेभ्यस्तेषां चित्ते तथैव च । निवेशय (त्यलं) शान्तिम्; [३]तदेतस्माद् यतः किल ॥ ४ ॥
श्रद्विहीनाः प्रयान्तीह पथाऽसत्यस्य, ये परम् । श्रद्धरा यान्ति ते सत्ये तत्प्रभोः पार्श्वतो हि यत् ॥ ५ ॥
मर्त्येभ्य एवमल्लाहो दृष्टान्तानां हि वर्णकः । [४]श्रद्विहीनैर्यदा जन्यं युष्माकमुद्भवेत् तदा ॥ ६ ॥
कन्धरास्ताडयंतेषां यूयं यावत् पराजिताः । भवन्ति ते हि युष्माभिः, निगृह्णीयात तांस्ततः ॥ ७ ॥
दर्शयेतानुकम्पां वा गृहीत्वाऽर्थं ततोऽथ वा । यूयं मुञ्च्यात तान् यावद् युद्धं जायेत संहृतम् ॥ ८ ॥
यद्यैषिष्यत् किलाऽल्लाहस्त्वन्यदेतत्, स तान् समान् । अशक्ष्यद् दण्डितान् कर्त्तुम्, अभीष्टं परमस्य तु ॥ ९ ॥
अन्योऽन्यस्य कलेर्योगादन्योन्यस्य परीक्षणम् । प्रमीता येऽथ जायन्तेऽल्लाहमार्गे कदाचन ॥१०॥
अकृतार्थानि कर्माणि नासौ तेषां करिष्यति । [५]दर्शयिष्यति पन्थानं तान् स तेषाञ्च चेतसि ॥११॥
वेशयिष्यति सच्छान्तिम्; [६]वेशयिष्यति चाऽपि तान् । दत्तपरिचयेऽमुष्मिन् सुखारामेऽ (विशंकितम्) ॥१२॥
[७]हे जनाः श्रद्दधाना ये ! यूयं साह्यं चरिष्यथ । अल्लाहस्य तु चेत् तेन साह्यं वोऽसौ चरिष्यति ॥१३॥
स्थैर्योपेतां गतिं किञ्च युष्माकं स करिष्यति । [८]अविश्वासं गता ये तु ते विनश्यन्तु (सर्वथा) ॥१४॥
अकृतार्थानि कर्माणि तेषाञ्चासौ विधास्यति । [९]इदञ्चास्माद् यतो रुच्यं नाऽस्त तेषान्तु तद्धि यत् ॥१५॥
काशितं जातमल्लाहादतस्तैः कर्म यत् कृतम् । कृतं बन्ध्यफलं तत्तु; [१०]धरित्र्यां विहृतं न किम् ॥१६॥
तावदेभिर्जनैः किञ्च दृष्टं काऽभूद् दशा पुनः । तेषां नृणामभूवन् ये पूर्वजातास्ततः ? क्षयः ॥१७॥
कृतोऽल्लाहेन सर्वेषां तेषाम्, एवंविधं (ध्रुवम्) । अस्ति श्रद्धाविहीनेभ्यः; [११]इदञ्चास्माद् यतः किल ॥१८॥
अल्लाहो रक्षिता तेषाम् श्रद्दधाना हि ये जनाः । श्रद्विहीनजनानान्तु रक्षको नैव कश्चन ॥१९॥
[१२]श्रद्धरान् सुकृतोऽल्लाहो नून् ध्रुवं वेशयिष्यति । सुखारामेषु तादृक्षु नद्योऽधो यान् वहन्ति हि ॥२०॥
श्रद्विहीनास्तु सौख्यानि भुञ्जते, यद्वदेव च । कडंगराः समश्नन्ति तेऽपि तद् वदथापि च ॥२१॥
निश्चितो वर्तते वासस्तेषां स (नारको) ऽनलः । [१३]वासतेयान्यनेकानि वासतेयाच्च तेऽभवन् ॥२२॥
द्रढीयांसि यतोऽभूस्त्वमुपसृष्टोऽथ तान्यपि । क्षीणान्यस्माभिरास्तैषां न च कश्चित् सहायकः ॥२३॥
[१४]साम्यं मर्त्यो विभर्त्यत्र सुस्पष्टमयनं श्रितः । स्वप्रभोः किन्नु तैर्येषां दुष्कृतं शोभयाऽन्वितम् ॥२४॥
तदर्थं विहितं, ये चाऽप्यात्मकामानुगा जनाः ? । [१५]प्रतिज्ञातस्सुखारामः कर्त्तव्यधीभिरस्ति यः ॥२५॥
तस्य वृत्तमिदम्—तत्र निर्दुर्गन्धा वहन्ति वै । वारिनद्योऽथ नद्यश्च क्षीरपूर्णा रसान्तरम् ॥२६॥
यत्र जातन्न, नद्योऽथ मद्यपूर्णा भवन्ति हि । स्वादपूर्णा हि पायिभ्यो, नद्यश्शुद्धस्य चाप्यथ ॥२७॥

CC-0. In Public Domain. Digitized by eGangotri

मधुनस्तत्र तेभ्योऽथ विविधानि फलानि च । सर्वरूपाणि, किञ्चाऽथ क्षमा तेषां प्रभोरपि ॥२८॥
(तद्विधा: किन्नु ते मर्त्यास्तैः समम्)यान्ति साम्यताम् । शश्वदग्निर्गृहं येषां दत्तं येभ्यः क्वथज् जलम् ॥२९॥
वर्त्तते किञ्च यत्तेषामन्त्रकृज्जायते पुनः ? । [१६]तादृशास्तेषु केचिच्च दत्तकर्णा हि ये त्वयि ॥३०॥
त्वत्तो यदाऽपगच्छन्ति जनांस्ते प्राप्तसंविदः । पृच्छन्तीदम् "किमाहायमिदानीं अधुनैव तु" ? ॥३१॥
एत एव जना येषामल्लाहो हृदयानि वै । मुद्रितान्यकरोत्तावत्, ते स्वकामानुगाः किल ॥३२॥
[१७]ये तु भद्रकृतो मर्त्या लभन्ते ते ततोऽधिकम् । भद्रकृत् त्वम्, सुरक्षाञ्च तेभ्यो यच्छत्यलं हि सः ॥३३॥
[१८]प्रतीक्षन्तेऽथ किन्वेते तन्मुहूर्त्तं यदेषु तत् । अकस्मादापतेत् यस्मात्तस्य लक्ष्माण्यथाऽपि च ॥३४॥
प्रत्यक्षमेव जातानि, तद् यदैष्वापतिष्यति । संज्ञां लब्धुं कथं वा ते लप्स्यन्ते कमपि क्षणम् ॥३५॥
[१९]तद् विजानीहि नो पूज्यः कश्चिदन्योऽत्र विद्यते । विहाय तावदल्लाहं, क्षमां याचस्व किञ्च (भोः !) ॥३६॥
कृतानां पाप्मनां स्वेन, कृतानां श्रद्धरैरपि । श्रद्धराभिश्च योषिद्भिः, वेत्त्यल्लाहोऽथ यत्र हि ॥३७॥
विहारस्ते पुनर्यत्र स्थितिस्ते च भवत्यपि । [२०]वदन्ति श्रद्दधानाश्च—"कृतस्सूक्तस्य केन नो ॥३८॥
वतारः कस्यचित् तावत्" ? यदा च जायते कृतः । निश्चितस्य तु सूक्तस्य वतारो, युद्धवर्णनम् ॥३९॥
तत्र तिष्ठति किञ्चैव, तान् जनांस्त्वन्नु पश्यसि । हृत्सु येषां रुजा; ते च पश्यन्ति त्वां तथा यथा ॥४०॥
कश्चिन् यमाभिभूतत्वान् मूर्च्छादृष्टिर्भवेदिह । धिक् ततस्तान् जनान् सर्वान्; [२१]भद्रवाक्च, विधेयता ॥४१॥
निश्चितोऽथाभियोगे तु भक्तिमन्तो भवन्ति हि । नरोऽल्लाहसमक्षं चेत् तेषां भद्राय तद् भवेत् ॥४२॥
[२२]साग्रहाः किन्नु तद् यूयं व्यक्तिरूपेण तिष्ठथ । भ्रष्टाचारप्रसाराय धरित्र्यां नाशनाय च ॥४३॥
आत्मनो वान्धवानां वै ? [२३]अल्लाहेनाऽति धिक् कृताः । इमे ते प्रापिताः किञ्च पश्चाद् वाधिर्यमप्यथ ॥४४॥
नष्टदृष्टीनि चाक्षीणि पुनस्तेषां कृतान्यपि । [२४]इमे ध्यास्यन्ति मर्त्याः किं कुराणं न ततोऽपि तु ॥४५॥
मुद्रितानि पुनः किम्वा हृन्द्यमीषां भवन्त्यथ ? । [२५]पराङ् आस्या अभूवन् ये काशिते सति चाऽपि तु ॥४६॥
तत् पुरस्तात् सुवैशद्यात् सुमार्गे (विद्धि निश्चितम्) । मन्त्रणं शातनस्येदं तेभ्योऽसौ चैव तान् पुनः ॥४७॥
प्रग्रहं ग्राहयत्येवं शिथिलं (सर्वतः किल) । [२६]एतदस्माद् यतः प्राहुस्ते हि तान् यैर्न मानितम् ॥४८॥
कृतोऽल्लाहेन यस्याऽभूद्वतारः—"निश्चितं वयम् । युष्माननु प्रयास्यामस्तावदर्थेषु केषुचित्" ॥४९॥
वेत्त्यल्लाहस्तु यत्तेषां (मिथोऽ) भूद् गुप्तमन्त्रणम् । [२७]का दशा स्यात् तदा दिव्यास्संहरिष्यन्त्यसून् यदा ॥५०॥
पृष्ठेष्वेषां कपोलेषु तिष्ठन्तस्ताडनापराः ? । [२८]एतदस्माद् यदल्लाहं व्यधाद् यत्तु विचेतसम् ॥५१॥
तदेव तेऽन्वमोदन्त, तेऽल्लाहस्य प्रहर्षणम् । चाऽवामन्यन्त, तत्तेषामसौ कर्माण्यशेषतः ॥५२॥
अकरोदफलान्येव; [२९]मन्वते किं न्विदं हि ते । रोगो हृत्स्थोऽभवद् येषां नाल्लाहः काशयिष्यति ॥५३॥
तान्तु या वर्त्तते तेषां हृत्स्था गुप्ताऽवमानना ? । [३०]ऐषिष्याम वयञ्चेत् त्वामैक्षयिष्याम ताञ्जनान् ॥५४॥
आकृत्यैव ततस्त्वं तानज्ञास्यो, याऽथ वर्त्तते । तेषां संवादशैली च तयाऽपि भोत्स्यसे हि तान् ॥५५॥
अल्लाहो वेत्ति ते सम्यगशेषाणि कृतानि वै । [३१]परीक्षिष्यामहे त्वाञ्चाऽप्यनिवार्यतया वयम् ॥५६॥
जानीयाम वयं येन युष्माकं ये सुयोधनाः । ये च स्थैर्यं गताः किञ्च परीक्षेमहि यच्छ्रुतम् ॥५७॥
त्वामधिकृत्य यत् किञ्चित्; [३२]श्रद्विहीनास्तु ये जनाः । अभूवन्, खल्ववारुन्धन् अल्लाहवर्त्मनोऽपि च ॥५८॥
व्यरुन्धन् वाग्धरञ्चैव तत्समक्षमुपागते । स्पष्टेऽध्वदर्शने चाऽपि नाऽल्लाहं ते मनागपि ॥५९॥
क्षतिग्रस्तं क्षमाः कर्त्तुं, तत्कृतानि परन्त्वसौ । सर्वथैवावकेशीनि विधास्यत्य(विशंकितम्) ॥६०॥
[३३]श्रद्धरा ये जनास्ते भोः ! दिष्टं यद् वाग्धरस्य तु । अल्लाहस्य च यद् दिष्टं तद् यूयं पालयेत हि ॥६१॥
युष्मत् कृतानि कर्माणि मोघानि नो विधत्त च । [३४]श्रद्विहीनास्तु येऽरुन्धन् अल्लाहवर्त्मनोऽपि च ॥६२॥
प्रमीताश्श्रद्विहीनाश्च तिष्ठन्तस्तान् कदाचन । क्षंस्यते न किलाऽल्लाहः; [३५]तत् तथा मा कृथा यथा ॥६३॥
भवेदुत्साहहानिस्ते सन्धये च समाह्वयेः । जयस्ते निश्चितोऽल्लाहस्सहायस्ते च तिष्ठति ॥६४॥
त्वत् कृतेभ्योऽथ कर्मभ्यो नासौ चेर्षिष्यते पुनः । [३६]कौतुकं केवलं खेला जीवनं भाविकं मतम् ॥६५॥
श्रद्धरास्स्यात चेद् यूयं अथो वृत्रहणः पुनः । फलैः कर्माणि युष्माकं असौ संयोजयिष्यति ॥६६॥
वैभवं किञ्च युष्माकमसौ नैवार्थयिष्यते । [३७]असौ चेदर्थयेत त्वाम् तद्भृशं चार्थयेत वै ॥६७॥

CC-0. In Public Domain. Digitized by eGangotri

संगृह्य स्थापितं तत्वम् (सत्यमेव) विधास्यसि । मनश्चौर्यमसौ चाऽपि तदा ते ख्यापयिष्यति ।।६८।।
[३८]इमे यूयं हि, कथ्यन्ते व्ययीकर्त्तुं तु ये जनाः । मार्गेऽल्लाहस्य, ते तत्र सन्ति युष्मासु केचन ।।६९।।
परिगृह्णन्ति वस्तूनि येऽत्र केवलमात्मना । ते परिग्रहिणस्तावदल्लाहो वर्त्तते न च ।।७०।।
कस्यचित् त्वपि सापेक्षः, परं यूयं तु तिष्ठथ । सर्वथैवाऽत्र सापेक्षाः, यदि यूयं भविष्यथ ।।७१।।
पराङ् आस्यास्ततस्सोऽन्यं स्थानापन्नं विधास्यति । गणं कञ्चन युष्माकं, युष्मादृक्षो न यः पुनः ।।७२।।

योगः—७२

CC-0. In Public Domain. Digitized by eGangotri

४८

सूक्तम्—विजयः

(अल-फत्ह)

(मदहीनाऽवतीर्णाः एकान्नत्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]दत्तोऽस्माभिर्ध्रुवं तुभ्यं विजयस्सुमहानथ । [२]भूतानि किञ्च भव्यानि यथाऽशेषाण्यघानि ते ॥ १ ॥
अल्लाहः क्षमतां तावन् निजौदार्यं पुनस्तथा । पूरयेत् त्वयि, मार्गेण सरलेन नयेदपि ॥ २ ॥
[३]अथो साह्यं तवाल्लाहो दृढं कुर्याच्च पुष्कलम् । [४]स एव हृत्सु यो शान्ति श्रद्धराणामथो न्यधात् ॥ ३ ॥
श्रद्धा भूयो यथा तेषां प्रवर्धतांतरां किल । अल्लाहस्यैव ताश्चम्वो व्योम्नामुर्व्यास्तथैव याः ॥ ४ ॥
अल्लाहस्सततं ज्ञाता तत्वदर्शी च विद्यते । [५]यथा ऽसौ श्रद्धरान् नृंश्च श्रद्धरा योषितोऽपि च ॥ ५ ॥
सुखारामेषु तादृक्षु वेशयेद् यदधः खलु । नद्यो वहन्ति, ते तत्र वसेयुस्सर्वदाऽपि च ॥ ६ ॥
अपाकुर्यात् स तेभ्यश्च तदीयदुष्कृतान्यपि । महत् साफल्यमेतच्च दृष्ट्याऽल्लाहस्य वर्त्तते ॥ ७ ॥
[६]दण्डयेद् दम्भिनो नृंश्च दम्भिनीर्योषितोऽपि च । मूर्त्तिपूजापरान् नृंश्च स्त्रियश्च मूर्त्तिपूजनाः ॥ ८ ॥
अल्लाहविषये येषां किंविचारो हि तिष्ठति । कुचक्रमापतत्येषु, क्रुद्धोऽल्लाहस्तथैव च ॥ ९ ॥
धिक्कृतास्ते कृतास्तेभ्यस्सज्जा दुर्गतिरप्यथ । यात्राऽन्तस्य समुद्देशो ऽरुच्यो घोरस्स वै मतः ॥१०॥
[७]अल्लाहस्यैव ताश्चम्वो व्योम्नामुर्व्यास्तथैव याः । प्रभुत्वाच् छालते ऽल्लाहस्तत्वदर्शी च विद्यते ॥११॥
[८]साक्ष्यदश्चेतकश्चाऽथ शुभवृत्तप्रदः पुनः । कृत्वा सम्प्रेषितो ऽस्माभिर्वर्त्तसे त्वं (मुहम्मद !) ॥१२॥
[९]श्रद्दधाना यथा यूयमल्लाहे तस्य वाग्घरे । चैव स्याताऽथ कुर्यात साह्यं मानममुष्य च ॥१३॥
सन्ध्ययोरुभयोस्तस्य स्तुतिं कुर्यात खल्वथ । [१०]चरन्ति विवहत्वं ये त्वया तद् वस्तुतस्तु ते ॥१४॥
अल्लाहेन समं त्वेव विवहत्वं चरन्ति (भोः !) । तेषां करोपरिष्टाच्च करोऽल्लाहस्य तिष्ठति ॥१५॥
विवहत्वस्य यो भंगं कुरुते, भंगकारणात् । आत्मनस्त्वेव हानिं स कुरुते, योऽपरः परम् ॥१६॥
तत् पिपर्त्ति प्रतिज्ञातमल्लाहेन तु यद् भवेत् । पुरस्कारं महान्तं स तस्मै तस्मात् प्रदास्यति ॥१७॥
[११]ये च यायावराः पश्चात्, त्वां वदिष्यन्ति तेऽथ च । "वयं मुग्धा अतिष्ठाम वैभवस्य तु हेतुना ॥१८॥
हेतुना बान्धवानाञ्च, प्रार्थनां त्वं कुरुष्व तत् । अस्मदर्थे;" जना एते यन्न तद् हृदि तिष्ठति ॥१९॥
व्याहरन्ति हि तद् वाग्भिस्स्वकीयाभिस्त्वमावद । "कस्य का वर्त्तते शक्तिः कर्त्तुमग्रे तु किंचन ॥२०॥
अल्लाहस्य स इच्छेच् चेत् कस्यचिद् हानयेऽथवा । लाभाय कस्यचित्" ? तस्य वेदनो ऽसौ हि तिष्ठति ॥२१॥
अल्लाहस्त्विह सर्वस्य कुरुषे यद् यदत्र वै । [१२]न वै तत्, परमेतद् वै युष्माभिस्त्वभवन्मतम् ॥२२॥
वाग्घरः श्रद्धराश्चैव स्वगृहान् न कदाचन । निर्वर्त्तिता उपेष्यन्ति; रुच्यमेतच्च चिन्तनम् ॥२३॥
अतिष्ठद् हृदयेभ्यो वः, युष्मद् दुर्मतमेव तत् । असारा हि जना यूयं तावदाध्वे त्वशेषतः ॥२४॥
[१३]अल्लाहे च पुनस्तस्य वाग्घरे योऽपि कश्चन । न श्रद्धास्यति वेत्तव्यं कृतः सज्जो हि वर्त्तते ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

अस्माभिश्श्रद्विहीनेभ्यस्सम्यग् धिक्षद् हुताशनः । [१४]अल्लाहस्यैव तद् राज्यं व्योम्नामुर्व्यास्तथैव यत् ॥२६॥
कामतस्स क्षमेताऽपि दण्डयेच्चापि कञ्चन । सदा ऽल्लाहः क्षमाशीलो दयावांश्चापि वर्त्तते ॥२७॥
[१५]"त्वमाहर्त्तुं यदा रायं प्रस्थितश्च भविष्यसि । पृष्ठगास्ते वदिष्यन्ति—"समं नेया वयन्त्वपि" ॥२८॥
कामयन्ते हि ते तत्र कृतं स्यात् परिवर्त्तनम् । अल्लाहनिश्चितं यत्तु; ब्रूहि-नेया न तिष्ठथ ॥२९॥
समं यूयं किला ऽस्माभिस्, तदेतत् तेन पूर्वतः । अल्लाहेन समादिष्टम्; तदा वक्ष्यन्ति ते—"न वै; ॥३०॥
त्वमेवेर्ष्याप्रपूर्णोऽस्मान् समुद्दिश्य तु वर्त्तसे । न वै, ते त्वेव ये लोका ईषज्ज्ञाना भवन्ति ह ॥३१॥
[१६]ब्रूहि त्वं तिष्ठतः पश्चादथो यायावरानिदम् । "यूयं बलोत्कटान् लोकान् युद्धायोक्ता भविष्यथ ॥३२॥
अभियातुं यथाऽऽस्मानं तेऽर्पयन्त्यन्ततः किल । अथाऽऽज्ञापालने तावद् युष्माभिर्विहिते सति ॥३३॥
अल्लाहस्सूत्तमं युष्मान् पुरस्कारं प्रदास्यति । यथापूर्वमथो यूयं पराङ् आस्या भवेत चेत् ॥३४॥
तापयिष्यत्यसौ युष्मान् ददद्घोरां हि यातनाम् । [१७]अचक्षुर्दोषभाङ् नैव, न पंगुर्दोषभाक् तथा, ॥३५॥
दोषभाङ् न रुजार्त्तो ऽपि, दिष्टं यश्चाऽथ मंस्यते । अल्लाहस्य तथा तस्य वाग्घरस्य स तं जनम् ॥३६॥
सुखारामेषु तादृक्षु वेशयिष्यति (निश्चितम्) । निम्नगा यदधस्तात्तु प्रवहन्ति निरन्तरम् ॥३७॥
पराङ् आस्यः परं यस्तु जनस्तस्माद् भविष्यति । दुःखदां कारणां तस्मै स तावत् संप्रदास्यति ॥३८॥
[१८]निश्चितं हर्षितो जातस्तेष्वल्लाहो यदैव ते । श्रद्दधाना अधश्शाल विवहत्वं त्वया समम् ॥३९॥
गतवन्तस्, स चाऽवेद् यत् तेषां चित्तेष्वभूत् स्थितम् । शान्तिमावेशयत् तेषु ततोऽसौ, प्रददौ तथा ॥४०॥
प्राप्यमाणां झटित्येव जयरूपां पुरस्क्रियाम् । [१९]आपतिष्यति ते हस्ते प्रभूतं विजितं धनम् ॥४१॥
प्रभुत्वाच् छालते ऽल्लाहस्तत्वदर्शी च तिष्ठति । [२०]अल्लाहेन प्रतिज्ञातं विपुलं रणवैभवम् ॥४२॥
तुभ्यम्, यत् त्वञ्च लब्धासे; तदिदं तुभ्यमस्ति यद् । दत्तं तदग्रिमं विद्धि; करास् त्वच्चापि वारिताः ॥४३॥
परेषाम्, तदिदञ्चाऽस्माद् यतो लक्ष्म भवेदिदम् । श्रद्धरेभ्यो जनेभ्यो वै, तथा ऽसौ प्रणयेदपि ॥४४॥
सरलेनाऽयनेन त्वाम्; [२१]व्यतिरिक्तञ्च तिष्ठति । इतोऽन्यच्चापि यल्लब्धुं न ते शक्तिस्तु काचन ॥४५॥
अल्लाहस्य तु तद् वश्यं, सर्वसामर्थ्यवान् खलु । वर्त्तते तावदल्लाहः; [२२]श्रद्विहीनाश्च ते यदि ॥४६॥
त्वया युध्यन्तु सार्धं तत् करिष्यन्ति पलायनम् । सहायं नाऽथ लप्स्यन्ते न मित्रं ते च रक्षकम् ॥४७॥
[२३]एषोऽल्लाहविधिर्यस्तु पूर्वकालात् प्रवर्त्तते । नाल्लाहस्य विधौ किञ्च कदाचिच्चापि किञ्चन ॥४८॥
द्रक्ष्यसि जायमानं त्वं परिवर्त्तनमप्यथ । [२४]महाकालप्रदेशे च स एव यस्त्ववारयत् ॥४९॥
तेषां करान् कराभ्यान्ते, तत्करेभ्यश्च ते करौ । कृत्वा वशंवदान् सर्वान्स्त्वदीया (नतिलीलया) ॥५०॥
ईक्षते सर्वमल्लाहो यत्त्वमत्र करोषि हि । [२५]इमे ते त्वेव येऽतिष्ठन् श्रद्विहीनाः, अवारुधन् ॥५१॥
त्वाञ्च धाम्नस्सुपूजायाः, कृतरोधास्तथाऽभवन् । उद्दिष्टास्पदमागन्तुं स्थितानां बलिदेहिनाम् ॥५२॥
यदीदं नाऽभविष्यच्च यत्तत्र बहवस्स्थिताः । श्रद्दधाना नराः किञ्च श्रद्धरा योषितस्तथा ॥५३॥
अविज्ञातास्त्वया ये हि, खल्वज्ञानात् त्वमेव तान् । अगाहिष्यत पद्भ्यां वै, तच्चादुःखाकरिष्यत ॥५४॥
अन्तरं तव, सोऽल्लाहस्साम्प्रतं वेशयिष्यति । दयायामात्मनीनायां तं हि यं कामयिष्यते ॥५५॥
अवत्स्यंस्तत्र ते यत्तु पार्थक्येन कदाचन । तेषु श्रद्धाविहीनेभ्यः प्रादास्याम वयं पुनः ॥५६॥
कृच्छ्रदां कारणां घोराम्; [२६]स्वस्वान्तेषु यदाऽथ च । उत्कटामति विश्रद्धा उग्रतां संन्यवेशयन् ॥५७॥
तमोऽज्ञानस्य पक्षीयामल्लाहस्तदनन्तरम् । श्रद्धरेषु हि लोकेषु विशिष्टां शान्तिमात्मनः ॥५८॥
वाग्घरेऽप्यात्मनीने च किलाऽवातारयत्तथा । आत्मसंयमबुद्धिञ्च दृढां तेष्वकरोत् पुनः ॥५९॥
अर्हताऽस्थादमुष्यैषु साधिकारत्वमेव च । तस्य तस्य यदप्यत्र ज्ञाताऽल्लाहश्च तिष्ठति ॥६०॥
[२७]वाग्घरस्यात्मनीनस्य स्वप्नसन्दर्शनं ध्रुवम् । सत्यं चकार सोऽल्लाहो धियोपेतं यदाऽऽस्त वै ॥६१॥
त्वं प्रवेक्ष्यसि पूजाया ध्रुवं धामाऽविगर्हितम् । अल्लाहस्य तथेष्टं चेत्, निर्विशंकं विनाभयम् ॥६२॥
मूर्धजैर्मुण्डितैश्छिन्नैरथेदं घटितं हि यत् । अजानात् स, न यत् त्वन्तु किलाजानाः कथञ्चन ॥६३॥
व्यतिरिच्य च तत् तस्मायसौ प्रादात् तथा पुनः । प्राप्यमाणां झटित्येव जयरूपां पुरस्क्रियाम् ॥६४॥
[२८]स एव चात्मनीनं यः प्रैषयत् खलु वाग्घरम् । समं सत्येन धर्मेण वर्त्मनो दर्शनेन च ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

प्रभुत्वं दापयेत् तावद् धर्मेऽशेषे स तं यथा । अल्लाहस्य तु यत् साक्ष्यं तदेव सुमहत् स्वतः ॥६६॥
[२९]अल्लाहवाग्घरस्तावद् वर्त्ततेऽयं मुहम्मदः । येऽनुगास्तस्य ते तीक्ष्णाश्श्रद्विहीनेषु सन्ति वै ॥६७॥
सम्भृता दयया सन्ति ते परन्तु परस्परम् । द्रक्ष्यसि त्वञ्च तान् यातान् प्रह्वीभावं तथैव च ॥६८॥
प्रणिपातपरान् लिप्सून् प्रसादस्य पुनस्तथा । अल्लाहानुग्रहस्यापि, प्रभावः प्रणिपातजः ॥६९॥
वक्त्रेषु विशदस्तेषां परिचयाय कल्पते । अमीषां चित्रमीदृक्षं तौराते, चित्रमीदृशम् ॥७०॥
तेषामिञ्जीलमध्येऽथ—धान्यं किञ्चिद् भवेद् यथा । उद्भिन्नमंकुरं येन, पोषितं पीनतां गतम् ॥७१॥
काण्डे स्थायि दृढं पश्चाद् हृदयावर्जकं भवेत् । कृषकाणां, यथा तेन हृदयानि हि सन्दहेत् ॥७२॥
जनानां श्रद्विहीनानां, श्रद्धरास्सुकृश्च ये । अल्लाहेन समं तैस्तु प्रतिज्ञातं हि वर्त्तते ॥७३॥
महान्तं ते पुरस्कारं लप्स्यन्तेऽथ क्षमामपि ।

योगः—७३॥

४९

सूक्तम्–रहो वेश्मानि

(अल हुजूरात)

(महाकालेऽवतीर्णा अष्टादशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]श्रद्धरा हे जनाः ! यूयं कदाचिन्नाग्रयायिनः । अल्लाहवाग्घराभ्यान्तु तिष्ठत, प्रबिभीत च ॥ १ ॥
अल्लाहात्, निश्चितं श्रोता ऽल्लाहो ज्ञाता च वर्त्तते । [२]श्रद्धरा हे जनाः ! यूयं स्वं जनं न कदाचन ॥ २ ॥
उच्चैस्तरां विदध्यात स्वनाद् देवस्य सर्वथा । नाऽथ संलप्यतां तेन युष्माभिस्त्यक्तसंभ्रमम् ॥ ३ ॥
अन्योन्येन समं यद् वल् लप्यते, मोघमेव तु । कदाचितन्न यायाद् वः कृतमत्र त्वजानताम् ॥ ४ ॥
[३]अल्लाहवाग्घरस्याग्रे ये जना मन्दितस्वनाः । तिष्ठन्ति ते तु ते येषामल्लाहेन कृतानि वै ॥ ५ ॥
हृदयानि प्रसिद्धानि युक्तभावाय सर्वशः । पुरस्कारो महांस्तेभ्यः क्षमादानञ्च तिष्ठति ॥ ६ ॥
[४]ये रहोवेश्मनां पश्चात् त्वामिहाकारयन्ति च । अनेके न धिया युक्तास्तेषां तिष्ठन्ति मानवाः ॥ ७ ॥
[५]प्रत्यैक्षन्त बहिः शान्त्या निर्गमं ते तु ते यदि । भद्रकार्यभविष्यत् तत् तेभ्यस्सत्यं परं खलु ॥ ८ ॥
क्षमाशीलः किलाऽल्लाहो दयावानपि वर्त्तते । [६]श्रद्दधाना अये लोकाः ! सावज्ञः कोऽपि चेज्जनः ॥ ९ ॥
किञ्चिद्वृत्तमुपादाय यदा युष्मानुपैति (भोः !) । सम्यक् परीक्ष्यतां तद्धि, कृतस्य नानुशोचनम् ॥१०॥
स्यान्मुधा दण्डनात्तावद् गणस्य कस्यचित्तु वः । [७]बोधत किञ्च युष्मासु विद्यमानो हि तिष्ठति ॥११॥
अल्लाहवाग्घरस्तावत्, अन्वयास्यदसौ यदि । बहुष्वर्थेषु युष्मांस्तद् यूयमेवाऽपतिष्यत ॥१२॥
संकटेषु, परं श्रद्धामल्लाहो वः प्रियां व्यधात् । युष्मद् हृत्सु तथा चैनां व्यधादेकरसां पुनः ॥१३॥
पापाचारमवज्ञाञ्च विश्वासहानिमेव च । युष्मभ्यमकृताऽनिष्टामिमे त्वेव हि ये जनाः ॥१४॥
ऋजुमार्गाऽनुयातारः; [८]औदार्यञ्च कृपाऽपि च । अल्लाहादेव तत् सर्वमल्लाहो ज्ञस्सुधीस्तथा ॥१५॥
[९]उद्भवेद् गणयोर्मध्ये श्रद्धराणां कलिर्यदि । सन्धिः परस्परं कार्यस्तयोस्तेनाऽपि चेत् पुनः ॥१६॥
सात्याचारो भवेदेकः परस्मिंस्तेन तत् समम् । त्वया योद्धव्यमेवाऽस्ति तावद् यावद् भवेदसौ ॥१७॥
अल्लाहशासनाधीनः पुनस्, तस्मिंस्तथागते । सन्धिः परस्परं कार्यः पुनरपि तयोस्त्वया ॥१८॥
न्यायाचारेण किञ्चैव वर्त्तनीयम्, सुनिश्चितम् । सहार्दस्तावदल्लाहो न्यायाचारेषु तिष्ठति ॥१९॥
[१०]भ्रातरस्त्वत्र तिष्ठन्ति श्रद्दधानाः परस्परम् । कारयाऽतो द्वयोर्भ्रात्रोर्मध्ये सन्धिं कलौ स्थिते ॥२०॥
अल्लाहाच्च विभेहि त्वं भवेर्यद् दयितस्ततः । [११]श्रद्धरा हे ! गणः कश्चिन्माऽपहसेद् गणान्तरम् ॥२१॥
कामं भवेद् वरीयान्सः, योषितोऽन्याश्च योषितः । नाऽपि, कामं भवेयुस्तास्ताभ्यस्तावद् वराः क्वचित् ॥२२॥
लाञ्छितानात्मनीनांश्च विधत्त न (कदाचन) । कृत्वा सोपाधि कञ्चिच्च नाह्वयाथ परस्परम् ॥२३॥
श्रद्धाऽऽधानात् परं स्वस्मिन् नामतश्चापि कीर्त्तनम् । पापाचारस्य खल्वत्र जघन्यं भवति (ध्रुवम्) ॥२४॥
जायते चावशो यस्तु दुष्टाचारास्तु तद्विधाः । [१२]श्रद्धराः ! अतिसन्देहात् त्रायध्वं यूयमात्मनः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

सन्देहो दोषतामेति निःसंदेहं हि कश्चन । गुप्ताऽनुवीक्षणत्वञ्च कुद्ध्वं मैव, न वाऽप्यथ ॥२६॥
कश्चिद् युष्मासु पैशुन्यमाचरेत् कस्यचित् पुनः । युष्मासु पललं कोऽपि मृतस्य भ्रातुरात्मनः ॥२७॥
जिघत्सिष्यति किं तावत् ? प्रतीष्टं नेदमस्ति वः । बिभीत च (प्रभोः) यूयं, अल्लाहस्सदयोऽथ च ॥२८॥
पश्चात्तापोररीकर्त्ता विद्यते खल्वसंशयम् । [१३]हे जनाः ! यूयमस्माभिस्सृष्टास्स्त्रीपुंसलक्षणाः ॥२९॥
राष्ट्रवंशविभागश्च कृतस्तावदभूत् पुनः । शक्नुयात यथाऽन्योन्यं परिचेतुं मिथः खलु ॥३०॥
अल्लाहेन मतो भद्रस्सर्वेषान्तु स एव यः । कर्त्तव्यबुद्धिरस्त्यत्र सर्वानप्यतियाय वै ॥३१॥
अल्लाहो वर्त्तते ज्ञाता सावधानस्तथैव च । [१४]"यायावरा वदन्तीत्थम्—जातास्स्मश्श्रद्धरा वयम्"॥३२॥
ब्रूहि—"यूयं न वै जाताश्श्रद्धराः वक्त हीदृशम्" । "वयमात्मार्पणा जाताः", अद्य यावन्न हृत्सु वः ॥३३॥
प्रविष्टा त्वभवच्छ्रद्धा, यूयं चेत् पालयिष्यथ । अल्लाहोक्तममुष्याऽथ वाग्घरेण तथैव च ॥३४॥
कर्मणां कञ्चिदप्यंशं नासौ कृत्तं करिष्यति । दयावान्त्स किला ऽल्लाहः क्षमावान् पुनरेव च ॥३५॥
[१५]वाग्घरेऽस्य तथा ऽल्लाहे श्रद्दधानास्तु ये जनाः । त एव श्रद्दधाना वै, सन्दिह्यन्ते पुनश्च नो ॥३६॥
प्राणान् त्स्वीयान् वसूंश्चैव ये वाऽप्यल्लाहवर्त्मनि । अर्पयन्ति त एवाऽत्र विश्वस्ता मानवा मताः ॥३७॥
[१६]ब्रूहि—युष्माभिरल्लाहः क्रियतेऽत्राप्तसंस्तवः । किं मतेनाऽत्मनीनेन, वेत्त्यल्लाहस्तु तत्र यद् ॥३८॥
आकाशेषु भवत्युर्व्यां तथैव यच्च तिष्ठति । वेत्ता ऽल्लाहो हि सर्वस्य वस्तुनो वर्त्तते (ध्रुवम्) ॥३९॥
[१७]त्वामिदं दर्शयन्तीमे—कृतोऽस्माभिरनुग्रहः । त्वयि त्वात्मार्पणत्वेन (ह्यल्लाहे) ब्रूहि (तानिदम्) ॥४०॥
आत्मार्पणत्वरूपेण कुद्ध्वं मां मैव भारितम् । अनुग्रहेण (भोः !) यूयं, तस्यैव विपरीततः ॥४१॥
युष्मास्वनुग्रहस्तावदल्लाहस्य हि तिष्ठति । श्रद्धाऽध्वानमसौ युष्मान् यद् यथार्थमदर्शयत् ॥४२॥
(वचस्युक्ते निजे यूयम्) यदि सत्यास्तु तिष्ठथ । [१८]आकाशेषु धरित्र्याञ्च यद् रहो वर्त्ति तत्समम् ॥४३॥
वेत्त्यल्लाहो ध्रुवम्, द्रष्टा ऽल्लाहो यत्तत् कृतञ्च वः ।

योगः—४३॥

CC-0. In Public Domain. Digitized by eGangotri

५०

सूक्तम्—क़ाफ़

(महाकालेऽवतीर्णाः पञ्च चत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

• [१]क़ाफ़० मह्यकुराणेन शपे; [२]नो तत् तु, इमे जनाः । अत्राश्चर्यपरा एतान् यदुपैतेषु कश्चन ॥ १ ॥
चेतकः, श्रद्विहीनाश्च वदन्त्याश्चर्यकृन्महत् । तिष्ठतीदम्; [३]प्रयास्यामो वयमन्तं यदाऽथ च ॥ २ ॥
एकरूपा भविष्यामो मृदासार्धम्, तदा नु किम् ? । सुगमा दृश्यते नैव प्रत्यावृत्तिः कथञ्चन ॥ ३ ॥
[४]वयं विद्मश्च यत्तेभ्यो धरित्र्या ह्यपसार्यते । लेखाङ्कं पुस्तकं पार्श्वे किला ऽस्माकञ्च तिष्ठति ॥ ४ ॥
[५]न्यषेधंस्ते परं सत्यं तानुपैत् तद् यदैव तु । इदानीन्ते च तिष्ठन्ति किंकर्त्तव्यविचेतसः ॥ ५ ॥
[६]ऊर्ध्वमेषाममीभिः किं दृष्टं व्योम न वर्त्तते । तस्यास्माभिः कृता सृष्टिः किंवत् किंवच्च भूषितम् ॥ ६ ॥
विद्यते न त्रुटिस्तस्मिन् काऽपि कुत्रचनाऽपि च । [७]धराञ्चाप्रथयामाऽस्यामवेशयाम पर्वतान् ॥ ७ ॥
रम्यं सर्वविधोद्भिज्जं तस्यामारोहयाम च । [८]अक्ष्युन्मीलनकं तद् वै सर्वस्य स्मारणं तथा ॥ ८ ॥
बन्धको योऽपि कोऽपि स्यात् प्रवृत्तो ह्यभि (तं) जनः । [९]व्योम्नस्सौभाग्यवद् वारि चास्माभिः प्रहितं, पुनः ॥ ९ ॥
उद्यानानि तथान्नानि कृष्याण्युद्भावितानि च । [१०]प्रांशुखर्जूरवृक्षाश्च ग्रथिता गुच्छकैस्समम् ॥१०॥
[११]बन्धकेभ्यश्च संभारो वृत्तये—जीविता ततः । मृतोर्वी चाऽमुनाऽस्माभि, रुद्धारोऽपीत्थमेव तु ॥११॥
[१२]न्यषेधन् प्राक् ततश्चाऽपि बान्धवा नहुषस्य वै । समुद्गा अर—रासाश्च; [१३]लूतस्य वान्धवास्तथा ॥१२॥
आदाश्च प्रिययौनश्च; [१४]विपिनाऽऽवासिनः पुनः । तुवंरुवान्धवाश्चैव न्यषेधन्त्सर्वे एव तु ॥१३॥
वाग्घरान्, भर्त्सनाऽतो मे फलितैवाऽभवद् (ध्रुवम्) । [१५]असामर्थ्यमतिष्ठत् किं पूर्वसर्गविधौ तु नः ? ॥१४॥
नवसर्गविधावेते संशेरते ततोऽपि तु । [१६]सृष्टोऽस्माभिर्मनुष्यो, ऽथ वयं विद्मोऽस्य मानसे ॥१५॥
उद्भवन्ति विचाराः के, नेदस्त्वं तेन चाऽधिकम् । कण्ठनाड्या अपि त्वस्य खल्वस्माकं हि तिष्ठति ॥१६॥
[१७]समाहर्तृद्वयं किञ्च वामेन दक्षिणेन (तम्) । प्रवृत्तं हि समाहर्त्तु विद्यते; [१८]स यदैव च ॥१७॥
वक्ति किंचित् तदैवैकस्सज्जस्तिष्ठति पार्श्वगः । [१९]यातना चैव सत्येनोपैति मृत्योः, इदं हि तत् ॥१८॥
अतिष्ठद् विषये यस्य कातर्यन्ते (चिराद् ध्रुवम्) । [२०]शंखश्चाभूत्तथाऽऽध्मातः, स एवाऽयञ्च वासरः ॥१९॥
भर्त्सिता विषये यस्य यूयं तावदतिष्ठत । [२१]प्रणेत्रैकेन चैकेन साक्षिणा संगतः पुनः ॥२०॥
जीवस्सर्वोऽभ्युपायाति; [२२]त्वमुपेक्षां समाश्रितः । अतिष्ठो विषयेऽमुष्य, तदस्माभिरपाकृतम् ॥२१॥
अधुनाऽऽवरणं त्वत्तः, येन जाताऽस्ति साम्प्रतम् । पर्यन्तगामिनी दृक् ते; [२३]पार्श्वगस्तस्य चाऽवदत् ॥२२॥
"यन्मे पार्श्वेऽस्ति तत् सर्वमेतदत्रास्त्युपस्थितम्" । [२४](उच्यते तावदेतच्च) नारके क्षिप्यतां पुनः ॥२३॥
कृतघ्नस्सर्व एवाऽपि द्वेषकृद् यश्च वर्त्तते । [२५]विहन्ता यश्च भद्रस्य संशयापन्न एव च ॥२४॥
मर्यादातिक्रमाद् वर्त्ती; [२६]कारणायाञ्च पात्यताम् । प्रतीष्टोऽन्यः कृतो येन त्वल्लाहं व्यतिरिच्य हि ॥२५॥
[२७]प्राह पार्श्वचरस्तस्य—"प्रभोऽस्माकं ! मया तु नो । कृतोऽयमुद्धतो दर्पात्, अतिष्ठत् स्वत एव तु ॥२६॥
प्रथमो भ्रष्टमार्गाणामयन्तावद् (ध्रुवं) जनः" । [२८]स आह—सम्मुखं मैव मम वादिष्ट (साम्प्रतम्) ॥२७॥

CC-0. In Public Domain. Digitized by eGangotri

मया युष्मभ्यमस्त्येव भर्त्सना विहिता चिरात् । [२९]सकृदुक्तस्य नैवाऽत्र विरुद्धाचरणं भवेत् ।।२८।।
वन्धकेषु न चैवाऽहं सात्याचारः कदाचन । [३०]दिनं चैतत्तु तद् यस्मिन् प्रक्ष्यामो नारकं वयम् ।।२९।।
"पूर्णतां यातवांस्त्वं किम् ?" ततोऽसौ प्रतिवक्ष्यति । 'अन्यदप्यस्ति किं किञ्चित् ?' [३१]सुखारामाकृता अथो ।।३०।।
कर्त्तव्यमनसां पार्श्वे, विप्रकृष्टा न सर्वथा । [३२]इदं तच्च प्रतिज्ञातं युष्माकमास्त यत् पुरा ।।३१।।
प्रवृत्तायाऽभि (तं), तस्मै यश्च कर्त्तव्य पालकः । [३३]उपांशु चाऽपि यस्त्रस्तस्तस्मात्तावद् दयावतः ।।३२।।
(तम) भि च प्रवृत्तेन समुपैद् हृदयेन यः । [३४]प्रवेशः क्रियतां तत्र, शान्त्या किञ्चाऽपि गम्यताम् ।।३३।।
अमृतं दिनमेतद्धि; [३५]तत्तत् सर्वमिह स्थितम् । यद् यदिच्छन्ति खल्वेते, ततोऽपि चाधिकं पुनः ।।३४।।
अध्यस्मद् वर्त्तते तावत्; [३६]ततः प्राक्च विनाशिताः । वंश्यास्तावदनेके ते ये स्थिता बलवत्तराः ।।३५।।
समांक्रान्ता पुनर्यैर्भूरखिलाऽपि समन्ततः । किन्नु लब्धं क्वचित् किंचित् शरणं तैः (महाबलैः) ।।३६।।
[३७]अनुस्मारकमस्त्यत्र निश्चितं तत्कृते हि यः । सहृत् स्यादवदध्याद् वा श्रवाभ्यां ध्यानपूर्वकम् ।।३७।।
[३८]षट्स्वहस्स्वसृजामाऽथ वयं व्योमान्यसंशयम् । धरित्रीं यच्च तन्मध्ये, श्रान्ता नो चाऽपि किञ्चन ।।३८।।
[३९]तस्मिन् संतोषमाधेहि तद् यत्तावद् ब्रुवन्ति ते । उदयास्तमयाभ्याञ्च प्राग् रवेः गुणकीर्त्तनैः ।।३९।।
शंसत स्वं प्रभुं (नित्यम्); [४०]यामिनीषु तथैव च । शंसत तम्, पुनः किञ्च प्रणिपातोर्ध्वमप्यथ ।।४०।।
[४१]दत्तकर्णा दिने तस्मिन्नाह्वाताऽऽह्वास्यते यदा । तिष्ठत पार्श्वतो; [४२]यस्मिन् दिने श्रोष्यन्ति ते जनाः ।।४१।।
सत्यसम्भृतमाक्रोशं, वहिर्यानदिनं त्विदम् । [४३]प्रदद्मो जीवनं दद्मो वयमेवात्ययं पुनः ।।४२।।
प्रत्यावृत्योपगन्तव्या वयमेव तथा स्थिताः । [४४]धरा विस्फुटिता यस्मिन् दिने (किञ्च) भविष्यति ।।४३।।
सत्वरं निर्गमिष्यन्ति ते च, सम्पातनं त्विदम् । (जीवयित्वा पुनर्लोकान्) अस्मदर्थे सुगं किल ।।४४।।
[४५]यत्ते ब्रुवन्ति तद् विद्मो वयम्, नैवोपपद्यते । त्वयीदं विवशान् कुर्या यत्तांस्त्वञ्च कथञ्चन ।।४५।।
चेतयाऽविरतं त्वन्तु कुराणेन हि तं जनम् । मन्यते घोषितायाा मे कारणाया भयन्तु यः ।।४६।।

योगः—४६

CC-0. In Public Domain. Digitized by eGangotri

५१

सूक्तम्–जारवाताः

(अ्रज़ ज़ारियात)

(महाकालेऽवतीर्णाष् षष्टिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शपे तै जारिणै (वर्तिः); [२]ततो भारं वहन्ति ये । [३]वान्ति पश्चाच्च सौख्येन; [४]वितरन्ति तथा पुनः ॥ १ ॥
दयास्तावन् नियोगेन; [५]सत्यमेवाविशंकितम् । समं युष्माभिरस्तीह प्रतिज्ञातन्तु यत् किल ॥ २ ॥
[६]कर्मणाञ्च फलावाप्ति र्भविष्यत्येव निश्चितम् । [७]शपे व्योम्ना प्रपूर्णेन भंगैर्वहुविधैरथ ॥ ३ ॥
[८]अर्थहीने रता यूयं सत्यं वादे तु तिष्ठथ । [९]विरुद्धमतिकस्त्वेव परावर्त्यो भवेदतः ॥ ४ ॥
[१०]ऊहारूढा विनश्यन्तु; [११]मग्नास्तिष्ठन्त्यथो च ये । प्रमादे; [१२]ते हि पृच्छन्ति—कदाऽहस्तदुपैष्यति ॥ ५ ॥
निर्णयस्तु यदा भावी ? [१३]यदा वह्नाविमे जनाः । भविष्यन्ति किलाऽऽतप्ताः; [१४](वक्ष्यन्तेऽथ पुनश्च ते)॥ ६ ॥
पथभ्रंशस्य युष्माभिस्स्वाद्यतां खल्वयं रसः । इदं तच् छीघ्रता यस्मै युष्माभिस्तु कृताऽभवत् ॥ ७ ॥
[१५]कर्त्तव्यबुद्धयो येऽत्र ते भविष्यन्त्यसंशयम् । सुखारामेषु किञ्चैव (जलस्रोतोऽन्तरेषु च) ॥ ८ ॥
[१६]तेषां यत् प्रभुणा दत्तं तिष्ठन्त्याददतश्च तत् । अतिष्ठन् पूर्वमस्मात्ते (जीवने) भद्रकारिणः ॥ ९ ॥
[१७]मितशयाः क्षपास्वासन्; [१८]उषस्सु च क्षमार्थनाः । [१९]वैभवेषु पुनस्तेषां अंशभाजस्त आसत ॥१०॥
याचका येऽप्यपेक्षन्त ये च भागं विदूरतः । [२०]तेभ्यो लक्ष्माणि चैवोर्व्यां येऽत्र विश्वासकारिणः ॥११॥
[२१]अन्तरे किञ्च युष्माकम्; वुध्यध्वे नो ततोऽपि किम्? । [२२]युष्मद् वृत्तिस्तथाकाशे विद्यतेऽन्यदथाऽपि तत् ॥१२॥
युष्मदग्रे प्रतिज्ञातं यत्तु; [२३]तत् प्रभुणा शपे । व्योम्नश्चैव धरित्र्याश्च,—सत्यमेतच्च वर्त्तते ॥१३॥
यूयं यद्वद्धि भाषध्वे; [२४]कथा त्वां समुपैच्च किम् । अब्रह्मस्य तु मान्यानामतिथीनां (कदाचन) ? ॥१४॥
[२५]यदा ते तमुपायंस्तु त आहुः—'शम्,' स चाह—'शम्' । अविज्ञातास्त्विमे मर्त्याः; [२६]शनैः पश्चादयादसौ ॥१५॥
गृह्यकान्त्स्वानुपानैषीद् वत्समेकञ्च पीवरम् । [२७]कृत्वा तदग्रतस्तञ्च तानवोचत्—इमं न किम् ॥१६॥
भवन्तस्तावदत्स्यन्ति ?; [२८]सोऽवेत् तेभ्यः परं भयम् । तेऽवदन्—"न बिभीहि त्वम्"; वालस्यैकस्य धीमतः ॥१७॥
प्रायच्छंस्ते शुभं वृत्तम् तस्मै किञ्चैव (जन्मनः) । [२९]साश्चर्या तस्य भार्याऽभूत्(कराभ्याञ्च)कृतं तया ॥१८॥
वक्त्रस्य ताडनं स्वस्य (तथेत्थं) समुवाच च । नारी बन्ध्या च वृद्धा च (शिशुं केन प्रसोष्यति)? ॥१९॥
[३०]तेऽवदन्—"ते प्रभुस्तावदित्थमेवोक्तवान् खलु । वर्त्तते तत्वदर्शी स ध्रुवं ज्ञाता च वर्त्तते" ॥२०॥
[३१]प्रेषिताः केन दौत्येन यूयं दूतास् ! स आह च ।

इति षड्विंशं पारायणम्

अथ सप्तविंशं पारायणम्

[३२]तेऽवदन्—वयमुद्दिश्य गणैकं प्रैषिताः किल ॥२१॥
तिष्ठति सापराधो यः; [३३]क्षिपेम तेषु यद् वयम् । दृषत् खण्डान्; [३४]प्रभोस्ते ये तिष्ठन्त्यारात् सुचिह्निताः ॥२२॥

CC-0. In Public Domain. Digitized by eGangotri

तेभ्यस्तावज्जनेभ्यो ये मर्यादाया विलंघिनः । श्रद्धरास्तत्र ये त्वासन् अस्माभिस्तेऽन्यतः कृताः ॥२३॥
[३६]अलभामहि तत्रैकं केवलञ्च वयं गृहम् । यदासीत्तत्र वै तेषां ये भवन्त्यात्मनोऽर्पणाः ॥२४॥
[३७]तत्राऽस्माभिरभूत् त्यक्तं लक्ष्म किञ्चैकमप्यथ । सभया घोरकष्टाद् ये जनास्तेभ्योऽति दुःखदात् ॥२५॥
[३८]वृत्ते किं चैव मूषस्य, प्रमाणैर्विशदैस्समम् । अस्माभिः प्रेषितोऽभूत् स प्रिययौनं यदा प्रति ॥२६॥
[३९]मानोद्रिक्तस्स वै जातस्तेन चाहा—"ऽस्तिकश्चन । उन्मादपरीतो वा जनो मायाव्यथापि वा" ॥२७॥
[४०]निगृहीतस्ततो ऽस्माभिस्सोऽस्य चम्वस्तथैव च । क्षिप्ता अब्धौ च ते सर्वे; गर्ह्यस्सत्यमभूदसौ ॥२८॥
[४१]आदानामथ वृत्तेऽपि, प्रेषिता अभवन् यदा । वात्या हि जारणास्तेषु किलाऽस्माभिः क्षयावहाः ॥२९॥
[४२]यस्य यस्योपरिष्टाच्च ता अवुस्तत्तदेव तु । कृतं चूर्णविशेषं हि ताभिस्तावद (संशयम्) ॥३०॥
[४३]समुद्गानाञ्च वृत्तान्ते (लक्ष्म सन्तिष्ठते पुनः) । यदौच्यन्त च ते—"नाम स्तोकाय समयाय हि ॥३१॥
विलासेष्वारमध्वं (भोः !); [४४]नियोगोऽवमतश्च तैः । स्वप्रभोः परमालम्ब्य धार्ष्ट्यम्, ते चाप्यनन्तरम् ॥३२॥
निग्रहीता अभूवन् वै तडिद्ग्राहेण, चाऽवशाः । शून्यदृशो व्यलोकन्त; [४५]रक्षितुं नाप्यशक्नुवन् ॥३३॥
आत्मानं, न तथा स्थित्यामात्मना स्थातुमेव वा । [४६]इतः प्राग् नाहुषाश्चापि ! मर्यादोश्लंघिनो हि ते ॥३४॥
[४७]दाढ्र्येण रचितं व्योम किञ्चास्माभिर्वयन्त्वति । साम्यवृत्तिधराः; [४८]क्षोणिश्चाप्यस्माभिः प्रसारिता ॥३५॥
भवामोऽवर्णनीया हि वयं तूच्चैः प्रसारकाः । [४९]वस्तुमात्रं पुनस्सृष्टमस्माभिर्द्वन्द्वरूपतः ॥३६॥
ऊहापोहो भवेद् येन युष्मदन्तः कृतक्रमः । [५०]अभ्यल्लाहं पुनर्यूयं गतिमन्तो भवेत तत् ॥३७॥
युष्मभ्यं तत एवाऽस्मि प्रत्यक्षं चेतको ध्रुवम् । [५१]प्रतीष्टं कुरुताऽन्यञ्च नाल्लाहेन समं परम् ॥३८॥
युष्मभ्यं तत एवाऽस्मि प्रत्यक्षं चेतको ध्रुवम् । [५२]इत्थमेव पुरा योऽपि त्वेभ्योऽयाद् वाग्घरो जनान् ॥३९॥
इदमेव व्यलोचन्त ते—"स मायाव्यथापि वा । उन्मादपरीतो वा वर्त्तते कोऽपि पूरुषः" ॥४०॥
[५३]कृतं तैः किन्वमुष्याऽस्ति प्रापणं हि परात् परम् ? । न वै, तावदिमे मर्त्या दर्पाविष्टा भवन्ति ह ॥४१॥
[५४]तत् त्यजैतान् न दोषार्हस्त्वं किला (त्र) कथञ्चन । [५५]असकृच्चेतयामूंश्च, चेतनं भवति ध्रुवम् ॥४२॥
जनेभ्यश्श्रद् दधानेभ्यस् (सदा) कल्याणकृत् किल । [५६]मां स्तुवीरन् यथा तेन हेतुना केवलेन च ॥४३॥
सृष्टा जिन्ना मया तावत् सृष्टाः किंचापि मानुषाः । [५७]वृत्तेस्तेभ्यो न मेऽपेक्षा, न मेऽपेक्षा च तिष्ठति ॥४४॥
भोजयेयुर्हि यत्ते माम्; [५८]वृत्तिदोऽल्लाह एव सः । स चैवाऽभंगया शक्त्या सुमहत्या विराजते ॥४५॥
[५९]प्राग्भूभ्यो यद्वदेतेषां तथैवैभ्योऽपि वर्त्तते । मानुषेभ्यस्तु जाल्मेभ्योऽमत्रमेकं, ततो न ते ॥४६॥
शीघ्रायन्तां (किलैतस्मिन्); [६०]दिने तस्मिन्नुपागते । यत् प्रतिज्ञातमेभ्योऽस्ति क्षयस्तेभ्यो हि वर्त्तते ॥४७॥
य एते (मानवा) अत्र श्रद्विहीनाः किलासते ।

योगः—४७॥

CC-0. In Public Domain. Digitized by eGangotri

५२

सूक्तम्–पर्वतः

(अ्रत–तूर)

(महाकालेऽवतीर्णा एकान्नपञ्चाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]पर्वतेन शपे; [2]लेखैर्युक्तेन पुस्तकेन च । [3]पलाशे विशदे रम्ये; [4]दत्तावासगृहेण च ॥ १ ॥
[5]पटलेनोन्नतेनाऽपि; [6]किञ्चोद्यातेन सिन्धुना । [7]प्रभोस्ते यातनाऽवश्यमापतिष्यत्यसंशयम् ॥ २ ॥
[8]व्याक्षेप्तुं ताञ्च नैवेष्टे मानवोऽत्र तु कश्चन । [9]व्योम यस्मिन् दिनेऽत्यर्थं कम्पमानं भविष्यति ॥ ३ ॥
[10]पर्वता गतिमन्तश्च [11]नाश एवाऽस्त्यसंशयम् । दिने तस्मिन् अमीषान्तु ये निषेधपरास् स्थिताः ॥ ४ ॥
[12]येऽप्यनर्थेषु तर्केषु रारमन्ते सदैव च । [13]आहृत्याहृत्य नेष्यन्ते नारकाग्निं यदा च ते ॥ ५ ॥
[14]स एवाऽयं भवत्यग्निर्युष्माभिः खण्डितः पुरा । [15]किमेषा काऽपि माया? वः परं बुद्धेरथाऽपि वा ? ॥ ६ ॥
[16]इदानीं दह्यतामस्मिन्, सन्तोषो वाऽन्यथाऽपि वा । साम्प्रतं तत्समं त्वेव युष्मभ्यमुभयं किल ॥ ७ ॥
यादृशं चेष्टितं तावत् पुरस्कारोऽपि तादृशः । वर्त्तते खलु युष्मभ्यम्; [17]मन्वते ये परं भयम् ॥ ८ ॥
अल्लाहात् ते त्वसन्दिग्धम् सप्रमोदाः, वसन्ति च । सुखारामेषु; [18]यच्चापि तेभ्यो दत्तं हि तिष्ठति ॥ ९ ॥
तदीयप्रभुणा तेन सानन्दाश्च भवन्ति ते । तदीयप्रभुणा ते च यातनाऽग्नेस्सुधिक्षतः ॥१०॥
रक्षिता अपि तिष्ठन्ति; [19](ते चोच्यन्ते पुनस्तथा) । तत्पुरस्काररूपेण युष्माभिर्यत् कृतं पुरा ॥११॥
पिवताश्नीत (भोः!) यूयं मोदमाना हि (साम्प्रतम्) । [20]उपधानाश्रया एते सपंक्ति पटलान् श्रिताः ॥१२॥
व्यूढा नारीभिरस्माभिस्संयुताभिश्च शोभया । हृदयावर्जकैर्नेत्रैर्मण्डिताभिस्तथाऽऽयतैः ॥१३॥
[21]श्रद्धरा ये तथाऽभूवन् श्रद्दधाना च सन्ततिः । जाता ह्यनुव्रता येषां कारिताऽस्माभिरप्यथ ॥१४॥
संगतिस्तत् समं तेषां वञ्चिता न कथञ्चन । कर्मभ्यस्तत्कृतेभ्यश्च तेऽस्माभिः, कर्मभिः स्वकैः ॥१५॥
बद्धस्तिष्ठति सर्वश्च; [22]तेभ्यो दत्तं हि तिष्ठति । फलं मांसं तदिष्टं यत् (प्राज्य) मस्माभि (रेव च) ॥१६॥
[23]अन्योन्यस्मादमत्राणि तत्र ते च परस्परम् । संभ्रमाददानाश्च भवन्ति, न च दृश्यते ॥१७॥
तत्राऽशालीनता काचिद् हीनबुद्धिरथाऽपि वा । [24]सेवका वालकास्तेषां यान्त्यपायान्ति संततम् ॥१८॥
तांश्च, ते शोभमानाश्च गुप्तमुक्तासमास्तथा । [25]संलापाऽवसरे ते चाऽप्यारभन्तेदृशं क्रमम् ॥१९॥
[26]अवोचन्—प्रागितो यावत् स्थितास्स्वैर्गृह्यकैस्समम् । वयं तावदभैष्मैव सततं तेष्ववस्थिताः ॥२०॥
[27]परं सानुग्रहोऽल्लाहो जातो ऽस्मासु, वयं तथा । रक्षितास्तेन चौषन्त्या यातनाया अभूम वै ॥२१॥
[28]स्तुवन्तस्तमितः पूर्वं चाप्यतिष्ठाम, स ध्रुवम् । सत्यसन्धस्तथा चैव दयावानपि वर्त्तते ॥२२॥
[29]तदेतांश्चेतयाऽसकृत्, स्वप्रभोः कृपयाऽथ च । नासि त्वं तान्त्रिकः कोऽपि सोन्मादो वाऽपि कश्चन ॥२३॥
[30]"असौ कश्चित् कविः," किन्ते वदन्तीत्थं पुनर्जनाः । "यं प्रतीक्षामहेऽयन्तु काललीनः कदा भवेत्" ॥२४॥
[31]ब्रूहि—यूयं प्रतीक्षध्वं, समं युष्माभिरेव च । प्रतीक्षातत्परस्तावदहञ्चापि भवामि (भोः !) ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[३२]किमेषां वुद्धिरेवैतान् ईदृशं दिशतेऽथवा । भवन्तीमे जनास्तावद् दर्पणात्यन्तमुद्धताः ? ॥२६॥
[३३]वदन्तीमेऽथवा—"ऽनेन घटितमात्मनैव तु । सर्वमेतत्, न वै नैते श्रद्दधाना भवन्ति तु ॥२७॥
[३४]अथैते सन्ति चेत् सत्या इदंरूपां गिरं पुनः । जनयेयुर्हि ते काञ्चित्; [३५]अभावादेव किन्नु ते ॥२८॥
अत्र जातास् ? स्वतो वेमे भवन्ति जनकाः पुनः ? । [३६]व्योमानि सृष्टवन्तो वा त एवोर्वीमथाऽपि किम्? ॥२९॥
न वै तत्, परमेते तु श्रद्धरा एव नो जनाः । [३७]पार्श्वतः सन्ति किम्वैषां निधानानि हि ते प्रभोः ? ॥३०॥
साधिकाराः कृताः किम्वा तेषु तिष्ठन्ति ते जनाः ? । [३८]पार्श्वतः किं न्वमीषां वा सोपानं किञ्चिदस्ति यत् ॥३१॥
तेन शृण्वन्ति ते ? ऽमीषां योऽपि श्रुत्वा तदागतः । प्रमाण विशदं किञ्चिदसौकुर्यादुपस्थितम् ॥३२॥
[३९]केवला आत्मजास्तस्य, युष्माकं सूनवोऽथ च ? । [४०]पुरस्कारार्थनस्तेभ्यस्त्वन्नु किं वर्त्तसे हि यत् ॥३३॥
आधमर्ण्यस्य ते भाराद् भाराक्रान्ता भवन् (त्यलम्)? । [४१]धारयन्त्यथवैते किम् परोक्षज्ञानमेव यत् ॥३४॥
लेखांकितं प्रकुर्वन्ति यत्तत् (जानन्ति ते ततः) । [४२]किम्वैते लाघवाऽऽक्रान्तं कर्त्तुमिच्छन्ति कञ्चन ? ॥३५॥
त एव लाघवाऽऽक्रान्ता गतश्रद्धा हि ये परम् । [४३]प्रतीष्टः किं भवत्येषां अल्लाहात् कश्चनाऽपरः ॥३६॥
घटयन्त्यतिरिक्तं यत् त्वल्लाहात् ? तस्य वर्त्तते । महिम्नां प्रतिकूलं तत्; [४४]कच्चित् पश्यन्ति ते यदि ॥३७॥
कञ्चित् खण्डं दिवोऽधस्तात् स्खलन्तं ते ततोऽपि च । वदिष्यन्ति—"भवत्येष घनीभूतो बलाहकः" ॥३८॥
[४५]तदेतान् विजहाहि त्वं यावदेषां प्रजायते । संगमोऽह्लाऽमुना यस्मिंस्ते हि मोक्ष्यन्ति (सर्वथा) ॥३९॥
[४६]दिने यस्मिन्नमीषाञ्च लाघवं नो फलिष्यति । अमीभ्यो; नाऽपि लप्स्यन्ते ते हि साह्यञ्च किञ्चन ॥४०॥
[४७]पापकृद्भ्योऽथ लोकेभ्यो वर्त्तन्ते शंकया विना । ततोऽप्यन्येऽपरे दण्डाः, परं जानन्ति नाऽधिकाः ॥४१॥
[४८]तिष्ठ सन्तोषमाधाय निर्णयावधि ते प्रभोः । समक्षं वर्त्तसे त्वन्नस्, स्तुवीहि स्वं प्रभुं तथा ॥४२॥
कीर्त्तनैस्तत् प्रशंसानां यदा (शय्यो) द्गमस्तु ते । [४९]स्तुवीहि निशि चैवाऽपि तं, (स्तुवीहि तथैव च) ॥४३॥
यदा ऽस्तमुडवो यान्ति (तद् गुणानां प्रकीर्त्तनैः) ।

योगः—४३॥

CC-0. In Public Domain. Digitized by eGangotri

५३

सूक्तम्–न्यग्भम्

(अन–नज्म)

(महाकालेऽवतीर्णा द्विषष्टिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]शपे न्यग्भेन; [2]युष्माकं संगवर्त्त्येष नाऽपि तु । भ्रष्टः पथो, न वा जातो वञ्चितः; [3]नाऽथ चेदृशः ॥ १ ॥
जायतां यन्मनस्यस्य तद् वदेत्; [4]तत्तु केवलम् । काशितं, काश्यते यद्धि (तस्मिन्); [5]स शिक्षितोऽथ च ॥ २ ॥
तेन यो वर्त्तते पूर्णः उत्कटाभिर्हि शक्तिभिः । [6]दृढस्सम्यक् च यो; जातः प्रकटः पूर्णरूपतः ॥ ३ ॥
[7]स्थितोऽभूत् स यदा व्योम्नस्तावदुच्चैस्तमं तटम् । [8]ततोऽसौ निकटं जातोऽभूदवस्तात् कृतक्रमः ॥ ४ ॥
[9]चापद्वयान्तरेऽस्थात् स, ततोऽप्यभ्याश एव च । [10]ततो यत् काशितं तेन काशितं तत् स्वबन्धके ॥ ५ ॥
[11]अपश्यत् यत् स नो तस्मिन् हृदयं त्वन्यथाऽ भवत् । [12]यत् स पश्यति किं तस्मिन् तेन सार्धं प्रवर्त्तसे ॥ ६ ॥
त्वं विवादेन ? [13]तञ्चासौ दृष्टवान् पुनरप्यथ । [14]परान्ते याहि सीमान्ते कोली तस्याः किलान्तिके ॥ ७ ॥
[15]यदभ्याशे सुखारामो वासश्शाश्वतिकस्तु यः । [16]कोलीमाच्छादयद् यच्च करोत्याच्छादितां यदा ॥ ८ ॥
[17]इतस्ततो न दृग् याता प्रसृता नाऽपि चाऽग्रतः । [18]दृष्टवान्त्स प्रभूतानि लक्ष्माणि स्वप्रभो र्ध्रुवम् ॥ ९ ॥
[19]त्वया किं न्वीक्षितोऽलातस्तथोषजोऽपि चेक्षितः ? । [20]तृतीयोऽपीक्षितस्तत्र किलाम्नातो हि यो ऽपरः ? ॥१०॥
[21]युष्माकं सूनवस्, तस्य दुहितरोऽथ केवलम् ? । [22]अयुक्ता सर्वथैवेयं वर्त्तते त्वंहृतिः पुनः ॥११॥
[23]संज्ञाः कतिपया ह्येताः युष्माभिस्तैश्च पूर्वजैः । युष्माकं याः कृतास्सन्ति, तदर्थं न तु किञ्चन ॥१२॥
उपन्यस्तं प्रमाणं हि तथाल्लाहेन वर्त्तते । तर्कमाश्रित्य चेष्टन्ते स्वकामांश्चापि यद्यपि ॥१३॥
मार्गदर्शनमायातं इमानेषां प्रभो (र्ध्रुवम्) । [24]यद् यत् कामो जनस्तत्तल् लभते किमसाविह ? ॥१४॥
[25]भूतं भव्यं समं त्वेव खल्वल्लाहोऽधितिष्ठति । [26]अनेकेऽभ्रेषु दिव्यास्तु सफलं नाभिशंसनम् ॥१५॥
कथञ्चित् स्यात् (परं) तेषां, तदैव तत् फलेत् (परम्) । अल्लाहस्य नियोगस्स्यात् यदर्थम्, कामतोऽथ च ॥१६॥
यमंगीकुरुते (दिव्य) मसौ; [27]श्रद्दधते न ये । परं लोकं त एवाऽत्र स्त्र्यभिधानान् प्रकुर्वते ॥१७॥
दिव्यान्; [28]तत्र न किञ्चिच्च ते ज्ञानं धारयन्त्यथ । प्रवर्त्तन्त इमे लोकाः केवलं तर्कमाश्रिताः ॥१८॥
तर्कस्सत्यसमक्षञ्च नैव स्थातुमलं क्वचित् । [29]अपेहि त्वमतस्तस्मात् पराङ् आस्यो भवेत्तु यः ॥१९॥
कीर्त्तनान् मे, परं नेच्छेद् यस्तथा भवजीवनात् । [30]एतावन्मात्रमेवाऽस्ति तस्य ज्ञानं त्वसंशयम् ॥२०॥
प्रभुस्ते वेत्ति तत्सम्यग् यः पथोभ्रष्ट एव तु । वेत्ति सम्यगमुञ्चापि यो गतस्सरलाऽयनम् ॥२१॥
[31]अल्लाहस्यैव तत्सर्वं यदाकाशेषु तिष्ठति । धरित्र्यां यत् पुनः किञ्चित्, पुरस्कुर्याद् यथैव तान् ॥२२॥
दुष्कृतं यैः कृतं तेषां तत्तत् कर्मानुसारतः । तांश्च भद्रं पुरस्कुर्याद् भद्रं यैश्चरितं पुनः ॥२३॥
[32]प्राकृताचरणेभ्योऽथ घोरपाप्मभ्य एव च । आत्मनो ये तु रक्षन्ति तांस्तु दोषानुपेक्ष्य हि ॥२४॥
सामान्या ये तु जायन्ते संयोगानां व्यपेक्षया । असन्देहं प्रभु (स्तेभ्यस्) तवासौ क्षमणो महान् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

त्वामसौ वेत्ति सम्यक् च यथा त्वां सृष्टवानसौ । धरित्र्यास्स्वप्रसूनाञ्च यूयं गर्भेष्वतिष्ठत ॥२६॥
यदा, तन्न विजानीत पवित्रात्मन आत्मनः । वेत्ति सम्यगसौ कोऽत्र रक्षत्यात्मानमंहसः ॥२७॥
[३३]त्वया किन्नेक्षितोऽसौ यः पराङ् आस्यो भवेज्जनः ? । [३४]किञ्चित् प्रदाय पश्चाच्च करौ संहृतवानथ ? ॥२८॥
[३५]किं विभर्ति परोक्षस्य स ज्ञानं येन पश्यति ? । [३६]मूषस्य पुस्तकेष्वास्ते यत् तज्ज्ञानं न तेन किम् ? ॥२९॥
[३७]अब्रह्मस्य पुनश्चैव कर्त्तव्यं यो ह्यपालयत्, । [३८]इदं यत् कोऽपि नान्यस्य भारं वक्ष्यति मानवः ॥३०॥
[३९]अथैतद् यन्मनुष्याय तदेव यत् स चेष्टते । [४०]अथैतत् चेष्टनं तस्य सत्वरं गणयिष्यते ॥३१॥
[४१]ततोऽसौ पूर्णतस्तेन किञ्च पुरस्करिष्यते । [४२]अथैतद् यत् प्रभुस्ते हि—स एव लक्ष्यमन्तिमम् ॥३२॥
[४३]अथैतद् यदसावेव हासयेद् रोदयेत्तथा, । [४४]अथैतद् यदसावेव मारयेज्जीवयेदथ, ॥३३॥
[४५]अथैतद्—यदसावेव स्त्रीपुंसावसृजत् (पृथक्) । [४६]वीर्येण, वेश्यते यद् वै यदा (गर्भाशयान्तरे) ॥३४॥
[४७]अथैतद् यदिदं तावत् कर्त्तव्यं तस्य तिष्ठति । पुनरुत्थापनं नृणाम्; [४८]अथैतद् यत् स एव तु ॥३५॥
अकृताऽर्थपतीन् नॄंश्च परापेक्षामपास्त च । [४९]अथैतद् यत् स भस्याऽपि प्रभुः सर्वातिभासिनः ॥३६॥
[५०]अथैतन् नाशितास्तेन यदाऽऽदाः पूर्वसम्भवाः, । [५१]समुद्गाश्चाऽपि नो तेन शेषितास्तु कथञ्चन; ॥३७॥
[५२]ततः प्राङ् नाहुषाश्चापि; संशयो नेह कश्चन । जाल्मास्त आसता ऽत्यर्थमहंकारोत्कटास्तथा; ॥३८॥
[५३]प्रतीपदर्शिनो वासाश्चापि तेन विनाशिताः; । [५४]सम्वृतास्ते च येनाऽऽसन् संवर्त्तव्यास्तु ते पुनः ॥३९॥
[५५]स्वप्रभोः कं चमत्कारं सन्दिह्य तेऽस्ति तत् कलिः ? । [५६]चेतकश्चेतकेष्वेष प्राग्भूष्वेको वितिष्ठते ॥४०॥
[५७]असावेष्यन्त्युपायाति; [५८]न समर्थश्च वारणे । कोऽपि तस्या विनाऽल्लाहम्; [५९]तत् किं भाणेऽत्रजायते ॥४१॥
(सुमहद्) वः किलाश्चर्यम् ?; [६०]हसथ रुदथाऽथ नो । [६१]तिष्ठथ चोन्मदास्त्वेव?; [६२]स्तुत्रीताऽस्त्वधुना परम् ॥४२॥
अल्लाहं पुरतस्तस्य प्रणिपातं विधत्त च ।

योगः—४२॥

५४

सूक्तम्—कम्रः

(अल–कमर)

(महाकालेऽवतीर्णाः पञ्चपञ्चाशदायाताः)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[१]क्षणो नेदस्स चायातः, कम्रो भग्नो द्विशोऽथ च । [२]यदेमे त्वथ पश्यन्ति किंचिल्लक्ष्म वदन्ति ते ॥ १ ॥
उपेक्षावृत्तयस्सन्तः—"मायैषा किल शाश्वती" । [३]ते न्यषेधन् स्थिताः किञ्चाऽप्यात्मकामानुगास्(सदा)॥ २ ॥
स्वकाले हि घटन्त्यत्र सर्वाश्चेष्टा (असंशयम्) । [४]जनैरेभिरवाप्रप्तानि वृत्तानि तादृशान्यथ ॥ ३ ॥
ताडना वर्त्तते येषु; [५]सप्रभावा तथा च धीः । अफला एव तिष्ठन्ति परं सर्वा विभीषिकाः ॥ ४ ॥
[६]तद् विदूरं व्रजैभ्यस्त्वम्, आह्वाताऽऽह्वास्यते यदा । अभिलक्ष्य तु तद् यद् वै तपनं खलु तिष्ठति ॥ ५ ॥
[७]तेऽधो दृशो भविष्यन्ति वहिर्यान्तिस्तथैव च । कवरेभ्यः किलाऽन्नादा विकीर्णा शलभा इव ॥ ६ ॥
[८]अभ्याह्वातारमेष्यन्ति ते त्वरागतिकाः (परम्) । श्रद्विहीना भणिष्यन्ति—घस्रो घोरो महानयम् ॥ ७ ॥
[९]इतः प्राग् नाहुषाश्चापि न्यषेधन् वन्धकं च नः । न्यषेधंस्ते ऽवदंस्तञ्च—"सोन्माद", मतुदञ्च तम् ॥ ८ ॥
[१०]आह्वयत् स तदा स्वेनम्—"समाक्रान्तो भवाम्यहम् । तदेहि, त्वं कुरुष्वाऽथ मम साह्यं हि किञ्चन" ॥ ९ ॥
[११]व्योमद्वाराण्यथास्माभिः पुनश्चापावृतानि यत् । जलासारास्समारब्धाः; [१२]धरित्र्या वाहितानि च ॥१०॥
उद्गच्छन्ति प्रभूतानि जलस्रोतांसि (सत्वरम्) । पूर्वतोनिश्चितं पश्चात् समादाय प्रयोजनम् ॥११॥
ततो वारि समग्रञ्च पुनरप्येकतां गतम् । [१३]ततश्चारोहितोऽस्माभिरसौ(नाव्य) भवद् हि या ॥१२॥
परीता पटलैश्चापि कीलकैश्चापि (सर्वतः) । [१४]पश्यत्स्वस्मास्ववात् सा च प्रतिशोधोऽयमस्तु तु ॥१३॥
तदर्थं न्यक्कृतस्तावददतिष्ठद् यो हि (वान्धवैः) । [१५]कृतं चिन्हस्य रूपेण किलाऽस्माभिरिदं पुनः ॥१४॥
शिक्षितुकाम एषोऽत्र किन्नु कश्चिज्जनः पुनः ? । [१६]कियान् घोरोऽभवत्तन्मे दण्डस्, सा च विभीषिका? ॥१५॥
[१७]कुराणं कृतमस्माभिस्सुगं शिक्षार्थमप्यथ । शिक्षितुकाम एषोऽत्र किन्नु कश्चिज्जनः पुनः ? ॥१६॥
[१८]न्यषेधंस्ते तथैवाऽऽदाः, दण्डस्सा च बिभीषिका । कियद्घोराऽभवत्तन्मे ! [१९]वात्यातीव्राऽति, वाहिता ॥१७॥
नैरन्तर्यस्वभावा वै तेष्वस्माभिः किलाऽहनि । आपदाम्; [२०]या जनांस्तावच्चकारोन्मूलितान् यथा ॥१८॥
खर्जूराणां प्रकाण्डानि भवन्त्युन्मीलितानि हि । [२१]कियान् घोरोऽभवत्तन् मे दण्डस्, सा च विभीषिका ॥१९॥
[२२]कुराणं कृतमस्माभिस्सुगं शिक्षार्थमप्यथ । शिक्षितुकाम एषोऽत्र किन्नु कश्चिज्जनः पुनः ? ॥२०॥
[२३]समुद्गैः खण्डिताः किञ्च पुनस्सर्वा बिभीषिकाः; । [२४]तेऽवदन्—अनुयास्यामः किं वयं तञ्जनं हि यः ॥२१॥
बिभर्त्ति साम्यमस्माभिस्, तत्तु कृत्वा ध्रुवं वयम् । भवामो हि पथभ्रष्टाः प्रमत्ताः पुनरेव च ॥२२॥
[२५]मध्येऽस्माकमसावेव केवलः किं न्वदीयत । स्मारकम् ? न हि तत्, सोऽस्ति त्वसत्योऽथ विकत्थनः॥२३॥
[२६]ते ज्ञातारश्श्व एवेदम् कोऽसत्योऽथ विकत्थनः । [२७]प्रेषयामः परीक्षार्थमुष्ट्रीमेकां हि तान् प्रति ॥२४॥
तत् प्रवर्त्तस्व धैर्यात् त्वं प्रावधायाऽथ तिष्ठ च; । [२८]सूचयाऽमूंश्च यद् वारि वितीर्णं तेषु तिष्ठति ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

प्रतिक्रमञ्च पानस्य पातोपस्थास्यति (ध्रुवम्) । [२९]आह्वयंस्ते ततस्स्वीयं सहायं, स तथा पुनः ॥२६॥
उष्ट्रीं परामृशत् (स्वाभ्यां कराभ्याम्) तदनन्तरम् । शिराणां कर्त्तनेनाऽहन्त्सहायस्तामसौ किल ॥२७॥
[३०]कियान् घोरोऽभवत्तन्मे दण्डस्सा च विभीषिका ! । [३१]तेषु चोद्भावितोऽस्माभिस्समाक्रन्दोऽथ तेऽभवन् ॥२८॥
अन्यथासिद्धशाखेव वृतिकार जनस्य हि । [३२]कुराणं कृतमस्माभिस्सुगं शिक्षार्थमप्यथ ॥२९॥
शिक्षितुकाम एषोऽत्र किन्नु कश्चिज्जनः पुनः ? । [३३]ज्ञातिभिश्चाऽथ लूतस्य खण्डिता हि विभीषिकाः ॥३०॥
[३४]दृषद्वात्या ततस्तेषु प्रेषिताऽस्माभिरास्त च । लूतकौटुम्बिकांस्त्यक्त्वा प्रत्यूषसमये च ते ॥३१॥
रक्षिता आसताऽस्माभिः; [३५]अयमस्मदनुग्रहः । वयमित्थं पुरस्कुर्मः कार्त्तज्ञदर्शिनं जनम् ॥३२॥
[३६]त आसंश्चेतितास्तेन सत्यमेवापतिष्यतः । आघातादस्मदीयाद् वै, परं संशयितास् स्थिताः ॥३३॥
चेतनानां सदैवाऽ मी; [३७]साग्रहञ्चावदन् हि तम् । अतिथींस्तस्य तान् दातुम्; तदान्धास्ते पुनः कृताः ॥३४॥
अस्माभिस्; स्वाद्यतां तद्(भोः !) युष्माभिर्यातनारसः। चेतनानां पुनर्मे च !; [३८]कारणा तेष्वथाऽऽपतत् ॥३५॥
अहार्योऽहर्मुखे त्वेव; [३९]युष्माभिर्यातनारसः । चेतनानां पुनर्मे च, स्वाद्यतां सततं पुनः ॥३६॥
[४०]कुराणं कृतमस्माभिस्सुगं शिक्षार्थमप्यथ । शिक्षितुकाम एषोऽत्र किन्नु कश्चिज्जनः पुनः ? ॥३७॥
[४१]प्राप्ता विभीषिकाः किञ्च प्रिययौनजनानपि । [४२]तैरस्माकं समस्तानि लक्ष्माणि खण्डितानि हि ॥३८॥
निग्रहं गमितास्तेन खल्वस्माभिश्च ते तथा । यथा कश्चिद् बलोपेतो निगृह्णाति प्रभुर्जनः ॥३९॥
[४३]उत्तरास्सन्ति किं न्वेभ्यश् श्रद्विहीनास्तु ये जनाः । युष्माकम्, युष्मदर्थं वाऽदोषता प्रतिपादिता ॥४०॥
पुस्तकेषु; [४४]वदन्त्येते किम्वा—"ऽस्माकं गणोऽस्ति सः । अवश्यस्सन् जयं यो वै लप्स्यते (संशयं विना)" ॥४१॥
[४५]भविता द्राक् परास्तोऽयं गणश्चैते जनाः पुनः । दर्शयन्तस्स्वपृष्ठानि पलायिष्यन्त एव च ॥४२॥
[४६]नेदमेव, परं सा हि घटी तेभ्यस्सुनिश्चिता । साऽऽपदाऽत्यर्थमेवासौ, कट्व्यत्यर्थं तथैव च ॥४३॥
[४७]पाप्मानो भ्रष्टवर्त्मानः प्रमत्ता अपि च ध्रुवम् । [४८]दिने यस्मिंश्च ते वह्नौ भविष्यन्ति ह्यवाङ्मुखाः ॥४४॥
समाकृष्टाश्च (वक्ष्यन्ते साम्प्रतम्) स्वाद्यतां रसः । नारकाग्नेः परामर्शाज्जायमान (इहास्ति यः) ॥४५॥
[४९]मानोन्मानसमं सर्वं सृष्टमस्माभिरत्र च । सर्वमेतत् त्वसन्दिग्धम्; [५०]सकृदेव च जायते ॥४६॥
समादेशोऽस्मदीयस्तु यथाक्ष्युन्मीलनं तथा । [५१]युष्माकं पुनरस्माभिस् सार्थाश्चापि विनाशिताः ॥४७॥
शिक्षितुकाम एषोऽत्र किन्नु कश्चिज्जनः पुनः ? । [५२]विद्यमानानि तिष्ठन्ति पत्रेष्वेषां कृतानि च, ॥४८॥
[५३]सामान्यं चाप्यसामान्यं अंकितं सर्वमस्त्यथ । [५४]भयं कुर्वन्ति येऽल्लाहात् ते हि वत्स्यन्त्यसंशयम् ॥४९॥
सुखारामेषु किञ्चैव नदीनामन्तरेष्वथ; । [५५]सुप्रतिष्ठाऽऽस्पदेऽथांके सम्राजो बलशालिनः ॥५०॥

योगः—५०

५५

सूक्तम्–दयावान्

(अर–रहमान)

(महाकालेऽवतीर्णा अष्टसप्ततिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]दयावान्; [2]स कुराणञ्चाशिक्षयत्; [3]असृजन्नरम् । [4]वाग्व्यापारममुं(किञ्चाऽ)शिक्षयत्; [5]सोमभास्करौ ॥ १ ॥
नियुक्तौ तिष्ठतस्सम्यक्; [6]नक्षत्राण्यथ शाखिनः । प्रणिपत्य नमन्त्ये(नम्); [7]उदस्तभ्नाद् वियत् पुनः ॥ २ ॥
अघृताऽथ तुलां किञ्च; [8]लंघयेर्न तुलां यतः; । [9]मानं कुर्यास्सुधर्मेण, नाल्पदस्तोलने भवेः ॥ ३ ॥
[10]धरां प्रासारयच्चैव विश्वलोकाय; [11]तत्र च । फलानि, गुच्छसम्पन्नाः खर्जूराऽनोकहा अपि ॥ ४ ॥
[12]सबुसान्नानि सामोदाः पुष्पवन्तश्च वृक्षकाः । [13]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? ॥ ५ ॥
[14]कुम्भकारस्य मृद् या च तादृश्यैव मृदाऽथ सः । असृजन्मानवम्; [15]जिन्नं ज्वालयाऽग्नेस्तथाऽसृजत् ॥ ६ ॥
[16]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? । [17]प्राच्योर्द्वयोः प्रभुः किञ्च प्रतीच्योरुभयोः प्रभुः ! ॥ ७ ॥
[18]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? । [19]उभौ सिन्धू वहन्तौ च कृत्वाऽतिष्ठद् युतौ मिथः ॥ ८ ॥
[20]वृतिश्चान्तस्तयोः, नो यां तावतिक्रम्य तिष्ठतः । [21]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? ॥ ९ ॥
[22]ताभ्यामुद्यान्त्युभाभ्याञ्च मुक्ताश्च विद्रुमास्तथा । [23]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? ॥१०॥
[24]प्रांशुपोताश्च गाहन्ते ये हि सिन्धुममीषु वै । अधिकारे च तस्यैव ये किल ध्वजसन्निभाः ॥११॥
[25]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? । [26]नश्वरं सर्वमप्यत्र यद् (धरित्र्यां तु) तिष्ठति; ॥१२॥
[27]भास्वद् यच्च विराड् रूपं तत् प्रभोस्तेऽवशेक्ष्यते । [28]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? ॥१३॥
[29]तमेव याचते सर्वो व्योमसु यः क्षितावथ । माहात्म्यं स विभर्त्तीह किञ्च नूत्नं दिनाद् दिनम् ॥१४॥
[30]कतमत् त्वं वदौदार्यं स्वप्रभोः प्रतिषेधसि ? । [31]आश्रितौ भोः युवां व्रातौ! युष्माकमचिराद् वयम् ॥१५॥
विनियोगं करिष्यामो (विधत्तं तत् प्रतीक्षणम्) । [32]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ॥१६॥
[33]मर्त्यानामथ जिन्नानां युवां व्रातौ ! भवेद् यदि । शक्तिर्युष्मासु तद् यूयमतिक्रम्यापगच्छत ॥१७॥
सीम्नो व्योम्नां धरित्र्याश्च, नातिक्रान्तुं तु शक्नुथ । अनादिष्टाः परं यूयम्, (वर्त्तते नाऽत्र संशयः) ॥१८॥
[34]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? । [35]उपरिष्टाद् युवां हेतिर्गलत्ताम्रं तथैव च ॥१९॥
क्षेप्स्यते, पुनरात्मानं रक्षितुं नाऽपि शक्ष्यथः । [36]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ॥२०॥
[37]स्फुटिष्यति यदा व्योम तद् यदा च भविष्यति । लोहितं तावदत्यर्थं स्याद् यथा चर्म लोहितम् ॥२१॥
[38]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? । [39]तदा कश्चिन्न जिन्नोऽपि नो मर्त्यश्चैव कश्चन ॥२२॥
प्रक्ष्यतेऽघं पुरस्कृत्य तेन तेन कृतं पुनः । [40]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ॥२३॥
[41]भविष्यन्ति च विज्ञातास्सापराधास्स्वरूपतः । निग्रहीता भविष्यन्ति ललाटाग्ररूहेषु च ॥२४॥
किञ्च पादेषु खल्वेते (संशयो नाऽत्र कश्चन) । [42]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[४३]नारकोऽयं सदोषा यं खण्डयन्त्य (निवार्यतः) । [४४]चंक्रमन्त्यन्तरे ऽमुष्य वारिणः क्वथतश्च ते ।।२६।
[४५]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? । [४६]स्वप्रभोरग्रतस्स्थानात् त्रस्तो यस्तु विजायते ।।२७।।
तदर्थं भवतस्तत्र द्वे किलोपवने पुनः । [४७]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।२८।।
[४८]विस्तृताभिश्च शाखाभिः संकुले भवतोऽथ ते । [४९]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।२९।।
[५०]स्रोतसी च तयोर्मध्ये तिष्ठतस्संप्रवाहिते । [५१]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३०।।
[५२]फलं सर्वविधं तत्र द्विविधं किञ्च तिष्ठति । [५३]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३१।।
[५४]उपधानाश्रया यत्र प्रच्छदेषु हि, कार्मिकम् । कौशेयं प्रान्तभागेषु लग्नमस्ति, फलानि च ।।३२।।
उभयोरपि लम्बन्ते तावदुद्यानयोरधः । [५५]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३३।।
[५६]वसन्ति योषितस्तत्रतदा यावन्न केनचित् । मर्त्येनाऽपि न जिन्नेन स्पृष्टा लज्जानतेक्षणाः ।।३४।।
[५७]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? । [५८]सौन्दर्यं तान्निभं तासां यथा रक्तमणिर्भवेत् ।।३५।।
प्रबालस्येव (सौन्दर्यं) किञ्च तासां पुनर्भवेत् । [५९]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३६।।
[६०]कोऽन्यः स्याच्च पुरस्कारो भद्रस्य भद्रतः पृथक् ? । [६१]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३७।।
[६२]तेऽतिरिच्य किलोद्याने त्वितरे द्वेऽपि तिष्ठतः । [६३]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३८।।
[६४]नीलहारित्यसम्पन्ने पलाशैस्तिष्ठतो हि ते । [६५]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।३९।।
[६६]स्रोतसी च तयो र्मध्ये ह्युत्क्रमद्वारिणी स्थिते । [६७]ब्रूतं कतमदौदार्यं स्वप्रभो प्रतिषेधथः ? ।।४०।।
[६८]फलानि तत्र, तिष्ठन्ति खर्जूरा दाडिमास्तथा । [६९]ब्रूतं कतमदौदार्यं स्वप्रभो प्रतिषेधथः ? ।।४१।।
[७०]भद्राश्च रूपवत्यश्च भवन्ति तत्र योषितः । [७१]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ।।४२।।
[७२]मृगाक्ष्यो रूपसम्पन्ना मण्डपान्तऽस्थितास् स्त्रियः, । [७३]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।४३।।
[७४](वसन्त्यो योषितस्तत्र) तदा यावन्न केनचित् । मर्त्येनाऽपि न जिन्नेन स्पृष्टा (लज्जाऽऽनतेक्षणाः) ।।४४।।
[७५]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? । [७६]हरितान्युपवर्हाणि विशदानि कुथानि च ।।४५।।
समाश्रित्य स्थितास्तत्र भवन्ति ताः पुनस् (स्त्रियः) । [७७]ब्रूतं कतमदौदार्यं स्वप्रभोः प्रतिषेधथः ? ।।४६।।
[७८]अत्यर्थं त्वत् प्रभोर्नाम सौभाग्यावहमस्ति यः । औदार्यं भजते किञ्च सप्रतापश्च वर्त्तते ।।४७।।

योगः—४७

CC-0. In Public Domain. Digitized by eGangotri

५६

सूक्तम्–आपतयालुः

(अल-वाकिआ)

(महाकालेऽवतीर्णा: षण्णवतिरायाता:)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[१]यदा चाऽऽपतयालुस्सा सर्वथैवापतिष्यति । [२]आपतिष्यति चैवाऽस्मिन् प्रत्यादेशो न कश्चन ॥ १ ॥

[३]अधोनेत्री तथोन्नेत्री वर्त्तते (यस्य कस्यचित्) । [४]धरित्री चालिता यस्मिन् क्षणे चैव भविष्यति ॥ २ ॥

[५]पर्वताश्चूर्णिता: किञ्च करिष्यन्ते यदा पुन: । [६]रजोभ्रान्तिमयास्तावत् ते भविष्यन्त्यलं पुन: ॥ ३ ॥

[७]त्रैविध्यञ्च गता यूयं (तस्मिन् काले) भविष्यथ: । [८]दक्षिणं ये गता:, किन्नु वित्थ ये दक्षिणं गता: ? ॥ ४ ॥

[९]गता वामञ्च ये, किन्नु वित्थ वामं हि ये गता: ? । [१०]अग्रतो यायिनो ये च, ये ऽग्रतो यायिन: किल ॥ ५ ॥

[११]इमे ते ये हि नेष्यन्ते नेदीयस्त्व (मसंशयम्) । [१२]सुखारामेषु; [१३]पूर्णैको गणस्त्वग्रभुवां नृणाम् ॥ ६ ॥

[१४]केचनैव जना: किञ्च नृणां पश्चाद् भुवां पुन: । [१५]पर्यंकेष्वथ तिष्ठन्ति खचितेषु च ते पुन: ॥ ७ ॥

[१६]तान् समाश्रित्य चान्योन्यमाभिमुख्यं गतास् स्थिता: । [१७]किशोरा अमृतास्तांश्च गत्या संभावयन्त्यरम् ॥ ८ ॥

[१८]कमण्डलुकरा: किञ्च दधाना अब्धरानपि । शुद्ध-मद्य प्रपूर्णेन कंसेन चोपबृंहिता: ॥ ९ ॥

[१९]येन शीर्षे न दु:खञ्च बुद्ध्युन्मादो न कोऽपि च: । [२०]फलानि तदभीष्टानि; [२१]विमांसञ्चेष्टमस्ति यत् ॥१०॥

[२२]मृगाक्ष्यो रूपसम्पन्ना:; [२३]गुप्ता मुक्ता इव स्थिता: । [२४]यत् कृतं तैरयन्तस्य पुरस्कारो हि वर्त्तते ॥११॥

[२५]असम्बद्धं वचस्तत्र दुष्टां वाचमथापि नो । तत्रश्रृण्वन्ति ते; [२६]"शन्ते शन्त" इत्येव केवलम् ॥१२॥

[२७]दक्षिणं ये गता:, किन्नु वित्थ ये दक्षिणं गता: ? । [२८]तत्र ते यत्र कर्कन्धू: कण्टकेभ्यो विनैव तु ॥१३॥

[२९]सहैव तत्र रूढाश्च कदलीस्तवका अपि । [३०]विस्तृताऽतितरां छाया; [३१]प्रवहद् वार्यथाऽपि च ॥१४॥

[३२]फलं पुष्कलम्; [३३]अप्राप्यं नो निषिद्धमथापि नो । [३४]उत्तानास्तत्र पर्यंका:; [३५]विशिष्टां सृष्टिमप्यथ ॥१५॥

भजन्ते योषित:; [३६]अस्माभि र्नग्निकास्ता अथो कृता: । [३७]प्रेयस्यश्च वयस्याश्च; [३८]तेभ्यो दक्षिणतस्तु ये ॥१६॥

[३९]पूर्णस्त्वेको गणस्तेषां तावदग्रभुवां नृणाम् । [४०]पूर्णश्चैको गणस्तेषां तावत् पश्चाद्भुवां नृणाम् ॥१७॥

[४१]गता वामञ्च ये, किन्नु वित्थ वामं हि ये गता: ? । [४२]अन्तरेऽत्युष्णवातस्य क्वथत: कस्य चान्तरे ॥१८॥

[४३]छायायां नीलधूमस्य किञ्च; [४४]यो नैव शीतल: । सुखदो नाऽथ; [४५]भोगेषु तेऽरमन्त ध्रुवं पुरा ॥१९॥

[४६]साग्रहा घोरपापे च खल्वतिष्ठन्नमी पुन: । [४७]आहुरेवञ्च—मृत्यूर्ध्वं मृदस्थिशेषतां गता: ॥२०॥

(उज्जीवय्य) किमुत्थानं पुनर्नीता भवेम नु ? । [४८]किमस्मत् पूर्वजाश्चापि?; [४९]ब्रूहि—बाढं, समेऽपि ते ॥२१॥

पूर्वजा: पृष्ठजाश्चैव; [५०]करिष्यन्ते हि संहता: । विशिष्टे समये यस्य पूर्वतो निश्चितं दिनम् ॥२२॥

[५१]ततो यूयं पथभ्रष्टास् (सर्वथा) च निषेधका: ! । [५२]जक्कूमानोकहात्तावदशनं वो भविष्यति ॥२३॥

[५३]तेनैवोदरपूर्त्तिञ्च यूयं तावत् करिष्यथ । [५४]क्वथद्वारि पुनर्यूयं पास्यथास्मिन्ननन्तरम् ॥२४॥

[५५]पास्यथोष्ट्रो यथा वारि पिबत्यत्र तृषाकुल: । [५६]निर्णयाह्नीदृशं तेषां स्वागतञ्च भविष्यति ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[५७]असृजाम वय युष्मान्, किन्तत् सत्यं न बोधथ ? । [५८]लोकितं स्रावितं वीर्यं युष्माभिरात्मनो न किम् ? ॥२६॥
[५९]साकृति तद् वयं कुर्मो यूयं किम्वा विधत्थ (भोः!)? । [६०]मृत्युर्युष्मासु चास्माभिर्नियमो ह्यवधारितः ॥२७॥
सामर्थ्याऽविषयं नेदम् किञ्च; [६१]यत् तावदाकृतिः । अन्यरूपैव युष्माकं कृता स्याद्, यूयमत्र च ॥२८॥
युष्मदज्ञातरूपेण पुनस्स्यात प्रतिष्ठिताः । [६२]स्वकीयः पूर्वसर्गश्च युष्माभिर्दृष्ट एव तु ॥२९॥
तत् कथन्न पुनर्वोधं यूयमेतेन गच्छथ ? । [६३]युष्माभिः किं कृषिर्दृष्टा व्यापृता यत्र तिष्ठथ ? ॥३०॥
[६४]ततस्तूत्पादनं यूयं विदध्मो वा वयं पुनः ? । [६५]कामतश्चूर्णितां ताञ्च शक्ताः कर्त्तुं वयं पुनः ॥३१॥
सर्वथा तेन संभ्रान्तान् युष्मान् कुर्वन्त एव तु । [६६]भाराऽऽक्रान्ता वयं जाता ऋणस्य कारणादहो ! ॥३२॥
[६७]तावदेव न, कार्पण्यं वयन्तु सर्वथा गताः । [६८]युष्माभिः किं जलं दृष्टम्, यूयं पिबथ यत् पुनः ? ॥३३॥
[६९]किं युष्माभिः कृता तस्य वारिदादवतारणा ? । भवामस्तावदाहोस्वित् वयं तस्यावतारणाः ? ॥३४॥
[७०]कामतः कटुतां तच्च शक्ता नेतुं वयं पुनः । दर्शयथ न कार्त्तज्ञं यूयं तेनाऽपि तत् कथम् ? ॥३५॥
[७१]युष्माभिः किं शुचिर्दृष्टो युष्माभिर्यस्समिध्यते ? । [७२]रोहितो वृक्षकस्तस्य युष्माभिः किन्नु वर्त्तते ॥३६॥
भवामस्तावदाहोस्वित् वयं तस्य प्ररोहणाः ? । [७३]कृतोऽनुस्मारको ऽस्माभिरसौ भोगार्ह एव च ॥३७॥
लोकेभ्यो वनवासिभ्यः; [७४]कीर्त्तयाऽतो निजप्रभोः । नाम त्वं तस्य मह्यस्य; [७५]न तावत्, स्थितिभिर्ह्यहम् ॥३८॥
तारकाणां शपे तावत्; [७६]अत्युग्रश्शपथस्त्वयम् । किञ्च बुद्धमिदं स्याच्चेद् युष्माभिः; [७७]सुप्रतिष्ठितम् ॥३९॥
इदं सत्यं कुराणं वै; [७८]एकस्मिन् गुप्तपुस्तके । [७९]पूता एव जनास्तस्य हस्तस्पर्शञ्च कुर्वते ॥४०॥
[८०]अवतारोऽस्त्यदस्तस्माज्जगतां किल यः प्रभुः । [८१]तत् किमेतदुपेक्षध्वे वचो यूयं हि सर्वथा ॥४१॥
[८२]कुरुध्वे खण्डनं तस्य वृत्तिरेव निजा यथा । [८३]किन्न तत्, स यदोपैति कण्ठोपान्तम्; [८४]तदाऽथ च ॥४२॥
द्रष्टृरूपेण वै यूयं स्थित्वा तत्र विपश्यथ । [८५]वयं तस्य च नेदिष्ठा भवामस्त्वदपेक्षया ॥४३॥
जायते न परं बोधो युष्माकं त्वेव सर्वथा । [८६]किन्न तद्, यद्यधीना नो यूयं तावत्तु तिष्ठथ ॥४४॥
[८७]कुरुध्वेऽस्य परावृत्तिम्, यूयं सत्या भवेत चेत् ? । [८८]भवेच्चेत् स पुनस्तेषां नेदिष्ठा ये; [८९]तदस्त्यलम् ॥४५॥
आनन्दश्च सुगन्धश्च सुखारामस्तथैव च । [९०]अथाऽसौ दक्षिणाभाजां भवेत् कश्चिज्जनो यदि ॥४६॥
[९१]"शन्ते" तद् दक्षिणाभाजां यस्मादन्यतमोऽसि हि । [९२]अथाऽसौ खण्डनानां स्यात्, स्यात् पुनर्भ्रष्टवर्त्मनाम् ॥४७॥
[९३]उपादानं क्वथद्वारि स्वागतस्यास्य तद् भवेत् । [९४]धिक्षदग्नौ प्रवेशश्च; [९५]सत्यमेतत् सुनिश्चितम् ॥४८॥
[९६]नाम त्वं तस्य मह्यस्य कीर्त्तयाऽतो निजप्रभोः ।

योगः—४८॥

CC-0. In Public Domain. Digitized by eGangotri

५७

सूक्तम्—लोहः

(अल-हदीद)

(मदहीनाऽवतीर्णा एकान्नत्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अल्लाहमस्तवीत् तत्तद् धरित्र्यां यद् वियत्सु च । तत्वदर्शी महांश्चैव बोभवीति प्रभुर्ह्यसौ ॥ १ ॥
[2]व्योम्नां चैव धरित्र्याश्च राज्यं तस्यैव तिष्ठति । जीवयेन् मारयेच्चासौ सर्वसामर्थ्यभृत् स वै ॥ २ ॥
[3]स एवाऽदिस्स एवाऽन्तो मध्योऽसौ स बहिः पुनः । सर्वविद् वर्त्तते चाऽसौ; [4]षट्त्स्वहस्स्वसृजत् तथा ॥ ३ ॥
स एव वियतो यस्तु धराञ्चैव, पुनस् स च । समारूढो ऽभवत् तावत् राजसिंहासनं किल ॥ ४ ॥
वेत्त्यसौ यद् व्रजत्यन्तर्धरित्र्या यत्तथा बहिः । व्योम्न्यारोहति यद् यद् वा ततः किञ्चावरोहति ॥ ५ ॥
संगतस्स पुनर्युष्मान् वर्त्तध्वे यत्र कुत्रचित् । यद् यद् यूयं विचेष्टध्वे ऽल्लाहस्तत्तद् विपश्यति ॥ ६ ॥
[5]व्योम्नां चैव धरित्र्याश्च तस्यैव शासनं समम् । परावृत्योपगन्तव्यस्सर्वैरल्लाह एव च ॥ ७ ॥
[6]निशं संक्रामयत्यह्नि निशि संक्रामयत्यहः । हृत्स्थं यच्च विजानाति समं सर्वस्य तत् स वै ॥ ८ ॥
[7]अल्लाहे वाग्घरे ऽमुष्य श्रद्धराः किञ्च तिष्ठत । कुरुताऽथ व्ययं तस्मात् प्रत्ययस्थाः कृताः किल ॥ ९ ॥
धनस्य यस्य वै यूयम्, ये युष्माकमथो जनाः । व्ययशीला भवन्त्यत्र श्रद्दधानास्तथैव च ॥१०॥
पुरस्कारो महांस्तेभ्यो भव्यं सत्यञ्च विद्यते । [8]किन्तु क्लिश्नाति वो ? यूयं यन्नाल्लाहे तु(सर्वथा) ॥११॥
श्रद्दध्वे, वाग्घरो युष्मांस्तावदाकारयत्यपि । श्रद्धातुं स्वप्रभौ, यूयं श्रद्दधानाः क्वचिद् यदि ॥१२॥
युष्माभिस्तेन साकञ्च प्रतिज्ञा विहिताऽपि च । [9]स एव विशदायातान् आत्मनो वन्धकेषु यः ॥१३॥
वतारयति यद् युष्मांस्तमसो ज्योतिरानयेत् । अल्लाहः करुणोपेतो दयी युष्मासु च ध्रुवम् ॥१४॥
[10]किन्तु क्लिश्नाति वः किञ्च व्ययस्य करणे पुनः । मार्गे ऽल्लाहस्य, यद् व्योम्नां यद् धरित्र्याश्च वर्त्तते ॥१५॥
तस्मिन्नधिकृतो ऽल्लाहस्त्वेव यावत् स तिष्ठति । व्ययं कुर्वन्ति युष्माकं ये जयात् प्राक्ततश्च ये ॥१६॥
युध्यन्ते, न समत्वं ते व्रजन्तीह कदाचन । आसते ह्युन्नतास्ते तु तेभ्यो ये जन्यमाचरन् ॥१७॥
परं पश्चाद् व्ययं तावत्, "करिष्ये भद्रतामहम्" । अल्लाहेन प्रतिज्ञातं सर्वेभ्य इत्थमस्ति च ॥१८॥
अल्लाहो वेदनस्तस्य कुरुध्वे यद् यदत्र तु । [11]कोन्वसावर्पयेद् यस्तु पुष्कलं पर्युदञ्चनम् ॥१९॥
अल्लाहाय, स यत् कुर्यात् तदर्थं गुणितं हि तत् । पुष्कलश्च पुरस्कारो भवेत्तस्य कृते यथा ? ॥२०॥
[12]श्रद्धरान् पुरुषान् स्त्रीश्च श्रद्धरास्त्वं पुनर्यदा । द्रक्ष्यसि तत्प्रकाशञ्च तदग्रेसरतां गतम् ॥२१॥
दक्षिणाहि तथा चाऽमून्, वृत्तं तेभ्यश्शुभं पुनः । उद्यानानाममीषां हि निम्नगा यदधस् स्थिताः ॥२२॥
वहन्त्यो, यत्र वासश्च खलु शाश्वतिकस्स्मृतः । इदमेव च साफल्यं मतं सर्वमहत्तमम् ॥२३॥
[13]पाषण्डिन्यस् स्त्रियः किञ्च नरः पाषण्डिनः पुनः । श्रद्दधानान् दिने यस्मिन् वदिष्यन्ति—"विरम्यताम् ॥२४॥
गृह्णोयाम वयञ्चापि युष्मद् द्योतात्तु कञ्चन" । वक्ष्यन्ते हि पुनस्ते च—"क्रियतां(भोः!)निवर्त्तनम् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

प्रकाशो मृग्यताञ्चैव," तदेतत् खल्वनन्तरम् । भित्तिरेका तयोर्मध्ये तावदुत्तोलिता ऽभवत् ॥२६॥
कपाटं यत्र खल्वेकम्, दया यत्रावतिष्ठते । अन्तर्भागे, वहिर्भागे यातनात्ववतिष्ठते ॥२७॥
[14]वीप्सया तानिमे किञ्च वदिष्यन्ति—"न किं वयम् । अभूम संगता युष्मान् ?" प्रतिवक्ष्यन्ति तेऽथ च ॥२८॥
"अभूत संगता अस्मान्, परं लुब्धा अतिष्ठत । संशयेनाभिभूताश्च, विक्लवाः पुनरेव च ॥२९॥
वञ्चिताः कामनाभिश्च यूयं मोघाभिरास्थत । अल्लाहस्य समादेशस्तावत्तँवागतस्तथा ॥३०॥
अल्लाहविषये युष्मान् वञ्चनायां न्यमज्जयत् । किञ्च यो वञ्चकोऽसौ वै; [15]युष्मन्नैव ग्रहीष्यते ॥३१॥
अद्य मुक्तिधनं किञ्चित्, न तेभ्यो ऽश्रद्धराश्च ये । अग्निर्वासो हि युष्माकम्, स एव पुनराश्रयः ॥३२॥
धाम तच्चाऽत्यभव्यं वै यत्र युष्माकमागतिः । [16]किन्नाद्यापि समेतो ऽसौ समयो हृदयानि यत् ॥३३॥
श्रद्धराणां नमेयुर्वै अल्लाहस्मरणे, ऽथ च । (नमेयुः) अग्रतस्तस्य सत्यस्योपनतस्य च ॥३४॥
भवेयु र्न हि तद्रूपा यच्च ते, प्रागदीयत । शास्त्रं येभ्यो ऽवधिश्चैव यदर्थं प्रगुणीकृतः ॥३५॥
हृदयान्यभवंस्तेषां वज्ररूपाणि, तेषु च । अनेके येऽद्य तिष्ठन्ति ह्यवज्ञातत्परा जनाः ॥३६॥
[17]धरां बोध यदल्लाहो मृतां संजीवयत्यपि । वैशद्येन किलाऽऽयाता अस्माभिस्तुभ्यमीरिताः ॥३७॥
(इदं मत्वा) प्रवर्त्तेथा यत्त्वं बुद्ध्या कदाचन । [18]पुमांसो दानिनो ये तु दानिन्यो यास् स्त्रियः पुनः ॥३८॥
आर्पयन् ये किलाऽल्लाहं पुष्कलं पर्युदञ्चनम् । तदर्थं गुणितं तद् वै सत्यमेव करिष्यते ॥३९॥
पुष्कलोऽथ पुरस्कारस्तेभ्यस्तिष्ठति तत्र च । [19]श्रद्धरा ये किला ऽल्लाहे वाग्घरेष्वस्य चाप्यथ ॥४०॥
भक्तिमन्तस्त एवा, ऽथो हुतात्मानो निजप्रभौ । तेभ्यस्तेषां पुरस्कारस्तत् प्रकाशश्च तिष्ठति ॥४१॥
श्रद्विहीनाः परं ये तु न्यषेधन्नायतांश्च नः । धिक्षदग्नौ त एवाऽथ भवन्ति पतयालवः ॥४२॥
[20]भाविकं जीवनं बोध खेलैवैकाऽथ कौतुकम् । बिभूषा किञ्च, युष्माकं परेभ्यो गौरवस्य धीः ॥४३॥
अर्थे ऽपत्येऽथ कामश्च वर्द्धितुं ह्युत्तरोत्तरम् । वानस्पत्येन तत्तुल्यं वृष्टेरूर्ध्वं, हि यद् भवेत् ॥४४॥
हृदयावर्जकं तेषां श्रद्विहीनास्तु ये जनाः । भवद् यद् यौवनोद्भिन्नं त्वयि पश्यति याति च ॥४५॥
पीतिमानं पुनश्चैव तृणसाद् यद् विवर्त्तते । कठोरा यातना किञ्च परलोके तु तिष्ठति ॥४६॥
क्षमाऽल्लाहस्य किञ्चैव प्रसादः पुनरेव च । माया संभारतो भिन्नं नान्यद् भाविकजीवनम् ॥४७॥
[21]अभियात क्षमां यूयं आरामं स्वप्रभोरथ । व्योमभिश्च धरित्र्या च समो वै विस्तरो ययोः ॥४८॥
सज्जिते ते पुनस्तेभ्यो श्रद्धरा वाग्घरेषु च । श्रद्धरा पुनरल्लाहे ये, तथा ऽयमनुग्रहः ॥४९॥
अल्लाहस्य, पुनस्तस्मै रोचते यस् स यच्छति । तदर्थं, तावदल्लाहो महानुग्रहवान् (ध्रुवम्) ॥५०॥
[22]आपतत्यापदा याऽपि युष्मासूर्व्यामथाऽपि वा । तस्यास्सर्गात् पुराऽस्माभि, रस्थात् सा पुस्तकेंऽकिता ॥५१॥
अत्यन्तं सुकरं चैतत् त्वल्लाहाय मतं ध्रुवम् । [23]स्यातोद्विग्ना न यद् यूयं लभ्यालाभान्न चाऽप्यथ ॥५२॥
लाभाद् दत्तस्य तिष्ठेत साभिमाना अतीव तु । अल्लाहस्य मतो नैव सदर्पोऽथ विकत्थनः ॥५३॥
[24]दानशीला न ये चैव, प्रेरयन्तीतरांश्च ये । वर्त्तनाय तथैवाऽथ; पराङ् आस्यश्च यो भवेत् ॥५४॥
निरपेक्षः किलाऽल्लाहः प्रशंसार्हस्ततोऽपि च । [25]प्रमाणैर्विशदैस्सार्धं वाग्घरान् प्रैषयाम च ॥५५॥
ध्रुवम्, शास्त्रं तुलां किञ्चाऽवातारयाम तैस्समम् । यथा लोकस् स्थिरो धर्मे तिष्ठेत्, लोहमथाऽपि च ॥५६॥
वातारयाम यत्राऽऽस्ते महती शक्तिराहिता । अनेकेऽप्युपयोगाश्च जनेभ्यस्, तदिदं यतः ॥५७॥
विजानीयात् किलाऽल्लाहस्तस्य साह्यं करोति कः । वाग्घराणाममुष्याऽथ न केनाऽप्युपलक्षितः ॥५८॥
अल्लाहो बलवान् किञ्च प्रभुताशाल्यसंशयम् । [26]प्रैषयाम वयं किञ्च वाग्घरत्वेन सूषकम् ॥५९॥
अब्रह्मञ्च, कृतं शास्त्रं तत्संतत्यां प्रतिष्ठितम् । वाग्घरत्वं पुनश्चैव, ततस्तेषान्तु केचन ॥६०॥
स्थिता भद्रेऽयनेऽन्ये च सावज्ञा बहवः परम् । [27]प्रैषयाम वयं पश्चाद् वाग्घराननुयायिनः ॥६१॥
अमीषां पद्धतेः, पश्चात् प्रैषयामेशमप्यथ । मर्यमायाः सुतं, तस्मै प्रादद्मञ्जीलकं वयम् ॥६२॥
ये च तस्यानुसर्त्तारस्तेषामस्माभिरन्तरे । करुणा च दया चैव खलूभे सन्निवेशिते ॥६३॥
भवत्यागस्वरूपा च तैरेवोद् भाविता पुनः । पद्धतिः, न परं दिष्टा तेभ्यो ऽस्माभिः कदाचन ॥६४॥
अल्लाहस्य प्रसादस्य कांक्षायाः, यद्विधं पुनः । कर्त्तव्यं पाल्यमासीत्तैस्तद् विधं तस्य पालनम् ॥६५॥

CC-0. In Public Domain. Digitized by eGangotri

न कृतं तैः, वयन्तेषां श्रद्धरेभ्यः पुरस्कृतिम् । अयच्छाम, परं तेषां सावज्ञा बहवो जनाः ।।६६।।
[४]"श्रद्दधाना जनाः ! यूयमल्लाहात् प्रबिभीत (भोः !) । वाग्घरेऽमुष्य सश्रद्धाः किञ्च तिष्ठत, वत्स वै ।।६७।।
दास्यत्यंशद्वयं स्वस्या दयायाः, लम्भयिष्यति । युष्मानेकं प्रकाशं च विहाराय हि वः पुनः ।।६८।।
क्षंस्यते च पुनर्युष्मान्, क्षम्यल्लाहो दयी तथा । [५]"एतदस्माद् यतो विद्युः सम्यक् शास्त्रविदोजनाः ।।६९।।
अल्लाहानुग्रहस्यामी प्रभवो न कथञ्चन । केवलोऽल्लाह एवाऽस्ति वशे यस्यास्त्यनुग्रहः ।।७०।।
यं स कामयते तस्मा एव चासौ प्रयच्छति । वर्त्तते तावदल्लाहो महानुग्रहवान् किल ।।७१।।

योगः—७१

CC-0. In Public Domain. Digitized by eGangotri

५८

सूक्तम्–विवादिनी

(अल-मुजादला)

(मदहीनावतीर्णा द्वाविंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

अथ अष्टाविंशं पारायणम्

[1]श्रुतवान् वाचमल्लाहस्त्वामुक्तां स्वपतिं प्रति । विवादिन्याऽथ साक्रन्दं याऽल्लाहं वेदयत्यपि ॥ १ ॥
श्रुतवान् किं च संलापमल्लाहो युवयोः पुनः । श्रोता द्रष्टा किला ऽल्लाहो भवत्यत्र न संशयः ॥ २ ॥
[2]युष्माकं ये निजस्त्रीषु त्वात्ममातृत्वधर्मणः । तिष्ठन्त्यारोपणास्तेन तेषां ता नैव मातरः ॥ ३ ॥
ता एव मातरस्तेषां सत्येन जन्मकारणम् । या अतिष्ठन् किलामीषां, याथार्थ्येन जना इमे ॥ ४ ॥
अशुभं भाषमाणा वै यत्तथाऽनृतसंहितम् । दयावांस्तावदल्लाहः क्षमी चैवाऽप्यसंशयम् ॥ ५ ॥
[3]युष्माकं ये निजस्त्रीषु त्वात्ममातृत्वधर्मणः । तिष्ठन्त्यारोपणाः पूर्वं व्युत्क्रामन्ति पुनस्तथा ॥ ६ ॥
ताभिस्समागमात् पूर्वं मुक्तिर्दासस्य कस्यचित् । कार्यैकस्य, भवत्येषा शिक्षा युष्मत् कृते ध्रुवम् ॥ ७ ॥
अल्लाहो वेदनस्तस्य यद् यूयं चरथाऽत्र च । [4]असौ यस्य न लभ्यस्स्यात् चरेत्तावदनारतम् ॥ ८ ॥
प्रायोपवेशनं द्वाभ्यां माभ्यां प्राङ् मैथुनान् मिथः । अशक्यं यस्य चैतत् स षष्टि मर्त्यान् हि भोजयेत् ॥ ९ ॥
इदञ्चास्माद् यतो यूयं अल्लाहे ऽस्य च वाग्घरे । श्रद्दधाना हि तिष्ठेत, सीमान्येतान्यथो पुनः ॥१०॥
अल्लाहेन प्रदिष्टानि, श्रद्धरा ये तु नो जनाः । तिष्ठन्ति कारणास्तेभ्यो घोराः कष्टप्रदाः किल ॥११॥
[5]अल्लाहं वाग्घरञ्चास्य ये विरुन्धन्ति मानवाः । यास्यन्त्यधोगतिं ते वै यथा तत् पूर्वजास्तथा ॥१२॥
आयातानां वतारश्च विशदानां कृतः पुनः । अस्माभिः, यातना घोरा ऽश्रद्धरेभ्यश्च तिष्ठति ॥१३॥
[6]दिने यस्मिंस्तथा ऽल्लाहः पुनरुत्थापयिष्यति । (मृत्योरूर्ध्वम्) समानेव तांश्च संसूचयिष्यति ॥१४॥
यत् कृतं तैस्सुसंख्याय खल्वल्लाहो हि तिष्ठति । तद्धि, तैर्विस्मृतं त्वेव परं तत्, सर्वमेव च ॥१५॥
अल्लाहस्य पुरस्सर्वम्; [7]युष्माभिः किन्न चेक्षितम् । अल्लाहो वेत्ति तत् सर्वम् यदुर्व्यां यद् वियत्स्वथ ? ॥१६॥
त्रयाणां न रहो मन्त्रश्चतुर्थस्स्यान्न यत्र सः । पञ्चानां न रहो मन्त्रष्षष्ठस्स्यान्न च यत्र सः ॥१७॥
ततश्चोनाधिकानां वा रहो मन्त्रो न तादृशः । सन्तु कुत्राऽपि ते यत्र विद्यमानो भवेन्न सः ॥१८॥
यच्च किंचित् कृतं तैस्तु तान् हि तत् कारयिष्यति । अवगतं तथा चैव पुनरुत्थापना ऽह्नि ॥१९॥
सर्ववित्तावदल्लाहो वर्त्तते नाऽत्र संशय । [8]युष्माभिस्ते न किं दृष्टा वारिता अभवन् हि ये ॥२०॥
रहो मन्त्रात्, परं यस्माद् वारिता अभवन् हि ते । अन्वतिष्ठंस्तदेवामी, मिथो मग्नास्त आसत ॥२१॥
पापचर्या रहो मन्त्रे तन्त्रेऽत्याचाररूपिणि । वाग्घरस्याऽप्यवज्ञायां, यदा युष्मानुपासत ॥२२॥
ते वचोभिस्तदामीभिरभूवन्नति तत्पराः ।

('युष्मासु शान्तिरस्तु इति स्थाने युष्मासु सातिरस्तु' इति वाचः)

CC-0. In Public Domain. Digitized by eGangotri

यै र्न युष्मान् किला ऽल्लाहो ऽभवन्नन्तुं तु तत्परः ॥२३॥
ये वदन्त्यात्मना किञ्च कस्मादस्मांस्तु दण्डयेत् । अल्लाहोऽस्मत्कृतैस्, तेभ्यो निरयो धाम तूचितम् ॥२४॥
यञ्च वेक्ष्यन्ति ते तच्च यात्रान्तं दुष्टधाम वै । [9]श्रद्धरा हे जना ! यूयं रमध्वे गुप्तमन्त्रणे ॥२५॥
यदा परस्परं मैव रमध्वं गुप्तमन्त्रणे । पापचर्यात्मके किं चाऽप्यत्याचारात्मके पुनः ॥२६॥
वाग्घरस्याऽप्यवज्ञाने, मन्त्रयध्वं परस्परम् । भद्रभावात्मकं चैव किञ्चा ऽल्लाहाद् दरात्मकम् ॥२७॥
विभीत यूयमल्लाहाद् विधास्यध्वे हि संहृताः । यत्र यूयं समे चाऽपि; [10]रहो मन्त्रोऽयमस्ति च ॥२८॥
शातनात् प्रेरितो येन श्रद्धरान् पीड़येदसौ । परं शक्नोति नैवाऽसौ प्रतीपं चरितुं क्वचित् ॥२९॥
तेषां यावत् समादेशो नाऽल्लाहस्य तु जायते । श्रद्धराः पुनरल्लाहं प्रतियन्तु च केवलम् ॥३०॥
[11]श्रद्धरा हे जना ! यूयं यदा प्रोक्ता भवेत हि । उपकल्पयत स्थानं तदा संसत्सु तत्क्षणम् ॥३१॥
युष्मदर्थेऽपि चाल्लाहस्स्वौदार्यं वितनिष्यति । आसनेभ्यो यदा प्रोक्ता भवेतोत्तिष्ठताऽपि च ॥३२॥
श्रद्दधाना अभूवन् ये युष्माकं ज्ञानिनश्च ये । उच्चैस्तरान् पदान् तान् वै किला ऽल्लाहः प्रणेष्यति ॥३३॥
यद् यद् यूयं कुरुध्वे च वेत्त्यल्लाहस्समं हि तत् । [12]श्रद्धरा हे जना ! यूयं किंचिद् दानं प्रयच्छत ॥३४॥
प्रक्रमे गुप्तमन्त्रस्य वाग्घरेण समं (ध्रुवम्) । पावनं श्रेष्ठमप्येतद् युष्मभ्यं किं च वर्त्तते ॥३५॥
अशक्ता यदि तत् कर्त्तुं यूयं तन्नाऽत्र संशयः । क्षमाशीलः किला ऽल्लाहो दयावान्त्सुमहानथ ॥३६॥
[13]'प्रक्रमे गुप्तमन्त्रस्य किंचिददानम्' अहो नु किम् । जायते हृत्सु वस्त्रासः ? तदस्या ऽकरणेऽथ च ॥३७॥
अल्लाहस्य दयाभावे किं च युष्मासु तिष्ठति । पूजां प्रतिष्ठितां यूयं कुर्यात किं च यच्छत ॥३८॥
दरिद्रेभ्यः पुनर्दानं वाग्घराऽल्लाहयोरथ । कुर्याताऽऽदिष्टवाक्यञ्च; वेत्त्यल्लाहस्समं हि तत् ॥३९॥
यद् यद् यूयं विचेष्टध्वे; [14]युष्माभिः किन्न चेक्षितम् । ते जनाः कृतसम्बन्धास्तैस्समं ये किला ऽभवन् ॥४०॥
येष्वल्लाहप्रकोपोऽभूद् रागस्तेषां न तैस्समम् । नाऽथ युष्माभिरप्यस्ति, विदन्तः खल्विमे जनाः ॥४१॥
असत्ये साग्रहास्सन्तश्शपन्ते; [15]घोरकारणा । अल्लाहेन किलैतेभ्यः कृता सज्जा तु तिष्ठति ॥४२॥
ध्रुवं तद् गर्हितं यत्ते चेष्टमाना इहासते । [16]शपनानि विधायैते चर्मत्राणानि मानवाः ॥४३॥
अत्र तिष्ठन्ति, लोकांश्च वारयन्त्यध्वनः प्रभोः । प्रतीक्षातत्पराऽस्त्येभ्यो यातनाऽतो गरीयसी ॥४४॥
[17]सार्थका नैव रायश्च सन्ततिर्नापि सार्थिका । अल्लाहाग्रे भवेदेषां, अग्निवासा इमे जनाः ॥४५॥
तत्र वत्स्यन्ति शश्वच्च; [18](जीवयित्वा भृशं) यदा । समुद्बोधयिता ऽल्लाहस्समानेतानिमे तदा ॥४६॥
यद् वद् युष्माकमग्रे प्राक् शप्स्यन्ते तद् वदेव तु । तदग्रे चापि, मन्यन्ते साधारान् त्स्वानिमे पुनः ॥४७॥
बुध्यतां परमेते तु सर्वथाऽसत्यमाश्रिताः । [19]शातनो व्याप्तवानेतान्, दुष्प्रभावः कृतस्स च ॥४८॥
यत् स्थितास्सर्वथा ऽल्लाहं तावद् विस्मृत्य खल्वमी । शातनस्य गणोऽस्त्येभिश्श्रितो, विज्ञायतामिदम् ॥४९॥
शातनस्य गणस्त्वेव हानिभागत्र तिष्ठति । [20]अल्लाहं वाग्घरञ्चास्य ये विरुन्धन्ति मानवाः ॥५०॥
त एवाऽग्रसरा अत्र पतितानां भवन्ति ह । [21]दिष्टपूर्वमिदं तावदल्लाहेन च वर्त्तते ॥५१॥
वाग्घरा मम चाऽहञ्च विजेष्यामह एव तु । प्रभुत्वाच् छालते ऽल्लाहो वली चासावतीत्य हि ॥५२॥
[22]श्रद्धरांस्तावदल्लाहे चरमाहे च मानुषान् । द्रक्ष्यसि त्वं न कुत्राऽपि तावन्मैत्र्यमुपागतान् ॥५३॥
तैः समं ये विरुन्धाना अल्लाहं चास्य वाग्घरम् । सत्सु चैवाऽपि तेष्वेषां सुतेषु जनकेषु वा ॥५४॥
भ्रातृषु सत्सु वा तेषां सत्सु कौटुम्बिकेषु वा । त एव हृत्सु येषां स विश्वासं तावदांकयत् ॥५५॥
आत्मद्वारेण च स्वस्मात् तान् बलाढ्यानपि व्यधात् । वेशयिष्यति चैवाऽमूंस्तादृशोपवनेष्वथ ॥५६॥
वहन्त्यो यत्र नद्यो वै तत्र वत्स्यन्ति ते सदा । तेष्वल्लाहः प्रसन्नस्ते प्रसन्नास्तत्र खल्वथ ॥५७॥
अल्लाहस्य गणोऽस्त्येभिश्श्रितो विज्ञायतामिदम् । अल्लाहस्य गणस्त्वेव सफलो भविता ध्रुवम् ॥५८॥

योगः—५८

CC-0. In Public Domain. Digitized by eGangotri

५९

सूक्तम्—निर्वासनम्

(अल-हश्र)

(मदहीनाऽवतीर्णाश्चतुर्विंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]तत्तदल्लाहशंसीह यद् यद् व्योमसु विद्यते । विद्यते यत्तथैवोर्व्यां स सुधीस्स प्रभुस्तथा ॥ १ ॥
[2]स एव शास्त्रिणां यश्च श्रद्विहीनान् जनान् किल । अकृतैषां गृहेभ्यो हि प्रोषितान् प्रथमे क्रमे ॥ २ ॥
तर्कितं न त्वया त्वासीत् त्यक्त्वा यास्यन्ति यद्धि ते । त्रास्यन्ति तद् गृहास्तेषामल्लाहान्मतिरास्त तु ॥ ३ ॥
आवृणोत् परमल्लाहस्तान् दिशायास्ततो यतः । ध्यानमेवाऽभवन्नैव, त्रासञ्चै वोदपादयत् ॥ ४ ॥
हृत्सु तेषां, ततस्ते च स्वान् समारेभिरे गृहान् । श्रद्धराणां स्वकीयैश्च करैर्नाशयितुं (द्रुतम्) ॥ ५ ॥
यूयं किंचन शिक्षध्वमक्षिमन्तो जना ! अतः । [3]आदेक्ष्यद् यदि नाऽल्लाहस्तेभ्यो निर्वासनं क्वचित् ॥ ६ ॥
अतोत्स्यद् यातनाभिस्तानिहैव स भवे पुनः । अग्निजा कारणा तांश्च परलोके प्रतीक्षते ॥ ७ ॥
[4]इदञ्चास्माद् व्यरुंधंस्तेऽल्लाहं तद् वाग्घरं च यत् । बुध्यतां योऽपि चाऽल्लाहं तावदत्र विरोत्स्यति ॥ ८ ॥
तस्य तिष्ठति सोऽल्लाहो ह्युग्रदण्डोऽ(तिभीषणः) । [5]खर्जूरस्य च यश्शालो युष्माभिः कृत्त आस्त वै ॥ ९ ॥
केवलेष्वेव मूलेषु किम्वा स्थातुमदीयत । तदेतत् सर्वमप्यासीदल्लाहानुज्ञयैव तु ॥१०॥
तद् पुनः क्षोभणायाऽभूदवज्ञाकरिणां नृणाम् । [6]प्रापयच्चहृतं वित्तं तेभ्योऽल्लाहो हि यत् पुनः ॥११॥
वाग्घरं स्वं, न तद्धेतोर्युष्माभिर्धाविता हयाः । धाविताश्चापि नैवोष्ट्राः, अल्लाहो वाग्घरान्निजान् ॥१२॥
यस्मिन् कामयते तस्मिन् प्रभून् वै कुरुते ध्रुवम् । सर्वसामर्थ्यभृत् तावत् किलाल्लाहोऽत्र तिष्ठति ॥१३॥
[7]वाग्घरं प्रापयेद् यच्च वित्तमल्लाह आहृतम् । वसतिस्थजनेभ्यस्तु तत्राल्लाहाधिकारिता ॥१४॥
वाग्घरस्याऽथ बन्धूनां तस्य, किं चैव यात्रिणाम् । अनाथानां परापेक्षं स्थितानां पुनरेव च ॥१५॥
चक्रवत्तन्न यद् यायाद् वित्तेशेषु भृशं हि वः । वाग्घरः प्रतियच्छेद् यत् तत् स्वीकार्य (मशंकितम्) ॥१६॥
वारयेच्च पुनर्यस्मात् ततो दूरं च गम्यताम् । मन्यतां भीतिराल्लाही किं च, नैवाऽत्र संशयः ॥१७॥
कर्कशो दण्डदानेऽसावल्लाहो वर्त्तते सदा । [8]वेश्मनिर्वासितेभ्यश्च गताध्वभ्यस् (तद) स्ति च ॥१८॥
दरिद्रेभ्यो हि ये स्वेभ्यो ऽल्लाहस्यानुग्रहं सदा । प्रसादञ्चाभिकांक्षन्ते, साह्यमप्याचरन्ति च ॥१९॥
अल्लाहस्य तथैवाऽस्य वाग्घरस्य निरन्तरम् । भक्तिमन्तो भवन्त्यत्र त एव (परमं) जनाः ॥२०॥
[9]ये वसन्ति गृहे त्वस्मिन् पूर्वतो ह्येव मानवाः । श्रद्दधानाश्च तिष्ठन्ति, तेषां रागोऽस्ति तैस्सह ॥२१॥
ये पलाय्योपयातास्तान्, यच्च तेभ्यः प्रदीयते । तेन तद्हृत्सु नो कश्चिद् विक्षोभश्चापि जायते ॥२२॥
'अस्माकं प्रथमा एते' इत्थं व्यवहरन्ति च । तेन तेषां भवेन्नाम दारिद्र्यं चापि तेन किम् ॥२३॥
आत्मनो ये मनोलोभादत्र रक्षन्ति मानवाः । त एव येऽत्र लब्धारस्साफल्यं (सुमहत् किल) ॥२४॥
[10]उपेता येऽथ पश्चात्ते वदन्त्यस्मत् प्रभो ! हि नः । अस्माद्भ्रातृंश्च येऽतिष्ठन् प्रत्ययाधान आत्मनि ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

अस्मदग्रेसरास्त्वं (भोः) क्षमस्व, यैस्तथाऽऽहिता । श्रद्धा तेभ्यो न विद्वेषं जनयाऽस्मासु कंचन ॥२६॥
प्रभो नस्त्वं दयी चासि कारुण्योपेत एव च । [11]किन्न दृष्टास्त्वया ते वै दम्भिनो ये वदन्ति च ॥२७॥
शास्त्रिणां श्रद्विहीनान् 'चेद् यूयं कच्चिद् भविष्यथ । निष्कासिता वयञ्चापि समं युष्माभिरेव तु ॥२८॥
प्रयास्यामो बहिर्नाऽथ कस्याप्युक्तं कदाचन । युष्मद् विरोधनं तावत् सत्यं मंस्यामहे पुनः ॥२९॥
युष्माभिस्समापन्ने कलहे च वयं ध्रुवम् । युष्मत् साह्यं विधास्यामस्, साक्ष्यल्लाहस्तु तिष्ठति ॥३०॥
यत्ते मिथ्यापरास्सत्यम्; [12]इदं याथार्थ्यमेव च । यदि निष्कासितास्तत्ते तानन्वेष्यन्ति नो क्वचित् ॥३१॥
आपन्ने कलहे नाऽथ विधास्यन्ति सहायताम् । कृत्वा साह्यं पुनस्ते च झटित्येव परेत्य तु ॥३२॥
दर्शयन्तो हि पृष्ठानि धाविष्यन्ति (जवेन हि) । न चाऽतस्ते पुनस्साह्यं विन्दिष्यन्ति तु किंचन ॥३३॥
[13]त्वद्भयं हृदयासीनममीषांमतियाय वै । अल्लाहस्य भयञ्चापि कारणेनामुना च तत् ॥३४॥
इमे लोका हि ते येषां बोध एव न कश्चन । [14]संहता अपि योत्स्यन्ते न त्वयैते जनाः किल ॥३५॥
दुर्गरूपेषु वासेषु भित्तिपृष्ठेषु सत्सु तु । कथैवाऽन्या भवेन्नाम, गरीयान् हि परस्परम् ॥३६॥
भवत्येषां विरोधो वै, मन्यसे संहतानिमान् । भिन्नभिन्नानि तिष्ठन्ति स्वान्तान्येषां तु यद्यपि ॥३७॥
इदं चास्माद् यतो नैते धिया संपालिता जनाः । [15]यथा लोका हि ते किंचित् पूर्वमस्मात् स्वकर्मणाम् ॥३८॥
अभाक्षुर्दुःखदोदर्कं, तेभ्यः किं चापि तिष्ठति । दुःखदा कारणा घोरा; [16]ते च शातनसदृशाः ॥३९॥
येऽवदन् मानवम् 'त्वं (भोः) श्रद्विहीनत्वमाचर' । चरिते श्रद्विहीनत्वे तेन तं पुनराह च ॥४०॥
'अहं त्वत्तः पृथग्वर्त्ते, ममाल्लाहाद् भयं पुनः । यः प्रभुर्वर्त्तते तावत् समेषां जगतामपि' ॥४१॥
[17]उदर्कश्चैष खल्वस्य यदुभावपि खल्विमौ । गतौ हुताशनं यत्र वत्स्यतस्तौ निरन्तरम् ॥४२॥
दुष्कृतामीदृशस्त्वैव पुरस्कारोऽत्र तिष्ठति । [18]श्रद्धरा हे जना ! यूयमल्लाहात् प्रबिभीत (भोः) ॥४३॥
योऽपि कोऽपि जनश्चात्र पश्येदेतत् (सुनिश्चितम्) । प्रेषितं तेन किं तावद् दिनायागामिनेऽद्य हि ॥४४॥
बिभीत यूयमल्लाहादल्लाहो वेत्त्यसंशयम् । यत् किमप्यत्र चेष्टध्वे यूयं तावत् समे जनाः ॥४५॥
[19]व्यस्मरन् ये किलाल्लाहं स्यात यूयं न तद् विधाः । प्रैरयत्तेन चैवाऽपि तानसौ व्यस्मरन् यथा ॥४६॥
आत्मनस्सवंथैवाऽमी, दुष्कृतश्चैत एव तु । [20]ये किलारामवन्तोऽत्र, वह्निमन्तश्च ये परे ॥४७॥
न कथञ्चित्तयोस्साम्यम्, जेतारस्ते ह्यसंशयम् । ये किलारामवन्तोऽत्र; [21]पर्वते कुत्रचिद् वयम् ॥४८॥
अकरिष्याम यद्यस्य कुराणस्यावतारणाम् । अद्रक्ष्यः पर्वतं तं त्वं संभ्रान्तिं समुपागतम् ॥४९॥
अल्लाहस्य भयाच्चैव स्फुट्यमानं निरन्तरम् । प्रस्तुमो वयमीदृक्षान् दृष्टान्तान् लोकसन्निधौ ॥५०॥
आरभन्तां यथाऽनेन चिन्तनं ते जनाः खलु । [22]अल्लाहोऽसौ न यं क्रान्त्वा प्रतीष्टः कश्चनेतरः ॥५१॥
प्रत्यक्षस्य परोक्षस्य ज्ञाताऽसावेव वर्त्तते । कृपाशीलो महान् किं च दयावानपि खल्वसौ ॥५२॥
[23]अल्लाहो ऽसौ न यं क्रान्त्वा प्रतीष्टः कश्चनेतरः । सर्वेणो ऽतिगुणोपेतस्स एव रक्षकः परः ॥५३॥
शान्तिरूपो महान् किं च प्रभविष्णुस्तथैव च । काशते ऽसौ प्रभुत्वेन, प्रतिम्नो घटयन्ति ये ॥५४॥
तस्य तत् तन्महिम्नोऽस्ति प्रतिकूलं हि सर्वथा । [24]अल्लाहो ऽसौ पुनस्स्रष्टा तथैवाकृतिकृत्परः ॥५५॥
यथावद्योजनश्चासौ, मनोहारीण्यमुष्य च । सन्त्यनेकानि नामानि, तञ्च शंसत्यनारतम् ॥५६॥
आकाशेषु यदप्यस्ति, यद् धरित्र्याञ्च तिष्ठति । काशतेऽसौ प्रभुत्वेन, तत्वदर्शीमतश्च सः ॥५७॥

योगः—५७

CC-0. In Public Domain. Digitized by eGangotri

६०

सूक्तम्–परीक्षणीया

(अल-मुम्तहना)

(मदहीनाऽवतीर्णाः त्रयोदशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]श्रद्धरा हे जनाः ! यूयमात्मनो मे च ये द्विषः । कार्ष्ट मैवात्मनीनांस्तान्, मैत्र्यपाणिः प्रसार्यते ॥ १ ॥
युष्माभिस्तानभि त्वेव, ते पुनस्तादृशा हि ये । न्यषेधन् एव तत्सत्यमुपैद् युष्मान् हि यद् (ध्रुवम्) ॥ २ ॥
सारयन्ति वहियुष्मान् वाग्घरं चापि तेऽमुना । श्रद्दधानाः प्रभौ स्वीये यतो यूयं हि तिष्ठथ ? ॥ ३ ॥
निस्सृताः स्यात योद्धुं चेन्मन्मार्गे कृतनिश्चयाः । मत्प्रसादस्य लाभाय किञ्च; मैत्र्यं विधीयते ॥ ४ ॥
तैस्समं (हन्त !) युष्माभिः गुप्तरूपेण सर्वथा । अहं जाने च तत् सम्यग् यद् युष्माभिस्तु संवृतम् ॥ ५ ॥
विवृतं यच्च, यः कोऽपि युष्मास्वित्थं चरिष्यति । ऋजोर्मार्गात् परिभ्रष्टोऽसंशयं स भविष्यति ॥ ६ ॥
[२]लभेरन् यदि ते युष्मान् प्रभविष्यन्ति ते पुनः । युष्मासु, पीडनार्थञ्च युष्माकं रसनां निजाम् ॥ ७ ॥
निजान् व्यापारयिष्यन्ति करांश्चैवोत्तरोत्तरम् । यूयञ्चापि गतश्रद्धास्स्यातोशन्ति च ते पुनः ॥ ८ ॥
[३]साधका न हि कार्यस्य पुनरुत्थापनाहनि । सपिण्डा युष्मदीया वै भविष्यन्ति न सन्ततिः ॥ ९ ॥
अंन्तराले स युष्माकं विभेदं जनयिष्यति । तत्तत् पश्यति चाल्लाहो युष्माभिः क्रियतेऽत्र यत् ॥१०॥
[४]अब्रह्मस्तस्य ते मर्त्या येऽनुयाताश्च तं तथा । युष्मभ्यं भासमाना हि सूत्तमादर्शरूपतः ॥११॥
बान्धवान् स्वान् यदाहुस्ते-विप्रकर्षं यदा गताः । युष्मद् यश्च प्रतीष्टो व ऋते ऽल्लाहं ततोऽपि च ॥१२॥
मता यूयन्तु नोऽस्माकमिदानीं खलु तिष्ठथ । शत्रुता च समुद्गीर्णा द्वेषश्शश्वत् तथैव च ॥१३॥
युष्मदीयाऽस्मदीयानामुभयोर्गणयोः पुनः । केवले यावदल्लाहे श्रद्दधाना भवेत नो ॥१४॥
अथैतत् चापि तातं स्वं अब्रह्मस्तावदूचिवान् । क्षमाहेतोरहं ते च भविता प्रार्थको ध्रुवम् ॥१५॥
अल्लाहाग्रे मयाऽशक्यं कर्त्तुं तुभ्यन्तु किञ्चन । प्रभो नः! प्रत्ययाधानं त्वय्येवाकार्ष्म (भोः !) वयम् ॥१६॥
त्वामेवाभिप्रवृत्ताश्च, गन्तव्यश्च त्वमेव नः । [५]प्रभो नः ! श्रद्विहीनानामस्मान् भोज्यं विधेहि नो ॥१७॥
प्रभो नस् ! त्वं क्षमस्वास्मान्; नात्र कश्चिच्च संशय । त्वमेव तत्वदर्शी च प्रभुतामय एव च ॥१८॥
[६]युष्मभ्यं भासमानास् ते सूत्तमादर्शरूपतः । ध्रुवं—तस्मै च सर्वस्मै जनाय यः प्रतीक्षते ॥१९॥
अल्लाहं चरमाहञ्च; भवेद् यस्तु पराङ्मुखः । ततस्तेनाऽपि बोद्धव्यमल्लाहो वर्त्तते ध्रुवम् ॥२०॥
अपेक्षारहितस्सत्यं प्रशंसाऽर्हस्तथैव च । [७]संभवं तावदेतच्च यदल्लाहः कदाचन ॥२१॥
जनयेत् तैस्समं मैत्र्यं युष्माकमद्य वर्त्तते । विरोधो यैस्समं तावत्, अल्लाहो बलवानति ॥२२॥
दयावानपि चाल्लाहः क्षमाशीलस्तथैव सः । [८]ये नाऽयुध्यन्त युष्माभिर्मतस्य कारणादथो ॥२३॥
युष्मान् युष्मद् गृहेभ्योऽपि न तथा निरकासयन् । वारयत्येव नाल्लाहो युष्मान् यत्तैरनुग्रहः ॥२४॥
दर्शितो यदि युष्माभिर्न्यायः किम्वा भवेत् कृतः । स्नेहाचारः किलाल्लाहो न्यायाचारेषु तिष्ठति ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[९]ये त्वयुध्यन्त युष्माभिर्मतस्य कारणादथो । युष्मान् युष्मद् गृहेभ्यो ऽपि सर्वथा निरकासयन् ॥२६॥
आचरन् किञ्च साहृयं ये युष्मन् निष्कासने पुनः । वारयत्येव सोऽल्लाहो युष्मांस्तेषाँ हि संगतात् ॥२७॥
मैत्र्यस्यापादनाच्चापि, यश्च कश्चापि तैर्जनैः । मैत्र्यमापादयेत्, ते हि जाल्मा मर्त्यास्तु तद्विधाः ॥२८॥
[१०]श्रद्धरा हे जनाः ! युष्मान् श्रद्दधानास्स्त्रियो यदा । त्यागात् पलाय्य गच्छन्ति, परीक्षध्वं हि ता ध्रुवम् ॥२९॥
वेत्ति सम्यगमूषां हि श्रद्धामल्लाह एव सः । प्रत्ययो जायते चेद् वः (परीक्षाया अनन्तरम्) ॥३०॥
प्रेषणीया न ताः पश्चाद् गतश्रद्धजनान्तिकम् । ता न तेभ्यः क्वचिद् वैधाः, ताभ्यो वैधा न तेऽथ च ॥३१॥
व्ययो यावान् कृतस्तासु तेभ्यो देयस्समश्च सः । मह्रे दत्ते पुनश्चेत् ता भवन्त्यूढा न कश्चन ॥३२॥
तत्र दोषोऽस्ति युष्माकम्, श्रद्विहीनाः स्त्रियश्च याः । स्वाधिकारस्य कारायां निगृह्णीत न ताः क्वचित् ॥३३॥
कृतं यूयं व्ययं ताभ्यो याचत तास्तथैव च । कृतं निजं व्ययं युष्मान् याचेयु (रविशंकितम्) ॥३४॥
निर्णयोऽयं किलाल्लाहान्, निर्णेता स च तिष्ठति । मध्ये युष्मानथाल्लाहो विज्ञः किञ्च सुधीरपि ॥३५॥
[११]युष्मज्जायास्त्वथो काश्चित् श्रद्विहीनान् प्रयान्तु चेत् । ऊर्ध्वं तस्मादुपायातु युष्मद् वारोऽथ चेत् क्वचित् ॥३६॥
दत्त तेभ्यो व्ययीभूतं धनं येषान्तु योषितः । त्यक्त्वा तानुपयातास्स्युरल्लाहात् प्रबिभीत च ॥३७॥
यत्र श्रद्धा हि युष्माकं तत्वतोऽत्रस्थिर्ति गता । [१२]योषितश्श्रद्धरा एत्य वाग्घर ! प्रार्थयन्ति चेत् ॥३८॥
विनयात् त्वाम्—"वयं कञ्चिद् घटयिष्याम एव नो । अल्लाहप्रतिमानं वै, चरिष्यामश्चुरान्न च ॥३९॥
व्यभिचारं न, हत्यां नो विधास्यामस्स्वसन्ततेः । कञ्चनाऽप्यपवादं वा करांघ्र्योः कारणोद्भवम् ॥४०॥
नोद्भवं गमयिष्यामो नियोगोल्लंघनञ्च ते । कीदृशेष्वपि भद्रेषु विधास्यामो न कर्मसु" ॥४१॥
इतीत्थं प्रार्थनां तासां त्वन्तावदुररीकुरु । क्षमाहेतोः पुनस्तासां अल्लाहं अर्थयस्व च ॥४२॥
क्षमाशीलः किलाल्लाहो दयावानपि च ध्रुवम् । [१३]अल्लाहस्य प्रकोपस्य भाजनानीह ये जनाः ॥४३॥
श्रद्धरा ! तत्समं नैव यूयं मैत्र्यं विधत्त (भोः !) । हताशाः परलोके ते जाता कब्राश्रिता यथा ॥४४॥
श्रद्विहीना जना जाता हताशास्तावदासते ।

योगः—४४॥

CC-0. In Public Domain. Digitized by eGangotri

६१

सूक्तम् बद्धपंक्तयः

(अस-सफ़्फ़)

(मदहीनाऽवतीर्णाः चतुर्दशायाताः)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[1]तत्तदल्लाहशंसीह यद् यद् व्योमसु तिष्ठति । विद्यते यत् तथैवोर्व्यां स सुधीस्स प्रभुस्तथा ॥ १ ॥
[2]श्रद्धरा हे जनाः ! यूयं किं तावत् तत् प्रजल्पथ । कुरुध्वे यन् न वै यूयम् ?; [3]अल्लाहस्य तदप्रियम् ॥ २ ॥
अत्यर्थं जल्पनं यद् वः कृतिर्यन्नानुगच्छति । [4]तेष्वल्लाहस्य रागोऽस्ति ध्रुवं ये बद्धपंक्तयः ॥ ३ ॥
भूत्वा युद्धपराः सन्ति तस्य मार्गे, स्थिरास्तथा । तद् विधं यद् विधा भित्तिर्भवेद् वज्रकृता दृढ़ा ॥ ४ ॥
[5]स्मर्यतां किञ्च तन्मूषस्स्वज्ञातीरवदद् यदा । "ज्ञातयो मे ! कथं यूयं तुदथ मां तु यद्यपि ॥ ५ ॥
वित्थ यूयं यदल्लाहः कृत्वा स्वं वाग्घरं हि माम् । प्रैषयद् युष्मदभ्याशे; तिर्यञ्चस्ते यदाऽभवन् ॥ ६ ॥
तत् स्वान्तान्यपि चाल्लाहस्तिर्यञ्चि व्यदधात् पुनः । वर्त्म दर्शयते ऽल्लाहः किञ्च नैवाऽवजानतः ॥ ७ ॥
[6]स्मर्यतां मर्यमापत्यं यदा चेशोऽवदत्तथा । ईश्वरालीनवंश्या भोः ! कृत्वा स्वं वाग्घरं हि माम् ॥ ८ ॥
अल्लाहः प्रैषयद् युष्मान्, तौरातं यच्च तिष्ठति । पुरस्तान्मे भवाम्येष तस्य चैव समर्थकः ॥ ९ ॥
उद्गिराम्यथ वृत्तं वः एकस्य वाग्घरस्य च । उपेता मम पश्चाद् यो भूत्वाऽहम्मद संज्ञितः ॥१०॥
उपेतस्तान् यदा चासौ प्रमाणैर्विशदैस्समम् । तेऽवदन्—"सर्वथैवैषा माया तिष्ठति केवला" ॥११॥
[7]तस्माज्जाल्मतरः कश्च योऽनृतारोपणो भवेत् । अल्लाहे स समाहूतश्शान्तिमार्गे भवेद् यदा ? ॥१२॥
वर्त्म दर्शयते ऽल्लाहो नैव जाल्मान् कदाचन । [8]कामयन्ते च ते द्योतमाल्लाहं मुख (वायुना) ॥१३॥
शमयितुं परमल्लाहः पूर्णतामेव नेष्यति । स्वद्योतं, श्रद्विहीनानामप्रियं तद् भवेदपि ॥१४॥
[9]स एव वाग्घरं स्वं यः प्रैषयत् सत्यधर्मणा । दर्शनेनायनस्याऽथ समं धर्मे ऽखिलेऽपि यत् ॥१५॥
प्रभुत्वं प्रापयेत्तस्य स वै, ये मूर्त्तिपूजकाः । तेषामप्रियमेतत्तु भवेच्चाप्यतिमात्रकम् ॥१६॥
[10]ब्रवाणि किं न्वहं युष्मान् एकं व्यापार (मद्य भोः !) । श्रद्धराः ! रक्षिता युष्मान् कारणाया हि यः किलः ! ॥१७॥
[11]तिष्ठत श्रद्धरा यूयमल्लाहे ऽस्य च वाग्घरे । मार्गे ऽल्लाहस्य युध्यध्वं स्वासुभिस्स्वैर्धनैस्तथा ॥१८॥
इदं श्रेयस्करं स्याद् वो, ज्ञानञ्चेद् विभृथ क्वचित् । [12]क्षंस्यते ऽसौ च पापानि युष्माकं वेशयिष्यति ॥१९॥
आरामेषु पुनर्युष्मान् तादृशेषु वहन्ति हि । यदधस्सरितस्तावत्, किञ्च हर्म्येषु यानि हि ॥२०॥
सुखारामान्तरस्थानि; साफल्यं सुमहत् त्विदम् । [13]अन्यच्चापि (महत्) काम्यं युष्माकम्-सा सहायता ॥२१॥
अल्लाहाद्, विजयश्चापि विप्रकृष्टोऽस्ति यो न वै । श्रद्धरेभ्यश्शुभं वृत्तं देयमेतच्च (वाग्घर !) ॥२२॥
[14]श्रद्धरा हे जनाः ! यूयं सहाया भवतेह च । अल्लाहस्य, यथैवेशो मर्यमापत्यमूचिवान् ॥२३॥
शिष्यान्स्वीयान् 'सहाया मे मार्गेऽल्लाहस्य के जनाः ?'। "अल्लाहस्य सहाया वै वयमेते" ऽवदन् हि ते ॥२४॥
ईश्वरालीनवंश्यानां गणश्चैकोऽभवत् पुनः । श्रद्धानोऽपरोऽभूच्च श्रद्विहीनो हि सर्वथा ॥२५॥
श्रद्धरेभ्यस्त्वयच्छाम वयं साह्यमुपस्थिते । विरोधे तद् द्विषां येन गौरवात् प्राभवन् हि ते ॥२६॥

योगः—२६

CC-0. In Public Domain. Digitized by eGangotri

६२

सूक्तम्–समूहः

(अल-जुमुआ)

(मदहीनाऽवतीर्णा एकादशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]तत्तदल्लाहशंसीह यद् यद् व्योमसु विद्यते । विद्यते यत् तथैवोर्व्यां, सर्वेणो गुणवांश्च सः ॥ १ ॥
प्रभुत्वाद्भासनश्चैव तत्वदर्शी तथैव च । [2]स एवाऽपठितानां यो मध्यतश्चोदभावयत् ॥ २ ॥
तेष्वेव वाग्धरं ह्येकमायातान् श्रावयत्यलम् । यश्च तान् व्याख्यया तस्य विशदान् प्रकरोति च ॥ ३ ॥
यश्च शास्त्रञ्च वुद्धिञ्च शिक्षया वितरत्यपि । प्राक्ततो व्यक्तमासंस्ते भ्रष्टाध्वानो हि यद्यपि ॥ ४ ॥
[3]तेषामेव तथैवान्यान् तै र्न ये ऽद्यापि संगताः । प्रभुत्वात् कासमानो ऽसौ तत्वदर्शी तथैव च ॥ ५ ॥
[4]अल्लाहानुग्रहो ऽस्त्येष, यं स कामयतेऽथ च । तस्मै एव ददात्येनं महानुग्रहवान् प्रभुः ॥ ६ ॥
[5]साम्यं विभ्रति ते तेन खरेण ग्रन्थवाहिना । भारः क्षिप्तो ऽभवद् येषु तौरातस्य, परं न ये ॥ ७ ॥
अकुर्वंस्तस्य निर्वाहम्, साम्यंहीनतमं हि तत् । तेषामखण्डयन् येऽत्र किला ऽल्लाहस्य सर्वदा ॥ ८ ॥
आयातानथ नाल्लाहो मार्गान्नियति पाप्मनः । [6]ब्रूहि—हे ते जना यूयं याहूदाः प्रथिता हि ये ! ॥ ९ ॥
मन्यध्वे यदि यद् यूयमल्लाहानुग्रहं खलु । लभध्वे सविशेषं हि समान् नूनतियाय तु ॥१०॥
प्रतीक्षध्वं ततो मृत्युं, सत्यवाचो भवेत चेत् । [7]कामनां नो करिष्यन्ति परं तेऽस्य कदाचन ॥११॥
अर्जितं तावदेषां यद् हस्तैस्तस्यैव कारणात् । बुध्यते सम्यगल्लाहो जनान् जाल्मान् (सदैव च) ॥१२॥
[8]ब्रूहि—यस्मात् पलायध्वे मृत्युस्तावदसौ ध्रुवम् । आपतिष्यति युष्मासु, ततो यूयं परैष्यथ ॥१३॥
तं परोक्षस्य यो वेत्ता प्रत्यक्षस्य पुनस्तथा । बोधयिष्यति पश्चात् स युष्मान् युष्मद् (विचेष्टितम्) ॥१४॥
[9]श्रद्धरा हे जनाः ! यूयं यदाऽपि शुक्रवासरे । प्रार्थनायाः कृते स्यात समाहूतास्तदैव (भोः !) ॥१५॥
व्यापारानखिलांस्त्यक्त्वा ह्यल्लाहस्मरणाय वै । त्वरायध्वं समूहेषु सूत्तमं विद्यते त्विदम् ॥१६॥
युष्मभ्यं, ज्ञानमेतस्य विभृथेह क्वचिद् यदि । [10]सम्पन्नायां पुनश्चैव प्रार्थनायां भवेत हि ॥१७॥
यूयमुर्व्यां विकीर्णाश्च तथैव मार्गयेत च । अल्लाहस्य (त) दौदार्यं, स्मरेतातिशयं तथा ॥१८॥
अल्लाहस्य, यथा यूयं साफल्यमधिगच्छत । [11]यदेक्षन्ते च ते किंचित् पण्यजातमथापि वा ॥१९॥
किंचित् कौतुकमीक्षन्ते सहसा ऽभिप्रयान्ति तत् । युष्मांस्त्यजन्ति किञ्चैव प्रार्थनायां स्थितानपि ॥२०॥
ब्रूह्य—ल्लाहस्य यत् पार्श्वे तद् व्यतीत्य हि तिष्ठति । कौतुकं पण्यजातञ्च, सूत्तमश्चैव वर्त्तते ॥२१॥
अल्लाहः किल सर्वस्य वृत्तिदाने तु सर्वथा ।

योगः—२१॥

CC-0. In Public Domain. Digitized by eGangotri

६३

सूक्तम्—पाषण्डिनः

(अल-मिनाफिकून)

(मदहीनाऽवतीर्णा एकादशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१](वाग्घर!) त्वां यदाऽऽयान्ति पाषण्डिनो वदन्ति ते । "वयं साक्ष्ये स्थिता यत् त्वमल्लाहस्यासि वाग्घरः ॥ १ ॥
वेत्त्यल्लाहोऽपि यत्तस्य वाग्घरस् त्वं हि तिष्ठसि । साक्ष्यल्लाहश्च यत्ते वै मिथ्यावाचः प्रपञ्चिनः ॥ २ ॥
[२]शपनानि विधायैते चर्मत्राणानि मानवाः । अत्र तिष्ठन्ति, लोकांश्च वारयन्त्यध्वनः प्रभोः ॥ ३ ॥
दुष्कृतेष्वारता एते महाघोरेषु मानवाः; । [३]इदञ्चास्माद् यतो ह्येते श्रद्धरा अभवंस्ततः ॥ ४ ॥
मर्यादाघातिनो जाताः, स्वान्तान्येषां ततोऽभवन् । मुद्रितान्यथ बुध्यन्ते तस्मादेते न साम्प्रतम् ॥ ५ ॥
[४]यदा चक्षूंषि चैवैषु यूयं व्यापारयिष्यथ । प्रत्येष्यन्ति शरीराणि भव्यान्येषां तु बाह्यतः ॥ ६ ॥
वदत्स्वेषु पुनर्यूयं दत्तकर्णा भविष्यथ । काष्ठा आश्रयदानेन यद्वदुत्तम्भितास्तथा ॥ ७ ॥
भवन्त्ये (तेऽपि) तद् वद्धि, स्यान्नामाक्रमणं क्वचित् । तदात्मन्येव मन्यन्ते, घोरा एते द्विषस् ततः ॥ ८ ॥
त्रातव्यो निज एतेभ्योऽल्लाह एतान् प्रणाशयेत् । कुतो न्वेते तु वाह्यन्ते ?; [५]यदा चोक्ता भवन्त्यमी ॥ ९ ॥
"अत्रेयात स युष्मभ्यं क्षमादानं यथाऽर्थयेत् । वाग्घरस्तावदाल्लाहः", तदा शीर्षाणि खल्वमी ॥१०॥
धुन्वन्ति सोपधि स्वानि, यूयमेतांश्च पश्यथ । साभिमानं स्थितान् शश्वदहंमन्यांश्च गौरवात् ॥११॥
[६]याचेरथो न वा याचेस्त्वममीभ्यः क्षमाम्, परम् । नाल्लाहः क्षंस्यते त्वेतान् कदाचिन्नहि संशयः ॥१२॥
मार्गं दर्शयतेऽल्लाहो नैव जाल्मान् कदाचन । [७]त एवैते दिशन्ते येऽल्लाहवाग्घरसन्निधौ ॥१३॥
ये तिष्ठन्ति न वै तेभ्यः क्रियतां कश्चन व्ययः । यत् ततस्ते गता हि स्युरुर्व्यां व्योमसु यानि च ॥१४॥
निधानानि किलामूनि त्वल्लाहस्यैव सर्वथा । परं पाषण्डिनो ह्येते नेदं बोधन्ति (दर्पिताः) ॥१५॥
[८]वदन्ति—मदयानान्तर्गतेष्वसमासु ये जनाः । सबला अबलांस्ते वै द्रावयिष्यन्ति निश्चितम् ॥१६॥
प्रभुत्वे विद्यते साम्यमल्लाहस्यैव यद्यपि, । वाग्घरस्य तथाऽमुष्य, श्रद्धराणामथाऽपि च ॥१७॥
परं पाषण्डिनस्त्वेते विदन्त्येव न सर्वथा । [९]श्रद्धराः ! सन्ततिर्नो वो न चैवाऽथ वसूनि वः ॥१८॥
अल्लाहस्य स्मृते र्युष्मान् प्रमत्तान् विदधत्विह । ईदृशाचारणा ये तु हानिभाजस्त एव तु ॥१९॥
[१०]कुरुध्वञ्च व्ययं तस्माद् दत्तमस्माभिरस्ति यत्, । मृत्योरुपस्थितेः पूर्वं युष्मासु किल कस्यचित् ॥२०॥
यदाऽसौ वक्ष्यतीत्थं (हा) प्रभो ! केचित् क्षणा यदि । अन्ये दत्ता भवेयुर्मे दद्यां दानमहं ततः ॥२१॥
भवेयं किञ्च संख्यातो भद्रेष्वन्यतमस्तथा । [११]परं काले पुरः प्राप्ते नाल्लाहस्तु कदाचन ॥२२॥
कस्मैचिद् ददते दानं क्षणस्याऽपि कथञ्चन । यद् यद् यूयञ्च चेष्टध्वेऽल्लाहस्तत्तत् सुबोधति ॥२३॥

योगः—२३

CC-0. In Public Domain. Digitized by eGangotri

६४

सूक्तम्–श्रमोऽपास्तः परस्परम्

(अत-तगाबुन)

(मदहीनाऽवतीर्णा अष्टादशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]तत्तदल्लाहशंसीह यद् यद् व्योमसु विद्यते । विद्यते यत् तथैवोर्व्यां, राज्यं तस्यैव वर्त्तते ॥ १ ॥
तस्यैव शंसनं, किञ्च सर्वसामर्थ्यभृद्धि सः । [2]स एव योऽसृजद्युष्मां, स्ततो युष्मासु कश्चन ॥ २ ॥
श्रद्विहीनः परश्चाऽथ श्रद् दधानो व्यजायत । यद् यद् यूयन्तु चेष्टध्वे तत्तदल्लाह ईक्षते ॥ ३ ॥
[3]असृजत स हि सत्येन व्योमान्यूर्वी तथैव च । रूपवतो व्यधाद् युष्मान् सुरूपान् व्यदधादथ ॥ ४ ॥
परावृत्योपगन्तव्यो युष्माभिश्च स एव तु । [4]वेत्ति व्योमसु यच्चासौ धरायां यच्च तिष्ठति ॥ ५ ॥
विवृतं संवृतं यच्च युष्माकं वेत्त्यसौ समम् । वेत्त्यल्लाहः पुनस्तच्च हृत्स्थं (युष्माक) मस्ति यत् ॥ ६ ॥
[5]वृत्तं लब्धं न युष्माभिः किं तेषामजहुर्हि ये । पूर्वकाले स्वविश्वासं, आस्वादन् ते फलं पुनः ॥ ७ ॥
आत्मनो दुष्टनीतीनां, तेभ्यो घोरा हि कारणा । [6]इदञ्चास्माद् यतस्तेषां वाग्घरास्स्पष्टलक्ष्मभिः ॥ ८ ॥
उपायंस्तान् भृशम्, ते च नित्यमेतदवादिषुः । दर्शयिष्यन्ति किं मर्त्या मार्गमस्मान् ? अतो हि ते ॥ ९ ॥
सावज्ञास्सर्वथा जाताः पराङ् आस्यास्तथाऽभवन् । अतिष्ठत् परमल्लाहो निरपेक्षस्तु (तादृशाम्) ॥१०॥
प्रशंसाऽर्हः किलाल्लाहो निरपेक्षस्तथैव च । [7]"ते हि नोत्त्थापयिष्यन्ते मृत्योरूर्ध्वं" वदन्ति च ॥११॥
श्रद्विहीना जना एवम्, ब्रूहि—कस्मान्न तद् भवेत् । आत्मनः प्रभुणा तावत् शपेऽहम्, अनिवार्यतः ॥१२॥
यूयमुत्त्थापयिष्यध्वे, बोधिताश्च भविष्यथ । विषयेऽमुष्य यद् यूयमकुरुध्वमत्र सन्ततम् ॥१३॥
अल्लाहस्य कृते चैतत् सुकरं सर्वमेव तु । [8]तदल्लाहे तथा चाऽस्य वाग्घरे द्योत एव च ॥१४॥
वतारिते किलाऽस्माभिर्जायध्वं श्रद्धराः (पराः) । यद् यद् यूयञ्च चेष्टध्वे वेत्त्यल्लाहस्तु तत्समम् ॥१५॥
[9]सम्पातस्य दिनं तद् वै—दिने संपातयिष्यति । युष्मान् त्सर्वान् यदाऽसौ हि—श्रमस्यापासनस्य तु ॥१६॥
अल्लाहे श्रद्धरो यस्तु भद्रकृत् पुनरेव च । दुष्कृतान्याशु तावत् स तस्मात्तस्यापनेष्यति ॥१७॥
आरामेषु च तादृक्षु तानसौ वेशयिष्यति । प्रवहन्त्यो भविष्यन्ति सुनद्यो यदधः किल ॥१८॥
तत्र वत्स्यन्ति शश्वत् ते, साफल्यं सुमहत् त्विदम् । [10]श्रद्विहीनास्तु ये जाताः, न्यषेधन् पुनरेव च ॥१९॥
अस्मदीयान् किलाऽयातान्, अग्निवेश्मान एव ते । यत्र वत्स्यन्ति ते शश्वत्, घोरं यात्रान्तधाम तत् ॥२०॥
[11]नापतत्यापदा काऽपि त्वल्लाहानुज्ञया विना । श्रद्दधानः किलाल्लाहे यो भवेत् दर्शयिष्यति ॥२१॥
असौ तस्यायनं स्वान्तमल्लाहस्सुष्ठु सर्ववित् । [12]योऽल्लाहस्य नियोगः स्यात् नियोगो वाग्घरस्य च ॥२२॥
पालनीयो ह्यसौ तावत्, पराङ् आस्या भवेत चेत् । वाग्घरस्यास्मदीयस्य कर्त्तव्यं केवलं त्विदम् ॥२३॥
प्रापयेत् स हि सन्दिष्टं वैशद्येनैव केवलम् । [13]अल्लाहो, नेतरस्तस्मात् प्रतीष्टः कोऽपि विद्यते ॥२४॥
श्रद्दधानाश्च तिष्ठेयुरल्लाहे त्वेव संश्रिताः । [14]पत्नीनां युष्मदीयानां युष्माकं सन्ततेरथ ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

श्रद्धराः ! तादृशश्चापि तेषु तिष्ठन्ति ये हि वः । शत्रवस्तद् भवेतैव यूयमवहितास्ततः ।।२६।।
तेषां द्वेषधियं यूयं लोपयेत क्वचिद् यदि । भूत्वोदास्ता हि तिष्ठेत क्षमध्वं तानथापि वा ।।२७।।
युष्मासु कृतवत्स्वेवमल्लाहो निश्चितं महान् । वर्त्ततेऽसौ क्षमाशीलो दयावान् पुनरेव च ।।२८।।
[१५]वसूनि यानि युष्माकं युष्मदीया च सन्ततिः । आकृष्टिद्रव्यमात्राणि भवन्तीमानि सर्वथा ।।२९।।
परन्त्वल्लाह पार्श्वेऽस्ति पुरस्कारो महत्तमः । [१६]बिभीत यूयमल्लाहाद् यथाशक्ति, तथैव च ।।३०।।
(नियोगं) शृणुताऽमुष्य, मन्यध्वं पुनरेव च, । व्ययं किञ्चाऽथ कुर्यात, भद्रं येन भवेद् हि वः ।।३१।।
आत्मानं यस्तु गोपायेल् लोभादेवंविधा हि ते । मर्त्याः साफल्यभाजो ये मता लोके त्वसंशयम् ।।३२।।
[१७]वितरेत क्वचिद् यूयमल्लाहार्थमृणं यदि । सुप्रभूतं ऋणं तावत्, तदाऽसौ गुणयिष्यति ।।३३।।
बहुकृत्वो हि युष्मभ्यं तदेव, क्षंस्यतेऽथ च । युष्मान्, महागुणग्राही सहिष्णुश्चाप्यसौ स्थितः ।।३४।।
[१८]वेदनोऽसौ परोक्षस्य प्रत्यक्षस्य तथैव च । प्रभुत्वाद् भासमानोऽसौ तत्वदर्श्यपि तिष्ठति ।।३५।।

योगः—३५

६५

सूक्तम्—त्यागः

(अत-तलाक़)

(मदहीनाऽवतीर्णा द्वादशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]भगो वाग्घर ! पत्नीस्स्वास्स्यात यूयं जना यदा । त्यक्तुं परास्ततो यूयं त्यजेत तास्तदैव तु ॥ १ ॥
यदा स्यादवधिस्तावद् विधिना सम्मतः किल । रक्षणीयोऽवधिर्ध्याने विधिना सम्मतो दृढम् ॥ २ ॥
बिभीत यूयमल्लाहात्—स्वप्रभोरपि (सर्वदा) । सारयेत बहिर्नैव ता गृहेभ्यः कदाचन ॥ ३ ॥
स्वयं चैवाऽपि नेयुस्ता न यावत् कुर्वते तु ताः । प्रत्यक्षं ग्राम्यकं कर्म, सीमा एतास्सुनिश्चिताः ॥ ४ ॥
अल्लाहेन हि तिष्ठन्ति कृताः, यश्चात्र कश्चन । अतीत्य वर्त्तते सीमा अल्लाहस्य, स आत्मना ॥ ५ ॥
आत्मन्येव करोत्यत्र त्वत्याचार (मशंकितम्) । त्वं न वेत्सि कदाचिद् (भोः) अल्लाहस्स्वत एव तु ॥ ६ ॥
ऊर्ध्वमस्मादतर्क्यं स उपनयेत् किलाद्भुतम् । [2]यदा यन्ति च ता(स्त्यक्तास्)स्वकीयं निश्चितावधिम् ॥ ७ ॥
भद्रभावेन रोद्धव्या विस्रष्टव्या अथोऽपि वा । क्रियध्वमात्मनां साक्ष्ये सुनयौ द्वावथो नरौ ॥ ८ ॥
अल्लाहार्थं पुनस्साक्ष्यं तिष्ठेत् पुष्टञ्च सर्वथा । इदञ्चादिश्यते तस्मै योऽपि कश्चिज् जनः किल ॥ ९ ॥
विश्वसेत् तावदल्लाहे चरमाहे तथैव च । धारयिष्यति योऽल्लाहाद् भयं तं रक्षितुं स वै ॥१०॥
यं कमप्ययनं तावत् स्वतो ह्यापादयिष्यति । [3]तस्मै दास्यति वृत्तिञ्च धाम्नस्तस्मादतर्कितात् ॥११॥
द्रढयेद् यश्च विश्वासमल्लाहे त्वात्मनो जनः । तदिच्छापूरणो ऽसौ हि; संशयो नाऽत्र विद्यते ॥१२॥
सम्पन्नं विदधात्येव खल्वल्लाहः स्वकामितम् । कृत्वाऽल्लाहः पुनर्मानं सर्ववस्तुषु तिष्ठति ॥१३॥
[4]पत्नीनामथ युष्माकं या निराशास् स्थिता इह । रजस्स्रावात्, समुत्पन्ने युष्मभ्यं किञ्च संकटे ॥१४॥
त्रयो मासा हि तिष्ठन्ति समयो नियतावधिः । ताभ्यः, ताभ्यस्तथा चैव या इहाऽनागतार्त्तवाः ॥१५॥
या अथाऽपन्नसत्वास्स्युर्न यावज्जननं भवेत् । सन्तानस्य तदा यावत् ताभ्यस्स्यान्नियतावधिः ॥१६॥
अल्लाहस्य भयं यस्तु मंस्यते तस्य वर्त्म सः । ऋजुं करिष्यतीत्य (त्र सन्देहो नास्ति कश्चन) ॥१७॥
[5]अयन्त्वाल्लाह आदेशः काशितस्त्वयि यः खलु । अल्लाहान्मंस्यते यश्च भयं कोऽप्यत्र मानवः ॥१८॥
दुष्कृतान्याशु तावत् स तस्मात्तस्यापनेष्यति । पुरस्कारं प्रभूतञ्च महत्तस्मै प्रदास्यति ॥१९॥
[6]वासं कल्पयताऽमूभ्यस्स्वपार्श्वे विभवानुगम् । दुर्भरं जीवनं येन भवेत् तासां न कर्म तत् ॥२०॥
क्लेशदायि च कर्त्तव्यम्, ता भवन्ति पुनर्यदि । सत्वापन्नास्तदर्थं वै व्ययः कार्यो धनस्य च ॥२१॥
प्रसूतिं यान्ति यावत् ताः, युष्मदर्थेऽथ ता यदि । पाययेयुः पुनर्दुग्धम्, ताभ्यः किञ्चित् प्रदत्त वै ॥२२॥
मन्त्रयित्वा मिथः किञ्च भद्रं निश्चीयतामथ । यदि नान्योन्यसंलापात् किंचिद् भद्रं प्रजायते ॥२३॥
तदर्थं काचिदन्या स्त्री धात्रीरूपा भविष्यति । [7]रमन्तां वित्तवन्तोऽत्र व्यये वित्तानुसारतः ॥२४॥
मानोन्मानसमं यस्मै दत्तं वित्तं भवेत् परम् । रमतां स व्ययेऽल्लाहाद् दत्तवित्तानुसारतः ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

नो विधातुमना अत्र खल्वल्लाहस्तु कञ्चन । भारवन्तं व्ययात् तस्मै प्रदत्तादतिरिच्य तु ॥२६॥
कृच्छ्राद्दूर्ध्वमथाल्लाहस्सौगम्यं जनयिष्यति । [8]वसतीनामनेकासां—जना हि सावहेलनाः ॥२७॥
जाता आदेशमादाय स्वप्रभोर्वाग्घरस्य च । तस्य, तेषु प्रवृत्ताश्च वयं वृद्धया कठोरया ॥२८॥
यातनाऽथ वितीर्णा सा महाघोरा किलाऽऽस्त या । [9]स्वादितोऽभूद् रसस्तैर्वै स्वनीतेर्योऽभवत् फलम् ॥२९॥
अमीषां हानये चैव नीतिरेषामकल्पत । [10]कठोरा यातना तेभ्यस्त्वल्लाहेनाऽस्ति सज्जिता ॥३०॥
बिभीत यूयमल्लाहाद्, धीमन्तश्श्रद्धरा जनाः ! । स्मारकस्यावतारो हि कृतोऽल्लाहेन वर्त्तते ॥३१॥
प्रतियुष्मान्; [11]भवत्येको वाग्घरो यो हि वो जनान् । श्रावयत्यायतान् स्पष्टं यथान्धंतमसो नयेत् ॥३२॥
प्रकाशं श्रद्दधानांश्च तांश्च भद्रकृतस्तथा । अल्लाहे श्रद्धरो यस्तु भद्रकृत् किं च मानवः ॥३३॥
आरामेषु हि तादृक्षु तमसौ वेशयिष्यति । प्रवहन्त्यो भविष्यन्ति सुनद्यो यदधः किल ॥३४॥
तत्र वत्स्यन्ति शश्वत् ते, कृताऽल्लाहेन वर्त्तते । वृत्तिरत्युत्तमा तेभ्यः; [12]स चाल्लाहो हि केवलः ॥३५॥
सृष्टवान् वियतः सप्त तद्वदेव धरा अपि । नियोगस्यावतारश्च (तस्य) तेषु विजायते ॥३६॥
मन्दं मन्दमनेनैव यूयं बोधिष्यथाऽपि च । सर्वसामर्थ्यभृत् तावद् यदल्लाहस्स तिष्ठति ॥३७॥
अथाऽपि स प्रभुस्सर्वं ज्ञानेनावृत्य विद्यते ।

योगः—३७॥

CC-0. In Public Domain. Digitized by eGangotri

६६

सूक्तम्—परीहाणम्

(अत-तहरीम)

(मदहीनाऽवतीर्णा द्वादशायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]वाग्घर ! यत् कृतं वैधमल्लाहेन कृते हि ते । किन्नु तत् कुरुषेऽवैधं (जहत्तस्य तु सेवनम्) ॥ १ ॥
प्रसादायात्मपत्नीनाम् ? अल्लाहोऽति क्षमी दयी । [2]शपनानां परीहाणमल्लाहादेशतः पुनः ॥ २ ॥
युष्मास्वाऽऽस्ते कृतं वैधम्, अनिवार्यतया किल । युष्माकं रक्षिता ऽल्लाहो ज्ञानवान्त्स सुधीस्तथा ॥ ३ ॥
[3]वाग्घरश्च यदा किंचिद् रहस्यं तावदूचिवान् । शनैरन्यतमां स्त्रीणां निजानां साऽपि तत् पुनः ॥ ४ ॥
अगमयत् प्रकाशं तत्, ततोऽल्लाहस्तथैव च । अगमयत् प्रकाशं तत् सन्निधौ तस्य तत्पुनः ॥ ५ ॥
कश्चिदेकः कृतस्तेन खल्वंशो वर्णितः परम् । मण्ड्कप्लवनं कृत्वा कश्चिदन्यो ह्युपेक्षितः ॥ ६ ॥
प्रकाशं गमितं तेन यदा तत् साऽवदत् पुनः । "कस्त्वामाह", पुनश्चासौ प्राह—मामाह खल्वसौ ॥ ७ ॥
ज्ञाता योऽवहितो यश्च; [4]प्रवृत्ते भवथो यदि । उभावेव युवां तावदल्लाहं प्रति किं पुनः ॥ ८ ॥
आनते हृदये तु स्तो युवयोः पूर्वमेव च । अथो तस्य विरोधे चेद् भवेतं संगते युवाम् ॥ ९ ॥
सहायो वर्त्तते ऽल्लाहस्तस्य, किञ्चाऽपरे ऽपि ते । भद्राश्श्रद्धाधरा, दिव्या, जीवक्रीडस्सहैव च ॥१०॥
[5]संभवेत् खल्विदं चापि प्रभुस्तस्य किलाऽस्ति यः । युवां वैवाह्यमुच्छिद्य परित्यक्ते करोतु सः ॥११॥
स्थानापन्ना विदध्याच्च स्त्रियः पश्चात् समुत्तराः । विधेयाश्श्रद्धराः पूता विप्रतीसारतत्पराः ॥१२॥
औपवस्तधियोऽथापि कुमारीर्विधवास्तथा । [6]श्रद्धरा हे जनाः ! यूयमात्मनस्स्वांश्च वान्धवान् ॥१३॥
अमुष्माद् रक्षता ऽग्नेर्वै समिध्यन्ति हि यत्र तु । मानवा दृषदश्चैव, नियुक्ताः पुनरेव च ॥१४॥
यत्र दिव्याः कठोराश्च प्रबलाश्च, न ये तथा । अल्लाहमवजानन्ति स्यान्नियोगो हि कीदृशः ॥१५॥
यद् भवेच्च समादिष्टं पालयन्ति हि तच्च ये । [7]श्रद्विहीना जनाः ! यूयं मिषोपस्थापनं तु मा ॥१६॥
कुरुध्वमद्य, कृतं पूर्वं यद् यद् युष्माभिरस्ति च । तस्य तस्यैव लप्स्यध्वे पुरस्कार (मसंशयम्) ॥१७॥
[8]श्रद्धरा हे जनाः ! यूयं स्वतः प्रेरणयाऽऽगतम् । पश्चात्तापं विधध्वं (भोः !) अल्लाहसम्मुखं किल ॥१८॥
कदाचिद् संभवेदेतत् प्रभुर्वो वर्त्तते हि यः । सर्वथा खल्वपाकुर्याद् युष्माकं दुष्कृतानि सः ॥१९॥
वेशयेच्चैव युष्मान्त्स तद्विधोपवनेष्वथ । प्रवहन्त्यो भविष्यन्ति सुनद्यो यदधः किल ॥२०॥
दिने यस्मिंस्तथाऽल्लाहो वाग्घरं तानथो जनान् । श्रद्दधानान् कथंचिन्नो विषण्णांश्च करिष्यति ॥२१॥
तेषां द्योतो ऽग्रतस्तेषां किञ्च धाविष्यति (द्रुतम्) । प्रसार्य दक्षिणं हस्तं ते वदिष्यन्ति चाऽनिशम् ॥२२॥
प्रभो नः ! पूरयाऽस्माकं द्योतमस्मत् कृते (ध्रुवम्) । क्षमस्वास्मांश्च, सामर्थ्यं सर्वरूपं बिभर्षि हि ॥२३॥
[9]तनुतात् त्वञ्च संग्रामं विरुन्धंस्तान् हि वाग्घर ! । पाषण्डिनो जना येऽत्र श्रद्विहीना अथो पुनः ॥२४॥
तैस्समं व्यवहारञ्च दाढ्र्योपेतं समाचर । अमीषां नारको वासो, दुष्ठु यात्रान्तधाम तत् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[१०]योषितं नहुषस्याऽथ लूतस्य योषितं पुनः । समक्षं श्रद्विहीनानामल्लाहः कुरुते किल ॥२६॥
दृष्टान्तद्वयरूपेण, ते ह्युभेऽधीनतां गते । आस्तां साध्वोर्द्वयोस्तावद् दासयोरस्मदीययोः ॥२७॥
दासानां सुबहूनां वै, ताभ्यामश्लीलचेष्टितम् । तौ व्यधातां, समक्षं तौ नाल्लाहस्य कथञ्चन ॥२८॥
गतौ निर्दोषतां तेन तावौच्येताम्—"उभावपि । प्रविशेतं शुचौ सार्धं प्रविशद्भिः किलेतरैः ॥२९॥
[११]योषितं प्रिययौनस्य चैव दृष्टान्तरूपतः । समक्षं श्रद्दधानानामल्लाहः कुरुते किल ॥३०॥
सा यदाऽह—प्रभो! मह्यं शालामेकां विधत्स्व (भोः!) । आत्मनः पार्श्वे एवाऽथ सुखारामस्य चान्तरे ॥३१॥
मुक्तिं देहि पुनर्मह्यम् प्रिययौनात् तथैव च । तत्कृतादथ जालमेभ्यः किञ्च मुक्तिं प्रदेहि मे ॥३२॥
[१२]मर्यमाञ्चेमरानस्व सुतां (दृष्टान्तरूपतः— । समक्षं श्रद्दधानानामल्लाहः कुरुते किल) ॥३३॥
अरक्षद् या सतीत्वं स्वं, तस्यामात्मा निजः पुनः । अभूत् संक्रामितोऽस्माभिस्, सा च खल्वन्वमोदत ॥३४॥
वचांसि स्वप्रभोस्तस्य यानि शास्त्राणि तानि च । आस्त साऽथ विधेयानां स्त्री चैवान्यतमा ध्रुवम् ॥३५॥

इत्यष्टाविंशं पारायणम्

योगः—३५

CC-0. In Public Domain. Digitized by eGangotri

६७

सूक्तम्—सर्वेणत्वम्

(ग्रल-मुल्क)

(महाकालेऽवतीर्णाः त्रिंशद् आयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

अथ एकान्नत्रिंशं पारायणम्

[1]सौभाग्यं तस्य यद्धस्ते सर्वेणत्वं हि तिष्ठति । सर्वसामर्थ्यभृच् चासौ; [2]मृत्युं यो जीवनञ्च यः ॥ १ ॥
निर्ममे सम्परिज्ञातुम् श्रेष्ठं कर्माऽस्ति कस्य वः । प्रभुत्वाच् छालते किञ्च क्षमाशीलस्तथैव सः ॥ २ ॥
[3]सप्तव्योमानि यश्चैव ससर्जानुक्रमेण ह । दयालोर्रचनायां त्वं न काञ्चिच्चापि हीनताम् ॥ ३ ॥
द्रष्टुं शक्नोषि, पश्य त्वं साम्प्रतं पुनरेव च । किन्नु पश्यसि काञ्चित् त्वं हीनताम्?; [4]त्वं पुनःपुनः ॥ ४ ॥
पश्य, दृष्टिः परिश्रान्ता स्थगिता पुनरेव च । निवृत्तैरयनं याता त्वामेवैष्यति सा ततः ॥ ५ ॥
[5]प्रदीपैः शोभितोऽस्माभिस्त्वाकाशो जगतां ध्रुवम् । शातनोज्जासनार्थञ्च हेतयस्ते कृताः पुनः ॥ ६ ॥
कीलो ज्वालाकुलश्चैभ्यस्सज्जितो दोतुमेव च । [6]नारका यातनास्तेभ्यो ये जनाः प्रभुणाऽऽत्मनः ॥ ७ ॥
अविश्वासमयुः किञ्च दुर्गता वसतिर्हि सा । [7]अवक्षिप्ता भविष्यन्ति यदा ते तत्र तेऽस्य तत् ॥ ८ ॥
श्रोष्यन्ति भीष्ममारावं, इन्धानो ऽसौभवेदथ । [8]स्फोटमेव पुनर्यायादावेगस्यैव कारणात् ॥ ९ ॥
यदाऽप्यन्तस्त्वभूत् क्षिप्तो गण; कोऽप्यन्वयुंक्त तु । तदाऽध्यक्षो हि तत्रत्यस्तान्—उपेतो न किन्नु वः ॥१०॥
सावधानकरः कश्चित् ? [9]तेऽवदन्—कथमेव नो । सावधानकरो ह्यस्मानुपेतः, तं परं वयम् ॥११॥
न्यषेधामा ऽभवच्चोक्तः—"नाल्लाहोऽत्र तु किंचन । प्राकाशयत्, पथभ्रष्टस्त्वन्तु सत्यं महानसि" ॥१२॥
[10]पुनश्चैवाऽवदन्—एते ह्यभविष्याम चेत् क्वचित् । श्रोतारश्चाऽथ बोद्धारो न वै तावत् पतिष्णवः ॥१३॥
पावके ह्यभविष्याम ज्वालाकीर्णे तु सर्वशः । [11]दोषिणस्त्वात्मनो ह्येवं तेऽमन्यन्त जनाः किल, ॥१४॥
विप्रकृष्टं तु ते यन्तु ये ज्वालावनिसंवृताः । [12]अदृष्ट्वाऽप्यथ मन्यन्ते स्वप्रभोर्ये भयं जनाः ॥१५॥
पुरस्कारो महांस्तेभ्यः क्षमा तांश्च प्रतीक्षते । [13]संवृतो विवृतो वाऽपि संकल्पो यादृशोऽपि वः ॥१६॥
संशयो नाऽत्र सोऽन्तस्थं चापि सर्वं प्रवेद ह । [14]यस्ससर्ज न किञ्चासौ सृष्टं चैवाऽपि वेत्स्यति ? ॥१७॥
सूक्ष्मदर्शी हि सोऽत्यर्थं प्रविज्ञश्चापि वर्त्तते । [15]स एवाऽयं धरित्रीं योऽधीनां युष्माकमाकरोत् ॥१८॥
ततोऽध्वाऽस्यानुगन्तव्यस्तद् दत्ताहारतस्तथा । भोक्तव्यम्, संप्रयातव्यः पुनरप्येष एव च ॥१९॥
[16]किं सुरक्षां नु मन्यध्वे ततो यो वियति स्थितः । यत् पृथिव्या न वै युष्मान् ग्रसयिष्यति खल्वसौ ॥२०॥
यदा कम्पिष्यते सा हि; [17]ततो यो वियति स्थितः । किं सुरक्षां नु मन्यध्वे यद् वात्यां नैव खल्वसौ ॥२१॥
प्रेरयिष्यति युष्मासु, द्राग् यूयं ज्ञास्यथाऽधुना । साध्वसं मम यद्रूपम्; [18]न्यषेधन् ये तु, पूर्वजाः ॥२२॥
दृश्यतां मम दण्डस्य तद् यद् रूपं त्ववर्त्तत । [19]किन्न ते पक्षिणोऽपश्यन् स्थितानुच्चैश्शिरोपरि ॥२३॥
कीर्णपक्षान् (कदाचित्तु कदाचित्) संहृतच्छदान् । स्तभित्वाऽमूनसावेव दयालुर्नेतरस् स्थितः ॥२४॥

CC-0. In Public Domain. Digitized by eGangotri

असन्देहमसावेव सर्वं किंचिद् विपश्यति । [२०]कस्ततोऽन्यो हि यस्तावद् दयालोर्वस्सहायकः ॥२५॥
तिष्ठति वाहिनीरूपश्, श्रद्विहीना जना इह । मग्ना अज्ञान एकान्तम्; [२१]वृत्तिं युष्मांस्तथैव कः ॥२६॥
प्रापयिष्यति कुर्याच्चेद् रोधं वृत्तेरसौ स्वतः । बर्तते (श्रद्विहीनास्तु) ह्यविनीताश्च गर्विताः ॥२७॥
[२२]अन्धकारे परामर्शन् याति यः किमसौ जनः । मार्गदर्श्युत यो याति सार्जवमृजुनाऽध्वना ? ॥२८॥
[२३]ब्रूह्यसावेव युष्मान् यो ह्यसृजत् प्राददात्तथा । अक्षिणी हृदयं कर्णौ युष्मभ्यं, तत्तथापि तु ॥२९॥
कार्त्तज्ञं न्यूनतो न्यूनं ह्येव दर्शयथ ध्रुवम् । [२४]ब्रूह्यसावेव यो युष्मान् चक्रेऽय गुणितान् भुवि ॥३०॥
समवेताः करिष्यध्वे यूयं तस्मिंस्तथा पुनः । [२५]ते वदन्ति—प्रतिज्ञेयं कदा पूर्णा करिष्यते ॥३१॥
ब्रूहि चेत् सत्यसन्धस्त्वम् ?; [२६]ब्रूह्यल्लाहो हि केवलम् । तज्ज्ञश्चेतयिताऽहन्तु वैशद्यात् केवलस् स्थितः ॥३२॥
[२७]यदा नेदो गतं तञ्च प्रेक्षिष्यन्ते हि ते नराः । वक्त्राणि श्रद्विहीनानामापत्स्यन्ते हि विक्रियाम् ॥३३॥
तथोक्तास्ते भविष्यन्ति—"तदेतद् वो निमन्त्रितम्" । [२८]ब्रूहि—किं चिन्तितं तावद् युष्माभिः "नाशयेदसौ ॥३४॥
अल्लाहस्त्वाञ्च ये ते च किल तिष्ठन्त्यनुव्रताः । दयेत त्वां पुनः किम्वा, स्यान्नामेदमथाऽपि तत् ॥३५॥
श्रद्विहीनान् परित्राता यातनाभ्यः क एव तु ? । [२९]ब्रूह्यसौ सदयस्तावत्, तत्रैव श्रद्धरा वयम् ॥३६॥
प्रत्ययो नश्च तत्रैव, तद् यूयं ज्ञास्यथाऽचिरम् । प्रकाशं मार्गमन्वेति को नु दोषाकुलं परम् ॥३७॥
[३०]ब्रूहि—किं चिन्तितं तावद् युष्माभिर्हि, कदाचन । लीयेत चेज्जलं भूमौ युष्माकं कः पुनर्जलम् ॥३८॥
उत्सरत् पावनं तावद् दास्यत्यानीय वोऽ (चिरम्) ? ।

योगः—३८॥

CC-0. In Public Domain. Digitized by eGangotri

६८

सूक्तम्–लेखनी

(अल-क़लम)

(महाकालेऽवतीर्णा द्विपंचाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]नून, शपे तु लेखन्या, तेन यत्ते लिखन्ति च । [२]त्वत् प्रभोः कृपया नासि सोन्मादस्त्वं हि (वाग्घर!) ॥ १ ॥
[३]अनन्तस्ते पुरस्कारो निश्चितं वर्त्ततेऽथ च । [४]महाशीलस्तथा त्वञ्च भवसीति न संशयः ॥ २ ॥
[५]अचिरं त्वञ्च ते चैव द्रक्ष्यन्ति; [६]को भ्रमाकुलः । युष्माकं वर्त्तते तावत्; [७]वेत्ति युष्मत् प्रभुर्हि तम् ॥ ३ ॥
सम्यक् तदध्वनो यो हि परिभ्रष्टस्स एव च । वेत्ति तान् सम्यगध्वानं सरलं येऽनुयान्ति च ॥ ४ ॥
[८]माकृथास्तद् वचस्तेषां त्वं न्यषेधंस्तु ये जनाः । [९]त इच्छन्ति कदाचित् त्वं भवेर्वै सन्धिमानसः ॥ ५ ॥
त्वाञ्चापि ते पुन दृष्ट्वा भवेयुस्सन्धिमानसाः । [१०]मा कृथाः कस्यचित्तस्य वचश्चापि हि यो जनः ॥ ६ ॥
भवेद् वै शपथारामो भवेत् पामर एव च । [११]अपकर्षति यश्चैव पैशुन्यं चाचरत्यथ ॥ ७ ॥
[१२]भद्रता वारको यश्च सीमोल्लंघक एव च । दोषधीः; [१३]लुब्ध एवाऽपि ह्यनाहूतप्रवेशनः ॥ ८ ॥
[१४]सम्पन्नः सम्पदा किञ्च सन्तत्याऽनेन हेतुना ? । [१५]पठ्यन्तेऽस्माकमायातास्तत्समक्षं यदा तदा ॥ ९ ॥
वक्त्यसौ—संकथा एताः पूर्वजानां भवन्ति हि । [१६]दग्धांकां नासिकां तस्य विधास्यामोऽचिराद् वयम् ॥१०॥
[१७]सम्यङ् निभालिता एते त्वस्माभिस्स्वामिनो यथा । निभालिता अभूवन् वै ह्युद्यानस्य पुरा यदा ॥११॥
प्रतिज्ञा तैः कृताऽभूद् यत् तूषाकाले उपस्थिते । अवश्यं ह्यवचेष्यामस्तत् फलानि वयं जनाः ॥१२॥
[१८]नापवादञ्च ते कञ्चित् चैवाऽमन्यन्त; [१९]ते यदा । शयाना एव खल्वासन् त्वत् प्रभोः पार्श्वतस्तदा ॥१३।
कोऽपि पर्यक्रमीत् तावत् तदुद्यान (मलोकितः) । [२०]अत्यन्ताऽवचितं यद् वत् तदुद्यानं तथाऽभवत् ॥१४॥
[२१]आह्वयन् पुनरन्योन्यं ते प्रत्यूषस्युपागते । [२२]भणन्तः—"यात वप्राणि द्राग् जिहीर्षा फलस्य चेत्" ॥१५॥
[२३]मन्दमन्दं वदन्तस्ते ततो वै चलितास्ततः । [२४]"उपेयान्नापि कश्चिद् वो मुखापेक्ष्यद्य तत्र तु" ॥१६॥
[२५]सगर्वास्तेऽभ्ययुर्धृत्वा निश्चयस्य बलं हृदि । [२६]दृष्ट्वैव च पुनस्तत्तु तेऽवदन्—अयनाद् वयम् ॥१७॥
भ्रष्टास्तावत् समे जाताः; [२७]नेदमेव, परं वयम् । भाग्यहीना हि तिष्ठाम; [२८]तेषां यश्श्रेष्ठ आह सः ॥१८॥
"नाऽवदं किमहं युष्मान्, श्लाघध्वे न कथं (प्रभुम्) । [२९]तेऽवदन्—"राजतेऽस्माकं महिम्नाऽसौ प्रभुःकिल ॥१९॥
दुष्कर्माणो वयं सत्यम्"; [३०]ततस्संयुज्य ते मिथः । उपालम्भपरा जाताः; [३१]आक्रोशंस्ते—"धिगस्तु नः ॥२०॥
भवामस्सैनस्सत्यम्; [३२]विनिमाय कदाचन । दद्यादेवोत्तरं नोऽसौ प्रभुर्नोऽस्मात्, वयं किल ॥२१॥
स्वप्रभोरग्रतस्तावत् स्तुतिप्रह्वास्स्थिता इमे । [३३]यातनाऽऽस्त इदंरूपा, यातनाऽऽस्ते त्विमामपि ॥२२॥
अतिरिच्यान्यलोकस्य किं नाम न कृतं भवेत् । यदि स्यात् तैरिदं ज्ञातम्; [३४]भयम्मन्यास्तु ये जनाः ॥२३॥
ध्रुवं तेभ्यो हि तिष्ठन्ति स्वारामास्तत् प्रभोः किलः । पार्श्वे, विराजते यत्र त्वानन्दो ह्येव केवलः ॥२४॥
[३५]व्यवहारं करिष्यामो वयमात्मार्पकैस्समम् । किं तथा क्रियते तावत् सापराधैस्समं यथा ? ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[३६]व्यामोहस्ते धियाः कोऽयं, कोऽयन्ते मूर्खनिर्णयः ? । [३७]शास्त्रं युष्मद्गतं किम्वा किंचित् युष्मात्तु पठ्यते ॥२६॥
[३८]अस्ति किं तत्र तत् सर्वं यद् रुच्यं वर्त्तते हि वः ? । [३९]किम्वा बद्धा हि तिष्ठामो युष्माभिश्शपथैर्वयम् ? ॥२७॥
स्थास्यन्ति यानि वैधानि निर्णयस्य दिनाऽवधि । यत् समं तद्धि युष्माकं यद् यदादेक्ष्यथ ध्रुवम् ॥२८॥
[४०]इमान् पृच्छ—क एषान्तु प्रमातृत्वेन वर्त्तते । [४१]प्रतिमानोऽथवा लब्धाः किमेभिः ? सत्यमेव चेत् ॥२९॥
प्रतिम्नस्सत्यसन्धाश्चेदानयन्त्वितरान् निजान् । [४२]भविष्यत्यथ चोद्भूतं यदा कौतूहलं तथा ॥३०॥
सांगपातं प्रणामार्थं त्वाहूता अपि तन्न ते । कर्त्तुं शक्ष्यन्ति; [४३]चैवैषां भविष्यन्ति दृशो नताः ॥३१॥
भविष्यत्यभितो व्याप्तश्चापकर्षो ऽप्यमीषु वै । सांगपातप्रणामाय समाहूता इमेऽभवन् ॥३२॥
तदा चैवाऽप्यतिष्ठन् हि यदैते खल्वनाहृताः । [४४]तन्मां विसृज चाप्येतान् निषेधन्तीदमत्र ये ॥३३॥
नेष्यामो मन्दमन्दं तान् नैते ज्ञास्यन्ति चाऽप्यथ । [४५]शिथिलप्रग्रहान् तान् वै करोम्यत्र न संशयः ॥३४॥
प्रग्रहो बलवान् मे हि; [४६]तान् शुल्कं किन्नु याचसे । यदेते करभारेण नानमन्ति हि सन्ततम् ? ॥३५॥
[४७]किम्वा पार्श्वे भवत्येषां परोक्षस्य हि चेतना । यदेते प्रभवन्त्यत्र लेखितुम्; [४८]त्वं धृतिं भज ॥३६॥
तत् प्रभोरात्मनो यावन्निर्णयो नैव जायते । मा गमस्तां गतिं किञ्च मत्स्यवतो हि याऽभवत् ॥३७॥
आह्वयत् क्रोशनस्तावत् यः प्रभुं स्वं (तदा किल) । [४९]अरक्षिष्यत् चेत्तस्य त्वनुकम्पा हि तं प्रभोः ॥३८॥
अभविष्यदसौ क्षिप्तो हीनहीनो ह्यरण्यके । [५०]परन्तस्य प्रभुस्तं वै विचाय तं तथाऽऽसयत् ॥३९॥
उत्तमानां हि लोकानां कृत्वा लोकं हि विश्रुतम् । [५१]श्रद्विहीना जना एते यदा शृण्वन्ति वर्णनम् ॥४०॥
एवं प्रतीयते दृग्भिस्स्वाभिर्दास्यन्ति निर्णयम् । त्वां, भणन्ति तथा चेत्यम् 'स तूल्मादी हि तिष्ठति' ॥४१॥
[५२]"अस्ति तच्चाऽथ लोकाय वर्णनं ह्येव केवलम्" ।

योगः—४१॥

CC-0. In Public Domain. Digitized by eGangotri

६९

सूक्तम्–यथार्थता

(अल-हाक्का)

(महाकालेऽवतीर्णा द्विपंचाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]यथार्थता; [2]नु का तावत्, यथार्थता ! [3]नु वक्ष्यति । कोऽथ त्वां किं स्वरूपा सा, भवतीह यथार्थता ॥ १ ॥
[4]न्यषेधत् त्वापदां तां वै समदश्चाद एव च । [5]समदाः खल्वनाश्यन्त महताऽशनिना किल ॥ २ ॥
[6]अथाऽऽदास्ते ह्यनाश्यन्त महत्या वात्यया पुनः । [7]दिनान्यष्टौ निशास्सप्त या ह्यसावक्रुत स्थिताः ॥ ३ ॥
तेषु, दृष्टं त्वयाऽपि स्यात् तया यद् वद्धि ते जनाः । अधश्शीर्षा उदङ्पादाः क्षिप्ताः खर्जूरकाण्डवत् ॥ ४ ॥
शून्या गर्भान्तराद् ये स्युः; [8]किन्नु तेषां विलोकसे । कञ्चिदप्यवशेषन्तु साम्प्रतम् !; [9]दोषकारणात् ॥ ५ ॥
प्रिययौनस्ततः प्राग् येऽभवन्, आवसथानि च । भ्रंशितान्यक्रियन्तैव; [10]ह्यवाजानंस्तु वाग्घरम् ॥ ६ ॥
स्वप्रभोस्ते तदल्लाहोऽप्यग्रहीत् तान् ग्रहे दृढे । [11]यदाऽभूज् जलमुद्यातं वयं वोऽरोपयाम च ॥ ७ ॥
तदा नावि; [12]भवेदेतद् युष्मभ्यं स्मारिका यथा । श्रोतुं रक्षितुमर्हाश्च श्रुत्वा रक्षन्त्वथ श्रवाः ॥ ८ ॥
[13]यदा तूर्ये तथा घोषः केवलैकः करिष्यते । [14]एकेनैव प्रहारेण सानुमन्तो धरा तथा ॥ ९ ॥
उद्धृत्य चूर्णयिष्यन्ते; [15]कालिका ऽऽपत्स्यते तदा । [16]स्फुटितो भविताऽऽकाशस्, स हीनस्सर्वतोऽपि च ॥१०॥
भावी तस्मिन् दिने किञ्च; [17]प्रान्ततो विवुधा अपि । तस्य तावद् भविष्यन्ति, प्रभोस् सिंहासनञ्च ते ॥११॥
दिने तस्मिन् समुत्तोल्य भविष्यन्त्यष्ट वै स्थिताः । [18]दिने तस्मिंस्तथा यूयं (समक्षं) समुपस्थिताः ॥१२॥
करिष्यध्वे, रहस्यञ्च युष्माकं न किमप्यथ । स्थास्यत्यावृतमेवाऽपि; [19]यस्य पत्रन्तु दक्षिणे ॥१३॥
प्रदत्तं तस्य हस्ते स्यात् स वै (लोकान्) वदिष्यति । वाचयत ममैतद् भोः (कर्म) पत्रम्; [20]अहन्त्विदम् ॥१४॥
पूर्वतोऽज्ञासिषम् यन्मां ह्युपस्थास्यति मत्कृतम् । [21]इदानीं तदनेनाऽस्ति प्राप्तमिष्टं निजेप्सितम् ॥१५॥
[22]उच्छ्रितोद्यान एकस्मिन्; [23]लम्बमानानि यत्र हि । गुच्छकानि भवन्त्यर्वाक्; [24]पिब चाऽशान चाऽप्यथ ॥१६॥
मोदमानो हि वीतेषु यद् दिनेषु त्वया किल । प्रेषितं तस्य सर्वस्य पुरस्कारस्य वै धिया ॥१७॥
[25]अथा ऽसौ यस्य पत्रन्तु प्रतीपे हि पुनः करे । प्रदत्तम्, क्रोक्ष्यतीत्थं सः "किन्न स्याद्दैव भोः! कृतम् ॥१८॥
दत्तमेव न मह्यं चेत् पत्रं मे स्यात् कदाचन । [26]नाऽथ वित्तं मया चेत् स्यात् कर्मलेखा हि का मम ॥१९॥
[27]स्यान्न किं मृत्युरेवाऽयं नाशनस्स्यात् क्वचिद् यदि । [28]सम्पदा मे हितायैव न चाऽकल्पत सर्वथा ॥२०॥
[29]प्रभुत्वं मे विहायैव मां क्वचिद् दूरतो गतम् । [30]गृह्यतामेष किञ्चाऽथ निगडैर्बध्यतां पुनः ॥२१॥
[31]पात्यतां पुनरग्नौ च नारकेऽथन्तु धिक्षति । [32]बन्धनं शृंखलेनाऽस्य ततः कार्यं भवेद्धि यत् ॥२२॥
सप्ततिः पाणिदघ्नं वै; [33]श्रद्धरो नाऽऽस्त खल्वयम् । महिम्ना शालते यो वै तत्राऽल्लाहे (सुनिश्चितम्) ॥२३॥
[34]भोजनार्थञ्च दीनस्य न वाऽयं प्रोदसाहयत् । [35]तदद्य नात्र कोऽप्यस्य सखा; [36]नैवाऽपि किंचन ॥२४॥
भोजनाय विहायाऽस्मै मलिनं खल्वपस्करम् । [37]साऽघान् विहाय नैवान्यो यमश्नाति कदाचन ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[३८]नान्यत् तावत्, शपाम्येष वस्तुभिस्तैरहं किल । यानि दृश्यानि तिष्ठन्तितवा; [३९]ऽदृश्यानि यान्यपि ॥२६॥
[४०]वाग्घरस्येयमेकस्य वाक् प्रतीष्टस्य वर्त्तते । [४१]कस्यचिन् न कवेरेषा वाक् तु, त्वं स्तोकमेव तु ॥२७॥
श्रद्दधानो भवस्यत्र; [४२]तान्त्रिकस्यापि नाऽथ च । कस्यचिद्वागियं तावत्, स्तोकध्यानोऽसि (हन्तभोः!) ॥२८॥
[४३]विश्वप्रभोरिदं त्वस्ति समवतरणं किल । [४४]सन्धायात्मानमेषोऽथ मया साकं क्वचिद् यदि ॥२९॥
अपक्ष्यत् त्वन्यदेवाऽत्र; [४५]ह्यग्रहीष्याम एव तत् । वयं सत्यं करं ह्यस्य दक्षिणं तदनन्तरम् ॥३०॥
[४६]धमनीं कन्धरोपेतां तथाऽच्छेत्स्याम एव च । [४७]न युष्माकञ्च कोऽप्यत्र शक्तोऽस्माकन्तु वारणे ॥३१॥
स्याद्धि तस्मात्; [४८]असन्देहमनुस्मारकमस्ति तत् । तेभ्यः संधारयन्त्यत्र ये मनस्सु भयं जनाः ॥३२॥
[४९]विद्मः केचिद्धि युष्माकं सन्ति ते ये निषेधकाः । [५०]मनस्तापो ध्रुवञ्चेदं तेभ्यो येऽश्रद्धरा जनाः ॥३३॥
[५१]इदं वै परमं सत्यम्; [५२]तदस्मादात्मनः प्रभोः । महिमाशालिनो नाम गरिमाणमुपानय ॥३४॥

योगः— ३४

CC-0. In Public Domain. Digitized by eGangotri

सूक्तम्–उदङ् यास्यत् हि सोपानम्

(अल-मआरिज)

(महाकालेऽवतीर्णाऽचतुश्चत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]पृच्छकस्त्वापतन्तीं वै यातनामधिकृत्य हि । अपृच्छत्; [२]श्रद्विहीनेभ्यो या हि, यां कोऽपि न क्षमः ॥ १ ॥
अवक्षेप्तुं भवेच्चापि; [३]ह्यल्लाहाद्, यस्य वर्त्तते । उदङ् यास्यद्धि सोपानम्; [४]तमेवाऽभिप्रयन्ति च ॥ २ ॥
आत्मानश्चैव देवाश्च तादृशे दिवसे हि यः । तुल्यतामेति खल्वब्दैः पञ्चाशत् सुसहस्रकैः ॥ ३ ॥
[५]त्वं तोषं गच्छ तत्तोषं दृशोर्यत् सुहितं परम् । [६]दूरमित्येव खल्वेते तं प्रपश्यन्ति वै जनाः ॥ ४ ॥
[७]नेद इत्येव कृत्वा च प्रपश्यामो वयन्तु तम् । [८]दिने यस्मिन् द्रवत्वञ्च धातुवद् व्योम यास्यति ॥ ५ ॥
[९]रञ्जितोर्णेव शैलाश्च; [१०]सखायं न सखाऽपि च । प्रक्ष्यति (क्षेम) मेवाऽपि; [११]भविष्यन्ति हि यद्यपि ॥ ६ ॥
द्रष्टारस्ते मिथस्स्पष्टम्, सापराधो जनः पुनः । एषिष्यति भवेच्छ्रेयः किं न चेत् स विमुक्तये ॥ ७ ॥
यातनाया दिने तस्मिन् स्वपुत्रानेव चार्पयेत् । [१२]स्वां वधूं सोदरं किञ्च; [१३]शरण्यं स्वं कुटुम्बकम् ॥ ८ ॥
[१४]येऽथ किञ्च वसन्त्यत्र धरित्र्यां तान् समानपि । कदाचित्तेन चैवाऽस्य मुक्तिलाभो भवेदिति ॥ ९ ॥
[१५]कदाचिन्नैव (तच्छक्यम्), नरकाग्निरसौ ध्रुवम् । [१६]भर्जनः पिशितस्याऽस्ति; [१७]तं तमाह्वयते हि सः ॥१०॥
पराङ् आस्यः पराऽयाद् यः पृष्ठसन्दर्शकश्च यः । [१८]संचयं यो व्यधाद् (रायः) ता अवारयताऽपि च ॥११॥
[१९]मानवोऽसृज्यताऽत्यर्थं समुद्विग्नमनाः किल । [२०]जायते संभ्रमाऽऽपूर्णो यदाऽसौ प्रविपद्यते ॥१२॥
[२१]वृत्वा तिष्ठति तं भद्रं यदा चैवोपतिष्ठते । [२२]पूजकानां कथा त्वन्या; [२३]स्वपूजायामनारतम् ॥१३॥
तिष्ठन्ति ये रतास्तावत्; [२४]येषाञ्च विभवेष्वपि । विदितोह्यधिकारो ऽस्ति [२५]भिक्षोश्च दुर्गतस्य च ॥१४॥
[२६]प्रत्ययं कुर्वते ये च निर्णयाहस्थितौ पुनः । [२७]स्वप्रभो र्यातनाभ्यश्च कम्पन्ते सर्वदैव ये ॥१५॥
[२८]तादृशी वर्त्तते ह्येव तत्प्रभो र्यातना ध्रुवम् । रक्षितुं नैव शक्नोति कथञ्चित् स्वं तु कश्चन ॥१६॥
[२९]स्वानि गुह्येन्द्रियाणीह संयच्छन्ति तु ये जनाः । [३०]अधिकारं गतानान्तु पत्नीनामात्मनस्तथा ॥१७॥
विहाय विषयं तावत्, निन्द्यास्ते नैव सर्वथा । [३१]ये परं त्वतिरिच्यैतत्, वर्त्तन्ते कामचारतः ॥१८॥
मर्यादोल्लंघिनो लोकास्त एते ह्येव विश्रुताः । [३२]ये त्वऽथावहिता आधौ स्वप्रतिज्ञापरास्तथा ॥१९॥
[३३]साक्ष्ये दत्ते स्थिराश्चैव; [३४]पूजारक्षार्थमुद्यताः । [३५]त एवैते हि ये स्वर्गे वत्स्यन्ति मानपूर्वकम् ॥२०॥
[३६]श्रद् विहीनांस्तुदन्त्येतान् किन्नु यत्ते (मुहम्मद !) । त्वामेवाभ्यापतन्त्येते स्फारितै र्लोचनैर्निजैः ॥२१॥
[३७]वामाच्च दक्षिणाच्चापि गणादूर्ध्वं गणा हि वै । [३८]प्रत्येकं किन्नु खल्वेषां साशो यत् स प्रवेक्ष्यति ॥२२॥
स्वर्गोद्यानं हि यत्राऽऽस्ते महानन्दो हि (शाश्वतः) ? । [३९]कदाचिन् नैव, बोधन्ति ते हि तत् तान् यतो वयम् ॥२३॥
असृजाम; [४०]न किंचिद् वै, शपेऽहन्तूदयास्तयोः । स्थानैः, नैवाऽत्र सन्देहो वयं शक्ता हि सर्वथा ॥२४॥
[४१]स्थानिकानुत्तरान् लोकान् चापि यद् वै सृजेम तु । सामर्थ्यान्निदमस्माकं कथञ्चिद् बाह्यमस्ति च ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[४२]साम्प्रतं विसृजैतांस्तत् रमेरन्नधुना यथा । क्रीडा कथादिवार्तासु यावदेतानुपैत्यसौ ॥२६॥
घस्रो यद् विषयेऽस्माभिः प्रतिज्ञातमभूत् पुरा । [४३]तद्दिने कबरेभ्योऽरं निर्गमिष्यन्ति ते यदा ॥२७॥
प्रतिद्वन्द्वित्वभावेन लक्ष्यं यातुमिवोत्सुकाः । [४४]ईक्षणैर्म्लानिमायातैर्न्यक्कारेणान्धमानसैः ॥२८॥
समं तावत्, स ईदृक्षः प्रतिज्ञातो हि वासरः ।

योगः—२८॥

CC-0. In Public Domain. Digitized by eGangotri

७१

सूक्तम्—नहुषः

(नूह)

(महाकालेऽवतीर्णा अष्टाविंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]नहुषं प्रैषयामाऽथ स्वबन्धूंश्चेतयेद् यतः । प्रागेव यातना नैतानापतेत् कष्टदा यथा ॥ १ ॥
[2]स आह—ज्ञातयो मे भोः ! चेतकोऽहं भवामि वै । प्रत्यक्षता हि युष्मासु; [3]प्रदिशामि तथैव च ॥ २ ॥
बन्दध्वं यूयमल्लाहं यूयं तस्माद् बिभीत च । पालयत वचो मे च; [4]क्षंस्यतेऽघानसौ च वः ॥ ३ ॥
निश्चितं चावधिं यावद् विरतिं वः प्रदास्यति । अल्लाहनिश्चितः कालो यदाप्यभ्येति निश्चितम् ॥ ४ ॥
नासौ विलम्बितुं शक्यो, जानीयात वरं ततः । [5]असावाह—प्रभो ! ज्ञाती दिवारात्रमहं निजाः ॥ ५ ॥
आकारयं त्वदर्थे हि; [6]परन्त्वाकारयत्यपि । पराङ्मुखा हि ता अस्थुः अफलं चाऽभवत् समम् ॥ ६ ॥
[7]त्वत् क्षमावसरं लब्धुं त आहूता यदा यदा । स्वान् श्रवानंगुलीभिस्ते समवृण्वंस्तदा तदा ॥ ७ ॥
पर्यधुश्चाऽथ वासांसि स्वानि धाष्ट्र्यञ्च तेऽगमन् । परांकाष्ठाञ्च गर्वस्य ते ततः पर्युपासत ॥ ८ ॥
[8]ततश्चाऽऽकारयं ह्युच्चैस्तान् स्वरेण; [9]तथा पुनः । जनेष्वघोषयं चैव पुनरेकैकशस्तथा ॥ ९ ॥
[10]अवदं खल्वहम्—"यूयं स्वं प्रभुं याचत क्षमाम् । संशयो नाऽत्र वै कश्चित् क्षमाशीलस्स सर्वदा" ॥१०॥
[11]युष्मासु भूरि स व्योम शैथिल्यं गमयिष्यति । वर्षा हेतोः; [12]प्रभूतेन धनेन सूनुभिस्तथा ॥११॥
वर्धयिष्यति वै युष्मान्, उद्यानानि तथैव च । रोपयिष्यति युष्मभ्यं कुल्याः निस्सारयिष्यति ॥१२॥
असौ किञ्चाऽपि युष्मभ्यम्; [13]कष्टं किं वो नु जायते । अल्लाहमन्तरा यन् नो ह्यंगीकुरुथ गौरवम् ॥१३॥
[14]असृजद् वो विभिन्नेषु क्रमेषु यद्यपि (ध्रुवम्) । [15]पश्यथ किं न सोऽल्लाहः किमिव क्रमपूर्वकम् ॥१४॥
ससर्ज वियतस्सप्त; [16]तन्मध्ये च कला निधिम् । प्रकाशं ह्यकरोत्, सूर्यं प्रदीपं चाकरोत् पुनः ॥१५॥
[17]भूमेर्विशेषतोऽल्लाहस्तथा युष्मान् व्यकासयत् । [18]अन्ततश्च पुनर्युष्मांस्तत्रैव गमयिष्यति ॥१६॥
बिवृतांश्च पुनर्युष्मान् सविशेषं करिष्यति । [19]धरित्रीमकृताऽल्लाहो युष्मभ्यं प्रथितां किल ॥१७॥
[20]येन यूयं प्रयाताऽस्या उपत्यकाऽयनेषु हि । [21]उवाच नहुषः "स्वामिन् ! अवाजानन् इमे हि माम् ॥१८॥
अन्वयुस्तांस्तथालोकान् सूनवो विभवास्तथा । येषां तावदकल्पन्त हानये ह्येव केवलम् ॥१९॥
[22]अतिष्ठन् ये तथा व्यग्राश्शश्वद् दुरभिसन्धिषु । [23]अवदंश्च "कदाचिन्नो प्रतीष्टान् स्वान् जहीत तु" ॥२०॥
नापि वेदं (वद्द) सुवाचं वा यजुषं वाऽपि नश्वरम् । यज्ञोकं वा जहीताऽथ; [24]पथभ्रष्टानिमे बहून् ॥२१॥
व्यधुश्चैवाऽथ त्वं चापि पथभ्रष्टानिमान् जनान् । उपेक्षस्वैव; [25]ते लोकास्स्वैः कृतैरेव पातकैः ॥२२॥
न्यमज्ज्यन्त पुनश्चाग्नौ प्रावेक्ष्यन्त तथैव च । अशकंस्ते सहायञ्च लब्धुं नाल्लाहतः पृथक् ॥२३॥
[26]अवोचन्नहुषश्चैवम्—"श्रद्विहीनेषु कञ्चन । मुञ्च मा त्वं प्रभो! भूमौ; [27]यद्येतांस्त्वं विमोक्ष्यसि ॥२४॥
तदेते वन्चकांस्ते वै भ्रंशयिष्यन्ति वर्त्मनः । कृतघ्ना सन्ततिश्चैषां दुश्चरित्रा जनिष्यते ॥२५॥
[28]प्रभो ! मां त्वं क्षमस्वाऽथ मातरं पितरं तथा । श्रद्धया ये च मद्गेहं प्रविशन्ति हि तानपि ॥२६॥
श्रद्धरान् पुरुषान् स्त्रीश्च श्रद्धरास्त्वमिमान् परम् । पाप्मनो नाशमेव त्वं प्रापयाऽत्र हि साम्प्रतम् ॥२७॥

योगः—२७

CC-0. In Public Domain. Digitized by eGangotri

७२

सूक्तम्—जिन्न

(अल-जिन्न)

(महाकालेऽवतीर्णा अष्टाविंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]बोधयैतत् तु (भोः लोकान्) "प्रकाशं गमितोऽस्म्यहम् । जिन्नानां केचिदशृण्वन् अब्रुवन् पुनरेव च ॥ १ ॥
कुराणं तावदस्तीदं सुवहु विस्मयञ्जनम् । [२]ऋजुं दर्शयते ऽध्वानं श्रद्दध्मस्तेन तत्र च ॥ २ ॥
प्रभुणा सममन्यञ्च मन्यामहे न कञ्चन । [३]वर्धतां गौरवं किञ्च स्वप्रभो र्न हि कञ्चन ॥ ३ ॥
स्वीकृतं ह्यकृताऽसौ स्वपत्नीवत् सुतवत् तथा । [४]अस्माकं किञ्च ये मूर्खा अल्लाहमधिकृत्य ते ॥ ४ ॥
असत्यं प्रावदन् घोरं नैरन्तर्येण वै जनाः । [५]अबुध्यामहि किञ्चैव ह्यल्लाहमधिकृत्य तु ॥ ५ ॥
मानवाश्च जिनाश्चैव त्वनृतं स्तोकमप्यथ । वदिष्यन्ति हि नैवाऽपि; [६]ह्यथेदं यच्च केचन ॥ ६ ॥
मानवेषु जिनानां हि केषांचित् शरणं गताः । कारणेनाऽमुना ते च दर्पोद्युक्ताः कृता जिनाः ॥ ७ ॥
[७]अबुध्यन्ताऽथ ते किञ्च त्वं यथाऽबुध्यथाः किल । उद्धरिष्यति नैवाऽपि ह्यल्लाहः कञ्चनापि तु ॥ ८ ॥
[८]अथैतत् किञ्च यद् व्योम परामृष्टं न्यरूप्यत । कर्कशैः प्रतिहारैश्च पूर्णमुल्काभिरेव च ॥ ९ ॥
[९]अतिष्ठाम स्थलेष्वस्य श्रोतुं प्राक् सततं वयम् । शुश्रूषुः साम्प्रतं प्राप्तस्त्वत्र संपश्यति स्थितम् ॥१०॥
घातोन्मुखं वृहद्भानुम्; [१०]अथैतत् किञ्च यद् वयम् । न जानीमो धरित्र्यां ये जनास्तेभ्यो हि तिष्ठति ॥११॥
हानिभावोऽथवा तेषां प्रभोरस्ति समीहितम् । दर्शितं यद् भवेत् तेभ्यो भद्रमेवाऽयनं पुनः ॥१२॥
[११]अथैतत् किञ्च यल्लोका भद्रा अस्मासु केचन । अस्मास्वेव पुनर्लोका अन्यरूपा भवन्ति च ॥१३॥
भिन्नभिन्नास्तथा मार्गा अस्माभिः पुनराश्रिताः । [१२]अथैतत् किञ्च यद् भूमौ स्थिता नैवात्मनो वयम् ॥१४॥
अल्लाहाद् रक्षितुं शक्ता धावित्वा चाऽपि नैव वा । [१३]अथैतत् किञ्च तद्-वार्ता श्रुताऽस्माभिर्यदा ऽभवत् ॥१५॥
मार्गदर्शनसम्बन्धे विश्वासोऽभूत् कृतस्तदा । स्वप्रभौ यश्च कश्चाऽपि श्रद्दधानो भविष्यति ॥१६॥
न भयं तस्य हानेश्च बाधानाञ्च भविष्यति । [१४]अथैतत् किञ्च यत् केचित् मार्गाद् भ्रष्टा जना अपि ॥१७॥
आत्मार्पकास्तथैवाऽन्ये भवन्त्यस्मासु वै जनाः । आत्मार्पकाः पुनर्येऽत्र स्वीकृतं तैश्शुभायनम् ॥१८॥
[१५]येऽवशिष्टास्ततो लोका मार्गभ्रष्टा हि ते ऽभवन् । दुर्गताविन्धनान्येव; [१६]ह्यथैतत् किञ्च यद्, वयम् ॥१९॥
अदास्याम प्रभूतं वै जलं तेभ्यो हि ते यदि । अन्वयास्यन् शुभं मार्गम्; [१७]परीक्षेमहि येन तान् ॥२०॥
तेन, यः स्वप्रभोश्चापि प्रसंगाद् विरतो भवेत् । धुक्षेत् तं तं ह्यसौ तत्र यातनाऽग्नौ (हि सर्वथा) ॥२१॥
[१८]अथैतत् किञ्च यत्-तावत् प्रणिपातनमस्क्रिया । अल्लाहायैव नान्यस्मै, स्तुवीध्वं नाऽपरं ततः ॥२२॥
अल्लाहेन समं तावत्; [१९]अथैतत् किञ्च यद्-यदा । अल्लाहवन्धकस्तस्य प्रार्थनार्थं स्थितो ऽभवत् ॥२३॥
आपतन्ति स्म ते तस्मिन् (दिग्भ्यस्सर्वाभ्य एव तु) । [२०]ब्रूहि (तान्) स्वं प्रभुं ह्येव केवलं स्तौम्यहन्तु भोः! ॥२४॥
प्रतिमानं पुनश्चास्य नैव मन्ये हि कञ्चन । [२१]ब्रूहि—"नास्ति वशो मे तु युष्माकं यदहं क्वचित् ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

हानिं वाऽप्यथवा लाभं जनयेयं कथञ्चन" । [२२]ब्रूहि "शक्तो न मां कश्चिदल्लाहाद् रक्षितुं क्वचित् ॥२६॥
शरण्यं तमृते नान्यं लब्धुं शक्नोमि कञ्चन" । [२३]एष मे केवलो धर्मो ऽल्लाहसन्दिष्टवाहनम् ॥२७॥
योऽवजानाति कश्चित् तं ह्यल्लाहं किञ्च वाग्घरम् । तस्य तस्मै (सदैवा) ऽस्ते नारकोऽग्नि र्हि यत्र ते ॥२८॥
सदा वत्स्यन्ति वै लोकाः; [२४]द्रक्ष्यन्त्येते यदैव च । तदासीद् यत् प्रतिज्ञातं भोत्स्यन्ते हि तदा न्विमे ॥२९॥
को नु हीनसहायोऽस्ति हीनसंख्यस्तथाऽस्ति कः । [२५]ब्रूहि—"नाऽहन्तु भोः! जाने प्रतिज्ञातमभूत् पुरा ॥३०॥
यद् युष्माभिस्तु तन्नेदो वर्त्तते, वर्त्तते ऽथवा । प्रभुणा मे कृतः कालो विप्रकृष्टो विलम्बतः ॥३१॥
[२६]परोक्षं वेत्त्यसौ किञ्च रहस्यं स्वं न कुत्रचित् । कथञ्चित् काशयत्येव; [२७]वाग्घरत्वेन यन्त्वसौ ॥३२॥
अभीष्टं मन्यते तस्य पश्चादग्रे च रक्षकान् । नियुनक्ति पुनस्तावत्; [२८]विजानीयादसौ यथा ॥३३॥
स्वप्रभोस्ते हि सन्देशान् प्रापयन्नेव सर्वथा । तेषां चेष्टा हि संवृत्य स वै तिष्ठति सर्वदा ॥३४॥
तत् सकाशे च यच्चापि स वै संख्याय तिष्ठति ।

योगः—३४॥

CC-0. In Public Domain. Digitized by eGangotri

७३

सूक्तम्—परिधानोपसंवीतः

(अल-मुज़्ज़म्मिल)

(महाकालेऽवतीर्णा विंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]परिधानोपसंवीत !; [२]कञ्चित् कालमृते निशि । स्थेयं त्वयाऽप्रमत्तेन; [३]निशार्धं, मथवा पुनः ॥ १ ॥
स्तोकमल्पं ततश्चापि; [४]स्तोकमन्यं ततोऽपि वा । कुराणं सावधानेन चेतसा पठ्यमेव च ॥ २ ॥
[५]गुरुं भारं वयं वाचां त्वयि न्यस्तुं हि तत्पराः । [६]निशाकालः किलाऽत्यन्तां धारयत्यनुकूलताम् ॥ ३ ॥
वाक् प्रवृत्ता च तत् काले कल्पते ऽत्यन्तसिद्धये । [७]व्यापृतो दिवसस्सत्यं व्यापारैरति तिष्ठति ॥ ४ ॥
[८]स्वप्रभोर्जप तन् नाम, तस्मिन्नेव रमस्व च । अनन्यचेतसा तावत्; [९]पूर्वपश्चिमयोः प्रभुः ॥ ५ ॥
प्रतीष्टस्तमृते नान्यो, रक्षकं ह्यात्मनस्ततः । त्वमंगीकुरु तं ह्येव; [१०]यद् वदेयुरिमे ऽथ च ॥ ६ ॥
सहस्व तत्समञ्चापि, वियुज्यस्वाऽथ किं च तैः । भद्रेण विधिना ह्येव; [११]ह्यमीषां साधनाय च ॥ ७ ॥
इनानां सौख्यभोगानां त्वं मां विसृज चाऽथ भोः ! । अर्थेभ्यो दीयताञ्चापि मुहुः कालावधिः किल ॥ ८ ॥
[१२]गुर्व्यः खल्वन्दुकाश्चैव ज्वलद्वह्निस्तथैव च । सन्ति यान् धारयामो वै; [१३]गलरोधिष्णु भोजनम् ॥ ९ ॥
कृच्छ्रदा यातनाश्चैव; [१४]दिने यस्मिन् धरा तथा । दोलास्यन्ति धराश्चैव, पर्वता निचया अपि ॥१०॥
सिकतानां भविष्यन्ति; [१५]प्रैषयाम हि वः प्रति । वाग्घरं साक्षिणं कृत्वा किलैकं, प्रैषयाम हि ॥११॥
वाग्घरं प्रिययौनस्य समीपं यद् वदेव तु । [१६]अवाजानात् परं (हन्त!) प्रिययौनो हि वाग्घरम् ॥१२॥
ग्रहीतस्तेन जातोऽसावस्माभिस्सुदृढे ग्रहे । [१७]आत्मानं किं पुनः कृत्वा त्वन्नु त्रास्यस्युपेयुषः ॥१३॥
दिनात् तस्मात् प्रजायेथाश्श्रद्विहीनो हि वै यदि । यद् दिनं बालकान् जीर्णान् वृद्धांस्तावद् विधास्यति ॥१४॥
[१८]व्योम यास्यति विस्फोटं, पूर्त्तिमेष्यत्य (संशयम्) । प्रतिज्ञातं हि यत्तेन; [१९]ह्यनुस्मारकमस्त्यदः ॥१५॥
सकामस्तद् य एवाऽपि सोऽयनं स्वप्रभोर्व्रजेत् । [२०]त्रियामायां द्वियामं त्वं सक्षणस्तिष्ठसीह यत् ॥१६॥
निशार्धं वैकयामं वा यत् कदाचिच्च तिष्ठसि । प्रभुस्ते तद् विजानाति लोकानां तं गणं तथा ॥१७॥
पार्श्ववर्त्ती तवाऽऽस्ते यः, प्रमिमीते हि सर्वशः । अहोरात्रं किलाऽल्लाहस्, सोऽवेत् सम्यगिदं हि यत् ॥१८॥
सर्वशः पालनं ह्यस्य भवेत् तुभ्यं हि दुष्करम् । प्रेरितोऽनेन खल्वेष सानुकम्पस्त्वयि स्थितः ॥१९॥
साम्प्रतं पठ तद् यावत् सौकर्येण हि शक्यते । कुराणं पठितुं, किञ्च सोऽजानात् सरुजो हि वः ॥२०॥
भविष्यन्ति जनाः केचित्, केचिदन्ये तथैव च । भ्रमिष्यन्ति धरायां वै ह्यल्लाहसम्पदां पुनः ॥२१॥
चिचीषया हि, खल्वन्ये जना अल्लाहवर्त्मनि । योत्स्यन्तेऽथ ततस्तत् त्वं पठ सौकर्यमाश्रितः ॥२२॥
पूजां प्रतिष्ठिताञ्चैव कुरु दानं प्रदेहि च । अल्लाहार्थं ऋणद्रव्यं सौदार्यं वितराऽथ च ॥२३॥
यच्च भद्रं निजार्थे वा ह्यग्रतस्त्वं प्रहेष्यसि । अल्लाहसन्निधे तत् तद् गुणितं द्रक्ष्यसि ध्रुवम् ॥२४॥
पुरस्काराय वैपुल्यं चाऽथ यातम्, कुरुष्व तत् । प्रार्थनां निकषाऽल्लाहं क्षमाहेतोरसंशयम् ॥२५॥
दयावान् किल सोऽल्लाहः क्षमवांश्चापि वर्त्तते ।

योगः—२५॥

CC-0. In Public Domain. Digitized by eGangotri

सूक्तम्–प्रावारावृत

(अल-मुद्दस्सिर)

(महाकालेऽवतीर्णाः षट् पञ्चाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]प्रावारावृत हे मर्त्य !; [२]त्वमुत्तिष्ठाऽथ बोधय ! । [३]महिम्नस्स्वप्रभोश्चैव वर्धयस्व; [४]तथैव च ॥ १ ॥
रक्षणीयानि वासांसि स्वानि शुद्धानि (सर्वतः) । [५]विप्रकर्षो मलाच्चैव भजनीयो; [६]ह्यनुग्रहः ॥ २ ॥
दर्शनीयो न कस्याऽपि सम्पदां प्राप्ति काम्यया । [७]सन्तोषो भजनीयश्च ह्यात्मनः प्रभवे किल ॥ ३ ॥
[८]यदा किं चाऽथ तत् तूर्यं नादितं हि भविष्यति । [९]परितापदिनं तद् वै निश्चयेन भविष्यति ॥ ४ ॥
[१०]श्रद्विहीनजनेभ्यो वै सुकरं न कथञ्चन । [११]मां समं विसृजेतेन सृष्टो यो ह्येकलो मया ॥ ५ ॥
[१२]सुदूरं प्रसृतं वित्तं दत्तं तस्मै; [१३](तथैव च —) । पार्श्वगास्सूनवो (दत्ताः); [१४]धरा चाऽस्मै समीकृता ॥ ६ ॥
[१५]"दद्यामन्यत्" ततोऽप्येवं गृध्यत्येव हि यः पुनः । [१६]सर्वथा नो, ऽस्मदायातान् स तु वैरायते किल ॥ ७ ॥
[१७]पातयिष्याम्यहं तस्मिन् भीष्मं दिष्टं झटित्यपि । [१८]अचिन्तयत् तथैवाऽसौ योजना अकृताऽपि च ॥ ८ ॥
[१९]नश्यतात् एव हन्तासौ, किम्विधा योजना कृता ? । [२०]नश्यतात् पुनरेवाऽसौ, किम्विधा योजना कृता ? ॥ ९ ॥
[२१]दृष्टिपातं पुनश्चैव, सोऽकृत; [२२]तदनन्तरम् । भ्रुकुटीं सज्जयामास तथाऽनिष्टमदर्शयत् ॥१०॥
[२३]परिवर्त्य पुनः पृष्ठं गर्वं किं चाप्यधारयत् । [२४]आह पश्चात्—"इदं नान्यत्, प्राचां मायैव केवला ॥११॥
[२५]मानुषी ह्येव वाचेयम्"; [२६]सद्यः क्षेप्स्याम्यहं हि तम् । (लेलिहाने)ऽनले ह्येव; [२७]केन वेत्स्यसि कोऽनलः? ॥१२॥
[२८]विसृजति न कञ्चित् स न रक्षत्यथ कञ्चन । [२९]मानुषं विग्रहं चैव संकोचयति सर्वथा ॥१३॥
[३०]नियुक्तास्तत्र वर्त्तन्ते एकान्नविंशतिर्जनाः । [३१]नियुक्तास्तस्य चाऽस्माभिर्देवा एव प्ररक्षणे ॥१४॥
कृता संख्या तथाऽमीषां गतिरोधाय खल्वथ । श्रद्विहीनजनानां वै, निश्चयाधानहेतुना ॥१५॥
तेषु येभ्यस्तथा दत्तं पूर्वं शास्त्रं किला ऽभवत् । श्रद्धराणां तथा श्रद्धा विकसेत् पूर्वतोऽधिकम् ॥१६॥
पतेयुर्नाथ ते गर्त्ते सन्देहस्य च ये जनाः । दत्तशास्त्रा हि विद्यन्ते विद्यन्ते श्रद्धरास्तथा ॥१७॥
किञ्च ये हृदये रोगं बिभ्रतीह जना अथ । श्रद्विहीना जना ये च ते वदेयुः किलेदृशम् ॥१८॥
"अभिप्रैति किमल्लाहो वर्णनेनेदृशेन तु" ? । एवमेव हि सोऽल्लाहः पथभ्रष्टं करोति ह ॥१९॥
दर्शयत्यथवा मार्गं यं यथा किल वाञ्छति । स एवाऽसौ च जानाति त्वत् प्रभोश्चैव वाहिनीः ॥२०॥
अनुस्मारकमेवैतत् मानवेभ्यस्तु केवलम् । [३२]न किंचिद् वै, शपे तावत् ग्लावा; [३३]चैव निशा तथा ॥२१॥
यदेयं तत्परा तावज्जायतेऽपक्रमाय वै । [३४]काल्येन काशमानं तज् जायते हि यदैव च ॥२२॥
[३५]तद् गुरूणां हि वस्तूनां भवत्यन्यतमं किल । [३६]चेतयितृ किलाऽऽस्ते च मानवेभ्योऽ; [३७]थ यस्तथा ॥२३॥
युष्माकं गन्तुकामस्स्यादग्रतो यस्तथैव च । पृष्ठतस्स्थातुकामो वा चाऽपि तस्मै च वर्त्तते ॥२४॥
[३८]स्वकृतेनैव बद्धोऽत्र योऽपि कोऽपि जनो भुवि । [३९]विहायामूंस्तु ये तावद् ह्यवामवन्त एव हि ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[४०]उद्यानेषु प्रविष्टाश्च मिथः प्रक्ष्यन्ति खल्वथ । [४१]अधिकृत्य सदोषान् हि; [४२]किन्नु वो नारकानलम् ॥२६॥
प्रापयत् ?; [४३]ते वदिष्यन्ति-नमस्यावत्सु नो वयम् । अभवाम; [४४]दरिद्राय चान्नदा नाभवाम च ॥२७॥
[४५]वादिभिस्सह वादेषु ह्यरमामहि केवलम् । [४६]निर्णयाहं वयं किञ्च मिथ्येत्यख्यापयाम च ॥२८॥
[४७]एतस्मिन्नन्तरे चैवैदपरिहार्यवासरः । [४८]अभ्याशंसाऽफला जाता ह्यभ्याशंसाकृतामपि ॥२९॥
[४९]तांस्तुदत्यत्र किं यत्ते पराङ् आस्याः किल स्थिताः । अनुस्मारकतो ह्यस्मात्; [५०]सभया गर्दभन्ति ते ॥३०॥
[५१]पलायन्ते नु किं न्वेते सिंहदर्शनजाद् भयात् । [५२]न वै तत्, सत्यमेतत् तु, तेषां सर्वोऽपि कांक्षते ॥३१॥
विशदानि हि पृष्ठानि दीयमानानि सर्वथा । [५३]तन्न वै, नैव तेषान्तु परलोकाद् भयं किल ॥३२॥
[५४]अनुस्मारकमेवैतत्, न वै किञ्चिद (तः परम्) । [५५]यस्य काम्यं स एवाऽस्मिन् वितरेद् ध्यानमात्मनः ॥३३॥
[५६]अल्लाहस्य न काम्यन्तु यावत् कालं भविष्यति । वितरिष्यन्ति नो ध्यानं तावत्तेऽपि किलात्मानः ॥३४॥
सैष स्रोतो भयानां च दयास्रोतस्तथैव च ।

योगः—३४॥

७५

सूक्तम्—मृताभ्युत्त्थानम्

(अल-क़ियामा)

(महाकालेऽवतीर्णाश्चत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]न वै तावत्, शपेऽल्लाऽहं मृताभ्युत्त्थानदर्शिना । [३]किञ्च नान्यत्, शपे तेन ह्यात्मनाऽऽक्षिपता स्वतः ॥ १ ॥
[२]संजानाति जनः किम्वा तस्यास्थीनि कदाचन । संहृतानि करिष्यामो नो वयं किल कर्हिचित् ॥ २ ॥
[४]कथं नों; ऽगुलिपर्वाणि चाऽपि तस्य वयं पुनः । प्रतिष्ठापयितुं शक्तास्, सामर्थ्यं विभृमो हि तत् ॥ ३ ॥
[५]कांक्षते हि परं मर्त्यस्तदग्रे दुष्टसाहसम् । संप्रदर्शयितुं स्वीयम्; [६]स वै पृच्छति तद् दिनम् ॥ ४ ॥
कदोपेष्यति?; [७](भोः!)दृष्टिर्यदा भ्रान्ता भविष्यति । [८]सोपरागो यदा सोमस्तथा चैव भविष्यति ॥ ५ ॥
[९]यदाऽथ संहनिष्येते सूर्याचन्द्रमसावपि । [१०]दिने तस्मिन् मनुष्यश्च क्रन्दन् एवं वदिष्यति ॥ ६ ॥
"कां दिशं यानि धावित्वा"? [११]हन्त! नो शरणं मम । [१२]तदा युष्मत् प्रभोरेव पार्श्वे गत्वा त्ववस्थितिः ॥ ७ ॥
[१३]तत् कृतेर्विषये चैव तदा ना बोधयिष्यते । [१४]प्रमाणं मानवस्त्वत्र स्वस्मै स्वेन परं स्थितः ॥ ८ ॥
[१५]उपस्थापयते स्वस्मै मिषान् यद्यप्यसौ (बहून्) । [१६]सहैवाऽनेन वाचं स्वां मैव प्रेरयताऽथ च ॥ ९ ॥
यथा शीघ्रायतां साऽत्र; [१७]संहतीकरणं तथा । वाचनं त्वस्य सर्वस्य मदायत्तं (निबोध हि) ॥१०॥
[१८]यदैतद् वाचयेम त्वं चानुवाचय वाचनम् । [१९]अस्य व्याख्यानमत्राऽस्ते मदायत्तं हि (केवलम्) ॥११॥
[२०]न वै किञ्चित्; रतिस्ते तु (भवे) हि क्षणभंगुरे । [२१]उदास्तस्त्वं पुनश्चास्से परलोके हि सर्वथा ॥१२॥
[२२]पुष्पितानि दिने तस्मिन् भविष्यन्त्याननानि वै । [२३]स्वं प्रभुञ्चेक्षमाणानि भविष्यन्ति हि सन्ततम् ॥१३॥
[२४]उदास्तानि तदाऽन्यानि भविष्यन्त्याननानि च । [२५]आपतिष्यन्महत् कष्टं वर्त्तते तेषु वेत्स्यसि ॥१४॥
[२६]न वै किञ्चिद्, भविष्यन्ति प्राणाः कण्ठगता यदा । [२७]इदं क्रोशिष्यते चैव—'क्व तावन्मान्त्रिकस् स्थितः'? ॥१५॥
[२८]असौ ज्ञास्यति किञ्चाऽपि—"वियोगक्षण आगतः" । [२९]किञ्च कष्टे पुनः कष्टं, कष्टं तत्राऽपि चाऽऽचितम् ॥१६॥
[३०]प्रस्थातव्यं तदा च स्यात् त्वत्प्रभुं समयाऽथ च । [३१]प्रत्ययो न कृतस्तेन, न च पूजा तथाऽऽहिता ॥१७॥
[३२]न्यषेधत् स परम्, जातः पराङ्मास्यस्तथैव च । [३३]साभिमानः पुनर्लोकान् स्वांस्तथाऽभ्यागतोऽभवत् ॥१८॥
[३४]धिगेव त्वां धिगेव त्वां धिगेव त्वां तु वर्त्तते । [३५]धिगेव त्वां पुनस्त्वां धिक् त्वां धिगेव हि वर्त्तते ॥१९॥
[३६]किं जनो मन्यते यत् स निरुद्देश्योऽनुमंस्यते । [३७]वीर्यविन्दुस्स नासीत् किं समारम्भे प्रवाहितः ? ॥२०॥
[३८]ततः पिण्डं हि तज्जातं साकारं तत् ततः कृतम् । [३९]ततो युग्मं कृतं तस्मात् स्त्रीरेका पुरुषोऽपरः ॥२१॥
[४०]असौ किं नैव शक्तस्तन् मृताभ्युत्त्थानकर्मणि ? ।

योगः—२१॥

CC-0. In Public Domain. Digitized by eGangotri

७६

सूक्तम्—कालो वा मानवो वा

(अद-दह)

(महाकालेऽवतीर्णा एकत्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]समायातो नु किं कालस्तादृशोऽपीह कश्चन । मानवस्य यदाऽसौ वै न मनागप्यगण्यत ॥ १ ॥
[२]असृजाम वयं मर्त्यं घनेन वीर्यविन्दुना । तत् परीक्षाकृते, किञ्च व्यधाम पुनरेव च ॥ २ ॥
कर्णवन्तं हि तम् किञ्च चक्षुष्मन्तमथाऽपि च । [३]कृतज्ञो वा कृतघ्नो वा योऽपि कोऽपि भवेद्, वयम् ॥ ३ ॥
अदर्शयाम तं मार्गम्; [४]कृतसज्जा वयं पुनः । धिक्षतो ऽग्नेश्च दण्डानां शृंखलानां तथैव च ॥ ४ ॥
श्रद्विहीनजनेभ्यस्तु; [५]ये तु भद्रा हि ते जनाः । मद्यपात्रं हि पास्यन्ति कर्पूरद्रवमिश्रितम् ॥ ५ ॥
[६]स्रोत एवत्तु पातारो यतो ऽल्लाहस्य बन्धकाः । स्रावयिष्यन्त्यदो भूरि चैव; [७]संभावयन्ति ते ॥ ६ ॥
व्रतं त्वंगीकृतम्, किञ्च ततो विभ्यति वै दिनात् । आपदा यस्य सर्वत्र त्वभिव्याप्य हि तिष्ठति ॥ ७ ॥
[८]भोजयन्ति पुनश्चान्नं दरिद्रं वन्दिनं तथा । अनाथञ्चापि तस्यैव स्नेहमापेक्ष्य केवलम् ॥ ८ ॥
[९](वदन्तो) भोजयामो वै वयं युष्मांस्तु केवलम् । प्रसादं लब्धुमाल्लाहं, न युष्मत्तोऽथ कञ्चन ॥ ९ ॥
धन्यवादं पुरस्कारं वाऽप्यपेक्षामहेऽथ च । [१०]निजाल्लाहाद् दिनैकस्य विषये सभया वयम् ॥१०॥
त्रिबलिसंपरीतं यद् भृकुटिभृत्तथैष्यति । [११]अरक्षत् तांस्ततोऽल्लाहस्तदह्नो ह्यापदः पुनः ॥११॥
भासुरत्वप्रसादाभ्यां चाऽथ तान् समयोजयत् । [१२]सन्तोषोऽप्यथ योऽमीभिर्दर्शितस्तस्य हेतुना ॥१२॥
कौशेयलक्तकारामैरिमे तावत् पुरस्कृताः । [१३]उच्चैस्तत्रासनेष्वेते सोपधानास् स्थिता न वै ॥१३॥
क्लेशयिष्यन्त एवाऽपि तापेन वा हिमेन वा । [१४]शीर्षेष्वालम्बिनीच्छाया तत्र, तस्य फलानि च ॥१४॥
गुच्छितानि नमन्त्येषां वशं यातानि सर्वशः । [१५]राजतानि च पात्राणि तांश्चलन्ति परि भृशम् ॥१५॥
कंसाः काचस्वरूपाश्च; [१६]काचाः रजतनिर्मिताः । योजनावद्धरूपेण तत्र ये सम्यगाहिताः ॥१६॥
[१७]कार्यन्ते तत्र ते पानं मद्यस्य तादृशस्य हि । निर्माणो यस्य वै शुण्ठ्या मिश्रणेन विजायते ॥१७॥
[१८]स्रोतोजलं पुनस्तत्र सरसवहनामकम् । [१९]बालास्तत्रोपयान्तीमान् सर्वदैकदशाः किल ॥॥१८॥
मौक्तिकानीव कीर्णानि मतिर्यद् दर्शनाद् भवेत् । [२०]महद् राज्यमिदं, सौख्यं त्वपारं चाऽत्र वर्त्तते ॥१९॥
दर्शनाद् यस्य जायेत ह्यनुभूतिः किलेदृशी । [२१]उत्तमं हरि कौशेयं तेषां वासो भविष्यति ॥२०॥
सूचिकर्माभ्युपेतञ्च वासः कौशेयकं तथा । राजतैर्वलयैश्चैव ते भविष्यन्त्यलंकृताः ॥२१॥
तत्प्रभुश्च पुनस्तेभ्यस्स्वच्छं पेयं प्रदास्यति । [२२](तेऽपि चोक्ता भविष्यन्ति) पुरस्कारो ह्ययं किल ॥२२॥
वर्त्तते ननु युष्मभ्यम्, यत्नानां चाऽथ मानना । वर्त्तते किल युष्माकम्; [२३]त्वय्येव किञ्च काशितम् ॥२३॥
कुराणं पुनरस्माभिः; [२४]त्वमात्मानं कुरुष्व च । स्वप्रभोश्शासनाधीनं तूष्णींभावेन, नाप्यथ ॥२४॥
पाप्मनो वा कृतघ्नस्य तेषां वाचं हि पालय । [२५]सन्ध्ययोरुभयोश्चैव स्वप्रभोर्नाम कीर्त्तय ॥२५॥

CC-0. In Public Domain. Digitized by eGangotri

[२६]साष्टांगप्रणिपातेन पूजयैनञ्च निश्यपि । माहात्म्यं गीयताञ्चास्य चिरं यावद्धि निश्यपि ॥२६॥
[२७]रता एते जनास्तावद् भवे हि क्षणभंगुरे । कृच्छ्रदं दिवसं चैव त्यक्त्वा ते पृष्ठतः स्थिताः ॥२७॥
[२८]वयमेव हि यैरेते सृष्टाः, देहा दृढीकृताः । वयमेव वयं चैषां यदैव कामितं भवेत् ॥२८॥
शक्नुमस्सर्वथाऽऽकारं परिवर्त्तयितुं तथा । [२९]अनुस्मारकमेवैतत्, यस्य काम्यं भवेदसौ ॥२९॥
स्वप्रभोरयनं तावत् स्वत एवानुयातु तत् । [३०]न शक्तस्त्वं किमप्येष्टुं नाल्लाहो यावदिच्छति ॥३०॥
ज्ञाता सुधीस्तथाऽल्लाहः; [३१]तस्मै यो योऽपि रोचते । तं हि तं स (दया) राज्ये स्वकीये वेशयत्यपि ॥३१॥
पाप्मानो ये पुनर्लोकास्तेभ्यस्तेनाऽथ सज्जिताः । कृच्छ्रदा यातनास्सन्ति (नाऽत्र कोऽपि च संशयः) ॥३२॥

योगः—३२

७७

सूक्तम्—प्रणिधयः

(अल-मुरसलात)

(महाकालेऽवतीर्णाः पञ्चाशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]वहैः प्रणिधिभिस्तावच् छपेऽभ्यासेन चालितैः । [२]वाताल्या च (शपे) तावत् क्रोधेनापूर्यमाणया ॥ १ ॥
[३]अनिलेन (शपे) तेन वानस्पत्यादिसेविना । [४]भेदकेन (शपे) तेन वायुना; [५]तेन खल्वथ ॥ २ ॥
यस्त्यजेत् स्मृतिचिन्हानि; [६]क्षमेत वाऽथ चेतयेत् । [७]प्रतिज्ञातन्तु युष्माभिस्समं यत्तत् तु सर्वथा ॥ ३ ॥
अनिवार्येण रूपेण घटिष्यत्येव पूर्णतः । [८]यदाऽथ नाशमेष्यन्ति भानि सर्वाण्यथैव च ॥ ४ ॥
[९]आकाशो यास्यति स्फोटम्; [१०]करिष्यन्ते च पर्वताः । चूर्णिताः परमम्; [११]किञ्च वाग्घरेभ्यः क्षणो यदा ॥ ५ ॥
निश्चितो विहितस्तावद् भविष्यति; [१२]प्रतीक्षितः । को नु वै दिवसः ? [१३]तावन्निर्णयाहः प्रतीक्षितः ॥ ६ ॥
[१४]केन वेत्स्यथ किं रूपो निर्णयाहो हि वर्त्तते ? । [१५]यन्तु नाशं दिने तस्मिन् तद्दिनस्य निषेधकाः ॥ ७ ॥
[१६]नाशिताः किं न वै पूर्वे जना अस्माभिः; ? [१७]उत्तरे । चाप्यस्माभिः कृताह्येव पूर्वलोकानुयायिनः ॥ ८ ॥
[१८]व्यवहारोऽस्मदीयस्तु पापैरीदृक्ष एव तु । [१९]यान्तु नाशं दिने तस्मिन् तद्दिनस्य निषेधकाः ॥ ९ ॥
[२०]जनिताः किन्न भोः! यूयं ह्यस्माभिः क्षुद्रकाद् द्रवात्? । [२१]आदधाम पुनस्तञ्च सुगुप्ते वयमाशये ॥१०॥
[२२]सुविज्ञातावधि यावत्; [२३]स्थिरोऽस्माभिः कृतोऽवधिः । योजकानां वयं पश्य ह्यद्वितीया हि योजकाः ॥११॥
[२४]यान्तु नाशं दिने तस्मिन् तद्दिनस्य निषेधकाः । [२५]अकुर्म न वयं किम्वा धरित्रीं परमाश्रयम् ॥१२॥
[२६]जीवितेभ्यो मृतेभ्यश्च; [२७]तुंगास्तत्र च पर्वताः । गाहमानाः कृतास्ताञ्च, प्रदत्तं जलमेव च ॥१३॥
मधुरं पानयोग्यं वस्तामन्तस्सुशयं पुनः । [२८]यान्तु नाशं दिने तस्मिन् तद्दिनस्य निषेधकाः ॥१४॥
[२९]यात तं प्रति यं यूयं सर्वदैव न्यषेधत । [३०]यात वै त्रिशिखां छायाम्; [३१]निविड़ा या न वर्त्तते ॥१५॥
वर्त्तते नाऽथ या साध्वी शरणाय कथञ्चन । [३२]स्फुलिंगान् विकिरन्ती या सौधोत्तुंगान् हि तिष्ठति ॥१६॥
[३३]पीतवर्णा यथा वोष्ट्रास्तद् वदेवाऽपि वा भवेत् । [३४]यान्तु नाशं दिने तस्मिन् तद्दिनस्य निषेधकाः ॥१७॥
[३५]तद् विधं दिनमेतद् यन् न वाक् चापि प्रवर्त्तते । [३६]अनुज्ञाता न ते चैव प्रस्तोतुं मिषमेव वा ॥१८॥
[३७]यान्तु नाशं दिनेतस्मिन् तद्दिनस्य निषेधकाः । [३८]निर्णयस्य दिनं ह्येतत्, समवेतानकुर्म हि ॥१९॥
युष्मांश्च पूर्वजांश्चैव; [३९]तदिदानीं भवेद् यदि । लाघवं समया युष्मान्, व्यापारयत तन्मयि ॥२०॥
[४०]यान्तु नाशं दिने तस्मिन् तद्दिनस्य निषेधकाः । [४१]सन्देहो नात्र ये त्वत्र भवन्त्येव भयन्धराः ॥२१॥
छायाऽऽसीना भविष्यन्ति स्रोतोऽन्तस्स्थायिनश्च ते । [४२]फलानि तत्र वै तेषां सन्ति रुच्यानि सर्वथा ॥२२॥
[४३]सजोषं यूयमश्नीत सजोषं पिबताऽपि च । युष्माभिर्यत् कृतं तस्य पुरस्काराऽनुरूपतः ॥२३॥
[४४]अस्माकं भद्रकृद्भ्यस्तु पुरस्कारः किलेदृशः । [४५]यान्तु नाशं दिने तस्मिन् तद् दिनस्य निषेधकाः ॥२४॥

CC-0. In Public Domain. Digitized by eGangotri

[४६]पिबताऽश्नीत, भोगेषु रमध्वम् च मनाक् पुनः । सदोषा ननु भोः ! यूयम् (तद् दिनस्य निषेधकाः) ॥२५॥
[४७]यान्तु नाशं दिने तस्मिन् तद् दिनस्य निषेधकाः । [४८]यदाऽपेक्षा पुनस्तेभ्यः प्रह्वीभावाय जायते ॥२६॥
प्रह्वीभावं न ते यान्ति; [४९]यान्तु नाशं त्वनेहसि । ते हि तस्मिंस्तु ये तावत् तद्दिनस्य निषेधकाः ॥२७॥
[५०]निजं ते किल विश्वासं कस्यां वाचि त्वितोऽग्रतः । अध्यास्यन्ति जनास्तावज् (ज्ञायते नैव किञ्चन) ॥२८॥

इति एकान्न त्रिंशत्तमं पारायणम्

योगः—२८

७८

सूक्तम्–उदन्तः

(अन-नबा)

(महाकालेऽवतीर्णाश्चत्वारिंशदायाताः)

साल्लाह्नामजापं योऽल्लाहो दयो हितैष्यपि

अथ त्रिंशत्तमं पारायणम्

[१]प्रश्नः किं विषयो ह्येषाम्;? [२]कूदन्त विषयो ह्यसौ । [३]अमीषां यत्र वैमत्यम्; [४]किंचिन्नान्यत्, द्रुतं ह्यमी ॥ १ ॥
ज्ञानं ज्ञेयस्य यास्यन्ति; [५]किंचिन्नान्यत् पुनर्द्रुतम् । बोधमेते प्रयास्यन्ति; [६]धरित्रीं किं न (भोः!) वयम् ॥ २ ॥
अकुर्माऽऽस्तरणम्?; [७]चाऽथ पर्वतान् कीलकान् पुनः? । [८]असृजाम तथा युष्मान् युगलेषु; [९]कृतश्च वः ॥ ३ ॥
स्वापो विश्रामलाभाय; [१०]निशा चाऽऽवरणं कृता । [११]आजीवनार्जनार्थाय कृतो घस्रोऽथ च कृताः ॥ ४ ॥
[१२]सप्ताऽऽकाशा दृढा ऊर्ध्वं युष्माकम्; [१३]किञ्च वै कृतः । एकस्सार्चिः प्रदीपश्च; [१४]सासारं जलमेव च ॥ ५ ॥
वृष्टं धाराधरेभ्योऽपि; [१५]सृजेयुस्तेन यत् पुनः । वानस्पत्यं तथाऽन्नञ्च; [१६]सघनोपवनानि च ॥ ६ ॥
[१७]निश्चितस्समयस्तस्य निर्णयाह्स्य विद्यते । [१८]दिनं तत् तूर्यघोषो वै यदा चैव भविष्यति ॥ ७ ॥
गणानां चैव सम्पाता भविष्यन्त्युपयायिनः । [१९]अपावृतस्तथाऽऽकाशो यदा चैव करिष्यते ॥ ८ ॥
द्वारतामेव चाप्येष सर्वतः किल यास्यति । [२०]पर्वताश्चालयिष्यन्ते चेष्टिष्यन्ते च ते यथा ॥ ९ ॥
मरीचिकैव साक्षात् स्युः; [२१]निरयस्सज्जितक्रमः । [२२]आत्मनाशनलोकानां तद्धाम, [२३]यत्र ते हि वै ॥१०॥
युगाद् युगं प्रवत्स्यन्ति; [२४]न किंचित्तत्र शीतलम् । ते स्वदिष्यन्ति नैवाऽपि पेयं वस्तु च किञ्चन ॥११॥
[२५]विहाय क्वथनोपेतं जलं रक्तञ्च पूतिमत् । [२६]सानुपातः पुरस्कारः; [२७]लेखां नाशासते च ते ॥१२॥
[२८](कर्मणां फलमाश्रित्य); न्यषेधन् सर्वदैव च । अस्माकं पुनरायातान्; [२९]अकुर्म सममेव तु ॥१३॥
पुस्तके लेखबद्धं वै; [३०]स्वदध्वं (यत्कृतं) ततः । केवला यातना ह्येव नान्यत् किंचित्ततोऽपरम् ॥१४॥
[३१]असन्देहं हि कर्त्तव्यं श्रिताः खल्वत्र ये जनाः । तेभ्यस्तिष्ठति साफल्यम्; [३२]द्राक्षाश्चोपवनानि च ॥१५॥
[३३]समायुष्कास्तथा वामाः; [३४]पात्रं मद्येन पूरितम् । [३५]वृथावादं न ते तत्र श्रोष्यन्ति न तथाऽनृतम् ॥१६॥
[३६]प्रतीकारः प्रभोर्वो हि, न्यायेनाऽथ पुरस्क्रिया । [३७]व्योम्नां प्रभुर्धरित्र्याश्च, मध्यगस्य तयोरथ ॥१७॥
कृपाशीलस्तथाऽत्यर्थम्, न ते तं लपितुं क्षमाः । [३८]दिने तस्मिन् यदा देवाश्चात्मानो बद्धपंक्तयः ॥१८॥
स्थितिस्स्थैर्यं गमिष्यन्ति न जल्पिष्यन्ति किञ्चन । अनुज्ञातो भवेद् यस्तु तं विहाय दयामयात् ॥१९॥
वदेद् यश्चाऽपि वै सत्यम्; [३९]दिनं तत्त्वतिनिश्चितम् । शरण्यं स्वं प्रभुं गच्छेदतो यस्त्विह वाञ्छति ॥२०॥
[४०]सावधानान् वयं युष्मानकुर्माऽऽरान्न वर्त्तते । यातना या ततो, द्रष्टा मनुष्यश्चापि तत्करैः ॥२१॥
प्रेषितं किमभूत्तस्मै गतश्रद्धस्तु वक्ष्यति । हन्त ! किन्न कृतं दैव ! मृत्तात्वं स्यां गतो यदि ॥२२॥

योगः—२२

CC-0. In Public Domain. Digitized by eGangotri

७६

सूक्तम्—नाशयितारः

(अन-नाज़िआत)

(महाकालेऽवतीर्णाष्षट्चत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]सीमान्तगामिभिस्तावत् शपे तैर्नाशयितृभिः । [2]किञ्चोल्काभिः पुनस्ताभिः; [3]तैस्तरद्भिश्च तारकैः ॥ १ ॥
[4]देवैरग्रेसरैश्चैव; [5]येऽधितिष्ठन्ति च क्रियाम् । [6]दिने तस्मिन् यदा तूर्यं प्रथमं घोषयिष्यते ॥ २ ॥
[7]द्वितीयं (तूर्यमप्येतत्) यदा चैवानुयास्यति । [8]हृदां दुःखकरस्स्पन्दस्तदा चैव भविष्यति ॥ ३ ॥
[9]दृशो म्लाना भविष्यन्ति प्रणताश्चैव सर्वशः । [10]वदन्ति 'किं भविष्यामः प्राक्तनीं गमिता दशाम्'? ॥ ४ ॥
[11]जीर्णाऽस्थिप्राय तिष्ठत्सु जनेष्वस्मासु चाऽप्यथ । [12]त ऊचुः—सा परिवृत्तिस्तदेयं त्वतिहानये ॥ ५ ॥
[13]निश्चितं भर्त्सना मात्रं पुनस्तच्च भविष्यति । [14]अकस्मात्ते भविष्यन्ति गत निद्रास्तदैव च ॥ ६ ॥
[15]अवाप्तं किं त्वयाऽऽख्यानं तद् वै मूषस्य ? [16]तत्प्रभुः । पवित्रोपत्यकायां तं यदाह्वास्त स्तुवस्य तु ॥ ७ ॥
[17]प्रिययौनमुपेयास्त्वं (वदन्नित्थं) स जायते । विद्रोहाभिमुखः; [18]चाऽसौ वक्तव्यः "कांक्षसे नु किम् ॥ ८ ॥
माहाभाग्याऽयनं गन्तुम् ?"; [19]दर्शयिष्याम्यहं ततः । स्वप्रभोः प्राप्तिपन्थानं त्वाम्, ततस्त्वं तथा भयम् ॥ ९ ॥
तस्माद् यास्यसि? [20]तत्पश्चाच् चमत्कारमलौकिकम् । दर्शयामास तञ्चाऽसौ; [21]तं त्वमिथ्यापयद् हि सः ॥१०॥
न स्थितो वचने चाऽपि; [22]परिवृत्तो गतोऽञ्जसा । [23]संहतांश्च जनान् कृत्वा प्राह्वयत्; [24]समुवाच च ॥११॥
"प्रभुर्युष्माकमेषोऽहं वर्त्ते सर्वोच्च एव च" । [25]तमग्रहीदतोऽल्लाहो, ग्रहोऽभूत् त्रासनो महान् ॥१२॥
भूतायाऽप्यथ भव्याय; [26]सन्देहो न हि विद्यते । इदं शिक्षाप्रदं तस्मै यो जनः कुरुते भयम् ॥१३॥
[27]दुष्करा किं तव सृष्टिर्व्योम्नोऽति सृष्टमास्त यत् ? । [28]तदुच्छ्रायं प्रणीतञ्च सुविन्यस्तं तथा कृतम् ॥१४॥
[29]निर्ममे च ततो रात्रिं सतमस्कां ततोऽप्यथ । चकाराऽऽविः प्रकाशञ्च दैनिकम्; [30]तदनन्तरम् ॥१५॥
उर्वीमप्रथयच्चापि; [31]भावयामास वै ततः । इदं वारि पुनः किञ्च पशव्यं तदिदं तथा ॥१६॥
[32]स्थिरान् सानुमतश्चापि पुनरकृत; [33]पोषणान् । युष्मदीयपशूनां वै युष्माकं चाऽथ पोषणान् ॥१७॥
[34]यदा साऽत्युत्कटाऽऽपत्तिश्चापतिष्यति; [35]मानवः । यदा यद् यत् कृतं तेन तत्तत् सर्वं स्मरिष्यति ॥१८॥
[36]नारकाग्निः पुरस्ताच्च स्थापितोऽत्र भविष्यति । येन तं लोकतां सोऽपि लोकने यो हि सक्षमः ॥१९॥
[37]अथाऽसौ येन विद्रोहः कृतः पूर्वं भविष्यति । [38]जीवनं भौतिकं चैव कृतं रुच्यं भविष्यति ॥२०॥
[39]अग्निरेव तु वासोऽस्य नारकोऽथ भविष्यति । [40]प्रत्यक्षं स्वप्रभोर्यस्तु स्थानाच् चैव बिभेष्यति ॥२१॥
स्वान्तं दुर्वासनाभ्योऽपि योऽत्र तावच्च रोत्स्यति । [41]स्वर्गो ह्यावसथं तस्य; [42]ते त्वां पृच्छन्ति तं क्षणम् ॥२२॥
स्थास्यत्यत्र कदोपेत्य स क्षणः ? [43]अनेन किं तव । व्यापारेणान्यबोधस्य; [44]त्वत् प्रभ्वाश्रयि तत् त्वलम् ॥२३॥
[45]विभेति यः क्षणात्तस्मात् चेतकस्त्वन्तु केवलः । तस्य तस्य जनस्याऽसि; [46]यस्मिन्नह्नि च ते हि तम् ॥२४॥
द्रक्ष्यन्त्येवं हि भोत्स्यन्ते (जगत्य) स्मिन् न ते स्थिताः । प्रत्यूषाद् वा प्रदोषाद् वाऽप्यूर्ध्वमेकक्षणाऽधिकम् ॥२५॥

योगः—२५

CC-0. In Public Domain. Digitized by eGangotri

८०

सूक्तम्–भृकुटीं सोऽकरोत्

(अबस)

(महाकालेऽवतीर्णा द्वाचत्वारिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]भृकुटीं सोऽकरोत् किञ्च पराङ् आस्यस्ततोऽभवत् । [२]चक्षुषाऽन्धो यतस्तस्य ह्यभजत् सन्निकर्षताम् ॥ १ ॥
[३]जानीते कः कदाचित् स माहाभाग्यायनं व्रजेत् । [४]लभेत किञ्च वा शिक्षां हितायाऽतोऽस्य सा भवेत् ॥ २ ॥
[५]यस्तु नो गणयत्यन्यान्; [६]त्वं समाद्रियसे हि तम् । [७]न वच्यस्त्वं न चेद् वै स माहाभाग्यायनं व्रजेत् ॥ ३ ॥
[८]उपैति त्वान्तु योऽत्युत्कः; [९]यो भयं चापि मन्यते । [१०]तं विहाय समालीनोऽन्यत्र त्वं रमसे सदा ॥ ४ ॥
[११]नौचित्यं त्वत्र, खल्वेतद् ह्येकं वै स्मारकं किल । [१२]कामयेत हि यश्चापि स्थापयेत् स निजस्मृतौ ॥ ५ ॥
[१३]पूज्यमानेषु पत्रेषु; [१४]प्रांशुपूतञ्च सर्वथा, । [१५]पाठकानां हि हस्तेषु, [१६]युक्तं भद्रं तथैव च ॥ ६ ॥
[१७]धिङ् मनुष्यम्, कृतघ्नोऽसावतीवाऽ; [१८]सावसृज्यत । केन द्रव्येण ?; [१९]स सृष्टो विन्दुनैकेन तत्पुनः ॥ ७ ॥
सम्मितिश्च प्रतीकानां (परस्तात्) निरधार्यत । [२०]ततो मार्गस्सुगस्तस्मै तस्य चैवाऽप्यकल्प्यत ॥ ८ ॥
[२१]प्रमीतोऽसौ कृतः पश्चात्, रक्षितः कवरे पुनः । [२२]जीवयिष्यति चाऽप्येनं यदाऽयं कामयिष्यते ॥ ९ ॥
[२३]अब्रह्मण्यम् ! कृतं तेन नाऽप्येव तत्तु पूरितम् । तेन तस्मै समादिष्टं यदभूत्; [२४]लोकतां तु नाः ॥१०॥
स्वाशनम्; [२५]जीवनं तावदवर्षयाम किं विधम् । [२६]अस्फोटयाम तत्पश्चात् धरित्रीम्; [२७]तदनन्तरम् ॥११॥
अभावयाम तस्याञ्च ह्यन्नाद्यानि; [२८]तथैव च । अश्यानाङ्गूरकांश्चैव सस्यं हारित्यपूरितम् ॥१२॥
[२९]खर्जूरं जयतन्वानं चैवाऽऽ; [३०]रामान् घनांस्तथा । [३१]फलानि घासपत्राणि चैवा (ऽनेक विधान्यपि) ॥१३॥
[३२]पोषणानि हि युष्माकं युष्माकं च चतुष्पदाम् । [३३]यदाऽऽध्मातो विरावोऽसौ भविताऽ; [३४]हनि यत्र च ॥१४॥
अपयास्यति मर्त्योऽपि विहाय भ्रातरं निजम् । [३५]आत्मीयं जनकञ्चैव ह्यात्मनीनाञ्च मातरम् ॥१५॥
[३६]संगिनीमात्मनीनाञ्च ह्यात्मनीनांस्तथा सुतान् । [३७]भविष्यत्यखिलो लोकस्समुद्विग्नस्तथा स्वयम् ॥१६॥
नान्यचिन्ताऽवकाशोऽपि क्षणायाऽपि भवेत् तदा । [३८]दिने तस्मिन्ननेकेषां भासिष्यन्ते मुखानि वै ॥१७॥
[३९]स्मयोद्भिन्नानि, पूर्णानि प्रसादाकुलितानि च । [४०]अनेकेषां तथाऽऽस्यानि म्लास्यन्ति रजसा तदा ॥१८॥
[४१]संवृतानि भविष्यन्ति तमस्स्वेवाऽपि (सर्वथा) । [४२]त एते हि दुराचाराश्श्रद्विहीनास्तथा जनाः ॥१९॥

योगः—१९

CC-0. In Public Domain. Digitized by eGangotri

८१

सूक्तम्–विपर्यासः

(अत-तकवीर)

(महाकालेऽवतीर्णा एकान्नत्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]विपर्यस्तो यदा तावद् भास्करो हि करिष्यते । [२]नक्षत्राणि परिम्लानिं गमिष्यन्ति यदैव च ॥ १ ॥
[३]भूधराः कम्पयिष्यन्ते यदा; [४]चोष्ट्र्यस्सवोन्मुखाः । त्यक्ष्यन्ते; [५]च मृगा वन्यास्समेष्यन्ति भयाद् यदा ॥ २ ॥
[६]उद्वलिष्यन्त्यकूपारा यदा चैव; [७]यदा जनाः । समवेताः करिष्यन्ते; [८]निखातोर्व्याञ्च जीविता ॥ ३ ॥
प्रक्ष्यते कन्यका; [९]कस्मात् पापाद् भूमौ न्यखन्यथाः । [१०]यदा चोद्घाटयिष्यन्ते (कर्म) पत्राणि खल्वथ ॥ ४ ॥
[११]छेत्स्यते च यदा व्योम; [१२]दहन्नग्निः पुनर्यदा । धक्ष्यतेऽतितराञ्चैव; [१३]यदोपस्थापयिष्यते ॥ ५ ॥
समक्षञ्चाव्ययम्; [१४]वेत्ता सर्वो यद् यत्तु धारयन् । उपेतस्तत्र वै जातः; [१५]न किञ्चित्, खल्वहं शपे ॥ ६ ॥
तिष्ठन्ति तर्हि ये पश्चात्; [१६]उद्यन्त्यस्तमयन्ति च । [१७]निशयाऽस्तमयन्त्या च; [१८]सोच्छ्वासाऽहर्मुखेन च ॥ ७ ॥
[१९]अर्हस्य वाग्धरस्यैतद् वचो नैवाऽत्र संशयः । [२०]राज्यसिंहासनेनास्य पार्श्वे यो विभवाद् महान् ॥ ८ ॥
शक्तिमानपि यः किञ्च; [२१]ह्युक्तं यस्य च मन्यते । यश्च विश्वासपात्रं वै; [२२]न सोन्मादी सखा च वः ॥ ९ ॥
[२३]तमद्राक्षीदसौ व्योम्नो विस्तृते क्षैतिजे तटे । [२४]न लोभस्तस्य तस्मिंश्च परस्तात् चक्षुषोस्तु यत् ॥१०॥
[२५]धिक्कृतस्य वचो नैतत् कस्यचिच्छातनस्य च । [२६]कां दिशं त्वं ततो यासि? [२७]सर्वेभ्यस्तदिदं भृशम् ॥११॥
स्मारकं केवलं तावत्; [२८]सन्न्यायेनाऽत्र वर्त्तितुम् । यस्तथा कामयेताऽपि; [२९]ह्यल्लाहो यो जगत्प्रभुः ॥१२॥
इच्छेद् यावत् पुनर्नासौ क्वैष्टुं यूयं तु शक्नुथ ।

योगः—१२॥

CC-0. In Public Domain. Digitized by eGangotri

८२

सूक्तम्–विभेदनम्

(अल-इनफितार)

(महाकालेऽवतीर्णा एकान्नविंशतिरायाताः)

साल्लाह्नामजापं योऽल्लाह्रो दयी हितैष्यपि

[१]भविष्यति यदा व्योम विभिन्नम्; [२]तारकाणि च । भविष्यन्ति विकीर्णानि; [३]पारावारास्तथा यदा ॥ १ ॥
प्रवाहैः प्रवहिष्यन्ति; [४]ह्युत्खनिष्यन्त एव च । कबराणि दिने यस्मिन्; [५]भोत्स्यन्ते सर्व एव तु ॥ २ ॥
जीवा यत् प्रैषयन्नग्रेऽत्यजन् यच्चापि पृष्ठतः । [६]मानव ! किं रुणद्धि त्वां महोदारान्निज प्रभोः ॥ ३ ॥
[७]योऽसृजत् त्वां यथावच्च तुलितं त्वां तथाऽकरोत् । [८]आकारेऽघटयत् पश्चात् तस्मिन्नैच्छत् स यादृशे ॥ ४ ॥
[९]वैरस्यं हि, त्वया त्वेतत् सर्वथैव निषिध्यते । निर्णयो भविता यद् वै; [१०]तिष्ठन्ति पर्यवेक्षकाः ॥ ५ ॥
यद्यपि त्वयि (सत्यं वै); [११]ह्युदारा लेखने रताः । [१२]अशेषं ये विदन्ति त्वं यत् किंचिच् चेष्टसे तथा ॥ ६ ॥
[१३]भद्राचारास्तु वत्स्यन्ति प्रमोदे; [१४]पुनरेव च । दहत्यग्नौ दुराचाराः; [१५]निर्णयाहे हि यत्र ते ॥ ७ ॥
प्रवेक्ष्यन्ति; [१६]न शक्ष्यन्ति रक्षितुं स्वं ततोऽथ ते । [१७]निर्णयाहश्च किंरूपो युष्माभि र्ज्ञायतेऽपि नो ॥ ८ ॥
[१८](वदाम्येष) पुनश्चैव युष्माभिर्ज्ञायतेऽपि नो । निर्णयाहश्च किं रूपः; [१९]यदा जीवो न कोऽपि वै ॥ ९ ॥
स्तोकं जीवान्तरायाऽपि कर्त्तुं शक्ष्यति किञ्चन । साधिकारस्तदाऽल्लाहो ह्येव चैव भविष्यति ॥१०॥

योगः —१०

CC-0. In Public Domain. Digitized by eGangotri

८३

सूक्तम्--प्रतारणा

(अ्रत-ततफ़ीफ़)

(महाकालेऽवतीर्णाष् षट्त्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]धिक् तान् प्रतारकान्; [२]ये हि लोकेभ्यो ग्रहणक्षण । पूर्णं मानं प्रतीच्छन्ति; [३]प्रदानस्य क्षणे पुनः ॥ १ ॥
तौल्येन वाऽथ मानेन हीनदानोन्मुखास्स्वयम् । [४]उद्भाविता भविष्यन्ति पुनः किं न विदन्त्यमी ? ॥ २ ॥
[५]परमाह—प्रसंगेन; [६]यदा लोका जगत्—प्रभोः । उपस्थास्यन्ति साम्मुख्ये; [७]न किंचिद् ये तु कज्जनाः ॥ ३ ॥
तेषां सिज्जीन एवाऽस्तेऽभिलेखः; [८]किं पुनस्त्वदम् । सिज्जीनाख्यन्नु किम्, वितथा? [९]ऽभिलेखस्साक्षरो ह्ययम् ॥ ४ ॥
[१०]अमीषां प्रविनाशो वै येऽह्नस्तस्य निषेधकाः । [११]ये निषेधन्ति तं कालं निर्णयाहस्य यः किल ॥ ५ ॥
[१२]महापापश्च जाल्मश्च त्वेव तस्य निषेधकः । [१३]अस्माकं त्वं यदायातान् पठित्वा श्रावयस्यमुम् ॥ ६ ॥
"इमा लोककथा एव पूर्वजानां" वदत्यसौ । [१४]न वै, सत्यमिदं तावत्—यदप्येते समार्जयन् ॥ ७ ॥
हृद्येषां तत् समारूढं सुदृढं वर्त्तते किल । [१५]अब्रह्मण्यम्, इमे लोका, दर्शनात् स्वप्रभोस्तदा ॥ ८ ॥
वारिता हि भविष्यन्ति; [१६]दहत्यग्नाविमे जनाः । ततश्च प्रज्वलिष्यन्ति; [१७]तथोक्तञ्च भविष्यति ॥ ९ ॥
इदं वै यद्धि युष्माभिर्निषिद्धम्; [१८]न हि किञ्चन । अभिलेखस्तु भद्राणां इल्लीयीने हि तिष्ठति ॥१०॥
[१९]इल्लीयीनं नु किं, वितथा ?; [२०]ऽभिलेखस्साक्षरो ह्ययम् । [२१]गुणाऽऽपूर्णास्तमायान्ति; [२२]भद्रा लोका असंशयम् ॥११॥
विराजिष्यन्त आनन्दे; [२३]मञ्चकेभ्यस्तथैव ते । दृशां व्यापार आलीना भविष्यन्ति; [२४]अथ वेत्स्यसि ॥१२॥
तेषां त्वमाननैरेव प्रसादं तत्स्थमुत्तमम् । [२५]पावनञ्चैव मैरेयं मुद्रावन्धाञ्चितं पुनः ॥१३॥
दत्तं पानाय वै तेभ्यस्तथा चैव भविष्यति । [२६]मृगनाभिस्तथैवाऽस्य मुद्रावन्धो भविष्यति ॥१४॥
महाभिलाषुकैरेतत् चाभिलाष्यं भवेदथ । [२७]भविष्यत्यस्य सज्जा च तसनीमकृता पुनः ॥१५॥
[२८]स्रोत एतत् प्रपास्यन्ति यतोऽल्लाहान्तिकं गताः । [२९]आश्चर्यम्, सापराधा वै श्रद्धरान् त्समुपाहसन् ॥१६॥
[३०]यदा तत् पार्श्वतोऽयुश्च तदा ते हि परस्परम् । आलपन्नक्षिसंकेतैः; [३१]प्रत्यावृत्ता गृहान्निजान् ॥१७॥
प्रत्यावर्त्तन्त खल्वेते नर्मालापैः, [३२]यदाऽथ तान् । अपश्यन्नवदन्नेवम्—"पथभ्रष्टा जना इमे" ॥१८॥
[३३]वेक्षकत्वेन तेष्वेते प्रेषिता नैव यद्यपि । [३४]अद्याऽश्रद्धांश्च सश्रद्धा वहसन्तितमां किल ॥१९॥
[३५]भवन्ति मञ्चकेभ्यस्ते दृशां व्यापार आरताः । [३६]किन्न लब्धं प्रतीदानं श्रद्विहीनैर्जनैः किल ॥२०॥
तस्य तस्याखिलस्यैव यद् यत्तेऽह्याचरन् भृशम् ।

योगः—२०॥

CC-0. In Public Domain. Digitized by eGangotri

८४

सूक्तम्—स्फोटनम्

(अल-इनशिक़ाक़)

(महाकालेऽवतीर्णाः पंचविंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]भविष्यति यदा व्योम स्फुटितम्; [२]स्त्वं प्रभुं प्रति- । भयेन सावधानञ्च पुनरेव भविष्यति ॥ १ ॥
[३]धरित्री प्रथिता चैव यदा किञ्च भविष्यति । [४]यदन्तस्तत्र तत् सर्वं यदा चैवोद्गिरिष्यति ॥ २ ॥
अन्तरे सर्वथा रिक्ता यदा चासौ भविष्यति । [५]सावधाना भयाच्चैव भविष्यत्यात्मनः प्रभौ ॥ ३ ॥
[६]नर ! त्वं सोद्यमस्तावद् भवसि स्वं प्रभुं प्रति । योऽपि कोऽपि श्रमस्ते स्यात् त्वं तं द्रष्टाऽसि सर्वथा ॥ ४ ॥
[७]यस्मैचिद् दक्षिणे हस्ते पत्रं चाऽथ प्रदास्यते । [८]तस्य लेखाऽऽर्जवेनैव सुतरां प्रविधास्यते ॥ ५ ॥
[९]प्रसादेनात्मनो बन्धूंस्तथाऽसौ प्रतिपत्स्यते । [१०]यस्मैचित् पृष्ठतस्तावत् पत्रञ्चाऽथ प्रदास्यते ॥ ६ ॥
[११]ह्वास्यतेऽसौ विनाशं वै; [१२]दहत्यग्नौ च वेक्ष्यति । [१३]उवासाऽसौ प्रमोदेन बन्धुभिस्स्वैः परिवृतः ॥ ७ ॥
[१४]अबोधत् नाप्युपेतव्यं परावृत्य कदाचन । [१५]कथन्नो, तत्प्रभुस्तं वै दरीदृश्यत एव तु ॥ ८ ॥
[१६]अयेऽहं सान्ध्यरक्तिम्ना शपे तावत्; [१७]निशाऽपि च । यच्च किञ्चाप्यसौ तावत् संवृणोत्यप्यशेषतः ॥ ९ ॥
[१८]अमुना चाऽथ चन्द्रेण यदा पूर्णकलो ह्यसौ । [१९]आरोढव्यं हि युष्माभिः क्षेत्रात् क्षेत्रं त्वसंशयम् ॥१०॥
[२०]किन्तु कष्टं गता यत्ते श्रद्दधाना भवन्ति नो । [२१]कुराणं श्राविताः किञ्च पूजां नैवाऽऽचरन्ति हि ॥११॥
[२२]श्रद्विहीना निषेधन्ति प्रत्युत; [२३]यत्तु निह्नुतम् । तदल्लाहो विजानाति तैः; [२४]महत्यो हि यातनाः ॥१२॥
प्रतीक्षन्ते हि तानेतत् सूचनीयममंगलम् । [२५]परं ये श्रद्धरास्सन्ति भद्रकर्मकृतश्च ये ॥१३॥
अमोघं वै प्रतीदानं तेभ्यस्तिष्ठत्य (संशयम्) ।

योगः—१३॥

CC-0. In Public Domain. Digitized by eGangotri

८५

सूक्तम्–हर्म्य

(अल-बुरुज)

(महाकालेऽवतीर्णा द्वाविंशतिरायाताः)

साल्लाह्नामजापं योऽल्लाहो दयी हितैष्यपि

[1]शपे व्योम्ना तु हर्म्याणि तारकाणां विभर्त्ति यत् । [2]प्रतिज्ञातेन तेनाह्ना; [3]साक्षिणा, किञ्च यस्य च ॥ १ ॥
कृतं साक्ष्यं भवेत् तेन; [4]नाशः खातवतां तथा । [5]सेन्धनाग्निवताञ्चैव; [6]तत्स्थास् सन्ति यदा च ते ॥ २ ॥
[7]भवन्ति साक्षिणोऽमी च श्रद्धरैस्सह यत्तु ते । विचेष्टन्ते; [8]भवन्त्येते बिमनसश्च केवलम् ॥ ३ ॥
तेष्वनेनैव यत्ते हि त्वल्लाहे श्रद्धरा यतः । प्रभुत्वाच् छालतेयश्च प्रशंसायामधिकृतः ॥ ४ ॥
[9]व्योम्नां यश्च धरित्र्याश्च राज्यस्वामित्वमाप्तवान् । साक्षिमानथ चाऽल्लाहस्समस्याऽप्यत्र वस्तुनः ॥ ५ ॥
[10]श्रद्धरान् पुरुषान् किञ्च श्रद्धरास्स्त्रीश्च ये जनाः । प्रातुदन् च्यावनार्थं वँ प्रणाल्याः, न पुनस्तथा ॥ ६ ॥
गता ये विप्रतीसारं तेभ्यस्तिष्ठन्ति यातनाः । नारकाः, यातनाश्चैव प्रोज्ज्वलत् पावकस्य च ॥ ७ ॥
[11]अभूवन् श्रद्धरा ये तु भद्रकर्मकृतस्तथा । आरामाः खल्वमीभ्यस्तु निम्नगा यत्र पार्श्वगाः ॥ ८ ॥
साफल्यं खल्विदञ्चैव सुमहत् किल वर्त्तते । [12]उग्रो दण्डः प्रभोस्ते वै सन्देहो नाऽत्र विद्यते ॥ ९ ॥
[13]स एवाऽऽरम्भकोऽप्यस्ति पुनरावर्त्तकोऽप्यसौ । [14]क्षमाशीलोऽनुरागी च; [15]राज्यसिंहासनप्रभुः ॥१०॥
गौरवेणान्वितश्चासौ; [16]यदिष्टं कुरुते च तत् । [17]युष्मान् प्राप्ता प्रवृत्तिः किं सेनानाम्? [18](वै तयोर्द्वयोः)॥११॥
प्रिययौनस्य किञ्चापि समुद्रस्य तथैव च । [19]श्रद्विहीनाः परं ते तु निषेधे ह्येव संरताः ॥१२॥
[20]परिवृणोति चाल्लाहस्त्वदृष्टस्तान् समन्ततः । [21](यं निषेधन्ति) स त्वास्ते कुराणो गौरवाऽऽप्लुतः ॥१३॥
[22]अक्षरैरंकितस्तावत् रक्षिते पट्टके स्थितः ।

योगः—१३॥

CC-0. In Public Domain. Digitized by eGangotri

८६

सूक्तम्-तारकम्

(अत-तारिक)

(महाकालेऽवतीर्णास्सप्तदशाऽऽयाताः)

साल्लाहुनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शपे व्योम्ना तथा चोपस्तारकेणाऽ; [२]थ वितथ तत् । औपसं तारकं कीदृक्?; [३]भासमानं हि तारकम्! ॥ १ ॥
[४]न जीवो जातु कोऽप्यत्र त्वीक्षिता यस्य नो भवेत् । [५]नरस्तद् बुध्यतां केन वस्तुनाऽसावसृज्यत ॥ २ ॥
[६]द्रवेणोद्गच्छता सृष्टः; [७]पर्शुकाभ्यस् स्फिचस्तथा । यो द्रवस्सरणस्तावत्; [८]सामर्थ्यं स बिभर्त्ति हि ॥ ३ ॥
प्रत्यावर्त्तयितुं तन्तु; [९]दिने यस्मिन् सुनिभृतम् । परीक्षां प्रापितं किञ्च भविष्यति; [१०]न खल्वसौ ॥ ४ ॥
शक्तिं वाऽपि सहायं वा तदा कञ्चन लप्स्यते । [११]शपे व्योम्ना परावर्त्य वर्षाणां प्रेषणेन वै ॥ ५ ॥
[१२]धरित्र्या स्फोटमत्या च; [१३]सन्देहो नाऽत्र विद्यते । अयं निष्पीडितोऽर्थो वै; [१४]न हीदं नर्मभाषितम् ॥ ६ ॥
[१५]चलन्त्येकं हि ते चालम्; [१६]चालमेकमहन्तथा । चलामि; [१७]श्रद्विहीनेभ्योऽवकाशो दीयतां पुनः ॥ ७ ॥
स्वल्पकालाय खल्वेभ्यो विरतिर्दीयतां किल ।

योगः — ७॥

CC-0. In Public Domain. Digitized by eGangotri

८७

सूक्तम्-प्रोद्गतः

(अल-आला)

(महाकालेऽवतीर्णा एकान्नविंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]नाम शंसत वै यूयं प्रभोर्वः प्रोद्गतस्य हि । [2]योऽसृजन् मूलतश्चूडां यावत्, चारूपयत् पुनः ॥ १ ॥
[3]मानं यश्चाकरोत् किञ्चादर्शयत् सरणिं ततः । [4]सस्यमुद्भावयामास यश्च; [5]तत्तदनन्तरम् ॥ २ ॥
चकार सघनञ्चैव सहारित्यं तथैव च । [6]वयं त्वां पाठयिष्यामः, तत्ते स्थास्यत्यविस्मृतम् ॥ ३ ॥
[7]तं विहाय यमल्लाहः कामयेत, न संशयः । अपावृतं स जानाति जानाति यच्च संवृतम् ॥ ४ ॥
[8]वयञ्चाऽथ करिष्यामस्ते सुखायाऽयनं सुगम् । [9]हिताय स्मारणं स्याच्चेत् स्मारणीया हि (ते ततः) ॥ ५ ॥
[10]भयभृद् यो जनस्तावत् स्मृतिं नन्दिष्यति ह्यसौ । [11]अपाकुर्याच्च तां योऽत्र मन्दभाग्यस्तु सर्वथा ॥ ६ ॥
[12]संपतिष्यति खल्वग्नौ समिद्धे; [13]तत्र नाऽपि च । मरिष्यति न किं चापि जीविष्यति स तत्र वै ॥ ७ ॥
[14]आत्मानं संस्कृतं यस्तु कुरुते सफलो हि सः । [15]स्वप्रभोश्शंसते नाम प्रार्थनां कुरुतेऽथ च ॥ ८ ॥
[16]भौतिकं जीवनं ह्येव युष्मभ्यं त्वस्ति रोचकम् । [17]जीवनं सूत्तमं स्थायि परलोकस्य यद्यपि ॥ ९ ॥
[18]पूर्वजानां सुलेखेषु चापि खल्वेतदङ्कितम् । [19]अब्राह्मस्य च मूसस्य पुस्तके (ष्वङ्कितं न्विदम्) ॥१०॥

योगः—१०

CC-0. In Public Domain. Digitized by eGangotri

८८

सूक्तम्—पर्यापतिष्णुः

(अल-गाशिया)

(महाकालेऽवतीर्णाष्षड्विंशतिरायाताः)

साल्लाहनाम्नजापं योऽल्लाहो दयी हितैष्यपि

[१]तस्य पर्यापतिष्णोः किं काऽपि वार्त्तैद् हि वः क्वचित्? । [२]दिने तस्मिन् हि वक्त्राणि म्लास्यन्ति सुबहूनि तु ॥ १ ॥
[३]श्रमोद्रेकं गताश्चैव स्थगिताश्च पुनर्भृशम् । [४]दहत्यग्नौ पतिष्यन्ति; [५]पास्यन्ति क्वथतस्तथा ॥ २ ॥
[६]न तेभ्यो भोजनं किञ्चित् जरीयं प्रविहाय तु । [७]पोषकं नाऽपि यन्नाथ क्षुधायाश्शमनं भवेत् ॥ ३ ॥
[८]दिने तस्मिंश्च वक्त्राणि पुष्पिष्यन्ति बहूनि तु । [९]प्रसादं स्वकृतैर्याताः; [१०]महोच्चैकं वनं गताः ॥ ४ ॥
[११]न श्रोष्यन्ति पुनर्यत्र व्यर्थं वादञ्च कञ्चन । [१२]जलं यत्रोच्छ्वसत् स्रोतस्सप्रवाहं भविष्यति ॥ ५ ॥
[१३]उदुर्व्याः पटला यत्र भविष्यन्ति प्रसाधिताः । [१४]पानपात्राणि यत्राऽथ पार्श्वगानि तथैव च ॥ ६ ॥
[१५]भविष्यन्त्युपधानानि क्रमबद्धानि यत्र च । [१६]प्रसृतानि भविष्यन्ति दुकूलास्तरणानि च ॥ ७ ॥
[१७]क्रमेलकान् प्रपश्यन्ति किमेते नो जनाः पुनः ? । कीदृशी रचना तेषाम् ?; [१८]तमाकाशं तथैव च ॥ ८ ॥
उच्छ्रितोऽसौ कियांश्चैव ?; [१९]तथा तान् पर्वतानपि । स्थापितास्ते कथङ्कारम् ?; [२०]धरित्रीं चाप्यमूं पुनः ॥ ९ ॥
साऽभवत् प्रथिता किम्वत् ?; [२१]स्मारणं ह्येव कारय । वर्त्तसे स्मारको ह्येव त्वन्तु तावत्; [२२]न वर्त्तसे ॥१०॥
कथञ्चित्तेष्वधिष्ठाता; [२३]परं योऽपि निषेधति । श्रद्विहीनस्तथा योऽपि; [२४]तमल्लाहोऽतिदण्डदः ॥११॥
[२५]वयमेव परावृत्य तूपगम्या हि तैर्जनैः । [२६]ततो लेखाविधानं तैः कार्यमस्माभिरप्यथ ॥१२॥

योगः—१२

CC-0. In Public Domain. Digitized by eGangotri

८९

सूक्तम्–प्रभातम्

(अल-फज्र)

(महाकालेऽवतीर्णाः त्रिंशदायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शपे तावत् प्रभातेन; [२]निशाभिर्दशभिस्तथा । [३]युग्मेन चाप्ययुग्मेन; [४]तथायान्त्या निशाऽपि च ॥१॥
[५]वकाशो वर्त्तते तत्र शपनाय मनीषिणे । [६]दृशो नैवोपनीतं तद् यदाऽऽदेन समं कृतम् ॥ २॥
युष्माकं प्रभुणा; [७]ऽथाऽपि चेरमेण समं कृतम् । स्तम्भेरमेण; [८]सदृक्षं येन नाऽरच्यत क्वचित् ॥ ३॥
[९]समुद्गेन समं चापि शिला येषां गणाः किल । पर्वतोपत्यकां याता अच्छिन्दन्; [१०]च स्थिरौजसा ॥ ४॥
प्रिययौनेन वै सार्धम्; [११]विद्रोहाग्निमदीपयन् । सर्वदेशेषु ये तावत्; [१२]विकृतिं महतीं तथा ॥ ५॥
तत्र येऽप्रथयंश्चापि; [१३]प्रभुस्ते तेषु तत्पुनः । यातनानां कशापातात्तान् समानुदवेजयत् ॥ ६॥
[१४]प्रभुस्ते जागरूको वै सदा तिष्ठत्यसंशयम् । [१५]मानुषस्य तु सम्बन्धे—यदा तं स परीक्षते ॥ ७॥
तत्प्रभुर्मानदानेन निधानेन सुखे तथा । तदाऽसौ मानवो वक्ति—"वर्त्तेऽहं मानितः किल ॥ ८॥
प्रभुणा हि मदीयेन"; [१६]यदा तञ्च परीक्षते । संकोच्य जीवनार्हाणि तद् वस्तूनि, प्रवक्त्यसौ ॥ ९॥
"प्रभुणा हि मदीयेन पराभूतोऽस्म्यहं बत" । [१७]अब्रह्मण्यम्, अनाथांस्त्वं न खल्वाद्रियसे, तथा ॥१०॥
[१८]प्रेरयस्यथ नाऽन्योऽन्यं दरिद्रेभ्योऽशनाय च । [१९]उत्तराधिकृतौ लब्धाः (परेषां) सम्पदोऽपि च ॥११॥
गर्धाभावमुपाश्रित्य समश्नासि; [२०]वहस्यथ । राभिस्सातिशयं रागम्; [२१]न किञ्चिद्, वै धरा यदा ॥१२॥
पेषणाच्चूर्णिताऽत्यर्थं कृता तावद् भविष्यति । [२२]प्रभुस्ते च समं देवै र्विभवादनुयायिभिः ॥१३॥
भविष्यत्युपयातश्च; [२३]दिने तस्मिंश्च नारकः । भविष्यत्युपनीतो वै, मर्त्यश्चेतिष्यते तदा ॥१४॥
चेतनार्थं परं कुत्र भवेत् कालोऽपि तस्य तु । [२४]क्रोक्ष्यतीत्थम्—समारम्भादकरिष्यं क्वचिद् यदि ॥१५॥
आत्मार्थे किञ्चनाऽप्यत्र ह्यभविष्यद् वरं ततः । [२५]दिने तस्मिन् न कोऽप्यस्मै कष्टदश्च भविष्यति ॥१६॥
यथाऽसौ कष्टदो भावी; [२६]न नद्धाऽन्यस्तथाऽपि च । यथाऽसौ किल तं नद्धा; [२७]हे शान्तात्मन्! [२८]प्रयाहि तम् ॥१७॥
स्वं प्रभुम्, त्वं प्रसन्नो (ऽस्मात्) प्रसन्नस्त्वदसावपि । [२९]बन्धकेषु मदीयेषु त्वञ्च निर्विश; [३०]निर्विश ॥१८॥
मामके त्वं पुनस्स्वर्गे (सर्वकालसुखावहे) ।

योगः—१८॥

CC-0. In Public Domain. Digitized by eGangotri

९०

सूक्तम्—बलधः

(अल-बलद)

(महाकालेऽवतीर्णा विंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]न वै तावच्, छपेऽहन्तु बलधेनाऽमुना किल । [२]त्वं पुन र्बलधे ह्यस्मिन् वासमापद्यसेऽ; [३]थ च ॥ १ ॥
जनयित्रा तथा तेन तज्जातेन (शपे पुनः) । [४]सृष्टो वै मानवोऽस्माभिः कष्टैः पर्यावृतः किल ॥ २ ॥
[५]बुध्यते किं स—नो तस्मिन् प्रभविष्यति कश्चन । [६]वक्त्यसौ—विपुलं रिक्थं मया जीर्णं कृतं ध्रुवम् ॥ ३ ॥
[७]मन्यते किमसौ—कोऽपि नापश्यत्तं हि सर्वथा । [८]किन्नादद्म वयं तस्मै चक्षुषी; [९]रदनच्छदौ ॥ ४ ॥
एकां पुनस्तथा जिह्वाम्; [१०]द्वौ किलादर्शयाम च । अध्यारोहौ; [११]परन्नासावध्यारोहं किलाऽऽगतः ॥ ५ ॥
[१२]किन्नु त्वं वेत्सि कस्तावत् ह्यध्यारोहो भवत्यसौ ? । [१३]दासग्रीवाविमोक्षो वै; [१४]दुर्भिक्षेऽन्नेन भोजनम् ॥ ६ ॥
[१५]वान्धवाऽनाथलोकस्य; [१६]दरिद्रस्याऽथवा पुनः । परापेक्षामुपेतस्य; [१७]श्रद्धराणान्तु वै नृणाम् ॥ ७ ॥
सन्तोषवृत्तिशिक्षार्थं ह्यन्योन्यं यततां तथा । दयादृष्टिप्रसाराय प्रयत्नं कुर्वतामपि ॥ ८ ॥
ये भवन्ति; [१८]त एते हि भाग्यवन्तो जना ध्रुवम् । [१९]आयातेष्वस्मदीयेषु श्रद्धरा ये तु नो पुनः ॥ ९ ॥
जना दुर्भाग्यवन्तस्ते; [२०]स्थास्यन्त्यग्नौ परिवृताः ।

योगः—९॥

CC-0. In Public Domain. Digitized by eGangotri

९१

सूक्तम्–हंसः (सूर्यः)

(अश-शम्स)

(महाकालेऽवतीर्णाः पञ्चदशाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शपे हंसेन प्रोद्गच्छत् प्रकाशेन तथाऽस्य च । [२]किञ्च चन्द्रेण तं हंसमनुयात्रा; [३]दिनेन च ॥ १ ॥
तमालोकं प्रणेत्राऽथ; [४]निशया व्याप्य तं यदा । व्यावृणोति; [५]तथा व्योम्नाऽकरोत् तत् तेन चामुना ॥ २ ॥
[६]धरित्र्या चैव यश्चैनामातनोत् तेन चाप्यथ । [७]आत्मना चैव यश्चैनं प्रापयत् पूर्णतां पुनः ॥ ३ ॥
[८]पूरयामास संस्कारै र्भद्राऽभद्रस्य बोधकैः । [९]सफलो यस्त (मात्मानं) बर्धयेद्; [१०]विफलस्त्वसौ ॥ ४ ॥
स्तम्भेत योऽस्य तूद्यानम्; [११]समुद्गस्य गणो निजात् । विद्रोहाज् जनितान् मानात् (सत्यमेव) न्यषेधयत् ॥ ५ ॥
[१२]उदतिष्ठद् यदा तेषां पामराणां हि पामरः । [१३]वाग्धरस्तमुवाचैनमल्लाहस्याऽभवद् हि यः ॥ ६ ॥
ध्यायतामुष्ट्रिकाऽऽल्लाही तिष्ठतीयं प्रदीयताम् । पातुं जलं तथा चास्यै; [१४]परन्त्वेनां न्यषेधयन् ॥ ७ ॥
जंघाविकर्त्तनेनैनां पुनर्व्यापादयंस्तथा । अनाशयत् प्रभुस्तेन तान् हि पापस्य कारणात् ॥ ८ ॥
भूमिसाच् च तथैतेषां अकरोद् वसतिं समाम् । [१५]शंकते नैव किञ्चाऽस्याऽऽगतिष्यत्यति साध्वसम् ॥ ९ ॥

योगः—९

CC-0. In Public Domain. Digitized by eGangotri

९२

सूक्तम्–लीलः (लीलो रात्रिकालः)

(अल-लैल)

(महाकालेऽवतीर्णा एकविंशतिरायाताः)

साल्लाहुनामजापं योऽल्लाहो दयी हितैष्यपि

[१]लीलेन गूहता तावच् छपे; [२]भास्वद् दिनेन च । [३]तेन योऽजनयच् चैव, स्त्रीपुंसौ; [४]हन्त ! चेष्टनम् ॥ १ ॥
मिथो वां सर्वथा भिन्नम्; [५]दानदायी भयी च यः । [६]श्रद्धावान् यः पुनर्भद्रे; [७]तत् सौख्यं तु सुगं वयम् ॥ २ ॥
विधास्यामः; [८]परं यस्तु मत्त एकान्तसंयमी । [९]श्रद्धावान् न च यो भद्रे; [१०]तदर्थं दुर्गतं वयम् ॥ ३ ॥
गन्तुं मार्गं करिष्यामस्सुगम्; [११]रिक्थं न चास्य तत् । रक्षितुं तं समर्थं स्यात् अमुष्मिन् पतनोन्मुखे ॥ ४ ॥
[१२]मार्गदर्शनदायित्वं तावदस्मासु तिष्ठति । [१३]प्राक् च पश्चाद्भवञ्चापि सर्वमस्मासु तिष्ठति ॥ ५ ॥
[१४]पावकाल् लेलिहानाद् वस्सावधानाः कृता मया । [१५]दौर्भाग्येण परिग्रस्तो ह्येव तस्मिन् पतिष्यति ॥ ६ ॥
[१६]वैमुख्यं योऽभजद् यश्च सर्वदैव न्यषेधयत् । [१७]यस्तु सत्यंगमः सोऽस्मात् पावकाद् रक्षयिष्यते ॥ ७ ॥
[१८]वर्षति स्वं तु यो द्रव्यं सद्गुणोद्भावने रतः । [१९]नोपकाराधमर्ण्यत्वाद् येन दानं विकीर्यते ॥ ८ ॥
[२०]प्रभुप्रसादविस्तार्थं केवलं यस्तु चेष्टते । [२१]न चिरात् सर्वसन्तोषचणपोऽसौ भविष्यति ॥ ९ ॥

योगः—९

CC-0. In Public Domain. Digitized by eGangotri

९३

सूक्तम्–ज्योषा=(मात्र् षा=मातृ+उषा)

(अज़-ज़ुहा)

(महाकालेऽवतीर्णा एकादशाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शपेऽहं ज्योषया; [२]रात्र्या स्तब्धया; [३]प्रभुणा तव । विसृष्टो नाऽसि नैवाऽपि तुभ्यमीर्ष्यत्यसौ प्रभुः ।। १ ।।
[४]पूर्वतस्तूत्तराऽवस्था भविता ते शुभात्शुभम् । [५]सद्यस्तुभ्यं प्रभुर्दाता वैपुल्यात् तोषणं तव ।। २ ।।
[६]त्वामनाथं पुरा लब्ध्वाऽध्वानं नादर्शयत् स किम् ? । [७]मार्गभ्रष्टञ्च त्वां लब्ध्वाऽध्वानं नादर्शयत् स किम् ।। ३ ।।
[८]दरिद्रं त्वां पुनर्लब्ध्वा सधनं नाऽकरोत् स किम् ? । [९]मा तुदाऽशरणं तेन; [१०]भिक्षुकं मैव भर्त्सय ।। ४ ।।
[११]यच् च ते तु प्रभोरस्ति वैपुल्यं शंस तत् सदा ।

योगः—४।।

CC-0. In Public Domain. Digitized by eGangotri

९४

सूक्तम्–उरस्स्फालनम्

(अल-इनशिराह)

(महाकालेऽवतीर्णा अष्टाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]किन्न तेऽस्फालयामोरः, [२]चाऽपाकृष्महि नो भरम् ? । [३]नामनः पृष्ठदेशस्य योऽभवत्; [४]यश उच्छ्रितम् ॥ १ ॥
[५]तदत्राऽस्ति सुखं सक्तं सदा कष्टस्य सन्निधिम् । [६]भवत्यत्र सुखं सक्तं सदा कष्टस्य सन्निधिम् ॥ २ ॥
[७]कार्याद् विरम्य युष्माभिस्तदाऽपि क्रियतां श्रमः । [८]यत्यतां स्वप्रभोर्लब्धुं प्रसादञ्चापि शाश्वतम् ॥ ३ ॥

योगः –३

CC-0. In Public Domain. Digitized by eGangotri

९५

सूक्तम्—ग्रंजीरम्

(अत-तीन)

(महाकालेऽवतीर्णा अष्टाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]शपेऽञ्जीरेण किञ्चाऽपि जयतन्वा; [2]अथ सानुना । सीनीनेनाऽ; [3]नया भूम्या शमापादितया पुनः ॥ १ ॥
[4]न्यवेशयाम खल्वस्मिन् असन्देहं हि मानवे । प्रकृतिं भद्रभावां वै; [5]पातनञ्च तलात् तलम् ॥ २ ॥
कारितं पुनरस्माभिरस्य; [6]तान् प्रविहाय तु । श्रद्धरा ये सुभद्राणि कर्माण्यप्यथ कुर्वते ॥ ३ ॥
लप्स्यन्ते ते प्रतीदानमस्मत्तोऽ विहतक्रमम् । [7]तत् किमद्यापि सन्देहः प्रतिदानेऽस्य वर्त्तते ? ॥ ४ ॥
[8]किमल्लाहो न निर्णेता निर्णेतॄनतियाय वै ? ।

योगः—४॥

CC-0. In Public Domain. Digitized by eGangotri

९६

सूक्तम्—कलम्

(अल-अलक)

(महाकालेऽवतीर्णा एकान्नविंशतिरायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]पठ्यतां स्वप्रभोर्नाम कीर्त्तनेन हि योऽसृजत् । [२]असृजन्मानवं तावत् कललेन तु; [३]पठ्यताम् ॥ १ ॥
प्रभुर्वः परमोदारः; [४]लेखन्या यो ह्यशिक्षयत् । [५]अशिक्षयत् तु नैवाऽयमजानाद् यन् न; [६]हन्त भोः! ॥ २ ॥
मानवस्त्वति विद्रोही वस्तुतः; [७]मन्यते यतः । स्वात्मानं पूर्णकामोऽहम्; [८]स्वंप्रभुं प्रति निश्चितम् ॥ ३ ॥
परावर्त्यं हि युष्माभिर्वर्तते; [९]पश्यथ क्वचित् । तं हि वारयते यो हि; [१०]दासं सुप्रार्थनारतम् ॥ ४ ॥
[११]दृश्यतामभविष्यच् चेदसौ सन्मार्गमाश्रितः । [१२]समादेक्ष्यत् पुनः किम्वा पावनत्वम्; [१३]प्रपश्यथ ॥ ५ ॥
स निषेधयते चेद् वा पराङ् आस्यं करोति च । [१४]वेत्ति नासौ किमल्लाहस्तत् तत् सर्वं विपश्यति ॥ ६ ॥
[१५]विरमत्ययमस्माच् चैत् नैव, केशशिखां वयम् । ऋक्ष्यामः पाणिनाऽऽदाय; [१६]शिखां स्थास्नुं सदूषणाम् ॥ ७ ॥
[१७]आह्वयेत्स निजान् गोप्तॄन्; [१८]वयं गोप्तॄंश्च नारकान् । आह्वास्यामो; [१९]न, नो यूयं मन्यध्वं नोऽस्य यद् वचः ॥ ८ ॥
नमताऽष्टांगपातेन समुपाध्वं (तथैव तम्) ।

योगः—८॥

CC-0. In Public Domain. Digitized by eGangotri

९७

सूक्तम्–भव्या निशा

(अल-कद्र)

(महाकालेऽवतीर्णाः पञ्चायाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]प्राकाश्यं नीतमस्माभिस्त्विदं भव्ये निशाक्षणे । [2]को नु वक्ष्यति भव्या सा निशा किंरूपिणी हि ते ॥ १ ॥
[3]निशा भव्योत्तमान् मासान् सहस्रानतिरिच्य वै । [4]आत्मा देवाश्च कार्यार्थं प्रदिष्टास्तन् निशि ध्रुवम् ॥ २ ॥
निजेन प्रभुणा यान्ति ह्यवयानम्; [5]निशा च सा । ओषः कालं तनोतीह शमेव शं (घनाद् घनम्) ॥ ३ ॥

योगः—३

CC-0. In Public Domain. Digitized by eGangotri

९८

सूक्तम्—बाह्यचिन्हम्

(अल-वय्यिना)

(मदहीनाऽवतीर्णा अष्टाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]शास्त्रिणां, पूजकानाञ्च मूर्त्तीनां, श्रद्धरा न ये । बाह्यचिन्हान्यसंप्राप्य विरमन्ति कले र्न ते ।। १ ।।
[२]अल्लाहाद् वाग्घरस्स्याद् यः पूतपृष्ठानि वाचयेत् । [३]विधीनां यत्र लेखस्स्याच्छुद्धानाम्; [४]नापि शास्त्रिणः ।। २ ।।
व्यभजन्त न यावत् ते बाह्यं चिन्हं त्ववाप्नुवन् । [५]इदं त्वेव तथा ऽऽदिष्टाः "अल्लाहं ते स्तुवन्तु वै ।। ३ ।।
प्रणालीं तत् कृते ह्येव रक्षन्तः पावनीं सदा । मानवास्सरलोदारप्रकृत्या शालिनः पुनः ।। ४ ।।
पूजां प्रतिष्ठितां कुर्युर्दद्युर्दानं यतो ह्ययम् । सत्यो धर्मस्सदाचारो मन्यते (सूत्तमैर्जनैः) ।। ५ ।।
[६]शास्त्रिणां, पूजकानाञ्च मूर्त्तीनां, श्रद्धरा न ये । नारकाग्नौ प्रवत्स्यन्ति ते जनास्सर्वदैव तु ।। ६ ।।
इमे दुष्ठुतमा अत्र सृष्टलोकेषु सर्वथा । [७]श्रद्धरा येऽनुकूलानां कर्त्तारः कर्मणां पुनः ।। ७ ।।
इमे सुष्ठुतमा अत्र सृष्टलोकेषु सर्वथा । [८]प्रतिकारस्वरूपेण तत् प्रभुं समयाऽथ च ।। ८ ।।
वासन्तानि सदा तेभ्यस् तिष्ठन्त्युपवनानि हि । पार्श्वतः प्रवहन्त्योऽथ यत्र नद्यो भवन्ति ह ।। ९ ।।
तत्र ते स्थायिनश्शश्वत् अल्लाहस्तेषु रज्यते । रज्यन्ते ते पुनस्तस्मिन्, विभेति स्वप्रभो र्हि यः ।।१०।।
इदं तस्मा (इदं तस्मा इदं तस्मा इति स्थिरम्) ।

योगः—१०।।

CC-0. In Public Domain. Digitized by eGangotri

९९

सूक्तम्–ज्याचालः

(अ़ज़-ज़िल ज़ाल)

(महाकालेऽवतीर्णा अष्टाऽऽयाताः)

साल्लाहनामज़ापं योऽल्लाहो दयी हितैष्यपि

[1]यदा ज्याचालनं तावत् चरमं भावयिष्यते । [2]ज्या पुनस्सर्वमन्तस्स्थं भारं चैवोद् गिरिष्यति ।। १ ।।
[3]मानवो वक्ष्यती—"यं का विग्नतैनां प्रवाधते" ? । [4]वक्ष्यतीयं तदोदन्तमशेषं घटितं स्वतः ।। २ ।।
[5]यतस्सा प्रेरिता तावत् प्रभुणा वो भविष्यति । [6]व्रजिष्यन्ति तदा लोका वर्गशस्संगता अभि ।। ३ ।।
येन यद् यत् कृतं तेषां तत्तत् संदर्शितं भवेत् । [7]अणुमात्रं कृतं भद्रं द्रक्ष्यति तैरसावपि ।। ४ ।।
[8]अणुमात्रं कृतं पापं द्रक्ष्यति तैरसावपि ।

योगः—४।।

CC-0. In Public Domain. Digitized by eGangotri

१००

सूक्तम्—आजानेयाः

(अल-आदियात)

(महाकालेऽवतीर्णा एकादशाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]आजानेयैश्शपे तावत् ह्युद्गिरद्भिस्तु फूत्कृतीः । [२]स्फुलिंगानथ वर्षद्भिः; [३]प्रातश्शत्रौ पतिष्णुभिः ॥ १ ॥
[४]धूलीरुत्थापयद्भिश्च; [५]निविशद्भिररेर्दलम् । [६]मानवस्त्वन्यथासिद्धस्स्वकीयप्रभवे ध्रुवम् ॥ २ ॥
[७]आजानेयोऽत्र वै साक्षी; [८]हिंस्रोऽसौ मोहितो धनात् । [९]वेत्ति किन्नैष सामग्र्य कवरेभ्यो यदा किल ॥ ३ ॥
विधास्यते समुद्गीर्णम्; [१०]स्थितं यद् हृदयेषु च । करिष्यते हि तल्लब्धम्; [११]असन्देहं तु तत् प्रभुः ॥ ४ ॥
दिने तस्मिन्नशेषेण तेषां यत्तद् विभोत्स्यते ।

योगः—४॥

CC-0. In Public Domain. Digitized by eGangotri

सूक्तम्–कालिका

(अल-कारिआ)

(महाकालेऽवतीर्णा एकादशाऽऽयाताः)

सात्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]कालिकासाऽ; [२]स्ति किं रूपा कालिका? [३]को नु वक्ष्यति। कालिका किं स्वरूपा त्वाम्; [४]क्षणोऽसौ मानवा यदा ।। १ ।।

इतस्ततः पतिष्यन्ति विकीर्णाश्शलभा इव । [५]सन्धुतामिव चैवोर्णा भविष्यन्ति हि पर्वताः ।। २ ।।

[६]तुला गुर्व्यो भविष्यन्ति यस्य (सद्भिस्तु कर्मभिः) । [७]विन्देत् स जीवनं रम्यम्; [८]तुला लघ्व्योऽथ यस्य तु ।। ३ ।।

[९]निहीना क्षुधिता चैव स्थास्यत्यम्वाऽथ तस्य तु । [१०]को नु वक्ष्यति का त्वं सा? [११]ज्वलन्ती कालिका हि सा ।। ४ ।।

योगः—४

CC-0. In Public Domain. Digitized by eGangotri

१०२

सूक्तम्—असुरतंकः

(अत-तकासुर)

(महाकालेऽवतीर्णा अष्टाऽऽयाताः)

साल्लाहृनामजापं योऽल्लाहो दयी हितैष्यपि

[१]प्रतंकोऽसुरतेर्हेतोः पथो वश्चयावयत्यलम् । [२]श्मशाने गमनं यावत्; [३]परं नो; वेत्स्यथाऽऽशु वै ॥ १ ॥
[४]परं नो, ज्ञास्यथैवाऽऽशु; [५]परं नो, यद्यवेत्स्यत । निश्चितात् खलु विश्वासात्; [६]द्रक्ष्यथाऽग्निं हि नारकम् ॥ २ ॥
[७]द्रक्ष्यथैनं च युष्माकं दृष्ट्या विश्वस्तया किल । [८]दिने तस्मिन् बिलासानां प्रक्ष्यध्वे विषये तथा ॥ ३ ॥

योगः—३

CC-0. In Public Domain. Digitized by eGangotri

१०३

सूक्तम्–अस्तमयदहर्

(अल-अस्र)

(महाकालेऽवतीर्णास्त्रय आयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अह्ना त्वस्तमयेना ऽहं शपेऽ; [2]थ मानवः पुनः । निहीनो ह्येव; [3]ये लोकाश्श्रद्धरास्तान् विहाय तु ॥ १ ॥
यैरकार्यनुकूलानि चैव कर्माणि, किञ्च ये । प्रेरयामासुरन्योऽन्यं सत्यसन्तोषवर्त्मसु ॥ २ ॥

॥

योगः—२

CC-0. In Public Domain. Digitized by eGangotri

१०४

सूक्तम्—अयशोलुब्धः

(अल-हुमज़ा)

(महाकालेऽवतीर्णा नव आयाताः)

सात्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]धिगेनं त्वयशोलुब्धं, कस्यचिच् चाप्यकीर्त्तिदम् । [२]आर्जयल् लौकिकार्थं यो न्यदधात् सुक्रमेण च ॥ १ ॥
[३]चिन्तयत्यमृतत्वं तं तद् रिक्थं नेष्यति ध्रुवम् । [४]परन्नैतद्, हुतेध्मेऽसाववक्षिप्तो भविष्यति ॥ २ ॥
[५]हुतेध्मः को नु युष्माकं ज्ञानमस्य कुतो भवेत् । [६]समिद्धः पावकोऽल्लाहात्; [७]हृन्दि चाप्येति यो ध्रुवम् ॥ ३ ॥
[८]स्थास्यन्ति संवृतास्तत्र; [९]प्रांशुस्तम्भान्तरे धृताः ।

योगः—३॥

CC-0. In Public Domain. Digitized by eGangotri

१०५

सूक्तम्—पीलुः

(अल-फील)

(महाकालेऽवतीर्णाः पंचाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]अर्दशि किन्न युष्माभिः प्रभुणा वः कृतं हि यत् । पीलुवद्भिर्जनैस्सार्द्धम् ?, [२]अमीषां लाघवं न किम् ॥ १ ॥
निष्फलं तेन चाकारि ?; [३]प्रेषितास्तेषु पक्षिणाम् । डीयमाना व्रजाश्चैव; [४]पाषाणैर्ये त्वताडयन् ॥ २ ॥
शर्करालनिभैस्तावत्; [५]सद्योजञ्च बुसं यथा । तथा यांस्तेऽश्यरूपेण (लीलया) पर्यवर्त्तयन् ॥ ३ ॥

योगः—३

CC-0. In Public Domain. Digitized by eGangotri

१०६

सूक्तम्—कुरैशः

(कुरैश)

(महाकालेऽवतीर्णाश्चत्वार आयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]यतोऽ (ल्लाहेन) सम्बन्धः कुरैशानां सुरक्षितः । [२]काव्येन व्यवसायार्थं यात्रायां ग्रीष्मशीतयोः ॥ १ ॥
[३]अतः कर्त्तव्यबुद्ध्या तैः पूज्यो देवोऽस्य वेश्मनः । [४]आदयत् क्षुधितान् यस्तान् अरक्षत्तान् भयाच् च यः ॥ २ ॥

योगः—२

CC-0. In Public Domain. Digitized by eGangotri

सूक्तम्–सामान्यमौदार्यम्

(अल-माऊन)

(महाकालेऽवतीर्णाः सप्ताऽऽयाताः)

सा़ल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]किन्नु दृष्टः पुमान्? आह—"मिथ्याकर्मफलानि" यः। [२]स एवाऽयं ह्यनाथान् यो वक्ति 'धिग् धिक्', पुनः पुनः ॥१॥
[३]गमयत्यशनं नाऽथ क्षुधितेभ्यः कदाचन। [४]ईदृशान् पूजकान् नाशस्सततं संप्रतीक्षते ॥ २ ॥
[५]प्रार्थना—विषये ये हि प्रमत्ताः; [६]यच् चरन्ति च। सर्वं प्रदर्शनायैव; [७]नोक्तास्सन्दर्शयन्त्यपि ॥ ३ ॥
यद्धि सामान्यमौदार्यम् (कार्पण्यान्नष्टचेतसः)।

योगः—३॥

१०८

सूक्तम्–वैपुल्यम्

(अल-कौसर)

(महाकालेऽवतीर्णास्त्रय आयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]हन्त ! तुभ्यं हि वैपुल्यमयच्छम्; [2]तत् स्वकं प्रभुम् । स्तुहि त्वं पुनरेवास्मै पूजाद्रव्यं समर्पय ॥ १ ॥
[3]हन्त ! यस्तेऽशुभाशंसी खल्ववस्तात् स एव तु ।

योगः—१॥

CC-0. In Public Domain. Digitized by eGangotri

१०९

सूक्तम्—श्रद्विहीनाः

(अल-काफिरून)

(महाकालेऽवतीर्णाष्षडाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[१]कथ्यताम् "श्रद्विहीना भोः! ; [२]यजध्वे यं न तं त्वहम् । यजेऽ; [३]हञ्च यजे यं तं यजध्वे न पुनस्तथा ॥ १ ॥
[४]यक्ष्ये नाहञ्च यं यूयं यजध्वे सततं किल । [५]यजे यञ्च न तं यूयं यक्ष्यध्वे पुनरेव च ॥ २ ॥
[६]प्रणाली मे मयैव स्ताद् युष्माभिर्वश्च तिष्ठतात् ।

योगः—२॥

CC-0. In Public Domain. Digitized by eGangotri

११०

सूक्तम्–साह्यसंभारः

(अन-नस्र)

(महाकालेऽवतीर्णास्त्रय आयाताः)

सा़ल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अल्लाहात् साह्यसंभारे तूपेते विजयो भवेत् । [2]प्रणालीं, दृश्यतां, लोका अल्लाहस्य विशन्ति ह ॥ १ ॥
अनेकेषु हि संघेषु; [3]गीयतां तद् यशः प्रभोः । इष्यताञ्च क्षमा तस्य, हन्त ! सज्जस्स सर्वदा ॥ २ ॥
दयां दर्शयितुं लोकं यदिष्टाऽभ्यधिकां किल ।

योगः—२॥

CC-0. In Public Domain. Digitized by eGangotri

१११

सूक्तम्–अभ्र लुब्धः

(अल-लहब)

(महाकालेऽवतीर्णाः पञ्चाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]अभ्रलुब्धबलं तावन् नाशमेष्यत्यसावपि । [2]सम्पदस्तस्य लाभाश्च गोपायिष्यन्ति तं न वै ॥ १ ॥
[3]आमतिष्यति शीघ्रं स समिद्धेऽग्नौ; [4]अमुष्य च । वहन्ती स्त्री हि काष्ठानि; [5]धारयन्ती निजे गले ॥ २ ॥
खजूरतन्तुसंदानं किञ्च नद्धा भविष्यति ।

योगः — २॥

११२

सूक्तम्—एकोऽप्रतिमः

(अल-इखलास)

(महाकालेऽवतीर्णाश्चत्वार आयाताः)

साल्लाह्नामजापं योऽल्लाह्रो दयी हितैष्यपि

[१]ब्रूह्येकोऽप्रतिमोऽल्लाहोऽ; [२]ल्लाहश्चासौ विनाऽऽश्रयम् । सर्वाधारोऽ; [३]नपत्यश्च नापत्यं स च कस्यचित् ॥ १ ॥
[४]न तस्य प्रतिमा चाऽस्ति (योऽतिरिच्य स्थितोऽखिलान्) ।

योगः—१॥

CC-0. In Public Domain. Digitized by eGangotri

११३

सूक्तम्–उषाकालः

(अल-फलक)

(महाकालेऽवतीर्णाः पञ्चाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]कथ्यताम्—शरणं यामि प्रभोस्तस्योषसोऽ; [2]जनि । तेन यद् दुरितात् तस्य; [3]सूचीभेद्यात् तमोंऽ हसः ॥ १ ॥

[4]पाप्मनश्च पुनस्तेषां मायाविग्रन्थिकारिणाम् । [5]पाप्मनश्चैव सेर्ष्याणामीर्ष्यन्त्येते यदा यदा ॥ २ ॥

योगः—२

CC-0. In Public Domain. Digitized by eGangotri

११४

सूक्तम्–शरणम्

(अ्रन-नास)

(महाकालेऽवतीर्णाष्षडाऽऽयाताः)

साल्लाहनामजापं योऽल्लाहो दयी हितैष्यपि

[1]कथ्यताम्—"शरणं यामि लोकभर्त्तुस्तथैव च । [2]महाराजस्य लोकानाम्; [3]ईड्यस्यैषां पुनस्तथा ॥ १ ॥
[4]इष्यतां शरणं पापात् तस्माद् वै स्तेयचारिणः । परावर्त्तनशीलाच् च; [5]हृत्सु यो दुरितं वपेत् ॥ २ ॥
[6]दुष्टेभ्यश्चापि जिन्नेभ्यः किमनुष्यादथाऽपि वा ।

इति त्रिशत्तमं पारायणमवसितम्

इति श्रीसत्यदेववर्मकृतौ सांस्कृते कुराणे पारायणत्रिशतकम् ।

योगः—२॥

CC-0. In Public Domain. Digitized by eGangotri

अथ कुराणस्य पारायणान्ताप्रार्थना !

१. प्रभो मे ! याचे त्वां भवति मम कब्रस्य खलु या,
स्थिता स्वान्ते भीतिः परिणमय हर्षे हि ननु ताम् ।
दयां त्वञ्चादध्या मयि खलु कुराणेन महता,
प्रकाशं, नेतारं, सकृपमथ तं त्वं मयि कुरु ॥

२. प्रभो मे ! साह्यन्ते पुनरभिलषे ते सुदयया,
स्मरेयं तत् सर्वं ह्यखिलमपि यद् विस्मृतमभूत् ।
न चाऽहं यज् जाने तदपि खलु मां शाधि सततम्,
अमुष्याऽध्यायस्य प्रवितर च सौभाग्यमनिशम् ।

३. साक्षिणं कुरु तञ्चापि (पुनरुत्थापनाऽहनि— ।
कृतेषु मम कृत्येषु) विश्वभृज्जगदीश्वर !

॥ इति समाप्तमिदं सांस्कृतं कुराणम् ॥

CC-0. In Public Domain. Digitized by eGangotri

परिशिष्टम्

इदं बृहत् कार्यं सम्पादयता मया केचन अरबीभाषाशब्दा दृष्टा ये ध्वन्यात्मकतया संस्कृतेन बहुसाम्यतामावहन्ति। तेऽथ यत्र तत्र सामान्यैरेव भाषिकप्राकृतिकपरिवर्त्तनैस् संस्कृतेऽपि समार्थं प्रकटयन्ति। एवंविधास्संस्कृताश्शब्दा मयाऽत्र ग्रन्थे प्रयुक्ताश्चापि। तेषां कतिपया अत्र परिशिष्टे संस्कृत-भाषिकनिर्वचनविशदीकरणैस्समं समादरणीयानां पाठकानामनुशीलनाय उपन्यस्यन्ते। ममेदमति प्रसादकरं स्याद् यदि केऽपि साहित्यसागरान्तस्तलप्रवेशप्रवृत्तयो विपश्चितः अस्मिन् हारित्यपूर्णे भाषाविज्ञानक्षेत्रेऽधिकं प्रयत्नं कृत्वा अद्य यावदविज्ञाता भाषिकसाम्यता अधिकाधिकं प्रकाशतामानयेयुः।

निरुक्ताः कतिपयशब्दाः

१. **अकबर**—अर्कवरः। अर्क्यते स्तूयते इत्यर्कः। तेषां वरः प्रशस्यः।

२. **अनकबूत**—अणकलूतः। अणकः पापात्मा चासौ लूता। (अल अनकबूत-आयातः ४१)

३. **अस्र**—अहर्। (अस्तमयत्) दिनम्। (अल अस्र, आ० १)

४. **अली**—अलिः। सामर्थ्यम्। मुहम्मद अली=मुहम्मदः अलिः सामर्थ्यमस्य।

५. **अलयसअ**—अर्यशनः। अरीन् अश्नाति इति।

६. **अतीक**—अतिक्रान्तः। समयमतिक्रान्त इति। प्रत्न इत्यर्थः।

७. **अन नूर**—अनूरुः। बालसूर्यः। तत्प्रकाश इति लक्षणया। सूर्यसूतोऽरुणोऽनूरु इत्यमरकोषः। (अन नूर, आ० ३५-४०)

८. **अनसार**—अनुसारः। अनु पश्चात् सरणं गमनं यस्य सः। सहाय इति।

९. **अय्यूब**—अयेभः। अयो लोहस्तद्रूपा इभा गजा यस्य सः।

१०. **अजीज**—अजयेशः। अजयश्चासौ ईशः स्वामी। (प्रमुखोऽधिकारी)

११. **अलक**—कललम्। मांसम् इति। (अल अलक, आ० २)

१२. **अबतर**—अवतरः। अव नीचैस्तरः। तरप् प्रत्ययेन।

१३. **अम्बिया**—अंभधियः। अम्भसि जले लक्षणया सारवस्तुनि धियो बुद्धयो येषान्ते (विद्वांस इति) (अलअम्बिया)।

१४. **आद**—आद्यः। आदौ भवः। अर्वेषु दक्षिणो भूभागस्साम्प्रतं मरुभूमिः। तद्वासिन आद्याः।

१५. **आराफ**—आरोहः। उच्चैस्तमां आरोहः। (अल आराफ, आ० ४६-४९)

१६. **आयत**—आयातः। आगत इति।

१७. **अंसारी**—अनुसारी। पश्चाद् गामीति। अंशुचारीति वा। अंशुभिस्सरतीति सूर्यश्चन्द्रो वा।

१८. **इमाम**—अमामः। अमेन ज्ञानेन सह अमति चरति इति। अथवा अमा-सह जनैरमति चरति धार्मिककार्येषु।

CC-0. In Public Domain. Digitized by eGangotri

१९. **इब्राहीम**—अब्रह्मः । नो ब्रह्म अब्रह्मः । ब्रह्मणा ज्ञानेन नः उपमा सादृश्यं यस्य सः । सज्ञान इति । न स्यान्निषेधोपमयोरिति मेदिनीकोषः । (इब्राहीम, आ० ३५-४०)

२०. **इस्रायील**—ईश्वरालीनः । ईश्वरे आलीनः ।

२१. **इलयास**—ईड्याशः । ईड्ये स्तुत्ये आशा यस्य ।

२२. **इलयासीन**—ईड्यासीनः । ईड्यस्स्तुत्यस्सन् आसीनो गुरुभावेन ।

२३. **इदरीस**—इन्द्रियेशः । इन्द्रियाणामीशः ।

२४. **इबलिस**—इभालीशः । इभालीनां गजपंक्तीनां ईशः स्वामी ।

२५. **इस्माइल**—अस्मयेडः । अस्मयान्निरभिमानतावशाद् ईडा स्तुतिरस्य ।

२६. **इसहाक**—इष्वासः । इषव आसमन्तात् अस्यन्ते क्षिप्यन्ते युद्धेऽनेन इति ।

२७. **ईसा**—ईशः ।

२८. **उज्जा**—उषजा । उषाकाले जाता प्रभा । प्रागर्वभूमौ देवीरूपेण मता ।

२९. **उम्मी**—ऊनमी । ऊनं हीनं मानोऽस्येति (निर्गुणत्वात्) उद् गमीति वा । उद् उन्नतो गमो ज्ञानं यस्य सः ।

३०. **कबर**—कवरः । कं न संवृणोति इति । यत् किमप्यन्तर्भावयति ।

३१. **क़मर**—कम्रः । कमनीयः सुन्दरः । चन्द्र इति लक्षणया । (अल क़मर, आ० १)

३२. **कलमा**—कल्पः । विधिरिति । कल्पःशास्त्रे विधौ न्याये इति मेदिनीकोषः ।

३३. **कारिआ**—कालिका । कालरूपा यमरूपा (भीषणा रात्रिः स्त्री वा) (अल कारिआ)

३४. **कारून**—कारूनः । कारुषु शिल्पिषु ऊनो हीन इति । कार्यदून इति वा ।

३५. **काबा**—काव्यः । शुक्राचार्यनाम । शुक्रो दैत्यगुरुः काव्य इत्यमरकोषः । व्यक्तिनाम्ना स्थाननाम ।

३६. **कुरैश**—कुरेशः । कौ पृथ्व्यां रायि च शेते मज्जति इति । वस्तुव्यवसायिलोकः । व्यक्तिनाम स्थाननाम्नि संक्रान्तम् ।

३७. **कुम्मल**—कुमलः । कौ पृथ्व्यां मलं निस्सार इति ।

३८. **कुरआन**—कुराणम् । कौ पृथ्व्यां रण्यते ध्वन्यते वाचनादिभिरिति । रणः कोणे क्वणे इति मेदिनीकोषः ।

३९. **खाली**—खालीनः । खे शून्ये आलीनः । सर्वथा शून्य इति ।

४०. **खुलअ**—खुल्लकः । हीनः । लक्षणया त्यागयोग्यः स्त्रिया ।

४१. **गैब**—गर्भ्यः । गर्भे रहस्ये भवः ।

४२. **ज़करिया**—जयक्रियः । जयाय क्रियाऽस्येति । यज्ञक्रियो वा । यज्ञाय क्रियाऽस्येति ।

४३. **ज़ारियात**—जारवाताः । जारा नाशका वाता इति । वयो हानिकरा वाता इति । (अज ज़ारियात, आ० १)

४४. **जासिया**—जानुशयाः, जान्वासना वा । (अल जासिया, आ० २८)

४५. **जिन्न**—जिनः । जित्वरो जयशील इति । जिनो······जित्वरे त्रिषु इति मेदिनीकोषः । (अल-जिन्न, आ० १)

४६. **ज़िलज़ाल**—ज्याचालः । भूचाल इति । ज्येति पृथ्वी नाम वैदिकनिघण्टुकोषे । (अज़ ज़िल ज़ाल, आ० १)

४७. **ज़िहार**—जीवाधारः । जीवानां धर्त्री गर्भे । मातेति ।

४८. **जिहाद**—आजिसात् । आजौ युद्धे इति । सात् प्रत्ययः । आलोपात् जिसात् ।

४९ **जिबरील**—जीवरीढः । जीवेषु रीढ़ा अवमानना यस्य सः । रीढ़ाऽवमाननाऽवज्ञेति अमरकोषः । सत्वप्रधानास्तामसलोकेन प्रायोऽवमन्यन्ते ।

CC-0. In Public Domain. Digitized by eGangotri

५०. **जुखरुफ**—रुक्मरंजनम् । रुक्मणस्सुवर्णस्य कृतं रंजनं भूषेति । (अज़ जुखरुफ, आ० ३५)
५१. **ज़ुमर**—सृमरः । सरणशीलो जनः । (अज़ ज़ुमर, आ० ७१-७३)
५२. **जुमुआ**—समूहः । (अल जुमुआ, आ० ६)
५३. **ज़ुहा**—ज्योषा । ज्यायां पृथ्व्यां उषा । क्षितिजे उषः काल इति । (अज़ ज़ुहा, आ० १)
५४. **ज़ैद**—जयैधः । जयेन एधो वृद्धिरस्य । प्रगतिपर इति ।
५५. **ज़ैनव**—जिनाभा । जिनेषु जयशीलेषु आभा यस्याः । ज्ञानाभा वा । ज्ञानेन आभा यस्याः ।
५६. **तमीज़**—शमिजः । शमिषु मुनिषु जातो मर्यादाक्रमः शमिजः ।
५७. **तकासुर**—तंकासुरः । तंक आतंकोऽसुरवृत्तीनाम् । (अत-तकासुर, आ० १)
५८. **तलाक**—त्यागः । सम्बन्धविच्छेदः । (अत-तलाक, आ० १-१०)
५९. **तारिक**—तारकम् । नक्षत्रे चाक्षिमध्ये च तारकमिति शाश्वतकोषः । (अत-तारिक, आ० १)
६०. **तुवा**—स्तवः । स्तुतिरिति ।
६१. **तुब्बअ**—तुवरकः । तुवरक नामौषधिद्रव्यम् । तद् व्यवसायकुल्लोको लक्षणया तुवरकः । तुवरस्तु कषायोऽस्त्रीत्यमरकोषः ।
६२. **तौबा**—स्तवः । प्रायश्चित्तरूपस्स्तवः । स्तवस्स्तत्र इति भृशं वद । (अत-तौबा, आ० १०४)
६३. **दरबन्द**—दरबन्धः । दरस्य सावकाशस्थानस्य बन्धः पिधानम् ।
६४. **दरद**—दरदः । दरं भयं ददति इति । दरस्त्रासो भीतिरित्यमरकोषः ।
६५. **दह्र**—घस्रः । दिनमिति । (अद-दह्र, आ० १)
६६. **दाऊद**—दान्यूधः । दानिनामूधस्स्रोतस्स्थानम् । अतिदानवानिति । ऊधस्तु क्लीवमापीनमित्यमरकोषः । दानोध इति वा । दानस्य ऊधः इति ।
६७. **नज्म**—न्यग्भः । न्यङ् नीचैर्गतिमद् भं तारकमिति । (अन नज्म, आ० १)
६८. **नवा**—नवा । नवा (वार्त्तेति) । (अन-नवा, आ० २)
६९. **नबी**—नवी । नवं (ज्ञानं) अस्यास्ति इति ।
७०. **नमाज़**—नमस्या । नमनक्रिया ।
७१. **नस्र**—अनश्वरः । न नाशशील इति । प्रागर्वेषु हिमयरनाम्ना किवलेन (कवीला) पूजितो देवः ।
७२. **नाज़ियात**—नाशयितारः । (अन-नाज़ियात, आ० १)
७३. **निसा**—निशा । निशारूपा रात्रिरूपाः कामोत्तेजकास्स्त्रियो लक्षणयाऽत्र निशाशब्दवाच्याः । (अन-निसा)
७४. **नूह**—नहुषः । जातिप्रमुखस्सामन्तरूपः । नहुषो नागभेदे स्यात् सोमवंशनृपेऽपि चेति मेदिनीकोषः । (नूह)
७५. **नूर**—अनूरुः । अविद्यमानौ ऊरू यस्य सः । सूर्यसारथिरिति ।
७६. **पैगम्बर**—प्रागमवरः । प्रकृष्टेन आगमेन ज्ञानेन वरश्श्रेष्ठः ।
७७. **फ़ातिर**—कर्त्तृ । (फ़ातिर, आ० १)
७८. **फारोह**—फारोहः । फानां यज्ञसाधनानां आ समन्तात् रोहणं उत्पत्तिर्यस्य । कल्याणकृद्द्रव्याणां समुत्पादक इति ।
७९. **फिरऔन**—प्रिययौनः । प्रियं यौनं तत्सम्बन्धि कर्माऽस्य । भोगप्रधान इति ।
८०. **फील**—पीलुः । हस्तीति । पीलु···मतंगजे इति मेदिनीकोषः । (अल-फील, आ० १)
८१. **फ़ुरकान**—स्फुरकम् । स्फुरणो विवेक इति । (अल-फुरकान, आ० १)
८२. **बद**—बत । बत इति निपातः खेदानुकम्पयोरिति निरुक्तम् ।
८३. **बदतमीज़**—बतशमिजः । खेदकरी शमिजा सभ्यताऽस्य ।

CC-0. In Public Domain. Digitized by eGangotri

८४. **बक़रा**—कर्बुरा। कर्बरा, बक़रा इति कालकृतो वर्णव्यत्ययाद् भेदः। चित्रविचित्रा कर्बुरा गावोऽपि कर्बुरा लक्षणया व्यपदिष्टाः। चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरकोषः। (अल-बक़रा)

८५. **बनी**—बनी। बनमस्याऽस्तीति। बनवासीत्यर्थः।

८६. **बलद**—बलधः। बलं प्राण्यन्नादिरूपं दधाति इति। (अल-बलद, आ० १)

८७. **बद्द**-वेदः। वेदज्ञानम्। प्रागर्वेषु कल्पनाम्ना किबलेन देवरूपेण पूजितः (ग्रन्थः?)

८८. **बअल**—बालः। बालसूर्यस्य प्रकाशो लक्षणया बाल इति। सीरिया, फिलस्तीन लबनान वाविल-मिश्रादि देशेषु वालसूर्यपूजा प्राक्।

८९. **बोसा**—वोसः। वक्त्रेण उद्गत्य संयोगः। एषां त्रयाणामपि पूर्वपूर्वाक्षरमादाय सन्धिविधानात् व+उ+स=वोस इति। 'वक्त्रेण उद्गत्य संयोगः' वोसः।

९०. **बुज़ुर्ग**—वयोरुगः। वयः कारणात् ऊरु बृहत् गमो ज्ञानमस्य।

९१. **बुतपरस्ती**—बुद्धप्रशस्तिः। बुद्धस्य पूजा।

९२. **मदयन**—मदयनः। मदेन अयनं गमनमस्य। शकन्धुकर्कन्धुवत्।

९३. **मर्यम**—मर्यमा। मर्यस्य पुरुषस्य मा लक्ष्मीरूपा स्त्री इति।

९४. **मह्ल**—मह्लः। महं उत्सवं प्रसन्नतां राति ददाति।

९५. **मलये आला**—मलयालयः। मलये पर्वते (लक्षणया उच्चैः) आलयो यस्य। उच्चैस्स्थितिमानिति।

९६. **मनात**—मणादा। मणमितं (अत्यधिकमितिभावः) अत्तीति सा। यस्या अग्रे अत्यधिकमन्नादिकं उपहारीक्रियते अदनाय। प्रागर्वेषु पूजिता तद्विधा देवी। (अन नज्म, आ० २०)

९७. **मसीह**—मिसीहः। मिसेश्शतपुष्पायाः कृते ईहा चेष्टाऽस्य। लक्षणया गुणवद्वस्तु कृते चेष्टन इत्यर्थः।

९८. **मज़ूस्**—मंजूषः। मंजुः मनोहरः उषाऽस्येति मंजूषः। उषः कालोत्थानपरो जन इति।

९९. **मक्का**—महाकालः। शिवशक्तिः। उभयत्रान्तिमवर्णलोपः।

१००. **मदीना**—मदहीनः। मदाद् दोषाद् हीनः अपास्तः। (अल बकरा प्रारम्भे एव)

१०१. **महमूद**—महामदः। महान् मदः प्रसन्नताऽस्य।

१०२. **मजीद**—मनोजित्।

१०३. **माजूज**—मद्यजः। मां यजते इति।

१०४. **मुरतद**—मर्त्तधः। मर्त्तेषु जनेषु अधो नीचः। शकन्धुकर्कन्धुवत्।

१०५. **मियां**—अमिय (अमृतम्) स्नेहादरकारणादीदृशी संज्ञा वा उपाधिर्वा।

१०६. **मुआफी**—ममाविः। मम अविः रक्षेति। मह्यं रक्षणं देहीति।

१०७. **मौलाना**—मौलानः। मूल एव मौलः। मौलेन (शास्त्रेण) अनिति प्राणिति इति।

१०८. **मौलवि**—मौलवित्। मौलं शास्त्रं वेत्तीति।

१०९. **मुसीबत**—महासिव्रतम्। महासि (धारा) व्रतम्। कठिनतेति।

११०. **मोहतमिम**—महत्त्वमितः।

१११. **मुल्ला**—मौललः। मौलस्य शास्त्रज्ञानस्य लः आदाता।

११२. **मुबारक**—मुद्भारकम्। मुदां प्रसन्नतानां भारकम्।

११३. **मुफ्त**—मुक्तः। धनादिबन्धनान्मुक्तं वस्तु।

११४. **मुश्किल**—शमुकीलम्। शमु शान्तिः कीलिता बद्धा यत्र।

११५. **मूसा**—मूषः। मुष्णाति (सद्गुणान्) इति।

११६. **मैदान**—महीतानः। मह्यास्तानो वितान इति।

११७. **मोमिन**—मन्मनाः। (अल-मोमिन, आ० ७)

CC-0. In Public Domain. Digitized by eGangotri

११८. **मोमिनून**—मन्मनसः। (अल-मोमिनून, आ० १)
११९. **यमन**—यमनः। संयमनम्। इन्द्रियादीनां निग्रहो यत्र। यमनदेशोऽर्वेषु प्रख्यातः।
१२०. **यउक**—यज्ञौकः। यज्ञस्य ओकस्स्थानम्। प्रागर्वेषु खैवान-किम्वलेन देवरूपेण पूजितं यज्ञौकः।
१२१. **यगूस**—यजुष्। यजुर्वेद इति। प्रागर्वेषु मज़्हज जुरश इति द्वाभ्यां किंवलाभ्यां देवरूपेण पूजितं यजुष् इति।
१२२. **यह्या**—अयोहयः। अयो लोहस्तद्रूपाः (कठिनाः) हया अश्वा यस्य सः।
१२३. **यसरिब**—यश ऋभुः, यशर्भुः। यशसा ऋभुर्देवमयः। अर्वेषु एकस्य भूभागस्य नाम।
१२४. **याकूब**—याप्यकूपः। याप्यो निन्द्यः कूपोऽस्येति।
१२५. **यासीन**—हयासीनः। हयेऽश्वे आसीनः (पुरुषः) हवर्णलोपः। सम्बुद्धौ यासीन। (यासीन, आ० १)
१२६. **याजूज**—यज्ञजः। यज्ञाज् जात इति।
१२७. **यूनुस**—यौवनाशः। यौवनमश्नाति अन्यस्येति। यौवनेश इति वा। यौवनस्येश इति।
१२८. **यूसुफ**—यूषपः। यूषं रसं पिबतीति। यूषामलकयूषस्तु ग्राहीत्यायुर्वेदे।
१२९. **रअद**—ह्लादः। उच्चैश्शब्दः। (अर-र्अद, आ० १३)
१३०. **रसूल**—रसूलः। रसेन परमानन्देन उल्लसतीति। सलोपः।
१३१. **रूम**—रौमाः। अजाऽविरूपरोमप्रधानपशुबहुले देशे जाता जनाः। (अर-रूम, आ० २)
१३२. **लहब**—लभकः। स्वार्थान्धतया प्राप्तिपर एव। (अल-लहब, आ० १)
१३३. **लात**—ललिता। देवीति। शाक्तसम्प्रदायस्य महाशक्तेर्रूपान्तरं ललिताऽभिधा पूज्या देवी। अर्वेषु प्राक् पूजिता देवी। (अन-नज्म, आ० १९, २०)
१३४. **लुकमान**—लुक्मानः। लुग् अदर्शनं गतोऽहंमानोऽस्येति। (लुक़मान, ३१ सूक्त)
१३५. **लूत**—लूतः। लूनश्छिन्नः कस्माच्चिदंगात्।
१३६. **लैल**—लीलः। विविधलीलो रात्रिकालो लीलशब्देन प्रोक्तः। (अल-लैल, आ० १)
१३७. **शहीद**—सहीध्म। इध्म इन्धनमिति अमरकोषः। स्वातन्त्र्यसंग्रामे सहीध्म जातः।
१३८. **शम्स**—हंसः। सूर्य इति। हंसस्स्यान्···अर्के इति मेदिनीकोषः। (अश-शम्स, आ० १)
१३९. **शुअरा**—शुक्राः। कवयः। शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः इत्यमरकोषः। (अश-शुअरा, आ० २२४)
१४०. **शू एब**—शुभेभः। शुभा इभा यस्य सः। शुभलक्षणगजस्वामीति।
१४१. **शूरा**—सूरयः। दूरदृक् कोविदस्सूरी इति रभसकोषः। पश्यन्ति सूरयो दिवीव चक्षुराततम् इति वेदेऽपि।
१४२. **सबा**—सवः। यज्ञमयं कर्म। तत्कृत् एको वैभवशाली सम्प्रदायः प्रागर्वेषु यमनभूभागे ख्यातः। (सबा, आ० १५)
१४३. **समूद**—समुद्गः। समवेत्य अन्यैः उद्गच्छति इति तादृशो लोकः।
१४४. **समिरी**—सामरिकः। समरे युद्धे साधुः। युद्धप्रिय इति।
१४५. **सहाबा**—सहायः। मोहम्मदसहायास्तात्कालिका जनाः।
१४६. **सय्यद**—श्रेयोदः। श्रेयः कल्याणं ददातीति।
१४७. **सालेह**—शालेभः। शालायां इभ इव। गजवत् स्थूलशरीरः।
१४८. **साविई**—सहायी। प्रागर्वेषु ख्याता याह्यानुयायिनः सहायाश्च।
१४९. **साहब**—साभः। आभया सहितः।
१५०. **सुवाअ**—सुवाक्। शोभना वाक्। सरस्वतीति। प्रागर्वेषु हुज़ैलानां किम्वलेन पूजिता देवी। सरस्वती ब्रह्मणो हि पत्नी।

CC-0. In Public Domain. Digitized by eGangotri

१५१. **सुलेमान**—शिलामानः । शिलेव मानो भार आकारो वाऽस्य ।
१५२. **सुबा**—शुभम् । कल्याणम् ।
१५३. **सुपारा**—सुपारः । शोभनः पारो वाचनेनास्येति ।
१५४. **सूरा**—सूक्तम् । कतिपयमन्त्राणां वचनानां वा अधिसंग्रहः ।
१५५. **हराम**—अहिरामः । अहौ वृत्रासुरे रमणं राम इति । हीने रतिरिति ।
१५६. **हजरत**—सहजरतः । सहजे भक्तिमार्गे रत इति । सलोपः ।
१५७. **हामान** – सामानः । साम्ना गानेन अनिति प्राणिति इति । गानाजीविक इत्यर्थः ।
१५८. **हारून**—हारदूनः । हारैः पराजयैर्दूनः क्षीण इति । (अस-साफ्फात, आ० ११४-११६)
१५९. **हुनैन**—सुनयनः । सुनेत्र इति । सुनेता इति वा ।
१६०. **हुतमा**—हुतमः । अग्निरिति । हुतं पदार्थं मीनाति हिनस्ति इति ।
१६१. **हुसैन** —सुसेनः । सुषेणः, शोभनाः सेना यस्य सः ।
१६२. **हूद**—सूदः । सूदनो नाशनो दुष्टवृत्तीनाम् ।

CC-0. In Public Domain. Digitized by eGangotri

विभिन्नसूक्तावतारस्थानानि

मदहीनाऽवतीर्णानि सूक्तानि:—

२—५, ६, २४, ३३, ४७, ४८, ५७—६६, ६८.

योगे विंशतिः (२०)

महाकालाऽवतीर्णानि सूक्तानि:—

१, ६—८, १०—२३, २५—३२, ३४—४६, ४९—५६, ६७—९७, ९९—११४.

योगे चतुर्णवतिः (९४)

CC-0. In Public Domain. Digitized by eGangotri

लेखक-परिचयः

सत्यदेवाभिधो वर्मा शास्त्री चैम्० ए० च खल्वहम् ।
ग्रामस्याऽजाहरस्यास्मि कुरुक्षेत्रस्य मण्डले ॥१॥

पिता मे वीरसिंहोऽभूद् वीरसिंहो यथार्थतः ।
तुलसीत्यभिधा माता शैशवे मे दिवंगता ॥२॥

मुक्तिरामाभिधः पूज्यो गुरुर्मे विदुषां वरः ।
आत्मानन्द इति ख्यातस्तुरीये तावदाश्रमे ॥३॥

शिक्षा प्रारम्भिकी जाता पुष्टाहारे सुविश्रुते ।
गुरुकुले परस्ताद् यत् पाकिस्ताने व्यलुप्यत ॥४॥

खालसाकालिजे पूर्वममृतसरसि स्थिते ।
काश्चित् समा मनोयोगाच्छात्रा अध्यापिता मया ॥५॥

त्रयोविंशतिवर्षाणि मुकुन्दलालकालिजे ।
यमुनानगरे पश्चात् कृतमध्यापनम्मया ॥६॥

ईसवीये पुनर्वर्षे ह्यष्टसप्ततिके न्वहम् ।
जातस्सेवाविनिवृत्तष्षष्ट्यब्दे त्वायुषः किल ॥७॥

रा०स्व०संघाद्यकर्त्तुर्वै हेडगेवारविश्रुतेः ।
डाक्टरस्य चरित्रञ्च मयाऽऽबद्धमनुष्टुभा ॥८॥

रूपकं पुनरेकञ्च शिवसमाधिसंज्ञितम् ।
प्रसादात् कृतवानस्मि मुक्तपद्यान्यथापि च ॥९॥

विनोदविन्दवश्चापि तावदष्टशतोत्तरम् ।
संस्कृतेन निबद्धा ये संस्कृतज्ञविनोदकाः ॥१०॥

संस्कृते वर्णबोधोऽपि सचित्रोऽस्ति कृतो मया ।
वर्णबोधसमं येन बुध्यन्तां संस्कृतं जनाः ॥११॥

सुतौ विमर्शराजीवौ जननी कमला तयोः ।
जीवन्त्वेते चिरायैषां योगक्षेमेऽथ चास्तु धीः ॥१२॥

सरस्वत्याः प्रसादेन यत् किंचित् कृतवानहम् ।
तेन तुष्यतु सा देवी क्षमन्ती स्खलितानि मे ॥१३॥

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri